
नेहरूचरितमहाकाव्यम्



नेहरूचरितमहाकाव्यम्

श्रीनेहरूमहोदयानाम् आत्मकथायाः संस्कृतपद्यानुवादः

मूललेखकः

पण्डितजवाहरलालनेहरूः

प्राक्कथनम्

महामहिमरामस्वामिवेङ्कटरामन्महोदयाः

भारतराष्ट्रपतयः

अनुवादकः

कविरत्नम् अमीरचन्द्रशास्त्री साहित्याचार्यः

(राष्ट्रपतिसम्मानित आचार्यः)

प्रधानसम्पादकः

डॉ० मण्डनमिश्रः

सह-सम्पादकः

डा० श्रीधरवासिष्ठः

लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

नई दिल्ली

प्रकाशकः
कुलसचिवः
श्री लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
शहीदजीतसिंहमार्गः कटवारिया-सरायः
नई दिल्ली-११००१६

मूल्यम् : रु० ३००-०० त्रिशतरूप्यकाणि

प्रथमं संस्करणम्

मुद्रकः
शाम प्रिंटिंग एजेन्सी (अमर प्रिंटिंग प्रेस)
८/२५ विजय नगर, दिल्ली-९

सत्यमेव जयते

राष्ट्रपति

भारत गणतन्त्र

PRESIDENT

REPUBLIC OF INDIA

FOREWORD

JAWAHARLAL NEHRU wrote in his 'Will and Testament' these memorable words :

> Many have been admired, some have been revered, but the affection of all classes of the Indian people has come to me in such abundant measure that I have been overwhelmed by it.

Today, a hundred years after his birth and over two decades after his passing, it is difficult to say who overwhelmed whom, Nehru or India. If Nehru could palpably feel the love that the people of India bore for him, the reverse was equally true. The people of India were drawn to him in a manner that was altogether unique. One might in fact say India was in love with him.

If his upbringing at Anand Bhawan in Allahabad gave Jawaharlal an anchorage in tradition, his exposure as a student in England to the bracing winds of socialism gave him a vision of the future. Having gone to England to do his Tripos at Cambridge and to study law, Jawaharlal found that his real interest was in political economy. Marxist thought, as he has

himself said, lighted many a corner of his mind. Writing to his son at about this time, Motilal Nehru said, 'Politics are inseparable from law, and economics are the soul of politics.'

Back in India in 1912, he began to practise law. But quite understandably, this work failed to absorb him The year 1917 had seen the Russian Revolution, and 1917 was also the year of the agitation for Home Rule, under the leadership of Dr. Annie Besant. Expelled from Bombay and then from the Central Provinces, she was finally interned. Jawaharlal became one of the Joint Secretaries of the Home Rule League in the United Provinces with Motilal Nehru as President. 'Home Rule has come and we have but to take it if we stand up like men and falter not,' so wrote Nehru, in a letter to *The Leader*.

Still in his twenties, Jawaharlal had found a cause. What was required at that stage was for him to find the ideal medium. The Non-Cooperation Movement of the Congress under Gandhiji's leadership seemed to him to contain an answer to some of the major challenges of the time. Jawaharlal Nehru accepted the non-violent method not so much as an all-time principle but as the only practicable method that was then available. Its practice also appeared to suit the national genius.

In 1927, he visited Moscow along with his father and was greeted by *Pravda* as a 'leader of the left wing of the Congress.'

In the Soviet Union he saw the sinews of industrial growth taking shape It was on this visit that the concept of five-year plans, the famous piatiletka of the Russians caught the imagination of Nehru. Apart from visiting the Soviet Union, Nehru also attended the International Congress against Colonial Oppression and Imperialism in Brussels as a representative of the Indian National Congress. He met there some of the leading Leftists of the world besides a large number of delegates from China, Africa, Maxico and Latin America. India's political

revolution, he knew, was taking its own shape in the extraordinary hands of Mahatma Gandhi. At the same time, more than any other political leader in India, Jawaharlal saw the need for an economic revolution in India. That revolution would have to redeem India from the backwardness of its agrarian structure and, in fact, from its dependence on agriculture itself. But it is important for us to remember that if Nehru became convinced that the solution to India's socio-economic problems lay in socialism, it was 'not in a vague humanitarian way, but in the scientific economic sense.'

As the newly-elected President of the Indian National Congress at the Lahore session of 1929, the Tarun-Tapasvi gave a call for the new goal; *purna swaraj,* complete independence.

The people of India thereafter saw Gandhi and Nehru in roles of an almost pre-ordained mutuality. Campaign after campaign, event after event, witnessed their conjoint action : the Civil Disobedience and Salt Satyagraha of 1930, the Bihar earthquake of 1934, the provincial elections of 1937, the Individual Satyagraha of 1940, the Congress-League parleys and, finally, the Quit India movement of 1942. If to Gandhi India showed veneration, on Nehru it lavished affection. If one was 'Bapu' or father, the other was 'Bhai', brother. If one was the leader, the other was the comrade.

Even as the Gospel of the Buddha fulfilled itself in the works of Ashoka, even as the rapture of Sri Ramakrishna found articulation in the exertions of Swami Vivekananda, so did Mahatma Gandhi find a great complementarity in Jawaharlal Nehru.

Complementarity, of course, does not mean identicality. Destiny did not intend Nehru to be a reflection, however accurate, of Gandhi. Indeed, they would not have desired such mirroring. But there can be little doubt that in the constellation of which

Mahatma Gandhi was the energy-radiating sun, Jawaharlal-Nehru revolved closest to the central sphere. Moving in his own orbit, never abandoning his own judgement and reasoning, he recognized in the Mahatma the greatest Indian revolutionary of our times. An admirer but no acolyte, a fellow revolutionary but no blind follower, Nehru shared Gandhi's vision of India's future : free, self-reliant and purged of its archaic customs and obscurantist practices.

Nehru was self-admittedly uninterested in some of the Mahatma's spiritual quests. But he believed no less than his leader in the equal importance of ends and means. Nehru's adherence to non-violence, unlike Gandhi's, was not religious at its roots; his deeply cherished commitment to socialism raised issues which needed to be squared with the Gandhian ethic of trusteeship. And his faith in the need for industrial advance seemed out of step with Gandhi's stress on rural self sufficiency. Their perceptions of the movement's political priorities also, at times, differed. When, fresh from his visit to the Soviet Union and the Congress against Colonialism on Brussels, Nehru sponsored a resolution for complete British withdrawal at the Madras session of the Congress in 1928, Gandhi thought him impetuous and wrote to him :

> I feel that you love me too well to resent what I am about to write. In any case I love you too well to restrain my pen when I feel I must write. You are going too fast. You should have taken time to think......I do not know whether you still believe in un-adulterated non-violence.

The difference persisted and Gandhi wrote to him again the same year, on 11 July :

> The differences between you and me appear to me to be so vast and radical that there seems to be no meeting ground between us.

And yet, no cleavage occurred. Nehru's openess and honesty appealed to Gandhi. As did his courage. 'He is pure as crystal'. wrote Gandhi. Coming from one who was the very personification of purity, this is high praise.

On the eve of the Second World War, Jawaharlal completed his masterly work, *An Autobiography.* Written with knowledge of the relative unimportance of individual lives in the Occan of Time, Jawaharlal put down the story of his life with detatchment and honesty. There is no self-congratulation in it, not to mention self-praise. But there is, at the same time, a sense of the importance of the events to which he was witness and, so many of which, were being shaped by his own direct effort. The book ran into no less than seventeen editions between its first appearance in 1936 and 1945. The book caught the imagination of an entire generation. It takes its place amongst the world's most sensitive autobiographies, even as his other compilation, *Glimpses of World History* ranks among the world's best non-professional treatises on history.

I am glad that Sri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha has had this autobiography of Jawaharlal Nehru rendered into Sanskrit, under the title *Nehru Charit Mahakavyam.* Sri Amirchandra Shastri has rendered a yeoman service in doing the translation with skill and devotion. His success in rendering the work into Sanskrit couplets is at once a tribute to the versatility of sanskrit and tbe lucidity of the original writing.

The narrative in the autobiography stops at the time when war clouds had gathered over the world's horizon, in the mid-thirties. The more momentous events in Nehru's life were still ahead of him. He was soon to be engulfed in events, leaving him no time to put them down in a memoir.

The events of the post-war months moved fast and before India could fully grasp the significance of each separate event, it stood on the threshold of partition. Gandhi termed it a 'vivisection', but could do nothing to prevent the inevitable. He

did the next best thing that remained in his power to do : heal the wounds caused by the dismemberment. In Noakhali, in Bihar and then in Delhi he went to the afflicted people to console, comfort, assuage. And Jawaharlal Nehru did the same with equal passion. This was perhaps their greatest partnership. Gandhi and Nehru together ministered to a stricken nation. Their sheer humanity, which had been their strongest link, came now to the fore.

A very embarrassed sun rose over free India to see thousands of innocents martyred. The Mahatma himself became a victim of religious frenzy. The blood of him who had become one with the people of India now mingled with that of the dead of both denominations.

'The light has gone out of our lives', said Jawaharlal Nehru, 'and there is darkness everywhere.' And then he went on to comfort, encourage and inspire his fellow-country men. The words were balm to the nation.

As Prime Minister, Nehru exerted himself to realize the vision of a self-reliant India. He set up the Planning Commission under his chairmanship. Jawaharlal Nehru included in it— far-sightedly......not just politicians but scientists, economists, businessmen and industrialists. There were reservations and criticisms at that time. The words 'Socialism' and 'Planning' were anathema to many and to some even within the Congress Working Committee. But Nehru pursued relentlessly his policy of planned development. Contrary to the convetional belief that planning implied author tarianism Nehru saw to it that the plan was debated and approved by Parliament. Nehru found Democratic Socialism to be eminently feasible, both as a goal and as a way. The great planner, statistician and economic philosopher, P. C. Mahalanobis, has said :

> The Nehru approach to planning may perhaps be called the Middle Way or the Middle Path. Nehru was thus the author and architect of Democratic Socialism.

Nehru explained the concept of democratic socialism in the following words:

> In the past, democracy has been taken chiefly to mean political democracy, roughly represented by the idea of every person having a vote. It is obvious that a vote by itself does not mean very much to a person who is down and starving... Therefore, political democracy by itself is not enough except that it may be used to obtain a gradually increasing measure of economic democracy.

At the historic Avadi session of the Congress in 1955 the Congress accepted the socialistic pattern of society as its creed.

It is significant that the decision that the Avadi session took synchronized with the launching of the Second Plan. Nehru had already oriented the country to the socialist path by enacting the Directive Principles of State policy at the inception of the Constitution. But it was from Avadi and the Second Plan onwards that a more vigorous utilization of our resources, a rapid industrialization and, most important, an equitable distribution of the resources of the community, became the country's declared charter and course.

The mixed economy and a welfare state emerged thereafter as a challenging concept. Legislation acquired a nation-building dimension and phrases such as 'the commanding heights of the economy' entered not just our political lexicon but, in fact, that of the entire developing world. The setting up of the Planning Commission, the emergence of the public sector, of land ceilings, of regulations on industrial monopoly, of state trading, are all facets of this same policy.

Great changes were taking place at the same time in the world of science and technology, which could not but affect the ways of living and thinking in India. Nehru was always interested in scientific research and in the progress of science and technology

and it was at his initiative that a large number of national laboratories came into existence to do research in diverse fields. Massive investments were made in atomic energy and the exploration of our oil and mineral resources through the public sector.

Nehru always carried the nation with him in all his policies and programmes. He devised the technique of attaining a national consensus on national issues. He tried to obtain a broad-based agreement on basic principles and then proceeded to implement the agreed proposals. Nehru devised the institution of the National Development Council to secure both a national and an inter-regional consensus on programmes. Those from state governments, participating in meetings of the National Development Council, were heard by the Prime Minister with attention and their averments were appreciated, irrespective of whether their specific proposals were accepted or not. This Council represented true federalism in action.

For Nehru, the exploitation of any one or any section by another was unacceptable. His concern for the women of India reflected this. From the National Movement had emerged a number of patriotic women who, in spite of the shackles that bound women by custom, inhibition and, often, by social obloquy, joined the struggle in their thousands. After Independence, Nehru used to insist on the inclusion of women in the state cabinets and in the legislatures. The Nehru era saw many women blossom into stalwarts.

Again, Nehru's concern for the religious minorities in India showed the same liberal attitude. A good socialist had to be a good democrat and a good democrat, necessarily, had to be secular. Khan Abdul Ghaffar Khan, Maulana Azad, Rafi Ahmed Kidwai, Sheikh Abdullah and Dr. Zakir Husain were some of those for whom Nehru had always the highest regard and esteem. They represented, for Nehru, the truth that India has been and is intended to be a secular nation. Likewise, the concern

Nehru showed for the tribal people demonstrates his approach to the needs of backward regions and of minority communities.

A tree, they say, is best measured when it is down. How right he was, how wise were his various emphases, became clear on 27 May 1964. Speaking shortly after Jawaharlalji had breathed his last, President Radhakrishnan said :

> Our thoughts today go out to him as a great emancipator of the human race, as one who has given all his life and energy to the freeing of men's minds from political bondage, economic slavery, social oppression and cultural stagnation.

Democrat of democrats, socialist of socialists, Jawaharlal Nehru was a unique phenomenon.

A model Parliamentarian, he liked to carry with him the country, Parliament, and all reasonable points of view by painstakingly explaining, justifying and convincing the opposition in Parliament and in the country. That he had an absolute majority in Parliament made no difference to him in his earnestness to meet the other point of view.

Simultaneously, Jawaharlal Nehru became a global personality. His devotion to nuclear disarmament and to the elimination of nuclear weapons, combined with his work for decolonization, for the Non-Aligned Movement and the ending of apartheid, won him a permanent place among the moulders of world destiny. The chronicler of world history finally became a shaper of world history.

Time cannot erase the fragrant memory of Jawaharlal Nehru.

I once again compliment the Vidyapeetha on having rendered the study of a noble life into that divine language, sanskrit. May this rendering transport the book from the shelves of great modern literature to the chambers of ever-radiant classics.

New Delhi, R. VENKATARAMAN
September 21, 1990.

प्राक्कथनम्

श्री जवाहरलालनेहरूः स्वकीये उत्तराधिकारपत्रे चिरस्मरणीयान् शब्दानलिखत्—

भूयस्यो व्यक्तयः प्राशंस्यन्त, कतिचन सममान्यन्त, किन्तु भारतीयानां समेषां वर्गाणां प्रीतिर्मय्येतावत्यवर्तत, तयाऽहमभिभूतोऽभवम् । इति ।

अद्य तज्जन्मनः शताब्द्यनन्तरं, तन्निधनाच्च दशाब्दीद्वयात्परमिदं सुदुर्वचम्, यद्धि नेहरूभारतयोः कतरः कतरमभ्यभवत् ! यदि नेहरूर्भारतीयैः प्रदत्तं प्रेम तथा गाम्भीर्येणान्वभूत्, तदा तद्विपर्ययेऽपि तावदेव सत्यमासीत् । भारतीया जनास्तं प्रति केनचिद्विलक्षणेन प्रकारेणाकृष्यन्ते स्म । वस्तुतः सुवचमिदं यद्धि भारतं तत्प्रीतिपरवशमासीत् ।

यदि प्रयागे आनन्दभवने स्वलालनपालनाभ्यां सः परम्परां प्रति विश्वासं शिक्षितः, तर्ह्याङ्ग्लदेशे छात्ररूपेण वसन् स समाजवादात्मनः उन्मुक्तवातावरणस्य स्पर्शेन भविष्यदर्शनस्य क्षमतां लम्भितः । आङ्ग्लदेशप्रवासे कैम्ब्रिजविश्वविद्यालयाद् ट्रिपोज़संज्ञकमुपाधिं विधिशिक्षाञ्च प्राप्नुवता जवाहरलालेन ज्ञातमासीत्, यत्तस्मै वस्तुतो राजनैतिकमर्थशास्त्रमधिकं रोचते । तस्यैव स्वशब्दैः 'मार्क्सविचारधारा तन्मस्तिष्कस्य कांश्चित् कोणान् स्वप्रकाशेन प्रोज्ज्वलयत् इति । मोतीलालनेहरूस्तं स्वपुत्रं तस्मिन्नेवावसरे व्यलिखत् —'राजनीतिविधिशास्त्रे अन्योन्यतः पृथक्कर्तुं न शक्येते, अर्थशास्त्रं तावद् राजनीतेरात्मास्ति ।'

१९१२ खीष्टाब्दे भारतागमनात्परं स वाक्कीलकर्म प्रारभत, परन्तु यत्सम्भावितमासीत्तदेवाभवत्, तत्कर्म तं बद्धुं नाशक्नोत् । १९१७ खीष्टाब्दे रूसीयक्रान्तिः सञ्जाता, तस्मिन्नेवाब्दे डा० एनीबिसेण्ट्महोदयानां नेतृत्वे स्वशासनान्दोलनमुपाक्रमत । मोहमय्यास्ततः परं मध्यक्षेत्रेभ्यस्तस्यां निर्वासितायां दृष्टिबन्धञ्च लम्भितायां जवाहरलालो मोतीलालनेहरूमहाभागस्याध्यक्ष्ये संयुक्तप्रान्ते स्वशासनसंघस्य संयुक्तसचिवपदे नियुक्तः । लीडरनामनि वृत्तपत्रे नेहरूरेकं पत्रमलिखत्—"स्वशासनमागतम्, अस्माभिरिदं स्वीकरणीयमेव, तथा च वयं स्वाभिमानिनो मानवा इवोत्थातुं शक्नुयाम, न च प्रमाद्येम ।

स्वकीये विंशत्येकविंशतिवर्षे वयस्येव जवाहरलालेनैकं साध्यमासादितम्, तदा तस्यैकमादर्शभूतं साधनमपेक्षितमासीत् । श्रीगान्धेर्नेतृत्वे प्रचलति काङ्ग्रेसस्यासहयोगान्दोलने तेन तात्कालिकीनां कतिपयीनां महतीनामाहूतीनामुत्तराणि लब्धानि । जवाहरलालनेहरूतात्कालिकेषु सर्वेषूपायेषु व्यावहारिकमार्गत्वेन तावदहिंसामार्गमङ्गीकृतवान्, न तु सार्वकालिकसिद्धान्तरूपेण । अस्य मार्गस्यानुसरणं राष्ट्रियप्रतिभाया विचारैरनुगतमासीत् ।

नेहरूः १९२७ खीष्टाब्दे स्वपित्रा सह मास्कोनगरं गतः । तत्र चायं 'प्रावदा' नाम्न्या पत्रिकया काङ्ग्रेसस्य वामपथिकनेतृतयाऽभिनन्दितः ।

सोवियत-रूसे स औद्योगिकप्रगतितन्तून् रूपं गृह्णतोऽपश्यत् । तयैव यात्रया रूसीयानां प्रसिद्धायाः पियातिलेत्काया आधारेण पञ्चवर्षीयाणां योजनानां सिद्धान्तो नेहरूमस्तिष्कस्य कल्पनाशीलतामस्प्राक्षीत् । सोवियतरूसयात्रातोऽतिरिक्तम् औपनिवेशिकस्योत्पीडनस्य साम्राज्यवादस्य च विरोधे नेहरूर्भारतीयराष्ट्रियकाङ्ग्रेसस्य प्रतिनिधितया ब्रुसल्जेऽन्ताराष्ट्रियकाङ्ग्रेसाधिवेशने समिमलत् । तत्रैष चीनाफ्रीकामैक्सिकोलैटिनामेरिकातः समेतान् प्रतिनिधीनतिरिच्य विश्वस्य भूयसो वामपथिकान् नेतॄनपश्यत् । एष तावदजानात्, यदद्य भारते राजनैतिकमान्दोलनं महात्मनो गान्धेरसाधारणाभ्यां हस्ताभ्यां किमपि विलक्षणस्वरूपं प्राप्नुवदासीत् । राजनैतिकनेत्रन्तरापेक्षया जवाहरलालो भारते कस्याश्चिदार्थिक्याः क्रान्तेरावश्यकतामधिकामपश्यत्; ईदृश्याः क्रान्तेः, या तं तस्य कृषिप्रधानस्वरूपोद्भूतात्पश्चाद्भावादुद्धरेत् । कृषावेव पूर्णनिर्भरताया ऊर्ध्वमुन्नयेत् । अस्माभिस्तावदत्रेदं कारणमुपन्यसनीयम्, यदि नेहरूः समाजवादं भारतीयानां सामाजिकीनामार्थिकीनाञ्च समस्यानां समाधानोपायममन्यत तदा तस्य कारणं किञ्चित्स्पष्टं मानवतावादिरूपं नासीत्, अपितु तस्य वैज्ञानिक आर्थिको दृष्टिकोण एवासीत् ।

१९२९ खीष्टाब्दे लवपुर (लाहोर) अधिवेशने भारतीयराष्ट्रियकाङ्ग्रेसस्य नवनिर्वाचिताध्यक्षतया सोऽयं तरुणस्तपस्वी किमपि नूतनं लक्ष्यं पूर्णस्वराज्यम् अर्थात् पूर्णस्वतन्त्रतां प्राप्तुं राष्ट्रमाहूतवान् ।

ततः परं भारतीया जना गान्धि नेहरूञ्च कयाचिदीश्वरप्रदत्तया अभिन्नतयाऽपश्यन् । १९३० खीष्टाब्दीये सविनयावज्ञान्दोलने, लवणसत्याग्रहे च, १९३४ खीष्टाब्दीये बिहारभूकम्पे, १९३७ खीष्टाब्दीये प्रान्तीयनिर्वाचने, १९४० खीष्टाब्दीये

व्यक्तिगतसत्याग्रहेऽपि च काङ्ग्रेसलीगयोः संयुक्ताधिवेशनेषु, अन्ते च १९४२ खीष्टाब्दीये 'भारतं त्यजत' आन्दोलने सा तयोरभिन्नतां साक्षादलक्ष्यत । प्रत्येकं नूतनमभियानम्, प्रत्येकञ्च नवघटना तयोः संयुक्तप्रयासस्य साक्षितां वहति । भारतं गान्धिमहोदयं प्रति सम्मानमधात्, तथा च नेहरूं प्रति प्रीतिमधत्त । यदि गान्धिस्तस्य पिताऽऽसीत् तर्हि नेहरूस्तस्य सुहृद्, भ्राता आसीत् । यद्येको नेताऽभूत्तर्ह्यपरः सहचरोऽभूत् ।

यथा बुद्धोपदेशैरशोककार्ये पूर्णताऽऽसादिता, यथा च रामकृष्णस्य तन्मयतया स्वामिविवेकानन्दस्य श्रमेण कलात्मकतार्जिता, तथा गान्धिर्जवाहरलाले कमपि महान्तं स्वपूरकं प्राप्नोत् ।

अस्य पूरकत्वस्य वस्तुतस्तादात्म्यं नास्ति । प्रारब्धेन नेहरूं गान्धेः पूर्णप्रतिनिधीकर्तुं न चेष्टितम् । वस्तुतस्ताभ्यां कदाचिदीदृशंप्रतिनिधित्वं मनसापि नाकाङ्क्षितम् । परमसन्दिग्धमिदम्, यदस्मिंस्तारामण्डले महात्मा गान्धिरूर्ध्वोत्सर्पी सूर्य आसीत्, तत्र जवाहरलालनेहरूः केन्द्रीयपिण्डस्य निकटतमं भ्राम्यन् ग्रह आसीत् । स्वकक्षायां भ्राम्यता, विवेकं तर्कञ्च न त्यजता तेनानुभूतम्—'महात्मा गान्धिरस्य युगस्य महत्तमो भारतीयक्रान्तिकार्यस्तीति ।' प्रशंसकतया न तु सेवकतया, क्रान्तिकारी सहचर इव न त्वन्धानुसारी च नेहरूर्गान्धेर्भारतभविष्यनिर्माणे सम्भागधरोऽभूत्, ईदृशस्य भारतस्य, यः स्वतन्त्रः स्यात्, आत्मनिर्भरः स्यात्, स्वकीयाभ्यः प्राचीनाभ्यः कुरीतिप्रथाभ्यो मुक्तः स्यात् ।

महात्मनो गान्धेर्बहुषु आध्यात्मिकानुसन्धानेषु नेहरूः स्पष्टतया स्वकीयामरुचिं प्राकाशयत् । किन्तु तस्य साध्यसाधनयोः समाने महत्त्वे स्वनेतुरिवास्य पूर्णविश्वास आसीत् । अस्याहिंसां प्रति समर्पणं गान्धिवद् धर्ममूलकं नासीत् । समाजवादं प्रति तस्य निष्ठायुक्तया वचनबद्धतया केचिदेवंविधाः प्रश्ना उदस्थाप्यन्त, येषां समाधानं गान्धेर्न्यासिसिद्धान्तादन्यत्र कुत्रचिदपि नासीत् । तस्यौद्योगिकविकासे विश्वासो गान्धेः ग्रामीणायामात्मनिर्भरतायां बलाधानस्य नीत्या न सङ्गच्छतेस्म । समये समये नूतनान्दोलनानां प्राथमिकताविषयिण्यां दृष्टावपि तयोरन्तरमभवत् । सोवियतरूसयात्राया ब्रूसल्जे उपनिवेशवादविरुद्धे काङ्ग्रेसाधिवेशने भागग्रहणाच्च प्रत्यागतो नेहरूः १९२८ खीष्टाब्दे काङ्ग्रेसस्य मद्रासाधिवेशनेऽङ्ग्रेजानां पूर्णतया प्रतिनिवर्तनविषयकं प्रस्तावं विन्यस्तवान्, यस्मिन् गान्धिस्तं दुःसाहसिकं मन्वानोऽलिखत्—

अहं मन्ये यत्त्वं मयि तथा प्रीतिमानसि यथा यदहं लिखन्नस्मि, तेन त्वं खेदं नावाप्स्यसि। परन्तु प्रत्यवस्थमहं त्वयि तथा स्निह्यामि यथाहं यदनुभवेयम्, मया त्वां प्रति लेखनीयम्, तदाऽहं स्वलेखनीं स्थगयितुं न पारयामि। त्वं प्रद्रुतं चलन्नसि, त्वया विचारणे कश्चित्समयो व्ययितव्य आसीत्। अहं न वेद्मि यथा त्वमद्यापि प्रदूषणरहितायामहिंसायां विश्वसिषि न वेति।

इत्ययं मतभेदः प्राचलत्, तस्मिन्नेव वर्षे जुलाईमासे च गान्धिस्तं पुनरलिखत्—

त्वयि मयि च मतभेदा एतावन्तो जाताः सन्ति, यथाऽऽवयोरिदानीं किमपि मिलनस्थलं न दृश्यते इति।

वस्तुतस्तयोः सम्बन्धेषु कश्चन भेदो नापतितः। जवाहरलालस्य स्फुटता, विश्वसनीयता, साहसञ्च गान्धये सततमरोचन्त। गान्धिरलेखीत्— नेहरूः स्फटिकवन्निर्मलोऽस्ति' इति। निर्मलताया मूर्तरूपया तादृश्या व्यक्त्या तथाविध उल्लेखो नूनं प्रशंसाविषयः।

द्वितीयविश्वयुद्धस्य पूर्वसन्ध्यायां जवाहरलालः स्वकीयां महतीं कृतिम् 'आत्मकथाम्' समापितवान्। समयमहासागरे व्यक्तिगतजीवनस्य सापेक्षां समुपादेयतां मन्यमानो जवाहरलालः स्वजीवनकथां तटस्थत्वेन विश्वस्यत्वेन चालिखत्। अत्र क्वचिदपि वृथा प्रशंसा तावद् दूर आस्ताम्, स्वस्मै वर्धापनमपि नाभिहितम्। तथापि तेन तासां घटनानां महत्ता स्थापिता, यासां स प्रत्यक्षद्रष्टाऽभूत्, यासु चानेकासां घटनानां स्वरूपग्रहणं साक्षात्तदीयैरेव प्रयत्नैः समभवत्। अस्य पुस्तकस्य १९३६ खीष्टाब्दात् १९४५ खीष्टाब्दं यावत् सप्तदश संस्करणानि प्रकाशितानि। अनेन पुस्तकेनैकस्या कृत्स्नायाः पुरुषिकायाः कल्पना प्रभाविता। इदं विश्वस्य सर्वाधिकाभावात्मिकासु आत्मकथास्वन्यतममस्ति। तथैव जवाहरलालस्य द्वितीयं सङ्कलनं 'विश्वेतिहासस्यैक आभासो'अपि विश्वेतिहासेऽलेखनजीवनैर्लेखकैर्लिखितेषु सर्वोत्तमपुस्तकेष्वेकमस्ति।

इदं विजानतो मे हर्षप्रकर्षोऽभूत् यच्छ्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठेन जवाहरलालस्यास्या आत्मकथाया संस्कृतपद्येषु 'नेहरूचरितमहाकाव्यम्' इति नाम्ना रूपान्तरं कारितम्। श्रीअमीरचन्द्रशास्त्रिणा परमकुशलतया प्रगाढ़साधानया चास्या अनुवादेन संस्कृतसाहित्यस्य काचिदुल्लेखनीया सेवा कृतास्ति। अस्याः संस्कृते पद्यबन्धनेऽनेन यत्साफल्यमधिगतम्, तत्संस्कृतस्य व्यापकताया मौलिकलेखनस्य च प्राञ्जलतायाः परिचायकमस्ति।

'आत्मकथाया' आख्यानकं १९३५-४० ख्रीष्टाब्दे मध्ये तत्रैव विरमति यत्र विश्वाकाशे युद्धमेघा मण्डलायमाना आसन्। नेहरूजीवनेऽद्यापि भूयसीनां चिरस्मरणीयानामीदृशीनां घटनानां प्रवेशोऽवशिष्ट आसीत्, यं स्वसंस्मरणाकारेणोल्लेखितुं तस्य कश्चन समयलेशो नावशिष्यमाणोऽभूत्।

युद्धानन्तरेषु मासेषु घटना अतित्वरितया गत्याऽघटन्त, इतश्च पूर्वं यद् भारतस्तास्वन्यतमाया अभिप्रायमपि कात्स्न्र्येनावगच्छेत्, स विभाजनतटमध्यतिष्ठत्। गान्धिमहोदयोऽस्य शल्यच्छेदनमिति नामाकरोत्, अवश्यम्भाविनश्चास्य प्रतिबन्धे स किमपि कर्तुं नापारयत्। स ततो विभाजनोत्पन्नान् व्रणान् विरोपयितुं स्वकीयां सर्वामपि शक्तिं प्रायुङ्क्त, नवाखाल्यां, विहारे, दिल्ल्याञ्च स तत्प्रभावितानां जनानां सान्त्वनायै, सहायतायै, शान्त्यै च तानुपागच्छत्। जवाहरलालनेहरूरपि तद्वदेव पूर्णनोत्साहेन कार्येऽस्मिन् गान्धिनेसहयोदात्। इयं कदाचित्तयोः सर्वतो महिष्ठा संविभागिताऽभूत्। गान्धिनेहरूभ्यां सम्मिलिताभ्यामुत्पीडितस्य राष्ट्रस्य व्रणेषु विरोपणौषधं प्रयुक्तम्। तयोरन्योन्यदृढबन्धिनी भानवता तदानीं सर्वथोन्मिषिता पुरस्तादुपास्थात्। सहस्राणां निरपराधानाम् आत्महुतिं साक्षात्कुर्वतो भारतस्य धूसरे आकाशेऽतिव्याकुलः सूर्य उदितः। महात्मा स्वयं धार्मिकोन्मादस्य लक्ष्यतां गतः। अथ तदीयं भारतीयजनरक्तमिलितं रक्तं तदुभयजातिमृतकरक्तैर्मिश्रितमभूत्।

'अस्मज्जीवनात्प्रकाशो निर्गतः' इति जवाहरलालनेहरू रचकथत्। "सर्वतोऽन्धकार एवावीवृतत्।" ततो नेहरूः स्वदेशवासिनां सान्त्वने, प्रोत्साहने, प्रेरणे च संलग्नः। तस्य वचांसि देशस्य कृते रसायनान्यासन्।

प्रधानमन्त्रित्वेन नेहरूरेकस्यात्मनिर्भरस्य भारतस्य कल्पनां पूर्णां कर्तुं प्रायतत। निजाध्यक्षतायां स योजनायोगभूमिकां न्यास्यत्। दूरदर्शितया तत्रायोगे स न केवलान् राजनैतिकान् अपितु वैज्ञानिकान्, अर्थशास्त्रिणः, व्यापारिणः, उद्योगपतीनपि समावेशयत्। अस्मिन् समये स भृशमालोचयत। केभ्यश्चिज्जनेभ्यस्तदिदं समावेशनं नारोचत। समाजवाद-योजनाप्रभृतयः शब्दाः काङ्ग्रेसकार्यसमितेः कतिपयेषां सदस्यानामितरासाञ्च भूयसीनां व्यक्तीनामरुचिकरा आसन्। तथापि नेहरूः स्वकीयां योजनाबद्धां विकासनीतिं निरन्तरमन्वसरत्। अधिकारिप्राधान्यं योजनार्थं इति परम्परागतं विश्वासं सत्यापयन् नेहरूर्निरन्तरं प्रतियोजनं संसदि वादविवादमकारयत् ततश्च तामङ्गीकारयत्। नेहरूः प्रजातान्त्रिकं समाजवादं साध्यत्वेन साधनत्वेन चोभयथा

अहं मन्ये यत्त्वं मयि तथा प्रीतिमानसि यथा यदहं लिखन्नस्मि, तेन त्वं खेदं नावाप्स्यसि । परन्तु प्रत्ययवस्थमहं त्वयि तथा स्निह्यामि यथाहं यदनुभवेयम्, मया त्वां प्रति लेखनीयम्, तदाऽहं स्वलेखनीं स्थगयितुं न पारयामि । त्वं प्रद्रुतं चलन्नसि, त्वया विचारणे कश्चित्समयो व्ययितव्य आसीत् । अहं न वेद्मि यथा त्वमद्यापि प्रदूषणरहितायामहिंसायां विश्वसिषि न वेति ।

इत्ययं मतभेदः प्राचलत्, तस्मिन्नेव वर्षे जुलाईमासे च गान्धिस्तं पुनरलिखत्—

त्वयि मयि च मतभेदा एतावन्तो जाताः सन्ति, यथाऽऽवयोरिदानीं किमपि मिलनस्थलं न दृश्यते इति ।

वस्तुतस्तयोः सम्बन्धेषु कश्चन भेदो नापतितः । जवाहरलालस्य स्फुटता, विश्वसनीयता, साहसञ्च गान्धये सततमरोचन्त । गान्धिरलेखीत्— नेहरूः स्फटिकवन्निर्मलोऽस्ति' इति । निर्मलताया मूर्तरूपया तादृश्या व्यक्त्या तथाविध उल्लेखो नूनं प्रशंसाविषयः ।

द्वितीयविश्वयुद्धस्य पूर्वसन्ध्यायां जवाहरलालः स्वकीयां महतीं कृतिम् 'आत्मकथाम्' समापितवान् । समयमहासागरे व्यक्तिगतजीवनस्य सापेक्षां समुपादेयतां मन्यमानो जवाहरलालः स्वजीवनकथां तटस्थत्वेन विश्वस्यत्वेन चालिखत् । अत्र क्वचिदपि वृथा प्रशंसा तावद् दूर आस्ताम्, स्वस्मै वर्धापनमपि नाभिहितम् । तथापि तेन तासां घटनानां महत्ता स्थापिता, यासां स प्रत्यक्षद्रष्टाऽभूत्, यासु चानेकासां घटनानां स्वरूपग्रहणं साक्षात्तदीयैरेव प्रयत्नैः समभवत् । अस्य पुस्तकस्य १९३६ खीष्टाब्दात् १९४५ खीष्टाब्दं यावत् सप्तदश संस्करणानि प्रकाशितानि । अनेन पुस्तकेनैकस्या कृत्स्नायाः पुरुषिकायाः कल्पना प्रभाविता । इदं विश्वस्य सर्वाधिकाभावात्मिकासु आत्मकथास्वन्यतममस्ति । तथैव जवाहरलालस्य द्वितीयं सङ्कलनं 'विश्वेतिहासस्यैक आभासो'अपि विश्वेतिहासेऽलेखनजीवनैर्लेखकैर्लिखितेषु सर्वोत्तमपुस्तकेष्वेकमस्ति ।

इदं विजानतो मे हर्षप्रकर्षोऽभूत् यच्छ्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठेन जवाहरलालस्यास्या आत्मकथाया संस्कृतपद्येषु 'नेहरूचरितमहाकाव्यम्' इति नाम्ना रूपान्तरं कारितम् । श्रीअमीरचन्द्रशास्त्रिणा परमकुशलतया प्रगाढसाधानया चास्या अनुवादेन संस्कृतसाहित्यस्य काचिदुल्लेखनीया सेवा कृतास्ति । अस्याः संस्कृते पद्यबन्धनेऽनेन यत्साफल्यमधिगतम्, तत्संस्कृतस्य व्यापकताया मौलिकलेखनस्य च प्राञ्जलतायाः परिचायकमस्ति ।

परमोपयोगिनमन्वभवत्। महता नीतिनिर्धारकेण, सांख्यिक्या वेत्रा, आर्थिकदर्शन-शास्त्रिणा च महालानोविसेनोक्तम्—

> योजनाप्रवर्तने नेहरूपद्धतिर्मध्यमार्गस्य मध्य पक्षोस्तीति वक्तुं शक्यते। इत्थं नेहरूः प्रजातान्त्रिकस्य समाजवादस्य प्रणेता शिल्पी चासीत्।

नेहरूः स्वयं प्रजातान्त्रिकस्य समाजवादसिद्धान्तस्य वर्णनममीभिः शब्दैरकरोत्—

> प्राक्कालिके साहित्ये बहुधा प्रजातन्त्रं नाम राजनैतिकमेवामन्यत, यदेका व्यक्तिरेकं मतम्' इति सिद्धान्तेन स्वीकर्तुं शक्यम्। इदं स्पष्टं यद्दलितस्य क्षुधितस्य कृते मतमिदं किमपि महत्त्वं न धत्ते।……अतो राजनैतिकं प्रजातन्त्रं स्वस्मिन्पर्याप्तम्, एतदन्तराऽस्य प्रयोगः शनैः शनैरार्थिके प्रजातन्त्रेऽतिमात्रं कर्तुं शक्येत।

१९५५ खीष्टाब्दे ऐतिहासिके आवडीगते कांग्रेसाधिवेशने कांग्रेसेन समाजवादिप्रतिरूपकं समाजसिद्धान्तत्वेन स्वीकृतम्।

इदं वस्तु महत्त्वपूर्णमस्ति यदावडीगतेऽधिवेशने गृहीतस्य निर्णयस्य समकालमेव द्वितीया पञ्चवर्षीया योजना प्रारभ्यत। नेहरूः प्रथममेव देशं संविधाननिर्माण समये राज्यनीतिसिद्धान्तनिर्धारणेन समाजवादिमार्गेऽभिसर्तुमुद्यमितोऽभूत्। परमावडीगतादधिवेशनाद् द्वितीय पञ्चवर्षीययोजनाप्रवर्तनात्परमेवास्माकं साधनानि तीव्रतयोपयुक्तानि, तीव्रमौद्योगीकरणं जातम्। एतस्मात्सर्वस्माच्च महत्त्वपूर्णं वस्तु तावदिदमस्ति यत्समाजस्य समस्तानां साधनानां समानं वितरणं देशस्य घोषिता नीतिः पद्धतिश्चाभवत्।

तदनन्तरं मिश्रिताऽर्थव्यवस्था कल्याणकारिणो राज्यस्य चाह्वानभूताः सिद्धान्ता उन्मज्य समक्षमागताः। विधिनिर्माणेन राष्ट्रनिर्माणदिग् गृहीता, 'अर्थव्यवस्थायाः प्रभावशालिन्य उच्चताः, सदृशा वाक्यांशा नास्माकमेव राजनैतिके शब्दकोषे, अपितु कृत्स्नस्य विकासशीलस्य विश्वस्य शब्दकोषे समाविष्टाः। योजनायोगस्य स्थापना, निजक्षेत्रोदयः, भूमिसीमानिर्धारणम्, औद्योगिकैकाधिकारनियन्त्रणम्, राज्यीयव्यापारश्चेत्यादयोऽस्या एव नीतेरायामाः सन्ति।

अस्मिन्नेवावसरे विज्ञानस्य कलायाश्च जगति बहूनि महान्ति परिवर्तनानि भवन्ति स्म। येषां प्रभावो भारतीये जीवने चिन्तने चापतत्। नेहरूः सदैव वैज्ञानिकानुसन्धाने विज्ञानराजनीत्योर्विकासे च रुचिमानासीत्। तत्कृते प्रथमोपक्रम एव

विभिन्नेषु क्षेत्रेष्वनुसन्धानानुष्ठानाय भूयस्यो राष्ट्रियाः प्रयोगशाला अस्थाप्यन्त। आणविक्या ऊर्जायाः क्षेत्रेऽतिमात्रया राशिनिवेशोऽक्रियत। आमतैलस्य खनिजसाधनानाञ्च विकासेष्वात्मीयक्षेत्रसाहाय्यमगृह्यत।

नेहरूः स्वनीतिषु स्वकार्यक्रमेषु च सततं देशं समनयत्। स राष्ट्रियप्रश्नेषु राष्ट्रियसहमतिप्राप्तेः कलाया विकासमकरोत्। स मूलभूतेषु सिद्धान्तेषु सर्वसहमतिप्राप्त्यै प्रायतत। सहमतिप्राप्तानां प्रस्तावानां कार्यान्वियनं चोपाक्रमत। स राष्ट्रियविकासनिगमसदृशीः संस्थाः समतिष्ठिपत् येन विविधेषु कार्यक्रमेषु राष्ट्रियाऽऽन्तःक्षेत्रीया च सहमतिः प्राप्तुं शक्येत। प्रधानमन्त्रित्वे राष्ट्रियविकासनिगमाधिवेशनेषु नेहरूः राज्यप्रशासनप्रतिनिधीन् सावधानः सन्नश्रृणोत्। तद्वचनानि च महत्त्वमनयत्। कामं तेषु तदीया व्यक्तिगताः प्रस्तावाः स्वीकार्याः स्युर्न वा। अयं निगमो यथार्थे सङ्घीयप्रतिरूपे क्रियान्वयनप्रतिनिधित्वमधात्।

तस्य कस्याश्चिद्व्यक्तेः, कस्यचिद् वर्गस्य वा केनचिच्छोषणं स्वीकार्यं नासीत्। भारतीयानां महिलानां स्थितेश्चिन्तायामिदं प्रतिबिम्बितं भवतिस्म। राष्ट्रियान्दोलने भूयस्यो राष्ट्रभक्ताः महिलाः सत्स्वपि स्वरीतिनीतिबन्धनेषु, गृह्यावरोधेषु, सामाजिकप्रतिबन्धेषु तान्युल्लङ्घ्य समागताः, सहस्राणि च ताः सङ्घर्षेण सहायुञ्जत। स्वतन्त्रताप्राप्तेरनन्तरं नेहरू राज्यीयमन्त्रिमण्डलेषु विधायिकासु च महिलानां संविभागे बलमाधात्। नेहरूयुगे भूयस्यो महिला अत्युच्चेषु पदेषु प्रत्यतिष्ठन्।

तदतिरिक्तेषु चाल्पसङ्ख्यकेषु धार्मिकेषु तस्य चिन्ता स्वाभाविक्या उदारतायाः परिचायिकाऽऽसीत्। भद्रेण समाजवादिना तावद् भद्रेण प्रजातान्त्रिकेण भवितव्यम्। भद्रः प्रजातान्त्रिकश्च निश्चप्रचं धर्मनिरपेक्षो भवति। अब्दुलगफ्फारखानः, मौलाना आजादः, रफीअहमद किदवई, शेख अब्दुल्ला, डाक्टर जाकिरहुसैनः इत्यादीनि कानिचिदीदृशानि नामानि सन्ति, येषां कृते नेहरूमनसि भूयानादरो बहुमानश्चासीत्। नेहरूदृशा खल्वेतेऽस्य सत्यस्य प्रतिनिधित्वमधुः, भारतवर्षः सदा धर्मनिरपेक्षराष्ट्रतया स्थितः, तेन तथैव वर्तितव्यम्। इत्थमेवादिवासिषु तस्याभिरुचिः पश्चाद्गतक्षेत्रेष्वल्पसङ्ख्यकसमुदायेषु चानुपेक्ष्याणामपेक्षाणां कृते तद्दृष्टेः परिचायिकाऽभूत्।

इदमिह कथ्यते कस्यचिद्वृक्षस्य दीर्घता, तस्मिन्निपतिते एव सम्यङ्मीयते। १९६४ ख्रीष्टाब्दीयमयीमासस्य सप्तविंशे दिनाङ्के तावदिदं स्फुटमभूत् नेहरूः कियान्

साधीयान् आसीत्, तस्य भूयस्यः क्रियाश्च कियद्विवेकपूर्णा आसन् । जवाहरलालस्यान्तिमश्वासग्रहण समनन्तरं राष्ट्रपतिना राधाकृष्णेनोक्तम् —

अस्मद्विचारा अद्य तं मानवताया महतो मुक्तिदातुः स्वरूपेण परिचिन्वन्ति । तेन स्वजीवनं स्वशक्तिश्च जनमस्तिष्कं राजनैतिकबन्धनात्, आर्थिक्या दासतायाः, सामाजिकशोषणात्, सांस्कृतिक्या निश्चेष्टतायाश्च मोचयितुं समर्पिते आस्ताम् ।

प्रजातान्त्रिकेषु प्रशस्यतमः प्रजातान्त्रिकः, समाजवादिषु महत्तमः समाजवादी जवाहरलालनेहरूः काचिदद्भुता विलक्षणा च व्यक्तिरासीत् ।'

आदर्शसांसदतया नेहरूः स्वेन साकं देशं, संसदं, सर्वान् समुचितान् दृष्टिकोणांश्च गृहीत्वा प्रस्थाने विश्वसितिस्म । तस्मै विश्वासाय च स सपरिश्रमं स्पष्टीकरणदानपुरस्सरं स्वविचारं प्रमाणयन् संसदि देशे च विपक्षं स्वसहमतं कुरुतेस्म । यद्यपि तस्य संसदि बहुमतं प्राप्तमासीत्, तथाप्यपरस्य दृष्टिकोणं श्रोतुं मन्तुं च तस्य तन्मयता न किञ्चिदप्यन्तरिताऽभवत् ।

एतेन सकलेन गुणगणेन साकं जवाहरलालनेहरूर्विश्वविख्यातेन व्यक्तित्वेन प्रतिष्ठितोऽभूत् । आणविकनिरस्त्रीकरणं, तथाणविकास्त्रसमापनं प्रति तस्य प्रतिबद्धता, उपनिवेशवादावसानाय कृतं तत्कार्यजातम्, दलनिरपेक्षान्दोलनस्य स्थापना, रङ्गभेदोन्मूलनप्रयत्नाश्च तं विश्वभाग्यनिर्मातृष्वेकस्मिन् स्थायिनि पदे प्रत्यतिष्ठिपन् । विश्वेतिहासलेखकोऽन्ते विश्वेतिहासनिर्माता जातः ।

कालोऽपि जवाहरलालस्य सुरभितां स्मृतिं मार्ष्टुं न क्षमते ।

अहं पुनरपि सकृद् विद्यापीठायास्या महत्या व्यक्तेर्जीवनचरितं देवभाषायां संस्कृते प्रस्तोतुं वर्धापनान्युपहरामि, आशासे च यदिदं तदात्मकथारूपान्तरं 'नेहरूचरितमहाकाव्यम्' आधुनिकान्महतः साहित्यात् चिरभासितानां महाकाव्यानां श्रेण्यां प्रतिष्ठां प्राप्स्यतीति ।

नवदेहली
२१ सितम्बर १९९० दिनाङ्कः

आर० वेङ्कटरामन्

प्राक्कथन

श्री जवाहरलाल नेहरू ने अपनी 'वसीयत एवं इच्छापत्र' में ये चिरस्मरणीय शब्द लिखे हैं—

> बहुत से व्यक्ति प्रशंसित हुए हैं, कुछ सम्मानित भी हुए हैं, परन्तु भारतवासियों के सभी वर्गों का प्रेम मुझे इतनी अधिक मात्रा में प्राप्त हुआ है कि मैं इससे अभिभूत रहा हूँ।

आज, उनके जन्म के सौ वर्ष बाद एवं उनके निधन की दो दशाब्दियों बाद यह कहना अत्यन्त कठिन है कि नेहरू और भारत में किसने किसे अभिभूत किया। यदि नेहरू भारतवासियों द्वारा प्रदत्त प्रेम के गाम्भीर्य को इस प्रकार अनुभव करते थे तो इसका विपर्यय भी इतना ही सच था। भारत के लोग उनकी ओर एक निराले अन्दाज में खिचते चले जाते थे। वास्तव में यह कहा जा सकता है कि भारत को उनसे प्यार था।

इलाहाबाद के आनन्द भवन में उनके लालन-पालन ने यदि उन्हें परम्परा में विश्वास करना सिखाया, तो इंग्लैंड में विद्यार्थी के रूप में उन्होंने समाजवाद की खुली हवाओं का स्पर्श पाकर भविष्य में झाँकने की क्षमता प्राप्त की। इंग्लैड प्रवास में कैम्ब्रिज से ट्रिपोज़ उपाधि एवं कानून की शिक्षा प्राप्त करते समय, जवाहरलाल जी को मालूम हुआ कि उनकी वास्तविक रुचि राजनैतिक अर्थशास्त्र में है। उन्हीं के शब्दों में 'मार्क्स की विचारधारा ने उनके मस्तिष्क के कई कोनों को प्रकाश से जगमगा दिया था।' मोतीलाल नेहरू ने अपने पुत्र को इसी दौरान लिखा था— "राजनीति और कानून एक-दूसरे से अलग नहीं किए जा सकते और अर्थशास्त्र तो राजनीति की आत्मा है।"

सन् १९१२ में भारत आने पर उन्होंने वकालत आरम्भ कर दी, परन्तु जैसी कि आशा थी, यह काम उन्हें बांध न सका। सन् १९१७ में रूसी-क्रान्ति हो चुकी थी और सन् १९१७ में ही 'होम-रूल' (स्व-शासन) के लिए डा० एनीबिसेण्ट के नेतृत्व में आन्दोलन आरम्भ हो चुका था। बम्बई एवं तत्पश्चात् मध्य क्षेत्रों से

निष्कासित किए जाने के बाद उन्हें नजरबन्द कर दिया गया था। श्री जवाहरलाल मोतीलाल नेहरू की अध्यक्षता में संयुक्त प्रान्त में होमरूल लीग के एक संयुक्त सचिव बने। 'लीडर' नामक समाचार पत्र को एक पत्र में नेहरू जी ने लिखा था—"होमरूल आ गया और हमें इसे स्वीकार करना है यदि हम पुरुषों की भाँति खड़े हो सकें और भूल न करें।"

अपनी बीस-इक्कीस वर्ष की आयु में ही जवाहरलाल जी को एक साध्य प्राप्त हो गया था। इस समय उन्हें आवश्यकता थी एक आदर्श साधन की। गाँधीजी के नेतृत्व में चल रहे कांग्रेस के असहयोग आन्दोलन में उन्हें उस समय की कुछ बड़ी चुनौतियों के उत्तर मिले। जवाहरलाल नेहरू ने अहिंसक मार्ग को सार्वकालिक सिद्धान्त के रूप में नहीं अपितु उस समय के सभी तरीकों में एक मात्र व्यावहारिक मार्ग के रूप में अपनाया। इस मार्ग का अनुसरण राष्ट्रीय-प्रतिभा के विचारों के अनुरूप था।

१९२७ में वे अपने पिता के साथ मास्को गये और वहाँ 'प्रावदा' ने 'कांग्रेस के वामपंथी नेता के रूप में' उनका अभिनन्दन किया।

सोवियत रूस में उन्होंने औद्योगिक प्रगति के तन्तुओं को रूप लेते देखा। इसी यात्रा में रूसियों के प्रसिद्ध पिआतिलेत्का के आधार पर पंचवर्षीय योजनाओं के सिद्धांत ने नेहरू की कल्पनाशीलता को छुआ। सोवियत रूस की यात्रा के अतिरिक्त नेहरू औपनिवेशिक उत्पीड़न एवं साम्राज्यवाद के विरुद्ध भारतीय राष्ट्रीय कांग्रेस के प्रतिनिधि के रूप में ब्रुसल्ज़ में अन्तर्राष्ट्रीय कांग्रेस की बैठक में सम्मिलित हुए। यहाँ वे चीन, अफ्रीका, मैक्सिको एवं लातीनी अमरीका के प्रतिनिधियों के अलावा संसार के बहुत से वामपंथी नेताओं से मिले। वे जानते थे कि भारत का राजनैतिक आंदोलन महात्मा गांधी के असाधारण हाथों द्वारा एक अनोखा रूप ले रहा था। इसी समय जवाहरलाल को भारत में एक आर्थिक क्रान्ति की आवश्यकता अन्य किसी भी नेता के मुकाबले अधिक अनुभव हुई। वह चाहते थे एक ऐसी क्रांति, जो भारत को अपनी कृषिप्रधान संरचना से उद्भूत पिछड़ेपन से उबारे और इस प्रकार कृषि पर पूर्णनिर्भरता से ऊपर उठाए। परन्तु हमारे लिए यह स्मरण रखना आवश्यक है कि यदि नेहरू ने समाजवाद को भारत की सामाजिक व आर्थिक समस्याओं का

समाधान माना तो इसका कारण एक अस्पष्ट मानवतावादी रूप नहीं अपितु उनका वैज्ञानिक-आर्थिक दृष्टिकोण था ।

१९२९ में लाहौर-अधिवेशन में भारतीय राष्ट्रीय कांग्रेस के नवनिर्वाचित अध्यक्ष के रूप में इस तरुण तपस्वी ने एक नये लक्ष्य पूर्ण स्वराज अर्थात् पूर्ण स्वतन्त्रता के लिए राष्ट्र का आह्वान किया ।

तत्पश्चात् भारत के लोगों ने गाँधी और नेहरू को ईश्वर प्रदत्त अभिन्नता के रूप में देखा । १९३० का सविनय अवज्ञा आंदोलन तथा नमक-सत्याग्रह, १९३४ का बिहार-भूकम्प, १९३७ के प्रान्तीय चुनाव, १९४० के व्यक्तिगत सत्याग्रह, कांग्रेस और लीग की संयुक्त बैठकों एवं अन्त में १९४२ का भारत छोड़ो आंदोलन आदि में हर नया अभियान और हर नई घटना उनके संयुक्त प्रयास की गवाह थी । यदि भारत गांधी जी का सम्मान करता था तो नेहरू पर प्यार न्यौछावर करता था । यदि एक बापू या पिता था तो दूसरा भाई या भ्राता था । यदि एक नेता था तो दूसरा साथी था।

जैसे बुद्ध के उपदेशों ने अशोक के कार्यों में पूर्णता प्राप्त की, जैसे श्रीरामकृष्ण की तन्मयता ने स्वामी विवेकानन्द के श्रम से कलात्मकता धारण की, उसी प्रकार गाँधीजी ने जवाहरलाल नेहरू में अपना एक महान् पूरक प्राप्त किया ।

इस पूरकत्व का अर्थ वास्तव में तादात्म्य नहीं है । प्रारब्ध ने नेहरू को गाँधी जी का पूर्ण प्रतिबिम्ब बनाने की चेष्टा नहीं की । वास्तव में उन दोनों ने कभी भी ऐसा प्रतिबिम्बन चाहा भी नहीं होगा । परन्तु इसमें कोई संशय नहीं कि जिस तारा-मण्डल में महात्मा गाँधी ऊर्जा-उत्सर्जन करने वाले सूर्य थे, उसमें जवाहरलाल नेहरू केन्द्रीय पिण्ड के सबसे निकट घूमने वाले ग्रह थे । अपनी कक्षा में घूमते हुए, अपने विवेक और तर्क को न छोड़ते हुए, उन्होंने अनुभव किया कि महात्मा गाँधी हमारे युग के सबसे बड़े भारतीय क्राँतिकारी हैं । एक प्रशंसक के रूप में न कि एक सेवक की तरह, एक साथी क्रांतिकारी की भांति न कि एक अंधे अनुयायी की तरह, नेहरू गाँधी जी के भारत के भविष्य के दृष्टिकोण के भागीदार थे । एक ऐसा भारत जो स्वतन्त्र हो, आत्मनिर्भर हो तथा अपने प्राचीन रीतिरिवाजों और प्रच्छन्न प्रथाओं से मुक्त हो ।

महात्मा गाँधी की बहुत सी आध्यात्मिक खोजों में अपनी अरुचि को नेहरू स्पष्ट रूप से स्वीकार करते थे। परन्तु उन्हें साध्य एवं साधन के समान महत्त्व में अपने नेता की भाँति पूर्ण विश्वास था। उनका अहिंसा के प्रति समर्पण गाँधी जी की तरह धर्ममूलक नहीं था। समाजवाद के प्रति उनकी निष्ठायुक्त वचन-बद्धता ने कुछ ऐसे प्रश्न खड़े किये थे जिनका समाधान गाँधी जी के ट्रस्टीशिप के सिद्धान्त के अतिरिक्त कहीं नहीं था। उनका औद्योगिक विकास में विश्वास गाँधीजी की ग्रामीण-आत्म-निर्भरता पर बल देने की नीति से मेल नहीं खाता था। समय-समय पर उनकी आंदोलन की राजनैतिक प्राथमिकताओं की दृष्टि में भी अन्तर रहा। सोवियत रूस की यात्रा और ब्रुसल्ज़ में उपनिवेशवाद के विरुद्ध कांग्रेस में भाग लेकर आते ही नेहरू ने १९२८ में कांग्रेस के मद्रास अधिवेशन में अंग्रेजों की पूर्ण वापसी का प्रस्ताव रखा, जिस पर गाँधी जी ने उन्हें दुःसाहसी मानते हुए लिखा था—

> मैं समझता हूं कि तुम मुझे इतना प्यार करते हो कि मैं जो लिखने जा रहा हूँ तुम उसका बुरा नहीं मानोगे। परन्तु हर हालत में मैं तुम्हें इतना प्यार करता हूँ कि मैं जब यह अनुभव करूं कि मुझे तुम्हें लिखना चाहिए तो मैं अपनी कलम को रोक नहीं सकता। तुम बहुत तेज चल रहे हो। तुम्हें सोचने में कुछ समय लगाना चाहिए था। मैं नहीं जानता कि तुम अब भी प्रदूषण-रहित अहिंसा में विश्वास करते हो या नहीं।

यह मतभेद चलता रहा और उसी वर्ष ११ जुलाई को गाँधीजी ने उन्हें फिर लिखा—

> तुममें और मुझमें मतभेद इतने अधिक हो गये हैं कि हम दोनों के बीच अब कोई मिलन-स्थल दिखाई नहीं देता।

उनके सम्बन्धों में दरार नहीं पड़ी। फिर भी नेहरू का खुलापन, ईमानदारी और साहस गाँधीजी को सदा अच्छे लगे। गाँधीजी ने लिखा था—"वह स्फटिक के समान निर्मल है।" एक ऐसे व्यक्ति द्वारा जो कि अपने आप में निर्मलता का मूर्तरूप था, ऐसा लिखा जाना अत्यन्त प्रशंसा की बात है।

द्वितीय विश्वयुद्ध की पूर्व सन्ध्या पर जवाहरलालजी ने अपने महान् कृतित्व 'एक आत्मकथा' को पूरा किया। समय के महासागर में व्यक्तिगत जीवन की

सापेक्ष अनुपादेयता को मानते हुए जवाहरलालजी ने अपने जीवन की कहानी बड़े तटस्थ एवं ईमानदार ढंग से लिखी। इसमें कहीं स्वयं की प्रशंसा तो दूर, स्वयं को बधाई भी नहीं दी गई है। फिर भी इसके साथ-साथ उन्होंने इन घटनाओं की महत्ता को बनाए रखा जिनके वे प्रत्यक्षदर्शी रहे हैं तथा जिनमें से बहुत सी घटनाओं ने उन्हीं के सीधे प्रयत्नों से स्वरूप ग्रहण किया था। इस पुस्तक के १९३६ में प्रथम संस्करण से लेकर १९४५ तक कम से कम सत्रह संस्करण प्रकाशित हुए। इस पुस्तक ने एक पूरी पीढ़ी की कल्पना को प्रभावित किया है। यह संसार की सर्वाधिक भावात्मक आत्मकथाओं में से है। इसी प्रकार इनका दूसरा संकलन 'विश्व इतिहास की एक झलक' भी संसार के इतिहास पर गैर-पेशेवर लेखकों द्वारा लिखी गई सर्वोत्तम पुस्तकों में से एक है।

मुझे यह जानकर प्रसन्नता हुई है कि श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ ने जवाहरलाल नेहरू की 'आत्मकथा' का संस्कृत में 'नेहरू-चरित-महाकाव्यम्' नाम से रूपान्तर करवाया है। श्री अमीरचन्द्र शास्त्री ने अत्यन्त कुशलता और साधना से इसका अनुवाद करके साहित्य की एक उल्लेखनीय सेवा की है। इस कार्य को संस्कृत में श्लोकबद्ध करने में उन्होंने जो सफलता प्राप्त की है वह संस्कृत की व्यापकता एवं मौलिक लेखन की प्रांजलता की परिचायक है।

'आत्मकथा' का वर्णन १९३५-४० के मध्य में उस समय आकर रुक जाता है जबकि संसार के आकाश में युद्ध के बादल मंडराने लगे थे। नेहरू के जीवन में अभी बहुत सी ऐसी चिरस्मरणीय घटनायें आने वाली थीं, वे शीघ्र ही एक ऐसे घटनाक्रम से घिर जाने वाले थे जिसे अपने संस्मरण के रूप में लिखने के लिए उनके पास कोई समय शेष नहीं रहने वाला था।

युद्ध के बाद के महीनों में घटनायें बड़ी तेजी से घटीं और इससे पहले कि भारत इनमें से किसी एक घटना का अभिप्राय भी पूरी तरह समझ पाता वह विभाजन के कगार पर जा खड़ा हुआ। गाँधीजी ने इसे चीर-फाड़ का नाम दिया परन्तु इस अवश्यम्भावी को रोकने में वे कुछ न कर सके। उन्होंने इसके बाद विभाजन से उत्पन्न घावों को भरने में अपनी पूरी शक्ति लगा दी। नवाखली, बिहार और फिर दिल्ली में वह प्रभावित लोगों के पास सान्त्वना, सहायता एवं शान्ति प्रदान करने के लिए गये। जवाहरलाल नेहरू ने भी उन्हीं की तरह पूरे जोश से इस कार्य

में योगदान दिया। यह कदाचित् इनकी सबसे बड़ी भागीदारी थी। गाँधी और नेहरू ने साथ-साथ उत्पीड़ित राष्ट्र के घावों पर मरहम लगाया। उन्हें परस्पर सुदृढ़ रूप से बाँधने वाली उन दोनों की इन्सानियत इस समय पूरी तरह उभर कर सामने आई। हजारों बेकसूरों की शहादत को देखता हुआ स्वतन्त्र भारत के आकाश में एक अत्यन्त व्याकुल सूर्य उदित हुआ। महात्मा स्वयं धार्मिक उन्माद के शिकार हो गये। अब उनका खून जो कि भारत के लोगों में घुलमिल गया था दोनों जाति के मृतकों के रक्त से जा मिला।

"हमारे जीवन से प्रकाश चला गया है" जवाहरलाल नेहरू ने कहा था, "और सब जगह अन्धकार ही अन्धकार है।" और इसके बाद वे अपने देशवासियों को सांत्वना देने, उत्साहित करने और प्रेरणा देने के काम में लग गये। उनके शब्द देश के लिए बाम की तरह थे।

प्रधानमंत्री के रूप में नेहरू ने एक आत्मनिर्भर भारत की कल्पना को साकार करने का प्रयत्न किया। अपनी अध्यक्षता में उन्होंने योजना आयोग की नींव रखी। इस आयोग में दूर दृष्टि के कारण उन्होंने केवल राजनीतिज्ञों को ही नहीं लिया बल्कि वैज्ञानिकों, अर्थशास्त्रियों, व्यापारियों और उद्योगपतियों को भी सम्मिलित किया। उस समय उनकी बहुत आलोचना हुई और कुछ लोगों को यह अच्छा नहीं लगा। समाजवाद और योजना जैसे शब्द कांग्रेस कार्यकारिणी के कुछ सदस्यों सहित बहुत से व्यक्तियों के लिए अरुचिकर थे। परन्तु नेहरू अपनी योजनाबद्ध विकास की नीति पर लगातार चलते रहे। योजना का अर्थ अफसरशाही है इस परम्परागत विश्वास को झुठलाते हुए नेहरू ने हमेशा प्रत्येक योजना पर संसद में बहस करवाई और तत्पश्चात् उसे स्वीकार करवाया। नेहरू ने प्रजातान्त्रिक समाजवाद को साध्य और साधन दोनों रूपों में अत्यन्त उपयोगी पाया। महान् नीति-निर्धारक, सांख्यिकी-वेत्ता एवं आर्थिक दर्शन शास्त्री पी० सी० महालानोबिस ने कहा है—

> योजना को लागू करने का नेहरू का तरीका मध्य मार्ग या मध्य पथ कहा जा सकता है। इस प्रकार नेहरू प्रजातान्त्रिक समाजवाद के प्रणेता और शिल्पी थे।

नेहरू जी ने स्वयं प्रजातान्त्रिक समाजवाद के सिद्धान्त का वर्णन इन शब्दों में किया है—

प्राचीनकाल में प्रजातन्त्र का अर्थ अधिकतर राजनैतिक प्रजातन्त्र माना गया है जिसे एक व्यक्ति एक मत के सिद्धान्त से जाना जा सकता है। यह स्पष्ट है कि दलित और भूखे व्यक्ति के लिए मत अपने आप में कुछ महत्त्व नहीं रखता ''इसलिए राजनैतिक प्रजातन्त्र अपने आप में पर्याप्त नहीं, सिवाय इसके कि इसका प्रयोग धीरे-धीरे आर्थिक प्रजातन्त्र को अधिक मात्रा में प्राप्त करने में किया जा सके।

१९५५ में कांग्रेस के ऐतिहासिक आवड़ी अधिवेशन में कांग्रेस ने समाजवादी ढांचे को समाज का सिद्धान्त माना।

यह महत्त्वपूर्ण बात है कि आवड़ी अधिवेशन में लिये गए इस निर्णय के साथ ही द्वितीय पंचवर्षीय योजना आरम्भ हुई। नेहरू ने पहले ही देश को संविधान के निर्माण के समय राज्यनीति के निदेशक सिद्धान्तों के निर्धारण द्वारा समाजवादी मार्ग पर चलने के लिए तैयार कर रखा था। परन्तु आवड़ी अधिवेशन और द्वितीय पंचवर्षीय योजना लागू होने के बाद ही हमारे साधनों का तीव्रता से उपयोग हुआ, औद्योगीकरण हुआ, और इन सबसे महत्वपूर्ण बात यह है कि समाज के समस्त साधनों का समान वितरण देश की घोषित नीति तथा पद्धति बन गया।

इसके बाद मिश्रित अर्थव्यवस्था और कल्याणकारी राज्य के चुनौती भरे सिद्धान्त उभर कर आए। विधि निर्माण ने राष्ट्र निर्माण की दिशा ग्रहण की और "अर्थ व्यवस्था की प्रभावशाली ऊंचाइयों" जैसे वाक्यांश हमारे ही राजनैतिक शब्द-कोश में नहीं अपितु पूरे विकासशील विश्व के शब्दकोश में समा गए। योजना आयोग की स्थापना, निजी क्षेत्र का उदय, भूमि सीमा निर्धारण, औद्योगिक एकाधिकार पर नियंत्रण तथा राज्यीय व्यापार आदि इसी नीति के आयाम हैं।

इसी दौरान विज्ञान और तकनीकी के संसार में बहुत से महान् परिवर्तन हो रहे थे। जिनका प्रभाव भारत के जीवन और चिन्तन पर पड़ा। नेहरू जी सदा ही वैज्ञानिक शोध एवं विज्ञान और तकनीकी के विकास में रुचि रखते थे और उनकी पहल पर ही विभिन्न क्षेत्रों में शोध कार्य करने के लिए बहुत सी राष्ट्रीय प्रयोग-शालाएँ स्थापित की गईं। आणविक ऊर्जा के क्षेत्र में बहुत अधिक मात्रा में पूंजी निवेश किया गया तथा कच्चे तेल और खनिज साधनों के विकास में निजी क्षेत्र की सहायता ली गई।

नेहरूजी ने अपनी नीतियों और कार्यक्रमों में हमेशा देश को अपने साथ लिया। उन्होंने राष्ट्रीय मुद्दों पर राष्ट्रीय सहमति प्राप्त करने का प्रयत्न किया और फिर सहमति प्राप्त मूलभूत सिद्धान्तों पर आम सहमति प्राप्त करने का प्रयत्न किया और फिर सहमति प्राप्त प्रस्तावों को लागू करने में लग गए। उन्होंने राष्ट्रीय विकास निगम जैसी संस्थाओं की स्थापना की जिससे कि विभिन्न कार्यक्रमों पर राष्ट्रीय एवं अन्तर क्षेत्रीय सहमति प्राप्त की जा सके। प्रधानमंत्री राष्ट्रीय विकास निगम की बैठकों में राज्य-सरकारों के प्रतिनिधियों को ध्यान से सुनते थे और उनके कथनों को महत्त्व देते थे, भले ही उनके व्यक्तिगत प्रस्ताव स्वीकार्य हो या नहीं। यह निगम सच्चे संघीय ढांचे का क्रिया रूप में प्रतिनिधित्व करता था।

नेहरूजी को किसी व्यक्ति या किसी वर्ग का किसी के द्वारा शोषण स्वीकार्य नहीं था। भारत की महिलाओं की स्थिति के बारे में उनकी चिन्ता इस बात को प्रतिबिम्बित करती थी। राष्ट्रीय आन्दोलन में बहुत सी राष्ट्रभक्त महिलाएँ अपने रीति-रिवाजों के बंधन, घरेलू अवरोध और सामाजिक प्रतिबंधों के बावजूद उभर कर आई और उन्होंने हजारों की संख्या में संघर्ष में योगदान दिया। स्वतन्त्रता प्राप्ति के बाद नेहरू ने राज्यों के मंत्री मंडलों एवं विधायिकाओं में महिलाओं की भागीदारी पर जोर दिया। नेहरू युग में बहुत सी महिलाएँ बहुत से ऊंचे-ऊंचे पदों पर आसीन हुई।

इसके अतिरिक्त धार्मिक अल्पसंख्यकों के प्रति नेहरू की चिन्ता उनके स्वभाव की उदारता की परिचायक थी कि अच्छे समाजवादी के लिए एक अच्छा प्रजातांत्रिक होना आवश्यक है और एक अच्छा प्रजातांत्रिक अवश्य ही धर्मनिरपेक्ष होता है। खान अब्दुल गफ्फार खान, मौलाना आजाद, रफी अहमद किदवई, शेख अब्दुल्ला और डाक्टर जाकिर हुसैन कुछ ऐसे नाम हैं जिनके लिए नेहरू के मन में बहुत अधिक आदर और मान था। नेहरूजी के लिए वे इस सत्य का प्रतिनिधित्व करते थे कि भारत सदा से एक धर्म निरपेक्ष राष्ट्र रहा है और उसे ऐसा ही रहना चाहिए। इसी प्रकार आदिवासियों में उनकी अभिरुचि पिछड़े क्षेत्रों और अल्पसंख्यक समुदायों की आवश्यकताओं के प्रति उनकी दृष्टि की परिचायक थी।

ऐसा कहा जाता है कि एक पेड़ की लम्बाई तभी ठीक तरह से नापी जा सकती है जब वह गिर जाता है। २७ मई १९६४ को यह स्पष्ट हुआ कि नेहरू

सम्पादकीयम्

राष्ट्रस्वातन्त्र्यसङ्घर्षप्रमुखनायकैः संस्कृतसंस्कृतिसमुन्नायकैस्तत्रभवद्भिश्श्रीमद्भिः पण्डितजवाहरलालनेहरूमहाभागैर्विलिखितायास्तदीयाऽत्मकथायाः संस्कृतपद्यानुवादो विधेय इति विचारो द्वात्रिंशद्वृत्तविभूषितां द्विसप्ततिसर्गविलसितां कविरत्नामीरचन्द्रशास्त्रिविरचितसुललितपद्यदशसाहस्रीमयीं नेहरूचरितमहाकाव्याभिधानां मूर्तिं धृत्वा समुदेतीति महतः प्रमोदस्य विषयः। विश्वश्लाघ्यचरितानां पण्डितश्रीनेहरूमहोदयानां महनीयकृतेरनुवादात्मकस्य संस्कृतसाहित्यभाण्डागारविभूषणस्यैतस्य नेहरूचरितमहाकाव्यस्य प्रकाशनं विधातुमवसरं सम्प्राप्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठं स्वं परमधन्यं मनुते। पण्डितश्रीजवाहरलालनेहरूमहोदयाऽत्मकथायाः संस्कृतपद्यानुवादात्मकस्यास्य नेहरूचरितमहाकाव्यस्य रचयितृणां श्रीमतां कविरत्नामीरचन्द्रशास्त्रिणां काव्यनिर्माण-नैपुण्यविषयकं यशो जगति प्रथितमस्ति। श्रीमन्तः कविरत्नामीरचन्द्रशास्त्रिणोऽस्य श्रीलालबहादुरशास्त्रिसंस्कृतविद्यापीठस्योपाचार्यत्वेन साहित्यविभागाध्यक्षत्वेन च विद्यापीठस्य साहित्यिककार्यक्रमाणां कर्णधारा अवर्तन्त। एतैरनेन विद्यापीठेन प्रकाशितस्य विपुलसंस्कृतसाहित्यराशेः सम्पादनकर्मणि महदवदानं विहितम्। एतेषां साहित्यसाधनाबलेन श्रीलालबहादुरशास्त्रिसंस्कृतविद्यापीठं विशिष्टां प्रतिष्ठामलभत। एतया नवीनया नेहरूचरितमहाकाव्यात्मिकया रचनया श्रीमन्तः कविरत्नामीरचन्द्रशास्त्रिणोऽस्य विद्यापीठस्य कीर्तिं सविशेषं संवर्धितवन्त इति महतो हर्षप्रकर्षस्य विषयः।

राष्ट्रस्य सर्वविधसमुत्थानार्थं सततं प्रयतमानैः स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रिभिः पण्डितजवाहरलालनेहरूमहाभागैर्भारतीयसंस्कृतिसंवाहिकायाः संस्कृतभाषायास्तदीयसाहित्यस्य च संरक्षणसंवर्धनार्थं सविशेषं ध्यानमाहितम्। तेषां प्रधानमन्त्रित्वे भारतशासनेन संस्कृतायोगस्य स्थापना विहिता तथा चैतस्यायोगस्य प्रायशः सर्वाः संस्तुतीः स्वीकृत्य विविधाः संस्कृतसाहित्यसंरक्षणप्रचारणोपायाः समारब्धाः। सम्प्रति देशे ये विभिन्ना संस्कृतविषयकाः कार्यक्रमाः प्रवर्तन्ते, तेषामाधारशिला श्रीमद्भिः पण्डितनेहरूमहोदयैर्विन्यस्ताऽस्ति। विश्वसम्मान्यानान्तेषां संस्कृतमहिमख्यापकैर्भाषणैर्लेखैश्च संस्कृतसाहित्यविषये भारतीयानां वैदेशिकानाञ्च सुधियामभिरुचिः सविशेषमवर्धत। एवंविधं श्रद्धेयानां पण्डितश्रीनेहरूणां संस्कृतविषयकं

श्रद्धातिशयं संस्कृतसंरक्षणसक्षमत्वञ्च स्मरतो नेहरूजन्मशताब्दीकार्यक्रमविषये राष्ट्रियसंस्कृतसंस्थान-निदेशकत्वेन विचिन्तयतो मे मनसि विचारः समुदभूद् यद्धि भारतीयस्वतन्त्रतान्दोलनसमये कारागारे निवसद्भिः पण्डितश्रीनेहरूमहाभागैर्याऽऽत्मकथा प्रस्तुता, तस्या गद्यात्मिकाया आङ्ग्लभाषानिबद्धायाः श्रीनेहरूमहोदय-कृतेः संस्कृतपद्यानुवादो यदि विधीयेत तर्हि संस्कृतसंरक्षणसक्षणान् तान् श्रीनेहरून् प्रति संस्कृतसमुपासकवर्गस्य समुचितः श्रद्धाञ्जलिर्भविष्यति तथा चानेन विधिना संस्कृतसाहित्यभाण्डागारस्यानुपमा श्रीवृद्धिः सम्पत्स्यते । एष विचारो मया लालबहादुरशास्त्रिविद्यापीठोपाचार्याणां कविरत्नामीरचन्द्रशास्त्रिणां समक्षं प्रकटितः । पण्डितनेहरून् प्रति श्रद्धाविशेषादेतैर्मदीयं निवेदनं सहर्षमङ्गीकृतम् । आङ्ग्लभाषापेक्षया हिन्दीभाषायामधिकतरं प्रवीण्यं धारयद्भिरेतैस्तत्कार्यसम्पादनार्थं श्रीनेहरूमहोदयाऽऽत्मकथायाः हिन्दी रूपान्तरणात्मको 'मेरी कहानी' इति संज्ञको ग्रन्थ आधारीकृतः । एते तत्र मेरी कहानी' इति संज्ञके ग्रन्थे प्रकाशितं सर्वमपि श्रीनेहरूजीवनवृत्तम् अनुष्टुब्माणवकशिखरिणीप्रभृतिभिर्द्वात्रिंशद्वृत्तैः, सुललितसंस्कृतपद्यदशसाहस्रचा, सर्गद्विसप्तत्या प्रस्तुतवन्तस्तथा चैनां रचनां नेहरूचरितमहाकाव्यमिति संज्ञया विभूषितवन्तः । कविहृदयैः पण्डितनेहरूमहोदयैर्विलिखिता गद्यप्रधाना तदीयाऽऽत्मकथा विशिष्टाऽऽख्यायिकाकाव्यरूपेण प्रसिद्धा, सैभिः पद्याकारं सर्गबन्धादिकञ्च प्रापिताऽतोहि महाकाव्यत्वेन सम्माननीयेति युक्तियुक्तमेव । प्रकृतेर्गुणा अनुकृतौ समायान्तीति सिद्धान्तानुसारमस्यां संस्कृतपद्यानुवादात्मिकायां कृतौ काव्यचमत्कारविशेषाः पण्डितनेहरूविरचितात्मकथातः सङ्क्रान्ताः सन्ति ।

महामहिमशालिभिर्भारतराष्ट्रपतिभिः श्रीरामस्वामिवेङ्कटरामन्महोदयैः सानुग्रहमस्य नेहरूचरितमहाकाव्यस्य प्राक्कथनम् प्रस्तुतमिति नूनं परमसौभाग्यस्य विषयः । राष्ट्रपतिमहोदयैः प्रस्तुतेन अनेन विद्वत्तापूर्णेन विशदेन च प्राक्कथनेन ग्रन्थस्य महत्त्वं सविशेषं वर्धितम् । श्रद्धेया, श्रीरामस्वामिवेङ्कटरामन्महोदयाः तत्रभवतां श्रीमतां पण्डितजवाहरलालनेहरूणां सहयोगिन आसन् । एतेषां जीवनं श्रीनेहरूमहोदयजीवनमिव त्यागतपोविद्याबलसम्पन्नं विद्यते तथा चैते संस्कृतसंरक्षणसंवर्धनकार्ये रुचिमादधति । एतैः प्रस्तुतं नेहरूचरितमहाकाव्यस्यैतत् प्राक्कथनं भारतीयस्वातन्त्र्यसङ्घर्षेतिहासस्य पण्डितनेहरूजीवनस्य च बहूनतिमहत्त्वपूर्णानंशान् प्रकाशयति । तत्रभवद्भिः श्रीमद्भिर्नेहरूमहोदयैर्विलिखितायां तदीयाऽऽत्मकथायां चत्वारिंशदधिकैकोनविंशखिृष्टाब्दं पर्यन्तस्य राष्ट्रियस्वातन्त्र्यसङ्घर्षेतिहासस्य समुल्लेखो विद्यते ।

तदनन्तरं वर्षचतुर्विंशतौ पण्डितनेहरूजीवनेऽत्यन्तमहत्त्वपूर्णाः घटनाः सञ्जातास्तासां तदीयाऽत्मकथायां वर्णनं नैवास्ति तेन हि तस्य ग्रन्थस्यापूर्णत्वं प्रतीयते। भारतविभाजनस्य स्वतन्त्रताऽवाप्तिप्रभृतीनाञ्च श्रीनेहरूचरितसम्बद्धनामतिमहत्त्वपूर्णघटनानां स्वप्राक्कथने यथोचितः समुल्लेखः श्रीरामस्वामिवेङ्कटरामन्महोदयैर्विहितस्तेन ह्यस्य नेहरूचरितमहाकाव्यस्य निखिलत्वं निश्चीयते। अत्र प्राक्कथने उत्तरनेहरूचरितचित्रणमेतस्य विलक्षणत्वं साधयति।

आङ्गलभाषानिबद्धायाः श्रीमन्नेहरूमहोदयाऽत्मकथायाः भाषान्तरानुवादकदम्बके संस्कृतपद्यानुवादात्मकमिदं श्रीनेहरूचरितमहाकाव्यं सविशेषं शोभते। अस्य रचना संस्कृतसुकविवरेण्यैः श्रीमद्भिरमीरचन्द्रशास्त्रिभिर्विहिता। यद्यप्यनुवादात्मिकायां रचनायामनुवादकस्य प्रतिभा नैव प्रसरति, तत्र तु मूलकृतेरनुकरणमेव प्राधान्यं भजते परन्तु तत्रापि पदचयनादिविषयेऽनुवादकबुद्धिवैभवं स्फुटं प्रकाशते। यत्र गद्यस्यानुवादः पद्येन विधीयते, तत्र त्वनुवादकस्य बुद्धेर्वैभवं सविशेषं परीक्ष्यते। अत्र श्रीनेहरूविरचितात्मकथायाः संस्कृतपद्यानुवादात्मके नेहरूचरितमहाकाव्ये विहितो विभिन्नवृत्तपरिग्रहः श्रीमदमीरचन्द्रशास्त्रिणां कविकर्मकुशलत्वं स्फुटं प्रकाशयति। द्विसप्ततिसर्गयुतेऽस्मिन् महाकाव्ये द्वात्रिंशद्वृत्तानि विलसन्ति, तथा चैतेषां कथानकांशप्रकाशनानुकूलतया कृतः परिग्रहः शोभते। अस्य महाकाव्यस्य प्रथमे सर्गे पण्डितश्रीजवाहरलालनेहरूपूर्वजानां काश्मीरिकविप्राणां परिचयः प्रस्तुतोऽस्ति तथा चात्र पण्डितनेहरूजन्मकथा प्रकाशिता। एतत्सर्वं वृत्तं पुराणेतिहासप्रस्तुतकथानकसदृशं विभाव्यामीरचन्द्रशास्त्रिभिः प्रथमसर्गस्य रचनाऽनुष्टुभा विहिता। एतदनन्तरं द्वितीये सर्गे पण्डितश्रीजवाहरलालनेहरूणां बालावस्था वर्णिताऽत एव सुकविवरैरमीरचन्द्रशास्त्रिभिरस्मिन् सर्गे माणवकाभिधानस्य छन्दसः परिग्रहः कृतः। तदनु तृतीये सर्गे शिक्षाराजनीतिसमुन्नतशिखरस्थितिः श्रीमतां पण्डितजवाहरलालानां वर्णिताऽत्र सर्गे कथानकानुकूलं शिखरिणीवृत्तं परिगृहीतमेवञ्चाग्रे राजनीति-क्षेत्रे श्रीनेहरूणां सिंहसदृशाचरणं वर्णयितुममीरचन्द्रशास्त्रिभिः शार्दूलविक्रीडितवृत्तं परिगृहीतम्। इत्थं समस्तेऽपि महाकाव्ये कथानकानुकूलो वृत्तपरिग्रहो विलसति तेनेयं रचना सविशेषशोभावहा सञ्जातेत्यत्र नास्ति संशीतिलेशः।

अत्र नेहरूचरितमहाकाव्ये कविरत्नामीरचन्द्रशास्त्रिणां समुचितपदगुम्फनकौशलं स्फुटं प्रकाशते तथा च भाषान्तरापेक्षया संस्कृतभाषा सविशेषं हृदयावर्जनं विदधातीति सुधीसम्मतं तथ्यमेषा रचना सविशेषं सम्पोषयति। श्रीमन्नेहरूमहोदयात्मकथायां प्रकाशितं कथानकं संस्कृत पद्यमाध्यमेन प्रस्तुतवन्तः श्रीमदमीरचन्द्रशास्त्रिणः

समुचितललितपदविन्यासेन किमपि सौन्दर्यविशेषमाहितवन्तो यथा हि तत्र नेहरू-महोदयात्मकथायाः प्रारम्भे काश्मीरिकब्राह्मणवंशविषये वर्णितमस्ति यद्धि नेहरूवंशस्य प्राक्तनी संज्ञा कौल इत्यसीत्तथा चैतद्वंशीयेन राजकौलनामकेन विदुषा दिल्लयां 'नहर' इत्यभिधेयस्य जलाशयस्य समीपे निवासः कृतस्ततो हि नेहरूरित्यभिधानं प्रवृत्तमेतस्य वृत्तस्य वर्णनममीरचन्द्रशास्त्रिभिः नेहरूचरितमहाकाव्ये एभिश्शब्दैर्विहित-मस्ति—

अस्मै यद् भवनं या च भूमिसम्पत्तिरर्पिता ।
अभवत् किल कालिन्दीकुल्याकूलेऽत्र तद्द्वयम् ।
कुल्यां "नेहर" इत्याहुर्नीरहारितया बुधाः ।
तत्कूले निवसन्तं च नेहरूरिति ते पुनः ।

एवमेव प्रयागराजस्थस्य पण्डितश्रीनेहरूनिवासस्यानन्दभवनस्य वर्णनं श्रीनेहरू-चरितमहाकाव्य इत्थं कृतम्—

महाहर्म्ये चास्मिन्नवयवलवास्ते नवनवाः
समायोज्यन्तेस्म स्थपतिखनकैश्चात्मकृतयः ।
श्रमाजीवानत्र स्वकृतिनिहतान् द्रष्टुमथ मे
मनोऽत्यन्तं सोत्कं क्षणमपि न हातुं प्रभवति ॥
सरः सान्निध्येनात्राविदमहमहो ! तत्र तरणं
तरंश्चाहं भीतिं मनसि नहि काञ्चित्त्वकलयम् ।
निदाघे चैतस्मिन् समयमनुपश्यन्नसमयं
ह्यवातार्षं स्नातुं पुनरपि पुनर्हर्षितमनाः ॥
पितुर्मित्राण्यस्मिन् दिवसविगमे तर्तुमविशन्
तदासीदेकान्तान्नवमिति विलोक्यास्मि चकितः ।
सरस्यस्मिन् सद्मन्यपि च मुहुरस्मिन्नवनवाः
प्रयुक्ता वैद्युत्यो मम सुखमधुर्दीपकशिखाः ॥
अहो स्नातां यूथे मम समभवत्सौख्यमतुलं
विशेषाद्ये तर्तुं नहि समविदंस्तान् रमयितुम् ।
जले कञ्चित्क्षिप्तं पुनरपि च कृष्टं तमिह यद्
व्यलोकेऽहं भीतं तदभवदहो ! मेऽतिकुतुकम् ॥

यद्यपीदं नेहरूचरितमहाकाव्यं पं०श्रीजवाहरलालनेहरूमहोदयानाम् आत्मकथायाः पद्यानुवादमहाकाव्यत्वेन विराजते परमनुवादकैः कविशिरोमणिभिः श्रीअमीरचन्द्रशास्त्रिभिः संस्कृतकविस्वभावानुरूपं विभिन्नेषु सर्गेषु श्रीनेहरूलिखितातिं-

रिक्तानि विषयकानिणाम् कविपरिचयप्रशस्तिपरकाणि पद्यान्यपि समाविष्टानि । तत्र कविशिरोमणिनां वाग्विलासः उत्साहः क्वचिच् च नेहरूपरिवारं प्रति आस्थाविशेष एव कारणायमस्ति । यथा हि कविवरैः 'काश्मीरिकं कुलम्' इति शीर्षके प्रथमे सर्गे राजीवसञ्जययोरपि समुल्लेखः कथान्तरोल्लेखश्च चतुर्भिः पद्यैः (४६-४९) कृतः । अग्रे चात्मकथायाः प्रस्तावनां कविपरिचयं च प्रास्तुवन् । अन्येषाम् सर्गाणामन्ते सर्गमध्येऽपिच कविमहोदयानाम् एतादृशः काव्यविभवो दरीदृश्यते ।

संस्कृतभाषाया वैशिष्टयं पण्डितजवाहरलालनेहरूचित्तं समाकर्षयत् । संस्कृतं प्रति तेषां हृदये विशिष्टा श्रद्धाऽऽसीदिति तदीयलेखैर्भाषणैश्च विज्ञायते । तत्रैकष्ट्यधिकैकोनविंशशतमिते खिष्टाब्दे कलिकातानगर्यां भारतराष्ट्रपतीनां राजेन्द्र-प्रसादमहोदयानां मुख्यातिथित्वे अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य विशिष्टा-धिवेशनं प्रावर्तत । अस्याधिवेशनस्य साफल्याय प्रेषिते स्वसन्देशे श्रीनेहरूमहोदयैः प्रकाशितं यद् "अहं संस्कृतेन तत्र निहितया संस्कृत्या च सर्वाधिकमभिभावितोऽस्मि ।" वस्तुतस्ते स्वहृदये संस्कृतभाषां प्रत्यसाधारणीं श्रद्धां धारयन्ति स्म । संस्कृतविषयि-ण्यास्तदीयश्रद्धायाः परिचय आत्मकथायाः संस्कृतानुवादविधिप्रसङ्गे कमलापतिमिश्राय प्रेषितेन पत्रेण प्राप्यते । लक्ष्मणपुरस्थेन कमलापतिमिश्राभिधेन विदुषा सूचितमासीद् यद्धि तत्र भवताम् आत्मकथायाः संस्कृतगद्यमयमनुवादं विधातुं मदीया कामनाऽस्ति । कमलापतिमिश्रेण प्रेषितममुं प्रस्तावं स्वीकुर्वद्भिस्तत्रभवद्भिर्नेहरूमहोदयैः स्वहस्त-लेखेन तदुत्तरं प्रेषितं तथा च पत्र-पुटकोपरि कमलापतिमिश्रस्य पत्रसङ्केतोऽपि स्वहस्तेनैव तैर्व्यधायि । एतेन संस्कृतं प्रति तेषां विशिष्टादरः स्फुटं प्रकाशते । अस्य प्रथमभागस्य प्रकाशनं उत्तरप्रदेश-संस्कृत-अकादम्या विहितं विमोचञ्च स्वनाम-धन्यैः श्रीराजीवगान्धिमहोदयैः कृतम् । मयैवायं समारोहः संयोजितो नवदेहल्याम् । अयमस्ति दुर्भाग्यस्य विषयो यदनुवादोऽयं न पूर्णतां प्राप्तः श्री मिश्राश्च विगते मासे दिवंगताः ।

तत्रभवतां श्रीमतां पण्डितजवाहरलालनेहरूमहोदयानां हृदयं राष्ट्रप्रेमपूरित-मासीत् तथा च ते समस्तायाः मानवजातेः कल्याणं वांच्छन्तिस्मेति तेषां सान्निध्यं कृपापात्रताञ्च प्राप्तवता मया बहुधाऽनुभूतम् । तत्र नवपञ्चाशदधिकैकोनविंशशत-मिते खिष्टाब्दे राजस्थानप्रदेशस्य भीलवाडानगरे भारतसेवकसमाजस्याखिल-भारतीयमधिवेशनमायोजितमासीत् । एतस्याधिवेशनस्योद्घाटनं विधातुं श्रीमन्तो नेहरूमहोदयास्तत्र समुपस्थिताः । तस्याधिवेशनस्य व्यवस्थाभारः भारतसेवकसमाज-कार्यवाहकाध्यक्षैर्गुलजारीलालनन्दामहोदयैः राजस्थानप्रदेशशाखासंयोजकैः श्रीमाणि-क्यलालवर्ममहाशयैश्च मयि न्यस्त आसीत् । यस्मिन् दिवसे श्रीनेहरूमहोदयास्तत्राधि-

वेशने समुपस्थिता अभूवन्, तस्मिन् दिने भीलवाड़ा-नगरसमीपे एका बसयानदुर्घटना सञ्जाता, यस्यां बहूनां जनानां मृत्युरभवत् । श्रीनेहरूमहोदया बसयानदुर्घटनामिमां ज्ञात्वा पूर्वनिर्धारितकार्यक्रम-सूचितं सामूहिकभोजं नृत्यसङ्गीतादिककार्यक्रमांश्च निस्सारितवन्तः । संयोजकैर्यदा निवेदितं यद् भारतसेवकसमाजाधिवेशनेन सहेयं बसयानदुर्घटना कथमपि सम्बद्धा नैव विद्यतेऽतएवाधिवेशनकार्यक्रमे परिवर्तनं नापेक्ष्यते, तर्हि श्रीनेहरूमहोदयैः साक्रोशं भणितं यद्धि भवतु नामेयं घटनाऽनेनाधिवेशनेनाऽसम्बद्धा तथापीयमपि घटना मानवतया तु सम्बद्धाऽस्त्येव । तेषामेतद् वक्तव्यं तद्हृदये व्याप्तां लोककल्याणकामनां स्फुटं प्रकाशयति । अस्य नेहरूचरितमहाकाव्यस्य रचना नेहरूमहोदयविलिखितायास्तदीयात्मकथाया अनुवादरूपेण विहिताऽतोह्यत्र महाकाव्ये श्रीनेहरूमहोदयानां गुणगण-प्रशंसनं यथोचितरूपेण नैवाभवत्, न केनाऽपि सुधिया स्वप्रशंसा विधीयते ।

राष्ट्रप्रेमपरिपूरितहृदयैः पण्डितश्रीजवाहरलालनेहरूमहोदयैर्विलिखितायास्तदीयाऽऽत्मकथायाः संस्कृतपद्यानुवादात्मको नेहरूचरितमहाकाव्याख्योऽयं ग्रन्थः संस्कृतसंस्कृतिसंरक्षकानान्तेषां पादपङ्कजेषु संस्कृतसमुपासकसमाजस्य विनम्रः श्रद्धाञ्जलिः कल्पताम् । अस्य राष्ट्रस्वातन्त्र्य-सङ्घर्षेतिहासप्रकाशकस्य ग्रन्थस्य विशदे प्राक्कथनं प्रस्तूय महामहिमशालिभिर्भारतराष्ट्रपतिभिः श्रीरामस्वामिवेङ्कटरामन् महोदयैर्यो ह्युपकारः कृतो वस्तुतः सोऽनिर्वचनीय एवास्ति । एतद्विषये विद्यापीठ-परिवारो हार्दिकीं कृतज्ञतां निवेदयति । मनीषिमूर्धन्यानां हैयङ्गवीनहृदयानां भारतरत्नपण्डितजवाहरलालनेहरूमहोदयानां भारतीयस्वातन्त्र्यसङ्घर्षेतिहासरूपप्रकाशिकां कृतिमाधृत्य कविरत्नैरमीरचन्द्रशास्त्रिभिर्विरिचितस्य महामहिमभारतराष्ट्रपति श्रीरामस्वामिवेङ्कटरामन्महोदयैः प्रस्तुतेन प्राक्कथनेन विभूषितस्यैतस्य नेहरूचरितमहाकाव्यस्य प्रकाशनं खलु श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य पचेलिमं भागधेयं परिचाययति । अस्य ग्रन्थस्य सम्पादन-प्रारूपसंशोधनादिके विधौ विद्यापीठस्य प्राचार्येण डा०श्रीधरवासिष्ठेन शोधप्रकाशनविभागीयैश्च सहायकैः सततं सहयोगो विहितः सश्रद्धञ्च स्वकर्तव्यं निर्व्यूढन्तथापि मुद्रणे यत्र तत्राशुद्धयो विलोक्यन्ते, ताः सुधीपाठकवृन्देन गच्छतः स्खलनं क्वापीति दृशाऽवमर्शनीया इति सम्प्रार्थयते —

विदुषां वशंवदः

डा०मण्डनमिश्रः

कुलपतिः,

लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्

अक्षयतृतीया वि.सं. २०४८

१५ मई १९९१, नवदेहली

कृतज्ञताञ्जलिः

महदस्ति संस्कृतभाषायाः साहित्यम् । एतत्संस्कृतभाषायाः एव गौरवं यत् परःसहस्रवर्षेभ्यः प्राक् यथा अस्यां भाषायां जना विचाराभिव्यक्तिं कुर्वन्तिस्म तथैव अद्यापि प्रवाहपूर्वकं लिखन्ति, पठन्ति भाषन्ते च । परमयं प्राकृतिकः सिद्धान्तो यत् सर्वथा परिपूर्णेऽपि कासारे यदि नूतनं जलं न पतति तदा तस्य जलं मलिनं जायते, एवमेव यदि भाषायाः साहित्यं नैरन्तर्येण न वर्धते तदा तस्याः दैन्यस्य भयमुत्पद्यते । संस्कृतस्य एतत् सौभाग्यं यत् अद्यापि एतस्यां भाषायां दैनिक-साप्ताहिक-मासिक-वार्षिक पत्र-पत्रिकाणां प्रकाशनं निर्बाधरूपेण जायते । नूतनस्य गद्यपद्यचम्पूनाटकमयस्य साहित्यस्य रचना सततं विधीयमाना वर्तते ।

कस्याः अपि भाषायाः स्थायिसाहित्यभाण्डारः द्वाभ्यां विधीभ्यां प्रवर्धते— मौलिकरचनाद्वारा अनुवादद्वारा च ।

संस्कृतभाषायाः कवयः रचनाकाराः आदित एव मौलिकरचनानां तादृशानि मौक्तिकानि व्यसृजन् येषां दीप्त्या विश्वं चकितं दृश्यते । परं मौलिकरचनाः भाषा-विशेषस्य कवीनां कृतीः एव अध्येतृणां सम्मुखं स्थापयन्ति, अवशिष्टे जगति ये विशिष्टाः अप्रतिमप्रतिभावन्तः विचारकाः कवयः लेखकाश्च विद्यन्ते तेषां कृतिभिः ते अपरिचिताः एव तिष्ठन्ति । एतादृश्यां स्थितौ अनुवादकार्यं सेतुरूपं सिद्धयति । एतदनुवादकार्यस्यैव महत्त्वं यत् महाकवेः कालिदासस्य अभिज्ञानशाकुन्तलं संस्कृत-भाषया सर्वथा अपरिचितैरपि विद्वद्भिरास्वादितम् । जर्मनभाषायां तस्य अनुवादं पठित्वा तु महाकविः 'गेटे' महोदयः सम्पूर्णं स्वर्गं तत्र अनुभूतवान् । अनुवादद्वारैव महाकवेः रवीन्द्रनाथठाकुरस्य "गीताञ्जलि" बंगलाभाषापरिचितैः विज्ञाता । तद्द्वारैव स्वनामधन्येन गुरुदेवेन "नोबेल" पुरस्कार प्राप्य भारतराष्ट्रस्य सम्मान वर्धितम् ।

पण्डितजवाहरलालनेहरूमहोदयः यावान् महान् राजनीतिज्ञः आसीत् तावान् श्रेयान् साहित्यकारः अपि आसीत् । श्रीनेहरूमहोदयस्य रचनाः विश्वसाहित्यस्य अनर्घ्याणि रत्नानि सन्ति । तेष्वेकं चाकचक्यचितं रत्नं "आत्मकथा" इति अवचित्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य अमीरचन्द्रशास्त्रिवर्यैःस्वकवित्वचिक्क-णेन चिक्कणीकृत्य संस्कृतभाषाविदां पुरः समर्प्यते । एतस्य ग्रन्थस्य साहाय्येन

वयं श्रीमतां नेहरूमहोदयानां प्रारम्भिकजीवनगाथाज्ञानपूर्वकं द्वितीयविश्वयुद्धात्पूर्वं तेषां विचारैः भारतीयेतिहासस्य परिस्थितिभिश्च परिचिताः भवामः । तदनन्तरं तु ते तथा व्यस्ताः अभूवन् यत् घटनानां लिपिबन्धने तेषां निकटे समय एव नासीत् । परं एतस्मिन् ग्रन्थे यत्किमपि आगतं तत्सर्वं ग्रन्थमिमं विश्वसाहित्ये विशिष्टं स्थानं दापयितुमलम् ।

पण्डितवर्याणां नेहरूमहोदयानां जीवनवृत्तं कविप्रवराणां श्रीमदमीरचन्द्र-शास्त्रिणां कवित्वं इत्युभे मिलित्वा "सुवर्णे सुगन्धः" इतीमाम् उक्ति साधयतः ।

संस्कृतसाहित्ये महाकाव्यानाम् एका दीर्घा श्रृंखला अस्ति । मन्ये यत् श्रीमद-मीरचन्द्रशास्त्रिणाम् इयं अनुवादकृतिः श्रीनेहरूमहोदयानां "आत्मकथा" इति मौलिकरचनां महाकाव्यानां मालायां विशिष्टं स्थानं दापयिष्यति ।

अस्य "श्रीनेहरूचरितम्" इति ग्रन्थस्य प्रधानसम्पादकरूपेण कुलपतिभिः डा० मण्डनमिश्रैः अस्माकं मार्गदर्शनं कृतम्, तदर्थम् अयं विद्यापीठपरिवारः तान्प्रति अधमर्णतामभिव्यनक्ति ।

एतदस्माकं सौभाग्यं यत् श्रीनेहरूमहोदयानां कृतेः संस्कृतानुवादेन सह भारतराष्ट्रपतिपदम् अधिष्ठितानां महामहिम्नां रामस्वामिवेङ्कटरामन्महाभागानां विचाराः प्राक्कथनरूपेण प्रकाश्यन्ते । महामहिमराष्ट्रपतिमहोदयैः पण्डितनेहरू-महोदयान्प्रति भावनाप्रवणविचाराः सूक्ष्मेक्षिकया प्रकटिताः । एतेन इयं अनुवादरचना, कविरत्नश्रीअमीरचन्द्रशास्त्री तथा च विद्यापीठम् आत्मानं धन्यधन्यं मन्यन्ते ।

'श्याममुद्रक'—जनैः अतीव परिश्रमेण धैर्येण च अस्य महतः काव्यस्य कष्टा-न्यनुभूयाऽपि मुद्रणं कृतं तदर्थं ते धन्यवादार्हाः ।

मन्येऽहं विदुषां हस्ते इयमनुवादरचना श्लाघां प्राप्स्यति तथा च पण्डित-नेहरूमहोदयानाम् अन्याः कृती अनुवादार्थं हस्ते ग्रहीतुं प्रेरणां दास्यति ।

दीपावली
वि. सं. २०४७

डॉ० श्रीधरवासिष्ठः

पण्डितजवाहरलालनेहरूलिखिता संस्कृतपद्यानूदिता

प्रस्तावना

[1]एकद्वामन्तिमां वार्तां परिवृत्तीश्च काश्चन ।
विहायात्र चतुस्त्रिंशज्जूनादारभ्य फर्वरीम् ॥ १ ॥
पञ्चत्रिंशाब्दजां यावत्समस्तं पुस्तकं त्विदम् ।
मयाऽलिख्यत कारायां स्थितेनोद्देश्यतो निजात् ॥ २ ॥
लग्नः स्यां निश्चिते कार्ये कारैकान्तिकजीवने ।
व्यतियापयितुं घस्रान् गिरिभ्योऽपि गुरूनिह ॥ ३ ॥
हिन्दुस्थानीयघटना अतीता मनसोहितुम् ।
अपोहितुं किलाकाङ्क्षे सम्बद्धा या मयात्मना ॥ ४ ॥
तासु चिन्तयितुं येन शक्नुयां स्पष्टरूपतः ।
आत्मजिज्ञासया तावदुपक्रान्तं मया त्विदम् ॥ ५ ॥
तयैव चैष प्रायेण निरूढो लेखनक्रमः ।
पाठकान् समनुध्याय नेदं तु लिखितं मया ॥ ६ ॥
क्वचित्ते भारतीया मे स्वदेश्या ध्यानमस्पृशन् ।
विदेश्यानामनुध्यानेऽलेखिष्यमिदमन्यथा ॥ ७ ॥
तदान्यास्वेव वार्तासु ह्यभविष्यं समाहितः ।
याश्चात्रोपेक्षितास्तासु तदाधास्यमहं बलम् ॥ ८ ॥

---

१. वैक्रमे रससिन्ध्वब्दे सोनविंशशताब्दके (१९४६) ।
मार्गशीर्षे कृष्णपक्षे सप्तम्यां गुरुवासरे ॥ १ ॥
साष्टादशशते चोननवते खृष्टवत्सरे (१८८९) ।
नवम्बरचतुर्दश्यां तिथौ यस्याभवज्जनिः ॥ २ ॥
तेन सार्धद्विचत्वारिंशद्वर्षेणैवाष्टमासतः ।
यथावकाशं कार्याणां कर्मणामविरोधतः ॥ ३ ॥

समक्षेप्स्यञ्च ता यासां विहितोऽस्त्यत्र विस्तरः ।
साधारण्येन तर्ह्येता उपन्यासिष्यमत्र च ।। ९ ।।
विदेश्यानां रुचिर्न स्यात्प्रायस्तास्विति सम्भवः ।
यासु वादविवादानां कोऽपि नावसरः स्थितः ।। १० ।।
हिन्दुस्थानस्य तु कृते तासामस्त्येव गौरवम् ।
राजनैतिकचिन्तानां व्यक्तीनाञ्च विशेषतः ।। ११ ।।
आशासे पाठका एतल्लेखनानेहसि स्थितिम् ।
मदीयां तां स्मरिष्यन्ति विशेषात्कष्टसम्भृताम् ।। १२ ।।
तस्याः स्थितेः प्रभावश्च स्फुट एवात्र लक्ष्यते ।
अन्यदा लिखितं ह्येतदभविष्यत्किलान्यथा ।। १३ ।।
क्वचित्क्वचिद्विशेषेण संयतं च रसान्वितम् ।
तथापि यादृशमिदं तादृशं स्यादविच्युतम् ।। १४ ।।
इत्येवोचितमाभान्मे केभ्यश्चित्त्विदमेंव वै ।
रोचमानं भवेद्रूपं स्वभावाद् भावदर्शकम् ।। १५ ।।
यथासम्भवमत्रास्ति विकासो मानसोऽङ्कितः ।
हिन्दुस्थानस्याधुनिको नेतिहासो बिवेचितः ।। १६ ।।
उपरिष्टादिदं भायात्तादृशं किन्तु पाठकाः ।
वञ्चिता न भवेयुर्ये जानन्तो वस्तु वस्तुतः ।। १७ ।।
विवृतिर्व्यक्तिगा सेयं सर्वथैकाङ्गवर्तिनी ।
निश्चप्रचमियं ज्ञेया सर्वथैवैकपक्षगा ।। १८ ।।
महत्त्वाधायिकाः काश्चिद् घटनाः सन्त्युपेक्षिताः ।
विशिष्टप्रतिभाः काश्चिद् व्यक्तयश्चात्र विस्मृताः ।। १९ ।।
घटनानामतीतानां विवेकेऽक्षम्यमेव तत् ।
मामकी तु कथा व्यक्तिगेयमस्ति क्षमास्पदम् ।। २० ।।
तासां कृते साधनानि समाश्रेयाणि कानिचित् ।
इयं तु विवृतिश्छिन्नशृङ्खलायोजिनी भवेत् ।। २१ ।।
सत्यस्य च कठोरस्याध्ययने स्यात्सहायिका ।
ईदृश्योऽन्या विवृतयो भवेयुरुपकारिकाः ।। २२ ।।

वर्षैः सहकृतां प्रेमभाजामादरमर्हताम् ।
सुहृदां भूयसामत्र सार्चा चर्चा कृता मया ॥ २३ ॥
व्यक्तयः समुदायाश्च केचिदालोचिता भृशम् ।
न त्वादरं न्यूनयितुं सा क्षमा मम तान् प्रति ॥ २४ ॥
ये तु विश्वजनीनेषु कार्येषु स्युः सर्मपिताः ।
तैः सेवनीयां जनतां प्रति स्पष्टं प्रवर्त्यताम् ॥ २५ ॥
सहकार्यकृत्सु च स्पष्टवादिता नापहीयताम् ।
प्रत्यक्षशिष्टाचारैर्वाऽसामञ्जस्यप्रदर्शनैः ॥ २६ ॥
वैवश्याधायकाः प्रश्ना नोपेक्ष्यास्तैरुपेक्षितैः ।
न जानीमः किलान्योन्यं समस्यामर्म च स्फुटम् ॥ २७ ॥
मतभेदे मतैक्ये वा वस्तुस्थित्यां समादरे ।
कठोरेऽपि हि साम्मुख्यं सहयोगस्य लक्षणम् ॥ २८ ॥
तेनैव लिखितं व्यक्तिष्वहो न द्वेषरागतः ।
वर्तमानसमस्यासु भारतस्य विवेचनम् ॥ २९ ॥
वैवश्यान्न कृतं पूर्वं पश्चाच्चौचित्यतः स्वयम् ।
मामकीयं कथा रेखाचित्रं भूतभवत्कयोः ॥ ३० ॥

वेडनवीलरे **जवाहरलालनेहरूः**

२ जनवरी, १९३६ दिनाङ्के

मुपनीताः । संस्कृतरत्नाकरस्योक्तयोर्विशेषाङ्कयोर्भूयसी राष्ट्रियसाहित्यसामग्री समाहिता । तत्र मया भारतप्रधानमन्त्रिणं श्रीजवाहरलालनेहरूमहाभागमधिकृत्य —

१. काश्मीरिकं कुलम्
२. श्रीनेहरूणामुत्तराधिकारलेखः
३. आजौ कुतः संशयः
४. नम स्तान्नेतृजनगुरवे
५. को भयस्यावकाशः
६. श्रीनेहरूचित्रपरिचयपद्यानि
७. अस्माकं प्रधानमन्त्री
८. किं कं प्रति ब्रूमहे ।

इत्यादिशीर्षकाणि पद्यानि गद्यानि च लिखितानि, प्रकाशितान्यभूवन् ।

एषु काश्मीरिकं कुलम् अस्य नेहरूचरितमहाकाव्यस्य प्रथमसर्गतोऽत्र पुनः प्रकाशमुपगतम् गीतिकादम्बर्यान्तु ततोऽतिरिक्तानि

९. श्रीनेहरूनिर्वाणशोकपद्यान्यपि प्रकाशितानि ।

अथात्र श्रीजवाहरलालनेहरूचरिताख्ये द्विसप्ततिसर्गात्मके दशसाहस्रीसंहितास्वरूपे मामकीनकथानुवादे द्वात्रिंशतो वृत्तानां प्रयोगः कृतोऽस्ति । तथाहि—

१. अनुष्टुप्—प्रथमे सर्गे—४८, द्वाविंशे सर्गे—१३९,सप्तविंशे सर्गे—१८२, एकत्रिंशे सर्गे—१६६, अष्टत्रिंशे सर्गे—१८१, द्विषष्टे सर्गे—६०१,

२. माणक्कम्—द्वितीय सर्गे—१२८

३. शिखरिणी—तृतीये सर्गे—६४, पञ्चत्रिंशे सर्गे—१२४, त्रिचत्वारिंशे सर्गे—१२३, त्रिषष्टेसर्गे—१९२

४. द्रुतविलम्बितम्—चतुर्थे सर्गे—१८८, विंशे सर्गे—१०४, द्विचत्वारिंशे सर्गे—२१२,

५. वसन्ततिलकम्—पञ्चमे सर्गे—१४२, अष्टाविंशे सर्गे—१११, एकोनत्रिंशे सर्गे—१११, चतुश्चत्वारिंशे सर्गे—१२१, सप्तषष्टितमे सर्गे—३१२,

६. शार्दूलविक्रीडितम्—षष्ठे सर्गे—२४, चतुर्विंशे सर्गे—११९, सप्तत्रिंशे सर्गे—१०७, षट्चत्वारिंशे सर्गे—१०५, सप्तते सर्गे—१८

७. मन्दाक्रान्ता—सप्तमे सर्गे—९९, एकचत्वारिंशे सर्गे—४३, एकषष्टे सर्गे—१४०, एकोनसप्तते सर्गे—२८६

८. पञ्चचामरम्—अष्टमे सर्गे—९७ एकोनचत्वारिंशे सर्गे—१७७,

९. स्रग्धरा—दशमे सर्गे—११८, त्रयोविंशे सर्गे—४८, षट्त्रिंशे सर्गे—४२, चत्वारिंशेसर्गे—८०

१०. स्वागता—एकादशे सर्गे—१२५

११. शालिनी—द्वादशे सर्गे—१४२, षड्विंशे सर्गे—१३९, त्रिंशे सर्गे—१३१,

१२. मालिनी—त्रयोदशे सर्गे—१०७, चतुस्त्रिंशे सर्गे—१३४, सप्तचत्वारिंशे सर्गे—१४६, ऊनपञ्चाशे सर्गे—५४, षट्षष्टितमे सर्गे—८५,

१३. वंशस्थविलेन्द्रवंशयोरुपजातिः नवमे सर्गे—११९ चतुर्दशे सर्गे—८६, पञ्चषष्टे सर्गे—८८

१४. प्रमाणिका—पञ्चदशे सर्गे ९५

१५. पृथ्वी—षोडशे सर्गे—७९

१६. उपेन्द्रवज्रा—सप्तदशे सर्गे—९५

१७. उपेन्द्रवज्रोपेन्द्रवज्रयोरुपजातिः—अष्टादशे सर्गे—१७४, एकविंशे सर्गे—१५५, पञ्चविंशे सर्गे—६६, पञ्चचत्वारिंशे सर्गे—१११, चतुःषष्टे ससर्गे—१२६

१८. हरिगीतिका—एकोनविंशे सर्गे—९४, एकसप्तते सर्गे—३५

१९. वियोगिनी—द्वात्रिंशे सर्गे—१७९, त्रयस्त्रिंशे सर्गे—५७

२०. भुजङ्ग प्रयातम्—अष्टचत्वारिंशे सर्गे—२४५, अष्टषष्टितमे सर्गे—३५,

२१. वैश्वदेवी—पञ्चाशे सर्गे—११६

२२. मृगेन्द्रमुखम—एकपञ्चाशे सर्गे—११५,

२३. प्रमिताक्षरा—द्विपञ्चाशे सर्गे १७४

२४. मणिमाला—त्रिपञ्चाशे सर्गे—११२

२५. जलधरमाला चतुः पञ्चाशे सर्गे—३३१

२६. तोटकम् पञ्चपंञ्चाशे सर्गे—१३४

२७. चन्द्रवर्त्म—षट्पञ्चाशे सर्गे—२५९

२८. तामरसम्—सप्तपञ्चाशे सर्गे—१३२

२९. प्रबोधिता—अष्टपञ्चाशे सर्गे—१८५

३०. वासन्ती—एकोनषष्टे सर्गे—६१

३१. स्रग्विणी—षष्टितमे सर्गे—९५

३२. औपक्छन्दसिकम् द्विसप्तते सर्गे—२२

बाल्य एव मयि पञ्चदेवभक्त्या सहैव राष्ट्रभक्तिरप्युदिताऽभूत्। १९२७ ईसवीयाब्देऽकस्मात्कवित्वस्फुरणपरिणामतः सरस्वती प्रभृतिदेवतास्तुतिरिव मातृभूमिस्तुतिरपि मयाऽलिख्यत तत्र हिन्दीभाषायां 'गले का हार हो जाता' इत्यादीनां समस्यानां पूर्तो —

तिलक से भाल भूषित है सुगन्धित गात गान्धी से
बना श्रृंगार चितरञ्जन जवाहरलाल मोती से ।

'इत्यस्यां मातृभूमिभूयोऽलंकारकल्पनायां तात्कालिकानां मुख्यानां चतुःषष्टि-नेतॄणां नामसमावेशेऽपि कण्ठहाराभावखिन्नेन बालकविनैव मया —

हमारे मन के मनकों को 'अमर' उसमें पिरो जाता
यही बिखरे न रहते तो गले का हार हो जाता ॥

इत्याद्यैषा महती कविता विरचिता देहरादून हिन्दी कवि सम्मेलने स्वयं पठिता च । ततश्च हिन्दीभाषायां किसान, लकड़हारा इत्यादि शीर्षकासु कवितास्वपि लक्ष्मणपुरतः प्रकाशं नीतायां माधुरीपत्रिकायां प्रकाशितासु मम राष्ट्रिया भावना एव प्रयोजिकाभवत् । संस्कृतभाषायान्तु भूयांसि पद्यानि गीतानि च राष्ट्रप्रेम पराण्यपि व्यरीरचम् । अद्य केवलं सूर्योदये, संस्कृतमितिनाम्नि पत्रे, संस्कृतरत्नाकरे तदादा-वन्यस्मिन् पत्रे च प्रकाशं गतान्येव तानि यत्नेन संचेतुं शक्यन्ते । १९४७ तः १९५७ पर्यन्ते काले च कृताः कृतयो वृन्दावने तटपत्तने च संस्कृतविद्वसभा प्रकाशितेषु गीव पए गञ्चतेषु प्राकाश्यं नीताः । १९५७ तः १९६७ पर्यन्तकाले रचिताश्च संस्कृत्रपद्यात्मिका द्वादश कृतयः श्री लालबहादुरशास्त्रीकेन्द्रीयसंस्कृतविद्यापीठप्राचार्येण डा. मण्डनमिश्रेण डा. रामकरणशर्मादिमहानुभावैः सहकृतेन 'गीतिकादम्बरीति नाम्ना संकलनेन प्राकाश्यं नीताः । ते च नामैते द्वादश ग्रन्थाः—

१. गीतिकादम्बरी त्रिपञ्चाशद् गीतानि	
२. श्रीमद्भागवतकथासारः पञ्चत्रिंशदधिका	स्रग्धराशतत्रयी
३. अध्यात्मदर्शनम् (श्रीमद्गान्धिदर्शनं वा)	२७० श्लोकाः
४. को वेदाधिकारी	२७० श्लोकाः
५. रसकल्पतरुः	२७० श्लोकाः
६. हितकल्पतरुः (राधावल्लभीय सिद्धान्त कारिका अष्टादशाध्यायी	११०८ श्लोकाः
७. संगीतवृन्दावनम् (श्रीराधासुधानिधिस्तोत्रस्य प्रारम्भिकत्रिशतपद्यानां गीतपद्यात्मकं व्याख्यानम्)	त्रिशतसर्गात्मकंगीतपद्यमयंमहाकाव्यम्
८. स्तुतिकादम्बरी	त्र्यधिकशतस्तुतयः
९. चरितकादम्बरी	सप्तानां महानुभावानां चरितचर्चा
१० व्याख्यान कादम्बरी	विंशतिव्याख्यानानि वैदिक संस्कृतिः पञ्चाध्यायी च
११. प्रशस्तिकादम्बरी	द्वादश प्रशस्तयः

१२. पूर्तिकादम्बरी चेति । चतुर्विंशतिः पूर्तयः, पञ्च स्वतन्त्राः कविताश्च

इत्थमियं सप्तसाहस्री पद्यानां गीतिकादम्बर्यां समावेशितास्ति । तत्र राष्ट्रियया भावनयानुस्यूतानि

१. गीतिकादम्बर्यां नवगीतानि

क-अयि भारतीय वसुन्धरे महिमा तवातिमहान इत्यादि षोडश पंक्तिकम् ।

ख-परिहर भारत, खेदशतानि' इत्यादि सप्तपङ्क्तिकम् ।

ग-भारत शीलय शीलमुदारम् । इत्यादि अष्टपङ्क्तिकम् ।

घ-परिहर परमनुसरणम् इत्यादि अष्टपङ्क्तिकम् ।

ङ-विलपति करुणं भारतमाता इत्यादि नवपङ्क्तिकम् ।

च-नमः स्यान्नेतृजनगुरवे जवाहरलालनेहरवे इत्यादि द्वाविंशति-पङ्क्तिकम् ।

छ-अयं शास्त्री चिरं जीव्यात् इत्यादि नवपङ्क्तिकम् ।

ज-नरकार्हं कार्यं कुर्वतामपि नाकेऽभिलाषा इत्यादि अष्टपङ्क्तिकम् ।

झ. पाहि लोकं कृपालो करुणया इत्यादि सप्तपङ्क्तिकम् ।

मामक्यां कथायामिवात्र श्रीजवाहरलालनेहरूचरिताख्येऽस्मिन् महाकाव्येऽपि नेहरूजीवनस्य भूयस्यः शाखा निरूपिताः सन्ति । तत्र—

बालजीवनम्—माणक्कमिति नाम्नि द्वितीयाध्याये ।

छात्रजीवनम्—हैरोकैम्ब्रिजं चेति नाम्नि चतुर्थाध्याये ।

दाम्पत्य जीवनम्—षष्ठे सर्गे विवाहादारभ्यैकोन सम्पतिमाध्याये कमला जीवनान्तम् ।

कारागार जीवनम्—एकादश त्रयोदशब्दोऽशत्रिंशत्रयश्चत्वारिंशदि सर्गेषु मुख्यतया वर्णितम् ।

विधुर जीवनम्—एकोन सप्तदितमाध्यायात्परम् ।

वाक्कील जीवनम्—पञ्चमाध्यायेऽन्यत्रापि सभासाद्।वर्णितम् ।

नगरपालिका जीवनम्—विंशे सर्गे वर्णितम् ।

राजनैतिकजीवनम्—देशस्य राजनैतिकं वातावरणमिति पञ्चमाध्याये, ममनिर्वासनमिति अष्टमाध्याये, चतुर्विंशाध्यायाद्द्वि सप्ततितप सर्गोन्तं सर्वं जीमनमेव राजनैतिकम् ।

आध्यात्मिक जीवनम्—थियोसोफी (अध्यात्मवादः) इति नाम्नि तृतीयाध्याये को नाम धर्म इति सप्तचत्वारिंशाध्याये च विशदमुपदर्शितम् ।

परिवारिकं जीवनम्—प्रथमादि त्रिशाण्यादेषु किञ्चित्किञ्चिकसूचितमन्यत्रापि ।

भ्रमणजीवनम्—हिमालयस्यैका घटनेति चतुर्थाध्याये, कृषकेषु भ्रमणमिति नवमाध्याये, षोडशाध्याये, एकत्रिमे, सप्ततितमे सर्गे च तद् व्याख्यातम् ।

प्रवासि जीवनम्—तृतीये, एकविंशे, षट्त्रिंशे, अष्टषीरतमादिष्व ध्यायेषु तदुपदरितिम् ।

गीतिकादम्बर्याख्ये संकलने तृतीयो ग्रन्थः अध्यात्म दर्शनम् श्री मद्गान्धि दर्शनापरपर्यायम् राष्ट्रियभावना भावितम् । अष्टमे ग्रन्थे स्तुतिकादम्बर्याम्—प्रथमं भारतभूमिस्तोत्रम्-स्वतन्त्र भारत ध्वजदण्डक चतुष्टयम् नवमे ग्रन्थे चरितकादम्बर्याम्—

श्री गान्धि गरिमा

१. अमृतस्य मृत्युः २. श्री गान्धिनं प्रति (द्वे पद्ये) ३. भारतं प्रति, पद्यानि) ४. मानसं प्रति, (षट्पद्यानि) ५. हाहा महात्मा हतः (अष्टकम्) ६. श्री गान्धि (द्वादश विचारदोहनम् (एकत्रिंशपद्यानि)

श्री नेहरूचरित चर्चा

१. श्रीमन्नेहरूचित्रपरिचयः २. किं कं प्रतिब्रूमहे, ३. को भयस्यावकाशः ४. आजौ कुतः संशयः ५. नमः स्यान्नेतृजनगुरवे । ६. उत्तराधिकारलेखः (पञ्चचत्वारिंशत्पद्यात्मकः) ७. काश्मीरिकं कुलम् (प्रस्तुतस्यास्य नेहरूचरितमहाकाव्यस्य प्रथमः सर्गः)पञ्चशीलाष्टकम् एषाऽखिलासामग्री संस्कृतरत्नाकरस्य श्री नेहरूश्रद्धाञ्जल्यकात् संगृहीता ।

श्री शास्त्रि चरित चर्चा

१. अस्माकं नूतनः प्रधानमन्त्री (षष्टिः पद्यानि) २. अयं शास्त्री चिरं जीव्यात् ३. अर्जुनस्य प्रतिज्ञे द्वे ४. शास्त्री लालबहादुरो विजयताम् । ५. वास्तविको नेता साधारणः पुरुषः ६. रक्षाबन्धनकाले प्रधानमन्त्रिणः सन्देशः ७. श्री शास्त्रिप्रशासन-प्रशंसनम् ८. सद्योलाभासु योजनासु बलाधानम् । ९. जय भारत १०. शोकाश्रुविन्दवः । अत्रत्या भूयसी सामग्री संस्कृतरत्नाकरस्य श्री शास्त्रि सम्मानांकात् संगृहीता ।

अत्रैव श्रीमद्दीनदयालु शर्म चरिते—द्वितीये सर्गे नवमश्लोकतः षोडशश्लोकं यावत् महामनसः श्री मदनमोहनमालवीयेन सह सम्भाषणावसरे मालवीय स्मृतिपत्रे मधुरसंस्मरणेन चासौ महामना अप्युपासित ।

द्वादशे ग्रन्थे पूर्तिकादम्बर्याम्—१. वारि बर्बर्ति बह्निः (द्वितीयंपद्यम्) २. श्रेष्ठं परं भारतम् (पद्यद्वयम्) ३. राष्ट्रध्वजो भारतम् ४. किं कं प्रतिब्रूमहे (३-६)

५. कोकिल: कूजतु किमर्थम् ६. षड्विंशे दिवसे जनवर्या: ७. उद्बोधनम् ८ शृणु मम वचनं संस्कृत पण्डित ६. अगस्ते तिथौ पञ्चवक्ष्याममुष्याम् ।

संस्कृतरत्नाकरस्य—नेहरूश्रद्धाञ्जल्यंके—शास्त्रि श्रद्धाञ्जल्यंके चैत्युभ-यस्मिन् मया सहायकसम्पादकतया सम्पाद्यमाने भूयसी गद्यात्मिका सामग्र्यपि सम्यगनूदिता मौल्लकी च समावेशिता, यया संस्कृतसाहित्ये राष्ट्रियसाहित्यस्य श्रीवृद्धिरपि निष्पन्ना । तत्रानूदिता सामग्री तावत्—

१. भारतीय संस्कृतेर्मूलं संस्कृतम्-मूललेखक:-श्री जवाहरलाल नेहरू:

२. नेहरू श्रद्धाञ्जल्यंकस्य प्रस्तावना-मूललेखक:-श्री लालबहादुरशास्त्री

३. आधुनिकयुगस्य निर्माता नेहरू:-मूललेखक:-डा. सर्वपल्ली राधाकृष्णन्

४. श्रद्धाञ्जलय:-मूललेखका:-स्वदेशीया विदेशीयाश्च नेतार: ।

५. जवाहरलालस्य जय:-मूललेखक:-श्रीजवाहरलालनेहरू:-अत्रान्ते कस्यचिद्-ग्रीककवे-पद्यद्वयमप्यनूदितमस्ति—

तत्त्वज्ञता कास्ति ततोऽतिरिक्ता कश्च प्रयास: किल मानवस्य ।
का चानुकम्पा जगदीश्वरस्य गरीयसी रम्यतमाऽथवा स्यात् ॥ १ ॥

लब्ध्वा मोक्षं भीतितो विश्वसीहि लभस्व शान्ति मनसो दुरापाम् ।
जुगुप्सनीयं जहि मानवेभ्य: समुन्नतो विश्वमथोद्धर त्वम् । इति ।

७. श्री जवाहरलाल नेहरू: पञ्चवर्षीया योजनाश्च-मूललेखक:-श्रीतरलोक सिंह: ।

८. भ्रम निवारणम्-मूललेखक:-श्री जवाहरलाल नेहरू: ।

६. पुनर्जन्म पुनर्मृत्यु:-मूललेखक:-कैफ़ी आजमी ।

१०. कलाकारो नेहरू:-'आज' पत्रस्य नेहरूश्रद्धाञ्जल्यंकात्-मूललेखक:फ्रैंक मोरेस: ।

११. महतो राष्ट्रनायकस्य श्री नेहरो: आर्थिकी नीति:-साप्ताहिकात् हिन्दुस्थानपत्रादनूदितम् ।

संस्कृतरत्नाकरस्य नेहरू श्रद्धाञ्जल्यंके नेहरू चित्रपरिचयपद्यानि मद्रचितानि प्रकाशतां गतानि । तानि यथा—

अयं शान्तिप्रतीकेन कपोतेन समन्वित: ।
शान्तिदूतो नेहरूर्न: श्रद्धाञ्जलिभि र्रचित: ॥ १ ॥

विविधासु मुद्रासु जवाहरलालनेहरू:—

हर्षमुद्रान्वित: श्री मान् युक्तो विस्मयमुद्रया ।
स्थितो विचारमुद्रायां निर्णीते र्मुद्रयान्वित: ।

समाजस्य सदस्यानां पुरः पत्राणि सम्पठत् ।
श्री नेहरू महाभागः प्रोत्साहयति तानयम् ॥ ३ ॥
डाक्टर मण्डन मिश्रेण भिल्लवाडाधिवेशने ।
रत्नाकरविशेषांकः श्रीमन्नेहरवे ऽर्पितः ॥ ४ ॥
श्रीमता राष्ट्रपतिना श्रीमता शास्त्रिणा तथा
कञ्चिद्विचारयन् देशविषये श्रीलनेहरूः ॥ ५ ॥
श्री कामरावनाडारः शास्त्री लालबहादुरः ।
श्री नेहरूं प्रणमतो भूतिगात्रावशेषितम् ॥ ६ ॥
श्रीकैनेडी सुहृदा जान्सन्मित्रेण चान्वितो द्युतिमान् ।
श्रीनेहरूर्विजयते बलोद्धवाभ्यां युतो मुकुन्द इव ॥ ७ ॥
नयपालभूमिपालश्रीलमहेन्द्रेण संयुतो मतिमान् ।
अस्ति जवाहरलालो नेतृभिरनुगामिभिः सहितः ॥ ८ ॥
श्रीलैर्लालबहादुरैरधिकृते श्रीमण्डनेन श्रिते
मान्यश्रीपटियालभूपालसहिते श्री शल्यकेशोभिते ।
श्रीमद्दीनदयालुशर्मसुधियां भव्ये शताब्दीमहे
धर्मस्यात्र सनातनस्य गुरुतां श्री नेहरूर्भाषते ॥ ९ ॥
स्वतन्त्रतादिने दिल्यां शोणदुर्गे समुन्नते ।
विशाले जनसम्मर्दे भाषते नेहरूर्महान् ॥ १० ॥

अत्रैवांके-अस्माकं प्रधानमन्त्री-इतिशीर्षको मम मौलिको लेखोऽपि प्राकाश्वं गतः । संस्कृतरत्नाकरस्य शास्त्रिसम्मानांके प्रकाशिता भूयसी सामग्री गीतिकादम्बर्यां संगृहीतेत्युक्तम् । किमपि तत्रासंगृहीतमत्र निर्दिश्यते—

१. सरलो दृढप्रतिज्ञश्च श्रीलालबहादुरशास्त्री

श्रीलालबहादुरशास्त्रिणो जीवनचरितमधिकृत्य 'आर्यागीतिसप्तशती-श्री शास्त्रिसप्तशती वा श्रीराजेन्द्रप्रसादं महामहिमराष्ट्रपतिञ्चाधिकृत्य (श्रीराजेन्द्रयशोगाथां पद्यमयी रचिताऽमुद्रिता तिष्ठति ।

इत्थं मदीयं राष्ट्रियं साहित्यम् - प्रथमं द्विविधम्-संस्कृतमयम्, हिन्दीमयञ्च, तदुभयात्मकमपि पुनर्द्विविधम्-प्रकाशितमप्रकाशितञ्च । प्रकाशितमपि द्विविधं ग्रन्थाश्रितं पत्रिकाश्रितञ्च । तत्र संस्कृतमयं गद्यात्मकं पद्यात्मकञ्च प्रकाशितं ग्रन्थाश्रितं तावद्-संस्कृतशताब्दीग्रन्थस्य जम्बूकाश्मीरभागे, राजस्थानभागे गीति कादम्वर्याञ्च पत्रिका-श्रितञ्च-संस्कृत रत्नाकरस्य साधारणेष्वङ्केषु १९६४ तः १९६८ पर्यन्तेषु ।

१३ प्रकाशितम्-पद्यात्मकमेव-मूलस्वराज्यायनम् यत्र संक्षेपेण स्वराज्य प्राप्ति प्रयत्नात्मिकानां घटनानामुल्लेखेन सह तत्र तत्र प्रतीता राजनीतिसिद्धान्ताअप्युल्लिखिताः। समासेन काङ्ग्रेसेतिहासोऽत्रोपवर्णितः। ततः क्रमेण प्रथमे सर्गे पूर्वपीठिका, प्रथमो विद्रोहः। सङ्घे शक्तिः वन्देमातरम्, काङ्ग्रेसजन्म, सत्यमेव जयते नानृतम् इति जानन्तो नैके नेतारः-उमेशचन्द्र वनर्जी, काशीनाथतैलङ्गः, सुब्रह्मण्यम् ऐय्यरः, ए० ओ. ह्यू मः, दादा भाई नौरोजी, सुरेन्द्रनाथ बनर्जी, गोपाल कृष्ण गोखलेत्यादयो नेतारोविदिष्टाः। तिलकोदयः, बङ्ग भङ्गोपक्रमश्चोपवर्णितः।

द्वितीये सर्गे—शान्तिः क्रान्तिर्वा, बङ्गभङ्गप्रतिवेधः, बम्बनिक्षेपः, गीता कर्मयोगः, गान्धिसमागमः, रोलट ऐक्ट संकटम्, डायरोत्पातः, सत्याग्रहः।

तृतीय सर्गे—लाजपतरायः, भक्तसिंहः, जवाहरलाल नेहरूः, श्रीराजेन्द्र प्रसादः, लालबहादुरशास्त्री च।

चतुर्थे सर्गे—गान्धीर्विनसन्धिः, श्री सुभाष चन्द्रबोसः, सत्यमेव जायते नानृतम्।

अत्र चतुर्थाध्यायान्ते—स्वराज्यायनमेतन्मे नेहरू चरितास्यताम्।
श्रीराजेन्द्रयशोगाथोदरतां चाप्स्यते स्फुटम्॥ ८८॥
श्रीशास्त्रिवृत्तचित्तत्वं परेषाञ्च महात्मनाम्।
चरितान्यङ्गतामस्य प्राप्स्यन्तीति विचिन्तये॥ ८९॥
समृद्धि चरिताभ्याञ्चैवान्तः सीमान्तगान्धिनोः।
प्राप्य मातृभुवि प्रीतेः किञ्चिद् भूयान्निदर्शनम्॥ ९०॥

इति स्वमनोरथः प्रकाशितः

पञ्चमे सर्गे—स्वातन्त्र्यप्रतिज्ञा, प्रतिनिधयो नेतारः-मोतीलाल नेहरू-मोहन दास गान्धिः सरोजिनी नायडूः वल्लभभाईपटेल सैयद महसूदः जवाहरलालनेहरु जयरामः दास। अप्रकाशित साहित्ये—

१४ पद्यात्मके-श्री राजेन्द्रयशोगाथा

१५ आर्यागीति सप्तशती (शास्त्रिसप्तशती वा)

१ काश्मीरी सुषमा-जम्बूकाश्मीरभागे संस्कृतशताब्दीग्रन्थस्य, काश्मीरेतिहासे च प्रकाशितेनानेना प्रकाशितैश्चान्यैविरचितैरितरैश्च काव्यैः क्रमेण महाभारतस्याष्टादशपर्वाणीव स्वतन्त्रभारतस्य ग्रन्थस्य नूनमष्टादशपर्वाणि प्रकल्पितानि स्युरित्यस्ति तावन्मे मनसः शिवसङ्कल्पः।

श्रीमद्भगवद्गीताया—ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।
एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुखम्। इति

न्यायेनैकत्येन मूलस्वराज्यायने, पृथक्त्वेन च श्री नेहरूचरितादिकाव्ये राष्ट्रमिदमाराधयितुमुत्कण्ठितेन चेतसा देशत्वेन भारतमिव प्रदेशत्वेन पृथ्वीप्रशस्तिकाव्येनोत्तर प्रदेशैकदेशम्, स्रग्धराभिरामकाव्येन दाक्षिणात्य प्रदेशैकदेशं, गुरुमण्डलमण्डलेनोतरप्रदेशैकदेशान्तरम्, स्वामिश्रीगुरुचरणदासचरितामृतस्तोत्रेण, विश्वसंस्कृत शताब्दीग्रन्थस्य जम्बूकाश्मीरभागेन, काश्मीरेतिहासेन च काश्मीरप्रदेशम् शार्दूलविक्रीडित (चारुदेवशास्मि चरित) स्वामिगुरुचरणदास गोस्वामि गणेशदत्त चरितेच पञ्चाम्बुप्रदेशम्, व्याख्यानवाचस्पतिश्रीदीनदयालु शर्म—-शास्त्रार्थमहारथ श्रीमाधवाचार्यचरित्ताभ्यां हरियाणाप्रदेशस्य श्रीकण्ठजनपदत्व प्रतिपादक—वैदिकत्व प्रतिपादक लेखाभ्याञ्च हरियाणाप्रदेशयभिष्टुतवानस्मि । गीतिकादम्बर्यान्तर्गतायां—प्रशस्तिकादम्बर्यामखिलभारतीमसंस्कृतसाहित्यसम्मेलनस्य स्वर्णजयन्तीमहोत्सवं प्रशंसता केन्द्रीयशिक्षामन्त्रालयायोजितसंस्कृतभाषणप्रतियोगिताया दरभङ्गायामायोजितस्याधिवेशनस्य च कार्यक्रमे सम्मिलितानायोजकान् विद्वद्विशेषांश्च स्तुवता नैके महानुभावा अभिष्टुताः, भूयांसश्च श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठे अभ्यागता राष्ट्रियाः, साहित्यिकाः, धार्मिकाश्च नेतारोऽभिनन्दनपत्रैः सम्भाविता इति राष्ट्रमिव संस्कृतं संस्कृतिं चाप्यर्चयितुं लब्धावसरेण भूयोभूयः कृतार्थितोऽयमात्मा । भविष्यति चान्यानपि धन्यान् विदुषस्तदधिष्ठितान् भारतप्रदेशांश्चाभिनन्दितुमवसरो लप्स्यत एवेति ध्रियत एव काचन श्रद्धेति तावदलं पल्लवितेन ।

विदुषामाश्रवस्य

अमीरचन्द्रशास्त्रिणः,

विषयानुक्रमणिका

नेहरूचरितमहाकाव्यम्

(मामकी कथा)

काश्मीरिकं कुलम्

अनुष्टुप्

प्रथमः सर्गः

काश्मीरिकाणां विप्राणां राजकौलो महामतिः।
संस्कृते पारसीके च साहित्येऽभूद् विदांवरः॥ १॥
तस्य भाषाद्वयेऽन्यूनानधिकां योग्यतां जनः।
सानन्दञ्च सहाश्चर्यं प्राशंसत्प्रेमपूरितः॥ २॥
मृतेऽवरङ्गजीवे च फर्रुख्सियरनामकः।
जगाम दिल्लीभूपालः काश्मीरान् स यदृच्छया॥ ३॥
काश्मीरिकाणां प्राज्ञानां श्लाघायां बहुशः श्रुतम्।
राजकौलं म्लेच्छराजो द्रष्टुमभ्यलषच्चिरम्॥ ४॥
तत्र चैनं महाप्राज्ञं वीक्ष्यामन्त्रयदादरत्।
सकुटुम्बं समायातं चैनं दिल्ल्यामवासयत्॥ ५॥
अनेन गुरुणाऽदूरवर्तिना स सुरेन्द्रवत्।
महिमानमधाच्चित्ते महान्तं यवनेश्वरः॥ ६॥
अस्मै यद्भवनं या च भूमिसम्पत्तिरर्पिता।
अभवत् किल कालिन्दीकुल्याकूलेऽत्र तद्द्वयम्॥ ७॥
कुल्यां 'नेहर' इत्याहुर्नीरहारितया बुधाः।
तत्कूले निवसन्तं च नेहरूरिति ते पुनः॥ ८॥
जाते मुगलराजानामथानुक्रमिके क्षये।
नेहरूरपि सम्पत्तेः क्षयेनासीदुदासितः॥ ९॥
अथास्य वंशेऽभूल्लक्ष्मीनारायण इति द्विजः।
कम्पनीराज्यकाले यो वाक्कीलोऽभवदग्रिमः॥ १०॥

तस्य सूनुरभूत्स्वङ्गो गङ्गाधर इति श्रुतः ।
योऽभवद्विप्लवात्पूर्वं कोटपालपदे स्थितः ॥ ११ ॥

चतुस्त्रिशद्वत्सरायुर्युवैव यदसौ मृतः ।
नेहरूपरिवारस्य व्यवस्था तेन दुःस्थिता ॥ १२ ॥

मोतीलालाग्निगर्भाभूदरणिर्महिलामणिः ।
श्रीगङ्गाधरभार्या सा देवरद्वयरक्षिता ॥ १३ ॥

अथ दिल्लीं परित्यज्य यत्र तत्रापि गच्छताम् ।
मध्येऽयं परिवारोऽगादागरां जीविकादरात् ॥ १४ ॥

तत्रैवेयं प्रसुषुवे प्रसूषु परमोत्तमा ।
मोतीलालाभिधं पुत्रं रवीन्द्राविर्भवे दिने ॥ १५ ॥

मोतीलालपितृव्यौ तौ यामुदारपरम्पराम् ।
मुदामवापतुस्तत्र शेषोऽप्येषोऽस्तु शेषवाक् ॥ १६ ॥

तयोर्वंशीधरो न्यायविभागे भृतकोऽभवत् ।
नन्दलालस्तु खेतड्या राज्ये मन्त्रित्वमादधात् ॥ १७ ॥

पश्चादयं न्यायधाराध्ययनेनातिदक्षताम् ।
अवाप्य वाक्कीलवृत्तिमागरामागतः श्रितः ॥ १८ ॥

मोतीलालोऽप्यनेनैव संवसन् साधु पालितः ।
बन्धुप्रेम्णा पितृप्रेम्णा वात्सल्येन च लालितः ॥ १९ ॥

माता च मोतीलालस्य लालने मृदुमानसा ।
कुटुम्बशासने चाभूदभूतप्रभुतामयी ॥ २० ॥

उच्चन्यायालयोऽथागादागरातः प्रयागकम् ।
नेहरूपरिवारोऽपि तेन तत्रागमन्मुदा ॥ २१ ॥

मोतीलालः कर्णपुरे प्रयागे च यथाक्रमम् ।
प्राप्तः परावरां शिक्षां यावनीमाङ्ग्लीमपि ॥ २२ ॥

प्रवृत्तेर्बुद्धिवर्तिन्यास्तस्यारोचत कायिकी ।
यत्र क्रीडां तथा पीडां जनयन्ति जना मिथः ॥ २३ ॥

प्रखरेण स्वभावेन धृष्टोऽप्येष ससंविदाम् ।
प्राध्यापकानामगमत् प्रियतां रक्षणीयताम् ॥ २४ ॥

सुधीरयं कदाचिच्च सम्यगभ्यस्य पाठितम्।
अधिकक्षं शिक्षकाणां समक्षं दाक्ष्यमाश्रयत्॥ २५॥
परीक्षा उत्तरन् व्यानङ्नैष काञ्चिद्विशिष्टताम्।
न च स्नातककक्षायां साफल्यं प्राप चापलात्॥ २६॥
उच्चन्यायालयीये तु वाक्कीलानां परीक्षणे।
प्राथम्यं प्राप्य सौवर्णं लेभे स पदकं युवा॥ २७॥
ततः कर्णपुरे न्यायकार्यमेषोऽन्वचालयत्।
प्राकाशयत्स्वसाफल्यं मनःपद्मं व्यकासयत्॥ २८॥
मल्लयुद्धे रुचिस्तस्य तत्र सत्यमतृप्यत।
इदं हि नगरं मल्लयुद्धे ख्यातिमशिश्रियत्॥ २९॥
वर्षत्रयात्परं कर्णपुरं त्यक्त्वा प्रयागगः।
उच्चन्यायालये कार्यमकरोदेष तत्परः॥ ३०॥
अकस्मात्तु पितृव्यस्य नन्दलालस्य मृत्युना।
मोतीलालमनो दूनं कस्तिष्ठेदाश्रयं विना॥ ३१॥
कुटुम्बभृतिभारन्तु दुर्धरं दुर्बलैर्नरैः।
उत्थापयितुमव्यग्रो व्यग्रतां तां जवाज्जहौ॥ ३२॥
अथास्य कार्यलग्नस्य भूयः कार्यमुपस्थितम्।
कीर्त्या सह श्रिया चास्य भवनं समधिष्ठितम्॥ ३३॥
खलेकपोतन्यायेन कार्याणां समुपस्थितेः।
मोतीलालः परार्थेभ्यः कार्येभ्योऽभूद्विमोचितः॥ ३४॥
अथ स्वपौरुषेणैव न परानुग्रहेण सः।
आरुरोहाभ्युदयदां तां सोपानपरम्पराम्॥ ३५॥
सन्नप्यसौ राष्ट्रवादी गुणग्राहितया मनाक्।
दधावाङ्ग्लेषु सम्मानं भारतीयेषु चारुचिम्॥ ३६॥
स राजनैतिकान् पुंसो वावदूकान् स्म पश्यति।
अथवा सर्वतो भ्रष्टानेतत्क्षेत्रमुपाश्रितान्॥ ३७॥
वस्तुतो वचनेनैव विचारान् राजनैतिकः।
सङ्क्रामयति, बद्ध्यैव सर्वतो भ्रश्यते च सः॥ ३८॥

माणवकम्

द्वितीयः सर्गः

माणवकं यन्महतां छत्रकृतच्छायमगात् ।
तत्र न काचिद् घटनाऽभून्महिमोल्लेख्यतया ॥ १ ॥
यत्र पितृभ्रातृसुतानालपतः शृण्वति तान् ।
सर्वमभून्नो विशदं मय्यनुजे मुग्धमतौ ॥ २ ॥
ते किल यूरेशियनानाङ्ग्लजनांश्चाप्यवदन् ।
यद्बठिनोऽमी दधते भारतजानादरणम् ॥ ३ ॥
क्षाम्यमिदं न, प्रति तान् भाष्यमसत्कारपरैः ।
शासनिका भारतजैः साकमकुर्वंश्च कलिम् ॥ ४ ॥
वृत्तदलैर्वृत्तमिदं ख्यापितमेवाहरहः ।
तत्र च तेषामभवन् वाग्व्यवहारा अधिकम् ॥ ५ ॥
हन्ति स चेद् भारतजं न्यायविदस्तं जहति ।
भारतजं तद्वधिकं ते नहि मुञ्चन्ति शठाः ॥ ६ ॥
एतदरोचन्त कथं वाष्पशकट्यां सदनम् ।
आङ्ग्लहितं स्यान्निहितं, भारतजार्थं न पदम् ॥ ७ ॥
तत्सदने रिक्ततरेऽपीतर आरोहति नो ।
आङ्ग्लजनोऽपञ्चितकेऽप्याक्रमते साधिकृति ॥ ८ ॥
विश्वजनीनोपवने तादृशि चान्यत्र पदे ।
वञ्चिकयाऽऽसन्दिकया चास्थितयात्मीकृतया ॥ ९ ॥
शासिषु वैदेशिकताधारिषु रोषः सहजः ।
तृप्यति मे, भारतजः कोऽपि यदा हन्त्यथ तान् ॥ १० ॥
जातु ममैते सहजाः कोऽपि परो वा कलहे ।
तादृशि चेत्सम्मिलितोऽभून्मम तूत्साहभरः ॥ ११ ॥

मत्परिवारे सहजास्तेऽतिदवङ्गा अभवन् ।
आङ्ग्लजयूरेशियनैस्ते कलहे हर्षमधुः ॥ १२ ॥
उग्रतरास्ते सिकतासूर्यवदत्राङ्ग्लजतः ।
दुर्मतियूरेशियनाः शासकजातीयमदाः ॥ १३ ॥
ते कलहाश्चाप्यभवन् वाष्पशकट्यां विकटाः ।
यत्र तु यूरेशियनाः स्वाधिकृतिं तामविदन् ॥ १४ ॥
यद्यपि देशे वसतिं तद्व्यवहारं न सहे ।
शासकवैदेशिकगां भावविशुद्धिं तु वहे ॥ १५ ॥
मद्गुरुतां ह्याङ्ग्लजनीवृन्दमविन्दत्परमाम् ।
आङ्ग्लजनो मत्पितरं द्रष्टुमथागाद् बहुधा ॥ १६ ॥
प्रत्युत वाच्यं बहुधा सङ्गतिहेतोरभवत् ।
आङ्ग्लजनं प्रत्यधिका मद्धृतये मानततिः ॥ १७ ॥
सायमहो ! प्रत्यहमायान्ति च मित्राणि गृहे ।
मत्पितरं द्रष्टुमथो सोऽप्यदधात्तेषु मुदम् ॥ १८ ॥
तद्विकटाट्टाट्टहसैः कृत्स्नमभूद् वेश्म भृतम् ।
ते नगरेऽस्मिन्प्रथितास्तीर्थवरे चाप्यभवन् ॥ १९ ॥
जात्वहकं ज्ञातुमना आवरणान्तस्तलतः ।
प्रायतिषीमे गुरवः किं किमु चर्चन्ति मिथः ॥ २० ॥
किन्तु यदैवं विदधन्निग्रहमाप्तश्चपलः ।
आवरणानीतवपुः क्रोडगतोऽकारि पितुः ॥ २१ ॥
जात्वथ क्लेरेटमधुं वारुणमापीतवतः ।
तानहमद्राक्षमहो ज्ञातनवह्विस्किमदः २२ ॥
मित्रसखं तं बहुधा पानरतं तत्र मिषन् ।
आशुगतोऽम्बामवदं लेढि पिता रक्तमिति ॥ २३ ॥
आद्रियमाणा पितरं साहसचातुर्यवतः ।
मूर्तिमबोधं बलयोर्बाहुधियोरन्यजनात् ॥ २४ ॥
वस्तुत एषोऽभवदेवंविध इत्यन्तरतः ।
ऐच्छमहं यद्वयसा तद्गुणवान् स्यामहकम् ॥ २५ ॥

माणवकम्

द्वितीयः सर्गः

माणवकं यन्महतां छत्रकृतच्छायमगात् ।
तत्र न काचिद् घटनाऽभून्महिमोल्लेख्यतया ॥ १ ॥
यत्र पितृभ्रातृसुतानालपतः शृण्वति तान् ।
सर्वमभून्नो विशदं मय्यनुजे मुग्धमतौ ॥ २ ॥
ते किल यूरेशियनानाङ्ग्लजनांश्चाध्यवदन् ।
यद्धठिनोऽमी दधते भारतजानादरणम् ॥ ३ ॥
क्षाम्यमिदं न, प्रति तान् भाष्यमसत्कारपरैः ।
शासनिका भारतजैः साकमकुर्वंश्च कलिम् ॥ ४ ॥
वृत्तदलैर्वृत्तमिदं ख्यापितमेवाहरहः ।
तत्र च तेषामभवन् वाग्व्यवहारा अधिकम् ॥ ५ ॥
हन्ति स चेद् भारतजं न्यायविदस्तं जहति ।
भारतजं तद्वधिकं ते नहि मुञ्चन्ति शठाः ॥ ६ ॥
एतदरोचन्त कथं वाष्पशकट्यां सदनम् ।
आङ्ग्लहितं स्यान्निहितं, भारतजार्थं न पदम् ॥ ७ ॥
तत्सदने रिक्ततरेऽपीतर आरोहति नो ।
आङ्ग्लजनोऽपञ्चितकेऽप्याक्रमते साधिकृति ॥ ८ ॥
विश्वजनीनोपवने तादृशि चान्यत्र पदे ।
वञ्चिकयाऽऽसन्दिकया चास्थितयात्मीकृतया ॥ ९ ॥
शासिषु वैदेशिकताधारिषु रोषः सहजः ।
तृप्यति मे, भारतजः कोऽपि यदा हन्त्यथ तान् ॥ १० ॥
जातु ममैते सहजाः कोऽपि परो वा कलहे ।
तादृशि चेत्सम्मिलितोऽभून्मम तूत्साहभरः ॥ ११ ॥

आद्रियतेऽन्तःकरणं यद्वदिमं तद्वदतः।
तत्स्म बिभेत्यप्यधिकं स्निह्यवमुष्मै नितराम् ॥ २६ ॥

भृत्यजने रुष्यति यत्तत्तदपीहाकलयम्।
तेन स भीमः प्रतिभात्यस्मि च भीतोऽत्यभवम् ॥ २७ ॥

भृत्यगणे तां परुषां वृत्तिमहं यत्स्वपितुः।
ऐक्षिषि तस्मिन्नभवं रुष्टमनाश्चास्मि मनाक् ॥ २८ ॥

वस्तुत एषा प्रकृतिस्तस्य किलासीद्विकटा।
यात्यपि चाभूद् वयसीहैष इवैषोग्रतमः ॥ २९ ॥

भाग्यवशादत्र गुरौ हास्यरुचिः काप्यभवत्।
सीमगता, हन्त तथाप्येष दृढं निश्चयवान् ॥ ३० ॥

तेन स साधारणतः स्वं वशयन्नप्यभवत्।
वृद्धतया संयमगा तस्य सुशक्तिर्निचिता ॥ ३१ ॥

येन स वृद्धो न मनाक्तद्विकटं रूपमधात्।
एति मम स्मृत्ययनं कापि च तद्रोषदशा ॥ ३२ ॥

माणवकोऽभूवमहं लक्ष्यममुष्या हि रुषः।
पञ्चषवर्षान्तवया हन्त दयापात्रमपि ॥ ३३ ॥

लेखनपीठे तु पितुर्निर्झररलेखायुगलम्।
दृष्टवतश्चित्तमभूल्लुब्धमिहैकग्रहणे ॥ ३४ ॥

किं युगपत्तद्युगलं पाणियुगेनादधता।
मज्जनको वस्तु लिखत्येकमपि द्विप्रतिकम् ॥ ३५ ॥

नेति मनः प्रत्यवदत्तर्हि किमेका न मया।
स्वीक्रियतामित्यहकं तूर्णमगृह्णां रुचिताम् ॥ ३६ ॥

किन्तु यदाशोध्यत सा—'लेखनिका कुत्र गता।'
इत्यभितः प्रश्नरवं भीतमना वाऽश्रृणवम् ॥ ३७ ॥

हन्त, भयान्नाकथयम्, कक्षगता सा त्वपतत्।
तस्कर एषोऽस्मि मतो माञ्च पिता ताडितवान् ॥ ३८ ॥

ताडनपीडाप्यसहाऽऽसीदपमानोऽतितराम्।
ते दधदन्तः क्षुभितो मातुरिहाङ्कं श्रितवान् ॥ ३९ ॥

कोमलकाये परुषाघातकृता रुक्च रुषा ।
क्रीम्मलहारिप्रयुजाऽहारि जनन्या कृपया ।। ४० ।।
न स्मृतिमायाति तु मे तत्र मया जातु पिता ।
आशपितः क्रोशजुषा दण्डविधिं वाऽस्तुवता ।। ४१ ।।
दण्डितवत्यप्यधिका पूर्ववदेवास्त गुरौ ।
प्रीतिरियं बालतरे मद्धृदयेऽसौ विनयः ।। ४२ ।।
तत्र भयं सम्मिलितं, किन्तु न तन्मातुरभूत् ।
क्षान्तिमयी क्षाम्यति सा त्वहमथानर्हमपि ।। ४३ ।।
प्रीतिमतीं तां न मृषा पर्यभवं नाभ्यभवम् ।
किन्तु पराभावयते मातृमनो मन्ममता ।। ४४ ।।
मातरमज्ञासिषमेवं न तथाहं पितरम् ।
सन्निहिता भाति हि मे, सातिहिता तर्हि पितुः ।। ४५ ।।
विश्वसता सा च यथाऽभाष्यत सर्वं मयका ।
नैव तथा स्वप्नगतेनापि पिताऽऽवेद्यत सः ।। ४६ ।।
मज्जननी कायगतां वामनतामादधती ।
रूपगया चारुतथाऽधात्प्रभुतां वन्द्यतमाम् ।। ४७ ।।
सत्यमहं मातृसमोऽभूवमतोऽमानिषि तत् ।
भाति मुखे पाणिपदे चातिमनोज्ञा जननी ।। ४८ ।।
मातुरथो पूर्वजना द्वैपुरुषात्पूर्वमिह ।
नूनमवातार्षुरिमे मञ्जुलकाश्मीरपदात् ।। ४९ ।।
कश्चन चान्योऽप्यभवत्तत्र तु विश्वासपदम् ।
सोऽलिमुवारक्पदभाग् लेखकरः पूज्यपितुः ।। ५० ।।
सैष च भद्रायुपुरे वासजुषां बंशधरः ।
विप्लवनष्टस्वजनश्चाङ्ग्लचमून्मूलनकृत् ।। ५१ ।।
सा च विपत्तं विनयं धैर्यमथ स्नेहमपि ।।
पाठयति स्मार्भकगां तत्र विशेषान्ममताम् ।। ५२ ।।
मां प्रति दुःखेष्वसुको दुःखितरोऽभूद् बहुधा ।
सात्त्वमितः स्यादधिकं किन्तु शिशोर्मुग्धहृदः ।। ५३ ।।

सद्धवलश्मश्रुमुखो   लम्बितकूर्चश्च   जरन् ।
बालदृशोर्मे समभात् प्राक्तनबोधाब्धिसमः ॥ ५४ ॥
तन्निकटेऽहं   शयितश्चालिफलैलादिकथाम् ।
विप्लवगाथामितराश्चापि च वार्ताः श्रुतवान् ॥ ५५ ॥
याति च काले मयि वा यूनि गतः स्वर्गमयम् ।
तस्य सुखाङ्कस्मरणं चेतसि मेऽद्यापि धृतम् ॥ ५६ ॥
हिन्दुपुराणानि तथा रामकथां भारतकम् ।
मातृमुखात्कर्णितवान् किञ्च पितृव्याननतः ॥ ५७ ॥
पण्डितपत्नी विधवा हिन्दुपुराणेषु बुधा ।
प्राक्तनगाथैकनिधिः श्रावयति स्म प्रचुरम् ॥ ५८ ॥
तेन पुराणीः सुकथाः सम्यगवेत्यापि मनाक् ।
धर्मविचारेऽनुभवं   धूमिलमेवाहितवान् ॥ ५९ ॥
स्त्रीजनसम्बद्धमिमं वेद्मि परं तं विषयम् ।
तत्र हसत्येव पिता न स्म महत्त्वं दधते ॥ ६० ॥
किञ्च पितृव्यस्य सुता नात्र कमप्यादरकम् ।
सन्दधते किन्त्वभवंस्ता महिलाः पाठरताः ६१ ॥
अत्र महद्भिः पुरुषैस्तामवहेलां विहिताम् ।
अन्वकरोदेष जनः प्राप्तसुखोऽप्येषु मनाक् ॥ ६२ ॥
स्नातुमहं तीर्थपदे   द्रष्टुमथो   देवकुलम् ।
जातु च गङ्गामपि तां यामि जनन्याद्यनुगः ॥ ६३ ॥
नामबतां   साधुसतां   दर्शनहेतोरपि च ।
यामि, परं चेतसि मे ते प्रभवन्त्यल्पतरम् ॥ ६४ ॥
पर्वदिनान्येत्य पुनर्हर्षलवं   मेऽजनयन् ।
येषु जनो होलिकया रङ्गभरैरिङ्गति गाम् ॥ ६५ ॥
रङ्गभृताः पिच्कृतिका यत्र वयं चादधतः ।
रङ्गझरैरैम मिथः स्नानविधिं कल्पयितुम् ॥ ६६ ॥
दीव्यति दीपावलिका दीपगणैर्मञ्जुरुचिः ।
नूनमियं ध्वान्तहरी द्योतकरी पर्ववरा ॥ ६७ ॥

भाति च जन्माष्टमिकाऽजायत कृष्णोऽत्र पुरा ।
अर्धनिशां यावदिहाजागरणं नो सुकरम् ॥ ६८ ॥
कांसिककारासदने मोचयितुं बन्धनगान् ।
जन्मदिनग्रन्थिरयञ्चार्धनिशायां प्रथते ॥ ६९ ॥
सा विजयाख्या दशमी राघवलीलाविशदा ।
स्वाङ्गभवैश्चाभिनयैर्वा जनसमर्दमुखैः ॥ ७० ॥
तां किल लङ्काविजयोपेतकथां दर्शयितुम् ।
दृश्यमुपस्थाप्य नटो यत्र जनान् रञ्जयति ॥ ७१ ॥
बालगणा द्रष्टुमगुस्तञ्च मुहुर्रमकम् ।
अर्वपदे यत्र हसन् वीरहुसैन् मृत्युमगात् ॥ ७२ ॥
तद्घटनायाः स्मरणे शोकभृता मृत्युगिरः ।
यत्र शुचा गीतवतामश्रुजलौघा अवहन् ॥ ७३ ॥
इन्दुमुखे पर्वयुगे लेखकरः पूज्यपितुः ।
नव्यपटान् पर्यदधादर्पयितुं चाप्यगमत् ॥ ७४ ॥
मज्जितके भूरिनमांस्यत्र महे तस्य गृहम् ।
यातवता मिष्टतमास्ता अशिताः सेवतिकाः ॥ ७५ ॥
येषु च रक्षा क्रियते सा भगिनीभिः सुखदा ।
भ्रातृकरे, चाप्यलिके तत्तिलकं च क्रियते ॥ ७६ ॥
पर्वसु काश्मीरभवेष्वस्ति च 'नौरोज' इति ।
नूतनवर्षादिदिनं विक्रमवर्षप्रतिपद् ॥ ७७ ॥
अत्र नवैर्वस्त्रवरैः सज्जितकायास्तु बहिः ।
शान्तिधनैरर्चितका यौवनगाः सन्ततयः ॥ ७८ ॥
एषु समेषूत्सवकेष्वेक इहासीद्रुचिरः ।
यो मयकाऽभून्नियतो वर्षगतो ग्रन्थिरिति ॥ ७९ ॥
अत्र भृशं हृष्यति मे मानसमायाति मुदम् ।
प्रातरिहाभूत्तु तुलादानविधिर्वस्त्रवतः ॥ ८० ॥
तत्र बहून्यर्पणकान्याहरते बन्धुजनः ।
सायमिहामन्त्रितकान् भोजयते स्माथ पिता ॥ ८१ ॥

भूपतिरत्राहमहो यामि मुदां पारमरम् ।
किन्त्वधिवर्षं दिवसोऽयं सकृदेतीति तुदम् ॥ ८२ ॥
आदृतमान्दोलनकं कर्तुममुष्मै मनसा ।
वर्षशुभग्रन्थिममुं द्विस्त्रिरहो योजयितुम् ॥ ८३ ॥
किन्तु न बुद्धं यदिमा ग्रन्थय एवास्य जराम् ।
आगमयन्तीह पुरो दुःसहदुःखस्मरणाम् ॥ ८४ ॥
जातु वयं बन्धुवरे याति वरत्वेन समे ।
तद्वरयात्रामपि चायाम समारोहजुषः ॥ ८५ ॥
उत्सवके तादृशि ते भान्ति च बन्धाः शिथिलाः ।
यत्स्ववशाः स्मः सकला यातुमथायातुमितः ॥ ८६ ॥
यद्वरयात्रासदने नैककुटुम्बीयजनाः ।
एत्य वसन्ति स्म ततो नैकलता मामतुदत् ॥ ८७ ॥
तत्र समानैर्वयसा बालकबालानिकरैः ।
साकमहं स्वैरतयाऽक्रीडमथोपद्रवकृत् ॥ ८८ ॥
जातु तदापीयमभूद् वृद्धजनोक्तिः परुषा ।
भर्त्संनया तर्जनया या भयमुत्पादयति ॥ ८९ ॥
भारतवर्षे सधना निर्धनलोकाश्च समे ।
निन्द्यमिहापव्ययजं कर्म दधन्तेऽघमिव ॥ ९० ॥
नेदमथापव्ययजं कृत्यमिहास्ते कलुषम् ।
शीलहराश्लीलतरं दृश्यमुपस्थापयताम् ॥ ९१ ॥
यत्र न शोभा न कला नास्ति च सम्पत्प्रथनम् ।
मध्यमवर्गः सहजां दर्शयतेऽत्राधमताम् ॥ ९२ ॥
निःस्वजनाः प्राप्तऋणाः सन्ति मुधापव्ययगाः ।
व्यर्थमिदं स्वार्थहरानर्थकरभ्रान्तिमयम् ॥ ९३ ॥
हन्त ! समाजप्रथया सन्त्यनया ते निहताः ।
निःस्वतया स्वं जठरं भर्तुमपीमेऽप्रभवः ॥ ९४ ॥
विस्मियते यच्छूयते निःस्वजनोऽत्र श्वसितुम् ।
नीरसतामेकरसां रीतिमुदासीनमनाः ॥ ९५ ॥

ईदृशि चाप्युत्सवके भोक्तुमथो पातुमयम् ।
गातुमथो वादयितुं विन्दति वेलां क्षणिकीम् ॥ ९६ ॥

यास्य परिश्रान्तिमरी निर्झरतामेति हठात् ।
दैनिकमुद्वेगकरं कार्यभरं त्यक्तुमिमाम् ॥ ९७ ॥

ग्लानिकरं जीवनगं च श्रममुच्छेत्तुमिमाम् ।
कामयते कालकलां साधु सुखारामकरीम् ॥ ९८ ॥

ये हसितुं रन्तुमथो नाश्नुवते चावसरम् ।
कः परुषो निष्करुणो वा भुवि तेषामहहा ॥ ९९ ॥

स्तोकसुखं स्वल्पमथारामममिमं तोषलवम् ।
भोक्तुमपीहावसरं लब्धमिमं निर्हरति ॥ १०० ॥

आं ह्रियतां दुर्व्यसनं वाभिजनार्हं व्ययनम् ।
इत्यसुकं त्वस्ति महद् व्यर्थतरं चापि वचः ॥ १०१ ॥

यल्लघुकस्यापि कृते दृश्यसमस्याश्च कृतेः ।
व्याह्रियते यत्त्वधनः स्वाधनतायामपि वा ॥ १०२ ॥

तत्क्रियतां न्यूनमिदं मास्म कृथास्तस्य मुधा ।
जीवनकं ग्लानिमयं हर्षलवैर्वा रहितम् ॥ १०३ ॥

मध्यमवर्गस्य कृतेऽप्यस्ति हितं वस्तु परम् ।
मुञ्चति चेद्दुर्व्ययनं तर्हि भवेदुद्वहनम् ॥ १०४ ॥

किञ्चन सामाजिकता नूतनसम्मेलनवत् ।
यत्र दविष्ठाः सुचिराद् बन्धुजनाः स्युर्मिलिताः ॥ १०५ ॥

दीर्घतरश्चापि ततो राजति देशो भुवि नः ।
अत्र सुहृत्सङ्गिजनैः सङ्गमनं नो सुकरम् ॥ १०६ ॥

सर्वविधैश्च स्वजनैरेकपदे सम्मिलनम् ।
दुष्करमप्यन्यदपीच्छन्ति तदुद्वाहमहे ॥ १०७ ॥

तत्सदृशं चास्ति परं सव्यतिरेकञ्च ततः ।
राजति सामाजिकसम्मेलनदृष्ट्यापि महत् ॥ १०८ ॥

राजनयात्तज्जनितं किञ्चन सम्मेलनकम् ।
प्रान्तभवं स्यादखिले भारतवर्षे प्रभवम् ।। १०९ ।।
भारतमस्त्युत्तरगं चाधिकसौविध्यकरम् ।
अन्यजनापेक्षतया किञ्चन काश्मीरजने ।। ११० ।।
तत्र कदापि प्रथया गुण्ठनया नापि पदम् ।
अत्र समागत्य धृता कैश्चन साऽप्यन्यसमैः ।। १११ ।।
स्वीक्रियते सांशतया तूत्तरगे भारतके ।
गुण्ठनकं तून्नतताचिह्नतयामन्यत तैः ।। ११२ ।।
किन्तु मिथः स्त्रीपुरुषैर्जीवनसामाजिकताम् ।
पूर्ववदेव स्ववशां रक्षितुमेवाद्रियते ।। ११३ ।।
कोऽपि च काश्मीरभवोऽन्यस्य किलाभ्येति गृहम् ।
उत्सव आमन्त्रणके स्त्रीपुरुषा भान्ति सह ।। ११४ ।।
किञ्च मिथः सम्मिलितास्तूपविशन्त्यन्तिकतः ।
स्त्रीभिरिमा यत्र पृथक्पृथगेवाकार्षुरदः ।। ११५ ।।
किन्तु किशोराश्च किशोर्यश्च समानाधिकृताः ।
तत्र मिलन्ति स्म परं नाधुनिकैः पश्चिमजैः ।। ११६ ।।
इत्थमिदं माणवकं मे विगतं वारिदवत् ।
हन्त पुनर्नागमितं यन्मम तैः काकुशतैः ।। ११७ ।।
दीर्घकुटुम्बान्तरवच्चात्र कुटुम्बेऽपि मुहुः ।
कोऽपि कलिः सम्भवतीद्धश्च पितुर्याति पुरः ।। ११८ ।।
यत्र स रुष्यन्नगदोन्मौग्ध्यमिदं वामदृशाम् ।
तद्वशगानां च नृणां कोऽप्यविवेको नितराम् ।। ११९ ।।
नाध्यगमं यद्धटितं किन्तु तदासीदशुभम् ।
तर्ह्यभवद् रोषगिरा दूरदवीयो गमनम् ।। १२० ।।
अत्र ममाखिद्यत हृद् यत्र पिता मध्यमगात् ।
तत्र वयं भीततरा वीतगिरश्चापि चिरम् ।। १२१ ।।
तेषु दिनेष्वेकमिदं यद्धटितं तत्स्मृतिगम् ।
वक्तुमहं वस्तुवशादस्मि दिनेऽस्मिन् विवशः ।। १२२ ।।

सप्तशरत्कोऽहमभूवं तुरगारोहरुचिः ।
यामि दिने चापि दिने सादिचमूवीरसखः ॥ १२३ ॥

एकदिने सायमहं सन्न्यपतं स्वात्तुरगात् ।
प्रत्यगमद्गेहमसाववर्वरः शून्यभरः ॥ १२४ ॥

तर्हि पिता तेनिशकं क्रीडति स स्मेति हयम्-
शून्यभरं वीक्ष्य भृशं तूदविजन्तास्य जनाः ॥ १२५ ॥

हन्त समेऽप्यस्य जना वीक्ष्य तमेतं तरसा ।
मत्पदवीं मार्गयितुं तत्र पलायन्त जवात् ॥ १२६ ॥

अग्रसरस्त्वास्त पिता तैः सह मध्येसरणि ।
मामवलोक्यातिमुदा स्वागतिका मे त्वभवन् ॥ १२७ ॥

कार्यमहं शौर्यमयं किञ्चिदहो नाकरवम् ।
किन्तु मम स्वागतिकैस्तैस्तददर्श्येव महत् ॥ १२८ ॥

यन्माता पुण्यशीला शुचिकुलयुगला रुक्मदा हुक्मदेवी
यत्तातो दानतीर्थाटनभजनरुचिः श्रीदुनीचन्द्रवर्मा ।
मीमांसाकाव्यशास्त्रप्रवचनचतुरो यद्गुरुः कृष्णलालो
निस्तन्द्रोऽमीरचन्द्रोऽनुवदति स कथां मामकीं संस्कृतेन ॥

श्रीभागवतपावनकथासारस्य सोदर्यं श्रितम्
श्रीमज्जवाहरलालनेहरुचरितमिदमतिविस्तृतम् ।
माणवकमिति शीर्षकेण च वृत्तकेन च चारुणा
तद् द्वितीयेनाद्वितीयेनाथ सर्गेनान्वितम् ॥

थियोसोफी (अध्यात्मवादः)

शिखरिणी

तृतीयः सर्गः

दशाब्दावस्थे मय्युपनतमभूद् यन्निवसितुं
कुटुम्बं नो नूत्नं गृहमविशदानन्दभवनम् ।
इहासीदुद्यानं महदथ च ततुँ लघु सर-
स्तथाऽगान्मे यद्यद् दृगयनभभूत्तत्सुखकरम् ॥ १ ॥

महाहर्म्ये चास्मिन्नवयवलवास्ते नवनवाः
समायोज्यन्तेस्म स्थपतिखनकैश्चात्मकृतयः ।
श्रमाजीवानत्र स्वकृतिनिहतान् द्रष्टुमथ मे
मनोऽत्यन्तं सोत्कं क्षणमपि न हातुं प्रभवति ॥ २ ॥

सरः सान्निध्येनात्राविदमहमहो ! तत्र तरणं
तरंश्चाहं भीतिं मनसि नहि काञ्चित्त्वकलथम् ।
निदाघे चैतस्मिन् समयमनुपश्यन्नसमयं
ह्यवाताषं स्नातुं पुनरपि पुनर्हर्षितमनाः ॥ ३ ॥

पितुर्मित्राण्यस्मिन् दिवसविगमे ततुँमविशन्
तदासीदेकान्तान्नवमिति विलोक्यास्मि चकितः ।
सरस्यस्मिन् सद्मन्यपि च मुहुरस्मिन्नवनवाः
प्रयुक्ता वैद्युत्यो मम सुखमधुर्दीपकशिखाः ॥ ४ ॥

अहो स्नातां यूथे मम समभवत्सौख्यमतुलं
विशेषाद्ये ततुँ नहि समविदंस्तान् रमयितुम् ।
जले कञ्चित्क्षिप्तं पुनरपि च कृष्टं तमिह यद्
व्यलोकेऽहं भीतं तदभवदहो ! मेऽतिकुतुकम् ॥ ५ ॥

स्मराम्यद्धा सप्रूपपदसहितं तैजसबहा-
दुरं वाक्कीलत्वं श्रितमिह वरन्यासंसदने ।
स ततुँ नाजानान्न च स तरणं वेत्तुमलष-
न्न चाद्यात्सोपानादवतरति, स स्नाति तटगः ॥ ६ ॥

बलादाकृष्टोऽन्तः कलकलमथोग्रं स्म कुरुते,
विभेति स्माकस्माद्यदि सरसि कश्चित्क्षिपति तम् ।
पिताऽऽप्यासीन्नो मे तरणकुशलो यद्यपि तथा-
प्ययं धैर्यात्पारेऽगमदतिचलत्पाणिचरणः ॥ ७ ॥

प्रवृत्तं तर्ह्यासीद् भरतभुवि तद्बोअररणम्
रुचिस्तद्वृत्तान्ते मम समभवत् कापि सबला ।
किलासीत्संवित्तिर्मम हि सहजा बोअररणे
ततस्तद्वृत्तान्तानपठमिह वृत्तान्तदलके ॥ ८ ॥

इदानीमन्तर्मेऽरमत गृहवृत्तेऽपि मृदुले
तदासीत्सोदर्यस्वसुरिह जनुः कौतुककरम् ।
चिराच्चित्ते खेदोऽभवदलिनिगीर्णो यदिह मे
न कश्चिद् भ्रातास्ते न च भवति मे कापि भगिनी ॥६ ॥

इतीदं शोचन्तं किल मुदमनैषीद् गृहकथा
यदाशु प्रादुःष्यान्मम किमपि यत्सोदरमिति ।
पिताऽगाद्यूरोपं तदहमधुनापि स्मृतिगतं
प्रसूतिप्रासादाङ्गणगतमलिन्दं तु कलये ॥ १० ॥

स्थितो यत्राश्रौषं स्वसृजननवृत्तं कविमुखाद्
हसन्नेष प्राह—प्रचिनु मुदमन्तस्तु परमाम् ।
भगिन्येषा जाता न तु तव समानाधिकृतिभाक्
स बन्धुर्यो दायात्कमपि तव हर्तांशमुचितम् ॥ ११ ॥

भिषग्वाक्यं नैतन्मम रुचिकरं तर्हि समभू-
त्परं कञ्चित्खेदं समजनयदेनं प्रति दृढम् ।
अहो ! नीचोऽहं किं मनसि भिषजानेन गणितो
निजांशाधिक्यार्थोऽभिलषति न बन्धुं जगति यः ॥ १२ ॥

पितुर्मे यूरोपं प्रतिगमनमेकं व्यजनयत्
किलान्तः काश्मीरद्विजगणमनस्युत्प्लवमिव ।
यतः प्रायश्चित्तं किमपि किल तैर्दर्शितमपि
स यूरोपात्प्रत्यागत इह न कर्तुं व्यवसितः ॥ १३ ॥

समायातो वैरिस्तरपदधरः पण्डितवरः
किलाङ्ग्लानां देशात्कतिपयशरत्पूर्वमिह सः ।
कृतप्रायश्चित्तोऽपि स बुधगणैर्जातिकुलतो
बहिः क्षिप्तो बन्धः क्वचन च न कश्चित्समवितः ॥ १४ ॥

ततो दायादानां दलयुगलमासीद् विरचितं
युवानः काश्मीरादगुरथ विदेशांश्च पठितुम् ।
समे प्रत्यागत्य प्रथममिह कृत्वापि विधिवत्
स्म तत्प्रायश्चित्तं श्रददधत सौधारिकदले ॥ १५ ॥

विधिः प्रायश्चित्ते समभवदहो कौतुककरो
न यस्मिन्नत्रासीत्किमपि नियतं धार्मिकदृशा ।
तदर्थोऽभूद् रीतेरनुसरणमात्रं गणगिरो-
ऽद्य सम्मानश्चित्रं विहितविधयो भान्ति नवलाः ॥ १६ ॥

सुधाराणां श्रेणिं नवनवकृतिं यान्ति विविधां
तदीयान् कार्यौघान् विदधति च नानाकृतिधरान् ।
कियद् ब्रूमो विप्रा अपि सुखमनार्यान्त्यजगृहं
गता गृह्णन्तिस्म स्वयमिह जलं चान्नमभयाः ॥ १७ ॥

पिता मेऽग्रे यातः पदमिदमहो नैष किमपि
स्मृतं प्रायश्चित्तं तदनुगतरीतिं च मतवान् ।
महान् कश्चित्कोलाहल उदभवत्तेन परितो
विशेषात्तेजस्वद्धठकठिनताया मम पितुः ॥ १८ ॥

अथान्ते भूयांसः पितरमनुयातास्तदसुक-
स्तृतीयोऽभूद्वर्गः सपदि नवकाश्मीरिकनृणाम् ।
ततोऽल्पैरेवाब्दैश्च मतिपरिवृत्त्या नियमनाः
पुरातन्यो मुक्तास्त्रितयमपि चैकत्वमगमत् ॥ १९ ॥

गता आङ्ग्लं देशं पठितुमिह नैके च युवका
युवत्यः काश्मीरात्सुचिरममरीकापदमपि ।
न तत्प्रायश्चित्तं समलभत चर्चामपि तदा
यदा प्रत्यायाताः पठितलिखिता भारतमिमे ॥ २० ॥

जनान् कांश्चित्त्यक्त्वाङ्गुलिषु गणितान् शेषपुरुषैः
क्रमाद् भोज्ये पेये किल परिहृतास्ता नियमनाः ।
विशेषाद् वृद्धाभिः कथमपि धृतास्ता निजगृहे
सपीतिः सामान्याभवदिह सजग्धिश्च परितः ॥ २१ ॥

अकाश्मीरैः साकं सपदि यवनैः सार्धमपि ते
पिबन्तो वाश्नन्तोऽभरतवसुधाजैः सममपि ।
न कञ्चित्सङ्कोचं मनसि दधुरौज्झंश्च वनिता
विजातीयेष्वप्यावरणमथ चादर्शनमपि ॥ २२ ॥

अथ त्रिंशे वर्षे नृपनयिकमान्दोलनमिमाः
समस्ता मर्यादाः प्रबलतरघातैः समवधीत् ।
विवाहे मर्यादा स्म चलति मनाक्किन्तु शनकैः
प्रवृत्ताः सम्बन्धा भरतभुवि वंशान्तरभवैः ॥ २३ ॥

भगिन्यौ मे द्वे अप्युदवहतमन्यान्वयभवा-
वकाश्मीरौ, कश्चिद्युवक इह हंगेरियुवतिम् ।
इहान्तर्जातीये परिणयविधौ धार्मिकदृशो-
ऽधिका वंशे शुद्धेर्दृगुपकुरुते रोधयति च ॥ २४ ॥

अमीभिः काश्मीरैरभिलषितमैक्यं दृढतरं
स्वजातेरार्यत्वानुगतदृढसंस्कारसहितम् ।
भयं तेषामेतद्यदि वयमकाश्मीरिकदला-
म्बुधौ पातं कुर्मो द्वयमपि तदस्माकमयते ॥ २५ ॥

विशालेऽस्मिन् देशे वयमिह च काश्मीरिकजना
गगर्यां विन्दुर्वा स्म इति बिभिमोऽत्रानुमिलनात् ।
परं ते न ध्यायन्त्यहह यदि विन्दुः पृथगिह
स्वसत्तां काङ्क्षेत क्षणमनु स शुष्येत्तपनतः ॥ २६ ॥

इहाद्यः काश्मीरोऽद्यतनसमयाद्वर्षशतका-
त्पुरा पश्चाद्देशं गत इति स मिर्जा स्म वदति ।
स च श्रीमान् धीमानिह मिशनकालेजपठिति-
र्द्विभाषी सन् यातो ब्रिटिशमिशनैः काबुलपदम् ॥ २७ ॥

पदे मध्यैशीये भ्रमति स पुरार्यायणपदे
विवाहांश्चाकार्षीत्प्रतिपदमसावुच्चकुलके ।
स विप्रोऽप्याधात्तामिह यवनतां राजयवनीं
व्युवाहायं तस्मादलभत स मिर्जेति पदवीम् ॥ २८ ॥

गतोऽसौ यूरोपानमिलदिह तां चापि विकटो-
रियां तस्मिन् काले युवतिमिह चैवाभ्रमदयम् ।
स चास्या यात्राया अतिरुचिकरं वर्णनमपि-
स्वयं तत्रत्यं संस्मरणमपि नाना स्म लिखति ॥ २९ ॥

अतीतायामेकादशशरदि एफ्.टि.ब्रुकसको
नवीनोपाध्यायो नियत इह योऽध्यापयति माम् ।
मया साकं चासौ वसति जनकोऽस्यायरिशतां
प्रसूः फ्रांसीसीतामदधत नु वावोज्जियनताम् ॥ ३० ॥

थियोसाफासिस्टः स हि निपुण आयादनुमतेः
कुमार्या वासन्त्या स च समवसत् त्र्यब्दसमयम् ।
अनेकेष्वंशेषु प्रकृतिरिदमीया मतिरपि
प्रभावं मय्याधाद् गहनमिति मन्येऽहमसकृत् ॥ ३१ ॥

तदानीमेको मे गुरुरिह समध्यापयति यः
स्म हिन्दीं गैर्वाणीं, बहुभिरपि वर्षैश्च यतनैः ।
स मे स्तोकां शिक्षां व्यतरदिह मे लैटिनसमं
हि गैर्वाणीज्ञानं समभवदितीहास्म्यकुशलः ॥ ३२ ॥

न भाषाशिक्षायां मम मतिरियं ह्यस्ति निपुणा
विशेषाद् व्याकृत्यां न रुचिरिह काचिद्भवति मे ।
इयं या संस्कारानधिगतवती व्याकृतिगतान्
कथं सा गम्या व्याकृतिषु विमुखैः संस्कृतगिरा ॥ ३३ ॥

अभूदेफ्. टी. ब्रुक्सो गुरुपरिचयात्पुस्तकरुचि-
र्यथा नैकान् ग्रन्थानपठमफलार्थ्याङ्गअगिरः ।
शिशूनां बालानामपि विमलसाहित्यमपठं
लुई केरोलस्यारुचत किपलिङ्गस्य च परम् ॥ ३४ ॥

अथो डान् विवक् लोटे हृदयमथ गुस्तावकलया
फिज्राक् नान्सन् क्लृप्तेश्चकितमथ फार्वेस्ट नयने ।
अनेनोद्धारो मे नवलजगतः साहसवतः
समुद्घाटयाकारि प्रबलमिदमित्यस्मि मुदितः ।। ३५ ।।

डिकन्सस्थाट् थैक्रेर्विरचितमुपन्यासनिचयं
स्मराम्यद्धाधीतं बहुविधकथाश्चापि पठिताः ।
विनोदे मार्कट्वेन् रहसि किल शार्लाक् सुविदित-
स्तथैच्. जी. वेत्सो मे परिचयमगात् साहसमये ।। ३६ ।।

स 'प्रिज्नर्साफ्जेन्दा' गृहमकुरुतान्तर्मनसि मे
परं जेरोमस्यापठमिह न हास्यावहकथाः ।
स्मराम्यन्यान् कर्तॄनपि सपदि डूमारियरवद्
रुचिः काव्येऽप्यासीदहरत न यां वृत्तशतकम् ।। ३७ ।।

रहस्यं मे ब्रुक्सोऽदिशदिह च विज्ञानजगतः
प्रयोगार्था शालाऽक्रियत कुतुकात्तेन च मया ।
चिरं यस्यां रासायनिकमथ विज्ञानमितरत्
प्रयोगैः प्रापश्यं परमरुचिरेष्वेव रुचिमान् ।। ३८ ।।

अयं ब्रुक्सो मेऽन्यामपि रुचिमजागारयदिमां
थियोसोफीमार्गेऽदधत समये या प्रबलताम् ।
सभा सप्ताहान्ते भवति भवने तस्य नियमा-
दगामस्यां भाषावगतिरभवद्ध्रस्त्ववगतिः ।। ३९ ।।

इहाभूवन्नाध्यात्मिकविषयचर्चा बहुतया
ऽवतारे वा दिव्ये वपुषि विमले कामवपुषि ।
तथा दिव्ये तेजोवलयविषये कर्मरहसि
प्रभूतास्ता वार्ताः स्मरणपदवीं मे न जहति ।। ४० ।।

थियोसोफासिष्टा ऋषिमुनिजना ग्रन्थसहिता-
स्तथा हिन्दूबौद्धादिकमतगता धर्मनियमाः ।
विचार्यन्ते तस्यां सरलरहितैः पक्षरहितै-
रिहाभूत्पैथागोरसमुखबुधानामपि कथा ।। ४१ ।।

अवागच्छं सर्वं न मम तदिदं किन्तु समभा-
द्रहस्येनापूर्णं किमपि मम लोभावहमपि ।
अमन्ये चैवाहं यदिह सकलानामपि भुवो
रहस्यानां काचित्प्रविलसति कुञ्ची विनिहिता ॥ ४२ ॥

इहैवाहं पूर्वं निजमनसि धर्मेऽपि गहनं
परस्मिल्लोके च स्वयमपि विचारानकरवम् ।
महान् हिन्दूधर्मोऽभवदिह दृशा मेऽप्युपनिष-
च्च गीता चास्तेऽस्मिन्निति न तु लसत्कर्मनिचयः ॥ ४३ ॥

न तं बोद्धुं शक्तोऽप्यहमविदमेते सुमहती
अपश्यं स्त्रप्नांश्चास्वपनसमये कामवपुषाम् ।
समारोहं व्योमाथ च पवनयानैर्विरहितो-
ऽप्यहं याम्येवोच्चैः स्वयमपि मुहुः स्वप्नकृपया ।। ४४ ॥

कदाचित्ते सत्या अथ च विशदा भान्त्युपरिगा
अधः कृत्स्नं विश्वं जगति विततं चित्रपटवत् ।
न जाने स्वप्नार्थं कमिह कलयन्त्यत्र विबुधा
बुधाः फ्रायड् कल्पाः, परमिह रमे हन्त सुचिरम् ॥ ४५ ॥

कुमारी वासन्ती स्वयमिह तदाभ्यागतवती
प्रयागे व्याख्यानान्यकुरुत बहून्येव विदुषी ।
तदीयैस्तै रम्यैर्मम हृदयमस्पन्दत हठा-
दहं विस्मित्यागां गृहमथ च विस्मृत्य सकलम् ॥ ४६ ॥

स्थितो जाग्रत्स्वप्नेतदहमभवं तर्हि च त्रयो-
दशाब्दः सभ्यत्वं निरचिनवमस्याश्च समितेः ।
पिता पृष्टः प्रोचे न किमपि न स चास्मिन् हसितवान्
महत्त्वं स त्वस्मिन् किमपि वितरीतुं न मनुते ॥ ४७ ॥

तदौदासीन्यं मे हृदयमतुदत् सन्नपि महान्
ममाभादध्यात्मे लघुरिव पुराणः स पुरुषः ।
थियोसोफासिष्टः स खलु सुचिरादास्त मतिमान्
यदा ब्लेवेट् स्कीश्रीर्भरतभुवमागाद् व्रतवती ॥ ४८ ॥

न धर्मे विश्वासादपि तु कुतुकादेष समधा-
दमुष्याः सभ्यत्वं झटिति तदहासीच्च निपुणः।
परं तन्मित्राणि श्रितसमितिसभ्यत्वविभवाः
समुच्चेष्वप्याध्यात्मिकवरपदेषून्नतिमगुः ॥ ४९ ॥

तदित्थं सभ्योऽहं तदिह तदवस्थः समभवं
कुमार्या वासन्त्या स्वयमिह च दीक्षा वितरिता।
निगूढैश्चिह्नैः कैश्चन तदुपदेशेन सहितै-
रवाप्तो निःशुल्कैरिव परिचयं चास्मि मुदितः ॥ ५० ॥

गतः काश्यां सम्मेलनमथ तदीयं कलयितुं
लसत्कूर्चं कर्नल्पदधरमिहाल्काटमभिषम्।
पुरा त्रिंशद्वर्षादिह शिशुवयाः कीदृगभवं
कथञ्चान्वाभूवं किमिति मननेनाद्य सुगमम् ॥ ५१ ॥

परं मन्ये तस्मिन्नवसरवरे मे सुखमिदं
प्रतीतं गम्भीरं विरसवदुदासीनमभवत्।
भवत्येतज्जातु प्रकटितपवित्रत्वमिह यत्
थियोसाफासिष्टे भवति कलितं स्त्रीनरगणे ॥ ५२ ॥

अहञ्चात्रात्मानं तदुपरिपदस्थं कलितवान्
अवश्यं मद्रीतिश्चकितयति मत्तुल्यवयसः।
यया तेऽनर्हं मां सपदि गणयन्ति स्म सदसः
किशोराश्चोन्मत्ता जगति च किशोर्यो धृतमदाः ॥ ५३ ॥

अहो ब्रुक्से याते मम समितिसङ्गोऽपि स गतो
थियोसोफी स्वल्पैरपि च दिवसैर्मे व्यपगता।
यतोऽहं निर्यातः पठितुमिदमाङ्ग्लं जनपदं
तथापि ब्रुक्सस्यास्ति मयि गुरुकं किञ्चन ऋणम् ॥ ५४ ॥

भयादारामार्थि प्रपतितमधो मे नयनतो
थियोसाफासिष्टं बलमिति वदाम्यार्तहृदयः।
मतोऽप्युच्चाः सन्तो ध्रुवमतिगता अप्यखिलतां
प्रतीयन्ते तेऽमी प्रकृतिवशगाः प्राकृतजनाः ॥ ५५ ॥

शहीदानां मार्गं कठिनमपहायैव कुसुमा-
वृतं पन्थानं ते सपदि मृगयन्तीह सुखिनः ।
कुमारीं वासन्तीं प्रति तु हृदयेऽद्यापि सुमहान्
ममास्ते सत्कारः स खलु निचितस्तद्गुणबलात् ॥ ५६ ॥

इदानीं मच्चेतोऽवशयदयमुल्लेखविषयो
रणो रूसैः साकं विषम इव जापानबसताम् ।
समाचारान् ज्ञातुं समभवमिहार्तः प्रतिदिनम्,
जयोदन्ताज्जातोच्छलनमपरेषां मम मनः ॥ ५७ ॥

अहं तत्सम्बद्धान्यचिनवमिहालेखनिचयं
ततश्चानेकेषां पठनमपि चाकार्षमभितः ।
स जापानेतिह्यं स्वमपि न समास्मार्षमथवा
रसोद्रेको लोकेऽपहरति विवेकं मतिमताम् ॥ ५८ ॥

पुराणीस्तत्रत्या सुभटवरगाथाश्च पठतो
मनो लाप्स्केडीयोहरणरचितं गद्यमहरत् ।
भृतं तद्भावै राष्ट्रियरतिधरैर्मुक्तिविषयै-
र्युरोपादेस्तैस्तैर्भरतवसुधादेरनुदिनम् ॥ ५९ ॥

अहं वीरत्वस्थाकलयमनिशं वाञ्छितशतं
विना युद्धं मुक्तिर्भवति न नृणां शत्रुवशतः ।
स्वदेशं स्वातन्त्र्यं गमयितुमिह स्वप्रयतनै-
रहं योत्स्ये हस्ताकलितकरवालो ध्रुवमिति ॥ ६० ॥

परीवृत्तिर्गेहेऽभवदतितरां यन्मयि चतु-
र्दशाब्दे, व्यस्तास्ते स्वकृतिषु पितृव्याः पृथगगुः ।
विचारा नूत्ना मे मनसि विचरन्ति स्म, मृदुला
भ्रमन्ति स्मास्मिंस्ता वलयवपुषः कल्पनलताः ॥ ६१ ॥

रुचिर्मे स्त्रीजातावुपचयमगात् किन्तु सुहृदः
किशोरा रोचन्ते मनसि न किशोर्यो मम तथा ।
अहं ताभिर्मेलां परममवहेलां स्म कलये
कदाचित्काश्मीर्यां समशनजगोष्ठयां किल रमे ॥ ६२ ॥

किशोरीणां तस्यां न खलु सुभगानां समभव-
द्व्यभावो वान्यत्र क्वचिदपि दृगेति स्म मम ताः ।
स्पृशत्यङ्गोपाङ्गं समुदयदहो मेऽत्र पुलकः
सरोमाञ्चो हेतोः कथनविषये मौनमदधाम् ॥ ६३ ॥

अतीतं वर्षाणां मम तु वयसः पञ्चदशकं
यदाङ्ग्लानां देशं वयमुपगताः कौतुकवशात् ।
पिता, माता लघ्वी मम च भगिनी चाहमपि तं
सुखात्प्राप्तास्तत्र भ्रमणविधिनाऽभूम मुदिताः ॥ ६४ ॥

यन्माता पुण्यशीला शुचिकुलयुगला रुक्मदा हुक्मदेवी
यत्तातो दानतीर्थाटनभजनरुचिः श्रीदुनीचन्द्रवर्मा ।
मीमांसाकाव्यशास्त्रप्रवचनचतुरो यद्गुरुः कृष्णलालो
निस्तन्द्रोऽमीरचन्द्रोऽनुवदति स कथां मामकीं संस्कृतेन ॥ ६५ ॥

अध्यात्मदर्शनदर्शितप्राच्यप्रतीच्यमताध्वगं
श्रीमज्जवाहरलालनेहरुचरितमेतच्चिन्तितम् ।
अस्मिन्नसौ सम्प्रति थियोसोफीकृतस्फीतस्थितिः
सर्गस्तृतीयो निर्गतः प्रतिभाप्रकाशकरः परः ॥ ६६ ॥

हॅरो कैम्ब्रिजे

द्रुतविलम्बितम्

चतुर्थः सर्गः

उपगतौ पुरसुन्दरलन्दनं प्रचलितौ रयलेन च डोवरात् ।
पथि सुसीमनि तज्जयपत्तने जलचमूविजयस्य कथा श्रुता ॥ १ ॥
इदमभूत्सुचिरेण किलेप्सितं मम मुदामभवन्न किलावधिः ।
परदिने दरवीहयधावनां वयमगाम विलोकयितुं वराम् ॥ २ ॥
कतिपयैर्दिवसैरिह तिष्ठतः समभवन्मिलनं त्वनसारिणा ।
स हि तदास्त युवा चतुरः स्फुरन्निति मम स्मृतिमेति तदातनम् ॥ ३ ॥
सफलतां महतीमयमध्यगाद् गुरुकुलेष्विव चाध्ययनक्षणे ।
इह चिकित्सितिकेन्द्रगतस्तदा भवनसर्जनतामधितिष्ठति ॥ ४ ॥
इह हॅरोध्ययनाविषये वयो नियमतोऽहमनर्हतयाऽऽस्थितः ।
अपि यदत्र गतोऽस्मि निवेशनां तदिदमास्त सुदैवविनिर्मितम् ॥ ५ ॥
सपरिवारजनोऽपि युरोपगानितरदेशगणानगमत्पिता ।
पुनरतः कतिभिश्चन मासकैर्भरतभूमिमयं प्रतियातवान् ॥ ६ ॥
प्रथममावसमेष न चैकलोऽपरिचितैस्तु जनैः सह कुत्रचित् ।
इति ममात्र नितान्तमभात्खवत् निजगृहस्मृतिराकुलयच्च माम् ॥७ ॥
परमियं समभून्न चिरं दशा गुरुकुलस्य हि जीवनमाविशम् ।
पठनलेखनखेलनकर्मसु प्रणिरतोऽपि न यामि समञ्जसम् ॥ ८ ॥
मनसि मे सततं समभूदिदं नहि जनेष्वसुकेषु भवाम्यहम् ।
पुनरमी मयि चेदृशधारणामिह धरन्ति पुरेति विचारयन् ॥ ९ ॥
अहमिवासमिहैकल एव वै समभजं किल खेलनभागिताम् ।
चमदकार्षममीषु न कुत्रचित्परममीषु किलास्मि न पृष्ठगः ॥ १० ॥
प्रथमतो लघुवर्गगतोऽभवं यदविदं लघु लैटिनभाषणम् ।
परमगां सहसैव समुन्नतिं यदविशेषविवेकधरोऽभवम् ॥ ११ ॥

बहुषु वस्तुषु वा विषयेषु सा ध्रुवमसंशयितास्त रुचिर्मम।
स्वसहपाठिषु पुस्तकवृत्तयोरतिशयात्पठने प्रथितोऽभवम् ॥ १२ ॥
पितरमप्यलिखं यदिहाङ्ग्लकाः श्लथधियः कुधियः किल बालकाः।
न खलु खेलनतो विषयान्तरे किमपि वक्तुमिमे प्रभवन्ति यत् ॥ १३ ॥
परमिहाप्यपवाद इवापरे परिचयं मम केचन लम्भिताः।
समभवंस्तु न मे सहपाठिनोऽत्युपरिवर्गगता बहुधाऽभवन् ॥ १४ ॥
जनपदे पुनराङ्ग्लजनस्य मे तदविशेषचये रुचिरत्यभूत्।
अभवदेष च पञ्चमवत्सरे यदजयंस्तदुदारविचारणाः ॥ १५ ॥
अनुचयं परिपृच्छति शिक्षके समभवन्मम कश्चन विस्मयः।
स्वसरकारसमन्वितवस्तुकेऽप्यखिलवर्गमगादिह मौनिता ॥ १६ ॥
मम तु यद्यदपृच्छदयं तदा तदखिलं रसनाग्रगतं वदन्।
सचिवमण्डलसूचिमुदाहरं निमिषतो मिषतां सहपाठिनाम् ॥ १७ ॥
नृपनयादतिरिक्ततरे पुनः पवनयानपरे विषये रुचिः।
मम युगं तदभाषत राइटिति ब्रदरसे समतोषयदन्तरम् ॥ १८ ॥
तदनु फार्मनलैघम-ब्लीरियोयुगमुपक्रमते निजकौशलम्।
अहमिदञ्च विदन्नलिखं पितुः प्रतिदिनेशदिने स्वगृहागमम् ॥ १९ ॥
गुरुकुले च हॅरोनिलये तदा समपठन् किल पञ्चषभारताः।
इह सतां न परत्र समागमः परमभून्मम वासगृहे मुहुः ॥ २० ॥
प्रमुखशिक्षकवासगृहेऽथवाऽस्तु वटपत्तनराजसुतालये।
स हि समागमदत्र पुरैव मे क्रिकटखेलपटुर्जनवल्लभः ॥ २१ ॥
निववृते स नते मयि लन्दनात्तदनु चात्र कपूरथलेशजः।
परमजीत इति प्रथितोऽभ्यगाद्यमधुना नृपता वृणुते वरम् ॥ २२ ॥
स न समञ्जसतामिह लब्धवान् असुखितानुभवादमिलन्न तान्।
य इह तस्य कृतिक्रममाहसन् क्षुभितमेनममी उदवेजयन् ॥ २३ ॥
स समभर्त्सयदत्र मुहुश्च तान् शमयितास्मि कपूरथलागतान्।
इति वृथा भवति स्म च भर्त्सनेत्यपि न वाच्यमिदं विशदं स्वतः ॥२४॥
न्यवसदेष फलांशपदे पुरा न्यगददाशु फलांशगिरं स्फुटाम्।
परमिदं परमाद्भुतमस्ति यत्तदधियातमिहास्त निरर्थकम् ॥ २४ ॥

गुरुकुलानि किलाङ्ग्लगिरस्तथाधिगमयन्ति विदेशभुवो गिरः ।
किल फलांशगिरोऽध्ययनक्षणे तदुदितं पठनं विफलं भवेत् ॥ २६ ॥
किमपि चित्रमभूदिह चैकदा भवनशिक्षक एत्य किलाञ्जसा ।
निरवलोकयति स्म निविश्य नो भवनकेषु वतार्धनिशाक्षणे ॥ २७ ॥
इदमनन्तरमत्र जनाच्छ्रुतं परमजीतहरेरिह यष्टिका ।
कनककल्पितमञ्जुलमुष्टिका क्वचन नाशमिवोपगतेति यत् ॥ २८ ॥
निरवलोकनतोऽधिगता न सा तदनु च त्रिदिनान्तरतस्तदा ।
अभवदीटनवर्ति-हॅरोस्थयोः क्वचन खेलगता प्रतियोजिता ॥ २९ ॥
तत इयं समदृश्यत तद्गृहे स्ववगता प्रतियोगिजनाहृतिः ।
कृतवता निज कार्यमनेन सा सपदि केनचन प्रतिरक्षिता ॥ ३० ॥
इह च शिष्यगृहेषु यहूदिनः कतिपये न्यवसन् मिलिताः सुखम् ।
परमिहान्तरतः प्रतिकूलिता प्रसरति स्म तु काचन धारणा ॥ ३१ ॥
ध्रुवमिमेऽत्र यहूदिजनाः शठा इति कियत्सु दिनेषु न जानता ।
मनसि धारितमेव मयापि यत्समुचितैव धृणेषु मनीषिणाम् ॥ ३२ ॥
परमियं न कदापि मदन्तरे क्वचन कापि यहूदिषु भावना ।
प्रतिगता समभून्मम जीवने समभवन् सुहृदश्च यहूदिनः ॥ ३३ ॥
अभवमेव हॅरोव्यसनी शनैः प्रियमिदं समभान्मम साम्प्रतम् ।
परमिदं मम चेतसि चिन्तितं यदधुना न चलिष्यति मेऽर्थना ॥ ३४ ॥
गुरुकुलं समकर्षदितो मनः प्रकटभारतवृत्तमुतो मम ।
यदपि योरुपवृत्तदलेऽङ्कितं तदपि तत्प्रतिबोद्धुमभूदलम् ॥ ३५ ॥
यदिह वङ्गमुखेषु महत्त्वधा बहुविधा घटनाः प्रभवन्त्यमूः ।
अहह लाजपताजितसिंहयोर्ब्रिटिशशासनतश्च विवासनम् ॥ ३६ ॥
कलकलः किल बङ्गमिहावृणोत्तिलकनाम ततं भुवि कीर्तिमत् ।
अथ विदेशजवस्तुनिकारणाद् भवति देशजवस्तुसमादरः ॥ ३७ ॥
इति समा घटनाः श्रुतिमागता मनसि मेऽजनयन् बहुभावनाः ।
परमभून्न हॅरोविषये नरो यमुपयामि मनागपि चर्चितुम् ॥ ३८ ॥
तदवकाशदिनेषु पितृव्यजानथ च भारतवासिसुहृज्जनम् ।
समवलोक्य निवेद्य च तेषु तत्सभरमात्ममनोऽत्र लघूकृतम् ॥ ३९ ॥

गुरुकुले शुभकार्यमनुष्ठितं तदुपहारमगामिह पुस्तकम् ।
अरमतात्र मनो, झटिति द्वयं तदपरं क्रयतोऽस्मि गृहीतवान् ॥ ४० ॥
त्रितयतो गरिबालडिसत्कथा स्ववहितेन हृदा पठिताखिला ।
अथ जि. एम्. ट्रविलीयनमालिकां प्रति कृतज्ञमनोभरमार्पिपम् ॥ ४१ ॥
सपदि भारतभूमितलेऽपि तत्समतया घटनाः समकल्पयम् ।
स्ववशताकरणानि च वीरतामय-रण-स्वपनानि दिवैक्षिषि ॥ ४२ ॥
स्फुरति भारतभूमिरथेटली तदुभयं मिलितं मम मानसे ।
इह विमर्शविधौ च हॅरोस्थलं लघु च सङ्कुचितं मम तद्व्यभात् ॥ ४३॥
महति विश्वविदालयमण्डले तदहमेतुभिहैच्छमनारतम् ।
अनुमतिं जनकस्य च लब्धवानवसमब्दयुगं च हॅरोस्थले ॥ ४४ ॥
तदिदमब्दयुगं समयो लघुः समभवन्नियमात्पुनरैहिकात् ।
जिगमिषुः स्वयमप्यहहा ततः प्रगमने गुरु कष्टमगामहम् ॥ ४५ ॥
तदिदमश्रुगिरा नयने मम स्फुटयतःस्म च चारु हॅरोस्थलम् ।
अतिशयेन सुचारु ममान्वभात्प्रकरणञ्च समाप्तमभूदिदम् ॥ ४६ ॥
मतिरियं बहुधा मम जायते कियदभून्मम दुःखमृतं ततः ।
क्वचन सीमनि सत्यमभूदिदं यदभवन्मम दुःखदमेव तत् ॥ ४७ ॥
लसति तादृगमुष्य परम्परा सरति गीतगतो ध्वनिरीदृशः ।
अनुसृतेरनयोर्मम दुःखिता समुचितैव तदा समभूदिति ॥ ४८ ॥
अलमभूवमहं न परम्परानुसरणादवितुं निजमानसम् ।
इह समञ्जसताधिगमाय सा क्वचन नैव मया प्रतिषेधिता ॥ ४९ ॥
अथ गतोऽस्मि स कैम्बिजवर्तिनि ट्रिनिटिकालिजकेऽध्ययनेच्छया ।
इह च सप्तदशाब्दवया अहं प्रमुदितोऽन्तरितोऽस्मि वि.ए.श्रियः ॥५०॥
गुरुकुलादिह मे स्ववशा स्थितिः, कलयितास्मि यथेच्छमहं कृतीः ।
इह च माणवकादपि बन्धनाद् विरहितोऽनुभवामि महत्त्वकम् ॥ ५१ ॥
तदभिमानयुतः किल कैम्ब्रिजस्थभवनेषु च वीविषु सम्भ्रमन् ।
परि च तं च विलोक्य परां मुदामिह दधामि चिराय परम्पराम् ॥ ५२ ॥
समवसं त्रिसमाः किल कैम्ब्रिजे व्यतिगतः समयः स च शान्तिमान् ।
न खलु विघ्नलवः पतितः क्वचित् स शनकैरिह कैमनदीसमः ॥ ५३ ॥

प्रमिलिता वहवः सुहृदोऽत्र ते प्रविहितं किमपीह च कर्म तत् ।
विकलितं च मनःक्षितिजं शनैरिति समाः सुषमाः सुखदा अगुः ॥ ५४ ॥

प्रकृतिविज्ञतया च रसायनं भुवनगर्भमथैष वनस्पतिम् ।
यदनुशास्ति तदाद्यनुशासनं समपठं रुचिमानितरेष्वपि ॥ ५५ ॥

अमिलदत्र जनो यदि कैम्ब्रिजे यदि विसृष्टिदिने, यदि लन्दने ।
तदितरत्र च यत्र च तत्र च स्मरति स स्म मतिप्रदपुस्तकम् ॥ ॥ ५६ ॥

विविधवाङ्मयगं त्विविहासकं नृपनयं पुनरार्थिकशासनम् ।
प्रथमतस्तु समं कठिनं व्यभात्परमहं पठनादिदमध्यगाम् ॥ ५७ ॥

इति विदद्भिरहं चरमावधावपि वदन्न सदज्ञतथाऽऽस्थितः ।
प्रकटितोऽस्मि समस्तगसारवित् सुविदितोऽस्मि सुसंस्कृतिविद्यथा ॥५८॥

वयमहो नितशेवरनार्डशाकलितभूमिकयोर्विषयेष्वलम्। ।
अपि च लार्डडिकिन्सनपुस्तकेष्वपि चिरं व्यवदाम निरन्तरम् ॥ ५९ ॥

स नितशे किल कैम्ब्रिजमण्डले समभवद्धि तदा बहुचर्चितः ।
स्वमविदाम तदा मतिशालिनं मिथुनभावचरित्रसुकोविदम् ॥ ६० ॥

विवदमान इह प्रतिवक्तृ चानुवदतिस्म बलाकमुखान् बुधान् ।
अनुभवत्यथ यावदवेदिषं तदलमेव विशेषविदामिलि ॥ ६१ ॥

बहुतरं त्ववदाम न वस्तुतः किमपि तादृगविद्म तु मैथुने ।
भृशमहं किल भीरुरथापरेऽपि बहवः खलु भीरव आसत ॥ ६२ ॥

मम तु केम्ब्रिजवर्जनतः परं बहुतिथे समयेऽपगतेऽप्यहो ।
समयमात्रकृता मतिरास्त सा नतु मनागपि योगवियोगजा ॥ ६३ ॥

कथमभूदिदमित्यतिदुर्वचं प्रमधुर्ब्रहवः सुहृदस्त्वदः ।
प्रबलमासु दधुः किल कर्षणं न विविदुः परदाररतिष्वघम्॥ ६४ ॥

अहमपीह न पापमवैक्षिषि ध्रुवमरुन्ध न मामिह धर्मदृक् ।
वयमहो बहुधाप्यवदाम यन्मिथुनता सुकृतासुकृतोर्ध्वगा ॥ ६५ ॥

इति गतेऽपि मम त्रपयैकया स्मरविधानविधावरुचेर्वलात् ।
मिथुनभावनिशाचरतो निजः स परिरक्षित इत्यनुचिन्तये ॥ ६६ ॥

अवसरे किल तत्र सलज्जता समभवन्मम रक्षणकारणम् ।
इह च कारणमास्त मदेकता न्यवसमेकल एव हि शैशवात् ॥ ६७ ॥
मम तु जीवनदृष्टिरिहास्फुटाऽप्यभवदेव च भोगपरायणा ।
समुचितैव च सा सति यौवने प्रभवदास्करबाल्टरपेटरे ॥ ६८ ॥
इह सुखानुभवैरथ विश्रमैः सह हि जीवति भोगपरो जनः ।
इति मनः परितोषकरं परं सुवचमस्ति च किन्तु न मां प्रति ॥ ६९ ॥
अहमभूवमहो न तथारुचिर्न च कदाचन धर्मरुचिर्मुहुः ।
सकलधार्मिकशासनबन्धनं न च सहे दमनाय सदोद्यतम् ॥ ७० ॥
सहजमध्यममार्गरुचिस्तदा न गहनं प्रविविक्षुरिहाभवम् ।
नहि शिवं न च सत्यमभूत्प्रियं प्रियमभून्मम सुन्दरजीवनम् ।: ७१ ॥
इह सुचारुतया निजजीवनं गमयितुं मनसाभ्यलषं सदा ।
न खलु ग्राम्यतया पशुवत्तया तदुपभोक्तुमभूत्क्वचन स्पृहा ॥ ७२ ॥
अपितु मद्रुचिरास्त किलोत्तमैः सदुपभोगभरैर्भरिते सुखे ।
अथ च जीवनभोगपरस्य मे न मनुते स्म मनोऽद्यलवं क्वचित् ॥ ७३॥
अपि च साहसभीतिपराणि मां प्रणमयन्ति कृतानि निजं प्रति ।
अभवमेव पितेव किलांशतः कितव एव च चित्तजयादिषु ॥ ७४ ॥
इह च राजनये परिवर्तने भवति वीरतयाऽभ्यलषं युतिम् ।
न च तदा सुखविश्रमयोः स्पृहा समभवत्समरेऽवतितीर्षतः ॥ ७५ ॥
इति समेऽपि समेत्य परस्परं प्रतिमुखाश्च कदापि मनोरथाः ।
मनसि मे कृशरामिव तेऽपचन् भ्रमिमिवाजनयंश्च सरोवरे ॥ ७६ ॥
इदममूदखिलं किल वृत्तवन्न विशदं न च बोधयितुं क्षमम् ।
परमनेन न सोऽस्मि समाकुलः स समयो हि भविष्यगतोऽभवत् ॥७७॥
इति ततः प्रथमं मम जीवने समभवन्मनसा वपुषा सुखम् ।
प्रतिदिनं क्षितिजानि नवानि मे दृगयनं कलयन्ति निरन्तरम् ॥ ७८ ॥
सुबहु कार्यमभूद् बहु दृश्यकं बहुतरञ्च गवेष्यमभूत्तदा ।
इह हि जीवनसिन्धुरनेकथा प्रवहतिस्म नवोद्यमधारया ॥ ७९ ॥
हिममयीरथ दीर्घनिशा वयं सह हसन्तिकया समुपस्थिताः ।
बहुविधाभिरनैष्म कथाभिरागतविचारविमर्शशतैस्तथा ॥ ८० ॥

तदवधि क्रम एष सदाचलद्यदवधि स्म हसन्ति हसन्तिकाः ।
अथ रुदत्य इमा हिमकम्पितानमगयन् शनकैः कुथविष्टरान् ।। ८१ ।।
विवदमानजनैः सह जातुचित्प्रवदतां ध्वनिरुच्चतरोऽभवत् ।
वयमगामं च दीप्तिमपि क्वचित्सहजदीप्तवचःकलहोद्गमे ।। ८२ ।।
कथनमात्रगतं तद्भून्मृषाऽभिनयतो हि धृतात्र गभीरता ।
सपदिजीवनवर्त्मसु खेलया परिगता वितथेष्ववहेलया ।। ८३ ।।
न खलु वास्तविकी हि परिस्थितिर्न च वयं नवचक्रगतास्तदा ।
वचनमात्रगतां नृपनीतिकामरमयाम चिरं रभसोक्तिभिः ।।८४।।
इह महासमरात्प्रथमं वयं सुखमये समये च भवे स्थिताः ।
परमयं समयश्च भवश्च नो झटिति नाशमुपेतुमिवोद्यतौ ।।८५।।
युवजनस्य कृते किल मृत्युदो हृदयवेदनया च भृतो भवः ।
स तु भविष्यदुपावरणे स्थितः कथमिवास्तु दृशामिह गोचरः ।।८६।।
समवभाति यदत्र वयं स्थिराः प्रगतिशीलपरिस्थितिसंवृताः ।
परिगतस्त्विह साधनसम्पदा गणयति स्म जनः सुखदां स्थितिम् ।।८७।।
अहमिहान्ववदं निजभावनाः सपदि भोगसुखादिकनामभिः ।
मयि दिनेषु हि तेषु कृतास्पदा विहितवत्य इमाः प्रभुतां निजाम् ।।८८।।
परमिदं यदि तत्र विचार्यते यदिह तासु तदास्त विचारितम् ।
स्फुटतयाथ बिचारयितुं मया प्रयतनं समपेक्षितमासु वा ।।८९।।
लहरयः किल ता अभवन् स्फुटेतरनिजाकृतयः कृतयः किल ।
मनसि मे सरसीव समुत्थिता व्यदधत प्रभुतां मयि चाङ्किताम् ।।९०।।
न विषयेऽत्र तदास्मि समाकुलो भृतमभूद्धि मनो मम कर्मभिः ।
क्वचन चापि विनोदभरैरिदं विचलितस्त्वभवं यदि केनचित् ।।९१।।
अभवदेतदु भारतवर्षके सपदि राजनये प्रतिकर्षणम् ।
इयमभूत्पठितस्य हि कैम्ब्रिजे मनसि पुस्तकतः प्रभुता स्फुटा ।।९२।।
बहुसभाश्च समाकुलिता तथा भरतभूमिरबाध्यत साऽऽधिभिः ।
पुनरभूद्गदरात्परतस्तु सा स्ववशतासमराय सदोद्यता ।।९३।।
न खलु साभ्युदिता निजमस्तकं नमयितुं पुरतोऽत्र विदेशिनाम् ।
तिलकयत्नजवन्दितयाऽरविन्दयतनेन च वङ्गप्रतिज्ञया ।।९४।।

भुवि विदेशजवस्तुबहिष्कृतादथ च देशजवस्तुपरिग्रहात् ।
विचलताङ्गलदेशनिवासिनामपि मनःस्वभवत्खलु नः सताम् ॥९५॥
तिलकसोष्मदले मिलिता वयं निरपवादतया सकला अपि ।
दर्लमिदं हि तदेदृशनामभिः किल जनैर्व्यपदिष्टमभूद् भुवि ॥९६॥
अभवदेव च काचन गोष्ठिका नृपनयेष्विह ते विवदामहे ।
मजलिसेति पदेन च कैम्ब्रिजे निवसतामपि भारतवासिनाम् ॥९७॥
परमियं वचसां प्रविलासना बहुभिरंशलवैरभवद्वृथा ।
इह जनो विषयावगमे तथा न यततेऽभिनयारमणे यथा ॥९८॥
अहमुपस्थित एव सदाभवं त्रिषु च वत्सरकेष्विह नावदम् ।
ह्रियमिहात्मगतां विचिकित्सितं निरसितुं प्रभवामि न यत्पुरा ॥९९॥
सदसि कालिजगामिनि चाप्यमूं कठिनतामहमन्वभवं सदा ।
अवदतो द्रविणेन च दण्ड्यतामपि चिरादसहे न तु वक्तृताम् ॥१००॥
स्मरति मे हृदयं यदि हैड्विनोऽश्रयत यः किल भारतमन्त्रिताम् ।
सदसि स स्म समेति यदा-तदा ट्रिनटिकालिजशिष्यचरो हि सः ॥१०१॥
स इह संसदि सभ्यतयाऽऽस्थितः प्रतिनिधिः खलु कैम्ब्रिजसंस्थया ।
परिचयः प्रथमं परिभाषया त्वधिगतो मयकोदितश्रद्धया ॥१०२॥
वदति बुद्धिरिदं वितथं यया, तदपि विश्वसितीह जनोऽस्ति सा ।
यदिह तर्ककलाप्युररीक्रियान्न खलु तत्र तया फलमन्धया ॥१०३॥
मयि च विश्वविदालयकैम्ब्रिजे प्रभवति स्म यदध्ययनं परम् ।
तदिह तेषु दिनेषु यथाध्यगात्स्वसमयं च विनिश्चयनं ध्रुवम् ॥१०४॥
अहमपीदमबोधिषि तत्तथाऽभवदिदं हि तदा ध्रुवनिश्चयम् ।
तदधुना न तथास्ति विनिश्चितं न खलु विज्ञपनं लपनं त्विदम् ॥१०५॥
नृपनये विषये त्वधिगोष्ठि वा भरतभूजनुषो निजवाक्सु वा ।
प्रयुयुजुः परुषामथ चोष्णितां गिरमिमे स्वरुषः प्रविकाशिनीम् ॥१०६॥
अथ च वङ्गगता वधकारिणः स्वसहजान् स्म नुवन्ति निरन्तरम् ।
परमनन्तरमैक्षि पदेषु केऽप्यगुरनेकविधास्वनुवृत्तिषु ॥१०७॥
'सिविलसर्विस' सभ्यतयाऽथवोच्चनयाधीशतयाऽथ पदान्तरैः ।
निजनिजासु सुवृत्तिषु तेऽलगन् न निजदेशज-राजनयेषु ते ॥१०८॥

अहह सौख्यगृहेष्वयिताग्निषु प्रविरलैर्निजदेशगतैः क्वचित् ।
नृपनयोत्थमहासमरे तदा परिगृहीत इहार्थकरो ग्रहः ॥१०९॥
भरतभूभवराजनयज्ञकैः सुविदितैरिह कैम्ब्रिजमण्डले ।
वितरितुं निजदर्शनभाषणे प्रविहितः किल कश्चिदनुग्रहः ॥११०॥
वयममीषु समादरशालिनोऽप्यकलयाम निजं सुमहत्तरम् ।
अनुभवो हि मनःसु स नः स्थितो, वयमिहोन्नतसंस्कृतिदृष्टयः ॥१११॥
इति समागतराजनयज्ञकैर्व्यवहृतं विनयेऽप्यभिमानतः ।
विपिनपालमिमेऽशृणुम क्वचिद्धयुपदशेष्वपि योऽयुतदृक् स्थितः ॥११२॥
यदकरोदिह तादृशगर्जनामवगतास्य गभीरगिरा ततः ।
अधिगतं तु विवक्षितमल्पकं न मनसोऽभवदत्र हि संयमः ॥११३॥
अथ स लाजपतिः सविवेकया सरलया च गिरा यदबोधयत् ।
तदभवन्मनसः परितोषणं प्रभवतिस्म हि तन्मयि किञ्चन ॥११४॥
अलिखमत्र दलं जनकाय यज्जयति लालगिरा किल पालतः ।
स समतुष्यदनेन यतोऽस्य स ज्वलितवंगजनः स्म न रोचते ॥११५॥
पुनरकल्प्यत सार्वजनी सभा स समबोधयदत्र च गोखले ।
स्मरति मे हृदयं त्विह भाषणेऽब्दुलमजीदकृतान् बहुप्रश्नकान् ॥११६॥
इह जनो बहुधा स्मरति स्म नो यदुदितं प्रथमं चरमं च किम् ।
अभवदादिमप्रश्नगतश्च कोऽस्य विषयः कतमो विषयः परः ॥११७॥
हरदयाल इह प्रथितोऽभवद् भरतभूजनितेषु स कैम्ब्रिजात् ।
प्रथममेव मदागमनाद् गतोऽभवदिहौक्सफोर्डविदालयम् ॥११८॥
निजहॅरोवसतेर्दिवसेषु तं द्विरवलोकितवानिह लन्दने ।
स समसामयिको न ममाभवत्प्रथमजः प्रथितो मम कैम्ब्रिजे ॥११९॥
परमिहासत तत्समकालिका नृपनये मिलिताः किल येऽग्रतः ।
स किल कॅम्ब्रिजकिञ्चनवासरावधिसखापि च सेनमहाशयः ॥१२०॥
स किचलूमहमूदतसव्वुकाहमदकादिबुधाः समकालिकाः ।
भरतभूमिगराष्ट्रमहासभानुसरणैरिह राजनयं श्रिताः ॥१२१॥
सुलयमानभवन्नयधीश्वरस्तदितरे बहवः सहपाठिनः ।
'सिविलसर्विस' सभ्यतया प्रथामगुरथात्र परे भुवि मन्त्रिताम् ॥१२२॥

अश्रृणुमात्र वयं वत भारतीयभवनं किल रामजिकृष्णकम् ।
न तदपश्यमहं न च तं क्वचिद् दलममुष्य समाजविदोऽबिदन् ।।१२३।।
बहुदिनात्परतोऽधिजिनेविकं तमवलोकितवान् दलनायकम् ।
प्रतिजनं ब्रिटिशेन किलेप्सितं स मनुते स्म हि गुप्तचरं बुधः ।।१२४।।
समुदघाटयदत्र च लन्दने किमपि केन्द्रमिदं भवनं नवम् ।
यदविदं भरतावनिवासिनं सकलपाठिरहस्यसमर्जकम् ।।१२५।।
अवितथञ्च तदस्ति तदर्थिभिश्च सहसा सहनीयमभूदिदम् ।
अनुमतिञ्च विनाऽस्य न कश्चन प्रविशति स्म तु दिश्वविदालये ।।१२६।।
इह च भारतराजनयोऽधिकं पितरमप्यकरोदिह सक्रियम् ।
अहमतुष्यमनेन न सम्मतोऽप्यहह तन्नृपनीतिदृशा चिरम् ।।१२७।।
सहजमास्त च तत्स समन्वितः परिचितेष्वभवज्जनवृत्तिषु ।
सुबहवोऽप्यभवन् सहकर्मिणः पुनरमीषु पितुर्विधिवृत्तयः ।।१२८।।
स कृतवान्निजमण्डलगस्य चाप्यधिपतित्वमहो सदसोऽपि यत् ।
मुहुरयं कृतवान् कटुलोचनामनलवृत्तिजनस्य च जाग्रतः ।।१२९।।
अधिपतित्वमधारयमुत्तरे जनपदे किल राष्ट्रियसंसदः ।
सदसि सूर्यपुरे त्रुटिताऽप्यभूदिह तदा प्रभुता मृदुवृत्तिगा ।।१३०।।
कतिपयाहपरं स च नेविसन्नतिथितामगमत्पितुरन्तिके ।
यदलिखच्च स भारतपुस्तकं पितरि चापि स तत्र लिलेख यत् ।।१३१।।
अतिथिसत्कृतितोऽपरकर्मणामवसरे मृदुवृत्तिरयं त्विति ।
अनुमितं वितथं तदनेन यत्सनिजनीतिमृते न मृदुः क्वचित् ।।१३२।।
प्रकृतिरेनमथाप्यवयिष्ट या मृदुतया विरहं भजति स्म सा ।
प्रखरभावविचारमनोरथाभिमतिभिर्भरितो ह्यभवत्पिता ।।१३३।।
स मृदुवृत्तिजनादतिदूरगोऽप्ययमभुन्मृदुतोऽपि मृदुर्नये ।
अनलवृत्तिषु चैष विरोधभागपि सदा तिलकं स्तुतवानभूत् ।।१३४।।
कथमभूदिदमित्यनुवच्म्यहं विधिविधानमभूदिदमाश्रयः ।
इति सराजनयं यदि तद्दृशा समनुपश्यति तर्हि न विस्मयः ।।१३५।।
स्फुटविचारवता च विनिश्चितं भवति नात्र फलं कटुभाषणैः ।
यदि करोति जनः कठिनश्रमं भवति नूनमसौ तु फलेग्रहिः ।।१३६।।

अपि च देशजवस्तुपरिग्रहैः सह विदेशजवस्तुबहिष्कृतिः ।
सपदि नेष्यति नः कियदग्रतस्त्विति नहि प्रतिभाति पितुः स्म मे ॥१३७।
अपि च सोष्मदलग्रहपृष्ठतोऽवगतराष्ट्रियधार्मिकभावनः ।
प्रकृतितः प्रतिकूलममन्यतानुमनुते स्म च पूर्वयुगोद्धृतिम् ॥१३८॥
न यदवोधदसौ विषयानिमान् प्रति सहानुभवं न कमप्यधात् ।
अरुचिताः पुनरस्य समाजगा विविधजातिगता नवरीतयः ॥१३९॥
इह सतीषु हि तासु समाजगा कथमपीयमुदेति न सैकता ।
भुवि यया विततः स विधीयते व्रजति चापि यया स समुन्नतिम् ॥१४०॥
सजति दृष्टिरसुष्य हि पश्चिमे स्पृहयति प्रति तादृशमुन्नतिम् ।
स मनुते स्म यथाङ्गलसङ्गतः प्रभविता किल भारतकेऽपि सा ॥१४१॥
इह च राष्ट्रियता पुनरुत्थिता परमियं न समाजविकासिका ।
इयमभूत्किल पूर्वंगदेशवत् भरतभुव्यपि धर्ममधिश्रिता ॥१४२॥
नवसमाजदृशा मृदुवृत्तयोऽधिकमिदं कलयन्ति हितावहम् ।
परमिमेऽङ्गुलिभिर्गणिता जनैः सह दधुर्गुरवो न किलान्वयम् ॥१४३॥
न पुनरर्थदृशा च समस्यकाः स्म विमृशन्ति वदन्ति तु केवलम् ।
प्रतिनिधित्वमिहादधतः सदा सपदि मध्यमवर्गविकासकम् ॥१४४॥
शिथिलितं यदि जातिनिबन्धनं निरसिता यदि दूषकरीतयः ।
लघुभिरेभिरमुष्य सुधारणैरिह कृतार्थमिवाकलयन्निजम् ॥१४५॥
इति विचार्य पदाक्रमपद्धतिः सह पिता मृदुवृत्तिभिरास्त तैः ।
अथ च बङ्गजपुण्यजनायकाः प्रवयसोऽप्यभवन् कटुवृत्तयः ॥१४६॥
तदितरेषु पुनर्युवका अभुर्मम पितोद्विजते स्म विचार्य तान् ।
निजमनोऽनुगकर्मविधायकाः शिशव आदधते खलु साहसम् ॥१४७॥
स च विरोधमवेक्ष्य समाकुलस्तमिह सोढुमभून्नहि शक्तिमान् ।
यमवगच्छति मूर्खमयं न तं स्फुटितयापि दृशेच्छति बीक्षितुम् ॥१४८॥
अवसरं प्रतिलभ्य च तेष्वयं सहजमाक्षिपति स्म सविक्रमम् ।
पठितवानिह कैम्ब्रिजतो गतः कमपि लेखमहं पितुरप्रियम् ॥१४९॥
लिखितवानपि धृष्टतया दलं यदिह नास्ति मनागपि संशयः ।
कृतिभिराभिरहो भवतोऽधिकं ब्रिटिशशासनमुल्लसितं न्विति ॥१५०॥

इदमभूत्परुषं पठितं ध्रुवं जनितवत्पितुरत्यधिकां रुषम् ।
मनसि चाप्यकरोत्सहसाङ्गलत: प्रतिनिमन्त्रयितुं गृहमेष माम् ।।१५१।।
इह च कैम्ब्रिजगे मयि चिन्तितं किमधुना चयनीयमहो मया ।
सिविलसर्विसदिश्यपि कल्पनाक्रियत साङ्गलकेऽथ कदाचन ।।१५२।।
परमिमां प्रति नाभवदुत्सुकं मम मनश्च पितुश्च, ततः स्थिता ।
मम वयो हि तदाभवदल्पकं तदुचितेऽथ कृतेऽङ्गपरीक्षणे ।।१५३।।
त्रिचतुराः शरदोऽत्र प्रतीक्षणं खलु मया करणीयमभूतदा ।
अभवमेष हि विंशतिवर्षकोऽधिगतवान् पदवीमिह कैम्ब्रिजे ।।१५४।।
सिविलसर्विसयोग्यमभूद् वयस्त्रिचतुराब्दमितं च ततोऽधिकम् ।
कृतपरीक्षजनेन किलाङ्गलके भवति संवसनीयमिहाब्दकम् ।।१५५।।
स परिवारजनः स्म ममामुनाऽऽङ्ग्लचिरवासहठेन विरज्यते ।
स्पृहयतीह च शीघ्रमहं गृहं प्रति निवृत्तिमिहाकलयानि यत् ।।१५६।।
मम पितेदमपि प्रतिदृष्टवान् यदि भविष्यति आइ. सि. एस्' सुतः ।
स गृहतः परमेव निवत्स्यति प्रतिगृहीततदर्हसुजीविकः ।।१५७।।
सुचिरमेष बहिर्न्यवसद् गृहे वसतु साम्प्रतमित्यभिवाञ्छतः ।
स्म पितराविति कर्मविचारणे जितवदेव कृते मम पैतृकम् ।।१५८।।
इहमिहाभवमद्भुतमेव यन्नृपनयेऽनलवृत्तिदलानुगः ।
अपि स आइ. सि. एस्. पदवी मम ब्रिटिशशासनदास्यमभी ।।१५९।।
यदिदमेव न मह्यमरोचत ब्रिटिशशासनयन्त्र इहावनौ ।
अवयवीभवितुं पुनरस्य यद् व्यमृशमित्यधुना विमृशंस्त्रपे ।।१६०।।
अधिगता पदवीति स कैंब्रिजादगममत्र तु ट्राइपसं तरन् ।
सफलतां परवर्गसमादरामुपगतोऽभ्रममेष च लन्दने ।।१६१।।
प्रविधिशास्त्रसमध्ययने क्रमादुदतरं त्रिपरीक्षणमञ्जसा ।
अधिगतोऽस्मि न मानममानकं स्वसमयो बहुधा व्यतियापितः ।।१६२।।
कतिपयान्यपठं जनपुस्तकान्यथ च फैवियनं प्रतिकर्षितः ।
अपि समाजविचारदिगस्फुटं मनसि मेऽजनयन्निजकर्षणम् ।।१६३।।
प्रयतने पुनरायरदेशजे मम मताधिकृतौ च नतभ्रुवाम् ।
अतिरुचिः समभूदिह सिन्फिनप्रयतने निजकृष्टिरिवाश्रये ।।१६४।।

इह हरस्सुहृदां सहवासिताकृतमतिव्ययशीलमह श्रितः ।
प्रहिणुते प्रचुरं द्रविणं पिता परमितोऽप्यधिकं व्ययते स्म मे ।।१६५।।
इति स मद्विषये बहु चिन्तितो व्यसनिताँ समशेत कुसङ्गजाम् ।
परमभून्न तथा मयि किञ्चन प्रमुखिताङ्गलजनानुकृतेः परम् ।।१६६।
इदमपेक्षितमत्र न लेखितु यदनया वसनादिकसज्जया ।
अफलया सुखमग्नतया च मे न समभूदिह कापि समुन्नतिः ।।१६७।।
शिथिलितं मम साहसमादिमं प्रचयमाप च दर्पभरोऽधिकम् ।
भ्रमितमत्र मया हि युरोपगेषु बहुदेशगणेष्ववकाशिना ।। १६८ ।।
इह निदाघदिनेषु स जेपलिन् नवविमानबलेन सरोवरे ।
फ्रिडरिशादुदडीयत बर्लिनं प्रति तदास्त पितेह मया सह ।। १६९।।
इदममुष्य किलोड्डयनं महत्तममभूदिति तत्र महोत्सवे ।
व्यधित कैसर एव स हर्षभृत् स्वयममुष्य समादरस्वागतम् ।।१७०।।
इह महानभवज्जनसङ्गमः सपदि टेम्पिल आफ' इति स्थले ।
अयममूदधिको दशलक्षतोऽथ च मितः किल विंशतिलक्षतः ।।१७१।।
स नियते समये समुपेत्य नः शिरसि चार्वकरोत्तु परिक्रमाम् ।
अदित चित्रममुष्य तदैडलाभवनवासिजनस्य मनोहरम् ।।१७२।।
तदिह जैपलिनस्य तु चित्रकं लसति चात्र दिनेऽपि मदन्तिके ।
तदनु मासयुगात् पुरि पैरिसे पवनयानमलोक्यत तन्मया ।।१७३।।
यदुदडीयत तस्य नभस्यहो प्रथमतः परितो भ्रमदैफिलम् ।
तदनु चालकनाम मया स्मृतं भवति 'कान्तदलावर' इत्यदः ।।१७४।।
अथ यदा त्वतलान्तिकपारतः शरवदेत्य चमत्कृतिशालि तत् ।
उपरि पैरिसमैक्ष्यत लिण्डवर्ग इति नाम तदासमहं त्विह ।।१७५।।
अधिगतः पदवीमिह कैम्ब्रिजात्सपदि नार्वपुरे भ्रमितुं गतः ।
इह च बालसमान्तरतोऽवितोऽभवमहं महतो जलसङ्कटात् ।।१७६ ।।
भ्रमणतोऽचलशालिपदे वयं श्रमकृतं क्लममाप्नुम पत्तयः ।
लघु निवासपदं समवाप्य च स्नपनमीप्सितवन्त इवात्मनः ।।१७७।।
स्नपननाम न तत्र पुरा श्रुतं न च तदर्थमभूदिह योजना ।
अकथयत्किल कश्चिदिहान्तिके वहति कापि नदीति पुरैव नः ।।१७८।।

स परिधाय मुखाद्यवमर्शकैर्लघुपटैर्लघुवासजनार्पितैः ।
नवयुवाङ्ग्लसखो हिमतालतो निपतदुद्धतनिर्झरिणीं गतः ।।१७९।।
न्यविशमत्र न सा गहनाभवत् परमभूद्धिमिताऽप्यतिपिच्छिला ।
करपदं जडिमानमिहागमत् न च तले स्थितमत्र पदं क्वचित् ।।१८०।।
निपतितः स्खलदङ्घ्रिरहं जडीकृततनुर्हिमशीतलवारिणा ।
प्रवहमान इवोद्धतधारया शरणमत्र न किञ्चिदवाप्नुवम् ।।१८१।।
अथ सखा मम साहसपूर्वकं बहिरगात्तटतश्च किलान्वगात् ।
क्वचन चैष पदग्रहणे ममाभवदलं बहिरानयदेष माम् ।।१८२।।
अवगतं तु तदा पतिता वयं कियति हन्त भयावहसङ्कटे ।
निकटतो हि विशालशिलातटात्पतति सा स्म किलास्य गिरेरधः ।१८३।
अतिभयङ्करमप्यतिसुन्दरं भवति किञ्चिदितीह विलोकितम् ।
प्रपतनं हि जलस्य तदुद्गतं किमपि दृश्यमभूदिह यात्रिणाम् ।।१८४।।
[2]उदतरं स्वपरीक्षणमाङ्ग्लतः शरदि भारतमागतवानहम् ।
[1]न्यवसमत्र किलाध्ययनाय चाहितमतिः किल सप्तसमाः सुखम् ।।१८५।।
द्विरवकाशदिनेषु पुराप्यहं गृहमगां परमद्य समागतः ।
सततवासधिया निजजन्मभूसुखदमञ्जुतमाङ्कमुपाश्रितः ।।१८६।।
भृशमकिञ्चन एव मनोधृतस्वमहिमाभिमतिर्यदवातरम् ।
इह च मोहमयी नगरी मया प्रथमतोऽधिगतावतरक्षणे ।।१८७।।
यन्माता पुण्यशीला शुचिकुलयुगला रुक्मदा हुक्मदेवी
यत्तातो दानतीर्थाटनभजनरुचिः श्रीदुनीचन्द्रवर्मा ।
मीमाँसाकाव्यशास्त्रप्रवचनचतुरो यद्गुरुः कृष्णलालो
निस्तन्द्रोऽमीरचन्द्रोऽनुवदति स कथां मामकीं संस्कृतेन ।। १८८ ।।
अस्ति 'को वेदाधिकारी'तिविचारचारुमनीषया
क्लृप्तं जवाहरलालनेहरुचरितमेतदतिस्फुटम् ।
अस्मिन् हॅरोकैम्ब्रिजसुशिक्षासाक्षिको द्रुतमाक्षिकः
सर्गश्चतुर्थो याति वक्तृत्वाङ्कुरोद्गमशोभनः ।। १८९ ।

देशे राजनैतिकं वातावरणम्

वसन्ततिलकम्

पञ्चमः सर्गः

अत्रागतस्य मम भारतवर्षदेशो
यद्राजनैतिकदृशा शिथिलः प्रतीतः ।
कारागृहे निगडितस्तिलकोऽत्र हेतु-
र्दान्तास्ततोऽनलदलस्य यतः पुमांसः ॥१॥

शान्ता जनाः प्रभवतोऽभवतोऽथनेतु
र्बङ्गोद्गतः स्थगनमाप हि बङ्गभङ्गः ।
संसत्सु चाभिनवयोजनया च मिण्टो-
मार्लेजया खलु जिता मृदुवृत्तयस्ते ॥२॥

आसीत्प्रवासिविषयाभिरुचिर्विशेषा-
दाफ्रीकदक्षिणबिभागनिवासिगेयम् ।
काङ्ग्रेसमप्यरमत तन्मृदुवृत्तिहस्ते
यत्राब्दिको भवति कोऽपि महोत्सवोऽस्य ॥३॥

आसंश्च मन्दशिथिला अलसाश्चकेचि-
त्प्रस्तावकाः प्रमिलितैरिह पारितास्तैः ।
तेनात्र दिश्यपि जनोऽनवधानवान् सन्
स्वातन्त्र्यलाभयतनेषु विरक्त आसीत् ॥४॥

अत्रावकाशदिवसेषु समन्वितोऽहं
वाङ्कीपुरे प्रतिनिधेरधिकारतोऽस्मि ।
किन्तूत्सवोऽभवदयं बहुधाङ्ग्लवेत्तृ-
ष्वुच्चस्तरीयनृगणस्य न भारतस्य ॥५॥

प्राभातिका न विलसन्ति यतोऽत्र कोटाः
सम्यक्स्तरीकृतपटाः पदलूनकाश्च ।
सामाजिकेऽत्र च महे न च लेशतोऽपि
सा राजनैतिकदलस्य धृतोष्मतासीत् ॥६॥

श्रीगोखलेः प्रतिनिवृत्त इहाफरीका
देशादुपस्थितिमधात्प्रमुखातिथित्वात् ।
तेजस्विता सरलता ध्रुवसत्यता च
शक्तिश्च तं परित एव विकाशते स्म ॥७॥

अभ्यागतेषु च स एव गभीरभावा
त्प्रश्नांश्च राजनयिकान् समधात्सधैर्यम् ।
अन्यांश्च सार्वजनिकानपि शोचतोऽस्य
कश्चिन्मदन्तरपतत्प्रबलः प्रभावः ॥८॥

बांकीपुरादथ च तत्र निवर्तमाने
श्रीगोखले नरवरे घटितो विशेषः ।
प्राप्नोत्स वाष्पशकटे स्ववशं प्रकोष्ठं
कांग्रेसकप्रतिनिधिप्रतिपूरितेऽपि ॥९॥

आसीत्सभासद इहैष हि लोकसेवाऽऽ-
योगस्य, वाष्पशकटे प्रथमे स वर्गे ।
एक प्रकोष्ठमधिकारयितुं किलार्हः
सम्मर्दमद्य विषमांश्च जनान् स ऐच्छत् ॥१०॥

कार्यक्रमात्परमयं खलु बिश्रमार्थी
चासीद्वपुष्यनुभवन्प्रकृतेर्विकारम् ।
ऐकान्तिकीं स्थितिमसौ मुनिभावलभ्यां
शान्ति प्रयाणसमयेऽत्र च वाञ्छति स्म ॥११॥

इच्छानुरूपमुपवेशनमत्र शान्ति
चैकान्तिकीं स नृवरो लभते स्म यावत् ।
तावत्स कौंसिलसदस्यतया प्रसिद्धो
भूपेन्द्रनाथवसुरर्थितवान् सहास्याम् ॥१२॥

वाचालतां वसुमहाशयगां स जानन्
पूर्वं क्षणाय चकितोऽभवदर्थनेन ।
पश्चात्स्वभावविवशः प्रणयं तदीय-
मङ्गीचकार 'न महान् कुरुते नकारम् ॥१३॥

भूयोऽप्युपेत्य वसुराह—मदीयमित्र-
मप्येतु किन्तु भवतः स्ववशे प्रकोष्ठे ।
इत्यप्यहो स उररीकृतवान् महात्मा
'नो लज्जते लघुजनः किल याचनासु ॥१४॥

अभ्येत्य मित्रसहितो वसुरेनमाह—
श्रीमन् भवान् समधिरोहतु तावदूर्ध्वम् ।
आवामुभावपि शयेवहि निम्नपीठे'
इत्यप्यसौ सहृदयः सहतेस्म कष्टम् ॥१५॥

वाक्कीलतामहमधामथ सम्यगुच्च-
न्यायालये रुचिमगां निजकर्मतन्त्रे ।
यूरोपतः प्रतिनिवृत्य कियत्सु मासे-
ष्वानन्दमेष परमं प्रथमं प्रपन्नः ॥१६॥

अत्रागतस्य हि पुरातनमित्रवर्ग-
सम्मेलनं पुनरुपाक्रमतातिमोदम् ।
किन्त्वात्मतुल्ययुवभिः सह जीवनस्य
यात्रा शनैरिह शनैर्विरसेव मेऽभात् ॥१७॥

सद्यो जनित्वमगमल्लयमेतदीय-
मुद्देश्यहीनमथ जीवनमत्र भातम् ।
नैष्कर्म्यजासु विरसास्विह कालपूर्ति-
ष्वासीन्मनो मम चिराय विचारमग्नम् ॥१८॥

शिक्षा द्विधात्र कृशरासदृशी मदीया-
ऽसन्तोषमावहति हन्त परिस्थितौ मे ।
आङ्ग्लेषु सप्तशरदर्जितशीलभावा-
स्तुष्यन्ति वस्तुषु न दृष्टिपथं गतेषु ॥१९॥

दवान्मदीयगृहगः परिवेष एष-
त्वासीन्मदीयमनसः शमदोऽनुकूलः ।
किन्त्वास्त नालमियदेव ततः परस्ता-
त्तत्पुस्तकालयसुहृत्क्लबमात्रमासीत् ॥२०॥

प्रत्नाश्च तेऽरुचिकरा विषया विशेषाद्
वाक्कीलतान्वयजुषोऽह्नि चर्चनीयाः ।
नासीदयं मतिगतावुपकारको मे
स्फूर्तौ च हेतुरिति तत्र मनो न लग्नम् ॥२१॥

तत्राहिता विरसता खलु जीवनस्य
यन्मेऽभवत्सपदि मोदविनोदशून्यम् ।
उद्वेगमादधति चेतसि भारतीये-
ष्वाङ्ला इतीदमृजु वानृजु वास्ति सत्यम् ॥२२॥

एतद्व्यलेखि खलु जीवनगाथिकायां
श्रीएमफार्स्टरबुधेन डिकिंसनस्य ।
उक्तोऽस्ति हेतुरयमाङ्गलभारतीय-
मैत्रीपथप्रतिनिबन्द्धृतयामुनेति ॥२३॥

नाश्चर्यमत्र यदि नाम किलैतदेव-
मन्येऽपिहन्त ! बहवोऽनुभवन्ति मन्ये ।
ग्रन्थान्तरे पुनरयं लिखतीह हेतुं
यस्मान्मिथो न सहजो हृदयानुबन्धः ॥२४॥

प्रत्येकमाङ्गलजनो मनुतेऽथ मत्वा-
त्रत्यैः सह व्यवहरत्यपि तद्वदेव ।
यत्सोऽस्ति नाम विजिते विषयेऽधिकारं
कृत्वा स्थितस्य महतोऽत्रि बलस्य योद्धा ॥२५॥

इत्यास्थिते न खलु सम्भवतीदमद्धा
यूरोपभारतगयोरुभयोः सुजात्योः ।
सङ्कोचहीनमथवा सहजं कदाचि-
त्सौहार्दमस्तु बत लम्भितमञ्जुभावम् ॥२६॥

ते वै परस्परपुरः सहजं विहाय
तत्कृत्रिमं कलयतः किमपि स्वरूपम् ।
अन्योन्यतोऽनुभवतोऽसुविधां च काञ्चि-
दित्यत्र सम्भवति हन्त कथन्नु मैत्रम् ॥२७॥

एते पुरोगमनतो भृशमुद्विजेते
प्राप्ते त्वदर्शनसुखे मुदमावहोते ।
श्वासेन च स्ववशताजनितेन तेन
स्वाभाविकीं गतिमिमे पुनरादधाते ॥ २८ ॥

इत्यस्ति सत्यमथ सत्यतरं त्विदं स्या
द्यत्प्रायशो व्यवहरन्ति जनैस्त एकैः ।
येषामिहास्ति खलु शासकवर्गमात्रे
सम्बन्धतः परिचयः सममाङ्गलैस्तैः ॥ २९ ॥

ते वस्तुतो न सुजनैश्च महद्भिरन्यैः
साकं मिलन्ति, मिलितुं न पदं लभन्ते ।
संयोगतश्च मिलितस्य जनस्य तस्य
हार्दं वचः कथयितुं ददते न कालम् ॥ ३० ॥

देशे त्विह ब्रिटिशशासनमेतदारात्
सामाजिकेषु विषयेष्वपि शासकानाभ् ।
एव प्रधानपदवीमददात्सदैव
तत्राङ्गला अपि भवन्त्यपि भारतीयाः ॥ ३१ ॥

एतादृशा भुवि विशिष्टतयैव मन्दाः
सङ्कीर्णचित्तमतयो न भवन्त्युदाराः ।
तेष्वागतोऽतिमतिमानपि चापि योग्य
श्चाङ्गलो युवा पतति मानसतन्द्रिकायाम् ॥ ३२ ॥

तत्रैष मानसिकसांस्कृतिकान्धकारे
स्वान्दोलनैर्विरहितो विशदैर्विचारैः ।
कार्यालये दिनमपि भ्रमतः स्वबुद्धि
पत्रोच्चयस्य निवहे श्रमयत्यनन्तम् ॥ ३३ ॥

ते वै परस्परपुरः सहजं विहाय
तत्कृत्रिमं कलयतः किमपि स्वरूपम्।
अन्योन्यतोऽनुभवतोऽसुविधां च काञ्चि-
दित्यत्र सम्भवति हन्त कथन्नु मैत्रम् ॥२७॥

एते पुरोगमनतो भृशमुद्विजेते
प्राप्ते त्वदर्शनसुखे मुदमावहोते।
श्वासेन च स्ववशताजनितेन तेन
स्वाभाविकीं गतिमिमे पुनरादधाते ॥ २८ ॥

इत्यस्ति सत्यमथ सत्यतरं त्विदं स्या
द्यत्प्रायशो व्यवहरन्ति जनैस्त एकैः।
येषामिहास्ति खलु शासकवर्गमात्रे
सम्बन्धतः परिचयः सममाङ्गलैस्तैः ॥ २९ ॥

ते वस्तुतो न सुजनैश्च महद्भिरन्यैः
साकं मिलन्ति, मिलितुं न पदं लभन्ते।
संयोगतश्च मिलितस्य जनस्य तस्य
हार्दं वचः कथयितुं ददते न कालम् ॥ ३० ॥

देशे त्विह ब्रिटिशशासनमेतदारात्
सामाजिकेषु विषयेष्वपि शासकानाम्।
एव प्रधानपदवीमददात्सदैव
तत्राङ्गला अपि भवन्त्यपि भारतीयाः ॥ ३१ ॥

एतादृशा भुवि विशिष्टतयैव मन्दाः
सङ्कीर्णचित्तमतयो न भवन्त्युदाराः।
तेष्वागतोऽतिमतिमानपि चापि योग्य
श्चाङ्गलो युवा पतति मानसतन्द्रिकायाम् ॥ ३२ ॥

तत्रैष मानसिकसांस्कृतिकान्धकारे
स्वान्दोलनैर्विरहितो विशदैर्विचारैः।
कार्यालये दिनमपि भ्रमतः स्वबुद्धि
पत्रोच्चयस्य निवहे श्रमयत्यनन्तम् ॥ ३३ ॥

उत्थाय चायममुतः स्वसमाजलोकैः
साकं क्लबे मिलति चालपते च किञ्चित् ।
पीत्वात्र मोहमदिरां मदिरां च किञ्चि-
त्साप्ताहिकं पठति वाङ्गलवृत्तपत्रम् ॥ ३४ ॥

तत्रापि चित्रनिचये रममाणचेताः
सोऽयं क्वचित्स्पृशति पुस्तकमप्यहो ! किम् !
तद्वा पठत्यपि पुरातनमेव किञ्चि-
च्चित्तेप्सितं न तु नवं जनयत्प्रबोधम् ॥ ३५ ॥

इत्थङ्गतेऽपि निजमानसिकेऽतिमन्दे
ह्रासे वदन्ति किल भारतमेव हेतुम् ।
निन्दन्ति चास्य जलवायुमयं प्रपञ्च-
मान्दोलनं विदधतश्च जनान् शपन्ति ॥ ३६ ॥

जानन्ति चाप्यसुविधोपचये निदान
तत्कृत्स्नमेव न तु किञ्चिदिहात्मवृत्तम् ।
पश्यन्ति मानसिकसांस्कृतिकक्षयस्य
नैते च कारणमिहानुचरप्रवृत्तिम् ॥ ३७ ॥

तां स्वैरिणीमिह च शासनरीतिमेतां
यस्यास्तु सन्त्यवयवाः स्वयमेव ते ते ।
हाहा विलोकयति मुग्धजनो गिरिस्थं
वह्निं न तु स्वचरणाग्रगतं ज्वलन्तम् ॥ ३८ ॥

आस्तेऽवकाशफरलान्तरमप्यमीषा-
माङ्गलप्रशासनभृतां विषमा दशेयम् ।
तद्भारतीयजनशासकसेवकानां
का नाम सास्तु भुवि शस्यतरा प्रतिष्ठा ॥ ३९ ॥

ये नूनमाङ्गलनिदर्शनकानुसारे-
णैवाधिकान् विदधते विविधान् प्रयत्नान् ।
साम्राज्यराजनगरी नवदेहलीय-
मध्यासिता भवति यत्र दिवानिशं तैः ॥ ४० ॥

श्रृण्वन्ति शासकजनान्तिकतो निविष्टा-
स्तेषां पदोन्नतिविसृष्टिपदान्तराणाम् ।
उत्कोचकग्रहण-भ्रष्टचरित्रतानां
भृत्योच्चयस्य च कथा जनितव्यथा स्ताः ॥ ४१ ॥

सामान्यतः सकलभारतवर्तिमध्य-
श्रेणीकविश्वजनजीवनमेतयैव ।
आक्रान्तमस्ति खलु शासकशास्यवृत्त्या-
ङ्ग्लाधीतिनामतिशयेन विरञ्जितञ्च ॥ ४२ ॥

वाक्कीलद्राक्तरमुखा अपि वृत्तिमन्त-
स्तस्या भवन्ति मृगयाविषया विशेषात् ।
मुम्बापुरीप्रभृतिसन्नगराणि हित्वा
सर्वत्र वृत्तिरियमावृणुतेद्य लोकम् ॥ ४३ ॥

अर्धप्रशासनिकतत्तदनेकविश्व
विद्यालया अपि तया न भवन्ति मुक्ताः ।
सर्वेऽपि ते च पृथगेव वसन्ति नैजे
लोके न ये जनतयाऽन्वयमत्र यान्ति ॥ ४४ ॥

सम्बध्यते स्म नृपनीतिरियं तदोच्चै
र्लोकैरिमां स्थितिमकल्पयदेव वङ्गे ।
आन्दोलनेन खलु मध्यमवर्गतोऽपि
नीचैस्तथा जनतया सह राजनीतिः ॥ ४५ ॥

नेतृत्वमाप्य भुवि गान्धिमहात्मनस्तु
सोऽग्रेसरिष्यति जवेन किल क्रमोऽयम् ।
प्राणप्रदं सदपि राष्ट्रिययुद्धमेत-
त्सङ्कीर्णमेव समयं कमपि व्यनक्ति ॥ ४६ ॥

स्वस्मिश्च शक्तिमियतीमधिकामियच्च
ध्यानं निकाममधिकं प्रतिकर्षतीदम् ।
तत्तत्र युक्तपुरुषस्य न शिष्यतेऽद्धा
कार्यान्तरौपयिकमत्र च किञ्चनापि ॥ ४७ ॥

प्रत्येत्य चाङ्ग्लविषयात्परितोषहानिं
प्रारम्भिकेषु दिवसेषु किलान्वभूवम्।
वाक्कीलकर्मणि समुल्लसितं न चेत-
स्तद्राजनीतिमपि तावदबोधदेवम् ॥ ४८॥

आन्दोलनं भवतु राष्ट्रियमुग्रमेकं
वैदेशिकाद्यदिह शासनतो विरुद्धम्।
इत्यस्य यत्र च न कश्चिद्योग आसी-
देतादृशी समभवद् भुचि राजनीतिः॥ ४६ ॥

कांग्रेससभ्यपदवीमुपगम्य तस्य
गोष्ठीषु गन्तुमपि तावदुपाक्रमेऽहम्।
देशे विदेशविषये च तदादृतेषु
यत्नेष्वहं भजितुमभ्यलषञ्च भागम् ॥ ५० ॥

फिज्यामहो भरतभूश्रमिकोच्चयेन
साकं विधेयपणबन्धविधेर्विरोधे।
भूयश्च भारवहरीतिविरोधकाले
ऽफ्रीकाप्रवासिषु च दुर्व्यवहाररोधे॥ ५१ ॥

एवंविधेष्वबसरेषु यदात्र किञ्चि-
दान्दोलनं चलति तर्हि यथात्मशक्ति।
तस्मिन्नयूयुजमहं कृतवांश्च पूर्णं
तत्र श्रमं नियमितप्रसरेषु तेषु॥ ५२ ॥

चित्तं विनोदयितुमादृतवान् कदाचि-
न्नासक्तितस्तु मृगयासदृशं प्रयत्नम्।
यानं वहिर्घनवनेष्वटनञ्च मह्यं
तद्रोचते स्म न तु वन्यवधेऽवधानम् ॥ ५३ ॥

नाहञ्च वन्यहतये प्रथितः कदाचि-
त्काश्मीरगाम्यवधिषं सहसर्क्षमेकम्।
उत्साहवेशमविशेषमहं व्यहासं
केनापि विक्षतकुरङ्गकदर्शनेन ॥ ५४ ॥

तस्मिन्निरागसि लघीयसि मत्पदाग्रे
वाष्पाम्बुपूरितदृशौ मयि सन्दधाने ।
प्राणाञ्जिहासति दया हृदयं मदीयं
तत्स्फारलोचनपुनःस्मरणैर्दुनोति ॥ ५५ ॥

आस्तामिहादिमसभासु मनो मदीयं
श्रीगोखलेसमितिमध्यमगमद्विकृष्टम् ।
वाक्कीलकर्मणि रतेन विनम्रनीतौ
संयोक्तुमत्र न मया विहितो विचारः ॥ ५६ ॥

अस्याः सदस्यनिचयं प्रति मानसे मे
मानो महान् समभवत्प्रविचिन्त्य शीलम् ।
यो गेहवानपि किलात्र शरीरयात्रा
मात्रोपयोगि तनुवर्तनतुष्ट आसीत् ॥ ५७ ॥

चेतस्यभूत्समितिरस्ति किलेयमेका
यैकाग्रचित्तजनसन्ततकर्मजुष्टा ।
तत्कर्म साधु न भवेदिह सर्वथैव
साध्वी तु तत्प्रति सदस्यगणस्य निष्ठा ॥ ५८ ॥

व्यापी महासमर आरभतात्मसर्गं
तस्मिन्नपि व्यवहितेऽवहिता अभूम ।
पूर्वं न कोऽपि पतितो मनसि प्रभावो
बीभत्सतामननुभूतवतां तदीयाम् ॥ ५९ ॥

नाला वहन्ति घनकालभया अनेके
लीना भवन्ति सुतरामिह राजनीतेः ।
रक्षाविधानमभवद् ब्रिटिशावनार्थं
रक्षाविधिः स इव कोऽपि बबन्ध देशम् ॥ ६० ॥

युद्धाद् द्वितीयशरदि प्रथितैरुदन्तैः
षड्यन्त्रगोलिककथाः परितोऽस्फुरंस्ताः ।
पञ्चाम्बवीयविजये नवरङ्गचीर-
सङ्गीरसङ्ग्रहणं च बलवच्छ्रुतिमागतं नः ॥ ६१ ॥

उच्चैरिहालपति भूपतिभक्तिरागं
काञ्चिद दधाति ममतां व पुराङ्गरेजैः ।
तेषाँ पराभवकथामु न खिद्यतेऽसौ,
हर्षं तु जर्मनजयेन जनः प्रयाति ॥ ६२ ॥

नो जर्मनीष्वपि मनीषितमस्ति किञ्चिद्
गोरप्रभोस्तु गुरुगर्वनिरास इष्टः ।
दुष्टे हि पुष्टवपुषि प्रविताड्यमाने
हृष्यन्ति दुर्बलजना असहायिनश्च ॥ ६३ ॥

अस्मासु चापि समरं प्रतिमिश्रितास्ते
भावा भवन्ति भुवि यावदिति प्रतीमः ।
राष्ट्राणि यानि समरं व्यदधुस्तमेषाँ
फ्रांसीसिभिर्मम सहानुभवस्तदासीत् ॥ ६४ ॥

राष्ट्रैः सुहृद्भिरिह यस्त्रपया विहीनैः
काचित्प्रसारसरणिः पुनराश्रिताभूत् ।
तस्याः प्रभावमपहन्तुमलं न जाता
अस्मद्विवेकविधयो बहुधापि नीताः ॥ ६५ ॥

भूयोऽपि राजनयिकं मम जीवनं त
न्मन्दं च मन्दमसरत्किल कालयोगात् ।
कारागृहाद् बहिरगात्तिलकोऽथ होम-
रूलार्थिका समितिराधटितेह तेन ॥ ६६ ॥

वासन्तिकी कृतवती समिति तदर्थां
तत्राहमासमुभयत्र नियोजितात्मा ।
कार्यं परार्थमधिकं कृतवान् दिनैस्तै-
र्मञ्चेऽत्र राजनयिके त्वियमत्यरोहत् ॥ ६७ ॥

काङ्ग्रेसवार्षिकमहेषु महोऽपि वृद्धं
तेनैव साकमपि मुस्लिमलीग आगात् ।
विद्युच्चमत्कृतिरभूत्परितोऽपि लोके
यूनां मनाँसि च परिस्फुरितानि भूयः ॥ ६८ ॥

आशासते स्म महते महते फलाय
वासन्तिकीनियमनाद् भृशमुत्सहन्ते ।
देशेऽखिलेऽपि नवजीवनमार्पिपत्सा-
प्यान्दोलने सपदि सेवितहोमरूले ।। ६९ ।।

ते होमरूलसमिती न पुराणतीव्र
वर्ग्या विशन्ति पृथगासितकाङ्क्षरेसाः ।
मध्यस्तरेष्वपि जनेषु भृशं नवीना
अभ्यागता विविधकार्यकरा युवानः ।।७० ।।

साधारणीं न जनतां स्पृशिकर्मपात्री-
मेते व्यधुः कतिपये त्विह माडरेटाः ।
अग्रेसरन् कतिचनैषु निवृत्तिमाप्ताः
केचिच्च यावदगमन् स्थगितास्तदन्ते ।। ७१ ।।

एष स्मरामि कृतवद् ब्रिटिशं च योरो
पीयाभिरक्षणबलेन समं यदत्र ।
तद् . भारतीयपरिरक्षणसैन्यमासी-
च्चर्चास्पदं सपदि मध्यमवर्गसृष्टम् ।। ७२ ।।

किन्त्वेतदांशिकतया व्यवहारभेदो
ऽवज्ञाय नः स्म जनयत्यतिमात्रखेदम् ।
यावच्च नैष निरपैति न तावदत्र
योगः प्रदेय इति नोऽभिमतं बहूनाम् ।। ७३ ।।

भूयोविवादसमनन्तरमत्र युक्त-
प्रान्तेऽभ्यमन्यत समैः सहयोगदानम् ।
यूनां कृते हितमिदं किल सैन्यशिक्षा-
संरक्षणं स्थितिषु नूनमिहेदृशीषु ।।७४ ।।

इत्याकलय्य च समर्थितमेतदारा-
दात्मार्थमप्यहमदां विनिवेदनञ्च ।
युक्तेश्च वृद्धिमभिलष्य वयं प्रयागे
काञ्चिन्नवां समितिमाकलयाम तत्र ।। ७५ ।।

वासन्तिकीनियमनञ्च तदैव जातं
क्षुब्धेन तेन च मया समितेरमुष्याः ।
संशोधितं तदधिवेशनमाग्रहेण
पित्रादिनेतृवरवर्गमहो प्रसाद्य ।। ७६ ।।

अस्यैव दृङ्नियमनस्य विरोधनाय
रक्षार्थसैन्यविषयेऽपि तटस्थभावम् ।
आलम्ब्य कार्यमखिलं स्थगितं तदीय-
विज्ञापनं तदिदमर्थकमप्यकाशि ।। ७७ ।।

मन्ये किलात्र समरस्य दिनेषु तादृग्
आक्रामकं क्रमणमीक्षितवन्त एके ।
पश्चात्तपन्त्यपि पुरा परिणामतस्तु
पित्रादयोऽप्यनुगता इह होमरूलम् ।। ७८ ।।

मासैः कियद्भिरधिकैरिह माडरेटै
र्लीगाददायि सहसा च विसृष्टिपत्रम् ।
आसीत्पिता तु तदनन्तरमप्यमुष्य
लीगस्य सभ्य इति चापि सभापतिश्च ।। ७९ ।।

मन्दञ्च मन्दमगमज्जनकोऽपि माड-
रेटस्थितेः परतरं प्रकृतिर्हि तस्य ।
सत्तामुपेक्षितवतीं च जुगुप्समानां
माने दमे न मनुते विनिवेदने च ।। ८० ।।

प्राचीननम्रदलनायकवृन्दमेनं
वृन्दारकं स्वनिकटे क्षमते न नेतुम् ।
तेषाँ गिरश्च भृशमाकुलचेतसं तं
कुर्वन्ति कार्यकरणानुगरीतयश्च ।। ८१ ।।

वासन्तिकीदृगवबन्धनतः पिता मे
भूयः प्रभावित इति प्रमुदं भजेऽहम् ।
किन्त्वग्रतः क्रमणमेव विधातुमद्या-
प्यन्यो यथा समकुचत्समलज्जताथ ।। ८२ ।।

प्रायोऽवदच्च दिवसेषु स तेषु नूनं
किञ्चिन्न सेत्स्यति कृतं भुवि माऽडरेटैः ।
यावन्निरैष्यति न हीयमितश्च हिन्दू-
मुस्लिम्भिदा न यतनं सफलं च तावत् ॥ ८३ ॥

एतत्समाहितिरिहास्तु यदि प्रक्लृप्ता
तर्ह्यस्मि तीव्रतरसङ्घिसमक्रमः स्याम् ।
एतत्प्रतिश्रुतमनेन तदर्थमेष
काग्रेसलीगयुगलैक्यसमर्थकोऽभूत् ॥ ८४ ॥

अस्मद्गृहे विरचितं किल योजनं य-
न्मञ्जूररीकृतमिदं किल काङ्ग्रेसे ।
अत्रैव लक्ष्मणपुरे परमां प्रसत्ति
प्राप्तः पिता मिलितयत्नपथप्रपत्त्या ॥ ८५ ॥

तस्मिन् क्षणे स सखिभिः किल माडरेटैः
प्रत्नैरपि श्रयितुमुद्यतते विरोधम् ।
नूत्नैश्च साकमिह यातुमभूत्समुत्कोऽ-
स्माभिः किलैक्यबलसत्फलमीक्षमाणः ॥ ८६ ॥

मांटेग्युएडविनभारतमन्त्रिणात्र
वीक्षार्थमेव भ्रमितं भुवि यावदासीत् ।
तावत्पिता मम समभ्रमदत्र माड-
रेटैः समं शममगान्मतभेदखेदः ॥ ८७ ॥

यातः किलैडविन इत्यधिगत्य मत्यो-
रैक्यं निरस्तमभवच्च मुहुः स भेदः ।
जाता च लक्ष्मणपुरे पुनरेव काचि
त्प्रान्तीयसंसदिह चाधिपतिः पिताऽभूत् ॥ ८८ ॥

अत्रैव भेदमभजच्च स माडरेटै-
रात्यन्तिकं मनसि कल्पनयैव भीतैः ।
संसत्करिष्यति विरोधमियं हि मांटे
व्यूचेन्सफोर्डकृतसंस्तुतिप्रस्तुतीनाम् ॥ ८९ ॥

इत्याद्रियन्त नहि तां कृतबोधकर्शाः
काांग्रेसवेशनमपीदमनाद्रियाणाः ।
काङ्ग्रेसतश्च तदिदं दिवसावधीमे
माड्रेटकाः पृथगवस्थितयो भवन्ति ॥६० ॥

ते चाद्रियन्त यमिमं क्रममत्यभद्रं
काङ्ग्रेसवेशनवहिष्करणानुरूपम् ।
साधारणोत्सवपदादपि दूरवृत्त्या
स्वं दृष्टिकोणमपि ते न पुरो दधन्ते ॥ ६१ ॥

जाते तथा बहुमतेन समं विरोधे
पक्षं स्वकीयमिह ते नहि दर्शयन्ति ।
एष क्रमोऽस्त्यनुचितः सुतरामभद्र-
श्चाभाति मे सकलविज्ञजनस्य चापि ॥ ६२ ॥

देशस्य राजनयतो विगतप्रभावाः
प्रायः स्थिता यदिह सम्प्रति माडरेटाः ।
तस्यास्य हेतुरियमस्ति च भीरुतैव
श्रीशास्त्रिणैव समदर्शि च वीरता नः ॥ ६३ ॥

सोऽयं भवन्नपि निरन्तरमाडरेट-
नेता सदा सममिलत्सकलोत्सवेषु ।
माड्रेट्बहिष्कृततरेष्वपि चैकतोऽसौ
स्वं दृष्टिकोणमदिशद्विभयो विशङ्कः ॥ ६४ ॥

प्रारम्भिकीषु च रणस्य शरत्सु कार्या
ण्यासन्नराजनयिकानि ममोद्धुराणि ।
साधारणीषृ च सभासु सुरक्षितोऽहं
व्याख्यानदानभयतो व्यचरं विशङ्कः ॥ ६५ ॥

तावत्सभासु जनतां प्रति भाषणे मे
सङ्कोचहेतुरभवत्परमा त्रपैव ।
तत्कारणं किमपि चैतदभूद्यदाङ्ग्ल-
भाषा न सार्वजनिकीषु सभासु युक्ता ॥ ६६ ॥

सन्देहवानथ भवामि चिराय हिन्दु-
स्थान्या गिरा प्रवचने निजयोग्यतायाम् ।
अद्यापि मे स्मृतिपथं न जहाति वृत्तं
यद्भाषितं प्रथमतो मयका जनेषु ॥ ९७ ॥

या मुद्रणालयमुखान्यपिधातुमेकं
क्लृप्तं विधानमुपरोद्धुमुपाश्रिताऽभूत् ।
संसत्तु सार्वजनिकी महती प्रयागे
तस्यामभाषिषि मनाक् श्रित आङ्ग्लभाषाम् ॥ ९८ ॥

सप्रूश्च मां जनसमक्षमचुम्बदालि
ङ्गन्वक्षसा प्रणयतः सह साधुवादैः ।
तस्यास्य हर्षविषयोऽयमभून्नवोऽयं
व्याख्यानदोऽस्त्यधिगतो घटकः किलेति ॥ ९९ ॥

कालेऽत्र सार्वजनिकानि हि भाषणानि
कार्यं महत्किमपि विश्वजनीनमासीत् ।
काङ्ग्रेसकार्यकरणाय किलैष सप्रूः
सम्भावितोऽभवदिहत्ययुवोच्चयेन ॥ १०० ॥

तत्राभवन् कतिपये किल माडरेटा-
स्तेष्वेक एव स जनैरनुशंस्यते स्म ।
आसीत्स भावुक इति क्वचनापि काले
सोत्साहवीचिनिचये वहतीति हेतोः ॥ १०१ ॥

तस्याग्रतो मम पिता त्वतिशीतलोऽभाद्
विभ्रत्पटान्तरितमन्तरुदग्रमग्निम् ।
इच्छादृढत्वमनुवीक्ष्य पितुर्निराशा
आशासते स्म युवकाः समयाय प्रप्रूम् ॥ १०२ ॥

निःसंशयं मदनमोहनमालदीयो
दीर्घैः स्वसार्वजनिकाचरणैः प्रियोऽभूत् ।
तं प्रैरयाम बहुधा बहुभिर्वचोभि-
र्यद्देशनेतृपदकर्म जवात्करोतु ॥ १०३ ॥

तस्मिन्ननेहसि न राजनयस्य चर्चा
प्रश्नेषु वा तदुदितेषु न वादमात्रम् ।
कर्तुं गृहे स्थितवतामवकाश एव
नासीच्च शान्तिविषयानपि वा विवक्तुम् ॥ १०४ ॥

यन्मे च सोष्मदलमेव विरोचते स्म
तत्रापि मे पितुरभूदवधानमेकम् ।
वाचालराजनयदूषणतर्कजाते
कालेषु चाग्रहमयीषु मतार्थनासु ॥ १०५ ॥

न स्पष्टमेतदवभाति ममापि ताव-
त्कार्यं किमत्र नु भवेदिति मत्पिता तु ।
चेतस्यचिन्तयदयं युवकोऽत्र साक्षा
द्धिंसात्मकानि यतनानि समाश्रयन् स्यात् ॥ १०६ ॥

वङ्गीयवीरयुवकैः कलितानि यानि
तानि प्रति क्वचन मे न रुचिः किलासीत् ।
तूष्णीं तु सोढु मपि न प्रभवामि वर्त
मानां स्थितिं किमपि तद्विदधीमहीति ॥ १०७ ॥

आसीन्ममाभिलषितं बत राष्ट्रदृष्ट्या
साफल्यमत्र सुलभं प्रतिभाति नो मे ।
आत्मात्मदेशविषयाभिमतं विदेशि-
शिष्टिं विरोद्धु मुचितं मनुते नियुद्धम् ॥ १०८ ॥

सत्यं पिता स्वयमपीह न माडरेट-
कार्यक्रमैः किमपि तोषमभिव्यनक्ति ।
तस्यापि चान्तरधिकं कलहायते स्म
द्वन्द्वं हठात्तु सहते स्म स सर्वमेतत् ॥ १०९ ॥

यावन्न विश्वसिति यत्करणीयतोऽस्मा-
दन्यास्ति नो गतिरिति श्रयते न तावत्-
अन्यां स्थितिं, स्थितिमहो न जहाति पूर्वा-
मेकेन याति चरणेन परेण तिष्ठन् ॥ ११० ॥

किन्त्वग्रतश्चरणविन्यसनात्तु पूर्वं
द्वन्द्वं भवेन्मनसि चोग्रमुदग्रमस्य ।
द्वन्द्वात्परं तु विहितस्य पदक्रमस्य
स्यादङ्गदीयपदविन्यसनोपमत्वम् ॥ १११ ॥

नोत्साहवेगमवलम्ब्य पदं स धत्ते,
धत्ते च यत्तदचलं सहसा विधत्ते।
विश्वासमाश्रयति बौद्धिकमेष कार्ये
प्रत्यागतिञ्च मनुते निजमानभङ्गम् ॥ ११२ ॥

वासन्तिकोनियमनात्परमस्य राज-
नीतौ स्म चैति परिवर्तनमत्र बाह्यम् ।
यन्माडरेटसुहृदः प्रविहाय पृष्ठे
सोऽगात्पश्चात्पदमिहाग्रसरः क्रमेण ॥ ११३ ॥

पञ्चाम्बवीयकरुणामयकाण्डतश्च
खिन्नः स सर्वमजहान्नवलं पुराणम् ।
आन्दोलनेन सह गान्धिसमेधितेन यातो
निबद्ध्य सुदृढं निजभाग्यसूत्रम् ॥ ११४ ॥

पूर्वं ततः सुचिरमेव विचारमग्नः
कार्यस्य निर्णयविधौ यतमान आसीत् ।
शङ्का हि चेतसि चिरं विविधा उदैयु
श्चिन्ताश्चमत्कृतिरभूदिह मत्कृतेऽपि ॥ ११५ ॥

प्रश्नेषु सार्वजनिकेषु च शान्तिपूर्ण-
मालापमेव न हि कर्तुमभूत्प्रभुर्यत् ।
वार्तासु रोषमदधादिति तत्र तासा
माकालिकं तदवसानमुपास्यते स्म ॥ ११६ ॥

दृष्टो मया प्रथमतो महतां दिनानां
विश्रान्तिषु श्रुतमहामहिमा स गान्धिः ।
दक्षाफरीकविषये खलु निर्बलाना
मुद्धारणे नवरणे धृतवीरभावः ॥ ११७ ॥

कांग्रेससंसदि तटस्थ इव प्रतीय-
मानः स लक्ष्मणपुरे नृपनीतितोऽपि ।
त्यक्त्वा हि सर्वमयमास्त किल प्रवासि-
सद्भारतीयहित साधनसीम्नि बद्धः ॥ ११८ ॥

तस्मात्परं निलहगोरगणेन चम्पा-
रण्येऽभिनिपीडितकृषाणगणस्य दुःखात् ।
त्राणं विधाय महता नवसाहसेन
प्राप्तो जयो युवसु नूत्नबलं भृतञ्च ॥ ११९ ॥

अस्माभिरीक्षितमयं किल भारतेऽपि
रीत्या तयैव निजया प्रतिकर्म कर्तुम् ।
अस्त्युद्यतस्तमनुवीक्ष्य च तत्प्रयत्ने
स्वाशासते सफलतापि न दूरगास्मात् ॥ १२० ॥

कांग्रेसतः परमतश्च सरोजिनी सा
सम्यञ्चि यत्प्रवचनान्यकरोत्प्रयागे ।
तानि स्मरामि हृदयं खलु तैर्मदीयं
प्रस्पन्दते स्म चलति स्म च धावति स्म ॥ १२१ ॥

पूर्णानि राष्ट्रियतयाऽथ भृतानि देश-
भक्त्यादितोऽन्तमनु तानि मम प्रियाणि ।
आसं हि तेषु दिवसेषु विशुद्धराष्ट्र-
वादी च राष्ट्रियतयार्द्रितमानसोऽहम् ॥ १२२ ॥

कालेजकालजनिताः खलु साम्यवाद-
भावाः क्वचिद्विगलिता अभवन् विलुप्ताः ।
श्रीरोजरः समदिशन्निजभाषणेऽस्मान्
भावा भवन्तु परवत्सु जनेषु के ते ॥ १२३ ॥

जाता पुनर्विफलतापि गुरुः किलाय-
र्लेण्डोत्थविप्लवभवाऽदिशदेकमर्थम् ।
आकर्षदेव च मनो महसास्मदीयं
प्राकाशयच्च परमास्तिकदर्शनोक्तम् ॥ १२४ ॥

यो निश्चितां विफलतां हसतीह विश्वे
सोद्घोषयत्यमर एष तु राष्ट्रियात्मा ।
तत्कायिकं बलमलं नहि मर्दितुं वा
जेतुं कदाचिदिति साहसमस्ति सत्यम् ॥ १२५ ॥

आसन्निमे मम च तेषु दिनेषु भावा
अङ्गारकाः स्म पठनादितरे ज्वलन्ति ।
ये साम्यवादविनिवेदकपुस्तकेषु
प्रायः पदे प्रतिपदे निहिता भवन्ति ॥ १२६ ॥

भावा इमे समभवन्नपरिस्फुटाश्च
वैज्ञानिकाः पवनजाश्च दयोदिताश्च ।
काले रणस्य तदनन्तरमप्यभुर्मे
श्रीवर्टरंडरसलस्य समस्तलेखाः ॥ १२७ ॥

इच्छाभिराभिरथ चाप्यसुकैर्विचारैः
सङ्घर्ष एत्युपचयं तु पुरान्तरं मे ।
वाक्कीलकर्मविरतिश्च गतातिवृद्धि
यद्यप्यदोऽचलदनन्यगतेस्तदापि ॥ १२८ ॥

अस्त्येकतस्तु सविशेषविधं सुकार्य-
माक्रामकं प्रियमशेषजनोपकारि ।
वाक्कीलवृत्तिरियमस्ति तथान्यतस्तद्
द्वन्द्वं कथं निवहतामिति चान्वभूवम् ॥ १२९ ॥

सैद्धान्तिको न खलु कोऽपि विकल्प आसी-
च्छक्तेस्तथा च समयस्य च प्रश्न आसीत् ।
जानामि नैष सररासविहारिघोषः
कस्मान्मयि प्रमुदितो गुरुप्राड्विवाकः ॥ १३० ॥

मह्यं स चात्र विषये शुभसम्मतिं स्वां
दत्ते स्म सोऽत्र समयेऽप्यददान्मतिं मे ।
यद्रोचमानविषये विधिमूलके त्वं
किञ्चिल्लिखेह नवपुस्तकमेव पूर्वम् ॥ १३१ ॥

अस्त्येष एव नवलस्य कृते प्रशिक्षा-
प्राप्तिप्रकार इति चापि च शिष्टवान्माम् ।
तल्लेखने मम विचारविशेषसाह्यं
संशोधने च मतिमान् प्रतिसंश्रृणोति ॥ १३२ ॥

वाक्कीलजीवनविधौ रुचिरस्य सा मे
व्यर्थाऽभवद्रुचिलवोऽपि हि तत्र नाभूत् ।
अस्मात्परं च नहि कष्टकरं ममासी
द्यत्पुस्तिकां विरचयामि विधिप्रदेष्ट्रीम् ॥ १३३ ॥

तस्यां स्वशक्तिमपि कालमपि व्ययेय-
मित्यादि किञ्चिदपि मे न हि रोचते स्म ।
यद्यप्यसौ मनसि रासविहारिघोषो
रोषोद्धुरोऽनुगतभीतिकरश्च मेऽभात् ॥ १३४ ॥

तन्न्यूनता अपि च दुर्बलता अपीमा
नाकर्षिका मम न जात्वभवन् प्रतीताः ।
पित्रा सहाधिशिमलं त्वतिथित्वमाप्त
स्तद्गेहमभ्यगममेष कदापि रम्यम् ॥ १३५ ॥

माण्टेग्युवो विवरणञ्च तदैव मुद्रा-
प्योद्घाटितं समभवत्तदिति स्मराभि ॥
तत्रैकदा स कतिचित्सुहृदोऽपि भोक्तु-
मामन्त्रयत्तदिह खापरडेः समागात् ॥ १३६ ॥

अध्यासितेषु च सुहृत्स्वथ भोजनान्ते
घोषः स खापरडया सह तारतारम् ।
सम्भाषते स्म पुनराक्रमते स्म सोऽस्मिं
स्तौ राजनैतिकदलीयदृशा हि भिन्नौ ॥ १३७ ॥

घोषोऽभवद्धि धुषितो भुवि माडरेटो
ऽन्यः शिष्यतां स्म दधते तिलकस्य साक्षात् ।
श्रीगोखलेर्ब्रिटिशगुप्तचरः किलासी-
दित्यादिनिन्दनमयं समुपाक्रमच्च ॥ १३८ ॥

तत्सह्यतां कथमनेन, ततो विरोधो
घोषेण तस्य रभसेन सहाभ्यदर्शि ।
श्रीगोखलेर्मम तथा पुरुषोत्तमस्य
मित्रं किलाभवदमुष्य सहे न निन्दाम् ॥ १३९ ॥

श्रीश्रीनिवासमपि निन्दति यावदेष
घोषो न दर्शयति तत्र विरोधलेशम् ।
स्पष्टं स तत्र न तथा प्रणयं बिभर्ति
श्रीगोखलेप्रणयतः समितिं दधाति ॥ १४० ॥

अन्ते प्रशंसति च खापरडेः सलोक-
मान्यं महापुरुष एव स नूनमासीत् ।
आश्चर्यकारिपुरुषस्तिलको महात्मा,
निःसंशयं भरतभूतिलकः सदात्मा ॥ १४१ ॥

इत्युक्त आह पुनरेव स घोष एवम्-
आस्ते महात्मसु ममातितरां प्ररोषः ।
नाहं महात्मभिरिहाभिलषामि बन्धम्'
इत्यस्ति लोकवदनं सदनं स्ववाचाम् ॥ १४२ ॥

रसकल्पतरुशीतलघनच्छायानिविष्टेनामुना
रचितं जवाहरलालनेहरु चरितमिदमति चारुकम् ।
तत्रैष देशे राजनैतिकवायुमण्डलमण्डनः
सर्गः प्रपञ्चमयो गतः किल पञ्चमः कौतुककरः ॥

हिमालयस्यैका घटना

शार्दूलविक्रीडितम्

षष्ठः सर्गः

माङ्गल्या किलदेहलीति नगरी वासन्तिकी पञ्चमी
चोद्वाहो मम यत्र नाम समभूत्सोत्साह-साढयोत्सवम् ।
मासा ग्रीष्मऋतोस्ततः कतिपये काश्मीरके यापिता
न्यस्तं श्रीनगरे कुटुम्बकमथो द्रष्टुं गिरिं निर्गतः ।। १ ।।
सोऽहं सङ्गचलत्पितृव्यतनयः सप्ताहसङ्गं गिरौ
भ्राम्यन्नग्रसरेण तेन च सरंल्लद्दाखमार्गं गतः ।
संसारस्य समुन्नतेऽपि शिखरे सङ्कीर्णतां शून्यतां
पश्यन्नेष उपत्यकासु जडतामज्ञासिषं व्यापिनीम् ।। २ ।।
एता यान्ति त्रिविष्टपस्थलमिह भ्रान्तेर्ममेयं नवा
पूर्वा पूर्वतरानुभूतिरभवद्धर्षप्रकर्षावहा ।
जोजीलाशिखरस्थितैर्हरितिमा दृष्टो घनस्त्वेकतो
दिश्यन्यत्र दृषच्चयोऽतिकठिनो दृष्टः पुरोऽनावृतः ।। ३ ।।
सङ्कीर्णं स्तरमेव कञ्चन समारूढौ गिरिभ्यां वृतं
श्रृङ्गाण्यत्र हिमावृतानि च चमत्कुर्वन्त्यवैक्षावहि ।
तेभ्यश्चावतरन्त्यहो हिमझरा आलिङ्गितुं बालवद्
वातः शीततरः शितश्च दिवसे भात्यातपः किन्त्वसौ ।। ४ ।।
वाते निर्मलताबलान्निकटगे दूरस्थितस्य भ्रमो
मन्दं मन्दमवर्धत प्रचलतो दृष्ट्यग्रगा शून्यता ।
वृक्षा ओषधयो जहुः सविधतां नग्ना दृषत्सञ्चया
नीहाराश्च हिमाः स्थिताः क्वचिदहो रम्याणि पुष्पाण्यपि ।। ५ ।।
सन्तोषं प्रकृतेर्गृहेष्वधिगतः शून्येषु वन्येष्वपी-
त्युत्साहस्य किलावधिर्न समभान्नैवापि हर्षस्य मे ।
यात्रायामिह किन्तु कोऽप्यनुभवो हृत्कम्पको मेऽभवत्
जोजीलास्थलतोऽग्रमेव सरतोर्मात्रायनादग्रतः ।। ६ ।।

केनाप्युक्तमितोऽष्टमीलपरतः काचिद्गुहा राजते
यस्याञ्चामरनाथदर्शनसुखं भक्तैः किलावाप्यतें।
मध्येमार्गमिहातिमात्रहिमवानायाति पार्यों गिरिः
कित्त्वेतेन किमष्टमीलनिमितेनाप्यन्तरेणापि किम् ॥ ७ ॥

उत्साहस्तु महानभूदनुभवाभावोऽपि भूयानभूत्,
आवां तत्पटमण्डपादि सकलं त्यक्त्वा पुरः प्रस्थितौ।
साहाय्यार्थमभूद्दलं लघुतरं, प्रक्रान्तमारोहणं
मार्गं दर्शयितुं किलाग्रसरताऽजापालकस्यार्पिता ॥ ८ ॥

रज्जूनामवलम्बनेन हिमिता नद्यस्तु तीर्णाः सुखं
किन्त्वस्मासु परम्परा निपतिता तत्रापदां काचन।
श्वासोच्छ्वासविधावपि प्रतिपदं क्लेशोऽनुभूतिं गतः
केषाञ्चिद्भरवाहिनां च वदनाद्वान्तं द्रुतं शोणितम् ॥ ९ ॥

धारापातमथापतद्धिममपि प्रायश्च मार्गा हिमा-
च्छन्नाः पिच्छिलतां गता वयमपि श्रान्ता नितान्तं तदा।
एकैकं पदमक्रमाम महता यत्नेन चेत्थङ्कृते-
ऽप्येतन्मौढ्यमहो विहातुमुचितं धृत्वैव चाग्रे गताः ॥ १० ॥

एते द्वादशहोरया प्रचलिताः प्राप्तास्तया वेलया
कञ्चिद् दीर्घतरं तदा हिमसरोरूपोपहारं नवम्।
दृश्यं दृश्यमिदं मनोहरमभूत्तत्पार्श्वतः सर्वतः
शृङ्गैर्व्याप्तहिमैस्तु पर्वतचयश्चन्द्रार्धमाकल्पयत् ॥ ११ ॥

देवानां मुकुटोपमस्य सुषमा सद्यः पतद्भिर्हिमै-
र्नीहारैश्च झटित्यहो नयनयोरध्यक्षमस्त्याहृता।
कामत्रोन्नततां श्रिता वयमिति ज्ञातं न मे तत्त्वतः
किन्त्वास्मामरनाथमन्दिरगुहातोऽत्युच्च एव स्थले ॥ १२ ॥

एतस्यैव सरोवरस्य परतस्तीरादधोगामिना
मार्गेणोक्तगुहां प्रयातुमधुना यत्नो विधेयोऽभवत्।
किन्त्वारोहणसम्पदाथ विपदां जातो विरामोऽधुने-
ति ध्यात्वा वयमत्रगामिसरणौ सर्तुं पुनः प्रोद्यताः ॥ १३ ॥

किन्त्वासन् बहवो दरा इह हिमैर्भव्यैः समाच्छादिता
एकस्मात्तु दराद्धिमे व्यपगृतेऽहं धम्मिति प्रापतम् ।
योऽयं चापसरन्नसून्मम किलापासारयिष्यत्क्षणा-
द्रज्जुश्चेन्मम हस्ततो निरसरिष्यत्सोऽद्धा गृहीतो दृढम् ॥ १४ ॥

अस्मिन्दीर्घतरे दरेऽतिगहनेऽत्यन्तं किलाधोगतं
भूगर्भागमशास्त्रिणां मृगयतां लक्षाब्दगम्यं भवेत् ।
रज्ज्वालम्बनमेव मे निपततः प्राणानरक्षद्यथा
दृष्टं काशकुशावलम्बनमिहागाधे जले मज्जतः ॥ १५ ॥

मामाकृष्य जनैरहं यममुखादाराद्दराद्रक्षितः
संज्ञा नः शिथिलाभवद् घटनया चैवानया सर्वथा ।
संज्ञास्वेतवतीषु चेतनतया भूयोऽन्वितास्ते वयं
स्वीयं वर्त्म समाश्रिताः पुनरपि स्वस्था इव प्रस्थिताः ॥ १६ ॥

सङ्ख्यायामभिवृद्धिमेषु च दरेष्वालक्ष्य तल्लङ्घने
चैवापेक्षितसाधनानधिगमात्प्रत्यागता वर्त्मतः ।
श्रान्ताः क्लान्तकलेवरा वयमथो दृष्ट्वैव तां सद्गुहाम्
देवस्यामरनाथनामकशिवस्यादर्शकेषु स्थिताः ॥ १७ ॥

काश्मीरस्य महीधरैरथ च तच्छृङ्गैरिहोत्तुङ्गकै-
र्मुग्धीकृत्य जितो मुहुः सकृदहं गन्तुं समुत्कण्ठितः ।
क्लृप्ताः काश्चन योजना अथ कृता यात्राभिलाषाश्चिरं
तेष्वेकस्य विचिन्तनेन न मुदां सीम्ना मम स्थीयते ॥ १८ ॥

सा चेयं महिते त्रिविष्टपगते लोकोत्तरे मानसे
कैलासे च हिमावृते निकटगे यात्रा मदीयाभवत् ।
वार्ताष्टादशवार्षिकी पुनरियं चाद्यापि कैलासत-
स्तस्मान्मानसतश्च पूर्ववदहं हा हन्त ! दूरे स्थितः ॥ १९ ॥

काश्मीरं न पुनर्गतो, जिगमिषा तत्रास्ति मे भूयसी,
व्यस्तो राजनये च सार्वजनिके कार्यप्रपञ्चेऽभवम् ।
गिर्यारोहण-सागरोत्तरणयोः स्थाने रुचिं भ्रामरीं
कारागारगृहेष्वहं व्यनुनुदं सन्तोषमन्तः श्रयन् ॥ २० ॥

सत्याग्रहोऽमृततसरसञ्स

मन्दाक्रान्ता

सप्तमः सर्गः

यूरोपीये महति समरे दान्त उत्साहलेशो
देशे व्याप्तः, प्रतिपदमहो यन्त्रशालाः प्रवृत्ताः ।
लक्ष्मीवन्तः प्रगतिमगमन्वित्तसत्ताधिकारे
मालामाला इह कतिपये चाभवन्मूर्धसंस्थाः ॥ १ ॥

लाभाल्लोभोऽभवदतितरामित्यहो लाभवित्तं
लाभाल्लाभान्तरविमितये योजयिष्यन्त आहुः ।
वृद्धि यायात्समरसमयो येन भूयो महार्थैः
पण्यैर्गण्यैरपि वयमगण्यां श्रियं प्राप्नुयाम ॥ २ ॥

सामान्यानां क्व नु भवति तद् भाग्यमेतादृशं, ते
भाराक्रान्ताः क्षणिकलघुतां प्रार्थयन्ते स्म तस्मात् ।
आशा चैषा प्रसरति पुरा मध्यमानां स्वराज्ये
शुद्धा शिष्टिध्रुवमधिकृतीर्दास्यते नश्च वृद्धिम् ॥ ३ ॥

वैधं चान्दोलनमपि मनाक्सिद्धिमृच्छत् प्रतीतं
विश्वासेन स्ववशिमनि ते चर्चयन्ति स्वराज्यम् ।
दृश्यन्ते स्म क्वचिदपि जने वै कृषीकर्मयुक्ते-
ऽशान्तेश्चिह्ना अपि बत बलाद्यत्र सैन्यप्रवेशः ॥ ४ ॥

ग्राम्यक्षेत्रे बलवदपि यः सैनिकानाँ प्रवेशः
पञ्चापेऽभूत्तदतिकठिनं वृत्तमेके स्मरन्ति ।
षड्यन्त्रैर्या दमनरचना वाभियोगेन कोमा-
माटागारूवसतिषु तथान्येषु चाभूत्प्रयुक्ता ॥ ५ ॥

तेनाप्येषा रुडिह वितता सर्वतो वर्धितासी-
त्स्थाने स्थाने समरपदतः पूरुषा ये निवृत्ताः ।
तेऽपीदानीमभयपदवीं प्राप्य तां 'जीहजूरीं'
त्यक्त्वा ज्ञात्वाधिकमनुभवञ्चाप्य जाता अशान्ताः ॥ ६ ॥

अद्याप्येष मनोरथान् विरचये तत्रोपगन्तुं नवान्
सा ह्यानन्दकथास्ति यां यमयितुं शक्ता न कारा अपि।
कारास्वीदृशचिन्तनादथ ऋते कश्चिन्तयेदन्यथा
लोके हन्त मनोरथाह्वयरथः सर्वत्र चङ्क्रामति ॥ २१ ॥
स्वप्नं तस्य दिनस्य पश्यति मनो यस्मिन्नहं साग्रहं,
प्रत्यारुह्य हिमालयं निजबलादुल्लङ्घिताहेऽद्भुतम्।
कैलासस्य च मानसस्य च मुदा कृत्वा पुनर्दर्शनं
सम्पूर्णं स्वमनोरथञ्च सफलं कर्तास्म्यदो जीवितम् ॥ २२ ॥
तीव्रं धावति हन्त जीवनघटी, पर्येत्यहो जीवनं
वृद्धोऽत्यन्तमहं न गन्तुमिह वा शक्ष्यामि तत्रापि वा।
यात्रान्तं न मिलेत्तथापि परमाह्लादस्तु यात्रापथे
यातॄणां भवतीत्यहो सुलभतां यात्रापथो यातु मे ॥ २३ ॥
अस्मच्चित्तपटे पतेदि्गरिशिरश्छाया मनोज्ञा चिरं
येषां दुर्गमतापि भीषणतरा सान्ध्यैः सुमैरञ्जिता।
प्राणाश्चापि विमुग्धलोचनदलासीना भवन्त्याकुलाः
शान्तं शुभ्रहिमं पिपासव इमे पश्यन्ति मत्ता इव ॥ २४ ॥

हितकल्पतरुरचनायशःसितलेखनीलिखितं महा-
कायं जवाहरलालनेहरुचरितमिह जीवातुकम्।
तत्र'कापि हिमालये घटना 'घटत' भयदायिनो-
मेतां श्रितः सर्गोऽत्र षष्ठो याति विरतिं विस्मयात् ॥

सत्याग्रहोऽमृततसरसञ्स

मन्दाक्रान्ता

सप्तमः सर्गः

यूरोपीये महति समरे दान्त उत्साहलेशो
देशे व्याप्तः, प्रतिपदमहो यन्त्रशालाः प्रवृत्ताः ।
लक्ष्मीवन्तः प्रगतिमगमन्वित्तसत्ताधिकारे
मालामाला इह कतिपये चाभवन्मूर्धसंस्थाः ॥ १ ॥

लाभाल्लोभोऽभवदतितरामित्यहो लाभवित्तं
लाभाल्लाभान्तरविमितये योजयिष्यन्त आहुः ।
वृद्धि यायात्समरसमयो येन भूयो महार्थैः
पण्यैर्गण्यैरपि वयमगण्यां श्रियं प्राप्नुयाम ॥ २ ॥

सामान्यानां क्व नु भवति तद् भाग्यमेतादृशं, ते
भाराक्रान्ताः क्षणिकलघुतां प्रार्थयन्ते स्म तस्मात् ।
आशा चैषा प्रसरति पुरा मध्यमानां स्वराज्ये
शुद्धा शिष्टिध्र्ुवमधिकृतीर्दास्यते नश्च वृद्धिम् ॥ ३ ॥

वैधं चान्दोलनमपि मनाक्सिद्धिमृच्छत् प्रतीतं
विश्वासेन स्ववशिमनि ते चर्चयन्ति स्वराज्यम् ।
दृश्यन्ते स्म क्वचिदपि जने वै कृषीकर्मयुक्ते-
ऽशान्तेश्चिह्ना अपि बत बलाद्यत्र सैन्यप्रवेशः ॥ ४ ॥

ग्राम्यक्षेत्रे बलवदपि यः सैनिकानाँ प्रवेशः
पञ्चापेऽभूत्तदतिकठिनं वृत्तमेके स्मरन्ति ।
षड्यन्त्रैर्या दमनरचना वाभियोगेन कोमा-
माटागारूवसतिषु तथान्येषु चाभूत्प्रयुक्ता ॥ ५ ॥

तेनाप्येषा रुडिह वितता सर्वतो वर्धितासी-
त्स्थाने स्थाने समरपदतः पूरुषा ये निवृत्ताः ।
तेऽपीदानीमभयपदवीं प्राप्य तां 'जीहजूरीं'
त्यक्त्वा ज्ञात्वाधिकमनुभवञ्चाप्य जाता अशान्ताः ॥ ६ ॥

तुर्किस्तानेऽप्यसहयुजि वा मुस्लिमैर्या प्रवृत्तिः
प्रत्यादर्शि प्रथितमनयाप्यत्र रोषेण लोके ।
तीव्रञ्चान्दोलनमिदमभूत्सन्धिपत्रे च तुर्कि-
स्तानाक्लृप्तेऽधिकृतिरकरोन्नापि हस्ताक्षराणि ॥ ७ ॥

किन्त्वाभाति क्वचिदकुशलं भावि किञ्चिज्जगत्यां
तस्मादान्दोलनमपि कृतं तैः कृतापि प्रतीक्षा ।
कृत्स्ने देशेऽवहत पवनः कश्चिदाशाप्रतीक्षा-
रूपश्चिन्ताभयपरिवृतः किन्तु सोऽभूदपूर्वः ॥ ८ ॥

पश्चाद्वेगोऽचलदिह परो रौलटस्रोतसोऽपि
यस्मिन्न्यायालयमपि विना वन्दिता दण्ड्यताऽभूत् ।
हिन्दुस्थाने दिशि दिशि रुषां वीचयः स्वागतेना-
सन् सत्कार्या अकृषत बलान्माडरेटा विरोधम् ॥ ९ ॥

हिन्दुस्थाने सकलदलगाः सर्ववादानुगाश्चा-
कार्षुस्तेषां मिलितबलतः सर्वभावाद्विरोधम् ।
येन स्रोतस्तदिह विलयं प्राप्तवत्किन्तु शिष्टैः
शिष्टैः शिष्टैरियमपसरैरन्यथाकारि धारा ॥ १० ॥

सौविध्यं चाभवदिह परं तत्त्रिवर्षावधित्वं
तस्या क्लृप्तं परमिह न सा क्वापि कार्यान्विताऽभूत् ।
पूर्वं चैतेष्वपि किल विलेष्वक्रियन्तैव चिन्ता
हेतोरेषां हलनचलनं चात्र यत्तत्प्रभूतम् ॥ ११ ॥

तस्मिन् कार्यः सपदि विबुधैर्दृष्टिपातः फलाढ्यो
यस्येदानीं व्ययमुपगता पञ्चयुक्ता दशाब्दी ।
रोलेटैक्टेऽभिमतिमयितेऽप्यस्य धारानुसारि-
ण्यब्दे काले क्वचिदपि कृतः केनचिन्नोपयोगः ॥ १२ ॥

यद्यप्येतान्यशमभरितान्येव वर्षाण्यभूवन्
यादृश्यासन् क्वचिदपि परं विप्लवान्न प्रतीतात् ।
इत्थं लोकानभिमतबिलं कल्पयित्वोपयोगं
तस्याकुर्वद् ब्रिटिशहृदयं शान्तिभङ्गं विधत्ते ॥ १३ ॥

स्पष्टं चास्माद्बिलविरचनात्सर्वकारो विदेशी
सोऽस्मद्देशे विहरति सुखं देशदुःखान्यजानन् ।
दुःखाभावे रचयति तथा च प्रपञ्चं यथायं
शान्तेर्भङ्गाद्विकलकरणं रौतु तुष्यत्वसौ च ॥ १४ ॥

अन्यच्चैकं श्रृणुत कुतुकं, पञ्चयुक्ताद् दशाब्दा-
दस्मात्पश्चादपि कतिपयीर्निर्ममे न्यायधाराः ।
वर्तन्ते या अनुदिनमितो रौलटैक्टात्कठोरा
येषामग्रे त्ववशिमशुभो भाति सोऽयं म्रदीयान् ॥ १५ ॥

एषामेवेशिमवशिमनि प्राप्तवन्तो महान्तं
शिष्ट्यानन्दं ब्रिटिशप्रभुतानुग्रहस्यानुरूपम् ।
सा मैण्टेग्यूचमसरचनापि स्वराज्यांश एव
प्राप्तो भूयादपर इह च श्रूयते कश्चिदंशः ॥ १६ ॥

गान्धी रोगादतिविषमतो मुक्त एपार्थिथत्तं
वायस्रायं खलु बिलमिदं मैतु धारात्मकत्वम् ।
याञ्चामेनामयमितरवन्मोधयंस्तं प्रतीपे
स्वास्थ्येऽप्यान्दोलनविरचनायाकरोद्धन्त बाध्यम् ॥ १७ ॥

आसीदान्दोलनमिदमहो भारतेऽयापि चाद्यं
यस्मै सत्याग्रहपरिषदं सोऽप्युपाक्रामदेकाम् ।
अस्मल्लग्नं न हि बिलमिदं स्वीकरिष्याम इत्ये-
तस्याः सभ्यान्व्रतमिदमयं ग्राहयामास सर्वान् ॥ १८ ॥

अर्थादेतैः प्रकटितमिदं ग्रामकारागृहेषु
न त्वेतस्यानुसरणमिमे क्वापि कुर्वीमहीति ।
वृत्तं चैतत्पुनरधिगतोऽहं यदा वृत्तपत्रात्
सन्तोषो मेऽभवदतितरां तर्हि बुद्ध्वा भविष्यम् ॥ १९ ॥

अन्ते पन्था अयमाधिगतोऽस्याः समस्यापिशाच्याः
शस्त्रं चैकं ध्रुवमधिगतं रामबाणेन तुल्यम् ।
अस्याक्रान्तिः सरलसुगमा स्पष्टरूपा भवित्री-
त्युत्साहो मां झटिति मिलितुं प्रैरयत्तत्सभायाम् ॥ २० ॥

किन्त्वस्यैतां परिणतिमहं न्यायभङ्गेन कारा-
गारावेशादिकमनवधानात्तदा नाभ्यपश्यम् ।
पश्यन्नेनामपि न हृदि कामप्यपेक्षामधास्यं
ह्यासीदस्मिन्पथि मम पितोत्साहभङ्गस्य हेतुः ॥ २१ ॥

स ह्येतादृङ्नियमविगमात्सर्वथा तद्विरुद्ध
इत्याध्यायन्निह तमजहां दुर्गमं स्वेन मत्वा ।
नूत्ने नूत्ने वहति न मनागेष प्रस्ताववेगे
पूर्वं ध्यात्वा परिणतिमयं तत्र धत्ते स्म पादम् ॥ २२ ॥

प्रश्नान् कार्यक्रममपि पिताऽचिन्तयद्यावदस्य
तावत्तस्योपरतमभवन्मानसं तत्प्रयोगात् ।
केषाञ्चित्स्यादिह मतिमतां बन्दिभावोऽपि तेन
को लाभः स्यादथ च निपतेच्छासने कः प्रभावः ॥ २३ ॥

इत्येतेभ्यः पृथगपि मम व्यक्तिगोऽप्यत्र कश्चि-
त्त्वासीद्धेतुः स हि मम यथार्थोऽत्र बाधः प्रमेयः ।
कारागारं प्रविशतु सुतस्तस्य कस्यापि हेतो-
रित्येतन्मेऽसहत न पिता, मन्यमानोऽवमानम् ॥ २४ ॥

कारागारे गमनमिह नो तावदारब्धमासी-
त्तस्यारम्भः कथममि पितुर्नेष्ट आसीत्तदानीम् ।
गूढप्रेमा मनसि, वचसा कर्मणा तं निगूह्य
स्नेही मोही प्रणयपरवानेष बालेषु चासीत् ॥ २५ ॥

जानीवो यन्महदिह किमप्यर्पणीयं कदाचिद्,
येनास्माकं सपदि भविता जीवनं व्यस्तमेतत् ।
अन्योन्यस्योक्तिषु च हृदये सावधानः सदाऽऽसं
माभूद्धेतोरिह मम पितुः क्लेशलेशोऽपि कश्चित ॥ २६ ॥

इत्येते मन्मनसि सहसा पित्रपेक्षाविचाराः
प्रादुर्भूता व्यथयितुमिव त्वेकतश्चान्यतश्च ।
विश्वासोऽयं त्यजति च मनो यन्मया केवलेन
गन्तव्यं स्यादविकलपथेनास्य सत्याग्रहस्य ॥ २७ ॥

द्वन्द्वं चित्ते मम बहुतिथं कालमेतत्प्रवृत्तं
प्रस्तावोऽथं सपदि विपदे त्वावयोरेकदा स्यात् ।
काश्चिद्रात्रीर्व्यपनयमहं विक्लवश्चिन्तयंस्तं
कश्चिन्मार्गो भवतु सुखदो येन निर्यामि चेति ।। २८ ।।

पश्चादज्ञासिषमहह यन्मत्पिता भूमिशय्या-
भ्यासं कुर्वन्ननुभवति तद् बन्दिभावस्य दुःखम् ।
जानीताऽसौ यदयमचिराद्वा चिराद्यास्यतीदं
कारागारं किमिह स च तत्कष्टमीशीत सोढुम् ।। २९ ।।

श्रीमान् गान्धिः स च मम पिताऽमन्त्रयद्यत्प्रयागे
यच्चैतेनालपदिह चिरं तत्र नाहं तदासम् ।
पश्चात्पृष्टः सममनुत मां, मास्म भूः सत्वरस्त्वं
मा तत्कार्षीर्भवति किल यत्त्वत्पितुश्चाप्यसह्यम् ।। ३० ।।

इत्यादेशादनिशमगमं त्वेष दुःखानुभूते-
स्तस्मिन् काले घटितघटनास्तु प्रशान्तिं ममादुः ।
देशावस्था विनिमयमगाद् येन कार्यक्रमं स्वं
तत्रारौत्सीत्सपदि च सभा सापि सत्याग्रहार्थम् ।। ३१ ।।

आसीत्सत्याग्रहदिनमिदं यत्र सर्वत्र देशे
सर्वं कार्यं स्थगितमभवत्प्रासरन् हारितालाः ।
दिल्लीपुर्याममृतसरसेऽहम्मदावादमध्ये-
ऽकार्षुः सैन्यैः सह पुरजनास्ते भुशुण्डीप्रयोगम् ।। ३२ ।।

प्राणांस्त्यक्ता इह बहुजनैर्गोलिकाभिः क्षताङ्गै-
र्हिंसा जाता त्वमृतसरसाहम्मदावादयोः सा ।
हत्याकाण्डो हृदयदलनः सैन्यकानूनभीष्मो
जल्यांवालोपवनविषये चावमानप्रधानः ।। ३३ ।।

पञ्चापोऽभूत्पृथगिव कृतोऽसौ प्रदेशान्तरेभ्य-
स्तस्मिन् काचिद्घनजवनिका पातिताऽभून्नटैश्च ।
बाह्यं विश्वं किमपि न दृशा द्रष्टुमेतस्य शक्तं
वृत्तं चास्यासुलभभवन्निर्गमश्च प्रवेशः ।। ३४ ।।

एकदा ये नरकसदृशादागतास्तत्प्रदेशाद्
भीतास्तेऽपि स्फुटमकथयन्दुष्कथां तद्व्यथानाम् ।
बाह्याश्चैते वयमतितरां निःसहायासमर्थाः
क्षोदीयस्या अपि चिरमभूत्सूचनायाः प्रतीक्षा ॥ ३५ ॥

अस्मच्चित्ते व्यवहृतिरियं प्राबिभस्ताँ जुगुप्सां
गन्तुं चोत्का अपि कतिपये सैन्यकानूनभङ्गात् ।
एतत्कर्तुं न समनुमता, दुःखिनाँ पीडितानां
साहाय्यार्थं घटितमभवत्तत्र कांग्रेसशेषम् ॥ ३६ ॥

प्रत्यावृत्ता जनपदविशेषाद्यतः सैन्यसत्ता
गन्तुं बाह्या इममधिकृतास्तर्हि काँग्रेसमुख्याः ।
पञ्चापेऽगुः स्वपरिचरणाः शोधसाहाय्यकार्ये
दत्तास्तैस्तैरधिकृतजनैः स्नेहसम्मानपूर्णैः ॥ ३७ ॥

साहाय्यार्थं सदयहृदयो पण्डितो मालवीयः
श्रद्धानन्दो यतिरपि गतौ तत्र तौ दुःखितानाम् ।
शोधार्थं च प्रमुखपदभाङ्मत्पिता, देशबन्धु
श्चासीद् गान्धिः सुरुचिमदधात्सर्वथा सर्वकार्ये ॥ ३८ ॥

अन्ये प्रायो व्यदधुरमुना सत्परामर्शचर्चां
भागं चागादमृतसरसं देशबन्धुः सदासः ।
साकं तेनाहमनुगतयाऽऽसं नियुक्तः सहायः
कार्यं कर्तुं प्रथमभलभे तं प्रसङ्गं तदानीम् ॥ ३९ ॥

मह्यं चायं ध्रुवमनुभवो मूल्यवान् कश्चिदासी-
त्तं प्रत्यासीन्मम मनसि चैवादरस्यातिरेकः ।
जल्यांवालोपवनसविधाद् वीक्षितं यत्र सर्वे
लोकाः सर्पा इव जठरतो गन्तुमासन्निदिष्टाः ॥ ४० ॥

हत्याकाण्डान्वितजनवचांस्यस्मदग्रेऽङ्कितानि
पश्चाच्छोधात्मकविवरणे तान्यहो मुद्रितानि ।
तेषां सायं स्वयमुपगतैस्तत्र साक्षात्कृतं तत्
प्रत्येकं च स्वयमवहितैर्वस्तु तच्छोधितञ्च ॥ ४१ ॥

'एड्वर्डो थामसन' इह यड्डायरस्यास्य पक्षा-
द्युक्तिं प्रादाद्यदिह जनरल् डायरो मन्यते स्म-
जल्यांवालोपवनविषये द्वारमन्यत्किलास्ति
यस्मादेते बहिरुपवनाद्गन्तुमर्हन्ति लोकाः ॥ ४२ ॥

अस्माद्धेतोः सततमकरोद् गोलिकावृष्टिमेष
इत्येतच्चेद् तमुपवने द्वारमन्यद्यदि स्यात् ।
तेनाप्यस्योत्तरवितरणा क्षीयते हीयते नो
किन्त्वाश्चर्यं कथमयमसद्द्वारसत्ताममंस्त ॥ ४३ ॥

अस्यन्ते वै तडिति तडिति प्रोज्जवा गोलिकास्ताः
पात्यन्ते ते चटिति चटिनि प्रद्रुवन्तो मनुष्याः ।
मार्गाभावाद्दिशभुपगता भित्तिकाया वराका-
स्तत्राप्येतानवधिषुरिमे प्लायमानानगत्या ॥ ४४ ॥

यस्मिन्नुच्चैस्तरनरपदे डायरोऽयं स्थितोऽभूत्
तस्मिन् स्थित्वाखिलमपि पदं वीक्षितुं शक्त आसीत् ।
उच्चैरुच्चैस्तदथ भवनैः सर्वथा रुद्धमास्ते
तत्रैकत्राभवनविवृता भित्तिकास्ते नरोच्चा ॥ ४५ ॥

इत्येतत्तैर्विचितवचनैर्भित्तिसंस्थैश्च चिह्नैः
स्पष्टीभूतं खलु शवगणैर्भित्तिपार्श्वद्वयस्थैः ।
अत्याचारान् कथयति कथं डायरस्थास्य जिह्वा
येषां लेखे स्फुटति हृदयं नायसी लेखनीयम् ॥ ४६ ॥

तद्वर्षान्तेऽमृतसरसतो रात्रियन्त्यात्र रात्रौ
दिल्लीमेतुं कृतमतिरहं यत्प्रकोष्ठं प्रविष्टः ।
स्थानान्यस्मिन्नहह सकलान्यासुरन्यैर्वृतानि
किञ्चित्स्थानं तदुपरितनं रिक्तमध्यासितोऽहम् ॥ ४७ ॥

सुप्ता आसन्निह खलु समे प्रारुत्थाय सर्वे
तारं तारं ध्रुवमपसराः सैनिकास्तेऽब्रुवन्त ।
तेषामेको विजयमदतस्तीव्रमेवालपद्यत्
तस्मादज्ञासिषमहमयं डायरः कायरोऽस्ति ॥ ४८ ॥

जल्यांवालोपवनविषये भाषमाणेन तेन
प्रोक्तं सर्वं नगरमभवन्मद्दयायामधीनम् ।
ऐच्छं सर्वं नगरमपि तद्धूलिसात्कर्तुमन्तः
किन्त्वायाता मनसि कुदयाऽहं तयाऽऽसं निरुद्धः ॥ ४९ ॥

इत्थं तस्मिन् प्रलपति मया निश्चितं सोऽयमस्ति
योऽयं हण्डर्समिति सविधे न्यस्तवानात्मशुद्धिम् ।
श्रुत्वालापं हृदयलघुतां चास्य विज्ञाय चेतः
प्रत्याघातं कमपि सहसा प्राप्य खिन्नं तदाभूत् ॥ ५० ॥

सोऽयं दिल्ल्यां रयलशकटस्थानमाप्यावतीर्णो
धृत्वा वस्त्रं स्थलकमलरागानुरेखान्तरीयम् ।
नेपथ्यार्हं परिदधदसौ गौणमेवोत्तरीयं
ताभ्यां दोषानिव स सकलांश्छादयन् दृश्यतेस्म ॥ ५१ ॥

पञ्चापीयातिशयविषमोत्पातशोधे च तस्मिन्
श्रीमद्गान्धेः परिचयमहं प्राप्तवान् कञ्चिदल्पम् ।
तत्प्रस्तावाः समितिषु पुरा प्रायशोऽरोचमाना
अप्यन्ते तद्विवरणबलात्स्वीक्रियन्ते स्म नित्यम् ॥ ५२ ॥

पश्चाज्जाताः सपदि घटनाः साधयन्तेस्म तस्य
दूरेक्षित्वं निहितमिह तत्तद्विवृत्यामपूर्वम् ।
अन्तर्दृष्टेः प्रकटनमिदं राजनीतौ च तस्य
श्रद्धामद्धाजनयदथ तामैदिधच्चाप्यनन्ताम् ॥ ५३ ॥

एतासां दुर्घटनघटनानामथान्वेषणस्य
तीव्रः किञ्चित्पितुरपि मनोऽवेष्टयत्स प्रभावः ।
तस्याशेषा विधिविषयिणी चापि वैधानिकी सा
भूमिः कम्पं कमपि दधती तन्मनोऽबोधयच्च ॥ ५४ ॥

वर्षान्ते या परिणतिरभूच्चेतसस्तस्य मूलं
सेयं सज्जा क्रमबलकृतैवाभवन्न त्वकस्मात् ।
प्राचीनाया उपरि स पुरा माडरेटस्थितेस्तु
प्रागादद्याभजत मृदुतायामसन्तोषमेषः ॥ ५५ ॥

पत्रं पूर्वं प्रकटितमभूल्लीडराख्यं प्रयागा-
त्तत्यक्त्वायं परमरमधादिण्डिपैण्डेण्टसंज्ञम् ।
साफल्यं तन्महदधिगतं किन्तु दोषोऽत्र कश्चि
त्तत्प्रारम्भादभवदशुभादव्यवस्थाप्रधानः ॥ ५६ ॥

सोऽयं दोषोऽखिलजनगतोऽभून्निदेशे प्रबन्धे
सम्पत्तौ वाधिकृतपुरुषे मय्यहो देशिकेऽपि ।
अस्मिन् कार्ये त्वनुभवलवो नाभवन्मेऽथ चिन्ता
तत्कार्याणामनुदिनमधान्मानसे विक्लवत्वम् ॥ ५७ ॥

किञ्चाहञ्चाप्यथ मम पिता शोधकार्येण यातौ
पञ्चापं यत्पुनरिह चिरं च स्थितौ कार्यवश्यौ ।
दीर्घायां नौ तदनवहितौ चानुपस्थानवेला
सेकाभावे तरुमिव दलं सर्वथाऽशोषयत्तत् ॥ ५८ ॥

पत्रं चैतन्न निजवपुषैवार्थदृष्ट्याप्यशुष्यन्
पत्रस्वाम्यानुभवभयतो जीवने तन्न चेच्छम् ।
कारागारे बहिरथ सदा भूमिकार्येषु लग्नो-
ऽप्येवं कर्तुं मुहुरवसरं नापि लेभे तदर्हम् ॥ ५९ ॥

अस्मिन् वर्षे त्वमृतसरसे मत्पिताध्यक्ष आसीत्
कांग्रेसस्यान्वनयदखिलान् माडरेटान् स नेतॄन् ।
यत्ते सर्वेऽप्यमृतसरसाऽऽवेशने सम्मिलेयुः
सैन्यन्यायादभिनवमभूत्तर्ह्यवस्थान्तरं यत् ॥ ६० ॥

पञ्चापस्याकुलहृदयमामन्त्रयत्यार्यमिश्रान्
किं तन्नादं करुणमपि न श्रोष्यथेत्यालिखत्सः ।
किन्त्वस्यैते तदभिलषितं नोत्तरं दत्तवन्त—
स्ते नायाता अभिनवसुधारेषु लग्नेक्षणाश्च ॥ ६१ ॥

ते माण्टेग्यूचमसवचनाधारसम्भाबितार्था—
स्तत्रागन्तुं यदसहमतिं प्राचकाशंस्तदानीम् ।
दूनं तेनाभवदतितरां मत्पितुश्चित्तमस्मा-
त्तेषां चित्तं व्यवहितमभूदन्तरावर्तिगर्तात् ॥ ६२ ॥

काङ्ग्रेसं चाप्यमृतसरसे गान्धिकाङ्ग्रेसनाम्ना
जातं मान्यास्तिलकसदृशा भागमत्राभ्यगृह्णन् ।
निःसन्देहं प्रतिनिधिषु तेषु प्रकर्षेण बाह्ये
सम्मर्दे वाधिकतरजना नेतृतां स्मार्थयन्ते ॥ ६३ ॥

तां प्राप्तुं चानिमिषनयना गान्धिमेवाभ्यपश्यन्,
हिन्दुस्ताने क्षितिजनयिके तस्य चोत्कर्ष आसीत् ।
घोषो 'गान्धिर्जयति जयती'त्यादिकोऽसूद्गभीर-
श्चालीवन्धू दृशिनियमनात्तत्क्षणं मुक्तिमाप्तौ ॥ ६४ ॥

एतौ साक्षादमृतसरसे भाविकाङ्ग्रेसमेतौ
राष्ट्रीयान्दोलनमभिनवं रूपमानीयते स्म ।
नव्या नीतिस्तदुपनयनी चात्र निर्मीयते स्म
श्रीमौलानामहमद अली प्रस्थितोऽभूद्युरोपम् ॥ ६५ ॥

हिन्दुस्थाने पुनरनुदिनं सा विरोधार्थसंस-
च्छ्रीमद्गान्धेर्महितमहसाऽऽक्रम्यते ख्यातिमात्रम् ।
सम्बन्धं सा ध्रुवमसहयोगेऽपि सन्दर्श्यमाने,
तत्राहिंसात्मकविरचने काङ्क्षते स्माभिवन्धुम् ॥ ६६ ॥

दिल्ल्यां तस्याः प्रमुखपदवीधारिणाँ मौलवीना-
मुल्मानाञ्चादिभवसमितिं काञ्चिदेकां स्मरामि ।
वायस्रायं मिलितुमुदितः शिष्टसङ्घस्तदीयः
श्रीमद्गान्धिः सममिलदभूदुद्यतश्चापि गन्तुम् ॥ ६७ ॥

गान्धेर्दिल्ल्यागमन समयात् प्राक् प्रहेयं तु पत्रं
वायस्राये लिखितमभवत्प्रेषितोऽभूच्च सारः ।
आयातोऽसावपठदसुकं चारुचि प्राचकाशत्
प्रावोचच्चैष्यत किल परीवर्तनं चाधिकोनम् ॥ ६८ ॥

चेत्तत्पत्रे भवति न परीवर्तनं तर्हि नाहं
संयुक्तः स्यामिह मतिमतां श्रीमतां शिष्टसङ्घे ।
तस्याक्षेपः पुनरयमभूदत्र पत्रे न किञ्चि-
त्स्पष्टं फल्गौ पदसमुदये नार्थसारोऽस्ति कश्चित् ॥ ६९ ॥

नास्मिन् याञ्ञा विशदमुदिता मुस्लिमानां समासात्
नास्मिन् न्यायो भवति वसुधास्वामिना साकमेव।
नापि न्यायो ब्रिटिशसरकारेण लोकैर्न च स्वै-
र्याञ्ञा गुर्व्यो नहि समुचिता यासु नेष्टो विरोधः ॥ ७० ॥

स्पष्टैः शब्दैर्लघुतर इह प्रार्थनीयो वरो वः
सन्देहाद्यैः सततरहितः प्राणदानेन साध्यः।
किञ्चित्कर्तुं यदि समुदितास्तर्ह्यसौ सत्यमार्गो
नूनं नास्मात्पर इह भवेद् वस्तुतो राजमार्गः ॥ ७१ ॥

एषा युक्तिः खलु भरतभूराजनीतौ नवाऽभू-
दस्मद्बुद्धौ विनिमयमयी सा स्म जागर्ति बुद्धिः।
अस्पष्टानां महितमहतीनां चमत्कारिभाषा-
बद्धानां च व्यवहृतिरभूदस्मदभ्यासपात्रम् ॥ ७२ ॥

अन्ते गान्धेर्वचनमभवत्तावदावर्तमानं
वायस्रायं प्रति लिखितवानेष तत्पत्रदोषान्।
योऽयं तस्मिन्नवमपि किमप्यङ्कितं स्वल्पयाञ्चं
तस्य प्रत्युत्तरमतितरां रोचकं चागमत्तम् ॥ ७३ ॥

वायस्रायोऽभिनववचसो योजनां नानुमन्य
पूर्वस्यैवाखिलसमुचितता स्वीचकारेति बुद्ध्वा।
पत्रालापैः स्थितिमिह निजां स्पष्टभूतां च मत्वा।
गान्धिर्यातिस्तमनुमिलितुं शिष्टसंघेन साकम् ७४ ॥

स्पष्टञ्चासीद् ब्रिटिशप्रभुता तद्विरोधार्थगोष्ठ्या
याञ्ञानां स्वीकृतिवितरणे नो भविष्यत्युदारा।
सङ्घर्षश्च ध्रुवमनुचलिष्यत्यथो मौलवीना-
मुल्मानां चातिचिरमभवत्तत्र नानाभिलापः ॥ ७५ ॥

तेषां चर्चा प्रचुरमभवद्वा अहिंसात्मकेऽस्मिन्
तत्राहिंसाविषयमधिकं चिन्तयन्ति स्म सर्वे।
गान्धिर्ह्येतान् प्रति कथितवान् नेतृतां स्वीकरिष्ये-
ऽहिंसार्थश्चेदिह मतिमतां सर्वथा सम्मतः स्यात् ॥ ७६ ॥

तच्छैथिल्यं तदनुसरणे दुर्बलत्वञ्च किञ्चिद्
रागं सक्तिं कथमपि जना नाद्रियेरंश्च गुप्तिम् ।
आसीदेतत्कठिनमननं सर्वथा मौलवीनां
किन्त्वेतेऽपि व्रतविरहिताधीतितः स्वीकृतार्थाः ॥ ७७ ॥

सत्कार्येऽस्त्रग्रहणमिह नो धर्मतः सम्मतञ्च
तेनार्हिसाऽभवदभिमता धर्मतो नार्हणीया ।
इत्युक्त्वा ते कथमपि तदा प्राप्तकालामहिंसां
नीतेर्दृष्ट्याप्यनुमुमुदिरे गान्धिसाह्यग्रहाय ॥ ७८ ॥

इत्थञ्चान्दोलनमुभयमेतत्प्रवृत्तं सहैव
नूनं तद्राजनयिकमथो तद्विरोधार्थकञ्च ।
काङ्ग्रेसेनाप्यभिमतमथो ऽहिंसयाऽसाह्यमेत-
द्गान्धिप्रोक्तं तदुभयमपि प्राप्तमेकत्वमेतत् ॥ ७९ ॥

पूर्वं कार्यक्रममिममधात्सा विरोधार्थसंसत्
सङ्ग्रामार्थं दिनमपि चितं त्वष्टमस्यादिमं तत् ।
तस्मिन्वर्षे मुसलिमसभाऽभूत्प्रयागे क्रमेऽस्मिन्
ध्यानं दातुं ननु मुसलिमल्लीगसंसद् भवेत्सा ॥ ८० ॥

मौलानामोहमदअलिरासीद्विदेशे तदानीं
मौलाना शौकत अलिरभूत्तत्र तूपस्थितोऽस्याम् ।
तां ध्यायामि ध्रुवमहमभूवं तया यन्निराशः
सोत्साहः शौकत अलिरिहैकः, परे त्वप्रसन्नाः ॥ ८१ ॥

नामञ्जूरीकरणविषये साहसं तेऽभजन्त
त्रासे कस्मिश्चन निपतितुं चापि ते नालषन्त ।
चित्तेऽकार्षं ब्रिटिशधृत साम्राज्यमेते ह्वयेयुः
क्रान्तेरान्दोलनमिदमिमे किन्नु सञ्चालयेयुः ॥ ८२ ॥

गान्धिः श्रीमान्यदवददतोऽभात्स उद्विग्न आसीत्
सर्धस्वामीव च प्रवचनं चैकमुच्चैरकार्षीत् ।
नम्रत्वेनाभृतमपि तदासीदतिस्पष्टकान्ति
वैडूर्याभं कठिनमपि तन्मञ्जुलं मिष्टभाषम् ॥ ८३ ॥

सर्वे यूयं ध्रुवमधिकृता मां पदाघाततोऽपि
वाह्यं कर्तुं मुहुरिह शिरो मे विकर्तुं तथान्यैः ।
तैस्तैर्दण्डैर्मम च विकृतिं शोधयन्तो यतध्वं
सर्वस्वाम्यं तदिदमिह मे युष्मदाधारसंस्थम् ॥ ८४ ॥

यावच्चाग्रेसरपदमिदं मेऽर्पितं तावदेते
सर्वे बन्द्याः सुदृढमुररीकृत्य सम्पालनीयाः ।
सर्वस्वामी यदुपदिशति श्रद्धया तन्निषेव्यं
सेनान्यायात्सकलमनुशिष्टञ्च संरक्षणीयम् ॥ ८३ ॥

सद्भावैः स्वीकृतिभिरथ वः साह्ययोगैश्च सर्वं
कार्यं चैवाश्रितमिदमहो सर्वथाऽऽस्ते मदीयम् ।
मय्युद्वेगे झटिति च बहिष्कृत्य मां मर्दयध्वं
पादाघातैः परमिह न सीत्कारमप्याचरिष्ये ॥ ८६ ॥

आसीत्तस्मिन् सुदृढहृदयं हार्दिकञ्चापि सत्यं
गान्धेश्चाक्ष्णोः शममृदुलताऽऽसीद्दृढा कार्यशक्तिः ।
स स्म ब्रूते दृढमिदमहो सम्मुखत्वं भविष्य-
त्याहो तच्चातिशयदृढताधारिणा साकमस्ति ॥ ८७ ॥

चेद् युद्धेच्छा तदिह सकलं स्वं भवेद्ध्वंसनीयं
दार्ढ्येनैवानुसरणमथाऽहिंसनं पालनीयम् ।
युद्धे धृष्टे भवति परितः सैन्यनीतेः प्रवृत्ति-
र्युद्धेऽहिंसात्मनि च बहवः सैन्यपाः कल्पनीयाः ॥ ८८ ॥

चेदस्माकं मनसि विजयः काङ्क्षितस्तर्हि सेना-
सम्बन्धिन्यः सकलनियमान्वेतधाराः प्रवर्त्याः ।
सत्यं खड्गं भवतु सहकृच्चर्म च स्यादहिंसा
दुर्भेद्यं स्यादिह च परितो देशभक्तिस्तु वर्म ॥ ८९ ॥

इत्याकाराः कतिचिदुदितास्तेन वार्तास्तदानीं
सैन्यौपम्यं हृदयदृढतां वीक्ष्य च श्रोतृवर्गाः ।
स्पन्दं कञ्चिद्वपुषि दधिरे किन्तु तत्रास्त शौकत्
यः पक्वार्धैष्वबिभरथिकं कञ्चिदोजस्विभावम् ॥ ९० ॥

श्रोतृष्वेषु प्रचुरपुरुषास्ते मतादानकाले
तूष्णीं हस्तोद्धृतिमकलयन् सङ्कुचन्तो हृदन्तः ।
युद्धारम्भाचरणमुचितं सर्वथेत्यस्य पक्षे
तद्वै तेषामभवदुचितं चेष्टितं स्वाशयस्य ॥ ६१ ॥

प्रत्यावर्त्स्यन्नहमथ जनैः सार्धमध्वन्यपृच्छं
श्रीमद्गान्धिं यदिह विधिनानेन किं योत्स्यसे त्वम् ।
आशासानः प्रतिवचनकं किञ्चिदोजस्वि चोष्ण-
भाषाबद्धं नयनविगलत्तीव्रवह्निस्फुलिङ्गम् ॥ ६२ ॥

किन्त्वत्राहं गृहपशुसमं भीतिमन्तं जनौघं
तत्रापश्यं जनमतबलाद्युद्धपक्षे पतन्तम् ।
मुस्लिम्लीगानुगमनपरैस्तेषु कैश्चित्स योगो
युद्धे दत्तोऽभवदिति ततो निश्चितं जातमासीत् ॥ ६३ ॥

तय्वेकेषां ब्रिटिशविभुतासेवनं तच्छरण्यं
वृत्तं लीगं प्रतिनिधिरभून्मुस्लिमलानां न जातु ।
लीगात्तीव्रा प्रतिनिधिरभूत्सा विरोधार्थसंसद्
युद्धार्थं या परिकरमबध्नादृतोत्साहपूर्णा ॥ ६४ ॥

आद्योऽगस्त्यो नियमित इहोपक्रमार्थं रणस्य
श्रीमद्गान्धेरभिमततयाऽसाह्ययोगात्मकस्य ।
काङ्ग्रेसेनानुमतिरिह सा नाद्य यावद्वितीर्णा
नैवाप्यस्मिंस्तदवधि कृतोऽभूद्विचारोऽपि कश्चित् ॥ ६५ ॥

तस्मिन्नेवाहनि स तिलको लोकमान्योऽग्रनेता
मुम्मय्यां हा निजतनुमसौ त्यक्तवान् हन्त हन्त ।
श्रीमद्गान्धिस्त्विह दिवसके सिन्धुदेशप्रयाणा-
त्प्रत्यावृत्तोऽभवदहमपि त्वागतस्तेन सार्धम् ॥ ६६ ॥

ग्रामे ग्रामे नगरनगरे वृत्तमेतत्प्रदेशे
प्रत्येकस्मिन् धनतिमिरवच्छोकमावर्तयद्यद् ।
तद्वै मृत्युग्रहनिगलिते भास्करे भारतस्य
साक्षादासौद्ग्रहणसमयोत्थं धनध्वान्तमेव ॥ ६७ ॥

यस्मिन् कस्यापि न समभात्कुत्रचित्किञ्चनापि
हाहाकारो दिशिदिशि ततोऽभूद्विलापः प्रलापः ।
अन्ते मृत्योरपरिहरणीयत्वबोधे बुधाग्र्य-
स्यास्य स्कन्धोद्धृततमृतनोश्चक्रिरेन्त्येष्टिकार्यम् ॥ ६८ ॥

सर्वे तस्मिन् महति जनतासागरे सङ्गताः स्मो
यस्मिन्निन्युर्गुरुमथ गुरुं नेतृवर्यं तमेनम् ।
अद्धा ! श्रद्धाञ्जलिभिरतोऽभ्यर्चितुं लोकसङ्घा
धाराबद्धा धनसमयगा आपगा एव भान्ति ॥ ६९ ॥

सङ्गीतवृन्दावनमहाकाव्यानुजातमहो महा-
काव्यं जवाहरलालनेहरुचरितमिदमतिमञ्जुलम् ।
सत्याग्रहं चामृतसरसमधिकृत्य तस्य विसृत्वरः
किल सप्तमः सर्गोऽयमगमद् गान्धिनेतृतयोज्ज्वलः ॥

मदीयं निर्वासनम्

पञ्चचामरम्

अष्टमः सर्गः

मदीयराजनीतिरास्त सैव यास्ति मादृशां
वदन्ति मध्यमं तु वर्गमीदृशां नृणां बुधाः।
तदेयमास्त वाचिकी यथास्ति साद्य भूयसा
प्रतीकतां दधत्यसावनम्रनम्रभावयोः ॥ १ ॥
प्रतिस्वरोतिकं हितञ्च यादृशा वशन्त्यमी
परन्तु नम्रभावना विशेषतस्तदाऽभवन्।
अमुष्य मध्यमस्य ते च काञ्चिदुच्चकक्षतां
दधत्सु मुष्टिकामितेषु केप्यगुः प्रधानताम् ॥ २ ॥
इमे च गौरशासनेन पुष्पिताः फलान्विता-
स्तदञ्जसा न काङ्क्ष्यते स्म तैरिदं विवर्तनम्।
यदेतदीयवर्तमानसुस्थितिस्वकार्थयो-
र्विधातकं भवेदिमे हि भूमिपैः सुसङ्गताः ॥ ३ ॥
अनम्रभावना अपीह मध्यमे दले स्थिताः
किलाद्य यन्त्रशालिकासु सन्ति ये श्रमाश्रयाः।
महारणस्य कारणाद्विवृद्धभूरिसङ्ख्यकाः
क्वचित्क्वचित्स्थले तदीयरीतितः समुत्थिताः ॥ ४ ॥
प्रभाववञ्चिताः कृषीबला इमे निरक्षरा
इमेऽतिनिर्धना विपद्भिरर्दिताः समन्ततः।
स्वभाग्यमात्रमाश्रिता दिनानि यापयन्त्यमी
प्रशासनैः प्रजाजनैश्च रोहिताश्च शोषिताः ॥ ५ ॥
न कोऽपि वृत्तपाठकस्तदा स्म मन्यते यथा
त्र भारतेऽद्य सन्ति कोटि कोटयः कृषीबलाः।
श्रमाश्रिताश्च सन्ति सर्वथा महत्त्ववञ्चिता
भृतानि वृत्तपत्रकाणि कानिचित्तु शासकैः ॥ ६ ॥

न तान् कदापि कोऽपि पृच्छति स्म वृत्तपत्रकृ-
त्तदाभवन् हि भूमिपाश्च यन्त्रिणो महेश्वराः ।
इति स्थितावपि स्मृतानि तानि राष्ट्रियाण्यहो
न वृत्तपत्रवृत्तमेतदस्ति लोकवृत्तकम् ॥ १४ ॥

न चैतदेव काङ्ग्रेसमभ्युपक्रमक्षणे
सदेदमार्थिथत्स्थिरप्रवन्धकल्पनं यथा ।
भवन्ति भूमिपाधिकारराशयः सुरक्षिताः
कृषीवलास्तपस्विनो न तत्र नामतः श्रुताः ॥ १५ ॥

गतासु विंशतौ शरत्सु राष्ट्रियप्रयत्नतो
दशा मुहुर्विवर्तितास्ति वृत्तपत्रवर्त्मनः ।
पदं ददत्यमूनि यद् विदेशवृत्तपत्रका-
ण्यपीह यान्ति भारतीयकानि दीर्घदृष्टिताम् ॥ १६ ॥

इहान्यथा हि भारतीयपाठकाः पराङ्मुखा
भवेयुरित्यमूनि तत्र तच्च तत्प्रकुर्वते ।
परं स्वरीतिमाश्रितानि तानि सङ्कुचन्त्यपि
प्रयान्ति भारतीयकानि चात्र दीर्घदृष्टिताम् ॥ १७ ॥

कृषीवलान् श्रमोपजीविनश्च तानि चर्चय-
न्त्यमी हि पाठका रुचिं दधत्यमुत्र भूयसीम् ।
इदं च वाग्विभूषणं विजातमस्ति साम्प्रतं
यथात्र यन्त्रशालिकाश्च कर्षकाश्च जाग्रतु ॥ १८ ॥

परन्तु वस्तुतोऽद्य यावदप्यमूनि भूमिपां
स्वपुञ्जपाञ्च चिन्तयन्ति साधयन्ति वा हितम् ।
भवन्ति ते ह्यधीश्वरा, धनं प्रयुञ्जते च ते,
नृपा अपीह वृत्तपत्रचालनेषु तत्पराः ॥ १९ ॥

धनस्य निष्क्रयञ्च ते सदैव लब्धुमुद्यता
तथाप्यमीषु केऽपि काङ्ग्रेसिका अपीरिताः ।
परन्तु काङ्ग्रेससभ्यतापि तैरुपार्जिता
न वेति तत्कृतेऽपि संशयोऽत्र विद्यते मम ॥ २० ॥

अयञ्च काङ्ग्रेसशब्द एव लोकवल्लभो-
ऽभवज्जनाः सभाश्च तं निजेहिते प्रयुञ्जते।
पुरःसरद्विचारचारणेन यानि वर्धिता-
न्यमीभिरर्थदण्ड आधृतो भवत्यहो महान्॥ २१॥

कदाचनेह मुद्रणालयीयसंविधानतो-
ऽथ सेंसरप्रयोगतश्च भीतिरेव तिष्ठति।
अवेदिषं कृषीबलान् श्रमोपजीविनश्च नो
यदत्र कां दशामिमे गता भवन्ति साम्प्रतम्॥ २२॥

ममाभवद्धि राजनैतिकी च दृष्टिरन्यथा
न मध्यमाद् दलात्तथापि वेद्म्यहं यथातथम्।
यदत्र निर्धनत्वमस्ति दुःखमस्ति भीषणं
स्वतन्त्रभारतो यतिष्यते तदादितोऽसितुम्॥ २३॥

स्वतन्त्रतापि राजनैनिकी ममास्ति सम्मता,
भवत्यसौ हि सर्वतः पुरस्सरात्र सिद्धिदा।
प्रधानता हि तत्र मध्यमस्य जायतेतरां
कृषीबलीययत्नदिश्यहं ततोऽधिकं नतः॥ २४॥

विहारगुर्जरौ महात्मगान्धिना प्रवर्तिते
कृषीबलप्रयत्नके हि कर्षतः स्म मे मनः।
तथापि मेऽवधानमास्त राजनैतिके पदे
क्रमादसाह्ययोगसंक्रमे समग्रचर्चिते॥ २५॥

तदैव नूतने किलैकवस्तुनीरिता रुचि-
र्यया महत्त्वपूर्णमर्जितं पदं तु जीवने।
अनिच्छतापि यन्मया कृषीबलेषु सङ्गिता
श्रितात्र सापि चाद्भुतप्रकारतश्च सारतः॥ २६॥

प्रसूर्वधूश्च ते रुजातुरे मया मसूरिका-
मवापिते, पितैकराज्यवस्तुनि क्वचिद्रतः।
इहाभियोगपक्षतः स देशबन्धुदासकः
प्रसिद्धराजनीतिविद् बिभर्ति वाचिकीलताम्॥ २७॥

वयं स्थिता मसूरिकासिवाय आतिथेयके-
ऽफगानगौरयोस्तदा च सन्धिचर्चया स्थितम् ।
इयं किलाफगानमन्दयुद्धकालिकी कथा-
ऽभिषिक्त आस्त यत्र राज्यशासनेष्वमानुला ॥ २८ ॥

इमेऽफगानका अपीह संवसन्ति चैकतः
पिवन्त्यदन्ति ते पृथङ् मिलन्ति नैव केनचित् ।
रुचिर्ममैषु नाभवद् विशेषतोऽत एव मे
तदीयमण्डलस्य कस्यचिन्न दृष्टिरप्यभूत् ॥ २९ ॥

कदापि दृष्टमप्यहं न वेद किन्त्विहैकदा-
ऽपराह्ण आगतोऽञ्जसा मदन्तिकेऽत्र वीक्षकः ।
मसूरिशासनस्य पत्रमेकमेष दर्शयन्
वचौ ममैच्छदेष नाफगानसङ्गतिं भजे ॥ ३० ॥

ममैतदद्भुतं मतं न संवसन्नपीह तान्
कदाप्यपश्यमप्यहं न चापि सम्भवत्यदः ।
अधीक्षकोऽपि वेत्ति तद्यतः स सावधानतां
दधाति तद्विचेष्टितेषु चारवर्गसङ्गतः ॥ ३१ ॥

परन्तु तादृशं वचः प्रदातुमस्मि नोद्यतः
स्वभाव एष मे दृढस्तमस्य च न्यवेदयम् ।
स मामथाह-मण्डलस्य न्यायकृत्सकृत्त्वया
विलोकनीय इत्यहं तमप्यपश्यमञ्जसा ॥ ३२ ॥

न तादृशं वचो ददामि कर्हिचिन्न कर्हिचित्
इतीरितेन शासनेन चास्म्यतो बहिष्कृतः ।
यथाष्टयाममध्य एव देहरादिदूनकं
समस्तमण्डलं विहाय गम्यतांमितो बहिः ॥ ३३ ॥

न मे यदच्छमभ्यभाद्यदत्र रोगपीडितां
प्रसूं वधूं विहाय यामि दूरमेष सत्वरम् ।
परन्तु तत्क्षणं निदेशलङ्घनं न तूचितं
ममाभ्यभमाद् विनम्रभङ्गनीतिजन्म नाभवत् ॥ ३४ ॥

अहं मसूरिकां विहाय निर्गतः पिता तु मे—
'असभ्यमीदृशं निदेष्टुमर्हतीह नो भवान्।'
इतीह पत्रमालिखत्स मण्डलप्रशासके
यदेष हाइकोर्टबट्लरस्य मित्रतां गतः ॥ ३५ ॥

इयं हिमाचलीयशासकस्य कस्यचित्कृतिः
प्रतीयते मनश्चलस्य नत्वहो भवादृशः।'
स चोत्तरेऽलिखन् निदेश एष नास्ति दूषितो
यदीयपालनाज्जवाहरो भवत्यनादृतः ॥ ३६ ॥

इतीह मत्पिता पुनस्तमालिखन् न सम्मतो-
ऽस्म्यहं भवन्मतेन नास्ति चोद्धतो जवाहरः।
निदेशमीदृशं स भङ्क्तुमुद्यतोऽस्ति नैव, किन्तु
चेत्प्रसूर्वधूरमुष्य वा रुजा व्यथिष्यते ॥ ३७ ॥

इहास्य चाप्युपस्थितिस्तदा भवत्यपेक्षिता
स नूनमागमिष्यत्यमूं पुनर्मसूरिकामिति।
निदेश एव तिष्ठतान्न तिष्ठतात्तदेत्यपि
तदेव चाभवत्प्रसूरतीव संज्वराऽभवत् ॥ ३८ ॥

अहं पिता मसूरिकां प्रति प्रयातुमुद्यता-
वभूव तत्क्षणं च तत्र तारपत्रमागतम्।
निदेश एष रुध्यते मयेति हाइकोर्टतो
गतो ततो निदेशवर्तिनाविवात्र निर्भयम् ॥ ३९ ॥

परेद्युरागतो मसूरिकामहं यमैक्षिषं
तदातिथेयकाङ्क्षणेऽफगानमेकमद्भुतम् ।
मदीयपुत्रिकामयं निजाङ्कतो दधत्किला-
फगानदेशमन्त्रि-सन्धिकृत्सभासदोऽभवत् ॥ ४० ॥

अनन्तरं त्ववेदिषं मसूरिकाविनिर्गमा-
र्थकं निदेशवृत्तकं स वृत्तपत्रतोऽशमत्।
रुचिं मयि प्रवर्धितां प्रकाशयन्ति मण्डल-
प्रधानहस्तदत्तपुष्पकण्डिकामिषेण ते ॥ ४१ ॥

ततः पिता तथाहमप्यमीषु कांश्चिदादरा-
न्यमालयाव, तेऽफगानदेशमेतुमादरात् ।
न्यमन्त्रयन्त नौ, परं न लाभमस्य कञ्चना-
पिचालभेवहीति कोऽपि खेद आधृतो हृदा ॥ ४२ ॥

न चापि वेद्मि तत्र नूतनेऽद्य शासने त्विदं
निमन्त्रणं स्थितं नवेति तत्र नास्मि सोत्सुकः ।
मसूरिकाविनिर्गमात्परं तु पक्षमेककं
प्रयागवासमन्वभूवमत्र चाहमापतम् ॥ ४३ ॥

कृषीवलप्रयत्नदोलने दिने दिनेऽधिकं
न्यमज्जमेतदभ्यभूच्च मे विचारदर्शने ।
कदापि चिन्तयामि चेदहं मसूरिकापदा-
न्न निर्गतो न चोषितोऽभविष्यमाः प्रयागके ॥ ४४ ॥

दिनेषु तेषु वाऽभविष्यदन्यदेब कार्यकं,
तदा त्वसम्भवोऽभविष्यदागमो ममेदृशः ।
कृषीवलप्रयत्नदोलने तदा तदन्तिका-
गमस्य रीतिरन्यथाऽभविष्यदेव मे फलम् ॥ ४५ ॥

यथा स्मरामि यच्छतं कृषीबलाः पदातयः
प्रतापदुर्गवर्तिग्रामवृन्दतः प्रयागकम् ।
शतार्धमीलमार्गलङ्घनश्रमं सहिष्णवः
समागताः स्वदुःखमापदश्च तत्र भाषितुम् ॥ ४६ ॥

समस्तराजनीतिनेतृमुख्यवर्गतोऽवधा-
नदानमत्र लब्धुमातुरा इवात्र सत्वरम् ।
यतिस्तु रामचन्द्र एव ग्रामग्रामणीरभूत्
कृषीवलो न योऽभवन्न चापि संवसन्त्स तैः ॥ ४७ ॥

मया श्रुतं कृषीबलप्रयूथमेतदर्कजा-
तटेऽस्ति संनिविष्टमित्यहं सुहृद्भिरन्वितः ।
अगच्छमत्र तान् विलोक्य वृत्तमेष पृष्टवान्
निवेदिता तु तैः करग्रहाग्रहे कठोरता ॥ ४८ ॥

करााधिकारिणाममानुषी च वृत्तिरीरिता
सुदुःसहा स्थितिः कृषीबलस्य तैः प्रबोधिता ।
प्रयाचितं च तैः समं वयं प्रतापदुर्गके
व्रजेम चावलोकयेम तां तदीयदुर्दशाम् ॥ ४९ ॥

कराधिकारिणः प्रतापदुर्गयात्रयाऽनया
भृशं रुषं गताः प्रतिक्रियां प्रकुर्युरुद्धुराम् ।
इतीव भीतिरप्यभूद् दलस्य तस्य मानसे
ततोऽपि ते स्वरक्षणार्थमस्मदाश्रयेप्सवः ॥ ५० ॥

अनूररीकृतिं च नो न मेनिरे कथञ्चन
स्थिरानुरोधतत्पराश्च तेऽतिसक्तिमादधुः ।
मयान्ततो वचः प्रदत्तमेष द्वित्रवासरात्
परं भवत्प्रदेशमागमिष्यतीति ते गताः ॥ ५१ ॥

अहञ्च कैश्चनात्ममित्रनेतृभिः समं गतै
स्त्रिवासरीमिहावसाम तत्र तैश्च सङ्गताः ।
इमेऽभवंश्च वाष्पयानमार्गतोऽतिदूरगाः
सुपक्वमार्गतोऽपि हन्त ! लोकतः पृथक् स्थिताः ॥ ५२ ॥

परिभ्रमन्नहं त्वनेकनूत्नवस्तुदर्शना-
दवेदिषं प्रदेश एष तेजसास्ति मण्डितः ।
अपूर्वमोज एषु चोल्लसद्विराजतेऽधुना
निदेशमात्रतो मिलन्ति, तन्वते महासभाः ॥ ५३ ॥

जवेन विद्युतः प्रयान्ति चैकतः परं पदं
प्रपश्यताञ्च नो भवन्ति ते जनैर्विमोचिताः ।
कृषीस्थलेषु दूरतो नराः सदारबालकाः
समेत्य सङ्गता भवन्ति वात्ययेव सञ्चिताः ॥ ५४ ॥

विदेहजा-रघूद्वहाभिधानकीर्तनाऽऽरवो
जवेन तन्नभः प्रतिध्वनिप्रपूर्णमाकरोत् ।
समन्ततः स सन्ततोऽथ तत्र दूरदूरतो-
ऽपि कर्ण्यते स्म तीव्रतेजसां महः प्रकाशकः ॥ ५५ ॥

जलप्रवाहवज्जनप्रवाह एष धावति
प्रवृद्धमोज एव चेतते स्म तत्स्म चेष्टते।
स्त्रियो नराश्च सर्व एव जीर्णवस्त्रवेष्टिता
अपि प्रकाशमानवक्त्रनेत्रयोः श्रियं श्रिताः ॥ ५६ ॥

यथात्र किञ्चिदद्भुतं भविष्यतीति कौतुकं
किमप्यशेषकष्टहारि चारु दर्शयिष्यति ।
समर्पयन्ति ते महत्त्वमद्भुतं च नः प्रति
प्रलोकयन्ति चाशया भृतैर्मुहुर्विलोचनैः ॥ ५७ ॥

यथा वयं कमप्यहो शुभं निदेशमाहृतं
निवेदयेम तेषु, दर्शयेम मार्गमुज्ज्वलम् ।
यदापयिष्यतीह तान् स्वलक्ष्यमग्रतः स्थितं,
त्रपाम्बुधौ न्यमज्जमीदृशं विलोक्य सम्भ्रमम् ॥ ५८ ॥

सुदुःखितोऽभवं स्वदेशदुर्दशाजडत्वयो-
र्ह्रियाश्चितोऽभवं स्वकीयसौख्यशालिजीवने ।
पुरेषु शून्यराजनीतिचेष्टितेषु येषु ना-
स्ति किञ्चिदर्धनग्नकोटिपुत्रपुत्रिकापदम् ॥ ५९ ॥

दिगम्बरं बुभुक्षितं विमर्दितं च पीडितं
नवीनचित्रमागतं स्वभारतस्य मत्पुरः ।
तमादरं कदाचिदत्र चागतेषु नेतृषु
प्रलोक्य वैवशीमिवान्वभूवमेषु संस्थिताम् ॥ ६० ॥

अहो नवीनमुत्तरप्रदत्वमेभिरञ्जसा
समर्पितं मयि स्वयङ्गले दृढं दृढाशया ।
यदीयकल्पनापि मे मनः प्रकम्पयत्यहो
पुरा वहाम्यहं कथं सुदुर्धरं महाभरम् ॥ ६१ ॥

मया श्रुताः शतं तदीयदुःखदुर्दशाकथा
यथा करस्य भार एष वर्धते दिने दिने ।
यथा तलेऽस्य ते विमर्दिता भवन्ति निःसहा
यथा च धारया विनैव भार एषु रोप्यते ॥ ६२ ॥

यथा ततो बलाद्धठाच्छठत्वतश्च सोऽर्ज्यते,
यथा भुवः कुटीरकाच्च ते क्रियन्त उद्धृताः।
यथा च ताडनापि तेषु निष्पतत्यसङ्ख्यया
यथा च गृध्रवद् विवेष्टयन्त्यमून्महीभृतः ॥ ६३ ॥

स्वमाध्यमैर्धनेश्वरा महीधराश्च शासकै-
र्नृभिश्च पीडयन्ति तान्न हन्त ते कया दिशा।
खरातपे परिश्रमश्च कार्यते बलात्परं
फलं च सर्वमस्य ते भजन्ति, तद्धरन्ति ते ॥ ६४ ॥

कृषीफलस्य तस्य चार्धदानपुण्यपाकतः,
पदाहतीश्च गालिकाञ्च ते क्षुधश्च भुञ्जते।
इतीदृशी नृशंसता कृषीबलेषु सा श्रुता
महीधरैर्धनेश्वरैस्तथाधिकारिभिः कृता ॥ ६५ ॥

इहागताश्च ये जना न तेषु भूयसां भुव-
स्तदाभवन् हृताधिकारपापशापतापतः।
न वृत्तये धराश्रयो न च स्थितेः कृते गृहं
किमप्यभून्न साम्प्रतं तदन्तिके प्रजीवनम् ॥ ६६ ॥

क्वचिच्च भूमिरुर्वरापि तत्करादिभारतो-
ऽभवत्कृषीवलस्य हन्त जीवनाय निष्फला।
क्वचिच्च तुच्छभूमिखण्डहेतुकोऽधिकारिणा-
मनिश्चयान्मिथो विरोधविग्रहेऽभवन्मृतिः ॥ ६७ ॥

अमीषु भूमिहैतुकीं विलोक्य तादृशीं स्पृहां
महीधरैर्विधानसीमलङ्घिनः करा धृताः।
ततः पृथक् पुरस्क्रिया विनिश्चता महीयसी,
कृषीवलाः किलावशा ऋणे भवन्ति पातिताः ॥ ६८ ॥

ऋणे च वृद्धिजीविनो नियुज्य वृद्धिमुद्धताँ
कृषीबलान् दुहन्त्यमी हरन्ति चाधिकारिताम्।
इति प्रयान्ति ते चतुःश्रुतास्तु षट्श्रुतास्पदं
समर्जितुं परं द्विवेदिनो भवन्ति तेऽवशाः ॥ ६९ ॥

अयं क्रमः पुरातनश्चलत्यहो कृषीवला
दिने दिनेऽधिकाधिकां प्रयान्त्यमूं दरिद्रताम् ।
ततः प्रवृद्धमन्तरेऽसहिष्णुभावमीदृशं
प्रकाशयन्ति ते स्म तं कृषीवलाः स्वदोलनैः ॥ ७० ॥

इहार्थिकी दशैव हेतुरीदृशी किलावध-
प्रदेशकेऽखिलेऽपि वर्तते समानभावतः ।
इदं कृषीवलप्रयत्नदोलनं न केवलं
प्रतापदुर्ग एव किन्तु चान्यतोऽपि विद्यते ॥ ७१ ॥

अमुष्य कारणं किलांशिकं तदस्ति स-
द्यतेस्तु रामचन्द्रनामकस्य नेतृता विलक्षणा ।
स रामचन्द्रनामको महादिराष्ट्रियोऽभव-
त्कुलिप्रथासु स श्रमोपजीविभूय निर्गतः ॥ ७२ ॥

फिजीप्रदेशतः पुनर्निवृत्य चैष मन्दम-
न्दमागतोऽवधानिहाथ रामगाथया चरन् ।
कृषीबलीयदुःखभारमारटन्नितस्ततो-
ऽटति स्म मन्दशिक्षितो युवश्रमाश्रितो जरन् ॥ ७३ ॥

कृषीवलेभ्य एष कञ्चनात्मलाभमप्यगात्
परं स सङ्गतेरपारशक्तियोग्यतामधात् ।
स तान् सभासभाजने स्वदुःखसम्प्रकाशने
तथैक्यभावने च सर्वथा पटुत्वमादिशत् ॥ ७४ ॥

कदापि जायते सभा महीयसी गरीयसी
यया भजन्ति ते बलं किमप्यथैकताश्रयम् ।
विदेहजा-रघूद्वहाभिधानकं चिरन्तनं
परन्तु युद्धघोषरूपमस्य तेन कल्पितम् ॥ ७५ ॥

इदं यथावकाशमप्यभूज्जनोपमन्त्रणं
पृथग्वसत्युपैकवन्धनस्य चिह्नतां गतम् ।
प्रतापदुर्गफैजवासरायमद्बरेलिका
विदेहजा रघूद्वहप्रसङ्गपूर्णतां गताः ॥ ७६ ॥

अमूनि मण्डलानि सङ्गतान्ययोध्यया पुरः
तुलस्यनूक्तकाव्यमत्र गीयते गृहे गृहे ।
सहस्रशश्चतुष्पदी किलास्य दोहया युता,
जनस्य कण्ठगा इहाभवन्न कस्य कस्य च ।। ७७ ।।

अमुष्य गानमस्य दोहया समं चतुष्पदी-
निदर्शनं प्रसङ्गतो हि रामचन्द्रपद्धतिः ।
कृषीबलान् स सङ्गमय्य तत्पुरः स गोलवृ-
त्तभूतपूतमप्यनेकधा वचः प्रदत्तवान् ।। ७८ ।।

यथा दधुस्तपस्विनोऽप्यनेकयाशयाश्रयं
तदन्तिके न कश्चनाप्यभूदहो क्रियाक्रमः ।
यदा तदोज उद्गतं परां दिशञ्च संश्रितं
तदा स उत्तरप्रदत्वमन्यमूर्ध्नि चाक्षिपत् ।। ७९ ।।

तदर्थमेव चानयत्कृषीबलान् प्रयागकं
यथा प्रयागवर्तिनो रुचिं भजेयुरेष्विति ।
स वर्षमेकमन्यदप्यचालयत्प्रदोलनं
प्रधानरूपतः स नैकधा च वन्दितां गतः ।। ८० ।।

अनन्तरं त्वनुत्तरप्रदोऽप्यविश्वसास्पदं
स सिद्ध्यति स्म तत्कृषीबलैरयं बहिष्कृतः
कृषीवलप्रदोलनाय चावधप्रदेशके
स मुख्यतः स्वरूपतोऽनुरूप आस्त सर्वथा ।। ८१ ।।

इहैव भूमिपा वहन्ति चेतसावधेयतां
तदीयभूमिरास्त र्तार्ह तत्र वस्तुतश्च सा ।
महीपतिप्रथातिदूषितं स्वरूपमावहत्
किलेह तत्प्रयोजिताः करा असह्यतां दधुः ।। ८२ ।।

अभूमयः श्रमाश्रया अवीवृधत् स्वसङ्ख्यया
कृषीवलास्तथाभवन्निहैकरूपधारिणः ।
अतः समेऽपि ते समेत्य तत्प्रदोलनं मह-
त्प्रकर्तुमर्हतां गताः क्रियाक्रमं च सेवितुम् ।। ८३ ।।

द्विधा विभज्यतेऽत्र भारतं समस्तमप्यदो
महीपतेः कृषीबलस्य चाधिकारतो भुवि ।
क्वचित्तयोर्द्वयोस्तु जायतेऽधिकारिता, तयो-
र्विहारवङ्गयुक्तप्रान्तभूमिभाग आदिमः ॥ ८४ ॥

परश्च पञ्चवारिगुर्जरप्रदेशयोः स्मृत-
स्तदीयकर्षकोदयो दशां परिष्करोत्यमूम् ।
इहापि कर्हिचिद्वहत्यसौ तु शोचनीयतां
तथापि पूर्वभागतो दशास्य शोभना स्थिता ॥ ८५ ॥

महीपतिप्रभागगाः कृषीबला अनेकधा-
धिकारनाधिकारमुख्यकारणैरनेककैः ।
अहो निजार्थका मिथः पृथक्पृथग् भवन्ति यत्
ततः समेत्य ते न किञ्चनापि कर्तुमीशते ॥ ८६ ॥

इहावधे न तादृशाः कृषीबला यतोऽभवन्
इमेऽस्थिरा मिताह्निका हृताधिकारतां दधुः ।
तदीयभूमिरन्यदीयतां प्रयाति सत्वरं
किलोपहारदानतः करातिरेकधानतः ॥ ८७ ॥

इतीह ते कृषीबलाः किलैकरीतिकाः समे
समेत्य कार्यमत्र कर्तुमर्हतां दधुः स्वतः ।
इहाधिकारदानकालसीमपद्धतिर्नम् चा-
पि वर्तते न चापि ते ददुः कराप्तिपत्रकम् ॥ ८८ ॥

अतः कदापि कोऽपि कस्यचित्करप्रदायके
ऽप्यसम्मतिं प्रकाश्य तं हृताधिकारमादधात् ।
तपस्विनो हि तस्य तत्करप्रदानसाधनं
न दुष्करं तदाऽभवत्परन्त्वसम्भवं परम् ॥ ८९ ॥

करातिरिक्तमन्यदप्यनेकरीतिकं वृथा-
ऽनुदानमेषु भूमिपैः कृषीबलेषु रोप्यते ।
अवेदिषं किलात्र तादृशां शतार्धसंख्यकं
क्वचित्क्वचित्प्रयुक्तमप्यभूत्तु भूमिपैरिदम् ॥ ९० ॥

इदं प्रवध्यं सूचितं भवेदितीह सम्भवो-
ऽस्ति किन्तु ते प्रसङ्गतो हरन्ति तद्धनं पुरा।
यथा विवाहवेलया विदेशयानतोऽथवा,
ऽप्सरोविशेषभोजनेऽथ हस्तिमृत्तरिक्रये ॥ ९१ ॥

व्ययार्थमर्थमर्जयन्ति ते स्म तं कृषीबला-
द्रहो नृशंसता कियत्यभूच्च सा च नीचता।
इमानि चानुदानकानि मृत्तरीयहस्तिकीय-
मुख्यनामभिः प्रतीतिगोचरं गतान्यभुः ॥ ९२ ॥

इति स्थितौ न विस्मयः कृषीबलप्रदोलनं
तदुत्थितं स विस्मयस्तु तत्प्रदोलनोदये।
विनैव नागरैर्नरैश्च राजनैतिकैर्जनै-
स्तथाविधैस्तथेतरैस्तदीरितं तदुद्गतम् ॥ ९३ ॥

स्वयञ्च तत्प्रवृद्धमत्र काङ्ग्रेसतः पृथक्
न चाप्यसाह्ययोगदोलनान्वयोऽभवत्ततः।
अहो महाप्रदोलनद्वयस्थ चास्य मूलतः
किमेकमास्त चेति वक्तुमर्हमेव सर्वथा ॥ ९४ ॥

पुरा महात्मगान्धिना कृतानि हारितालिकानि,
यानि तत्र योग्यदानमाचरन् कृषीबलाः।
ततश्च गान्धिनाम हारितालिकाभिधानकं,
सदाचरज्जनेषु यौतुकस्य कार्यमद्भुतम् ॥ ९५ ॥

ममातिविस्मयोऽभवन्महाप्रदोलनं हि त-
न्न नागरैर्विबुद्धमप्यभूच्च तद् भयङ्करम्।
क्वचित्तु वृत्तपत्रके न पङ्क्तिरभ्यलेखि यत्
ततः स्फुटं न तानि ग्रामजीवने दधू रुचिम् ॥ ९६ ॥

मयानुभूतमेतदप्यहो इमे तु ग्रामकाः,
कथं सुदूरगा भवन्ति हन्त नो निजा अपि।
ततः पृथक् जगत्यहो लघीयसीह संस्थिता
वयं कथं स्वकर्म कुर्महे निजार्थमज्जिताः ॥ ९७ ॥

यन्माता पुण्यशीला शुचिकुलयुगला रुक्मदा हुक्मदेवी
यत्तातो दानतीर्थाटनभजनरुचिः श्रीदुनीचन्द्रवर्मा ।
मीमाँसाकाव्यशास्त्रप्रवचनचतुरो यद्गुरुः कृष्णलालो
निस्तन्द्रोऽमीरचन्द्रोऽनुवदति स कथां मामकीं संस्कृतेन ॥

स्तुतिचरितव्याख्यानपूर्तियुतैः प्रशस्तिकदम्बकैः
कादम्बरीपञ्चकमिहारचितं महाकविनामुना ।
श्रीमज्जवाहरलालनेहरुचरितमेतदुरीरितं
तत्रैषामन्निर्वासनाख्यः सर्ग एव गतोऽष्टमः ।

कृषीवलेषु भ्रमणम्

इन्द्रवज्रा-उपजातिश्च

नवमः सर्गः

धस्त्रत्रयं ग्रामगणे भ्रमन्नहं
गत्वा प्रयागं पुनरागतोऽभवम्।
भ्रान्ताः प्रतिग्राममिमे कृषीबलैः
साकञ्च भुक्त्वाऽध्युषिताः कुटीरके ॥ १ ॥
होराभिरालापमकार्ष्म तैः समं
लघ्वीषु दीर्घासु सभासु चागताः।
व्याख्यानमप्यत्र कदाप्यदाम तद्
याताः पुरा मृत्तरिणा लघीयसा ॥ २ ॥
उत्साह आसीत्कृषकेषु ते शतं
यद् रात्रिभिः कार्यमकार्षुरुन्मदाः।
क्षेत्रेषु मार्गान् सरकानचीकरन्
यत्र प्रधावन्युपयातु मृत्तरिः ॥ ३ ॥
ग्रामे दविष्ठेऽपि सुखेन यात्वियं
यत्रेति ते यत्नमनेकमाचरन्।
प्रायस्तु पक्वे पथि रुद्धमेनं
तेषां समुद्धारयति स्म विंशतिः ॥ ४ ॥
अन्ते वयं मृत्तरिमत्यजाम तं
प्रायश्च पद्भ्यामपि दूरगामिनः।
यत्र क्वचिद्ग्राम इमे समेता
समण्डलाधीशवरास्तु पूरुषाः ॥ ५ ॥
क्षेत्रेषु जाने सहचारिणस्तदा
ते दूरदूरं गमनात् स्युराकुलाः।

श्रान्ताः समे ते भृशमुद्विजन्तो-
ऽस्माभिस्तथा तैः कृषकैश्च खेदिताः।
आसीद्धयसौ मण्डलशासको युवा
प्येकान्तकान्तप्रकृतिः सुकोमलः॥ ७॥

पम्पापदत्राणनिगूढपादसौ
मन्दं प्रयातुं बहुधा न्यवेदयत्।
अन्ते तु मन्ये चलितुं सहाक्षमो
मार्गे क्वचिद्रुद्धगतिः किलाभवत्॥ ८॥

आषाढमासः स किलाभवद्यदा
सर्वाधिकोष्मा भवतीह भारते।
मेघागमाप्राक्तनतीव्रतापता
सूर्यस्य, गात्राणि दहत्यसौ नृणाम्॥ ९॥

अन्धीकरोत्येव च लोचने नृणां
नाहं कदाप्यातपसञ्चरोऽभवम्।
अप्याङ्ग्लदेशाद्विनिवृत्त्य भारते
ग्रीष्मे गतोऽहं हिमपर्वतान् सदा॥ १०॥

सम्प्रत्यहं चातप एव चाभ्रमं
त्रातुं शिरस्त्राणमपीह नाप्नुवम्।
तच्चावरीतुं पटखण्डमाश्रयं
व्यस्तश्च कार्येषु न ,कष्टमस्मरम्॥ ११॥

एत्य प्रयागं समपश्यमाननं
गोधूमकान्ति तदुपेतमुज्ज्वलम्।
ग्रामप्रयाणेष्वनुभूतमस्मरं
किन्त्वत्र सन्तोषमगाञ्च सम्मदम्॥ १२॥

आत्मानमत्रासिषमत्र यद्दृढै
र्लोकैः सहाहं खलु सोढवानिदम्।
यच्चातपादेर्भयमादधां मुधा
नावश्यकं तद्भृशमस्ति मत्कृते॥ १३॥

तेनाहमात्मीयकृतिष्ववाप्नुवं
साह्यं च कारागृहजीवनेऽप्यलम् ।
यस्माच्छरीरं मम कर्मसक्षमं
व्यायामतश्चास्ति दृढं सदाकृतात् ॥ १४ ॥

पाठोऽयमासीज्जनकेन शिक्षितो
व्यायामशीलेन किलाभवन्मनाक् ।
प्रायः स्वकीयस्य च जीवनस्य यद्
भागेऽन्तिमेऽप्येनमसेवतानिशम् ॥ १५ ॥

केशा अभूवन्रजतोपमाः शिर-
स्याविष्कृतास्ते वलयस्तदानने ।
वृद्धः परिश्रान्त इवैष भात्यहो
कायेन किन्त्वल्पवयाः सदा व्यभात् ॥ १६ ॥

आन्दोलनात्पूर्वमपि प्रयागतो
ग्रामानगां तत्र निवासमप्यधाम् ।
आभाषिषि ग्रामकृषीवलैरहं
ग्राम्यांश्च यात्रासु मुहुर्व्यलोकयम् ॥ १७ ॥

गङ्गातटे नेकसहस्रसंख्यया
संघट्टितान् गेहविधानमावदम् ।
आज्ञासिषं किन्तु तदा न तानहं
ते सन्ति के किञ्च महत्त्वमीदृशम् ॥ १८ ॥

अस्मास्वनेके न विचारयन्ति तां-
स्तद्वत्किलाहं न कदाप्यचिन्तयम् ।
एतन्मया त्वेषम एव वेदितं
यात्रां प्रतापस्य किलाद्य कुर्वता ॥ १९ ॥

चित्रं मया भारतवर्षकस्य त-
च्चित्ते स्वकीये परिकल्पितं ततः ।
यस्मिन् क्षुधा चापि तृषातुरा इमाः
सर्वाः प्रजाः स्थानविशेष आसते ॥ २० ॥

मन्येऽत्र वाते तडिदस्ति काचन
प्राभावयद्या किल मामकं मनः।
प्राप्तुं प्रभावञ्च तदुद्यतं स्थितं,
दृष्टानि चित्राणि ततः स्थिराण्यभुः॥ २१॥

मुद्रा च तेषां हृदये ममापत-
त्सन्तप्तलाक्षासदृशे द्रुते भृशम्।
तेनाद्य यावत्प्रकटं विभात्यसा
वमार्ज्यं तद्दृश्यसुखप्रकाशिका ॥ २२॥

सङ्कोचलज्जे विगते कृषीवले-
ष्वेषां सभासु प्रवदामि शिक्षितः।
पूर्वं न जात्वेष वदामि कुत्रचित्
प्रायः सभायामतिसंकुचन् हृदि॥ २३॥

आयाति कालः खलु हैन्दवीगिरो
भीतिं तदाहं बहुधाऽदधां हृदि।
तेषां सभायां वचनप्रसङ्गकं
हातुं कथं नाम भवामि तूद्यतः॥ २४॥

किञ्चैषु साधुप्रकृतिष्वयं मम
सङ्कोचहेतुः सरलेषु तेष्वहो।
यच्चेतसेच्छामि बदामि तेषु
तज्जानामि वक्तृत्वकलां न यद्यपि॥ २५॥

ते स्युः शतं वापि सहस्रमेव वा
संलापशैल्या प्रबदामि सर्वदा।
तां व्यक्तिगां वाक्सरणिं श्रयन्नहं
पश्यामि कार्यं चलतिस्म तत्क्षणम्॥ २६॥

व्याख्यानमासीत्प्रबहत्सदैव मे
यच्चावदं तन्न विदन्ति तेऽखिलम्।
भाषा विचाराश्च न मे सुखागमा
यांस्तेऽधिगन्तुं प्रभवन्तु सर्वथा॥ २७॥

श्रोतुं न शक्ता बहवस्तु मद्वच:
सम्मर्दपृष्ठस्थितयोऽन्तिकश्रवम् ।
कुर्वन्ति विश्वासमिमेऽत्र यत्र ते
तस्मिन्न पश्यन्ति श्रुतं न वा श्रुतम् ।। २८ ।।

भूयो मसूरीमगमं प्रसूवधू-
सन्दर्शनार्थं परमत्र मानसे ।
वार्ता: स्वनन्तिस्म कृषीबलान्विता-
स्तेष्वेव गन्तुं पुनरुत्सुकोऽभवम् ।। २९ ।।

प्रत्यागमं ग्रामगणं ततो विश-
न्नान्दोलनं वृद्धिमुखं न्यभालयम् ।
तेष्वात्मविश्वासभृतान्तरेष्वहो
सम्पीडितेष्वप्युदिता स्वमानिता ।। ३० ।।

वक्ष: प्रतन्यालिकमुन्नमय्य ते
यातुंप्रवृत्ता: प्रविहाय तद्भयम् ।
भूपालभृत्यात्पुरुषाच्च तन्मनो
न त्रासलेशं भजते स्म बोधितम् ।। ३१ ।।

छिन्नाधिकारस्य कृषीबलस्य ते
भूमिं ग्रहीतुं न भवन्ति तत्परा: ।
तेषामिदं सङ्घटनं द्विषद्बलं
चक्रे नितान्तं कदलीदलान्तरम्।।। ३२ ।।

भूपालभृत्या: समतीतडन्ये-
न्याया द्विरुद्धां कृतिमप्यचीकरन् ।
यत्तत्र तेषां धनमप्यजीहरं
स्तत्सर्वमेषां शिथिलं तदाभवत् ।। ३३ ।।

यच्चापि किञ्चिद्बलतोऽभवत्कृतं
तच्चापि तत्कालमसूच्यत प्रभौ ।।
यत्नश्च वीक्षासु विधीयते ततो
भृत्या: प्रशान्ता: पुरुषाश्च संयता: ।। ३४ ।।

भूस्वामिनोऽबिभ्यदथ स्वरक्षणो-
पायानकार्षुश्च परं प्रशासनम्।
साकेतभूस्वामिविधानसंस्कृतिं
कर्तुं वचोऽदात्कृषकाभितोषणम् ॥ ३५ ॥

भूपालभूस्वामिजनाः प्रभुत्वतः
स्वाभाविकीमात्मनि नेतृतां दधुः।
यद्यप्यमी दुर्ललिता दुरीहा
दुर्दान्तपुत्रा ब्रिटिशस्य चाभवन् ॥ ३६ ॥

किन्तु प्रशिष्टिर्यदमीषु शिक्षणं
यल्लालनं पालनमप्ययोजयत्।
घोरं प्रमादं तमसावचीकरद्
द्वारेण तेनास्य दलस्य सर्वतः ॥ ३७ ॥

बुद्धिं निरीहामबलामचीकरं-
स्तेऽकुर्वतैषां च यथा जडीकृताः।
देशान्तरे भूपतयो वितन्वते
ध्यानं मनागेषु कृषीवलेष्वपि ॥ ३८ ॥

एते भुवञ्च श्रमिकानचूचुष-
न्नात्मोदरं केवलमन्वपूपुरन्।
सर्वोत्तमं कार्यमभूदिहेदृशा-
माराधनं स्थानिकशासकावलेः ॥ ३९ ॥

येषां विनानुग्रहमत्र भूयसा
नानेहसैषामिह सत्त्वसम्भवः।
तान् सर्वदा स्वार्थमचूचुषन्निमे
किञ्चाधिकारार्थमनूनुदन्नमून् ॥ ४० ॥

भूस्वामिशब्दो भ्रमकृन्मनागयं
तेषां समेषां बहवो यथा भुवः।
इत्यर्थवाची भवतीह कस्यचि-
च्चित्ते जनस्येह न वस्तुतस्तथा ॥ ४१ ॥

यत्रास्ति रैवद्विधिरेष तत्र वै
भूस्वामिनो भूरिकृषीकराः श्रुताः ।
भूमिश्च तेषां महतीह कीर्तिता
प्रान्तेषु भूस्वामिविधामयेषु तु ॥ ४२ ॥

भूस्वामिनोऽल्पावनिपाश्च मध्यमा-
स्तद्वाच्यतां यान्ति शतं सहस्रशः ।
ते चापि गण्या अतिसीमनिर्धना
याता दशां ये कृषकाद् दयार्हणाम् ॥ ४३ ॥

संयुक्तप्रान्ते दशपञ्च चाप्यसौ
लक्षाणि गण्यन्त इलाधरेष्वमी ।
एतेषु नूनं नवतिः शतं प्रति,
दीना दरिद्रादपि ते कृषीबलात् ॥ ४४ ॥

शिष्टेषु काचित्सुदशा नवस्वथो
कश्चित्किलैकः सुखितः शतं प्रति ।
यस्ताल्लुकेदार इतीर्यतेऽथवा
भूस्वामिनाम्ना व्यवहर्तुमर्हितः ॥ ४५ ॥

अल्पावनीधारकतः कृषीबलः
कश्चिद्दशां प्राप्त इहालघीयसीम् ।
निःस्वा महीध्रा अथ मध्यमा अमी
शिक्षापदे पृष्ठगता भवन्ति ते ॥ ४६ ॥

किन्तु स्त्रियो वा पुरुषा अमुष्य ते
वर्गस्य सर्वेऽपि भवन्ति शोभनाः ।
शिक्षाप्रबन्धो यदि शोभनोभ् वे
त्स्युस्तर्हि ते नागरिका नरोत्तमाः ॥ ४७ ॥

आन्दोलने राष्ट्रियके विशेषतो
योगः प्रदत्तः किल तैरशेषतः ।
भूस्वामिभिर्भूमिधरैर्न कश्चना-
प्यत्राभियोगः क्वचनापि दर्शितः ॥ ४८ ॥

त्यक्त्वापवादान्विरलानमी पुनः
कुलीनवर्गस्य गुणैर्न भूषिताः।
कायेन चैते विजयेन चैकतो
वर्गान्नितान्तं गमिता लघिष्ठताम् ॥ ४९ ॥

तावच्च ते सम्प्रति जीविता भुवि
स्युर्यावदेते ब्रिटिशानुकम्पिताः।
देशादतस्तेषु विनिर्गतेष्वमी
हा हा भवेयुर्नितरां निराश्रयाः ॥ ५० ॥

ग्रामेषु वर्षावधि तद्गतागतं
कुर्वन्नपश्यं महतीं क्रियामहीम्।
संयुक्तप्रान्तः सकलोऽपि मेऽभव-
त्क्षेत्रं क्रियाया इति तद्व्यबेदिषम् ॥ ५१ ॥

सोऽसाह्ययोगः शिरऊष्मणोत्थितः
सन्देश एतस्य गतः पदे पदे।
दूरे दवीयस्यपि ग्राममण्डले
सन्देशमस्यानयमात्मसाक्षिभिः ॥ ५२ ॥

काङ्ग्रेसिवर्गो वसतीरिमा अगा-
दान्दोलनस्यास्य विसारवाञ्छया।
सोऽनेन साकञ्च कृषीवलोच्चया-
नन्याययोगानपि तानयोजयत् ॥ ५३ ॥

आसीत्स्वराज्येतिपदं विभुत्वम-
त्तस्मिन् समस्याः सकलाः समन्विताः।
आन्दोलनद्वन्द्वमिदं कृषीबलै-
श्चासाह्ययोगेन धृतं मिथः पृथक् ॥ ५४ ॥

प्रान्तेऽत्र तद्द्वन्द्वमभून्मिलच्चल-
च्चान्योन्यमासीच्च मिथः प्रभावयत्।
काङ्ग्रेसकस्यास्य विसारकर्मणो
जातं फलं यच्छिथिलाभियोगिता ॥ ५५ ॥

ग्रामेषु पञ्चायतनानि कल्पिता-
न्यत्राभियोगाश्च विनिश्चयं गताः।
काङ्ग्रेसयत्नाः खलु शान्तयेऽभवन्
सर्वोऽप्यहिंसासमयं स्म मन्यते ॥ ५६ ॥

लोकैरयं नादृत एव वा भवे
न्न ज्ञात एवापि भवेत्तथा च तैः।
किन्त्वेष हिंसामरुणत्कृषीबले-
ष्वेषामहिंसासमयो हृदि स्थितः ॥ ५७ ॥

न न्यूनमासीत्तदिदं कृषीबला-
स्तूत्तेजिता घ्नन्ति च ताडयन्ति च।
उत्तेजनैषाञ्च कृषीबलारिभि-
र्भूस्वामिभिः स्थापयतीव विग्रहम् ॥ ५८ ॥

उत्तेजना पारदकस्तदावधे
वासिष्वमीषूद्गत आस्त चोपरि।
सर्वं तदासन्निह कर्तुमुद्यताः
प्रत्यैक्षताग्निर्ज्वलितुं स्फुलिङ्गिकाम् ॥ ५९ ॥

शान्ति तथाप्याकलयन् किलाद्भुतां
स्मरामि तत्रैकमिदं निदर्शनम्।
भृत्यैः सुहृद्भिः सह गेहसंस्थितो
यत्रावनीशः किल ताडितोऽभवत् ॥ ६० ॥

तत्पार्श्वमेको विगतः कृषीबलो
गण्डे चपेटामददाच्च तस्य सः।
पृष्टश्च हेतुं वदति स्म नैष य
त्पत्न्यास्वया सद्व्यवहारमास्थितः ॥ ६१ ॥

दुर्वृत्त एष स्वयमस्ति चेत्ययं
भद्रैरवश्यं दमनीय इत्यसौ।
अन्यच्च हिंसात्मककर्म किञ्चना-
जातं यथा शासनसङ्गरोऽभवत् ॥ ६२ ॥

पूर्वञ्च पश्चादमुना स्म सङ्गरे-
णावश्यमेवोद्भवितव्यमस्ति यत् ।
सोढा न तेनात्र कृषीबलोच्चये
सा सङ्घशक्तिः परिवर्धते स्म या ॥ ६३ ॥

यथैश्च यूथैः क्रियते विना दलं
तैरेलयात्रा बहुधा सभाक्षणे ।
षष्टिः सहस्राणि कदापि सप्तति
स्ते चाभवन्त्यत्र समन्विताः पुनः ॥ ६४ ॥

तद्वारणं दुष्करमास्त ते पुनः
प्रत्यक्षतो रेलविधानलङ्घनाः ।
तच्छासनेनाहवमाश्रितास्तथा
दृष्टं श्रुतं नाभवदत्र यादृशम् ॥ ६५ ॥

ते रेलकर्माधिकृतान् भणन्त्यथो—
श्रीमन् पुराणः समयो गतस्त्वति ।
उत्तेजिताः केन तथा चरन्ति ते-
ऽत्यन्तं निषिद्धं न हि वेद्म्यहं तु तत् ॥ ६६ ॥

नाहं मदीयाः सुहृदो न तानिदं
सम्बोधयन्ति स्मेति तु वेद वास्तवम् ।
आकर्णितं तत्सहसा यथा किल
ग्राम्यैरियं सङ्गररीतिरादृता ॥ ६७ ॥

ते रेलकर्माधिकृता अनन्तरं
तत्रोग्रतां काञ्चन यर्हि संश्रिताः ।
तर्ह्येष यात्रादलमन्तरा क्रमो
भग्नो गते रेलसमाश्रयाश्रयः ॥ ६८ ॥

शीतेषु धस्रेष्वधिकालिकातिकं
काङ्ग्रेससम्मेलनयोजनेऽगमम् ।
सामान्यदोषेण कृषीबलास्तदा
नेतार ईयुः सहसैव वन्दिताम् ॥ ६९ ॥

दुर्गे प्रतापे त्वभियोग एकक-
स्तेषु प्रवर्त्योऽभवदत्र शासकैः ।
घस्रे तु तस्मिन् महता कृषीबला-
मर्देन रुद्धं विधिमन्दिराङ्गणम् ॥ ७० ॥

एते हि मुष्टि चणकान्नमाशिता
धस्राननेकान्व्यतियापयन्त्यलम् ।
अन्ते च नेतार इमे बिसर्जिताः
कारागृहे तद्विधिकर्म कारितम् ॥ ७१ ॥

एतत्कथं सङ्कुटितं किलेत्यहो
वक्तुं मया विस्मृतमस्ति वस्तुतः ।
एतं महान्तं विजयं कृषीबला
स्ते मन्यमाना निजसङ्घहेतुकम् ॥ ७२ ॥

सम्मर्दशक्त्या वयमिष्टमीदृशं
स्वीकारयित्वा विजयं लभामहे ।
पुरेति सेयं स्थितिरत्र शासकै
र्नासह्यतागाच्च तथाविधः क्षणः ॥ ७३ ॥

यस्याभवत्किन्त्वयथाविधं फलम्
प्रारम्भ एवात्र हि माधमासिके ।
काङ्ग्रेसतोनागपुरोद्भयादहं
प्रत्यागतस्तारदलं किलाप्नुवम् ॥ ७४ ॥

आगम्यतां शीघ्रमिहास्त्युपद्रवा-
शङ्केति तत्रोल्लिखितं किलाभवत् ।
अन्येद्युरेषोऽस्मि गतोऽध्यगामिहा-
गृह्यन्त पूर्वं कृषकाग्रणीजनाः ॥ ७५ ॥

तत्रैव कारागृहमध्यवासयं
स्तान् शासकास्तर्हि कृषीवला इमे ।
अस्मार्षुरूरीकृतपूर्वरीतिकां
नीतिं कृतार्थीकृततत्प्रयासकाम् ॥ ७६ ॥

सम्मर्द एकः सुमहानगच्छत
सचिन्त्य तद् रायवरेलिमुत्सुकः ।
ऐच्छत्तु तं शासनमत्र तादृशा
कार्येण नोत्साहयितुं तदा पुनः ॥ ७७ ॥

तेनातिरिक्ताः पुरुषाश्च सैनिकाः
सन्नाहिताः ते न सरेयुरग्रतः
इत्याशयाद् ग्रामबहिःस्थले नदी-
पारे निरुद्धः कृषकोच्चयो महान् ॥ ७८ ॥

काण्ठान्तरात्किन्तु तदापि सन्ततं
लोकाः समायान्ति किल स्म तत्क्षणम् ।
स्थानेऽस्मि रेलस्य यदागमं तदा
विज्ञातवांस्तां स्थितिमत्र योजिताम् ॥ ७९ ॥

नद्या दिशं तत्क्षणमेव चागमं
साम्मुख्यहेतोरिह सैनिकाः स्थिताः ।
आसादितं मण्डलविध्यधीश्वरे-
णाशु प्रलिख्य प्रहितं दलं मया ॥ ८० ॥

आलेखि-शीघ्रं भवता निवृत्यताम्'
इत्यापठन् पृष्ठपुटेऽहमालिखम् ।
आदिष्ट एषोऽस्मि कथं भवादृशा
धारां नु कामाश्रयता निवर्तितुम् ॥ ८१ ॥

यावच्च नास्योत्तरमेति कर्मण
स्तावन्निवृत्तो न भवाम्यहं स्वकात् ।
कूलं च नद्या अहमागतो रवं
कूलान्तरादाश्रृणवं भुशुण्डिजम् ॥ ८२ ॥

रुद्धोऽस्मि सेतावहमत्र सैनिकैः
प्रत्यैक्षिषं चोपनतः कृषीवलान् ।
त्रस्तास्तथा व्याकुलिताः कृषीवला-
स्तावत्समागत्य तु मामवेष्टयन् ॥ ८३ ॥

कूलेऽत्र नद्याः अभवन्निलीय ते,
तान् संग्रहीष्यन्निह योजयन् सभाम्।
सम्बोध्य तेषां तु सहस्रके भयं
निर्वास्य चोत्तेजनमानयं शमम् ॥ ८४ ॥

अग्रे कियन्त्येव पदानि नालके
गोलीभिराविद्धकलेवराञ्जनान्।
सर्वासु दिक्षूत्पतितांश्च सैनिकान्
ध्यात्वा च दृष्ट्वा च गताः स्थितिं पराम् ॥ ८५ ॥

साफल्यतः सा भवति स्म यत्सभा
ऽऽश्चर्यंतदत्यन्तमहो ममाभवत्।
आसन्नमी क्षीणभयास्तयेति मे
कश्चिच्च सन्तोषकरः क्षणोऽभवत् ॥ ८६ ॥

तावत्स वै मण्डलविध्यधीश्वरो
गोलीस्थलादागतवान् मदन्तिकम्।
तस्यातुरोधेन च तद्गृहं गतो
होराद्वयं नैकमिषैर्धृतोऽभवम् ॥ ८७ ॥

तस्याशयो मे कृषकान्तिकात्तथा
मित्रान्तिकाद् दूरभवस्थितो स्थितः।
पश्चादवेदि प्रचुराः कृषीबलाः
गोलीभिरेषां निधनं गता इति ॥ ८८ ॥

पश्चात्पदत्वं पृथगाश्रयश्च तै-
र्नाङ्गीकृतः शान्ततया किल स्थितैः।
विश्वास एषां किल येषु संस्थित
स्तैरत्र पश्चात्पदता त्वधास्यत ॥ ८९ ॥

अन्येऽभविष्यन्नभविष्यमेष वा
नूनं तदुक्तौ पृथगाश्रयेऽपि च।
नो विश्वसन्ति स्म च येषु तद्वचो-
ऽङ्गीकर्तुमेते स्म न चोद्यतन्ते ॥ ९० ॥

केनापि चाबोधि स विध्यधीश्वरो
यन्नेहरूरत्र मनाक् प्रतीक्षताम् ।
किन्त्वेष तन्न स्म शृणोति निष्फलो
यत्र स्वयं, तत्र सहेत मां कथम् ।। ९१ ।।

शिष्टिर्विदेश्या नहि रीतिमीदृशी-
मङ्गीकरोत्यत्र कदापि नीतिवित् ।
स्वीयप्रभावे भवतीह निर्भरा
सा किं प्रभावं परकीयमाश्रयेत् ।। ९२ ।।

घस्रेष्वमीष्वेव वरेलिमण्डले
गोलीप्रहारो द्विरभूत्कृषीबले ।
पञ्चायते वा कृषकाग्रणीस्तत-
स्त्रासाधिराज्ये वसतिस्म सन्ततम् ।। ९३ ।।

आन्दोलनस्यास्य दमाय शासनं
यन्निश्चयारूढमभूत्तदा द्रुतम् ।
काङ्ग्रेसयोगादिह चक्रचालनं
प्रारब्धमासीत्तदभूत्तु दूषणम् ।। ९४ ।।

तद्राज्यविद्रोहनिदर्शनीभवद्
दृष्टं सदापज्जनकं गृहेऽभवत् ।
चक्राण्यदह्यन्त तथाऽह्रियन्त यत्,
तत्रेत्थमासीद्दमनं प्रवर्तितम् ।। ९५ ।।

बन्दीकृतास्ते शतशोऽन्यथा तथा
दुर्गे प्रतापस्य बरेलिमण्डले ।
आन्दोलने कर्षककाङ्ग्रेसिके
ग्रामेष्वदान्ते बलवत्प्रशासनैः ।। ९६ ।।

आन्दोलनद्वन्द्वमिदं विशेषतः
सञ्चालितं नेतृभिरेककैरिह ।
ते ताडितास्तैश्च निगृह्य रक्षिता
आन्दोलनव्याधिरथाप्यवर्धत ।। ९७ ।।

फैजादिवादे दमनं सुदूरगं,
तत्राभवच्चाद्भुत एव सङ्करः
ग्राम्यैस्तु कैश्चित्कृषकैर्महीधर-
त्यैकस्य सर्वस्वमलुण्ठ्यताखिलम् ॥ ९८ ॥

पश्चात्तु विज्ञातमिमेऽन्यभूपते
भृंत्येन केनापि तदा तथेरिताः ।
यस्याभवत्तेन महीधरेण वै
किञ्चित्पुराणं किल वेरकारणम् ॥ ९९ ॥

एते वराकाः कथिता यथा किल
श्रीगान्धिनादिष्टममुष्य लुण्ठनम् ।
गान्धी जयत्येवमितीरयन्ति ते
लुण्ठन्ति चैनं स्म निकामसाधवः ॥ १०० ॥

श्रुत्वेदमासं भृशमेषु रोषणः
काण्डात्परं द्वित्रदिनैरगामहम् ।
पार्श्वे पुरश्चाकवरस्य तत्स्थलं
गत्वा सभां कामपि तत्र चाह्वयम् ॥ १०१ ॥

होराभिरेवात्र सहस्रपञ्चकम्
ग्रामेभ्य आगान्निकटात्सुदूरतः ।
तान् भर्त्सयन्नस्म्यवदं कथं त्वमी
कार्यं प्रतिघ्नन्ति पुराऽस्मदीप्सितम्॥ १०२ ॥

लज्जाञ्च काञ्चिद् गमिताः स्म एव तत्
सर्वस्य लोकस्य समक्षमीदृशीम् ।
दोषाश्रयैः स्वीक्रियतेस्म दूषणम्
श्रमं तु सत्याग्रहभावनोऽवदम् ॥ १०३ ॥

तल्लुण्ठने सम्मिलितान् स्वहस्तयो-
रुत्तोलनं कर्तुमहं ततोऽदिशम् ।
आश्चर्यमग्रे पुरुषाधिकारिणां
तत्रोत्थिताभूत् करविंशतिस्तदा ॥ १०४ ॥

एतस्य चासीत्परिणाम एषय-
तेषां शिरस्यापद आपतन्त्विति ।
एकान्तचर्चा विहितैषु कैश्चन
प्राकाशयंस्तेऽप्यपराधकारणम् ॥ १०५ ॥

तेषाँ पथश्च्यावनदुष्प्रसङ्गतो
दु:खं महन्मेऽभवदन्तरे पुन: ।
पश्चात्तपंश्चाहमचिन्तयं मुधा
मुग्धा इमे दण्डमखण्डमापिता: ॥ १०६ ॥

षट्त्रिंशतो न्यूनतरैर्जनैरयं
दण्डोऽनुभूत: शठवञ्चितैर्वृथा ।
शिष्टैस्तु नासीत्समयोऽयमीदृशो
यं प्राप्य सा किंचिदुदासिता भवेत् ॥ १०७ ॥

तन्मण्डले तत्कृषकावदोलनं
सम्मर्दितुं सोऽवसरोऽभवत्फली
बन्दीकृतास्तेऽत्र सहस्रशो जना:
कारागृहं पूरितमेव तैरिदम् ॥ १०८ ॥

वर्षं च यावच्चलिताऽभियोगिता
केचिन्मृता वन्दिगृहेऽभियोजिता:
केचिच्छ्रिता लम्बितवन्दितां पुन
र्वाला युवानोऽक्षपयन् स्वयौवनम् ॥ १०९ ॥

तत्रास्मि तेषामवलोकनाय यद्
यातोऽभ्यपश्यं तदतीव दु:खदम् ।
हा हा वृथा जीवनमेभिरापितं
व्यर्थं तथा यौवनमत्र यापितम् ॥ ११० ॥

सा भारतीये कृषके न धीरता
नो वीरता चास्ति चिराय योधिनी ।
दुर्भिक्षमारीषु प्रयन्ति लक्षश-
श्चाश्चर्यमेभि: स्थितमत्र वर्षत: ॥ १११ ॥

शिष्टेर्महीपस्य च सम्मिलद्दमं
सोढुं स्वशक्तिः किल दर्शिता तैः ।
श्रान्ता इवाभुः परमेषु शासनै-
रान्दोलनं मर्दयितुं प्रहार्यते ॥ ११२ ॥

भग्नं तदन्ते खलु साहसं सतां
तस्मै क्षणायाथ च मन्दवेगतः ।
आन्दोलनं तत्प्रसृतं प्रदर्शना-
न्यासन्न तेषां सुमहान्ति साम्प्रतम् ॥ ११३ ॥

ग्रामेषु केचित्त्वभवन् पुरातना-
स्तत्कार्यकर्तार इमेऽतिनिर्भयाः ।
किञ्चिन्न किञ्चित्किल कर्म कुर्वते-
स्मान्दोलनाग्निः शममेतु नो यथा ॥ ११४ ॥

सर्वं त्विदं जातमभूत्पुरैवत-
त्कांग्रेसकारागृहयाननिश्चयात् ।
तत्रापि योगः कृषकैरदीयत
प्रोद्दामभावेन दमे चलत्यपि ॥ ११५ ॥

शिष्टिश्च भीता कृषकावदोलनात्
शीघ्रं करोति स्म विधिं तदन्वितम् ।
एतेन चाशा जनिता कृषीबला
यास्यन्ति संस्कारवतीं दशामिति ॥ ११६ ।

शिष्ट्या तु दृष्टं कृषकावदोलनं
त्वस्माभिरेतत्परितो वशीकृतम् ।
इत्याशयस्तस्य विधेः श्लथीकृतो
मुख्या परीवृत्तिरिहाभवद्धि सा ॥ ११७ ॥

भूमौ भविष्यत्यधिकार एतया
त्वाजन्म साकेतकृषीवलस्य सः ।
इत्येषिकाभादतिलोभनीयवाक्
किन्त्वेतया नास्य दशा तु संस्कृता ॥ ११८ ॥

कुर्वन्ति साकेतकृषीवला: पुनः
काले च काले लघुमप्युपद्रवम् ।
सामर्थ्यमायादथ मूल्यतुच्छता-
पातेन सत्राऽऽपतितं च सङ्कटम् ॥ ११९ ॥

सर्वंरससिद्धान्तचर्चाचुञ्चुचञ्चुकलेखनी-
लिखितं जवाहरलालनेहरुचरितकाव्यमिदं नवम् ।
अत्र तस्य कृषीवलेषु भ्रमणमिति नाम्नाङ्कितो
नवमोऽप्यनवमः सर्ग एष समाप्तिमेति सदोज्ज्वलः ।

असहयोगः

स्रग्धरा

दशमः सर्गः

साकेतक्षेत्रजातं कृषकजनकृतान्दोलनं वर्णितं तद्
यन्मे तां भारतीयां प्रकटयति पुरा मूलभूतां समस्याम् ।
यस्यां नो राष्ट्रियाणां निपतति दृगपि प्रायशश्चिन्तकानां
हिन्दुस्थाने भवन्ति प्रतिदिशमिह चान्दोलनानीदृशानि ॥ १ ॥
लक्ष्माण्येतान्यशान्तेरवधकृषकतत्कार्ययोर्लक्षितानि
प्रायस्तेषां प्रकारः स्वयमिव रचितः कोऽप्यपूर्वोऽयमासीत् ।
येनागच्छन् रहस्यान्यभिमुखमिह नः कानिचिच्च प्रकाशं
प्रारम्भो राजनीत्या न च नृपनयिकैः पूरुषैस्तस्य बद्धः ॥ २ ॥
किन्त्वाऽऽरम्भात्समाप्तेरिह नृपनयिको नापि बाह्यः प्रभावो
नूनं स्थानीयमासीदिदमवधगतं भारतस्यास्य दृष्ट्या ।
अस्माद्धेतोरपीहावहितिरमनागेव दत्ता महद्भिः
संयुक्ते प्रान्तपत्राण्यपि तदनु पुरा दर्शयन्ति ह्युपेक्षाम् ॥ ३ ॥
नासीत् सम्पादकानामथ नगरवसत्पाठकानां कृते वा
नग्नानां कर्षकाणां ततिभिरवतते तत्र कार्ये महत्त्वम् ।
पञ्चाम्बूनां विरोधान्विवतनयविरहाणाञ्च चर्चा सदाभूत्
तान् दूरीकर्तुभूरीकृतयतनवरोऽसाह्ययोगोस्तु लोके ॥ ४ ॥
सर्वेषां ध्यानमस्मिन्नियमितमभवद् यद्यपीहादितोऽभू
न्नापि स्वातन्त्र्यचर्चा जगति बलवती न स्वराज्याभिलाषा ।
श्रीगान्धी गोलमूल्यायतविततगिरो न स्म वाञ्छत्यजस्रं
स त्वेकस्मिन् विशेषे नियमितविषये चात्मशक्तिं प्रयुङ्क्ते ॥ ५ ॥
लोकानां मानसेषु भ्रमति च पवनेऽपि स्वराज्यस्य चर्चा
स्थाने स्थाने सभायामथ भवति पुरा चास्य सम्मेलनेषु ।
दातुञ्चासाह्ययोगे स्वसहमतिमथवास्मिन् विरोधात्मके च
प्रश्ने पञ्चाम्बवीयेऽप्यधिविशति पुरा काङ्ग्रेसं विशेषात् ॥ ६ ॥

लालाश्रीर्बाह्यदेशं निजजननिभुवो भारताद्दीर्घकालं
यातोऽमुष्यामरीकाजनपदत इहागच्छदध्यक्षभावात् ।
तस्यास्यां योजनायामसहयुजि रुचिर्नाभवत्स व्यरौत्सीन्
हिन्दुस्थाने स गण्यो भवति नृपनये चोष्णवर्गीय एव ॥ ७ ॥

सामान्या जीवनेक्षा किल विधिनियता मध्यमैवास्य चासीत्
प्रारम्भेऽस्याः शताब्द्याः स तिलकसदृशामुष्णवर्गागुगानाम् ।
सङ्गी जातः स्थितेर्वै न तु हृदयरुचेरार्थिकी दृष्टिरासीद्
यद्वा सामाजिकी सा सुचिरबहिरधीवासतोऽभूद् दृढा या ॥ ८ ॥

हिन्दुस्थानीयनेत्रन्तरसमतुलया व्यापिकाऽभूदियं चे
त्यस्या हेतुर्न चान्योऽभवदिह परमस्तद्विदेशाधिवासः ।
विल्फेड्स्कावेन ब्लण्टो निजदिनविवृतिष्वस्य श्रीगोखलस्या-
लेखीत्साक्षात्कृतीनां विवरणमिह तन्नामशो वै दशाब्द्याः ॥ ९ ॥

स्पष्टं किञ्चिद् द्वयोरप्यलिखदयमहो तावुभौ श्वासपूतं
मार्गं यातः स्म वस्तुस्थितिमभिचलितुं बिभ्यतः स्मेति चोग्रम् ।
लालाजीर्नूनमन्यानतिशयित इहासां तु साम्मुख्यक्लृप्तौ
ब्लण्टे मुद्राङ्किताऽस्मानवगमयति नो नेतृनीत्योस्तु मान्द्यम् ॥ १० ॥

प्राप्तो याभ्यां समर्थोऽनुभवसहितः सज्जनस्तं प्रभावं
किन्त्वस्यामद्य विश्यां गतिरतिचपलीभावमाप्तास्ति तेषाम् ।
आसीदस्मिन्विरोधेऽसहयुजि विषये नैकलोऽसौ च सज्जो
यावत्तेनान्यलोका अपि गुरुगुरवस्तेऽभवन् सानुभावाः ॥ ११ ॥

कांग्रेसस्याखिलैस्तैरतिरथिभिरिहासाह्ययोगानुकूले
प्रस्तावे गान्धिनोऽस्मिन्सपदि प्रकटितोऽभूद् विरोधः सभायाम् ।
मुख्योऽभूद् देशबन्धुर्न खलु स मनुतेऽस्याशयं रोचमानं
किन्त्वग्रेऽप्यस्य यातुं स किल समुदितोऽभूद् विरोधाय तस्य ॥ १२ ॥

प्राधान्येनैष नासीन्नवलपरिषदां वै बहिष्कारपक्षे
प्रस्तावेऽस्मिन् पिता मे सहमतिमदधात्प्रत्ननेतृष्वमीषु ।
तस्मै चैतत्किलासीन्नहि सुकरमहो हासखेलादिकल्पं
प्रत्नैर्मित्रैः कृतानामयमवगतवानौचितीं प्रश्नकानाम् ॥ १३ ॥

तेषामाक्षेपवाचा मनसि मम पितुः स्थापितोऽभूत्प्रभावः
सोऽप्येकेनाद्भुतेन प्रचलितुमभवच्छङ्कितोऽन्तः पथा च ।
यत्रैत्य प्रत्ननूत्नानवितुमसुकरं चाप्युपायानथासीत्
तच्चित्तं प्रह्वभावं किल भजति पुरा सार्थके त्वभ्युपाये ॥ १४ ॥

प्रस्तावेऽस्मिश्च तादृग् विनियतसफलोपाय आसीच्च युक्तो
यद्यप्येनं पिता मे स्वरुचिसमुचितं नाभ्यपश्यत्समग्रम् ।
पक्षेऽस्मिन् स्वं विचारं द्रढयितुमधिकां सोऽनयत्तत्र वेलां
श्रीगान्धेर्देशबन्धोरपि स सुचिरं संलपन् भावमावेत् ॥ १५ ॥

घस्रेष्वेतेषु योगात्स किल समभिलद्देशबन्धुं विशेषात्
कस्मिंश्चिच्चाभियोगे पृथगपि च मिथः पक्षमापोषयेताम् ।
तौ तं चैतं प्रसङ्गं समतुलितदृशा पश्यतः स्मास्य चान्तं
तौ प्रायेणैवमेवानुगतमतितयाऽकल्पयेतां समानम् ॥ १६ ॥

अल्पीयांस्तु प्रभेदोऽलमभवदनयोः कांगरेसे विशिष्टे
प्रस्तावेऽस्मिन् प्रधाने प्रकटयितुमहो भिन्नभिन्नं स्वपक्षम् ।
तौ वै मासत्रयान्ते पुनरपि मिलतः स्मात्र यन्नागपुर्यां
तेनाग्रे सार्थवाहावतिनिकटतयाऽन्योन्यमित्रत्वमैताम् ॥ १७ ॥

कांग्रेसात्कालिकातापरिकलितविशेषाधिवेशात्पुराहं
स्तोकं स्तोकं हि द्रष्टुं पितरमवसरं प्राप्नुवं व्यस्तचित्तम् ।
प्रत्येकस्मिंस्तु तस्मिन्सततमकलयं तं विचारे निमग्नं
प्रश्नोऽयं राष्ट्रियः सन्नपि समभवदस्य स्वकीयोऽपि यस्मात् ॥ १८ ॥

स्वीकृत्यासाह्ययोगं खलु परिहरणीणं विधिज्ञस्य कर्म
प्रत्नादाजीवनाद्वा सपदि विमुखतासंश्रयश्चात्र कार्यः ।
नूत्नेनाजीवनेनान्वयनमपि ततः कार्यमेवेति नूनं
वर्षग्रन्थौ तु षष्ठे तदसुकरमभूत्सर्वथाऽऽयोज्ययमाने ॥ १९ ॥

प्रत्नैर्मित्रैर्नयज्ञैरथ च परिचिताऽऽजीवनेनापि सङ्गः
सामाजिक्या च वृत्या सह परिहरणीयः सदाभ्यस्तपूर्वः ।
भूयोभिश्च स्वभावैर्व्ययबहुलतया संश्रितैरद्य यावत्
किञ्चायद्वारचिन्ता, स्तरपतनविचारश्च तत्र स्फुटौ स्तः ॥ २० ॥

बुद्धिश्चात्माभिमानः प्रबलतरतया चाप्यखर्वोस्य गर्वः
सर्वे सम्भूय चान्दोलनदिशि पदतस्तं परं नीतवन्तः।
अन्ते सर्वात्मनासौ तदनु निपतितस्तैरनेकेषु काण्डे-
ष्वन्त्ये पञ्चाम्बुकाण्डे व्यथितहृदयतोऽन्यत्र वै तत्र तत्र ।। २१ ।।

रोषञ्चापूर्यमाणं स्मृतिमथ च कृतान्यायवृत्तेः कुवृत्तेः
आविष्कर्तुं च राष्ट्रात्यवमतिकटुतां कोऽपि मार्गः किलेष्टः।
नासीदुत्साहवीचिप्रवहनरसिको मत्पिता, निर्णयं चा-
कार्षीत्स्वस्थान्तरात्मा न्यपतदथ महान्दोलने श्रीलगान्धेः ।। २२ ।।

तस्यासीन्निर्णयोऽसौ मननमनुगतः सद्विधिज्ञैकबुद्ध्या
यस्मिन्पूर्वापराभ्यां सह च परिणतिः साधु सञ्चिन्तिताभूत्।
गान्धेर्व्यक्तित्वमेनं स्वदिशमनमयत्, निर्णयस्तेन चायं
नूनं प्राप्तप्रभावः समभवदमतो नानुगम्यो हि तस्य ।। २३ ।।

तस्यास्तां तीव्रतीव्रे अरुचिरपि अरुचि स्ते च तत्कार्यमूले
संयोगः किन्त्वपूर्वः स मम पितुरभूद् गान्धिना साकमेवम्।
गान्धिः साधुर्महात्मा यमनियमपरः संयमी जीवनस्या-
नन्दाद्भोगाद्विरक्तस्तनुसुखविमुखः क्वैष च क्वैष तातः ।। २४ ।।

भोगप्रेयाननेकेन्द्रियविषयसुखस्वागताभोगसेवी
लोके चामुत्र किं स्यादिति मनसि मनागेव येनाभ्यपेक्षि।
अन्तर्वृत्तेस्तु योगोऽभवदहह, बहिर्वृत्तितो ह्यद्भुतोऽयं
यत्प्रेम्णा, यद्धितेनोभयहृदयमिथःप्रह्वता बद्धताऽऽसीत् ।। २५ ।।

सेयं पश्चात्स्वनीत्योः पृथगभिमननादप्यहो न श्लथाऽऽसीत्
नात्राप्यासीत्प्रगाढा ध्रुवमुभयगता कापि मैत्री विचित्रा।
वाल्टर् पेटर यदाह—प्रकृतिविषमताऽपि प्रियत्वं न हन्ति
साधुभोगी च भिन्नादपि निजपदतः प्रस्थितौ प्रीतिमेतः ।। २६ ।।

धर्मात्मा धर्मशून्योऽपि च निजपथगौ जीवने भिन्नदृष्टी
अप्युत्साहे च तैक्ष्ण्ये तदितरजनतोऽत्युच्चभावावुदारौ।
प्रायोऽन्योन्यं विशेषादिह परिचिनुतो बोधतोऽन्यानपेक्ष्य
चेतःस्पर्शं कदाचित्क्वचिदनुभवतोन्योन्यमेतौ किलेति ।। २७ ।।

कांग्रेसे राजनीतौ प्रसृतमिह युगं श्रीलगान्धेर्विशेषाद्
यज्जागर्त्यद्य यावत् सुविदितसदसः कालिकाताख्य पुर्याम्।
मध्येकालं स कश्चित् स्वयमपसरति स्म स्वराज्यार्थपङ्क्ति-
नेतृत्वे वेशबन्धोर्मम च पितुरिहासारयत्तां पुरस्तात्॥ २८॥

दृष्टिः काङ्ग्रेसिकी सा परिणतिमगमत्कृत्स्नशो यद्विदेश्याद्-
वस्त्रौघाद् दूरमेता झटिति च परितः खादिरेवाभिदृष्टा।
काँग्रेसे नूत्नरूपाः प्रतिनिधिपुरुषा दृश्यमाना अभूवन्
निम्नश्रेणीभवा ये व्यभुरिह बहुशो मध्यमे वै दलेऽपि॥ २९॥

हिन्दुस्थानी विशेषाद्भवति समुदिता, सापि प्रादेशिकी च
प्रायः काङ्ग्रेससम्मेलनमधिविशति स्म प्रदेशे तु यस्मिन्।
नाजानन्नाङ्ग्लभाषां प्रतिनिधिपुरुषाः सङ्गता ये कियन्तः
कार्ये वै राष्ट्रियेऽभूत्प्रबलविमतिता चाङ्ग्लभाषाप्रयोगे॥ ३०॥

कांग्रेसीयाः सभास्ता विशदमिह दधुर्जीवनं नव्यभव्यं
उद्दीप्तं चापि तेजः प्रविदितमभवत्तासु सत्यं समुच्चम्।
सम्पन्ने चाधिवेशे मिलितुमुपगतः श्रीलगान्धि र्महात्मा
श्रीमोतीलालघोषं तममृतविपणेः सिद्धसम्पादकं तु॥ ३१॥

सोऽद्यासोन्मृत्युशय्यामधिशयित इति श्रीलगान्धिस्तमागात्,
साकं तेनास्मि चागां भविकमकथयद् घोष आन्दोलनस्य।
आशीर्वादेन वृद्धिं तदनयदथ चैवाह—सम्प्रत्यहं तु,
यास्यंल्लोकान्तरं तन्मनसि मुदमहं काञ्चिदन्तर्वहामि॥ ३२॥

तत्रास्ते न प्रशिष्टिर्ब्रिटिशतनुभृतां तिष्ठतात्क्वापि लोकः,
साम्राज्याद्दूरगोऽहं यदपि च भवितास्मीति मे तुष्टिरेषा।
प्रत्येष्यन् कालकृत्तादहममगममथो गान्धिना साकमेव,
श्रीमन्तं तं रवीन्द्रं प्रियसहजमथो द्रष्टुमस्याग्रजातम्॥ ३३॥

गत्वा शान्तेर्निकेतं च तदधिवसतोः कानिचिद् नौ दिनानि,
व्यत्यायन्तात्र चार्ली कतिचिददददात्पुस्तकानि स्वयं मे।
यान्याभुर्मे प्रियाणि, प्रचुररुचिमथाकार्षुरन्तःप्रभावम्,
अफ्रीकायां ब्रिटेनाधिपतिपदभवासीदिहोवतार्थहानिः॥ ३४॥

तेष्वेकं चास्ति मारेल्लिखितमपि पुनः कृष्णपुम्भारसंज्ञं,
यद् गम्भीरां स्वमुद्रां मनसि निहितवन्नार्चनीयां न जातु।
धस्नेष्वेतेषु चार्ली यदिह लिखितवान् पुस्तकं तत्र तेन,
हिन्दुस्थानं स्वतन्त्रं भवितुमुचितमित्याग्रहीतं किलासीत् ॥ ३५ ॥

स्वाधीनत्वं त्वरेष्टं, पदभृदभवदेतच्च मन्ये निबद्धं,
श्रेष्ठश्रेण्यास्तदासीद् भरतभुवि सिलीलेखमालादिसंस्थम्।
तन्मे चाभादिहासीत् खलु निजवशतौचित्यसिद्धिः समर्था,
स्वच्छास्वच्छ द्वितीया मम हृदयगतैर्भावचित्रैर्विचित्रा ॥ ३६ ॥

भाषासोत्तस्य साध्वी सरलऋतभृता चापि साधारणैव,
किन्त्वस्मत्स्वान्तकम्पं प्रजनयितुमलं गाढसम्प्रेरणाभिः।
अर्थोत्फुल्लाभिलाषानअपि विशदतया याऽनयन्मूर्तभावं,
नैषासीदार्थिके सा न च समनुधृता साम्यवादे कथञ्चित् ॥ ३७ ॥

शुद्धं तद्राष्ट्रियत्वं, महदिह च ततं तज्जडत्वं प्रतीमां,
चित्ते तुल्यानुभूतिं कलयितुमथ चाधोनिपाताद्विमुक्तिम्।
जात्या वैदेशिकोऽपि ब्रिटिशकुलभवोऽप्यस्मदन्तर्निनादं,
वाचा त्वात्मीययैवं समनुरणयतीत्यस्ति वार्ता विचित्रा ॥ ३८ ॥

सिल्या यत्पूर्वमुक्तम्—इयमसहयुजा वर्तते भावनैषा-
ऽस्माकं लज्जाकरः स्याद् बिटिशनिकृतिकृत्तैरयं साह्ययोगः।
व्याख्यातिस्मैड्रुजस्तत् सरणिरिह किलैका स्वमुद्धर्तुमास्ते,
मत्स्वान्तस्तो बलिष्ठा प्रभवतु जनिता क्रान्तिरेका जनानाम् ॥३९॥

अस्यै क्रान्त्यै च विस्फोटकमुचितमसौ भारतात्मा प्रसूतां
तद्वाह्यानां न केषांचिदपि वितरणात्प्रापणाद् घोषणाद्वा।
न स्यात्सौविध्यदानादपितु हृदयतोऽप्यन्तरुत्पादितं स्यात्
इत्यस्मादेव हेतोरवसरमसुकं वीक्ष्य हृष्टोऽहमासम् ॥ ४० ॥

एतादृश्येव शक्तिर्धमिति कृतवती स्फोटमन्तर्गताद्वा
काचिद्विस्फोटकाभा धमितबति महामन्त्रमत्रापि गान्धी।
'स्वाधीना भारतीया भवत, परवशा मा च भूतात्र दासाः
इत्येषोऽभून्निनादो भरतधरणिहृत्तन्त्रिकायास्तथैव ॥ ४१ ॥

एतेनात्मा मनश्चोभयमपि भरतोऽसह्यतः प्राप्य मुक्ति
नृत्यच्चासीन्मदीयं शिथिलितमवद्बन्धनं चापि तस्य।
आकस्मिक्यैव गत्या सुचिरनियमितो हन्त मार्गस्तदानी
मेकः स्वाधीनताया उदघटतमनागित्यभून्मेऽतिहर्षः ॥ ४२ ॥

अग्र्ये मासत्रयेऽथो सकलजनपदेऽसाह्ययोगस्य वीचिः
प्रोच्चैरुद्वेल्लिताऽभूच्छमयतु दमनं तामिदानीं कथं तत्।
साफल्याश्चर्यमासीत् नवसमितिबहिष्कारसम्प्रार्थनायाम्
रुद्धाः सर्वे न तस्यां सदसि तु गमनान्नापि शक्याश्च रोद्धुम् ॥ ४३ ॥

नास्याः सर्वासनानां प्रभवति कथमप्यत्र संरिक्तता यत्
निश्चेतुं मुष्टिमेया अपि मतदजनास्तत्सदस्यानिहार्हन्।
भूयांसस्तत्र सत्यं नहि मतदजनास्ते मतं दातुमायन्
ते सर्वे नोत्थिताश्च स्वमतकलितये प्रार्थिनो नेतृमुख्याः ॥ ४४ ॥

दैवान्निर्वाचनानेहसि सकलतदीयस्थलापेक्षणार्थं,
वेलेण्टाइन् शिरोलः स्वयमगमदसौ सर्वतः श्रीप्रयागे।
साफल्यं तद्बहिष्कृत्यभिधयतनगं वीक्ष्य विस्मेरचेताः
ग्राम्ये निर्वाचिकेन्द्रे कमपि च मतदं नागतं प्रेक्ष्य जातः ॥ ४५ ॥

तद्दूरेऽभूत्प्रयागादिति न निकटताजः प्रभावः स वाच्य,
इत्येषा चानुभूतिः स्वयमनुलिखितानेन वै पुस्तके स्वे।
सन्देहं देशबन्धुप्रभृतिकृतबहिष्कारयोगोपयोगे
प्राकाशिष्टान्ततोऽयं त्वमनुत विहितं निर्णयं काङ्ग्रेसे ॥ ४६ ॥

जाते निर्वाचने चाखिलविमतिलयोऽभूदथो नागपुर्यां
नैकैः काङ्ग्रेससभ्यैः पुनरसहयुजो मञ्च आरुह्यतेस्म।
तस्यास्यान्दोलनस्येदृशसफलतया तत्र दोलायमानाः
केचित्सन्दिग्धचित्ता अपि विनतहृदोऽसाह्ययोगे तदासन् ॥ ४७ ॥

नेतारः कालकृत्तात्परमदधुरुदासीनभावं पुराणाः
जिन्नानाम्ना प्रसिद्धः किल स समभूदेषु लोकप्रियोऽपि।
हिन्दूमुस्लिम्जनैक्ये यमकथयदियं नायडू राजदूतं
लीगं यस्य प्रभावान्निकटगतमभूच्चापि कांग्रेसकस्य ॥ ४८ ॥

कांग्रेसेनाथ रूपं यदिह परिधृतं साह्ययोगप्रतीपं
क्लृप्त्वा नूत्नं विधानं धृतमथ जनतासङ्कल्पानुरूपम् ।
तत्तस्मै न व्यरोचिष्ट किमपि कथं, चोच्यते तद्विरोधे,
हेतुः सा राजनीतिः परमयमभवत् तस्य तादृक् स्वभावः ॥ ४९ ॥

काङ्ग्रेसे तर्हि नैके नृपनयिकदृशाऽऽसन्नमुष्मादविज्ञाः
किन्त्वस्मिंस्तत्स्वरूपे न स रुचिमवहद्धार्दिकीं स्वस्वभावाद् ।
हिन्दुस्थानीयभाषाप्रवचनरुचिता खादिधारित्वमेषां,
सम्मर्दे प्रेक्ष्य जिन्ना स्वममिलितमिवापश्यदत्यन्तमेषु ॥ ५० ॥

यश्चोत्साहो बहिःस्थेष्वभवदयमिमं मत्तचाञ्चल्यमाश्रं
पश्यत्यस्मिंस्तथाऽऽसीद्भरतभुविभवानां जनानां च भेदः ।
ग्रामे वा भारतीये तृणकुटिरचिते चापि भेदोऽस्ति यावान्
सेवाइलरोस्थितेऽस्मिन् विभवपरिचिते बाण्डवीथीतिसंज्ञे ॥ ५१ ॥

एकान्ते सोऽब्रवीन्मामिह सदसि भवेन्मोट्रिकोत्तीर्ण एव
सभ्यो नाल्पस्तु तस्मादिति न तदविदं साहजं वा गभीरम् ।
किन्त्वेतत्तस्य दृष्टेरनुगतमभवद्येन कांग्रेसतोऽसौ
दूराद्दूरं गतोऽभूत्पृथगभवदथो भारतीयान्नयाच्च ॥ ५२ ॥

दुःखस्यास्ति प्रसङ्गो यदयमिह जनैक्यस्य दूतः पुराणो
लोकैः सम्पृक्त आसीत् प्रतिगतिमतिभिर्मुस्लिमैस्तैर्मतान्धैः ।
मध्यस्थानाँ तदानीं न खलु समभवच्चात्र सम्बन्धलेशो
दूरं कांग्रेसतस्ते नियतमपगताः सङ्गताः शासनेन ॥ ५३ ॥

नव्यायां योजनायामथ सचिवपदेऽध्यक्षभावे प्रतिष्ठाँ
वाप्तुं साहाय्यमाधुर्ब्रिटिशविभुतया कांगरेसाद् विरोधे ।
ऐच्छन्यद्यत्तथैते तदखिलमपि तैः प्राप्तमासीत्सुधाराः
केचिद्दत्ता हि तेभ्यो न खलु फलमिमेऽद्राक्षुरान्दोलनस्य ॥ ५४ ॥

उद्वेल्लन्नेकतोऽयं महसि तरसि चाभूत्क्रमात्क्रान्तकारी
क्रान्तेरन्यत्र तत्र प्रतिपदमदधुस्ते विरोधं समक्षम् ।
शिष्टेरङ्गानि चैते सपदि जनतयाऽत्यन्तपार्थक्यमापुः
प्रत्येकस्मिन् प्रसङ्गे व्यसनमिव दधुः शिष्टिदृष्ट्यैव द्रष्टुम् ॥ ५५ ॥

तच्चापाय्यस्ति तेषां स्थिरमिव परमद्यास्ति तेषां न पक्षः
शिष्यन्ते केवलं ते क्वचन कतिपये नागरास्तेऽपि केचित् ।
निश्चिन्तास्ते न चासन् निजजनगणतस्तत्पृथक्त्वं च वैरा-
भावे वैरानुमानं भजति न सुखदा नूनमेषाऽनुभूतिः ॥ ५६ ॥

उद्वेल्लन्वै जनौघो न च हृदि दयतेऽतः पृथक्संस्थितेभ्यः
इत्येषा भीतिरेषां सुखचयनमयं कालमग्लापयच्च ।
यद्यत्युद्बोधनाभिर्व्यदधत मृदुलं सौम्यमान्दोलनस्य
श्रीगान्धिर्यविदेतं स्थितिषु च विषमामु प्रकर्तुं तदर्हम् ॥ ५७ ॥

येनानेनानुकुलेष्वतिशयितबलं स्फूर्तिराधायि तेषां
दत्ताभूत्प्राणशक्तिस्तदनु च वितता कार्यशक्तिः समग्रा ।
तस्मिन्नान्दोलनेऽस्मिन् चलितुमपि महत् कष्टमासन् प्रपन्ना
स्तद्रोद्धुं चेष्टमानास्स्वयमवृणत तत्प्राणसंरोधदुःखम् ॥ ५८ ॥

सत्यान्यान्दोलनानि द्विगुणमिह फलन्तीदृशं स्वप्रभावं,
येषु क्रान्तिप्रतिष्ठा भवति च जनतोद्वेल्लनं तादृगुग्रम् ।
उत्साह्यन्ते स्वपक्षाः प्रगतिपथजुषश्चेद्भिदान्दोलनैस्ते
दम्यन्ते तैर्विचारैः सह तमिदमहो यं यतन्ते निरोद्धुम् ॥ ५९ ॥

हेतुश्चैवैष यस्मादभिदधति जना नूनमध्याक्षिपन्तो,
नास्त्येवासाह्ययोगे सहनबलमिति प्रायशोऽन्धप्रवृत्तौ ।
अन्नैकामेव बुद्धिं प्रददति पुरुषाः कर्म कुर्वन्ति चैक-
मित्येतत् सयमुक्तं भवति भुवि पुरा, किन्तु चिन्त्यं रहस्यम् ॥ ६० ॥

लोकस्यान्दोलनेऽस्मिन्नसहयुजि महानग्रणीरेक आसी-
देतादृक्षः पुमान् यं भरतभुवि जनाः श्रद्धया संश्रयन्ते ।
हिन्दुस्थानीय कोटिप्रगुणितपुरुषेष्वस्य चासौ प्रभावो
भक्ति लोकातिरिक्तामजनयत यया तेऽन्वपश्यन् सदैतम् ॥ ६१ ॥

इत्थं चाभाद् यथायं सकलजनगणो बन्दिगेहात् कुतश्चिद्
भाराद्वा मुक्तिमाप्तः स्ववशिमनि नवं भावमन्तःश्रितश्च ।
गुर्व्या भीत्या ययासीत्प्रदमितदलितश्चाभवत्सापनीता,
यातो मध्यञ्च मूर्घोन्नमनसरलता तस्य लोकस्य चेति ॥ ६२ ॥

गच्छन् दूरापणेष्वप्यलपदिह जनः कांगरेसे स्वराज्ये
भीमे पञ्चाम्बुकाण्डे ब्रिटिशप्रभुतयासाह्ययोगे च नित्यम् ।
अर्थञ्चासाह्ययोगेतिपदनिंगदितं जानते ग्राम्यलोका-
स्तेऽपूर्वं तं विरोधं ब्रिटिशप्रभुतया सर्वभावैरकार्षुः ॥ ६३ ॥

एतेभ्यश्चातिरिक्ता अपि निजविपदः सूचितास्तैरभूवन्
न्नार्थिक्यश्चाप्यतन्वत्समितिपरिषदो राजनीतेः सुशिक्षाम् ।
कांग्रेसे कार्यजातं सकलमपि भवेत्पूर्णमित्यत्र लग्ना
बिभ्रत्येके मदार्ता इव निरवधिकं तेजउत्साहमाशाम् ॥ ६४ ॥

सानन्दा अन्वभूवन्सुखरमधिकं धर्मयुद्धे शुभार्थे
मग्ना वीरा इवासन्निह खलु रहिताः शङ्कया च ह्रिया च ।
तेष्वासं तेन जाने प्रकटनिजपथा वर्धमानाः किताग्रै-
ऽन्योसाहैरुल्लसन्तो वयमितरजनानग्रतः प्रैरयाम ॥ ६५ ॥

अस्माभिः प्राणदानावधि धृतनियमैर्हापितं नैव किञ्चित्
एतावांश्च प्रयासः क्वचिदपि न कृतोऽभूत् पुराऽथो कदाचित् ।
अज्ञासिष्मातिशीघ्रं ब्रिटिशप्रभुतया भावि संघर्षजातं
स्यामैते वारिता नो यदवधि तदवध्येव कार्यं स्वकार्यम् ॥ ६६ ॥

एतद्भिन्नः प्रवृद्धो मनसि समभवद्यन्निजाधीनताया-
श्चास्या गर्वस्य भावो यदपि च निरगात्पारतन्त्र्याभिमानः ।
साफल्यं नाप्तुमर्हा वयमिह दमिताश्चेति दैन्यं निरस्तं
भीत्या कर्णेजपत्वं विधिविहितगिरा भाषणञ्चाप्यपास्तम् ॥ ६७ ॥

यावन्मन्यामहेऽद्धा इह यदनुभवामश्च तत्कर्म कुर्मः
ब्रूमः कृत्स्नं च वाच्यं स्फुटमथ प्रकटं दुन्दुभिध्वानतुल्यम् ।
नापेक्षाऽऽसीत्तदीया परिणतिरभवद् वन्दिगेहप्रतीक्षा
तेनास्मल्लक्ष्यसिद्धौ सपदि सहकृतिः कापि कार्येति मत्वा ॥ ६८ ॥

नैके भेदप्रयुक्ता अपि च नृपचरा नः परीवृत्य नित्यं
तेऽतिष्ठन्नन्वगच्छन् सपदि च चलतो यत्र तत्रापि दीनाः ।
तेषां चाभूदवस्था खलु विषमतया शोचनीया समन्तात्
नासीदस्मासु गोप्यं प्रकटसकलकार्येष्ववार्येषु तेषाम् ॥ ६९ ॥

सन्तोषो नास्ति चेयान् यदि नृपनयिकं कर्म कुर्मः कृतार्थं
येनास्मन्नेत्रयोस्तत्परिणतिमयते भारतस्यास्य चित्रम् ।
विश्वासोऽस्माकमासीन्निकटमुपगत तत्स्वतन्त्रत्वमिष्टं
नैतिक्या उच्चताया मनसि समुदितो हन्त भावोऽपि कश्चित् ॥ ७० ॥

यन्नः साध्य ससुच्चं यदपि च विमलं साधनं नः समग्रं
नेता चास्माकमासीत्तदुचितसरणिश्चापि गर्वस्य पात्रम् ।
आत्मानं मन्यमानाः क्वचिदपि पुरुषेषूत्तमं साधिकारं
संग्रामे सक्तचित्ता अपि तमुपनयन्तोऽपि शं किञ्चिदाप्ताः ॥ ७१ ॥

तेजस्तन्नैतिकं नः समुपचितमभूत्तस्यथा चात्र सत्य
शिष्टेस्तेजस्तथा तत्त्वरितमपचितं साऽऽस्त मूढा तदानीम् ।
किन्त्वेतज्जायतेऽद्धा परिचितमखिलं प्रत्नमस्या जगत्तत्
हिन्दुस्थाने समन्तात्पतदिव तमयात्काकतालीयमेतद् ॥ ७२ ॥

दूराद्दूरादपीदं किमपि नवमिवाक्रामकत्वं तथात्मा-
ऽऽलम्बो निश्शङ्कभावो झटिति प्रविततो भारतीयेषु हृत्सु ।
किञ्चामन्दः प्रतापो ब्रिटिशप्रभुतया योऽवलम्बः श्रितोऽभूत्
स स्पष्टं मन्दमन्दं क्वचिदपि विलयं विन्दति स्मेति सत्यम् ॥७३॥

स्तोकात्स्तोकात्कृतैतच्छमनदमनतः प्रत्युतान्दोलनं तद्
वृद्धिं यातं स्म शिष्टिश्चिरमिह महतः शङ्कते नेतृवर्गात् ।
सा सङ्कोचं भजन्ती न खलु तमग्रहीन्नाप्यवेदीदुदर्कं
हिन्दुस्थानीयसैन्यं किमु भवति न वा किञ्च विश्वासपात्रम् ॥ ७४॥

आदेशं पालयिष्यन्त्यथ पुरुषगणास्ते नवेत्यप्रचिन्त्य
शिष्टिर्विस्मेरताञ्चाकुलितहृदयतां प्रापदित्यस्ति सत्यम् ।
तच्चैतल्लार्डरीडिंग् स्वयमकथयदित्यस्ति विज्ञातमेतद्
ग्रीष्मे युक्तप्रदेशे भ्रमदतिरुचिरं गुप्तपत्रं समन्तात् ॥ ७५ ॥

सम्बोध्या मण्डलेशा इह च समभवन् पत्रमेतच्च पश्चात्
कस्मिंश्चिद्वृत्तपत्रे प्रकटितमभवत् तत्र दुःखेन चोक्तम् ।
अस्मिन्नान्दोलने चाक्रमणबलमिदं काङ्ग्रेसस्य हस्ते-
ऽस्मच्छत्रोस्तिष्ठतीति प्रयतनमधुना कार्यमेतत्क्षयाम ॥ ७६ ॥

केस्कैश्वोपायवृन्दैर्बलमिदमखिलं शिष्टिहस्ते समेया
दित्येतत्तत्र चोक्तं विफलशमसभास्थापनाप्येष सासीत् ।
रीतिश्चासाध्ययोगा लिवरलसचिवादेशिता मन्यते स्म
केषांचिच्छासकानामसहयुजि पराभूयतेस्माथ संज्ञा ॥ ७७ ॥

मस्तिष्कं चापि तेषां परमविकलतां प्रापदत्यन्तगुर्वीम्
शिष्टेः साम्मुख्यक्लृप्त्या अनुदिनमथ तद्विप्रतीपो ह्यमेभ्यः ।
प्राबल्यं भावनानां भवति, हृदयखे येन चिन्ताधनास्ते
वेष्टन्ते शासकानां शमभयकरणं काङ्ग्रेसं नजय्यम् ॥ ७८॥

अद्य स्वप्ने समेतः स्वयमपि समहान्नेहरूनेतृवर्यो
मां मन्दं दर्शने स्वे कृतसफलदृशं मन्नमस्कारदृष्टः ।
प्रोवाच क्लिष्टचेता अहह ऋषिकुलं दुर्दशाग्रस्तमेवं
जातं किन्तस्य कश्चित् क्वचिदपि पुनरुद्धारको नास्ति लोके ॥ ७९ ॥

तन्निर्देशान्ममेदं मनसि कृतमयं प्रेरयन्मां तदर्थं
साहित्ये व्यस्तचित्तं लगयति मतिमांल्लौकिके चापि कृत्ये ।
मद्वत्सोऽयं स्वसार्थैः सह जननभुवोऽकल्पयत क्षेममेवं
तद्वत्कुर्यां किलाहं मतिजननभुवोऽस्याः समुद्धारयत्नम् ॥ ८० ॥

कांग्रेसं शान्तिमार्गे शममयकरणैश्चेष्टते लक्ष्यसिद्ध्यै
साम्मुख्यं तस्य कर्त्तुं परिभवितुमथैतत्सहपुनर्निग्रहीतुम् ।
नासीत्तत्रावकाशः परमिह बहवोऽङ्ग्रेजजात्या अहिंसां
कांग्रेसस्यान्तरङ्गे सुदृढमवहितां नाभ्यमन्यन्त नूनम् ॥ ८१ ॥

ते जानन्तीदमास्ते छलमिह सकलं व्याजमात्रं च गूढं
षड्यन्त्रं गोप्तुमेतत्क्वचिदपि दिवसे भावि हिंसोपघातम् ।
ते शिक्ष्यन्ते हि बाल्याद् भवति खलु भृतः पूर्वदेशो रहस्यै
तद्वीथीवापणोऽस्त्यस्ति किल निशि दिने गुप्तषड्यन्त्रक्लृप्तः ॥ ८२ ॥

तस्मादेते रहस्येक्षणपुणदृशो मुग्धदेशप्रसङ्गम्
वीक्षन्ते वक्रभावात् सरलमपि रहस्योज्झितं पूर्वदेश्यम् ।
विज्ञातुं नो यतन्ते बिदधति च ततो दूरमेवाभिवेशं
भेदज्ञैर्गुप्तपुंभिः कथितमनुपगतान् कल्पयन्ते विचारान् ॥८३॥

तैश्चामीभिर्विचारैर्भरतभुवि गते मानुषे कल्पनाना-
मुड्डीनं ते स्वतन्त्रं विदधति न ततो वस्तुरूपं विदन्ति ।
अस्मिन्कालेऽथ पञ्चाम्बुनि च जनपदे किञ्चिदेवं प्रवृत्तं
ये नाङ्ग्रेजेषु चान्याधिकृतनरवरेषूत्थिता कापि भीतिः ॥ ८४ ॥

ते सर्वत्राभ्यपश्यन् सभयमतिभयं, चापि विद्रोहमेकं
भूयोऽन्यं विप्लवं चाभ्युदितमरिबधे बन्धने च प्रयोज्यम् ।
प्रत्येकस्यां स्थितौ स्वावनसहजमनोवृत्तिरामील्य नेत्रे
तांस्तांस्तैर्घोरघोरानवचनविषयान् क्रूरकाण्डाननकर्षीत् ॥ ८५ ॥

तेषां नामप्रतीके अमृतसरसविख्यानवीथ्यादिवृत्ते
वृत्ते जाते कठोरे यदसितिमगतो डायरः पङ्क्लोऽभूत् ।
वर्षैः संघर्षमूलोऽभवदयमिह सा भूयसी काण्डसृष्टि
र्दृष्टा यैः शासकानां क्षुभितकुपितभीताकुलत्वोद्भव स्यात् ॥ ८६ ॥

यत्किञ्चिज्जायते स्मानुचितमिदमभूत्किन्तु यत्तर्क्यतेस्मा-
सीत्तत्स्मादभद्रं स्मरति मम मनस्तत्र दृष्टान्तमेकम् ।
एतेन ज्ञापिता स्यात्तदखिलकलना वाजिवेगानुवीक्षा
रूपाया मन्द्रुगिन्याः सुपरिणयविधिर्यत्र भावी किलासीत् ॥ ८८ ॥

पञ्चाङ्गावेक्षणेन प्रतिनियतमभूत्तद्दिने सन्महूर्तं
श्रीगान्धिः कांगरेस्या अपि च तदितरे तत्र चामन्त्रितास्ते ।
आस्तां यत्रालिबन्धू अतिथिसुविधयाऽत्रैव काले प्रयागे-
साहूता काङ्गरेसी समितिरपि जना यत्र पश्येपुरग्र्यान् ॥ ८९ ॥

नेतृंस्तान्वीक्ष्य तद्भाषणसुखमपि ते प्राप्नुयुश्चेति मत्वा-
तत्रत्या आरभट्या व्यदधत महदायोजनं मण्डलस्य ।
आशासाना यदस्मिन् निखिलजनपदात्सङ्ख्यया वै महत्या
ग्राम्या अप्यागमिष्यन्त्यथ कृषकजना भव्य सम्मेलनेस्मिन् ॥ ९० ॥

एतेषां राजनीतेर्बहुविधसदसां कारणेन प्रयोगे
व्याप्तं तत्किञ्चिदोजः स हलनचलनं प्राप्तहर्षप्रकर्षम् ।
किन्त्वेतनैव केषाञ्चन मनसि भयं जातमासीदपूर्व-
मित्राद्वैरिष्टराच्चाश्रृणवमहमिहानेन सम्मेलनेन ॥ ९० ॥

अङ्ग्रेजानां वहूनामपसरति चितिर्जायते चातिभीतिः
यत्कश्चिद्विप्लवो वा प्रभवति नगरे भीषणोपद्रवो वा ।
हिन्दुस्थानीयभृत्येभयविकलहृदोऽविश्वसन्तः स्वकक्षे
पिष्टालं धारयन्तः शरणमिह महादुर्गमन्तर्दधन्ते ॥ ६२ ॥
आश्चर्यं मेऽभवन्नाप्यहमगममहं कोऽपि कस्मात्प्रयागे
शान्तेऽस्मिन् सुप्तकल्पे किमपि सुविषमोपद्रवे शंकितः स्यात् ।
यत्राहिंसैकदूतः स्वयमपि समये चागमिष्यन्निह स्या
दित्येषो हा विशेषोऽपि न मनसि कृतः कल्पनानल्पदाक्ष्यैः ॥ ६३ ॥
संयोगात्तद्दिनाङ्के मयरचितपुरे यत्पुरोपद्रवोऽभूत्
तस्यायोजिष्यतेऽह्लोत्सव इति च जनैः कैश्चिदुत्प्रैक्ष्यते स्म
वर्षेऽत्रासाह्ययोगाश्रितमतिशयितां प्राप्तमान्दोलनं तत्
तेनाऽस्मिन् मौलवीभिर्नृपनयिकरणे भूरिभागो गृहीतः ॥ ६४ ॥
अन्यैर्मुस्लिम्मताग्र्यैरपि निजयतनैःसम्प्रदायस्य रङ्गो
ऽस्मिन्नध्यारोपि के माधिकतरमभवन्मुस्लिमा भाववन्तः
भूयांसः पश्चिमानामनुकृतिनिपुणाः सम्प्रदायान्तरस्थं
कूर्चंश्मश्र्वादिवेशं मतविहितमथान्ध्यञ्च निर्देशमाधुः ॥ ६५ ॥
पाश्चात्यो वर्धमानः पुनरशिथिलयन्मौलवीनां प्रभावं
सोप्यत्रान्दोलनेऽभूदतिशिथिलतरोऽवीव्रधच्चापरोयम् ।
श्रीगान्धिश्चालिवन्धू अपि मतरुचिकौ तं क्रमं पोषयन्तौ,
मौलानामौलवीसत्करणपटुतया तत्र भूर्यायितेताम् ॥ ६६ ॥
श्रीगान्धिर्धार्मिकं वा सवलयति दलं नूनमाध्यात्मिकं वा
सर्वस्यान्दोलनस्येत्यवितथमथ त द्धर्म आसीन्न रूढः ।
किन्त्वेषो जीवनस्येक्षणविधिषु परां धार्मिकीं दृष्टिमैच्छत् ।
तस्मादान्दोलनेऽस्मिन् तदभिमतदृशोऽभूत् प्रभावोऽनुशिष्टः ॥ ६७ ॥
लोकानाञ्चापि दृष्ट्या प्रयतनमखिलं चैतदाभात् किलैकं
भूयोऽप्युद्धर्तुमेता भरतभुवि भवाः सुप्रजा दैन्यमाप्ता ।
काङ्ग्रेसीया अनेकेऽनुकरणसरणिं नेतुरेवाश्रयन्त-
स्तच्छब्दालीमथोच्चैः प्रवचनसमये भूय आवर्तयन्त ।
श्रीगान्धेः कार्यसंसद्यभुरथ प्रमुखाः सार्थिनः किन्तु केचित्-
मत्तातो देशवन्धुः स लजपतिरथान्येऽपि केचिन्महान्तः ॥ ६८ ॥

ये नासन् धार्मिकाम ये नृपनयिकदृशा चाभ्यपश्यन् समस्याः
स्वव्याख्यानेषु धर्मं खलु विषयतया नाद्रियन्ते स्म ये च ।
ये यद् व्याचक्षतेस्म प्रभवति तु ततोऽन्वक्षदृष्टान्त एषां
सर्वं स्वं तैर्हि मुक्तं यदपरमनुजा मूल्यवन्मानयन्ति ॥ ९९ ॥

पूर्वस्माज्जीवनाच्चाधिकसहजतया स्वीकृतं जीवनं यै-
स्त्यागाख्यो यैश्च धर्मो धृत इति जनता सा स्म यान् सत्करोति ।
त्यागेनानेन नूनं स्वयमिह महता धर्मचिह्नेन लोके
भूपस्तूद्धारवातावरणवितते भूरि साहाय्यमार्पि ॥ १०१ ॥

हिन्दूनां मुस्लिमानामुभयदिशि पुनर्धार्मिकत्वस्य वृद्ध्या
वैकल्यं मे कदाचिद् भवति बहुतरं तस्य तद्रोचते मे ।
मौलानामौलवीयाः प्रवचनसमये स्वामिनोऽन्ये च विज्ञा
भूयोयद्भान्तेऽत्र मम विकृतिकरं भाति राष्ट्रस्य पक्षे ॥ १०२ ॥

तेषाँ कृत्स्नेतिहासो मम गलतिभृतो भाति चैवार्थशास्त्रं
सामाजिक्यं च शास्त्रं त्रुटिभिरतितराँ पूर्णिमाभाति चातः ।
प्रत्येकं वस्तुने यन्मतगमहिमा दीयते स्मात्र यत्तै
स्तेन स्पष्टो विचारो नियमित इति मे रुद्धवेगः स्म भाति ॥ १०३ ॥

काचित् काचिकत्तु गान्धेरपि पदरचना कृन्ततीव श्रुता मे,
तेनोक्तं रामराज्यं, यदिह स पुनरानेतुमैच्छन् महात्मा ।
आक्षेप्तुं तन्न काले मम न वरमभूदित्यहं शान्त आसं,
श्रीगान्धिश्च प्रसिद्ध्या पदमिदमवदन्नान्यथेति प्रचिन्त्य ॥ १०४ ॥

जानात्येतद्धिलोको हितसुखभरितं रामराज्यं किलासीत्
श्रीगान्धिश्चास्य चित्तं प्रविशति कलयाऽऽश्चर्यमप्यानयैव ।
किन्त्वेतादृक् प्रपञ्चे न सुचिरमपतं कार्यमासीन्महन्मे
वेगाच्चान्दोलनस्य प्रगतिरियमभूद्यत्र चिन्त्यं न तुच्छम् ॥ १०५ ॥

तस्मिन् कालेऽहमेतादृशमखिलमिहामन्यमानो नगण्यं
नापेक्षां काञ्चिदेषां सुलघुलघुतराणां पदानामकार्षम् ।
कुत्राप्यान्दोलने वा महति बहुविधाः मानवाः सम्मिलन्ति
यावत्सत्या दिशास्ते भवति न विकृतिः कापि तावद्विवर्तैः ॥ १०६ ॥

श्रीगान्धि चिन्तयामो यदिह स सुतरां वर्ततेऽज्ञेयकल्पः
तद्भाषा क्वापि साधारणजनमनसा नैव गम्या स्म भाति।
किन्त्वेतन्मन्यमाना वयमिममियता ज्ञातवन्तो यथायं
कोप्यास्तेऽत्र द्वितीयः पुरुष इति महस्वी स नेतास्ति चेति ॥१०७॥

श्रद्धापात्रं ततो नः स समभवदथास्मै समस्तोऽधिकारो-
ऽस्माभिः प्रत्यर्पितोऽभूदयमिह बहुधा तस्य चर्चां विदध्मः।
वैचित्र्याण्यस्य चित्राणि च नवमननान्यस्य चालोचयाम्
हासाद्भ्रूमश्चलेयुर्नखलु खपतनान्यस्य लब्धे स्वराज्ये॥ १०८॥

सत्यप्येवं किलास्मास्वधिकतरनरा राजनीतौ च कार्ये-
ष्वन्योन्यस्य प्रभावान्नियमितमनसो प्राभवन्नापि धर्मे।
साफल्यं नैति यत्रात्रमण ऋजुतया काचिदाशा नराणां
तत्रावृत्य प्रयाणाल्लसदवधिरभूत्तत्प्रभावोऽनुपेक्ष्यः ॥१०९॥

वाह्याचारा न धर्मे क्वचिदपि मनसि स्थानमापुर्मदीये
वृत्तं सर्वातिरिक्तं त्विदमिह न सहे शोषणं धार्मिकाख्यैः।
धर्मं प्रत्येष नम्रोऽभवमिह तदपि श्रीलगान्धेः प्रभावात्
आबाल्पादत्र वर्षेऽधिकरुचिरभवं चान्यकालात्तु धर्मे॥११०॥

किन्त्वेषो नान्तिकेऽगामधिकतरमहो तस्य धर्मस्य जात्व
स्माकं सत्याग्रहे चाऽद्रियत खलु मया नैतिकं सच्चरित्रम्।
नाहिंसापक्ष आधारित इह मयका सर्वथा सर्वदा वा
किन्त्वाकर्षत्सदामामधिकतरमयं स्वं प्रतीत्यास्त चित्ते॥१११॥

विश्वासो मे द्रढीयान् भरतभुवि यथा स्थित्यं साधुपक्षः
कामादर्थाच्च धर्मोऽधिकहित करतां जीवनेऽस्मिन् बिभर्ति।
यादृश्यास्ते प्रणाली सुचिर समयतस्तत्रन्वास्तेऽनुकूलः
लोकानां संग्रहाय ध्रुवसयमधिका कर्षको राजनीतेः॥११२॥

पारम्पर्यादुपेता इह मनसि नृणां ये च संस्कारलेशा
स्तेषां दृष्ट्यापि तावद्भवति समुचिता नीतिरस्माकमेषा।
नीतेराध्यात्मिकत्वं विततमिह ममाभान्मनोज्ञो विचारो
लक्ष्यं ह्युच्चं किलोच्चैर्नृभिरिह करणैः प्रापणीयं तदुच्चैः॥११३॥

सिद्धान्तो नीतिमात्रान्न खलु समुचितो राजनीतिप्रयोगा-
दप्यासं भ्रान्तिशून्यो विफलयति कृतिं संग्रहोऽसाधनानाम् ।
सोऽयं नूत्ना: समस्या जनयति च नवा आपद: किञ्च जाते-
र्व्यक्तेतत्रर्मूर्धावनमनमथ तद् दुःसहः पङ्कपातः ॥ ११४ ॥

निन्द्यं चात्माभिमानस्खलनमिदमथा हन्ति चात्मानमारा-
च्छक्तः को रक्षितुं वा कलुषितभवनात्किञ्च मूर्धावनामे
को रक्षेद् गौरवं स्वं जठरभरणतश्चाशु गन्तुं क्षमःस्या-
दित्यासन् मे विचारा, अददत च किलाबोधनं मे तदेतद् ॥११५॥

यच्चैच्छं राष्ट्रियं तं स्ववशिमनि पुरो निम्नवर्गेषु शोष-
स्यान्तं, तत्साधनञ्चानुगतमिह तु यन्नैतिकान्मेऽग्रभावात् ।
यैर्मे वैयक्तिकं चाप्यनुभवविषयं तत्स्वतन्त्रत्वमाप्तं
तैर्मेसन्तोष आसीद् ध्रुवमतिशयितो व्यक्तिगामी प्रकामम् ॥ ११६ ॥

वैफल्पाशङ्कयापि प्रचलति न मनो यत्र मेऽतिप्रसन्नम्
वैफल्यं तादृशं वै क्षणिकमिह भवत्युन्नतोत्साहसत्वे ।
श्रीगीताध्यात्मिकत्वं न समविदमहं नामुनाऽऽकृष्ट एव
किन्तु श्लोका अरोचन्त हि मम पठिता आश्रमेतेऽधिसन्ध्यम् ॥ ११७ ॥

आस्ते येषूपदिष्टं भवतु भुवि पुमान् कीदृशः शान्तधीरो,
गम्भीरोऽकामकर्माऽचल इह न फले सक्तिमानित्यमूल्यम् ।
नाहं वर्तेऽतिशान्तो न च फलविषयासक्त एवास्मि मन्ये
दस्मादादर्श एषो मम रुचिमहरत्प्रत्यभाच्चातिभव्यः ॥ ११८ ॥

सौन्दर्यशास्त्रावतरणिकायाः सोदरत्वमुपाश्रितं
श्रीमज्जवाहरलालनेहरुकाव्यमेतदिहोज्ज्वलम् ।
अत्र दशमः सर्ग एष समाप्तिमेति समन्ततोऽयं
यत्र सर्वस्यापि नेतुर्ब्रिटिश शिष्टचा सह न योगः ॥

आद्यः कारावासः

स्वागता

एकादशः सर्गः

वर्ष एष पुनरास्त विशिष्टो यत्र विस्मयकरा अभवन्नः।
राष्ट्रियत्वनृपनीतिविमिश्रा धार्मिकत्वधृतभावुकताद्याः॥ १ ॥
सर्वमूलगतयास्त किलैषां सा कृषीबलदले यदशान्तिः।
तद्बृहन्नगरवर्धिसमग्रश्रान्तिजीविमहदुद्यमनञ्च ॥ २ ॥
राष्ट्रियत्वमथ चास्फुटदेशव्यापिशक्तिमदुदाहरणत्वम्।
भिन्नभिन्नमपि जातु विरुद्धञ्चापि तत्तदखिलं समगृह्णात्॥ ३ ॥
तच्च तत्र सफलत्वमवापद् राष्ट्रियत्वमथ शक्तिबलञ्च।
तत्र मूलमभवत्खलु हिन्दूमुस्लिमादिजनराष्ट्रियता च॥ ४ ॥
ध्यायति प्रततभारतसीम्नो बाह्यमप्यहह राष्ट्रियतेयम्।
भारतीयपदवाच्यतया या युज्यते स्म युगभावनयापि॥ ५ ॥
तत्क्षणं हि सममेतदचालीत्सम्मिलत्किल परस्परमग्रम्।
हिन्दुमुस्लिमजयः परितोऽभूद्घुष्यमाण इति दृश्यमपूर्वम्॥ ६ ॥
गान्धिरत्र सकलेषु दलेषु तज्जनेषु समयूयुजदेकम्।
इन्द्रजालमिव येन समेषामेकदिग्गमनशीलमिहैक्यम्॥ ७ ॥
पञ्चरङ्गदलमारचयत्सोऽभूच्च धूमिलमनोरथमूर्तिः।
शब्द एव भुवि केनचिदुक्तो जातु नेतरि भवेदितरस्मिन्॥ ८ ॥
इत्यतोऽपि महदेतदिहासीद् यन्मनोरथतरङ्गभरास्ते।
सर्व एव तु विदेशजशिष्टिं प्रत्यगुः किल घृणापरियुक्ताः॥ ९ ॥
राष्ट्रियत्वमिति कोऽपि विरोधी मूलतो भवति भाव उदीतः।
राष्ट्रियान् समुदयान् प्रति चान्यान् क्रोधतोऽथ घृणया च परीतः॥१०॥
शासितस्य विषयस्य विरुद्धान् शासकान् प्रति स जीवति नित्यम्।
वर्धते च खलु तान् प्रति भूयो भारतेऽपि गतवर्षमभूत्सः॥ ११ ॥

चिन्तने च निरतान्न कदाचित्प्रोदसाहयदतीव गभीर: ।
किन्तु सोऽस्फुटतयैव द्रढिम्ना लक्षयन्दलितवर्गमवादीत् ।। २७ ।।
तेन नश्च परम: परितोषोजायते स्म दलितोद्धरणेन ।
यद्यपि प्रथयति स्म स गान्धि: किञ्चिदाश्वसनमुच्चजनेभ्य: ।। २८ ।।
सच्चरित्रबलसिद्धिदृश: सा नास्य बुद्धिविषया भवति स्म ।
भारतीयजनतासु च गान्धे: सच्चरित्रबलसिद्धिविताने ।। २९ ।।
कापि सा सफलताधिगताभूद्यां बुधाश्चकितवत्कलयन्ति ।
सन्ति केऽपि न समेधितमेषां दार्ढ्यमेव न चरित्रबलञ्च ।। ३० ।।
ये विदन्ति शिथिल: किल देहो म्लानमाननमिहार्ततरञ्च ।
वर्तते खलु पवित्रचरित्रमूर्तिरित्यहह ते मतिमूढा: ।। ३१ ।।
स्फूर्तिरत्र जनतासु च दार्ढ्यं मानसे भरति विश्वसनं न: ।
साहसेन रहिता दलिताश्च जाग्रत: समभवन् यदकस्मात् ।। ३२ ।।
उन्नतेन शिरसा सततेन मध्यमेन च चलन्ति यदेते ।
व्यापिनि प्रतिनियन्त्रितरूपे प्रोद्यताश्च मिलिते यदुपाये ।। ३३ ।।
तेन नो मतमभूदमुनैवोपायकेन जनताप्स्यति शक्तिम् ।
किन्तु तेन सह मूलगतस्यावश्यकत्वमजहाम मतस्य ।। ३४ ।।
विस्मृतं यदिह कापि विचारश्रेणिरप्यदमना जनशक्ति: ।
साहसं च लघुधूमवदेषां शान्तिमेष्यति विना गुरु लक्ष्यम् ।। ३५ ।।
क्वापि सीम्नि यतनानि स धर्मोज्जागरस्य बलमग्रमनैषीत् ।
भावनेयमुदिता यदमीभ्यो राजनैतिकमयार्थमयेभ्य: ।। ३६ ।।
वारणाय कुनयस्य न हिंसासम्प्रयोग इति नव्यनिदेश: ।
भारतेन किल राष्ट्रवरेण दास्यते तु जगते सकलाय ।। ३७ ।।
जातयोऽत्र निखिला अखिलानि राष्ट्रकाणि मनसात्र मुधैव ।
विश्वसन्ति तदिहास्म समन्तादुन्नता इति धिया न्यपताम ।। ३८ ।।
हिंसनात्मकरणेषु प्रयुक्ताच्छस्त्रतो नयिकशस्त्रमहिंसा ।
नास्ति केवलमुपाय इहैक: किन्तु रामशरवत्तदमोघम् ।। ३९ ।।
मन्मतेन भुवि कोऽपि न गान्धेर्यान्त्रिकैर्नवलसभ्यतया च ।
सङ्गत: खलु पुराणविचारै: सम्मतोऽभवदथो विरलोऽसौ ।। ४० ।।

मन्महे स्म यदयं स्वयमेतान् मन्यते सततमव्यवहार्यान् ।
कल्पनाप्रजनितानधुनोत्थावस्थितो हृदयराज्यसदृक्षान् ।। ४१ ।।
नूनमत्र च वरान्वयमेतांस्त्यक्तुमाधुनिकसभ्यतया त्तान् ।
उद्यताः समभवाम विदन्तोऽप्यद्य तेषु परिवर्तनमिष्टम् ।। ४२ ।।
तीव्रयानमथ तद्गुरुयन्त्रं रोचते स्वयमहो भुवि मह्यम् ।
संशयोऽस्ति न तथापि स गान्धेराशयो बहुजनेषु प्रभावी ।। ४३ ।।
तेऽत्र यन्त्रपरिणाममुदग्रं चिन्तयन्ति किल मिन्वति चैनम् ।
इत्यहो कतिपयेऽत्र भविष्यं भालयन्ति कतिचित्खलु भूतम् ।। ४४ ।।
तत्र कौतुकमिदं यदपश्यन्नभ्युपायमुभयेऽपि विधेयम् ।
यत्र सम्मिलितरूपतयेमे सङ्गताः प्रथमतः समयुञ्जन् ।। ४५ ।।
भावनेयमकरोद् बलिदानं चात्मदानमपि हन्त सुकार्यम् ।
मातृभूमिपदयोर्यदनेकेऽभ्यार्पयंस्तनुधनादि समग्रम् ।। ४६ ।।
संयुतोऽभवमहं यतनेऽस्मिन् प्राणतो हृदयतश्च यथान्ये ।
कार्यजातमितरच्च पुराणमित्रमण्डलमहं समहासम् ।। ४७ ।।
पुस्तकानि नववृत्तदलानि त्यक्तवांस्तदवधि प्रहितानि ।
तानि यावदमुना मम कार्येणाभवन्न हि समन्वयभाञ्जि ।। ४८ ।।
पुस्तकं प्रचलितं यदभूत्तत्तदापठमहं समयेऽस्मिन् ।
का च कात्र घटते घटनेति विश्वतोऽहमभजे खलु वेत्तुम् ।। ४९ ।।
किन्तु सम्प्रति न तत्समयोऽभूत्पारिवारिकमभूच्छिथिलं मे ।
मोहबन्धनमवार्यमहो मे कन्यया दयितयान्यजनैश्च ।। ५० ।।
भूरिकालविगमेऽध्यगमं यत्तद्दिनेषु विपदां कियतीनाम् ।
हेतुरेष समभूवममीषां नैकरूपमयकष्टशतानाम् ।। ५१ ।।
तत्र धैर्यमभवत्कियदुच्चैर्मे प्रिया सहनशीलतया सा ।
जातमस्ति गृहमेव तु कार्यागारमत्र समितेरुपवेशाः ।। ५२ ।।
'ग्राममेत' इति सर्वगघोषात् क्रोशवृन्दमगमाम पदाभ्याम् ।
क्षेत्रवर्गमतितीर्य च दूराद्दूरमाप्नुम हठादिव लक्ष्यम् ।। ५३ ।।
ते कृषीवलसभासु च भूयो भाषणानि समदाम समोदाः ।
यौथिकीं जनतया परिक्लृप्तां भावनामहमवेदिषमन्तः ।। ५४ ।।

तां प्रभावयितुमात्मनि शक्तिं काञ्चिदन्वभवमेष च तत्र ।
ग्राम्यनागरिकयोर्जनतायां भेदमेष कृषकेष्वविदं च ॥ ५५ ॥
तञ्च पर्यचिनुवं जनतासम्मर्दभावमपि किञ्चन किञ्चित् ।
ग्रामधूलिजनयूथविमर्दाऽऽघट्टनाविपदि सौख्यमविन्दम् ॥ ५६ ॥
तेषु कश्चिदनुशासनभङ्गः क्षोभमप्यजनयन्मम चित्ते ।
कुत्रचित्पुनरगाञ्च विरोधिक्रोधियूथमुखसम्मुखतोऽपि ॥ ५७ ॥
उग्रताऽभवदमीषु तथोग्रा तान् यथा ज्वलयिताग्निकणोऽपि ।
किन्त्विहानुभवजातनिजात्मविश्वसित्यनुगमः स सहायः ॥ ५८ ॥
विश्वसित्यनुगमेन सदा सम्मर्दमध्यमविशं त्वनिरुद्धः ।
अद्य यावदमुना मयि क्लृप्तः सद्गुणग्रहिलवद् व्यवहारः ॥ ५९ ॥
सत्यपि प्रबलके मतभेदे तद्गतिं प्रति न वक्तुमिहार्हम् ।
स्याद्भविष्यति ममानुभवः सम्मर्दवृत्तिविषयेऽद्य न दुष्टः ॥ ६० ॥
तं स्वकीयमिव चानुभवामि स स्वकीयमिव मामनुवेत्ति ।
नात्मविस्मरणमत्र तु यामि स्वं ततः पृथगनुस्मृतिशीलः ॥ ६१ ॥
स्वीययाथ पृथगन्तरगत्या तान् समीक्षकदृशैव समीक्षे ।
विस्मये कथमहो समवेतास्ते सहस्रमनुजाः पृथगास्थाः ॥ ६२ ॥
स्वस्वभावविषये प्रतिवस्तु कामनासु मनसात्मिकदृष्टौ ।
सर्वथा पृथगवस्थितयोऽपि विश्वसित्यनुगमं मयि याताः ॥ ६३ ॥
किन्त्विमेऽन्यमिव मौलिकरूपान्मां विदन्ति, ननु सम्यगवेत्य ।
मामिमेऽद्यवदिहाभिलषेयुः कृत्रिमाभिरुत वाग्भिरमीषाम् ॥ ६४ ॥
प्राप्तवानिह समग्रमदिच्छा इत्यनेकविधतर्कहतोऽहम् ।
तेषु सत्यखरवाचमवोचं पारुषेण च समालपमेतैः ॥ ६५ ॥
तत्प्रतीतिषु च रीतिषु तर्कान् कर्कशांश्च कृतवान् दयितासु ।
ते तथापि मम तान्यसहन्तेत्यत्र मे न निरगात्स विचारः ॥ ६६ ॥
यादृशोऽस्मि न हि तादृशमेते मां भजन्ति परमप्रणयेन ।
किन्त्वमीभिरिह कल्पितरूपे सुन्दरे मम धृतः प्रणयोऽयम् ॥ ६७ ॥
कल्पना कतिदिनान्ययथार्था स्थास्यतीयमथ तिष्ठतु कस्मात् ?
सा प्रकाशमुपयास्यति मिथ्या तर्हि किन्नु भविता सति सत्ये ॥ ६८ ॥

मय्यनेकविषयोऽस्त्यभिमानो यस्य लेशमपि नादधतेऽमी ।
नास्त्यमीषु लवतोऽपि च दम्भाडम्बरान्वयनमन्यवदेतत् ॥ ६९ ॥
ये निजात्मनि वरिष्ठवरीयोभावमादधति नूनममीभ्यः ।
मध्यमस्य च दलस्य भवन्तो ये स्वमग्रगणनीयमिवाहुः ॥ ७० ॥
सन्त्यमी अरुचिराश्च जडाश्च व्यक्तिशो न च भजन्त्यनुकम्पाम् ।
सामुदायिकतया तु निरीक्ष्य तानुदेति करुणा च ममार्त्तिः ॥ ७१ ॥
किन्तु नः परिषदामधिवेशेष्वस्मदाचयितकार्यकरास्ते ।
मञ्चमेत्य बहुभाषणलीलां कुर्वते स्म तदभूदनुदृश्यम् ॥ ७२ ॥
तत्प्रदर्शनमभूदतिमात्रं भाषणेषु किल धूममयेषु ।
डम्बरो न भवति स्म किलाल्पः सर्व एव वयमत्र सदोषाः ॥ ७३ ॥
ते विरोधदलगास्तु कनिष्ठाः केऽपि तत्र दधतेऽग्रसरत्वम् ।
लोकयूथसुमुखे सुकरो नो मञ्चमेत्य सहजो व्यवहारः ॥ ७४ ॥
एवमेषु च जनेषु प्रसिद्धेः साधनेऽप्यनुभवो न समेषाम् ।
इत्यहो वयमिताः स्वविचाराद्रूपमप्युचितमनुरूपम् ॥ ७५ ॥
गच्छताञ्च लपतां हसताञ्च ध्यानमेतदभवत्सततं नः ।
अक्षिलक्षमिह धूर्णयतेऽस्मान् ध्यानतः सकलकर्म च कुर्मः ॥ ७६ ॥
भाषणानि च भवन्ति न ओजस्वीनि लक्ष्यरहितानि च भूयः ।
भालयन्ति च परेऽत्र यथास्मान् भालयाम कथमत्र तथा स्वम् ॥ ७७ ॥
इत्थमात्मसमवेक्षणमुग्धोऽहं परव्यवहृतीः परिपश्यन् ।
मोदमन्तरधिकं समविन्दं नाविदं किमितरो वदतीति ॥ ७८ ॥
कांगरेसकृतिनामिह वर्षे व्यक्तिशो ग्रहणनिग्रहणे स्तः
यूथशो न, तदलीद्वयमासीत्सैन्यदूषणदुषा निगृहीतम् ॥ ७९ ॥
दण्डितं च बहुधा यदमूभ्यामुक्तमत्र बहुभिः पुनरुक्तम् ।
भाषणानि बिहितानि निदाघे कानिचिच्च मयकापि तदानीम् ॥ ८० ।
तर्जना मम कृता समभूद्यद् द्रुह्यति त्वयि भवेदभियोगः ।
तद्वदिष्यसि न शिष्टिविरुद्धं स्यादिदं ब्रिटिशशासनद्रोहः ॥ ८१ ॥
किन्तु किञ्चिदपि तत्र न जातं वत्सरान्तविकृतिस्तु समिद्धा ।
देशमेष्यति तदा युवराजे काङ्ग्रेसमुदघोषयदेतत् ॥ ८२ ॥

यद्यदेव तु चिकीर्षति शिष्टिस्तद्बहिष्कृतिरहो करणीया ।
इत्यनन्तरमथोत्तरदेशे बङ्गदेशविषये काङ्ग्रसिकौ ॥ ८३ ॥
घोषिताऽभवदवैधविधास्माद् देशबन्धुरददात्स निदेशम् ।
'भारतं सकलमत्र तु कारागारमेव मनसानुभवामि ॥ ८४ ॥
मत्करौ निगडितौ च शरीरं लौहशृङ्खलशतैरिह बद्धम् ।
सेयमस्ति परतन्त्रतया मे दासवन्निविडयन्त्रणपीडा' ॥ ८५ ॥
काङ्ग्रेसकृतयः प्रचलन्तु निग्रहो भवतु वा न ममायम् ।
जीवितः श्वसिमि वात्र म्रिये वा नास्य कापि भवताद्भुवि चिन्ता ॥८६॥
बङ्गवत्सपदि युक्तप्रदेशोऽप्यञ्जसा तदुररीकृतमासीत् ।
घोषितो न च स्वयञ्चरसंघस्तावदत्र सततं भवितेति ॥ ८७ ॥
दैनिकेषु च दलेषु समेषां नामसूचिरपि मुद्रणमाप्ता ।
आद्यसूचिशिरसि प्रथमं मत्तातनाम किल मुद्रितमासीत् ॥ ८८ ॥
स स्वयञ्चरदले न किलासीत् किन्तु शिष्टिशासनमभिभङ्क्तुम् ।
सम्मिलन् स निजनाम तदादावत्र चारभत सा प्रतिकारम् ॥ ८९ ॥
आगमिष्यति तदा युवराजे प्रागभूत्समुदयग्रहणं तत् ।
ज्ञातमक्षपतनं किल वृत्तं कांगरेसब्रिटिशप्रतिनिध्योः ॥ ९० ॥
युद्धमेतदनिवार्यमिहास्ते तावदस्त्यविदिता किल कारा ।
एकदा तु चिरमाश्रितकारागार एव निवहन् कृतिशेषम् ॥ ९१ ॥
आगतेन सहसा लिपिकेन ज्ञापितो यदयते पुरुषोऽयम् ।
वारणादलधरो भवनं मे वेष्टयन्निह करिष्यति शोधम् ॥ ९२ ॥
क्षोभमस्मि गमितः प्रथमं वै तादृशो ह्यवसरोऽयमपूर्वः ।
किन्तु शान्तदृढचिन्तनशून्यो भाषितुं न चलितुं मनसेच्छन् ॥ ९३ ॥
राजपुंसगमनागमनाभ्यामप्रभावित इवोपविविक्षन् ।
आदिशं लिपिकमेकमिह त्वं राजपुंसमनुगच्छ समन्तात् ॥ ९४ ॥
कर्मचारिगणमादिश सर्वं स्वस्वकार्यनिरतश्च स तिष्ठेत् ।
राजपुंसगमनागमने च नावधास्यति न कोऽपि न किञ्चित् ॥ ९५ ॥
तावदेव मम मित्रमिहैकः सार्थकार्यकर एत्य मदग्रे ।
राजपुंसनिगृहीत उदारां संविदां च समयाचत गन्तुम् ॥ ९६ ॥

नूतनापि घटना च मयेय प्राकृतेन मनसा कलनीया।
इत्यहं कमपि गर्वमखर्वं धारयन् स्वसुहृदा सह रूक्षम् ॥ ९७ ॥
वर्तनं समचरं तदवोचं यावदस्मि दलमत्र लिखामि।
तावदारमतमत्र श्रुताभूदन्यकार्यकरनिग्रहवार्ता ॥ ९८ ॥
अन्ततो गृहमहं खलु यायां तत्र किं भवति चेति च विद्याम्।
इत्युपेत्य मिषतोऽत्र गृहेऽपि दर्शनं विहितवान् पुरुषस्य ॥ ९९ ॥
शोधयन्नयमिहागमदावां निग्रहीतुमिति मे विदितञ्च।
अस्मदीयविशदावसथस्य क्वापि कोणनिलये किमपीह ॥ १०० ॥
तद्बहिष्कृतिमये युवराजस्वागतार्थकरणीयकृतीनाम्।
नैव कार्यमभविष्यदिहान्यत्सूपयुक्तमिति कृत्यविधौ नः ॥ १०१ ॥
यत्र यत्र युवराजमनैषंस्तत्र तत्र हरितालमपश्यन्।
निर्जनाः सममिलश्च सरण्योऽदः प्रयागमपि भाति च शून्यम् ॥ १०२ ॥
कालकृत्तनगरेऽपि दिनैस्तैरुध्यते स्म सकलव्यवहारः।
आपदेव युवराजकृते सा नास्ति तस्य च मनागपराधः ॥ १०३ ॥
नापि तं प्रति कुभावनयैतद् भारतप्रभुतया कृतमागः।
सावितुं स्खलितगौरवमेतद्व्यक्तितादुरुपयोगमकार्षीत् ॥ १०४ ॥
युक्त-बंगविषयौ तु विशेषान्निग्रहञ्च दमनञ्च भजेते।
कांगरेसपुरुषाग्रसरा ये ते समेऽपि हि तयोर्निगृहीताः ॥ १०५ ॥
तत्स्वयञ्चरसहस्रमनायि वन्दिगेहमिह नागरिकाणाम्।
नो समाप्तिमयतेस्म तु सङ्ख्या प्राक्स्वयञ्चरविनिग्रहकाले ॥१०६॥
युक्तदेशविषये समितिस्थाश्चोपषष्टिपुरुषा निगृहीताः।
केचिदीदृशजना अवरुद्धा यैर्न किञ्चिदिह चेष्टितमासीत् ॥ १०७ ॥
राजनैतिकपथे पथिकास्ते स्वग्रहाग्रहमकार्षुरपूर्वम्।
सर्वकारलिपिका अपि केचित्तद्वदेवमविशन्निह काराम् ॥ १०८ ॥
बालकाश्च युवकाः पुरुषीयं यानमेत्य न ततो निरगच्छन्।
बन्दिगेहभवनादपि सायं श्रूयते परिचितो जयघोषः ॥ १०९ ॥
येन वेद्यत इमे पुरुषीयाः श्रेणिभूतशकटा उपयान्ति।
सर्वतो जनवृताः किल कारास्तद्व्यवस्थितिकरा अतिदूनाः ॥ ११० ॥

वारणादलमिहैति शकटधा सङ्ख्ययैव सह नाह्वयसूच्या ।
किन्तु निर्गलति नैकगुणा सा तेन ते नहि विदुर्निजकार्यम् ॥ १११ ॥

वन्दिगेहनियमेषु किलास्मिन् वस्तुनि प्रतिविधा न किलासीत् ।
इत्यवर्जि सकलग्रहनीतिर्भारतप्रभुतया शनकैः सा ॥ ११२ ॥

मुख्यमुख्यपुरुषान् सविवेकं केवलं तदनुगाः समगृह्णन् ।
तज्जनौत्सहनवेगविवृद्धिश्चापि शान्तिमगमच्छनकैः सा ॥ ११३ ॥

कार्यकृत्सु निखिलेषु च कारां यातवत्सु परितः प्रसृताभूत् ।
भावनात्र जनतास्वसहायस्त्वान्न निश्चयपरास्त तदानीम् ॥ ११४ ॥

किन्तु तत्क्षणिकमेव किलासीद्वायुमण्डलमभूत्तडिदाभम् ।
सर्वतो गडगडत्कृतिरासीत् क्रान्तिरन्तरतले स्म विभाति ॥ ११५ ॥

त्रिशता प्रगुणितैश्च सहस्रैर्दण्डिता असहयोगिन एते ।
मुख्यकार्यकरनिग्रहकाले चात्र गान्धिरवसद् बहिरेव ॥ ११६ ॥

वस्तुतः सकलनायकनेता कृत्स्नयुद्धविनियोगविनेता ।
जीवनं नवमयं जनतासु स्वोपदेशवचनैः स्म निधत्ते ॥ ११७ ॥

वाञ्छनीयमिह यच्च न नीतेस्तन्न संभवति जाग्रति तस्मिन् ।
सर्वकार इममत्र ग्रहीतुं चेष्टते स्म न भयात्परिणामात् ॥ ११८ ॥

मात्र भारतिकसैन्यमथेदं राजपूरुषदलं विकृतं स्यात् ।
नूत्नवर्षचलने तु समस्तं दृश्यमेव परिवर्तितमासीत् ॥ ११९ ॥

वन्दिगेहगमितैः श्रुतमासीद्विस्मितैश्च नितरां भयभीतैः ।
गान्धिना सविनयः स च भङ्गोऽसावृताग्रह इह स्थगितोऽभूत् ॥१२०॥

ग्राम्ययूथमदहत्किल चौरीचौरनामवसतौ पुरुषौकः ।
पूरुषान् षडिह चेदमधाक्षीदित्यसौ तमकरोत्प्रतिकारम् ॥ १२१ ॥

ईदृशेऽत्र समये च यदा स्मः स्वस्थितिं क्रमवशाद् दृढयन्तः ।
अग्रतोऽग्रमिह चापि सरन्तः स्मोऽयनेषु सकलेषु नियोद्धम् ॥ १२२ ॥

तादृशे स्थगितवानयमेतद् युद्धमित्यलमकुप्यदशेषः ।
किन्तु वन्दिगृहगस्य जनस्य कोपतोऽवशतया च किमु स्यात् ॥ १२३ ॥

हा ! ऋताग्रहसखोऽसहयोगोऽरुध्यतेति बहुमासगणान्ते ।
आपदाऽवशतया च विमुक्ता शिष्टिराश्वसिति सा स्म सुखेन ॥१२४॥

कैश्चिदेव किल सप्त-दिनैश्च गान्धिमप्यमुमधात्खलु शिष्टिः ।
दीर्घकालिकमथास्य च कारागारवासमदिशद्दमनाय ॥ १२५ ॥

शार्दूलविक्रीडित-चरित-रचनावयवभूतोपसर्गा-
द्यर्थगीतासन्निवेशनकुशलकलमेनात्र कविना ।
कल्पिते श्रीमज्जवाहरलालनेहरुचरितकाव्ये
निर्गतस्त्वेकादशः सर्गोऽयमादिमवन्दिगेहः ॥ १२७ ॥

अहिंसासियष्ट्योर्न्यायः

शालिनी

द्वादशः सर्गः

चौरीचौराकाण्डतोऽनन्तरं नोऽमन्दावेगान्दोलनं रुद्धमासीत् ।
मन्ये कांग्रेसस्य नेतृष्वमर्षो भूयान्व्याप्तो गान्धिमेकं विहाय ॥ १ ॥
तातः कारावासयोगेऽतिमात्रं तस्मिन् क्षोभं प्राप्तवान् वैक्लतञ्च ।
कांग्रेसीयान्नूत्नयूनस्तु वार्ता सेयं प्राभात्सर्वथाऽरोचमाना ॥ २ ॥
आस्माकीना वर्धमानाः किलाशा धूलौ लीनास्तेन तस्या विरोधे ।
एतावत्या व्याप्तिरेषा रुषो नः स्वाभाविक्येवाभवद् वन्दिगेहे ॥ ३ ॥
संरोधेनान्दोलनस्यास्य तावन्नाभूत्कष्टं यावदेतस्य हेतौ ।
योऽयं प्रोक्तस्तत्परीपाकतश्चानन्तं कष्टं चिन्त्यमानादभून्नः ॥ ४ ॥
चौरीचौराकाण्डमेतत्प्रखेदोत्पादि स्यादित्यस्ति सम्भाव्यमेव ।
हिंसाशून्यान्दोलनस्यापि दृष्ट्याऽऽसी नूनं तत्तत्प्रतीपं नितान्तम् ॥ ५ ॥
अस्मत्स्वातंत्र्याख्यसङ्ग्राम एष कञ्चित्कालं रोत्स्यते केवलं किम् ।
दूरे कस्मिंश्चिच्च कोणे स्थितैस्तैः कैश्चिद्ग्रामेऽकारि हिंसात्मकार्यम्॥६॥
स्याच्चेदेवं रक्तपातेष्वकस्मान्नूनंभावी तत्परीणाम एषः ।
आस्तेऽहिंसा युद्धशास्त्रे तदा तत्सिद्धान्ते वा क्वापि कश्चित्प्रमादः ॥७॥
यस्मादस्मानीदृशोऽनिष्टकाण्डस्याभावोक्तिर्भात्यसम्भावनीया ।
किन्नश्चास्त्यावश्यकं यत्स्वराज्ययुद्धे पादन्यासतः पूर्वमेव ॥ ८ ॥
हिन्दुस्थाने त्रिशतो लोककोटावेषा हिंसा युद्धसिद्धान्तशिक्षा ।
तस्याचारश्चापि शिक्षेत किञ्चास्मास्वीदृक्षाः स्युः कियन्तो मनुष्याः ९
ये स्युः शक्ता वक्तुमत्रातिमात्रक्षोभे क्लृप्ते पूरुषैरप्यमी तु ।
स्थास्यामो वै शान्तभावाः समन्तादित्येतस्मिंश्च प्रयत्नेऽपि सिद्धे ।१०।
भूयांसश्चोत्तेजना माध्यमा नः केचिच्चान्ये सन्ति कर्णेजपाश्च ।
आविष्टाश्चान्दोलने पर्यटन्ति हिंसां काञ्चित्कुर्वते कारयन्ति ॥ ११ ॥

तेषामेषां किं भविष्यत्यतोऽयं बन्धोऽहिंसायुद्धमध्ये तदैव।
निर्वाह्यः स्याद्यत्र कश्चित्कदाचित्कञ्चित्कुर्याद्रक्तपातं न लोकः ॥१२॥

तेनाहिंसायुद्धमेतत् सदैवासाफल्यं साकल्यमेता न नूनम्।
एतेऽहिंसामत्र मञ्जूर्यकार्ष्मं काङ्ग्रेसेनास्वीकृतेयं तथास्मात् ॥ १३ ॥

विश्वासोऽभूदेष चित्तेऽस्मदीये यत्साफल्यं यास्यतीहाभ्युपायः।
नेमं गान्धिर्न्यस्तवान् नः समक्षं यत्सा रीतिः शोभनास्तीति मत्वा ॥१४॥

अस्मात्कार्यं कर्तुमेष प्रकारः सर्वाकारादुत्तमोऽस्ति प्रकारात्।
इत्येवासौ मन्यतेऽस्मिन् नकारो यद्यप्यास्ते, शक्तिहीनप्रतीकः ॥ १५ ॥

आस्ते त्वस्मिन् भूरिवीर्यंप्रकारे ह्यस्त्येवास्मिन् स प्रभावोऽपि भूयान्।
जाल्मेच्छाया अग्रतो मौनभावाद् यस्मिन्नास्ते नैव मूर्धावनामः ॥ १६॥

भीरूणां वा कातराणां न चायं नास्मिन्युद्धाद्वा परागाननत्वम्।
दोषं दास्यं राष्ट्रियं चापहन्तुं जाग्रत्यस्मिन् कोपि वीरप्रकारः ॥ १७ ॥

मित्राभासा, किन्तु विद्वेषिणो नश्चेत्केषाञ्चिद्धस्तमेष प्रयाति।
अस्तव्यस्तैस्ते तु कार्यैरनन्तैः शक्ता रोद्धुं हन्तुमान्दोलनं नः ॥ १८ ॥

तर्ह्येतेन स्यात्प्रवीरानुगेन कः स्याल्लाभोऽपि द्रढिष्ठेन लोके।
वह्न्युद्दीपी सूर्यकान्तो हि तावद्यावन्न स्यात्सन्निधौ चन्द्रकान्तः ॥१९॥

गान्धिर्धारावाहिकाभाषणाय कालेनोद्बोधनायास्ति शक्तः।
योऽहिंसायाश्चापि शान्तेः सरण्या मार्गं दृष्ट्वाऽसाह्ययोगस्य नव्यम्२०

शक्तिं पूर्णां तां प्रयुज्य स्वकीयां लोकानेतत्स्वीकृतौ प्रैरयत्सः।
भाषा साध्वी तस्य साधारणीयं चैकान्तत्वात्कृत्रिमत्वेन हीना ॥ २१ ॥

स्पष्टा वाणी चास्य मुद्राऽऽननस्य शान्ता धीरा सर्वथा निर्मलाऽऽसीत्।
तस्यां नासीन्नाममात्रं, विकार श्छन्नस्त्वासीत्तत्र हैमाम्बरान्तः ॥२२॥

किञ्चिद्वर्चो गूढमुल्लासगाढं यस्मिन्नासीत्प्रोज्ज्वलज्ज्वालतैक्ष्ण्यम्।
उड्डीयोड्डीयास्य वक्त्राच्च शब्दाः साक्षादस्मत्कान्तमस्तिष्कमध्ये २३

तत्राप्यन्तः कोणभागे स्वगेहं कृत्वाऽवात्सुः क्षोभमुत्पादयन्तः।
तेनादिष्टः क्लिष्टमार्गः कठोरो वीरैर्गम्यो भाति लक्ष्यानुकूलः ॥ २४ ॥

स्वातन्त्र्यं नः प्रापयिष्यत्यवश्यमित्यासीन्नो निश्चितं सम्मतञ्च ।
लेखस्तेनालेखि कश्चित्प्रसिद्धो यस्मिन् न्यायो वर्णितः खड्गयष्टेः ।२५।
'विश्वासो मे वर्ततेकातरत्वे हिंसायां चेदेकमेवावधार्यम् ।
हिंसामङ्गीकर्तुमेषोपपक्षे भाषिष्यऽहं शस्त्रसाहायकाय ॥ २६ ॥
हिन्दुस्थानं तेन रक्षेत्प्रतिष्ठाम्, माभूल्लक्ष्यं स्वावमानस्य दीनम् ।
हिंसायाश्चाहं प्रपश्याम्यहिंसांमुच्चामाहुर्वै क्षमां दण्डदानात् ॥ २७ ॥
क्षाम्यन्वीरो दण्डयन् कातरः स्याद् वीरस्यालङ्कार एषा क्षमास्ति ।
शक्तौ सत्यामेव सत्या क्षमा स्याद् सिद्ध्येदेषा निर्बलस्य त्वशक्तिः २८
मार्जारेण च्छेदनं गात्रकाणां सोढ्वा कश्चिन्मूषिकश्चेद् ब्रवीति-
क्षान्तः क्षान्तस्तेऽपराधो मयासौ नूनं नान्यः स्यादितोऽस्योपहासः ।२९।
नाहं मन्ये कातरं वै स्वदेशं, नैवात्मानं चासहायं समीक्षे ।
मद्विज्ञाने मा प्रमादीश्च कश्चिच्छक्तेर्वासो मानसे नास्ति देहे ॥ ३० ॥
वायव्योऽयं भावनात्मास्मि चाहमित्येवं मां कोऽपि मा मंस्त लोके ।
सोऽहं वर्ते व्यावहारिक्यपेक्षो लोके चाहं नूनमादर्शवादी ॥ ३२ ॥
धर्मोऽहिंसा नर्षिसेव्यो न साधुसन्धार्यो वा सोऽस्ति सर्वस्य पुंसः ।
हिंसा यद्वत्साहजीयं पशूनां तद्वत्सा स्वाभाविकी मानुषाणाम् ॥ ३२ ॥
आत्मा शेते यत्पशूनामतोऽसौ नो जानीते कायशक्तेरिहान्यत् ।
अत्युच्चन्यायस्य शक्तेरथात्मशक्तेरग्रे मानुषो गौरवार्थम् ॥ ३३ ॥
स्वं मूर्धानं नामयेदित्यवश्यं कार्यं, तस्मिन्नेष जागर्ति यस्मात् ।
हिन्दुस्थानस्याग्रतोऽस्मान्मयोक्तं तत्प्राचीनं स्वात्मदाने विधानम् ।३४।
शाखायुक्तः सैष सत्याग्रहो वा, सांयोगो वा प्रातिरोधो विनीतः ।
सर्वा एताः कष्टसाहस्य संज्ञा, नान्यत्किञ्चित्तत्तपो भारतीयम् ॥ ३६॥
हिंसामध्याद्येऽप्यहिंसाविधानं संशोध्यादुर्न्यूटनाच्चर्षयस्ते ।
ऋद्धा आसन् प्रातिभे वैभवे ते योधाश्चासन् साधु वेलिङ्गटन्तः ॥३६॥
शस्त्रास्त्राणां तेऽभ्यजानन्प्रयोगान्, अन्तेऽपश्यंस्तान् वृथा चानुभूतेः ।
भीतं विश्वं शिक्षयामासुरेते, मुक्ताः स्यातार्हिसया, हिंसया नो ॥३७॥
स्वावस्थायां सक्रियायामहिंसा ज्ञात्वा बुद्ध्वा कष्टसाहोऽस्ति नूनम् ।
नास्तेऽस्यार्थो द्वेषिणः कामनाया अग्रे तूष्णीं नामयेयुः शिरांसि ॥ ३८ ॥

जाल्मेच्छाया: सम्मुखं योद्धुमेष स्वात्मा पूर्णो योजनीय: किलेति ।
स्वास्तित्वस्येदं विधानानुरूपं कार्यं कुर्वन्नैकलोऽप्यत्र कश्चित् ॥३९ ॥
स्वीयं मानं, धर्ममात्मानमत्र त्रातुं काञ्चित्क्रूरसाम्राज्यशक्तिम् ।
आहूयास्यन्यस्यताद् भूमिकां तामुद्धारस्याहो निपातस्य भूय: ॥ ४० ॥
हिन्दुस्थानं चाप्यहिंसापथस्य स्वीकारार्थं यत्सदैवादिशामि ।
तत्राहं तद् दुर्बलं नैव जाने, जाने तस्मिन् शक्तिविश्वासमुच्चम्॥४१॥
आकाङ्क्षेऽहं शक्तिविश्वासमेतं ज्ञात्वाऽहिंसायुद्धमत्राश्रयेत ।
जानीयात्तत् नित्यमात्मानमेकं जैत्रं कायस्थायिनां दौर्बलानाम् ॥ ४२॥
आत्मा ह्येषो वर्तते न प्रणाश्य: शक्त: कृत्स्ना: कायशक्तीर्निरोद्धुम् ।
सर्वाण्यङ्गान्येष चैतन्यदानात्तत्तत्कार्यार्हाणि नूनं विधत्ते ॥ ४३ ॥
भिन्नं मन्ये सिन्फिनान्दोलनाच्चासाह्यं योगं, चिन्तितोऽयं यथा च ।
हिंसासार्थोऽसौ तथा सम्भवेन्नो, हिंसाध्वन्यानप्यहं चाह्वयामि ॥ ४४ ॥
तेऽमुं शान्तं सम्परीक्ष्यैकवारं द्रक्ष्यन्त्येतं नास्त्ययं दुर्बलोऽन्त: ।
नैष्फल्यं नैवाप्नुयादेष नूनं, स्वल्पाश्चेत्तं नोररीकुर्वतेऽत्र ॥ ४५ ॥
स्वल्पैरङ्गीकारतो निष्फलत्वं तस्याशङ्क्यं देशजात्यर्थयत्ने ।
कालोऽयं स्याद् वस्तुतो नो भयस्य तर्ह्युच्चात्मान: सहेरन्न हेलाम्।४६।
दीर्घं कालं राष्ट्रियं चावमानं साहं साहं रोषमेते भजेरन् ।
तञ्चाप्येते नैव रोद्धुं समर्था हिंसाध्वानं स्वीकरिष्यन्ति मोहात् । ४७।
यावज्जाने दास्यत: स्वं च देशं ते नष्टा: स्युर्हन्त चामोचयित्वा ।
हिन्दुस्थानं संश्रयत्खड्गमार्गं कञ्चित्कालं प्राप्नुयात्तज्जयं च ॥ ४८ ॥
किन्त्वेतेनोदेष्यतीषन्न गर्वो हिन्दुस्थानं प्रत्यहो मानसे मे ।
बद्धस्तेनाहं यदास्ते मदीयं तद्वै तस्मादेव सर्वं मयाप्तम् ॥ ४९ ॥
विश्वासो मेऽस्ति द्रढीयानशेषं हिन्दुस्थानं विश्वसेवाश्रमोऽस्ति ।
इत्येताभिर्युक्तिभिर्मानसे नो भूयानासीत् दर्शित: स्वप्रभाव: ॥ ५० ॥
किन्त्वस्माकं किञ्च काङ्ग्रेसकस्य सम्मत्येयं गान्धिदृष्टाप्यहिंसा ।
नैवाकाट्यो धर्मसिद्धान्त आसीन्नेयं चायं सम्भवेदत्र जातु ॥ ५१ ॥
अस्मद्दृष्ट्या सम्भवेत्सैकनीति: किं वा काचित्स्यात्सुगम्यात्र रीति: ।
यस्या: कांश्चित्सत्परीणामलेशानाशास्यैभिर्निर्णयाम:किलास्याम्॥५२॥

वैयक्तिक्या स्याद् दृशा धर्म एष, मन्येतायं निर्विवादश्च मार्गः ।
काचित्संस्था राजनैतिक्यमूं तु न स्वीकुर्याद्यावदेषा तथा स्यात् ॥५३॥
चौरीचौराकाण्डमस्योपलब्धि वर्ध्यानस्मांश्चाकरोत्साधनत्वे ।
एषां सर्वेषामहिंसाङ्ककानां कर्तुं सम्यग्भावतो वै परीक्षाम् ॥ ५४ ॥
दृष्टं चास्माभिर्यदीमानि सन्ति गान्ध्युक्तान्यान्दोलनारोधनानि ।
तर्ह्यस्माकं द्वेषिणां हस्तगेयं शक्तिः कुर्यात्तद्दशोत्पादनानि ॥ ५५ ॥
यैरस्माभिर्युद्धमेतन्निरोद्धुं बाध्यैर्भूयेतानिवार्यत्वरूपात् ।
सोऽयं दोषः किन्वहिंसाप्रकारे तद्व्याख्याने वास्ति गान्धिप्रक्लृप्ते ॥५६॥
किन्त्वस्यासीज्जन्मदाता स एव, तस्मादेतन्निर्णये को वरीयान् ?
आस्ते नास्ते वा प्रकारोऽयमीदृक् स्यात्किं स्थानं तं विनान्दोलनस्य ।
एते प्रश्नाः संस्थिता लोकचित्ते यावद्दत्तो गान्धिना न प्रकाशः ।
प्रायोऽष्टाब्दानन्तरं, पूर्वमेव युद्धारम्भाच्चात्र सत्याग्रहाख्यात् ॥५८ ॥
एतद् दृष्ट्वा कोऽपि सन्तोष आसीद्यच्छ्रीगान्धिः प्रश्नमेनं समाधात् ।
तेनाभ्युक्तं क्वापि चैकद्वभावाद्धिसाकाण्डे युद्धमेतन्न रोध्यम् ॥ ५६ ॥
यद्येतादृक् काण्डहेतोरवश्यम्भाव्याद्युद्धं रुध्यते तर्ह्यहिंसा ।
कार्यं कर्तुं न प्रभूयादतोऽभूत् स्पष्टं नेयं सर्वदास्ते सुरीतिः ॥ ६० ॥
गान्धिर्नाभूत्सम्मतोऽस्मिन्मते मे, तद्दृष्ट्या चेच्छोभनाशोभनेयम् ।
सर्वेष्वेव स्यात्प्रसङ्गेष्वहिंसारीतिः पथ्या चेदियं क्वापि पथ्या ॥ ६१ ॥
सङ्कीर्णेऽर्थे स्यादियं शोभनेतिकार्यं कार्यं चैतया स्वं विरोधे ।
एषा व्याख्यावीवृधत्क्षेत्रमस्या हिंसायुद्धस्येति सत्यं ध्रुवञ्च ॥६२॥
किन्त्वेषा नो साक्षिभावं भजेत श्रीमद्गान्धेश्चिन्तनानां विकासे ।
अन्यस्मिन्वा कुत्रचित्कारणे सा सङ्केतार्था स्यादितीषन्न जाने ॥६३ ॥
वस्तुस्थित्यान्दोलनस्यावरोधश्चौरीचौराकाण्डहेतोस्तु नासीत् ।
लोकैरेतत्कल्पितं तर्कितं वा तत्तूपास्थादन्तिमं तन्निमित्तम् ॥ ६४ ॥
एतज्ज्ञातं जायते यत्स गान्धि दीर्घात्कालाल्लोकसम्पर्कमाप्य ।
एकां नव्यां चेतनामाचिचेतत् या तं ब्रूते लोकचेतोऽनुभूतिम् ॥ ६५ ॥
सा किं कर्तुं च क्षमा किं न कर्तुं प्रायः सोऽन्तः प्रेरणां चानुयाति ।
स्वाभाविक्याऽसौ धिया प्रेरितश्च पादं लोकप्रेष्ठनेतेव धत्ते ॥ ६६ ॥

एतामन्तः प्ररणामेषसाक्षाच्छ्रुत्वा तद्वत्कार्यरूपं विधत्ते ।
पश्चादाश्चर्यान्वितानाम कुप्यतश्च सार्थान् निर्णीतिः स हेतून् प्रवक्ति ६७
नेपथ्यं तत्कल्पितं निर्णयस्य प्रायोऽपर्याप्तं भवत्यन्यदृष्ट्या ।
चौरीचौराकाण्डतोऽप्येवमासीदस्माभिस्तज्ज्ञातमत्यन्तमल्पम् ॥ ६८ ॥
तस्मिन् काले नूनमान्दोलनं नो बाह्या दृष्टिः पश्यति स्म प्रवृद्धम् ।
दीर्घोत्साहं वस्तुतोऽन्तर्दृशा तं छिन्नं भिन्नं जायमानं त्वपश्यत् ॥ ६९ ॥
आसीदैक्यं लुप्यमानं, तथाऽनु शिष्टिः सर्वा शिष्यमाणा तदासीत् ।
प्रायः सर्वे चाभवन् वन्दिगेहे वन्द्या, अन्येऽप्राप्तशिक्षा इहासन् ॥ ७० ॥
ते तद्युद्धं न स्वयं वोढुमर्हाः, यः कोऽप्येषां नेतृतां कर्तुमेयात् ।
काङ्ग्रेसस्यासौ वहेत्कार्यभारं, यद्वा तद्वा चापि कुर्यादपूर्वम् ॥ ७१ ॥
भूयांसोऽत्रावाञ्छिताः सन्निविष्टाः लोकोद्दीप्तिक्षोभसञ्चारकास्ते ।
एतेष्वासन् केऽप्यहो राजभक्ता स्ते काङ्ग्रेसं स्थानिकं चालयन्ति ।७२।
अन्ये चैवान्दोलनं वा विरोधगोष्ठीमप्याचालयन्ति स्म तत्र ।
तेषामेषां सन्निरोधाय तस्मिन् काले नान्यः कोऽपि पन्थाः स्म भाति ७३
निःसन्दिग्धं यत्क्वचित्सीम्नि सैषावस्थैतादृग्युद्धमध्येऽनिवार्या ।
नेतॄणामप्येतदास्तेऽतियोग्यं यत्ते कारागारवासादि सोढ्वा ॥ ७४ ॥
लोकान् मार्गं दर्शयेयुः क्रियाया विश्वासं चाप्यादधीरन्नमीषु ।
यत्ते युद्धं चालयिष्यन्ति पश्चा दन्यच्चास्यां कर्तुमर्हं दशायाम् ॥ ७५ ॥
यत्सामान्यात्साधु साधारणं च कार्यं कुर्युर्दूरगाः स्युर्विशेषात् ।
लोका इत्थं शिक्षणीयास्तथैषा शिक्षा दत्ता केषुचिद् वत्सरेषु ॥ ७६ ॥
अस्मादेवान्दोलनं नम्रभङ्गसंज्ञं सम्यक्प्राचलच्छक्तिपूर्वम् ।
तादृक्शिक्षादानतः प्राक्तदानी मस्याः शक्तेः प्रायशोऽभाव आसीत् ।७७
उत्साहस्यासीन्न पृष्ठेऽत्र किञ्चित् निःशङ्कञ्चान्दोलने वर्तमाने ।
तस्मिन् काले यत्रतत्रातिभीष्म हत्याकाण्डान्यासुराशङ्कितानि ॥७८॥
हत्याकाण्डानि प्रजाभिः कृतानि हत्याकाण्डैरेव शिष्टिर्निरुन्ध्यात् ।
तैश्चात्यन्तं भीषणैश्चात्र भीते राज्यं प्राज्यं नाशयेत्साहसौघम् ॥७९॥
गान्धेरन्तर्यैः प्रभावैर्निदानैरध्याक्रान्तं स्युः किलैतानि तानि ।
तेषां मूलं चाप्यहिंसाख्यशास्त्रं ध्यात्वा कार्यं वाञ्छनीयं किलासीत् ८०।

एतन्मत्वा वाच्यमेवात्र नूनं तन्निर्णीतिः सर्वथैवोचितासीत् ।
दोषानेतान् दूरयित्वा स नूतनां सृष्टिं कर्तुं वाञ्छातिस्म स्वरीत्या ।८१।
एतद्भिन्ना सर्वथान्या तु दृष्टिस्तन्निर्णीतिं साधयिष्यत्ययुक्ताम् ।
अस्या दृष्टेः किन्त्वहिंसात्मकेन मार्गेणाभान्नैव सम्बन्धलेशः ॥ ८२ ॥
मार्गे वामे दक्षिणे चैकदैव दक्षः पान्थोऽपि प्रयातुं न शक्तः ।
नास्मिन् शङ्का काचिदान्दोलनं तत्तत्रैकद्वैर्हेतुभिर्वा बिशिष्टैः ॥ ८३ ॥
हत्याकाण्डै राजकीयैरथेदं ध्वस्तीकर्तुं वा तयाऽऽह्वानरीत्या ।
तद्राष्ट्रीयं शक्तमासीन्निरोद्धुं तेषामेषां रीतिरेषा किलास्ते ॥ ८४ ॥
उत्तिष्ठन्त्यान्दोलनानीदृशानि स्वस्माद्भस्माञ्चिताःसंस्थिताद्धि ।
प्रायः स्तोकादल्पकालोद्भवाच्च लाभोऽपि स्यात् युद्धजातात् निरासात्
सम्यग्ज्ञायन्ते समस्यास्तदानीं दाढर्यं लोकेषु प्रयोक्तुं च साह्यम् ।
कश्चित्कालः प्राप्यतेऽसौ निरासो मेषस्येवाग्रे स प्रहर्तुं प्रयासः ॥ ८६ ॥
पश्चाद्यानं नास्ति नूनं यथार्थं सिद्धान्तोऽयं कश्चिदादर्शयुक्तः ।
लोकास्तेजो मन्दयेयुर्न चेत्तद् भूयः प्राप्तुं जायते नो विलम्बः ॥ ८७ ॥
द्वाविंशाब्दं यावदासी त्किमस्मत्सिद्धान्तास्थास्थेयमुद्देश्यमत्र ।
आसीत्किञ्चिद्ध मिलं तत्स्वराज्यं यद् व्याख्यानं नोऽवदातं तदासीत् ॥
काचिन्नासीत्तर्ह्यथो युद्धशैली निर्णीताऽस्माकं त्वहिंसात्मिकापि ।
कैश्चित्कश्चिच्चेत्क्रियेतात्र हत्या काण्डस्तर्ह्यासीदहिंसानिरासः ॥८९॥
तर्ह्यासीन्नापि स्वराज्याग्रहोऽपि यस्मै लोकाः स्युः स्थिराः साग्रहा वा ।
सामान्येनासन् दृढा नापि लोका यत्ते युद्धं कुर्युरादीर्घकालम् ॥ ९० ॥
वैदेशिक्यास्तर्हि शिष्टेर्विरोधे सर्वव्यापियन्यन्सन्तोषरोषे ।
कांग्रेसं प्रत्यास्थिते चानुरोधे नासीच्छक्तिः संघजा स्थैर्यदात्री ॥ ९१ ॥
कारागारान् ये सहस्रं प्रविष्टास्तेऽप्युत्साहं प्राप्तवन्तः क्षणाय ।
आशासाना यत्कियद्भिर्दिनैः स्यात्सर्वं सिद्धं नः स्वतन्त्रत्वमुक्तम् ।९२।
अस्माद्धेतोः सम्भवत्येतदद्धा रोद्धुं यत्सत्याग्रहो निश्चितो नः ।
तद्रोधे रीतिः पराप्याश्रिता स्या न्नाभूदस्मिंल्लोकविश्वासनाशः ।९३।
तज्जातं यच्छङ्कितं सश्लथोऽभूत् कश्चिद्ध्रासः साहसस्यापि जातः ।
किन्त्वेतेनाभूत् स दुःखान्तकाण्डप्रादुर्भावोऽनन्तरं देशमध्ये ॥ ९४ ॥

संग्रामेऽस्मिन् राजनीतिप्रयुक्ते हिंसाकाण्डानां प्रवाहः स मग्नः ।
दान्ता हिंसावृत्तिरेषा परस्तान्निर्याणेतु स्वं मार्गमन्विच्छतिस्म ।।९५।।
मन्ये पश्चाद्धिन्दुमुस्लिमविवादा वृद्धिं याताः सम्प्रदायेषु दक्षाः ।
नेतारो लुप्ताः पुनस्ते प्रबुद्धाः उद्गन्तुं ते भूय एव प्रवृत्ताः ।। ९६ ।।
अन्यैर्भूयोभिर्जनैर्गुप्तचारैर्हिन्दूमुस्लिमवैमनस्यप्रसारैः ।
उत्पातैस्तैर्मोफलानां नितान्तोदग्रैर्दण्डै ध्वंस्तमान्दोलनं च ।। ९७ ।।
लोकैस्तस्मादस्त्रमेकं प्रक्लृप्तं ये काङ्क्षन्ते विग्रहं सम्प्रदाये ।
तैरेवैषां हिन्दुमुस्लिम्जनानां संघर्षेण स्वामिनो हर्षितास्ते ।। ९८ ।।
तषां वैरं वर्धितुं तैः प्रयस्तमुत्पातैर्वा मोपलानां निरस्तः ।
यन्नैष्ठुर्यं वाष्पयानप्रकोष्ठेष्वेतां श्चूर्णीकुर्वतां घोरमासीत् ।। ९९ ।।
सम्भाव्यं चेदत्र सत्याग्रहोऽयं नो रुद्धः स्यात् सर्वकारेण बद्धः ।
तर्ह्येतद्वै राष्ट्रियं कालकूटं नैवं वृद्धं शक्तिमच्चाभविष्यत् ।। १०० ।
संरोधात्सत्याग्रहस्यास्य पूर्वं काचिद्वार्ताऽभूत्परीणामभिन्ना ।
वीचेराद्यायास्तु सत्याग्रहस्य शिष्टिः साश्चर्ये निमग्ना च भीता ।१०१।
अस्मिन्नेवानेहसि प्रोक्तबांश्च लाडो रीडिंगः सभायां जनानाम् ।
अस्म्येतेनाश्चर्यमग्नो विमूढः किंकर्तव्यं शासकैः सम्प्रतीति ।। १०२ ।।
तर्ह्यासीत्सम्राट् सुतो भारतेऽस्मिन् तस्यास्तित्वेनोत्तरादायितायाः ।
वृद्ध्या नूनं सर्वकारोऽतिखिन्नः कारागारे सग्रहान् भूयसोऽधात् ।१०३।
तत्कालञ्चास्मिन् द्विपक्षे स सन्धिं कांग्रेसेनैच्छत् कमप्याशु कर्तुम् ।
एषा वार्ता कालिकाताप्रवेशे सम्राट्पुत्रस्याऽभवद् रक्षणाय ।। १०४ ।।
कारागारस्थस्य वैदेशबन्ध दासस्याभूत्सर्वकारीय लोकैः ।
काचिद्वार्ताऽस्मिन् प्रसङ्गे प्रभाति यत्काङ्ग्रेसंप्रातिनिध्यं वहन्तः ।१०५।
शिष्टैर्लोकैः साकमायोजयन्तां काञ्चिद् गोष्ठीं गोलपीठाभिधानाम् ।
प्रस्तावोऽयं गान्धिनासीन्निरस्तो गोष्ठयां मौलाना मुहम्मद् न चेत्स्यात्
श्री मद्गान्धेराग्रहोऽयं न दासा यारोचेतेति विज्ञातमासीत् ।
कारागारोन्मुक्तिमप्यागतेन तेनाकारि श्रीमदालोचनं तत् ।। १०७ ।।
कारागारेष्वास्म धस्रेषु तेषु नाज्ञासिष्मैताः कथास्तत्र सम्यक् ।
अज्ञातार्थाश्चात्र कञ्चिद्विचारं स्पष्टीकर्तुं न प्रभूतास्तदास्म ।।१०८।।

किन्तु ज्ञातं जायते यत्तदास्थां गोष्ठयां कश्चिन्नैव लाभोऽभविष्यत् ।
सम्राट्पुत्रः कालिकाता प्रवेशे कञ्चिद्विघ्नं नाप्नुयादित्यभीष्टम् ।१०६।
ते नामासीत्तेन गोष्ठयां न कश्चित्प्रश्नोऽस्माकं वै समाधास्यतास्याम् ।
राष्ट्रे कांग्रेसे बलीयस्यभूत्सा गोष्ठी व्यर्था यन्नवाब्दानतीत्य ।११० ।
श्रीमान् गान्धिर्यन्मुहम्मद्दलीकं तत्रोपस्थातुं तदाधाद् बलं च ।
तद्वै युक्तं नैव कांग्रेसनेतुस्तत्संघर्षस्यापि नेतुः कृते तत् ।। १११ ।।
यस्यां नीतौ कार्यं बाह्यां च सार्थस्त्याज्यो भूयान्नैव सा युक्तियुक्ता ।
कारागारस्तस्य मुक्तिं च कर्तुं नैवोद्युक्ता शिष्टिराहैनमर्थम् ।।११२।।
तातश्चाहं भिन्नभिन्नेऽपराधे न्यायागारैर्मासषट्कं निरुद्धौ ।
आसीन्नूनं कौतुकं सोऽभियोगो यस्मिन्नावां संविभागं भजावः ।११३।
निश्शङ्कं वां भाषणेष्वन्यकार्येष्व स्मद्धोषाकल्पनं साध्यमासीत् ।
दण्डार्थं तु प्रस्तुतं वस्तु यत्तन्नूनं नूत्नं कौतुकं वा किलाधात्।। ११४ ।।
तातोऽवैधे क्वापि संघे सदस्यः कांग्रेसस्यासीत्स्वयंसेवको यत् ।
इत्येतस्मिन्दोष एषोऽभियोगो यत्रैतद्धस्ताक्षरं चात्र हिन्द्याम् ।।११५ ।।
सत्यं तद्धस्ताक्षरं तस्य नैवं किन्तु प्रायस्तेन हिंद्यां कदाचित् ।
कुत्रापीदं नाभवत्क्लृप्तपूर्वं ते नाजानन् केचिदेवास्य तत्तु ।। ११६ ।।
न्यायागारे कोऽपि रङ्कः प्रविष्टः स प्रादात्स्वं याचिकां देवसाक्ष्याम् ।
मोतीलालस्यैव हस्ताक्षरं तत्सोऽयं चासीत्सर्वथाऽशिक्षितश्च ।।११७।।
पश्यंस्तद्धस्ताक्षरं पत्रमेतत्तेनासीद् हस्ते विपर्यस्य नीतम् ।
तातस्तत्राङ्के गृहीत्वा मदीयां पुत्रीमासीदिन्दिरामब्धिवर्षाम् ।।११८।।
यत्स्यादस्या न्यायशालानुभूतिः सैवाद्यासीद्विस्मितताया विशेषात् ।
आसीद्दोषो मे यथा कार्यरोधार्था विज्ञप्तीस्ता मयासन् वितीर्णाः ११६
तर्हीदं वै नास्त दोषो विधाने मन्ये यद्यप्येनमात्मापराधम् ।
वेगाद् गच्छन्तोऽभवाम स्वराज्यं प्रत्येवैते त्वौपनैवेशिकं तत् ।। १२० ।।
दण्डो नह्यं दत्त एव त्रिमासात्कारागारेऽहं च तातो मदीयः ।
प्राप्तः काञ्चित्सूचनां यत्त्वदीये न्याये भूयः कुर्वतां सद्विचारम् ।१२१।
दत्तो दण्डस्तुभ्यमन्यायपूर्णः प्रत्याभातोऽत्राधिकारं गतानाम् ।
कारागारात्तेन मुक्ति प्रयास्यामीत्याकर्ण्याहं गतो विस्मयं च ।।१२२ ।।

मत्पक्षाद्वै केनचित्कोऽपि यत्नो नाकारीह न्यायभूयोविचारे ।
मन्येऽस्मत्सत्याग्रहे तत्र रुद्धे न्यायाधीशा उद्यतास्तद्विचारे ॥ १२३ ॥
कारागारे तातपादान् विहाय गच्छंश्चित्ते दुःखमत्यन्तमापम् ।
सद्यो गन्तुं गुर्जरांस्तत्र गान्धि द्रक्ष्यामीति स्वेन निर्णीतवांश्च ॥१२४ ॥
किन्त्वायानान्मेपुरा गान्धिरागात् कारागारेतत्रसाबरमतीस्थे ।
तत्रैवैनं द्रष्टुमागां तदीये न्याये चाहं सङ्गतो न्यायकक्षे ॥ १२५ ॥
तत्रैकोऽयं स्मर्तुमर्हः प्रसङ्गो यो नास्माभिर्दर्शकै विस्मियेत ।
न्यायाधीशोऽङ्ग्रेज आसीत्ससाधुभावः सौजन्येन चावर्ततात्र ॥ १२६॥
न्यायागारे चोत्तरं गान्धिदत्तम् भूयोऽस्मान् प्राबीभवद् युक्तियुक्तम् ।
प्रत्यायान्तो मार्गमध्येऽति हर्षवीचीरास्यान्तर्भजन्तः सभेऽपि ॥ १२७ ॥
वाक्यान्यस्य प्रोज्वलन्ति स्म चित्ते भावास्तेषां विस्मयोत्पादकाश्च ।
गाढा मुद्रा तद्विचारैः किलासीत्काचिद् गाढैवाङ्किताऽस्मन्मनःसु ।१२८।
प्रत्यावृत्तोऽहं प्रयागं च शून्येऽनेहस्यत्राभ्येत्य कारागृहाच्च ।
बाह्ये क्षेत्रे वर्तनं मेऽतिशून्यं दुःखं दुःखं प्रत्यभात् बुद्धवत्तत् ॥ १२९ ॥
एतावन्तस्ते सखायो ममासन् कारागारान्तःशलाकासु रुद्धाः ।
कांग्रेसस्यासीन्न संघस्तदानीं सम्यक्कार्यं कुर्वदित्यास्त खेदः ॥ १३० ॥
कार्यञ्चैतत्सम्यगताधातुमध्वन्यासीन्नान्यः कश्चनाभ्यादृतो मे ।
वैदेशिक्या वस्त्रनीतेर्निरासे त्वाधामेकां स्वां रुचिं तां विशेषात् ।१३१।
प्रत्यावृत्ते हन्त सत्याग्रहेऽपि ह्येतत्कार्यं तस्य भागोऽसि शेषः ।
वस्त्राणां व्यापारिभिः प्रायशोऽत्र प्रायागैरेतत्प्रतिज्ञातमासीत् ।।१३२।।
वासस्ते वैदेशिकं यावदत्र क्रीणन्त्याहोस्विच्च विक्रीणते वै ।
वासो नाप्यानाययिष्यन्ति किञ्चिद् वैदेशिक्याः कम्पनीतः कदाचित्
अस्मैचार्थायात्र तैर्मण्डलं तत् क्लृप्तं चासीत् तस्य चैतद्विधानम् ।
दण्डस्तेनात्रार्थिको भोक्ष्यतेऽयं कुर्याद्योऽस्माकं प्रतिज्ञाविभङ्गम् १३४ ॥
दृष्टस्तेषां नैकशोऽयं विभङ्गो मुख्यैर्मुख्यैर्वस्त्रमानायितञ्च ।
आसीदेतत् स्वप्रतिज्ञाऽस्थिराणां तेषां नूनं वञ्चनं न्यायभङ्गः ।१३५।
भूयोऽस्माभिः प्रस्तुतः स्वानुरोधः किन्तु व्यर्थः सोऽभवत्स्वार्थधीनाम् ।
इत्येतेषामापणेऽस्माभिरद्धा रोधोपायो धारणाख्यः प्रयुक्तः ॥ १३६ ॥

पर्याप्तोऽयं धारणायास्तदानीं सङ्कतोऽभूदर्थदण्डो भृतोऽभूत् ।
अर्थश्चायं मण्डलस्यैव कोशे मत्कार्यार्थं कर्तृभिः सम्भृतोऽभूत् ॥ १३७ ॥
द्वित्रैर्धन्यैः सार्थिभिः साकमेषः कारागारे वेशितोऽभूवमारात्
सार्थाश्चेमे तेऽभवन् यैर्वणिग्भिः साकं वार्तायां स्थिता मे सहायाः।१३८।
शक्त्या द्रव्यादानमाभापनं चेत्याद्यारोपोऽस्माकं शिरस्याहितोऽभूत् ।
मय्यन्येप्यासन्ननेकेऽपि दोषारोपा राजद्रोहमुख्या निरुक्ताः ॥ १३९ ॥
नाहं निर्दोषत्वसिद्ध्या अवोचं दीर्घं व्याख्यानन्तु किञ्चित् किलादाम् ।
दोषत्रय्या दण्डितोऽहं विशेषाच्छक्त्या द्रव्यादानतो भापनाच्च ।१४०।
राजद्रोहाख्यो न दोषो निरूढस्तस्मै दण्डः पूर्वमेवाहितोऽभूत् ।
दण्डत्रय्यां द्वौ किलाष्टादशानां मासानां मे स्तां तृतीयः सहायः ।१४१॥
एको वर्षश्चात्र मासा नवासन् कारागारे वासकालावधिर्मे ।
द्वैतीयीकोऽयं ममासीच्च दण्डो मध्ये षट्सप्ताहमात्रं विरामः ॥१४२॥

पृथ्वीप्रशस्तिनिरूपितर्षिकुलादिमस्नातककथा-
लेखिनीयं लेखनी कविरत्नकरकमलाश्रिता
श्रीयज्जवाहरलालनेहरुचरितकाव्यमलेखयत्
त्तस्य सर्गो द्वादशोऽयं यात्यहिंसास्योर्नयाख्यः ।

लक्ष्मणपुरीयः कारागारः

मालिनी

त्रयोदशः सर्गः

विधुनयनखगेन्दुख्रीष्टवर्षेऽपरार्धे-
नृपनयजठरस्थैर्दण्डितानां जनानाम् ।
भरतभुवि निवेशो वन्दिगेहे न किञ्चि-
न्नवमिह समयस्याधिक्यमासीदभीष्टम् ॥ १ ॥

समजनि च यदासौ वङ्गभङ्गोऽपघर्ष
स्तदनु सततमेषां तन्तुरासीत्प्रवृत्तः ।
कमपि समभियोगं चाप्रवर्त्यैव लोका
अदधत दृढदण्डञ्चात्र दृग्बन्धनाख्यम् ॥ २ ॥

अहह परमनेता लोकमान्योऽपि वृद्धो-
ऽभजत षडधिवर्षान् बन्दिगेहे निवासम् ।
महति तु गतयुद्धे बन्दिगेहाधिवासा
भृशमतिशयमापुर्दृष्टिबन्धांश्च विष्वक् ॥ ३ ॥

अवहदिह च काचिन्नूत्नषड्यन्त्रधारा-
सपदि मरणदण्डाऽऽजीवनं वन्दिता च ।
अभवतमलिबन्धू चात्र दृग्बन्धमाप्तौ ध्रुव-
मवुलकलामोऽप्यत्र दृग्बद्ध आसीत् ॥ ४ ॥

समरमनु च सद्यः पाञ्चनद्यप्रदेशेऽ-
लगदगलितवेगं सैनिकं तद्विधानम् ।
बहुल गणनयास्मिन् वन्दिगेहप्रवेशान्
अदधत बहुदण्डांश्चापि षड्यन्त्रमूलान् ॥ ५ ॥

इति नृपनयमूलो भारते राजदण्डोऽ-
भवदिहसुलभोऽसौ सर्वसाधारणश्च ।
परमिह मतिपूर्वं नैति कश्चित्कदाचित्
क्वचिदपि किल कारागारवासं मनुष्यः ॥ ६ ॥

अपि निजनिजकार्यं कुर्वतां तत्प्रसङ्गे
नृपनयजनितोऽसौ दण्ड एति स्म सद्यः ।
अरुचिविषयतां ये यान्ति गुप्तञ्चराणां
सपदि निगडितास्ते दण्डिता वा भवन्ति ॥ ७ ॥

सविधिविहितयत्नास्ते लभन्तेऽपि मुक्तिम्
क्वचिदथयतनं तन्निष्फलं चापि दृष्टम् ।
अदधत नवमेकं गान्धिरस्यानुगाश्च
यमदिशि शफरीकावासिनो नोऽनुकार्यम् ॥ ८ ॥

अविदितपदमासीत्प्रायशो वन्दिगेहे
विधुनयनखगेन्दुख्रीष्टवर्षे तथापि ।
निगरिणि भयदायिन्यन्तरस्मिन् स्थितिं ते
न विदुरिह कपाटे दण्डितानां जनानाम् ॥ ९ ॥

अनुमिनुत इहैको बन्दिगेहान्तरे स्युः
कठिन कृतिषु दक्षा भीषणाः केऽपि जीवाः ।
अहमिदमभिमन्ये बन्दिगेहोऽपमाना-
दिमिरिह बहुकष्टैः क्लान्तिभीतिप्रदोऽस्ति ॥ १० ॥

खनयनखगचन्द्रात्ख्रीष्टवर्षात्तु कारा-
गृहवसतिकथास्ताः शृण्वतां चासकृन्नः ।
अरुचिरथ भयं तन्मन्दतां यातमासीत्
अभवदथ मनो नः प्रोद्यतं तत्र गन्तुम् ॥ ११ ॥

सति च मनसि नद्धे लोहजे तत्कपाटे
प्रथममिह विशन्नुद्वेगमापं च खेदम् ।
तमवसरमिहाब्दा द्वादशाद्य व्यतीता
स्त्रिदशदशशतानां स्त्रीनराणां प्रवेशात् ॥ १२ ॥

परमपि नृपनीतेरन्तरैवापराधा-
दगणयत तु शिष्टिर्हेतुनान्येन जातान् ।
प्रहरणहरणादेर्धारया वै कयाचित्,
भुवि तदपरया वा सोपधाराधियापि ॥ १३ ॥

बहिरयनमथान्तर्यानमेषामनेके-
ऽसकृदिह गमितास्तैर्मर्म विज्ञातमेव ।
यदिह निविशतां नः किं किमापत्स्यतेऽत्र
किमिह च विनिविष्टैरन्तराशासनीयम् ।। १४ ।।

यदवधि च विचित्रं नीरसं वा तटस्थं
विपदुपगतमेतज्जीवनं कल्पितं स्यात् ।
तदवधि च विचित्रं जीवनं जीवितुं स्वं
सपदि च यतते स्मेत्यस्ति चाभ्याससिद्धम् ।। १५ ।।

मुहुरिह क्रियते यत्तत्स्वभावत्वमेति
स्फुटमिदमिह कार्ये चाप्यकार्येऽपि दृष्टम् ।
तदपि भयकपाटेऽस्मिन् प्रवेशक्षणेऽस्म-
न्मनसि भवति कश्चित्क्षोभ उद्वेगमूलः ।। १६ ।।

विचलति हृदयं चैवाक्षिणी द्रष्टुमार्ति
भजत इह कदास्याद्दर्शनं बाह्यसृष्टेः ।
हरितिम भरितानां शाद्वलानां स्थलानां
दिशि दिशि चलतां वा वाहनानां जनानाम् ।। १७ ।।

परिचितवदनानां दर्शनं दुर्लभं स्यात्
इति दृशमुपनयतस्तान् पार्श्वतो दूरतश्च ।
मम प्रथमनिवेशस्यावधिस्तावदर्धे
विरत इति किलाहं बन्दिगेहानुभूतेः ।। १८ ।।

अहमधिकृतलोकाश्चोभयेऽप्यत्र काले
मनसि किमपि दुःखं वैक्लवं चाभजाम ।
तदधिकृत जनायन्नूत्नूत्नापराद्धा-
गमनजनितशङ्कास्तङ्किताः संख्ययैषाम् ।। १९ ।।

उपचयमुपयातो पप्लवा सा किलासी-
दवधिमतिशयाना सीमभङ्गोद्यताऽऽसीत् ।।
इयमतिशयमानां तत्र चिन्तेयमासी-
त्परमनवलशैलीकाः समेतार आसन् ।। २० ।।

यदपि सकललोकाः सर्ववर्गोद्भवास्ते
तदपि समधिकास्ते मध्यवर्गा इहासन् ।
परमिह सकलानामेकसामान्यमासीत्
इतरनिगडितेभ्यस्सर्वथा ते विभिन्नाः ॥ २१ ॥

व्यवहृतिमभजंस्ते नो पुराणप्रकाराम्
अधिकृतपुरुषैस्तत्स्वीकृतं तावदासीत् ।
परमिह नियमेषूद् वर्तमानेषु कश्चि-
न्नवलनियम आसीन्नानुभूतिर्न दृष्टिः ॥ २२ ॥

न खलु विनत आसीन्नापि भीरुः किलासीत्
नृपनयभुवि बन्दी काङ्ग्रेसी विशेषात् ।
वसति सति च कारागारमध्येऽपि तस्मिन्
जनयति जनसंख्याशक्तिमत्ताभिमानम् ॥ २३ ॥

वहिरिह विहितेषु प्राय आन्दोलनेषु
वहति रुचिमथान्तर्वन्दिगेहोद्यमेषु ।
इति च विचिनुवन् वै बन्दिभूतो जनोऽयं
दृढदृढतर आसीत्तेजसा चाभ्युपेतः ॥ २४ ॥

इति च सति न नोतिर्बन्दिगेहाधिकारिष्व-
सहयुगियमासीदस्मदीयाऽविशेषात् ।
यदि न वयममीषामाचरिष्याम साह्यं
ध्रुवमतिशयमेष्यन्त्यत्र कष्टान्यमीषाम् ॥ २५ ॥

प्रविशति बहुधाऽसौ वन्दिगेहाधिकारी
निगडितजनकक्षान् सान्त्वयन् बोधयंश्च ।
वयमिह निजवाञ्छातोऽविशामात्र केचि-
त्स्वयमपि बलयोगादाविशन्नआग्रहेण ॥ २६ ॥

तदपसरणशङ्का नाभवत्तत्र काचित्
पुनरपसरतश्चाकीर्तिरप्युद्गता स्यात् ।
बहिरयितुमभीप्संश्च प्रतिज्ञां विधाय
बहिरुपगमितः स्यात्खेदमावेदयंश्च ॥ २७ ॥

पुनरपसरणेनान्दोलनान्निर्गतः स्यात्
स्वबलमपचितं स्यात्तेन सत्याग्रहस्य ।
अभिलषति ततोऽयं वन्दिगेहाधिकारी
क्वचिदपसरणं स्याद् वन्दिनोऽस्मासु चेति ॥ २८ ॥

इति लखनउकाराध्यक्षमेषोऽधिकारी
समनुददपसर्तुं बाध्यतां कश्चनेति ।
अपसृतवति वन्दिन्यस्मि संस्तौमि तुभ्यं
पदमिदमुपहर्तुं खानबह्वादरेति ॥ २९ ॥

इह च सहचरा नो मध्यमे वन्दिगेहे
महति महति कक्षे रक्षितास्तावदासन् ।
व्यवहृतिगुणतश्चाष्टादशास्मासु केचि-
त्क्वचिदनयनार्थे मण्डपे स्थानमापुः ॥ ३० ॥

अहमपि जनकेन भ्रातृयुग्मेन साकं
पृथमिह पटकक्षे स्थानमापं न दीर्घे ।
स्ववशिमनि वयञ्चायातयातं विदध्मो
निगडितजनवासे कक्षतः कक्षमन्यत् ॥ ३१ ॥

निजजन मिलनस्यासन्ननेकेऽवकाशा
नवनिगडनवृत्तैर्वृत्तपत्राण्ययन्ते
प्रतिदिनघटनानां नूत्नवृत्तैरिमानि
नवलमजनयन्वै धैर्यमुत्साहमन्तः ॥ ३२ ॥

बहुसमयनिरासोऽन्योन्यसंलापमध्ये
क्वचिदपि च विवादो जायते स्मेति सत्यम् ।
अहमिह पठनं वा कार्यमन्यत्ससारं
किमपि खलु विधातुं नालमासं निराशः ॥ ३३ ॥

उषसि निजनिवासं मार्जयन् क्षालयंश्च
निजपितृवसनानि स्वच्छयंश्च स्वकानाम् ।
अनयमहमथास्मिन् चक्रयन्त्रप्रवृत्तौ
शिशिरऋतुरिदानीं मञ्जुलोऽभूत्प्रवृत्तः ॥ ३४ ॥

अपठितलिखितानां च स्वयंसेवकानां
परिकलितदलोऽहं पाठयँस्तानिहासम् ।
प्रतिदिनमपराह्णेऽखेलमन्यैः सुहृद्भिः
रुचिरिह मम वालीबालखेलेऽधिकाऽऽसीत् ॥ ३५ ॥

क्रमश इह विवृद्धान्येत्र नो बन्धनानि
बहिरथ निजसीम्नो निर्गमो रुद्ध आसीत् ।
न च वयमिह भागे वन्दिगेहस्य तस्मिन्
न्नयितुमधिकृताः स्मो यत्र मित्राण्यवात्सुः ॥ ३६ ॥

अथ च पठिति कक्षास्ताः स्वयं तत्र रुद्धा,
इह च दुरवरेऽहं वन्दिगेहाद्विमुक्तः ।
वहिरगममहं यन्मार्चमासे पुनश्चा-
विशमिह किल षड्भिः सप्तभिर्मुन्यहैर्वा ॥ ३७ ॥

स्थितिरतिपरिवृत्तिं प्रापितास्तीत्यपश्यम्
पितरमहह नैनीतालकारामहिन्वन् ।
तदनु नवनवं चासीत् प्रवृत्तं विधानं
प्रति तदभवदन्तर्वन्दिगेहान्तरेऽन्यद् ॥ ३८ ॥

विपदवयवकक्षांस्तान्मया न्युष्टपूर्वान्
पृथगनयत शिष्टिर्वन्दिनो वारकाणि ।
अनुमतिरिह चान्योऽन्यस्य वासे प्रवेष्टुं
मिलितुमथ च पत्रं मासि मास्येकमात्रम् ॥ ३९ ॥

अशितमपि च तेभ्योऽदायि निम्नस्तरीयं,
यदपि विपणितोऽपि क्रेतुमाज्ञात्त मासीत् ।
इह च मम कृतेऽभूद्वारकं यत्र पञ्चा-
शदधिकजनवासः कल्पितस्तावदासीत् ॥ ४० ॥

शुभ विधिवशतोऽस्मिन् वारके मे सखायः
सहजपरिचिताश्चासन् समस्ता अपीमे
वयमिह तृणपुञ्जानीव निर्वेशिता स्मः
तप्रशियनमिहासीद्द्विव्रपादान्तरालात् ॥ ४१ ॥

अनुदिनमिह नाशात्सर्वथैकान्ततायाः
पुनरपि पुनरेकस्यैव यूथस्य दृष्टेः।
लघुलघुकलहानां नित्यशोऽत्र प्रवृत्ते-
रिति सकलविपत्तेः शान्तिलेशानवाप्तेः ।। ४२ ।।

वयमिह सकलानां सन्मुखेऽस्नाम नित्यं
वसनमपि समक्षं तत्र प्राक्षालयाम।
भ्रमणमिह समन्तादेव व्यायाम आसी-
त्स्थगयति च यदन्तस्तादृगालाप आसीत् ।। ४३ ।।

विवदनमनुबोद्धुं शोचितुं न क्षमत्वं
मनसि भवति शिष्टं भ्राम्यमाणे श्रमेण ।
इति विरमदिवासीज्जीवने दृश्यमेकं
शतगुणविरसेऽस्मिन्नास्त शोभा न सौख्यम् ।।४४ ।।

इह सुखसुविधांशः सम्भवत्येव नाल्पो
विविधरुचिधराणां भिन्नशीले समाजे।
हृदयविकलतेयं वन्दिमात्रस्य चासीत्
अहमतिशयखिन्नोऽभूवमेकान्ततार्थम् ।। ४५ ।।

कतिपयशरदन्ते वन्दिगेहेऽपि लब्धं
चिरमभिलषितं तच्छान्तमैकान्तिकत्वम् ।
नयनयुगलमासीन्मार्गयन् व्यक्तिरूपम्,
मनसि च विकलोऽहं सङ्गिनां पार्श्वमैच्छम् ।। ४६ ।।

इह लखनवकारागारगंसङ्गवासा-
वसरमहमतीवौत्सुक्यतोऽस्मार्षमद्धा ।
द्विविधमपि च वासं वाञ्छतोऽप्यन्तरासी
दिह मम सुखकारी कश्चिदेकान्तवासः ।। ४७ ।।

पठति लिखति यत्रारामतो वन्दिभूतो-
ऽप्यहह तमतिशेते कोऽन्य एकान्तवासम् ।
इदमपि कथयेयं यत्तदानीमिहासन्
प्रकृतिमुदितचित्ताः साधवः सङ्गिनो मे ।। ४८ ।।

सततसहनिवासात्काचिदन्तर्विरक्ति-
नं खलु मम समेषामप्यभूत्क्षोभपूर्वा ।
अहमिह च रहस्तत्प्राप्तवान् वारकस्य
क्वचन वहिरनाच्छन्ने स्थितो वोपविष्टः ॥ ४६ ॥

अयमिह चलितोऽभूद्धन्त वर्षर्तुरस्मिन्,
धनगहनतयाऽभूद् बाह्यसंस्थानसौख्यम् ।
बहिरधिकतयाहं वारकात्प्रत्यतिष्ठं
अभवमिह सशक्तः सोढुमासारघर्मे ॥ ५० ॥

इह सपदि शयानः सावकाशे स्थलेऽहं
नभसि घनघनाभां मेघमालामपश्यम् ।
सततनवलरागाः सन्ति रम्याः कियन्तः-
स्त्वनुभवति मनो मे हन्त मेघावलीनाम् ॥ ५१ ॥

नहि प्रथममपश्यं सौभगं त्वीदृगेषाम्
इह सपदि शयानः सावकाशेऽन्वभूवम् ।
प्रतिपलपरिवृत्तिर्मेघमालाकृतीनां मतिमधुर-
मिहास्याः दर्शनं स्वप्न एकः ॥ ५२ ॥

परमवसर एषो भाररूपो ममासी-
न्नतु सुखमय आनन्दप्रदो वा ममायम् ।
सततनवलरूपं विभ्रतां वारिदानां
नयनविषयतायां सौख्यपूर्णः किलायम् ॥ ५३ ॥

इह कमपि विनोदं चान्वभूवं किलाहं
सुखमभवदिहाविष्कारकस्येव मेऽन्तः ।
मनसि भवति भावो वन्दिगेहाद्यथाऽस्मा-
त्परवशिमकठोरादस्मि मुक्ति गतोऽहम् ॥ ५४ ॥

अबिदमिह न कस्मादद्य वर्षर्तुनाहं
तरलित इह नैवं पूर्वमासंत्कदाचित् ।
न च पुनरनुमेयं भाविवर्षर्तुकाले, कमपि
वहति चित्ते बिस्मयं वर्तमानः ॥ ५५ ॥

असकृदहमैक्षं सागराणां गिरीणा-
मुदयनिलययोस्तद्रम्यमर्कस्य दृश्यम्।
तदतिमधुरशोभां श्लाघयन्नप्यवर्ते
महति सुखपयोधौ मज्जितश्चाप्यभूवम् ॥ ५६ ॥

परमतिरमणीयं तच्च तच्चावलोक्य
मनसि सहजमेतः सर्वमित्याकलय्य।
अपहृतमपि चित्तं तत्समाकृष्य तस्मा-
त्क्वचिदपि विषयेऽन्यत्रैव साधु न्ययुञ्जे ॥ ५७ ॥

परमियमतिशोभा वन्दिगेहे कुतः स्या-
दुदयनिलययोर्यत्रानुदृष्टो न भास्वान्।
क्षितिजमिह हि गुप्तं तप्तसूर्यश्च तत्रो-
परि चरति चिरत्नोच्चाकृतीश्चात्र भित्तीः ॥ ५८ ॥

इह न किमपि चित्रं नो विचित्रञ्च किञ्चित्
अविरतमिह नेत्रे पश्यतो म्लानिमग्ने।
मलिनमलिनभित्तीर्वारकाण्यप्यरम्या-
ण्यथ परिणतदेहं वन्दिगेहं कठोरम् ॥ ५९ ॥

विविधमिह प्रकाशं छायायाऽऽलिङ्ग्यमानं
बहुविधमथ रङ्गं द्रष्टुमास्तां क्षुधार्ते।
सपदि च मम नेत्रे वारिदान् वीक्ष्य नाना-
ऽऽकृतिधृतिदक्षान् नृत्यतः स्मातिमात्रम् ॥ ६० ॥

क्वचन जलदतन्तुस्त्रुटयति स्म स्वभावा-
दिह च विवरमध्याद् दृश्यते वृष्टिदृश्यम्।
क्वचन गहननीलं वीक्ष्य तन्मध्यतोऽहं
गगनमनुभवामि स्माप्यनन्तस्यदृष्टिम् ॥ ६१ ॥

व्यवहृतिकठिनत्वं वर्धतेस्मासु किञ्चित्
दृढसुदृढविधानान्यस्मदर्थे श्रितानि।
प्रमितगणितमेवान्दोलनं चास्मदीयं
विशदयति च शिष्टिश्चेष्टितैः कोपदृष्टिम् ॥ ६२ ॥

अभिलषति च शिष्टिः सम्मुखस्पर्धयाऽस्मा-
नवगमयितुमाराद्दण्डशक्ति स्वकीयाम् ।
चलति नवविधानैस्तत्प्रयोगप्रकारै-
रधिकृतपुरुषाणां वन्दिनाञ्चात्र वादः ॥ ६३ ॥

इह बहुशतसंख्या वन्दिनस्तद्विरोधं
प्रकटयितुममीषां दर्शनं त्यक्तवन्तः ।
अनुमितमिदमासीत्सन्ति केचित्तु मुख्या
इति वयमिह सप्त स्थापिता दूरभागे ॥ ६४ ॥

पृथगयमितरेभ्यो वारकेभ्यः किलासी-
त्तदधिवसति साकं वै मया टण्डनश्रीः ।
सुविदित इह जोसेफ् बालकृष्णश्च शर्मा
बहुमत इह देशे देवदासश्च गान्धिः ॥ ६५ ॥

अपि च वसति देसाईमहादेवनामा
लघुनि खलु पदेऽस्मिन्नापदः काश्चिदासन् ।
परमिह परिवृत्याऽऽनन्द एवानया मे
ऽभवदिह हि न तावांल्लोकसम्मर्द आसीत् ॥ ६६ ॥

ध्रुवमधिकतमासीदत्र शान्तिश्च कान्तो
मम स सुचिरतोऽभूत्कश्चिदेकान्तलाभः ।
पठनप्रभृतिकार्येभ्यश्च भूयान् स कालः
किल सुलभ इहासीच्छिष्टसङ्गस्य हेतोः ॥ ६७ ॥

पृथगिदमिह कारागारभागान्तरेभ्यो
वयमिह पृथगास्माशेषवन्द्यन्तरेभ्यः ।
बहिरखिलजगत्या अप्यभूत्तत्पृथक्त्वा
किमपि न सुलभं नो वृत्तपत्रादि चासीत् ॥ ६८ ॥

इति कलितपृथक्त्वा अप्यभूमात्र कैश्चि-
द्विधिभिरवगतार्थाः सूचनानां विशेषात् ।
गलति किमपि वृत्तं वन्दिगेहेष्वकस्मात्
सयतनमवरुद्धेष्वप्यनेकैः प्रकारैः ॥ ६९ ॥

प्रहितदलविशेषैर्मासिकैर्दर्शनैश्चा-
प्यतिमहिमवतीनां सूचनानां स लाभः।
भवति यमवलम्ब्यान्तस्थितः अप्यवश्यं
कलयितुमिह कर्मालम्भवामो विधातुम् ॥ ७० ॥

वयमवगतवन्तो मान्द्यमान्दोलनस्य
युगमतिगतमासीत्तच्चमत्कारपूर्णम् ।
अपि च सफलताऽऽसीद् धूमिलेऽस्मद्भविष्ये-
किमपि किमपि दूरं प्लायमानेव भान्ती ॥ ७१ ॥

द्विदलवपुरभूत्कांग्रेसमग्रेसरच्चा-
भिलषतिपरिवृत्तिं त्वेकमन्यन्न काञ्चित् ।
प्रथमदलसदस्यो देशबन्धुः च किलेच्छ-
न्निचयनविनिवेशं प्रान्तकेन्द्रद्वयेऽपि ॥ ७२ ॥

इह मम जनकोऽप्येतन्मते सम्मतोऽभू-
द्द्वयगपि निजहस्ते संग्रहीतुं परश्च ।
परमितरदलं श्रीराजगोपाललग्नम्
अभवदसहयोगेनैव कार्यं विवक्षु ॥ ७३ ॥

अवसदिह च गान्धिर्वन्दिगेहेऽवरुद्धः
इति दलयुगलं तन्नास्त निर्णेतुमर्हम् ।
छलदुदधितरङ्गोच्छृङ्गरूढानिवास्मान्
प्रगमयति किलादर्शैरिहान्दोलनस्य ॥ ७४ ॥

लघुलघुकलहाम नश्चाधिकारप्रपित्सा
प्रभृतिभिरपनीतास्ते वयं नीतियोगैः ।
वयमनुभवमेनं प्राप्तवन्तोऽत्र साध्यं
कठिनमपि हि कार्यं स्वौजसोत्साहतश्च ॥ ७५ ॥

बहिरधिगतवृत्तैरोजसो मन्दतायां
मनसि निपतितैस्तैर्वन्दिगेहप्रभावैः ।
विगलति पुनरुत्साहस्य लेशे किलास्मिन्
निवसनमभवन्नो दुष्करं दुर्भरञ्च ॥ ७६ ॥

परमिह मनसोऽन्तः कोऽपि सन्तोषलेशो
ऽस्फुरदिह निवसामः स्वाभिमानेन साकम् ।
ह्रसितमिह न किञ्चिद् गौरवं सत्यमार्गे
स्थितमिह परिणामः कोऽपि नामोदितः स्यात् ॥ ७७ ॥

स्फुटमिदमपि नासीत्किं भविष्यत्यथाग्रे ?
यदपि भवतु दैवेनास्ति नूनं प्रक्लृप्तम् ।
निजजनपदमुक्त्यै जीवनं त्वस्मदीयं
क्वचन किमपि कारागारकक्षेषु यायात् ॥ ७८ ॥

इति वयमिह नानालापतोऽन्योन्यमन्तः
स्वगतपरगतं वा चित्तगं वेदयामः ।
स्मरति दृढमिदं मे मानसं जातु जोसफ्-
विहितबहुविमर्शैः प्राप्नुमः सारमेनम् ॥ ७९ ॥

तदनु स गतवान्नो दूरदूरं विहाया-
भवदिह विकृतीनामुग्र आलोचको नः ।
शरदि लखनवस्थे वन्दिगेहे न जाने
स्मरति स पुनरेतं तं प्रसङ्गं न वेति ॥ ८० ॥

प्रतिदिनमिह किञ्चित्कर्म व्यायामयुक्तं
कलयितुमपि युञ्ज्मो मण्डले प्लायमानाः ।
क्वचिदथ वृषतुल्याः कूपतश्चर्मकुम्भं
द्विश उदकभृतं तं यावदभ्युद्धरामः ॥ ८१ ॥

सलिलमिदमिहैवागारसीमन्युदीतान्
हरितिमरमणीयान् शाकवृक्षान् निषेक्तुम् ।
दिशि दिशि विसृजामश्चक्रयन्त्रे च सूत्रं
किमपि मृदुलमेके तत्र कृन्ताम नित्यम् ॥ ८२ ॥

लघुषु लघुषु धस्रेष्वत्र दीर्घासु निट्सु
पठनमिह ममैकं कर्म मुख्यं किलासीत् ।
उपसरति यदास्मान् वन्दिगेहाधिकारी
प्रतिसरणमपश्यन्मां पठन्तं लिखन्तम् ॥ ८३ ॥

स खलु पठनशीलं मां न सोढुं क्षमोऽभू-
त्किमपि किमपि मन्दं जल्पतिस्माप्यसौ माम् ।
व्यसृजमहमहो यद् द्वादशेऽब्दे समाप्य
न तदय धुनापि प्रोज्झति प्राड्विकाकः ॥ ८४ ॥

स पठनविमुखः सन् कर्नल रे लाभमाप्त
स हि न विकलताया वेद हेतून् विचारान् ।
अपठनपटुताया एव हेतोश्च तस्या-
भवदयमुपहारोऽमुष्य मुख्याधिकारः ॥ ८५ ॥

अथ विततनिशाभिर्निर्मलेनाम्बरेण
प्रहितमिह मनो मे तारकामण्डलेऽस्मिन् ।
प्रतिकृतिसहकारात्प्रत्यभिज्ञाततारा-
स्तदुदयसमये चैवाचराम प्रतीक्षाम् ॥ ८६ ॥

स्वसमयमतिवाह्याहानि सप्ताहवेलाम्
व्यपनयमिह मासानार्जयंश्च स्वभावम् ।
वहिरखिलभरोऽयं मातृ-पत्नी-भगिन्या-
दिषु निपतित आसीत्स्त्रीसमाजे विशेषात् ॥ ८७ ॥

अहह, सुतपतिभ्रातृप्रतीक्षासु तासां
स्थगिततनुमनोभिः खेदभाजां न शान्तिः ।
अपितु प्रियजनानां वन्दिगेहस्य लौही-
ष्वपरवशशलाकासु स्थितानां विमर्शात् ॥ ८८ ॥

विधुनयनखगेन्दुख्रीष्टवर्षान्त्यमासे
मम प्रथमविनिग्राहात्परं च प्रयागे ।
अपि पुरुषगणानां ख्यात आनन्दनाम्ना-
ऽनिशमिह भवने नो यातमायातमासीत् ॥ ८९ ॥

मयि च पितरि चार्थो दण्डरूपेण देयो
यदपतदिह तं ते प्राप्तुमायान्ति ते स्म ।
क्वचन च स न देयश्चेति कांग्रेसनीत्या
न खलु किमपि तेभ्यो दीयते स्मार्थजातम् ॥ ९० ॥

इति प्रतिदिनमर्थं तुल्यमूल्यं तु तत्तद्
बहिरुपकरणं नस्तेऽत्र विक्रीय निन्युः ।
इह मम चतुरब्दा इन्दिराख्या तु पुत्री
पुनरपि पुनरेतद्वीक्ष्य वै रुष्यति स्म ॥ ९१ ॥

नृपपुरुषविरोधं साऽकरोत्तीव्ररोषं
प्रकटितमिह तस्या वीक्ष्य चेतस्यभून्मे ।
ननु पुरुषदलेऽस्या बाल्यभावाः कदाचि-
न्मनसि न बलिनः स्युर्मा च कुर्युः प्रभावम् ॥ ९२ ॥

वयमपरजनेभ्यो वन्दिभूतेभ्य आरा-
त्पृथगुपचरिताः स्यामेति यत्नः सदासीत् ।
इति नृपनयदोषान्निग्रहं प्राप्तवद्भ्यः
निरचिनुत पृथङ्नो वन्दिगेहान् प्रशिष्टिः ॥ ९३ ॥

परमखिलतयैतद् दुष्करं कार्यमासी-
द्वयमितरजनांस्तान्प्रायशोऽन्तर्मिलामः ।
अधिगतमिदमेभ्यो नूनमात्मानुभूत्या
यदिह किमिति कारागारवासानुलग्नम् ।
इयमिह खलु गाथा ताडनैः पीडनैश्च
चलति बलवदुत्कोचैस्तथा भ्रष्टताभिः ॥ ९५ ॥

अशनमनशनीयं कुत्सितं गर्हितं
चासकृदशितुमिदं चेवायते किन्तु नाश्नाम् ।
अनुचरनिचयोऽयं सर्वथाऽयोग्य आसी-
दतिलघुभृतिभाक् स्वग्राहको वन्दिलोकात् ॥९६॥

अधिकृतपुरुषाणां कार्यजाताधिकारौ
नियमविलिखितौ चैवाधिकौ नैकरूपैः ।
ऋतमनुसरतां नः केनचित्पालनीयौ
न च तदुचितयोग्यत्वार्जनेनावसेयौ ॥ ९७ ॥

इह किमपि न बन्दिस्वान्तसंस्कारमार्गं
दिशति न च तदीयं शीलमेवोपकर्तुम् ।
न च किमपि सुकार्यं शिक्षितुं बन्दिगेहो-
दितनवनयशास्त्रे तं परिष्कर्तुमासीत् ॥ ९८ ॥

श्रमकठिनतयाऽसावुद्विजेद्वा बिभीयाद्
भवतु च भृशदान्तश्चैष आज्ञानुवर्ती ।
व्रजतु स्वभियमन्तर्धारयन् वन्दिगेहा-
त्पुनरिह प्रतियातुं नोत्सहेतापराद्धुम् ॥ ९९ ॥

इति भरतभुवोऽस्या वन्दिगेहस्य नीति-
र्गतकतिपयवर्षैः संस्कृता किञ्चिदस्ति ।
अशनमपि च किञ्चित्संस्कृतं वस्त्रजातं
वहिरुपगतवन्दिप्रोद्गतान्दोलनेन ॥ १०० ॥

असहयुजि च शक्तौ वेतनं वार्डराणा-
मुपचितमिह शिष्टि प्रत्यनुक्रोशसृष्टयैं ।
शिशुषु लघुवयःसु ज्ञानवृद्ध्यै च शिक्षा-
विधिरपि विहितोऽयं वन्दिगेहश्रियेऽस्ति ॥ १०१ ॥

इति सति सति यत्ने नेदृशां संस्क्रियाणां
परिणतिरिह काचिच्छोभना भाविनी नः ।
अधिकतरमिदानीमप्यसौ प्राक्तनी सा
प्रसरति भुवि काचिद् भावना शासकानाम् ॥१०२॥

नृपनयकृतदोषा वन्दिनोऽद्यापि वन्द्य-
न्तरसमतभावात्कष्टजातं सहन्ते ।
व्यवहृतिरधिकारो वा न तेषां विशेषा-
त्परमितरजनेभ्यः सन्ति तेजस्विनोऽमी ॥ १०३ ॥

अपि च विशदबुद्ध्या संयुता इत्यमी यं
कमपि किमपि लाभं नो धनं वाऽप्यविन्दन् ।
स्वयमनुचरवर्गस्तान्न वाञ्छत्यथैता-
नवसरमुपगम्य क्लेशयन्ति स्म तीव्रम् ॥ १०४ ॥

सति च नियमभङ्गे क्लेशदानेन कश्चि-
चिदवसितिमगच्छद् बालकः षोडशाब्दः ।
'स्ववश' इति स वक्ति स्वं हतो वेत्रघातै
रवसिततनुरासीद् वेत्रपाशे निबद्धः ॥ १०५ ॥

त्वचमुदधरदस्य क्लेशदः कर्मचारी
'जयति जयति गान्धीत्यस्य घोषस्य कर्तुः ।
प्रतिदमनमयं तं घोषमुच्चैरकार्षीत्
'चिदवसितिमयासीद्वेत्रितस्तावदासीत् ॥ १०६ ॥

अयमिदमनुयुक्तप्रान्त आतङ्कवादानु-
गतकृतिशतानां दोषिणां नायकोऽभूत् ।
इति न मतिमतां तत्ताडनं पीडनं वा
ऽभिमतमिह भवत्येतन्न रक्षापराणाम् ॥ १०७ ॥

'दक्षः पुरुष' इति साङ्ख्ययोगदृशोऽलिखच्छ्रुतिमूलतां
यो जवाहरलालनेहरुचरितमिदमनुबद्धवान् ।
तत्कृतावस्यां त्रयोदशसंख्यकः सर्गः शुभोऽयं
'लक्ष्मणपुरीयो वन्दिगेहो' नाम याति समाप्तिमेनाम् ।

पुनर्बहिरागमनम्

वंशस्थविलेन्द्रवंशयोरुपजातिः

चतुर्दशः सर्गः

भवन्त्यभावा वहवोऽत्र वन्दिनाम्
विशेषतः खेदनिदानता द्वयोः ।
गिरां मृदूनां महिलामुखोद्‌गिराम्
मनोज्ञहासस्य शिशूच्चयस्य च ॥ १ ॥

वचांसि यान्यत्र स्पृशन्ति नः श्रुतिं
भवन्ति नैतानि किल प्रियाण्यहो ।
कठोरता तेषु भयावहा भव-
त्यरण्यभाषाऽप्यपशब्दभूयसी ॥ २ ॥

ममैकदा नूतन एव कश्चन
प्रतीयतेस्यानुभवो यदत्र मे ।
व्यतीतमासेषु न षट्सु कुक्कुर-
स्वरोऽनुभूतः किल बुक्कनोत्थितः ॥ ३ ॥

वयं विमुक्ताः किल राजनैतिकाः
समेऽपि कारागृहतो नवाब्दके ।
तदाभवन्नत्र शताच्छतद्वया-
मिता विशिष्टस्तरकास्तु वन्दिनः ॥ ४ ॥

गताब्दमध्ये किल वर्षतोऽल्पकं
गतास्तु कालं किल ये विनिग्रहम् ।
इमे विमुक्ता अभवन् स्वकालतः
सुदीर्घदण्डाः पुनरागतास्तु ये ॥ ५ ॥

अमी अकस्माद् बहिरीरिता इति
प्रकाममाश्चर्यमुपागता वयम् ।
न कापि विज्ञप्तिरभूत्पुरेदृशी
यदत्र सामान्यविमुक्तिरेष्यति ॥ ६ ॥

विनिश्चितं प्रान्तविधानसंसदा
विमोक्षणं नैतिकबन्दिनामिदम् ।
शृणोति नैतादृशयाचनं पुरा
प्रशासनं प्राय इतीह विश्रुतम् ॥ ७ ॥

परं स्थितिं वीक्ष्य प्रशासनं मनाक्
करोति किञ्चित्समयोपयुक्तम् ।
इह प्रतीपं न समाचरन्महा-
सभा तदा राष्ट्रियका तु शिष्टितः ॥ ८ ॥

सदस्यवर्गोऽत्र मिथो विरोधे
मग्नश्च तस्या अभवन्मतिच्युतः ।
न चापि कारागृहमध्यवासिताः
प्रधानकांग्रेसिजनास्तदाऽऽसन् ॥ ९ ॥

कपाटतो वन्दिगृहस्य यद्बहि
र्विनिःसृतिस्तोषसुखप्रदा भवेत् ।
नवः समीरो विततं च शाद्वलं
पथि प्रदृश्यानि च मित्रदर्शनम् ॥ १० ॥

इमानि सर्वाणि नयन्ति मत्ततां
मनो विनोदोन्मदतां च विन्दति ।
बहिर्जगद्वीक्षणतश्च सर्वतः
पुरा प्रसादो मदयत्यसौ जनम् ॥ ११ ॥

मनोऽस्मदीयं समनृत्यदञ्जसा
दशाविशेषः क्षणिकोऽयमुद्गतः ।
निराशतां काञ्चन कांगरेस-
नयोऽनयन्नो हृदयानि तत्क्षणम् ॥ १२ ॥

तमुच्चमादर्शमपास्य नायका
अनेकषड्यन्त्रमरीरचन्मिथः ।
अतो मृदुस्वान्तजनो जुगुप्सते
स्म राजनीतेर्विविधात्स्वरूपतः ॥ १३ ॥

मनस्तु मे संसदि संप्रवेशतो
विरुद्धमासीद्विमृशत्तदन्तरम्
शतानि सन्धेर्यतनानि कुर्वताम्
स्वलक्ष्यमप्यध्वनि पीडितं भवेत् ॥ १४ ॥

परन्तु देशस्य समक्षमन्यतो
न किञ्चिदासीद् गमनीयमीदृशम् ।
क्रियाक्रमः कोऽपि न राजनैतिको-
ऽभवच्च सामाजिककर्म दुष्करम् ॥ १५ ॥

समाजसंस्कारविधाविभाः प्रजाः
विशेषसम्पर्कमवाप्नुवन्नृभिः ।
न तावता ते किल तुष्यदन्तराः
इहाभविष्यन् दृढराजनैतिकाः ॥ १६ ॥

इदं किलावश्यकमेव चाभव-
त्त्वसिद्धसंघर्षतरङ्गतः परम् ।
पुरः समायान्तु मतानि संसदः
क्रियाक्रमाः साधनबाधनार्थकाः ॥ १७ ॥

मतेऽभवन् वै सहयोगहेतुके
न चाप्यमी किञ्चन कर्तुमादृताः ।
क्रियाक्रमास्तवदमी च मत्पितुः
सदेशबन्धोरिह नेतुरस्य च ॥ १८ ॥

स देशबन्धुः किल संसदामपि
क्रियासु सङ्ग्रामपथप्रवृत्तये ।
अभूत्सदा तद्विनिवेशपक्षगः
पिता च मेऽभूदिह नाम सम्मतः ॥ २० ॥

स विंशवर्षे किल संसदो बहि-
ष्कृतिं प्रति स्वीकृतिमांस्तु गान्धितः ।
दृशा दृशं स्वामपृथग्विधास्यन्
तदाऽऽस्त गान्धेरनुवर्तने हितम् ॥ २० ॥

अनेकयूनामिदमाहितं मतौ
यथाऽऽस्त संसत् सिनफिन्धृतासना ।
पुनश्च कामन्ससभां न ते गताः
विधेयमीदृक् किल भारतैरपि ॥ २१ ॥

मया तथाकर्तुमिहाहितं बलं
बहिष्कृते रीतिरियं श्रिता भवेत् ।
परन्तु गान्धिर्विषयेष्वमीष्वहो
न वेद नन्तुं न च मन्तुमन्यथा ॥ २२ ॥

मुहम्मदाली च विरोधने तदा
युरोपमागात्किल शिष्टमण्डले ।
निवृत्य तस्मादनुतापमञ्जसा
व्यनक्त्यसौ यावदमुत्र रीतिः ॥ २३ ॥

अरोचतास्मै सिनफिन्पथः परं
पदं किमन्ये विमृशन्ति तत्र ते ।
इतीह नासीत्किमपि प्रकर्षवत्
दृगत्र गान्धेरभजद्धि गौरवम् ॥ २४ ॥

स एव चान्दोलनमेतदास्तवीत्
स्वतन्त्रता तस्य किलात्र वर्तताम् ।
मतो न हिंस्रः सिनफिन्पथोऽस्य स
प्रजाश्च साक्षादवयन्ति पद्धतिम् ॥ २५ ॥

प्रजा बहिष्कारबलं विजानती
प्रयुज्य तं वै मतदानतत्स्थले ।
लभेत सिद्धिं सिनफिन्पथं तु सा
प्रबोधिताप्याशु न बोद्धमर्हति ॥ २६ ॥

पुरा कृताद्वा मतदापने श्रमात्
पुनश्च संसद्विनिवेशनोज्झितेः ।
विमोहिता स्याज्जनतामतिस्तथा
चिता च संसत्प्रतिकर्षिता पुनः ॥ २७ ॥

न ते बहीरक्षितुमर्हिता यतो
न शक्तिरान्दोलनगानुशष्टिः।
चिरं बहीरक्षितुमक्षमत्वतः
शनैः शनैः स्वस्थितितः पतन्त्यमी ॥ २८ ॥

ततश्च ते संसदुपाश्रयं गताः
परोक्षतश्चाप्यपरोक्षतोऽसकृत्
अनेकलाभांल्लभमानमान्साः
स्वदेशमुत्सृज्य भजन्ति शासनम् ॥ २९ ॥

इमासु युक्तिष्वतितथ्यमीरितम्
स्वराज्यपाल्याः फलमेतदुद्गतम्।
तथापि चित्ते समुदेति चिन्तनम्
किमाभविष्यत्सिनफिन्पथान्वयात् ॥ ३० ॥

न तत्र शङ्कावसरः किलाभवद्
विरोधपाली हि तदा सहायुनक्।
प्रदेशकेन्द्रोभयसंसदः श्रमं
किलेह कांग्रेसमजेष्यदासनम् ॥ ३१ ॥

अस्मिन्पुनस्त्रिंशतमेऽपि वत्सरे
विचार एष क्रियते यदत्र तत्।
अभ्यर्थिनः प्रेरयतान्महासभा
कृतं हि तैः किञ्चन संसदीयकम् ॥ ३२ ॥

परन्तु विंशात्परमत्र नैतिकं
सामाजिकं चान्तरमागतं महत्।
निर्वाचनेऽस्मिन्नहि कांगरेसकं
तथा जयि स्याद्धि यथा तु विंशके ॥ ३३॥

कारागृहान्मुक्तिमवाप्य मित्रकैः
सहाभवं किञ्चन यत्नवानहम्।
परं न साफल्यमवाप्नुमात्र हा !
अहं तु तत्रोदविजे विवादतः।
ततः प्रभृत्येष किल प्रदेशजे
मन्त्रित्वतोऽसेविषि काङ्ग्रेसकम् ॥ ३५ ॥

गताब्दघातप्रतिघातकैरिदं
किमप्यभूच्छिन्नविभिन्नविग्रहम् ।
निरासितुं भेदमिमं परिश्रमो
विधेय आसीच्च तदा महत्तमः ॥ ३६ ॥

अहं प्रयत्नं कृतवान् महत्तमं
परं परीणामनाप्य खेदभाक् ।
किमप्यभूत्कार्यमहो, न मन्मतौ,
परं मदग्रे त्वरितं समागतम् ॥ ३७ ॥

मदीयमुक्तेः परमल्पकालतः
प्रयागपाल्यां निचितः प्रधानकः ।
अतित्वराकस्मिकताप्रकल्पिते
निर्वाचने मां बृणतेस्म ताः प्रजाः ॥ ३८ ॥

इहाब्दके देशमशेषमेव ते-
ऽध्यकुर्वताऽऽवाचितकाङ्ग्रेसिकाः ।
स देशबन्धुर्भवतिस्म मेयरो-
ऽधिकालिकातानगरे गरीयसि ॥ ३९ ॥

स विट्ठलश्चाधिपतिः प्रशासने
ऽभवत्तदा मोहमयीमहापुरे ।
स वल्लभश्चाहमदाधिवासिते
प्रधानतामाप किलाधिपालिकम् ॥ ४० ॥

ममापि वैविध्यभृतेषु कर्मसू-
दभूद्रुचिस्तत्र करोमि च क्रियाः ।
प्रश्नैस्तदीयैः कतिभिश्चनाहृतो
ऽध्यगां तदीयां प्रकृतिं तथाऽऽकृतिम् ॥ ४१ ॥

निवारयिष्यन् विकृतीरनेकशो
मनोरथानन्तरपालयं बहून् ।
अनन्तरं चाध्यगमं तु भारते
पाल्या निवद्धोन्नयनक्रियाक्रमः ॥ ४२ ॥

तथापि कार्यस्य च तन्त्रशुद्ध्ये
प्रयत्नमादतुंमभून्मनो मम ।
तदर्थमश्रामि मया यथाबलं
तदैव कांग्रेसकृतिर्व्यवर्धत ॥ ४३ ॥

इति प्रदेशे सचिवोऽपि केन्द्रतः
कृतोऽस्मि साचिव्यपदे प्रतिष्ठितः ।
करोमि होरादशकादपि स्फुटं
कार्यं चिरं श्रान्ततरो भवन्नहम् ॥ ४४ ॥

प्रत्यागतस्य प्रथमं तु दृक्पथं
यदभ्यगात्पत्रमिदं महत्त्वभाक् ।
प्रयागगोच्चे विधिमन्दिरे मुख-
न्यायाधिपः सर् ग्रिमवुड् स मालिखत् ॥ ४५ ॥

मुक्तेर्मम प्राग्लिखितं दलं तु तत्
मन्मुक्तिसम्भावनयाऽभ्यहीयत ।
सौजन्य पूर्णा दलभारती सु सा
विस्मापयामास निमन्त्रणं च तत् ॥ ४६ ॥

अज्ञासिषं तन्न स हि प्रयागे-
ऽधुनाभ्युपेतो मयि मुक्तकर्मणि ।
मया तदग्रे ध्रुवमेक ऐषोऽ-
भियोगमालम्ब्य विवाद आदृतः ॥ ४७ ॥

कुतोऽपि हेतोर्मयि भावसौहृदं
दधे स न ज्ञाततरोऽपि तावता ।
अहं करिष्याम्युदयं किलेत्यसा-
वाशास्त तर्हीति स मामबूबुधत ॥ ४८ ॥

अतो मियर्सः स ममाङ्गरेज-
दृक्कोणबोधे प्रबुभूषुरस्ति च ।
स सूक्ष्मभावेन च कार्यमीरय-
न्नभून्मतन्तस्य यदाङ्ग्ल शासकाः ॥ ४९॥

वदन्ति यत्तैरिह धर्मपक्षगैः
सहासहो दुर्व्यवहार आश्रितः ।
इमे विरुन्धत्यत आङ्ग्लशासकाः
सामाजिकक्षेत्रनिराकृतेर्मुहुः ॥ ५० ॥

तद्धर्मतारोषविशेषदुःखिता
स्तेषूजाता इति सद्भिरुच्यते ।
यथा पिता निर्वचनक्षणे क्लबे-
नाङ्गीकृतस्तेन सधर्मतां गतः ॥ ५१ ॥

इदं निराधारमिदं पृथग्विधा
विकृत्य काचिद् घटना प्रकाशिता ।
अहो मृषोद्यैर्बहुधा निदर्श्यते
मुधा मृषा चाप्यमृषा च नैकशः ॥ ५२ ॥

न राष्ट्रियान्दोलनमत्र देश-
भक्तिः किलासूत मिथो विरोधम् ।
पितुर्ममाप्यत्र न रोषकारणं
वैयक्तिकस्तैर्व्यवहार उत्तमः ॥ ५३ ॥

सदैव ते शिष्टतया मिलन्ति नः,
सौहार्दमप्यस्ति परं च तैः सह ।
स्वजातिदास्यं तु सुदुःसहं सदा-
स्माकं किलास्तीतरभारतीयवत् ॥ ५४ ॥

ममाद्य तावत्सखितास्ति तैः सहा-
धिकारिभिः किन्तु न सास्ति कुत्रचित् ।
प्रकाशयन्तीह च येऽनुकम्पां, विनोद-
पक्षेऽस्ति न काचिदूनता ॥ ५५॥

स नर्मपक्षादतिरिच्य तैः सहा-
वहन्ति ये राजनये सहायताम् ।
तेभ्योऽप्यहं चाधिकमाङ्गलबन्धुभि-
र्दधामि मैत्रीमिति नास्त्यगोचरः ॥ ५६ ॥

अनेन मैत्रीमिलनेन शिष्टता-
पूर्णेन चापि व्यवहारकेण ।
कटुत्वहेतुं तमिमं निरस्य च
ग्रिम्वुड् समन्तात्सरलत्वमैषयत् ॥५७॥

अहं किलापश्यमिमं त्वनेकधा
कस्मिंश्चनापि प्रतिपालिकाकरे ।
निजापदं दर्शयितुं समागमद्
वार्तान्तरेष्वप्यलपन्मया सह ॥ ५८ ॥

स एकदा नः श्रमिकेषु चाक्रमत्
भीरून् श्लथान् साहसवञ्चितान्त्रदन् ।
चरित्रहीनानपि तान् विनिर्दिशन्
जुगुप्सयासौ परुषो रुषाभवत् ॥ ५९ ॥

किं वेत्सि तेषां विषयेऽस्ति हृत्सु नः
काचित्प्रतिष्ठेति सविस्मयोऽभवम् ।
मया सहैवंविधवार्तया स किं
पश्यत्यहं प्रीतिमुपैमि वै तया ॥ ६० ॥

ततो निवृत्त्यैष नवीनसंसदां,
तन्मन्त्रिणां, तत्र च देशसेविनाम् ।
कियांस्तु सेवावसरोऽमिलत् किले-
त्यमीषु वस्तुष्वकरोत्स चर्चाम् ॥ ६१ ॥

पुरस्तु देशस्य महत्तमोऽस्त्ययं
प्रश्नो हि शिक्षाविधिनिर्धृतेः स्थितः ।
किमेकशिक्षासचिवो निजेच्छया
न लक्षशः शिक्षकभाग्यकारकः ॥ ६२ ॥

स उक्तवांश्चेद् भवता समो भवेद्
विवेकचारित्र्ययुतः क्षमो नरः ।
प्रदेशशिक्षाधिकृतेस्तदा न किं
स विस्मयाधायि तनोति शिक्षणम् ॥ ६३ ॥

तथोक्तवानेव दिनेषु चैष्वहं
गवर्नरं द्रष्टुमगामवागमम् ।
विश्वस्यतां नीतिमिहात्मनो भवान्
प्रयोक्तुमद्धाधिकृतो भविष्यति ॥ ६४ ॥

ततः स सीमानमतिक्रमन्निव
निवृत्य मामाह-न सर्वकारतः ।
न किञ्चिदाश्वासयितुं तु शक्यते
परं निजा प्रस्तुतिरस्ति तस्य सा ॥ ६५ ॥

प्रस्ताव आधायि स ग्रिमवुडा स्फुटम्
अवक्रवक्रैर्विधिभिः पुरो मम ।
अर्धां न तस्मिन्नवधानमेवयन्-
मन्त्रित्वमासीद्धिमतं ततो मम ॥ ६६ ॥

अतश्च हेतोरुदिता घृणा तत-
स्तदाप्रभृत्यस्मि करोमि कामनाम् ।
कुर्यां दृढं चापि विनिश्चितं यथा
तथास्तु भूयोऽवसरो ममानिशम् ॥ ६७ ॥

विनाश आन्दोलनमप्यसाहनं
न मानवस्य स्युरनुप्रवृत्तयः ।
भाग्ये किलास्माकमिदं लिखेलिमं
न नूतनं स्रष्टुमिमे वयं कृताः ॥ ६८ ॥

विनाशरूपाद्धि मरुस्थलात्परं
स सृष्टिदेशो गमनीय आस्थितः ।
यस्मित् गताः स्रष्टुमलं भवाम तन्
मरुस्थलं लङ्घयतां वयो व्ययेत् ॥ ६९ ॥

तत्सृष्टिकार्यं किल सन्ततेः करैः
तत्सन्ततेर्वापि करैः कृतं भवेत् ।
(इत्युक्तिमन्वर्थयतिस्म सेन्दिरा
स चापि राजीवमहोदयो युवा) ॥ ७० ॥

तदा प्रदेशेऽत्र तु मन्त्रितेयं
समर्थतामाप्तवती किलोत्तरे ।
द्वौ नर्मपक्षौ किल मन्त्रिणौ युगे-
ऽसाह्ये सृजन्तौ निजकर्म निर्गतौ ॥ ७१ ॥

आन्दोलनेऽस्माकमिदं तु शासनं
कर्तुं च कांग्रेसदलेन योधितुम् ।
तच्छासनं नर्मदलीय मन्त्रिणां
मानेन लाभं लभते स्म तत्क्षणम् ॥ ७२ ॥

तान् सर्वकारानुगतान् विधातुं
तदा हि तेषामियमस्ति पद्धतिः ।
ते मन्त्रिणोऽज्ञासिषुरेष आदर-
स्तेषामिहास्तेऽधिकृतो न रोचनः ॥ ७३ ॥

कांग्रेससामूहिकविक्रमस्य सा
प्रतिक्रियाऽऽसीदिति नाभ्यजानन् ।
निराकृते त्वाक्रमणे कुमन्त्रिणा-
मेषां किलार्धं पतितं तपस्विनाम् ॥७४॥

मानप्रतिष्ठे विगते न मन्त्रिणोऽ-
रोचन्त तेऽपि प्रतिकर्तुमुत्थिताः ।
ते त्यागपत्रं वितरीतुमातुरा
वाध्या अभूवंत्रपया नताननाः ॥७५॥

गवेषणा नूतनमन्त्रिणामभूत्,
परं न साफल्यमवाप्य सत्वरम् ।
संसत्सु मुष्टिप्रमिताः स्वसंगिनाँ
निराकृतेर्नर्मदला न सङ्गताः ॥ ७६ ॥

अन्येषु ये केचन भूमिपालका
निरक्षरास्ते नितरां सुदुर्बलाः ।
बहिष्कृताः संसद एवमद्भुता-
मवापुरन्तः किल पञ्चरङ्गताम् ॥ ७७ ॥

प्रसिद्धमस्मिन् समये निवेदितो
मन्त्रित्वमङ्गीकुरुताद्भवानिति ।
प्रत्याह कश्चिच्चतुरोऽस्मि नाधिकः
परन्तु सामान्यतयास्मि बुद्धिमान् ॥ ७८ ॥

तथा प्रसिद्धोऽस्मि च सर्वकारतो
मन्त्रित्वमादाय न मूर्खराडयम् ।
इत्याख्यया नैव सुकीर्तिमीदृशी-
मवाप्तुमिच्छामि भवत्कृपास्पदम् ॥ ७९ ॥

विरोध एषोऽस्त्युचितोऽपि किञ्चना-
भवन्नुदाराः खलु नम्रपक्षिणः ।
सामाजिके नापि च राजनैतिके
तेषां दृशा दूरतरं निभाल्यते ॥ ८० ॥

दोषोऽयमासीच्छ्रमिकत्वसङ्गिनां
सिद्धान्तकानामिह निष्फलश्रियाम् ।
कार्यक्षमत्वं किल तेष्ववर्तत
कार्यालयीयासु क्रियासु पाटवात् ॥ ८१ ॥

ततस्तु ये मन्त्रिण आगताः पुर
स्तेषां कियन्तः खलु भूमिपालकाः ।
शिक्षादृशा साक्षरमात्रसंज्ञया
विभूषिताः सीमितशिष्टिबुद्धयः ॥८२॥

गवर्नरस्तानिह भारतीयता
कियत्ययोग्येति निदर्शयन् ध्रुवम् ।
अनाययत्संसदि चेतसा च तान्
पदेषु विन्यस्यति मूल्यशालिषु ॥ ८३ ॥

इदं पदं तावददायि वेधसा
तुभ्यं किलोच्चं भुवि बोधमर्पितुम् ।
भाग्यस्य नो दुष्करमस्ति किञ्चने-
त्येषास्ति सूक्तिः किल तत्र सङ्गता ॥ ८४ ॥

स्युः शिक्षिता वा स्युरशिक्षिता इमे
भूपालवर्गस्य मतानि यान्ति तान् ।
उद्यानभोजैरधिकारिणश्च ते
सन्तर्पन्तश्च भवन्ति सांसदाः ॥ ८५ ॥

क्षुत्क्षामकण्ठात्कृषकौघतोऽत्र
द्रव्यं तदन्ते द्रवदेति दारुणम् ।
तस्योपयोगः कतमः किलासुका-
दन्योऽस्तु धन्यः कतमोऽस्तु पुण्यः ॥ ८६ ॥

प्रकृतिरदितिः साङ्ख्यगा वेदेषु गीतेति प्रवदताऽ-
सृजि जवाहरनेहरुचरितमिदममुनातिभव्यम् ।
तस्य सर्गो वै चतुर्दशसंख्यकः सम्पद्यतेऽयं
यः पुनर्बहिरागमनमिति संज्ञया प्रथितः पृथिव्याम् ॥

सन्देहः सङ्घर्षश्च

प्रमाणिका

पञ्चदशः सर्गः

अनेककार्यतत्परः प्रपञ्चवञ्चनोद्यतः ।
समाकुलीकृतोऽस्मि यैर्यतो न मुच्यते क्वचित् ॥ १ ॥
पुनः पुनर्मनस्युदापतन्ननुत्तरा इमे ।
कथं नु तेभ्य उद्धृतः पलायतामयं जनः ॥ २ ॥
करोमि यद्यदद्य तत् किलान्तरङ्गद्वन्द्वतः ।
विमुक्तिमाप्तुमेष नैकविंशविंशवर्षवत् ॥ ३ ॥
तदात्मबिम्बनं न मे तदातनावृतिर्गता ।
यदत्र भारते बहिश्च सर्वतद्दृगस्म्यहम् ॥ ४ ॥
अपश्यमत्र ताः परीणतीर्न या अचिन्तयम् ।
नवा विचारसन्ततीर्नवाश्च युद्धपद्धतीः ॥ ५ ॥
प्रकाशसंश्रये किलास्फुटत्वमत्यदृश्यत ।
अभूच्च गान्धिनेतृतां प्रति प्रतीतिरत्र मे ॥ ६ ॥
पुरोगमांस्तदीयकानहं तु सूक्ष्मया दृशा ।
निरीक्षितुं मनो दधे स चास्मि वन्दिगेहगः ॥ ७ ॥
न तत्र तं निजेच्छया त्वहं लभेय लोकितुम् ।
न चापि तस्य सम्मतिं ग्रहीतुमर्हतां गतः ॥ ८ ॥
तदाभवद् दलद्वयं क्रियापरं पुरोहितम् ।
तयोर्न किञ्चिदाहरन्मनो ममेति मे ज्वरः ॥ ९ ॥
दलं हि पूर्वमेतयोः सुधारकृद्विधानकृद् ।
तदीयदिक्किलाब्धिवीचिवेशिनी प्रतीयते ॥ १० ॥
परञ्च गान्धिपृष्ठगं दृढानुगं दलं तु तत् ।
न सारधृक् स शब्ददृङ् मतान्तरानुयायिवत् ॥ ११ ॥
न तत्र सा सजीवता न चापि चालनेशिमा ।
समेऽपि युद्धनिन्दकाः समाजसंस्क्रियाप्रियाः ॥१२॥

गुणोऽस्ति तेषु केवलो जनेषु तेऽनुरागिणः ।
न पूर्ववत्तु सांसदीं कुनीतिरीतिमाश्रिताः ॥ १३ ॥
अहं तु वन्दिगेहतो विमोचितो यदागतः ।
तदा स देशवन्धुरप्यसावकर्षतात्र माम् ॥ १४ ॥
न यद्यपीह दृश्यते किमत्र कार्यमस्ति मे ।
स च स्ववक्तृताबलान्न मे मनोऽन्वकूलयत् ॥ १५ ॥
विचित्रमप्यभूदिदं किलावधेयमप्यभूत् ।
न तत्र मामनूनुदत् स्वतन्त्रताप्रियः पिता ॥ १६ ॥
स्वभावमस्य वार्तयानया च वेद्मि मञ्जुलम् ।
न यत्र कुत्रचिद्दले स मां न्यवेविशन्महान् ॥ १७ ॥
स्वराजिवर्गसोत्सुकः स्वराजिनं न मां व्यधात् ।
तथा भवन्तमेव मां विलोक्य मोदमाप्नुयात् ॥ १८ ॥
परं स भावनासु मे तथावधानदानतः ।
यथामतं ममाभवत् तथैव मां समादिधत् ॥ १९ ॥
दिनेष्वमीषु मत्पिता स देशबन्धुरप्युत ।
गभीरमित्रतां हृदा गतौ न राजनैतिकीम् ॥ २० ॥
इहानयोश्च मित्रता स्वतामयी मनोमयी ।
विलोकिता न विस्मयो ममाभवत्तु लेशतः ॥ २१ ॥
पितुर्ममात्र मित्रसम्पदः समृद्धतां स्मरन् ।
अवैभि मित्रसंख्यया कमप्यहो ! गुणोत्तमम् ॥ २२ ॥
विचार्य मित्रतां दधद्विरज्यतेस्म सोऽन्ततः ।
परन्तु देशबन्धुना सखित्वमस्य निर्जरम् ॥ २३ ॥
परस्परं प्रति प्रतीतिप्रीतियुङ् ममत्वतः ।
तयोः पिता वयोऽधिकोऽपि कायिकैर्गुणैर्भृतः ॥ २४ ॥
विधावधीतिनौ पटू प्रयोगपण्डितौ च तौ ।
किलेतिहासतः समावपि क्वचिन्मिथोऽसमौ ॥ २५ ॥
स देशबन्धुरद्भुतो विधिज्ञतां दधत्कविः ।
स भावुकश्च वङ्गवाच्यनेककाव्यकारकः ॥ २६ ॥

स वक्तृतां च धर्मितां दधत्कवी रसात्मकः ।
पिता च मे न भावुकः परं स व्यावहारिकः ॥ २७ ॥
स सङ्घसृष्टिदक्षतां दधन्न धर्मितालवम् ।
सदा विवादतत्परोऽभिघातघातनिःसहः ॥ २८ ॥
यमेष मूर्खमैक्षतैनमंशतोऽपि नाक्षमत् ।
विरोधमात्मनोऽप्यसौ क्वचित्कदापि नाकलत् ॥ २९ ॥
विरोधमात्मनो रणाभिमन्त्रणं स्म मन्यते ।
पराक्रमप्रदर्शनं स चोचितं स्म वीक्षते ॥ ३० ॥
स्वभावभेद एष तौ व्ययोजयन्न कुत्रचित् ।
तयोर्मिथो हि मित्रताऽम्बुदुग्धयोरिवाभवत् ॥ ३१ ॥
दलस्य नेतृता क्षणे फलावहा तथोत्तमा ।
परस्परस्य पूरिकाऽभवत्तयोर्हि मित्रता ॥ ३२ ॥
मिथोऽधिकारदानतो न सम्मतिर्व्यपेक्षते ।
परस्परस्य नामतः करोति कोऽपि घोषणाम् ॥ ३३ ॥
स्वराज्यवर्गबन्धने दृढीकृतौ प्रभावने ।
तयोरियं तु मित्रता बहूपकारमातनोत् ॥ ३४ ॥
दले किलात्र पूर्वतो विरोधकारिणी मतिः ।
प्रवर्तते स्म संसदाश्रयेण कुर्वतां गतिम् ॥ ३५ ॥
पदादिलिप्सवो हि तेऽविशन्ननेहसा दले ।
यथार्थवृत्तयोऽपि केचिदाङ्ग्लशासनस्पृहाः ॥ ३६ ॥
चितेरनन्तरं यथा प्रवृत्तयः पुरोगताः ।
तथा दलस्य नेतृभिः कृता तदीयनिन्दना ॥ ३६ ॥
अहं दलस्य का कथा गलच्छिनद्मि चाङ्गकम् ।
इतीह घोषणां पिताऽकरोत्स तत्तथाऽकरोत् ॥ ३८ ॥
गुणाक्षिवत्सरात्परं कुटुम्बजीवने सुखम् ।
मुदं किलाप्नुवं गृहे न नाम दत्तवान् क्षणम् ॥ ३९ ॥
अहञ्च पारिवारिकेषु बन्धनेषु भाग्यवान् ।
बलाढ्यघर्षणेष्वहं भजेऽत्र शान्तिसान्त्वनाम् ॥४०॥

इहान्वभूवमेष तां निजात्मगामपात्रताम् ।
त्रपे विचार्य चान्तरे स्वदार-साधु-वर्तनम् ॥ ४१ ॥

ऋणी भवामि तत्कियन्मृदुर्निजाभिमानिनी ।
क्षमामयी ममान्तरङ्गजं तरङ्गमाबिभः ॥ ४२ ॥

यदा यदैव शान्तये च तुष्टयेऽहमुत्सुकः ।
तदा तदात्युदारहृत् तदेव मह्यमार्पिपत् ॥ ४३ ॥

निवासरीतिरेतदा व्यभिद्यताथ मध्यमा ।
बभूव भृत्यसङ्ख्यया तदाल्पता समाश्रिता ॥ ४४ ॥

तथापि नानिवार्यके सुखे समागतोनता ।
इहावधेस्तु वस्तुकानि निष्क्रियामलम्भयन् ॥ ४५ ॥

हयौ रथः परिच्छदः पुरातनोऽनपेक्षितः ।
स दारुजः परिच्छदश्च पूरुषैः समाहृतः ॥ ४६ ॥

परिच्छदस्य मालिनां च निर्गमेन गेहगा ।
क्षयं गताथ स्वच्छता च रम्यताऽभवद् वनम् ॥ ४७ ॥

त्रिवर्षमेवमेव तत् समन्ततोप्युपेक्षितम् ।
ततो व्ययाधिकः पिताऽकरोदुपायमायगम् ॥ ४८ ॥

गृहे स्थितः स सम्मतिं विधौ स्वकां प्रदास्यति ।
इतीह सर्वलौकिकात्परं स कार्यमीक्षते ॥ ४९ ॥

स तत्र काललेशतोऽप्युपार्जयत्किमप्यलम् ।
त्रपां गतो व्यये पितुर्मुखावलोकनादहम् ॥ ५० ॥

विधिज्ञकर्मवर्जनात्परं किमप्यनर्जयन् ।
न शेयरेषु लाभतोऽतिरिच्य किञ्चनाप्नुवम् ॥ ५१ ॥

न तावदावयोर्व्ययः किलाधिकोऽभवत्तदा ।
गतोऽस्मि विस्मयं भृशं व्ययं स्वकीयमङ्कयन् ॥ ५१ ॥

व्ययोऽधिको न खद्दरे तृतीयकक्षयात्रिणः ।
न वेद तं कुटुम्बगं, व्ययं पितुः समाश्रयात् ॥ ५२ ॥

धनं विना भयं न मे, तदर्जयिष्यते मया ।
स्वकार्यमल्पमात्रया धनस्य निर्वहावहे ॥ ५३ ॥

पितर्यभून्न नो भरः, स चेदिदं विजानताम् ।
वयं स्वमत्र भारवत् विलोकयामहे न्विति ॥ ५४ ॥

तदा स दुःखितो भवेत् परं न भाति सा स्थितिः ।
त्रिवर्षमप्यचिन्तयम् परं न तत्समादधे ॥ ५५ ॥

न कर्मशोधनं ममातिदुष्करं किलाभवत् ।
परन्तु तत्र युञ्जतोर्भवेत्प्रजाहितक्षतिः ॥ ५६ ॥

दिनेष्वमीषु बालिकां च काङ्ग्रेसमप्यहम् ।
विधाय माध्यमं दिवानिशं तदन्वसेवयम् ॥ ५८ ॥

न रोचते स्म मे धनागमाय तद्विवर्जनम् ।
महोद्यमा ममावदन् प्रभूतराशिदाः क्रियाः ॥ ५९ ॥

न ताः स्व्यकार्षमत्र मे न योग्यताऽऽस्त दायिनी ।
परं मदीयनामतः प्रभूतलाभदैव दृक् ॥ ६० ॥

महोद्यमैः सहेदृशी न रोचते स्म बन्धुता ।
विधिज्ञकर्मकर्तृता त्वसम्भवैव मेऽभवत् ॥ ६१ ॥

पुराऽरुचिर्ममाभवत् सुभोजने रुजार्तवत् ।
दिने दिने त्ववीवृधत् सुवृष्टभूमिसस्यवत् ॥ ६२ ॥

पयोधिनेत्रवत्सरे प्रधानमन्त्रिवेतने ।
विचार उत्थितस्तदा प्रधानमन्त्र्यहं भवन् ॥ ६३ ॥

समार्थिथं विचारणां विचार्य नूनमौचितीम् ।
दिवानिशं क्रियासु यः सजेत्स केन निर्वहेत् ॥ ६४ ॥

इतोऽन्यथा तु कांगरेसकार्यमत्र सर्वथा ।
धनेन शक्तिमत्स्वदः समस्तमर्पितं भवेत् ॥ ६५ ॥

परन्तु राजनीतितो न वाञ्छिता भवन्ति ते ।
न कश्चिदुत्तरप्रदानिमान् विधातुमर्हति ॥ ६६ ॥

न दातुमर्हति स्म साधिकं तु काङ्ग्रेसकम् ।
स वेतनस्तरोऽल्पको न जातु वृद्धिमेष्यति ॥ ६७ ॥

न सार्वलौकिकादिमे तु भारतीयमानवाः ।
स्तुवन्ति वेतनग्रहं विचित्रदुष्टभावनाः ॥ ६८ ॥

न सर्वकारवेतनं प्रति त्वियं कुभावना ।
पिताऽऽक्षिपन्ममापि तत् किलात्र कांगरेसतः ॥ ६९ ॥

सहायकस्य मन्त्रिणोऽप्यभूद् धनं व्यपेक्षितम् ।
परं प्रतिष्ठया विरुद्धमन्वभूत्स तद्ग्रहम् ॥ ७० ॥

मयापि तद्विनैव तर्ह्यभूत्प्रवर्तितुं क्षमम् ।
न तत्प्रतिष्ठया प्रतीपमिच्छया ह्यजीगणम् ॥ ७१ ॥

सकृन्मया पितेरितोऽत्र-यद्धने पराश्रयः ।
न रोचते ममेति सङ्कुचंश्चत्ततदाऽवदम् ॥ ७२ ॥

सभामुवाच-सर्वथांशतश्च कालदानतः ।
धनार्जनं तव प्रजाहितं विहाय नोचितम् ॥ ७३ ॥

यदाहमल्पवासरैः सुखेन तावदर्जितुम् ।
क्षमोऽस्मि यावता युवां समां समां सुजीवथः ॥ ७४ ॥

न शक्तितो न युक्तितो मनस्तु मे स्म तुष्यति ।
तथापि तन्निदेशतस्तथैव भूर्यवर्तयम् ॥ ७५ ॥

अमीषु तत्कुटुम्बगेष्वथो धनार्जनानुगे ।
त्रिवर्षकं व्यतीतमागुणाक्षितो गुणीक्षणात् ॥ ७६ ॥

स्थितिस्तु राजनैतिकी विवर्तते तदन्तरे ।
मनोविरुद्धमप्यहं विभिन्नवर्गगोऽभवम् ॥ ७७ ॥

अथात्र कांगरेसकेप्यधां पदं महोत्तरम् ।
गतेऽब्दकेऽद्भुता स्थितिः, स देशबन्धुदासकः ॥ ७८ ॥
गतेऽब्दके गयाभुवे स कांगरेस्सभापतिः ।
समस्तभारतीयकाङ्ग्रेसकोषमैक्षत ॥ ७९ ॥

इह स्वराजिनीतितस्ततो विरुद्धमामतम् ।
तथाल्पमप्यभून्मतं समानमेव चांशतः ॥ ८० ॥

परन्तु मुम्बयीभवेऽधिवेशने स निर्णयः ।
पुनर्विचारमागतस्तदाऽत्यजत्स तत्पदम् ॥ ८१ ॥

इदं दलद्वयस्य किञ्चिदेकमाश्रितं तु सत् ।
स तद्बलेन चापरं परासितुं क्षमं ह्यभूत् ॥ ८२ ॥

इहानसारिडाक्टरप्रधानता नवा स्थिता ।
मदीयमन्त्रिता च तत्प्रचालने नियोजिता ॥ ८३ ॥

विपत्समक्षताऽऽवयोः पुराशु चास्त्युपस्थिता ।
यथावदस्तु वादिभिस्तु गुर्जरेषु दर्शिता ॥ ८४ ॥

निदेशनानुपालनेषु केन्द्रकेऽवहेलना ।
निदाघविश्रमेऽब्दके च नागपुर्यमण्डले ॥ ८५ ॥

महासभाधिवेशनं निवेशितं ध्वजाग्रहे ।
अभूदभाग्यमध्यवर्तिमण्डलान्तिमक्रिया ॥ ८६ ॥

इदं तु नः समन्ततोऽपि प्रातिनिध्यमावहत् ।
कियच्चिरं स्म दुर्यशोमयं दधाति जीवनम् ॥ ८७ ॥

न वस्तुतस्तु कस्यचित् स प्रतिनिध्यमास्थितः ।
तदीदृशोऽशिशासिषत् वहन्ति यादृशा धुरम् ॥ ८८ ॥

न केन्द्रकार्यशालया प्रदिष्टमप्यमानयत् ।
ततस्तु प्रस्तुतन्न गौर्जरी सभाप्यध्यक्षिपत् ॥ ८९ ॥

परंपराल्पताकृतामवाप तन्निराकृतिम् ।
अतित्यजञ्चवस्तु मोदमाप्नुवंस्त्यजन्निदम् ॥ ९० ॥

दलस्य छद्मविक्रमैरभूवमुन्मनाश्चिरात् ।
महाजना अपीदृशा इति प्रखेदकारणम् ॥ ९१ ॥

स देशबन्धुराक्षिपत् न भावनाऽस्ति नेहरौ ।
अहं विचारयामि तद्वचो यथार्थमस्ति तत् ॥ ९२ ॥

द्वयोस्तुलाकृतौ यदेव मानमाद्रियेत तत् ।
तुलां वदन्नपि स्वमित्रस्वार्थतोऽस्म्यभावनः ॥ ९३ ॥

सदावधानमस्ति मां न भावना निमज्जयेत् ।
अभावनत्वमेतदाप्तुमायते निरन्तरम् ॥ ९४ ॥

अभावनत्वमन्तरे न लब्धुमेष शक्नुवन् ।
बहिः स्वमेवमेव दर्शयेऽत्र भावुकोऽपि सन् ॥ ९५ ॥

वैदिकीं संस्कृतिमुपाश्रित्यात्र पञ्चाध्यायिका
यत्कृता मुद्रापिताभूद्गीतिकादम्बरिकोदरे ।
तत्कृते श्रीमज्जवाहरलालनेहरुचरितकेऽस्मिन्
सन्देहसङ्घर्षाह्वयः सर्गस्तु पञ्चदशो गतः ॥

नाभागपुरनाटकम्

पृथ्वी

षोडशः सर्गः

स्वराजिपरिवर्तनेतरवदावदाकर्षण-
प्रकर्षणमचीचलत्प्रथमशक्तिरावीवृधत् ।
गुणाक्षिपरिवत्सरे यदधिवेशिता राष्ट्रिया
महासमितिरत्र सा मुहुरगात्प्रकर्षं परम् ॥ १ ॥

अतः परमभून्मया सह स कोऽपि वृत्तक्रमो
ऽद्भुतः परम एव यस्य न मनागिहाशाप्यभूत् ।
पुनः पुनरधुः शिखा मुहुरकालिया नूतनं
प्रशासनविरोधिनः किल सुधारकान्दोलनम् ॥ २ ॥

इमेऽत्र निजधार्मिकस्थलगतांश्चरित्रोज्झितान्
महन्तपदभागिनः सपदि निर्गमय्याखिलान् ।
तदीयधनसम्पदः समधिकृत्य दोषोच्चयाद्
विमोचयतु सर्वकार इति याचमानाः स्थिताः ॥ ३ ॥

विधिं पुनरहिंसकं श्रयति गौरुदौवारिकम्
अबीभवदिदं किलासहयुजाभुवो जागृतेः ।
ततः शिखसमाजसर्वकरयोस्तु सङ्घर्षणात्
प्रतीपमिह शासनं परमुरयंकार्षीत्क्रमम् ॥ ४ ॥

बहुत्र समभूद्चाप्यदः गुरूपबनसुस्थले
शिखाः सुबहवो हि तत्र पुरुषैर्भृशं ताडिताः ।
अमीषु खलु सैनिका अपि निवृत्तिमन्तोऽमिलन्
प्रदर्शनपरास्तथा अथ न दर्शिताऽऽपृष्ठकाः ॥ ५ ॥

अनेन दृढतामयेन नवसाहसेनाखिलं
सुविस्मितभभूदिदं भरतवंशभूमण्डलम् ।
न शासनमिमां सभां स्वकुरुतेह वैधीं पुन-
स्ततो रणमचीचलच्चिरमथो शिखा जिग्यिरे ॥ ६ ॥

स्वभावविहिता शिखैः सह महानुभूतिश्च नः
अमीभिरिह कोऽपि चामृतसरेऽधिकारी कृतः।
विवेदयिषुरस्मि यान्तु घटनां न सास्त्यन्विता
परं तदुदरे निदानमिदमस्ति चान्दोलनम् ॥ ७ ॥

अभूत्तु पटियालया सह च नाभया जातितो
विरोध इति शासनं परनरेशमीशासनात्।
निरास्थदिति तैः शिखैर्बहिरथान्तरान्दोलनं
विरोधमुपदर्शयद्भिरपरं किलारम्भितम् ॥ ८ ॥

तदीयमथ शासनं विधिवदाङ्ग्लमर्त्येऽर्पितं
स जैत्रनगरे प्रवर्तितमरोधयत्पाठकम्।
तमेनमपि ते स्वधर्मनियमानुरोधाच्छिखाः
प्रवर्तयितुमत्र यूथशतकानि सम्प्रैषयन् ॥ ९ ॥

परं ब्रिटिशपूरुषा अनुविशन्ति यूथान्यमू-
न्यरुन्धदवताडयन्ति निजबन्धनेष्वानयन्।
वनेषु विजनेषु तान्युदसृजंश्च वृत्तान्तके
ऽपठं तदखिलं, द्वितीयमयते च यूथं त्विति ॥ १० ॥

विशिष्टमधिवेशनं तदुपवेश्य दिल्ल्यामहं
स्वयं तदवलोकितुं धृतनिमन्त्रणस्त्वागतः।
दिनेन हि गतागतं भवति पार्श्वगे जैत्रके
मया सहगतावुभौ च गिडवानिसन्तानकौ ॥ ११ ॥

पदाति चलति स्म यूथमिति रेलयानेन य-
त्समीपगतविश्रमस्थलमगाम पूर्वं ततः।
अनः समधिरुह्य यूथपथमध्यवारोहताम्
इमौ विदितकाङ्ग्रेसिकजनौ मया संगतौ ॥ १२ ॥

अभूविम च शृङ्खलानिगडिता अहञ्चापि तौ-
निबद्धमणिवन्धनौ पुरुषसन्धृताशृङ्खलाः।
तथा निगडिताः पुनः पुरुषकानुगा गच्छतो
निबद्धशुनकान् स्मराणि बहुशोऽत्र जैत्रापणे ॥ १३ ॥

पुरा क्षुभितमानसा अपि कथां मनोरञ्जना-
मिमां तु घटनां चिरादरसयाम मोदास्पदम् ।
निशा न तदनन्तरा व्यतिगताऽभवत्सौख्यतो
ह्यगाद्धि समयो विमर्दभृति कष्टकोष्ठान्तरे ।।१४।।

निशीथसमये ह्यभूदितरकोष्ठकारोहणं
व्ययादथ निशान्तमन्तरधिनाभकारागृहे ।
अशेषसमयेऽत्र चाग्निमदिनापराह्लावधौ
करान्मुमुचतुस्ततोऽतिगुरुश्शृङ्खलाकङ्कणो ।। १५ ।।

परस्परसहायतामनधिगम्य न स्पन्दितुं
क्षमोऽभवदिहैककोऽपि किल कश्चनास्मासु यत् ।
न काम्यमिह मे भविष्यति कदापि तादृङ् निशा-
दिनावसितिकालिकं परकरे कराबन्धनम् ।। १६ ।।

प्रकोष्ठमतिगन्धि चाप्यनतिभद्रमासीदिदं,
जनैरधिनिवेशिता यदधिनाभकारागृहम् ।
लघोर्लघुतरं तदास्त जलशैत्यपूर्ण पुन-
र्नतच्छदि सुखस्पृशावभवतां यदन्तः करौ ।।१७।।

इहावनितले वयं यदधिशायितास्तेन मे
पुनःपुनरभूत्प्रबोधनमिदं सरन्मूषिकात् ।
दिनद्वयपरं वयं विधिगृहे यदाऽऽनायिताः
क्रमश्च सकलोऽचलत्प्रतिदिनं स उच्छृङ्खलः ।। १८ ।।

जजोऽप्यपठितः स्म भाति न हि वेत्ति स स्माङ्गलम्
भुवं विधिगृहोचितामपि न वेद सोर्दूगिरम् ।
अहं तमनुभावयाम्यधिकमेव सप्ताहतो
न चात्र लिखितार्धपङ्क्तिरपि तेन तावत्क्वचित् ।।१६।।

लिलेखयिषुरेष लेखकविशेषतोऽलेखयत्,
वयं यदलिखाव पत्रमनुरोधकं लघ्वपि ।
न तत्र समये स तत्र लिखतिस्म निर्देशनम्
परेह्लि लिखितानि तत्र स परेण तान्यानयत् ।।२० ।।

कृता विधिवदत्र नैव निजपक्षशुद्धिर्मया
स्वभाव इव नोऽभवद्धि निजपक्षनिष्पोषणम् ।
स्वपक्षविशदीकृतेः स्ववशितास्वपि प्रायशी
विचारकरणेऽपि तत्र मनसोऽभवद्ग्लानता ॥ २१ ॥

महद्विवरणं मया लिखितमग्रतः स्थापितम्
यदन्तरलिखं समस्तमपि वृत्तजातं स्फुटम् ।
लसन्ति किल कीदृशोऽत्र विधयश्च नाभागके
मतं प्रकटितं मया चलति शासनेऽङ्गेजिके ॥ २२ ॥

गतो दिन दिनेऽभियोगइहऽनो मुहुर्दीर्घताम्
भवन्नपि ऋजुर्बभूव कुटिलः स पर्याप्तितः ।
नवीनमभवत्तदात्र सहसा किमप्येकदा
प्रदोषसमये गृहेऽवसितकर्मणि न्यायिके ॥ २३ ॥

वयं त्विह गृहे तदापि विनिवेशिताःस्मो बलात्
चिराच्च वयमाहृता किमपि तत्र सद्मान्तरम् ।
इहास्त पुरुषः सपीठनिकटे सहान्यैर्नरै-
रमीषु च तदोत्थितः स पुरुषोऽत्र निग्राहकः ॥ २४ ॥

प्रवक्तुमयमारभेत किल तावदापृष्टवा
नहं किमिदमस्ति वास्तु कथमा स्थिता स्मो वयम् ।
इति क्षुभित आह मां विधिगृहे स्थिताः स्मो वयं
प्रपञ्चरचनाभियोग इह वः प्रति स्यादिति ॥ २५ ॥

क्रमोऽयमपरोऽभवत् प्रथमचालितान्न्यायतो
विचार्य यदमुष्य निग्रहविधिस्तु षाण्मासिकः ।
भवेदनलमित्ययं चिरविनिग्रहाधायको
महानथ भयङ्करः सपदि दोष आरोपितः ॥ २६ ॥

त्रयश्च पुरुषा अलं न भवितार आरोपके
चतुर्थपुरुषोऽपि तत्र निग्रहमधान्नूतनः ।
कुदैवहत एष कोऽपि स शिखोऽनभिज्ञातकः
स जैत्रगमनक्षणेऽक्षिविषयीकृतोऽभूत्कृषौ ॥ २७ ॥

महत्यभवदाहृतिर्मम किलाधिवैरिस्टरे-
त्युपाधिसहजः प्रपञ्चरचनाभियोगः कुतः ।
असत्यमय आस्त मां न्यरुणदत्र सा शिष्टता
जजं प्रति मयोदितं न वयमुद्यताः प्रस्तुते ॥ २८ ॥

स्वपक्षपरिशुद्धयेऽपि यतनीयमस्त्यत्र नः
किलेति परमेष नावहित आस्त नाभागके ।
विधिर्विधिगृहेष्वपूर्व इह कोऽप्यनुष्ठीयते
वकीलवरणेऽपि तावदुचितः स नाभागिकः ॥ २९ ॥

अहं बहिरतो लषामि च वकीलमित्यूचिवान्
जजेन पुनरेव तं नियममस्मि सम्बोधितः ।
अनेन विदिता नवीनविधयोऽत्र नाभागके
घृणाञ्च हृदयेऽभजाम महतीमवोचाम तम् ॥ ३० ॥

यथेच्छसि तथा कुरु त्वमिति नात्र कार्यक्रमे
वयं किमपि योगदानमपि चैव कुर्वीमहे ।
परं न चिरमत्र सुस्थिरमनाः किल स्यामहं
मृषा स्वविषयेऽद्भुतं किल निशम्य कः संयतः ॥ ३१ ॥

क्वचित्क्वचिदिति स्वसम्मतिरवोचि नः साक्षिषु
विलिख्य विवृतिस्तथा विधिगृहस्य दत्ता स्फुटम् ।
जजोऽयमपरः पुरोभवजजात्प्रवीणोऽभवत्
प्रपञ्चरचनापराधविषयेऽस्ति यो निश्चितः ॥ ३२ ॥

इमावचलतां द्वये विधिगृहेऽभियोगावुभौ
प्रतीक्षितमिहाभवत्प्रतिदिनं किलामन्त्रणम् ।
अभद्रमथ पूतिगन्धि च तदास्त कारागृहं
ततो बहिरुपागमाय तदभून्मनोज्ञं मिषम् ॥ ३३ ॥

अथागमदुपास्मदैड्मिनसट्रेटिरप्रेषित-
स्वधीक्षकवरोऽवदत्-सपदि यात नाभागतः ।
प्रकाशयत चानुतापमिह यत्कृतं तत्कृते
इति त्वरितमेव वो नियमितोऽभियोगो भवेत् ॥ ३४ ॥

इतीह वयमुक्तवन्त इममञ्जसा नो वयं
किमप्यकरवाम खल्वनुतपाम यत्र स्वयम् ।
वयं न वचनं किमप्यथ च दातुमत्रोद्यताः
क्षमामभिलषेत राज्यमिदमस्मदाक्लेशनात् ॥ ३५ ॥

विनिग्रहृतियेः परं नियमितौ द्विसप्ताहृतो
मृषानिगडितौ नितान्तमबलाभियोगावुभौ ।
गतश्च समयः समस्तदभियुक्तसिंहासने
वयं हि निजपक्षशुद्धिविधयेऽत्र मौनं श्रिताः ॥ ३६ ॥

गतोऽतिसमयो निमन्त्रणवरप्रतीक्षास्वपि
क्षणं क्षणमभूद्धि कार्यहृतिरत्र विघ्नोच्चयैः ।
जजा अमतयस्तथैड्मिनसट्रेटरस्याज्ञया
बिना कमपि निर्णयं प्रथयितुं क्षमा नाभवन् ॥ ३७ ॥

दिनं तु चरमे यदाभियुजिरत्र सिंहासनात्
समाप्यत समस्तमेवमभियोगकार्यं स्वयम् ।
इमाञ्च लिखितामदाम विवृतिं स्वकीयामिह
जजः खतमतां निनाय निरियाय च न्यायिकात् ॥ ३८ ॥

सविस्मयमिह त्विमं विधिगृहागतं पश्यताम्
महद्विवरणं सउर्दुलिखितं सहानीतवान् ।
इदं न दिवसद्वयेन लिखितं बभूवान्ततः
पुरैव लिखितं तदद्य विधिगेहतो निर्गतम् ॥ ३९ ॥

न तत्पठितमत्र, केवलमिदं समाश्रित्य तैः
पुरः प्रकटतामनीयत मुखेन संक्षेपतः ।
विनिर्गमनिदेशमत्र किल ये तु नापालयन्
सुवन्दिगृहवासमत्र समितास्तु षाण्मासिकम् ॥ ४० ॥

प्रपञ्चरचनाकृतेऽष्टदश चापि मासान् वयं
द्विवार्षिकमथाभजाम वसतिं तु कारागृहे ।
इतिस्म वयमाप्नुमः सकलसार्थद्वैवार्षिकं
विनैव निजदूषणं कमपि दण्डमत्यद्भुतम् ॥ ४१ ॥

इहावहितियोग्यमस्ति शतधाभियोगान्तरे
यथावयमविद्म देश्यनृपशासने वा तथा
महत्त्वमणुमात्रमप्यहहा तु नास्ते मनाग्-
विधेर्ब्रिटिशशासकैरधिकृतेऽपि राज्यान्तरे ।। ४२ ।।

समस्तमपि नाटकोपममभूदतः कस्यचिद्
बहिश्चरनरस्य पत्रकृतिनः प्रवेशोऽभवत् ।
यदेव नृपपूरुषा अभिलषन्ति तज्जायते
न तैर्विधिविदां जजस्य च निदेश आश्रीयते ।। ४३ ।।

जजस्तु विवशः सहेत वयमात्मवश्याः कथं
सहेमहि ततो मयात्र बहुशो विरोधः कृतः ।
बलं च पुनराहितं जजनिदेशकार्यान्वितौ
तदीयविनिदेशपालनविधौ च तेषां पुरः ।। ४४ ।।

कदाचन च पूरुषैर्जजनिदेश आच्छिद्यते
ऽप्यभद्रविधिना, जजा हि विधिगेहगा अक्षमाः ।
इति क्वचन तत्कृतिं करणयोग्यतामावहत्
वयं वनतपस्विनोऽस्य परिचिन्म आधीनताम् ।। ४५ ।।

स राजपुरुषाद्बिभेति स बिभेति चास्मादृशात्
भवन्ति हि मुहुः श्रुता निगडनाश्च पत्रेषु नः ।
यदा वयमतिप्रसिद्धपुरुषा नयज्ञा अपि
व्रजेम विषमां दशां किमु भवेन्न साध्यात्मनम् ।। ४६ ।।

पिता तु मम देश्यराज्यसरणिं मनाक्तामवेत्
अतोऽतिविवशोऽभवन्मम ग्रहेऽत्र नाभागके ।
विनिग्रहमिहा श्रृणोत्स, नहि किञ्चिदन्यद्यतो
बहिर्न निरगान्मनागपि तु वृत्तमत्रोदितम् ।। ४७ ।।

स्वकीयविवशत्वमेष स खलु तारपत्रेण तं-
त्वसूचयदिदं सपदि 'माउंट्वेटन्'सखम् ।
ममात्र खलु दर्शने स बहुकष्टमाप्तः पिता
परं स समपश्यदेव निगडेषु नाभागके ।। ४८ ।।

न कामपि सहायतां मम विधातुमासीत्क्षमः
स्वपक्षपरिशुद्धिमप्यहमुपासितुं नो यतः ।
प्रयागगमनाय तं सकलशोकहानाय च
न्यवेदयमहं हठादिति स तत्र प्रत्यागतः ॥ ४९ ॥

परं कपिलदेवमेष खलु मालवीयं ममा-
भियोगविषयेऽवधातुमिह तं समस्थापयत् ।
युवा सुहृदयं वकील इह नाम नाभागके-
ऽभियोगविधिदर्शनेन सविवेकमाप्तो भवेत् ॥ ५० ॥

तदीयविधिकर्गलानि हठतस्ततश्छेत्तुम-
प्यकारि यतनं तु राजपुरुषैरिहत्यैः परम् ।
बहूनि बत राज्यकानि च चलन्ति पृष्ठे तु य-
दृशा दिशति नः स्मृतिं धरणिसम्पदीशत्वगाम् ॥ ५१ ॥

विदन्ति सकला यदत्र निखिलं तु कर्तुं क्षमा
भवन्ति धरणीश्वराः प्रभुतया किलैकाकिनः ।
न लोकहितभावना भवति नैषु सा योग्यता
भवन्ति विविधाः कथाः प्रकटिताः कदाचिन्न याः ॥ ५२ ॥

अयोग्यतरतैव तानवगुणान् क्षिणोति क्वचित्
कुभाग्यमथ तद्गतं लघयति प्रजानां भरम् ।
अनेन खलु हेतुना भवति कारिणी दुर्बला-
ऽग्रगा विधिविरोधने प्रकृतिपीडनेऽयोग्यता ॥ ५३ ॥

अपि त्वनतिदुःसहं भवति पीडनं नाधिकम्
न चापि गहनं पुनर्भवति चैव तद्व्यापकम् ।
परन्तु यदि देश्यराज्यमनुशास्ति वैदेशिकी
तदा परिणमत्यदो न खलु दुर्गतेः कारणम् ॥ ५४ ॥

स्थिता सरणिरत्र सा धरणिसम्पदीशत्वगा
यथावदिह शासनं भवति चैकतन्त्रं पुनः ।
पुरातनविधानजातमपि युक्तमेवोच्यते-
ऽस्वतन्त्रममतेऽप्रकाशनमसंघटा त्वास्यते ॥ ५५ ॥

परं विनिमयोऽत्र कोऽपि भवतीह सर्वा दशा
प्रयाति परिवर्तनं भवति कारिणी पोषिता ।
अधीनतरतां तया च नियमे दृढीभूततां
तदैकवशतां दधाति धरणिसम्पदामीशता ॥ ५६ ॥

शनैरथ विदेशिशासनमिहत्यरीतिक्रमान्
पुरातनतरानपीह परिवर्तयत्यंशतः ।
अमीभिरनुशासने कठिनता च वाणिज्यके-
ऽभियाति यदुपक्रमे कृतसहायतास्तेऽभवन् । ५७ ॥

इतो जनतया न सा धरणिसम्पदीशत्वत-
स्तथैकवशतावशात्सुदृढकारिणीतस्तथा ।
दृढं परवशत्वमत्र सहनीयतायाः पर-
प्रभावमपि सह्यतेऽत्र वत खेदतो ग्लानितः ॥ ५८ ॥

मयेदृशमिदं व्यलोकि च पुरे हि नाभागके
प्रबन्धमिह सर्वमस्यकुरुतेऽङ्ग्रेजस्तदा ।
स भारतिकनागरिकसेवया बद्धया
सदस्यपदवीमपि श्रयति चैकतन्त्रो भवन् ॥ ५९ ॥

स भारतिकशासनैकवशगोऽपि नाभागका-
नुशासनगुणागुणान्गणयति स्म दोषावहान् ।
हृतास्तदधिकारकास्तत इति स्म भूयोऽवदत्
तदेकवशतापि नो धरणिसम्पदीशत्वगा ॥ ६० ॥

दिनेऽत्र किल सायमाह्वयदथात्र चाधीक्षको
ऽवदद्यददिशत्तमेष यदिहैड्मिनिस्टेटरः ।
तदीयमलमेमहि प्रलिखितं च पत्रं तदा
भवन्त इह मोचिताः सकलदण्डतः साम्प्रतम् ॥ ६१ ।

निदेशमिममार्थयाम लिखितं परं सोऽवदत्
तदर्थमुपलिख्यतां नियमतः किलाभ्यर्थना ।
ततो रयलसंस्थितिं वयमभूम संप्रेषिता
इतश्च विनिमोचिता निशि नितान्तमज्ञानिनः ॥६२॥

प्रवारितमभूदहो नगरद्वारमत्राखिलं
व्यविद्म रयलं प्रयास्यति तु शीघ्रमम्बालिकाम् ।
वयं तदधिरुह्य तत्क्षणमगाम चाम्बालिकां
ततः सपदि देहलीमथ गतः प्रयागं ततः ।। ६३ ।।

प्रयागत इहलिखं दलमिहैड्मिनिस्टेटरं
निदेशयुगलप्रतीकृतिरवश्यमाप्रेष्यताम् ।
यथाहमुभयस्वरूपमपि वस्तुतो वेदितुं
भवान्यलमथो द्विनिर्णयपदावलीं वीक्षितुम् ।। ६४ ।।

प्रतीकृतिरिहैककापि नहि दीयते कस्यचि-
न्मया लिखितमस्य मे पुनरपीर्यतेऽभ्यर्थना ।
पुनः पुनरसौ नकारमकरोदहं चाग्रहं
परं न पठितुं द्विनिर्णयदलान्यमून्याप्नुवम् ।। ६५ ।।

ययोरधि वयं सहार्धयुगवर्षदण्डं गता
स चाद्य मयि वर्ततेऽथ विनिवर्तते वा स्वतः ।
इदं ब्रिटिशशासनं तदथवात्र नाभागिकं
यदेच्छति तदात्र मां पुनरपि ग्रहीतुं क्षमम् ।। ६६ ।।

इतीदृशमिहास्मि किञ्चिदपि यत्र नावेदिषम्
सुरक्षिततया वयं खलु विमोचिताः स्मः परम् ।
न चेदमविदं चतुर्थपुरुषस्य शिष्यस्य किं
प्रपञ्चपतितस्य तस्य समभूद्विमुक्तिर्न वा ।।६७।।

न तस्य सहयोगकारि किमपि मित्रमेवाभवत्
न चापि जनतारवः स पतितोऽत्र कारागृहे ।
वयं न खलु विस्मराम इममत्र संमोचितुं
यथाबलमिहायतेमहि वृथैव तच्चाखिलम् ।। ६८ ।।

रियासततमोगतं तमनुमोचितुं सापि किं
प्रयत्नमतनोद्गुरोः समितिरत्र वा नेति च ।
अनन्तरमवेदिषं स खलु कोमगाटामरू-
दलस्य पुरुषश्चिरं निगडितोऽथ मुक्तिं गतः ।। ६९ ।।

न राजपुरुषा अमी इहेदृशनराणां बहिः
स्थितिं सपदि मन्वते कथमपीह सिद्धान्ततः ।
इति क्वचन कृत्रिमे कदपराधपाशे क्षणा-
दिमानपि निगृह्णते दधति चाप्यसामीप्यगान् ॥ ७० ॥

अहं च गिडवान्ययं च पुनरेष सन्तानको
वयं परमदुःखदं सहचरं तु नाभागतः ।
नयाम विषमज्वरं निजगृहं स्वदेहस्थितम्
भयानकमिदं स्थितं त्रिचतुरांस्तु सप्ताहकान् ॥ ७१ ॥

परन्तु गिडवान्यपि व्यथित आस सन्तानक-
श्चिराय पतिताविमौ विषमतापकारिज्वरे ।
गतोऽथ गिडवान्ययं प्रतिनिधिस्तु काङ्ग्रेसतः
सरः स गुरुमान्दिरीसमितिसङ्गसिद्ध्यै तदा ॥७२॥

ततश्च गुरुमान्दिरीसमितिरत्र जैत्रं पुरं
नृणां शतकपञ्चकं प्रथमयूथमाकल्प्य तत् ।
इदं स गिडवान्यदर्शयत तत्र नाभागिकीं
दिशं न परिधौ प्रवेष्टुमयमैच्छदस्यावधिम् ॥७३॥

तदीयपरिधौ प्रविष्टजनयूथमेतद्रुषा
भ्यताडयदशस्त्रमप्यहह गोलिकाभिर्भृशम् ।
क्षता इह च विक्षताः कतिपयेऽथ केचिन्मृताः
सहायगिडवान्यसौ च सह तैर्गृहीतस्तदा ॥ ७४ ॥

न तत्प्रति चिकीर्षयाऽक्रियत कार्यजातं क्वचित्
स वर्षमधिवासितो सहठमेव कारागृहे ।
विकृत्य च तनुं स रुग्णवपुरार्तिमान् मोचितो
विनापि निजदोषमेष परसङ्गतो दुर्गतः ॥ ७५ ॥

इदं तु गिडवान्यधिग्रहणबन्दिगेहस्थिति-
द्वयं तदधिकारिता दुरुपयोगमात्रं मतम् ।
मया लिखितपत्रके त्वरितमैड्मिनिस्ट्रेटरो
निदेशपरिलङ्घना तदपराध इत्यालिखत् ॥७६॥

मयाऽस्य किल कर्मणो विधिविरुद्धता दर्शिता
क्षमाङ्गसहयोगितास्थितिषु नौचिती देशिता ।
अमुष्य विधिकर्मणः प्रतिलिपिर्मया प्रेषिता
परं स सकलं नकारयति हन्त ! मां खेदयदन् ॥ ७७ ॥

स्वमत्र गिडवान्यसौ महति संकटेऽपातयत्
सुहृद्भिरवरोधितो न हि कृतज्ञतामाश्रयम् ।
कृतघ्नमिव च स्वकं हृदि विलोकयन्न त्रपा-
सरिद्गहनगर्ततः स्वमुदधार्षमाधृष्टवत् ॥७८॥

समेऽपि वयमेवमेव किल वीरताईस्थितौ
भजेमहि तु धीरतां सपदि बुद्धिमत्ताभिधाम् ।
इयं कृपणता बलादिव विकर्षति स्वाभिमा-
नमत्र खलु दीनतां प्रणयते च तां हीनताम् ॥७९॥

कालिदासकवेः स महिमा येन कविना दर्शितो
गीतिकादम्बर्याख्यसंग्रहग्रन्थमध्ये स स्फुटम् ।
तत्प्रणीते श्रीजवाहरलालनेहरूचरितकाव्ये
षोडशः सर्गोऽस्ति नाभानाटकं विरतिं गतः ॥ ८० ॥

कोकनाडा मोहम्मदालिश्च

उपेन्द्रवज्रा

सप्तदशः सर्गः

अयोजि कांग्रेसमहाधिवेशो दिसम्बरे मासि त्रिविंशवर्षे।
स वार्षिको दक्षिणभारतीये जनानुरोधादधिकोकनाडम् ॥ १ ॥
बभूव मौलानमुहम्मदाली सुहन्ममाध्यक्षपदे निविष्टः।
स्वभावतोऽसौ च समापतित्वात् पपाठ लेखञ्च सुदीर्घमेकम् ॥ २ ॥
इहैष भावं परिवर्धमानं क्रमेण मुस्लिम हृदयेषु नूत्नम्।
जगाद नीतावथ सम्प्रदाये प्रवत्सरे चाष्टमकेप्युपक्रमम् ॥ ३ ॥
अगात्तदागान्वितरवाननेतुर्निदेशने कश्चन शिष्टवर्गः।
ददर्श तं वायसरायमस्य प्रयत्नतो घोषितमादिमं तत् ॥ ४ ॥
स्वतन्त्रनिर्वाचनमेष किन्तु प्रयोग आसीत्किल कूटनीतेः।
यतोऽस्य मूलेऽपि स सर्वकारः करं स्वकीयं न्यदधात्तदानीम् ॥ ५ ॥
सभापतित्वे नियते स्वकीये मुहम्मदाली ममहृत्प्रतीपम्।
अमात्यतां तामददात्स मह्यं समस्तकांग्रेसमहासभायाः ॥ ६ ॥
न वेद्मि कांग्रेसभविष्यनीतिं तदा स्फुटं तेन न कामयेऽहम्।
किमप्यहो सोत्तरदायिताकं पदं सुसेवावसरं त्विहैच्छम् ॥ ७ ॥
मुहम्मदालीं प्रतिषेद्धुमर्हो न चाभवं गौरवमत्रजानन्।
सभापतेर्नूतनकस्य कश्चिन्न योग्य आसीत्सचिवत्वहेतोः ॥ ८ ॥
रुचौ दृढोऽयं सुदृढोऽरुचौ चाप्यहञ्च तस्मा अतिरोचमानः।
परस्परप्रेमगुणग्रहित्वगुणेन बद्धावभवाव चावाम् ॥ ९ ॥
मुहम्मदाली प्रबलोऽस्ति धर्मी मतेर्विरुद्धो न तथाविधोऽहम्।
परं तदीयोद्यम-कार्यशक्तिमतिप्रकर्षैं स्त्वतिकर्षितोऽस्मि ॥ १० ॥
स सत्वरो वाक्यपटुरप्यभूद्यद् उरुन्तुदं व्यङ्ग्यमयं प्रयुङ्क्ते।
अतस्तदीयाः सुहृदोऽल्पसंख्या अभूवुरेष स्फुरद्वचोरोद्धुमभून्न शक्तः ॥ ११ ॥
किमुक्तमत्र प्रतिसोष्यते किम् ? इतीदमस्यानवधार्यमासीत्।
सभापतित्वेऽस्य च कार्यगन्त्री सुसाध्वचाली सति भावभेदे ॥ १२ ॥

अहञ्च कार्योकसि काङ्ग्रेस्ये नवामिमां रीतिमचालयं यत् ।
न कोपि नाम्ना सह प्रत्ययं वा पदं प्रयुञ्जीत तदादि वान्यत् ॥ १३ ॥

महात्म-मौलान-मुखानि मानप्रयुक्ततत्तत्पदसम्प्रयोगः ।
भवत्यनावश्यक इत्यहं नवं किमप्युदाहर्तुमिहाभ्यवाञ्छम् ॥ १४ ॥

तथा तु कर्तुं प्रभवामि नाहम्, मुहम्मदाली मयि रुष्ट आसीत् ।
स तारपत्रेण सभापतित्वाधिकारतो मामदिशद् बलेन ॥ १५ ॥

पुरावदेवात्र च वर्तनीयं महात्मशब्दः खलु गान्धिनेति ।
विवाद आसीद् बहुधाऽऽवयोश्च प्रयुक्ततन्नाम् नि किलेश्वरेऽपि ॥१६॥

मुहम्मदाली मुहुराह 'अल्ला' हिति स्वतकार्तज्ञ्यप्रकाशनेषु ।
कदाचिदभ्यर्थनसत्क्षणेषु सभाक्रियाकर्मविलेखनेषु ॥ १७ ॥

विरुध्यमानश्च तथैष कर्तुं रुषा स मामाह स नास्तिकोऽसि ।
क्षणात्परं मामपि सम्प्रदायगुणान्वितं प्राह विरुद्धवृत्तिम् ॥ १८ ॥

मनस्यशोचं कियदस्य सत्यं सुनिर्भरं तद्वचनं हि तस्मिन् ।
न सम्प्रदायो न च सम्प्रदायी विवक्षितार्थादितरार्थमाह ॥ १९ ॥

अहं विवादावसरान् विहातुं न सम्प्रदाये बहु वच्मि तेन ।
भविष्यतीहास्य फलं कदाचिद् परस्परं स्याव रुषा हि रूक्षौ ॥ २० ॥

मनो न खिद्येत मुहम्मदालेः दृढा हि नेदृग्विषयेषु बोध्याः ।
मुसलमतां नास्ति विचारवेलास्वतन्त्रता तेन सुदुर्गमास्ते ॥ २१ ॥

विचारदृष्ट्या सरलोऽस्ति पन्था मुसलमतां सङ्कुचितोऽतिमात्रम् ।
न वामदक्षं प्रतियन्तुमर्हो भवत्यहो तन्मतमानदोऽत्र ॥ २१ ॥

विचारवेलासु किल स्वतन्त्रः पुराणदुर्नीतिनिपीडितोऽपि ।
इतोऽस्ति भिन्नो बहुधा स हिन्दू दृढः किलाचारविधौ स आस्ते ॥२३॥

स चास्ति धर्मे बहुक्रान्तिकारी विचारचर्चाऽभिसमुद्यतोऽद्धा ।
इहार्यसामाजिकदृष्टिरीदृग्विशालतां न श्रयतीति मन्ये ॥ २४ ॥

मुसलमतां मार्गइवास्ति तेषामृजौ तथा सङ्कुचिते च यात्रा ।
मतौ च विद्यासु च सिद्धिभाजां परम्परा दार्शनिकी परेषाम् ॥ २५ ॥

ददाति या धर्मविचारकाले पृथक्पृथग्दृष्टिकृते महत्त्वम् ।
जनः किलाचारमुचं विगायतोत्य दृढास्ते व्यवहारकाले ॥ २६ ॥

इहांशिकं कारणमेतदस्ति यदस्ति हिन्दूष मिथोविरुद्धम् ।
प्रमाणमेषां बहुरीतिभिन्नः किलास्ति धर्मो न तु सम्प्रदायः ॥ २७ ॥
कियद्विचित्रं दधते दृढत्वं स्वजीवनं रक्षितुमेष शक्तम् ।
भवेज्जनो नास्तिकताभिमानी परं न हिन्दुत्वमसौ जहाति ॥ २८ ॥
अयञ्च धर्मे निजसन्ततीनामनिच्छयापि स्वतयास्ति धर्ता ।
अहं यथा ब्रह्मकुलेऽस्मि जातो वहाम्यहं ब्राह्मणतां स जीवन् ॥ २९ ॥
ततोऽस्मि धर्मे जनरीतिनीतौ किमप्यनूच्यां किमपीह कुर्याम् ।
भवाम्यहं पण्डित एव हिन्दूनिवासदेशे तदरोचनोऽपि ॥ ३० ॥
स्मरामि तुर्कीयबुधं तु कञ्चिद्यमामिलं स्फीततरे च देशे ।
मयाकिलास्मै प्रहितं स्वपत्रं त्विहालिखं पण्डितनेहरूं स्वम् ॥ ३१ ॥
स दर्शनेऽभूच्चकितो निराशोऽवदच्च यत्पण्डितशब्दयोगात् ।
अकल्पयं शास्त्रिणमेव वृद्धं बुधं भवन्तं किल धार्मिकञ्च ॥ ३२॥
तदस्तु, नाहञ्च मुहम्मदाली विवादमालम्बेवहि धर्मरूपे ।
परन्तु तस्मिन्नहि मौनमासीत् निरोद्धमात्मानमसावशक्तः ॥ ३३ ॥
सपञ्चविंशब्दमुखे स्वगेहे समागतं मामवदन्मतार्थम् ।
विवादमिच्छामि किल त्वयाहमित्यस्मि तं प्रायतिषि प्रबोद्धुम् ॥३४॥
भवद्दृशोऽसौ मम दृग्विभिन्ना परस्परं न प्रभवाव जेतुम् ।
परं सदायं शृणुयान्मदुक्तं तदुक्तवान् यद्विदधाव वार्ताम् ॥ ३५ ॥
विवेत्सि मां त्वं किल काष्ठमूलं तथास्मि नेतिप्रतिपादयामि ।
अहं मतार्थान्यपठं बहूनि सुपुस्तकान्यन्तरचिन्तयञ्च ॥ ३६ ॥
इतरियन् दर्शितवान्स मह्यं पृथक्पृथग्धर्मनिरूपकानाम् ।
सुपुस्तकानां निवहैर्भृताश्चालमालिका आधुनिकाल्पकानाम् ॥ ३७॥
विशेष इस्लाममतानुगानाम् तथेशुखीष्टोक्तिसमर्थकानाम् ।
असावमीषां चिरदृष्टिबन्धे कुराणपारायणकान्यकार्षीत् ॥ ३८ ॥
अथाल्य भाष्याण्यपि सोऽध्यगीष्ट तदुक्तवस्तुष्वयमैद् यथार्थम् ।
शतादहो सप्तनवत्युपान्तमिति स्म सोऽधीतिफलं प्रवक्ति ॥ ३९ ॥
ऋते कुराणादपि तत्समथं, शते त्रयं नास्त्यपरोक्षसिद्धम् ।
परोक्षमप्यस्य यथार्थमेव भवेथार्थे बहुलेऽपरोक्षे ॥ ४० ॥

न युक्तिरेषा स्फुटतर्कयुक्ता परं विवादं न किलैच्छमेनम् ।
अनन्तरं यत्त्वभवत्तदीक्षा सुविस्मयायैव ममाभवत्तदा ॥ ४१ ॥ ४१ ॥

मुहम्मदाली वदतिस्म योऽपि करानमध्येष्यति मुक्तबुद्धिः ।
जिज्ञासुभावेन स नूनमस्य यथार्थतायां गतसंशयः स्यात् ॥ ४२ ॥

महात्मना तत्पठितं विशेषावधानदानादिति नूनमेषः ।
इस्लामयाथार्थ्यवशंवदोऽस्ति, मनोऽभिमानस्तु रुणद्धि वक्तुम् ॥ ४३ ॥

मुहम्मदाली स्वसभापतित्वाब्दतः परं दूरमगात् सभातः ।
शनैः शनैर्मुञ्चति कांगरेसं बहूनिवर्षाणि किल व्यतीयुः ॥ ४४ ॥

अपीह मार्गे भजतोऽपि वृद्धिं गतोऽन्तरालोऽधृत वैमनस्यम् ।
न कुत्रचिद् व्यक्तिविशेष एष क्षमः समारोपयितुं तु दोषम् ॥ ४५ ॥

परन्तु देशस्थितिरद्य वास्तवी यथाभवत् तत्र तु भाव्यमेतत् ।
अभूदभद्रं महदेव तद्यथा मनांस्यनेकानि सुदुःखितानि ॥ ४६ ॥

कियान्हि जात्यात्र भवेत्स भेदो परं मनाङ्नीतिपथे तु भेदः ।
स्वदेशगाया निजतन्त्रताया विचार एभ्योऽपि स रोचतेस्म ॥ ४६ ॥

दृगेकिका राजनये च तेषामस्माकमासीदिति सम्भवोऽभूत् ।
समाहितिः कापि हि सम्प्रदायसमस्ययाप्यत्र भवेत्सुगेति ॥ ४८ ॥

द्वयोरपि स्यात्तु तयात्र तुष्टिर्न राजनीत्या प्रतिगामिभिस्तैः ।
स्वजातिगस्वार्थपरायणैस्तैः क्वचित्कथञ्चित्किल साम्यमस्ति ॥ ४९ ॥

अभूदिदं भारतदैवदोषादगादसौ ग्रीष्म ऋतौ विदेशम् ।
तदाहितां जातिगतां समस्यां निरासितुं कोऽपि कृतः प्रयत्नः ॥ ५० ॥

मुहम्मदालाविह वर्तमानेऽनुमीयते किञ्चन रूपमन्यत् ।
प्रत्यागमं यावदमुष्य सर्वं छिन्नञ्च भिन्नं, स गतो विपक्षम् ॥ ५१॥

शरद्द्वयानन्तरमेव सत्याग्रहः क्रमाद्वेगमधात् गताश्च ।
सुबन्धवोऽस्माकमिमं च कारामुपेक्ष्य कांग्रेस विनिर्णयञ्च ॥ ५२ ॥

मुहम्मदाली किल गोलपोठसभाप्रवेशाय दधौ स्पृहाञ्च ।
मनो ममाखिद्यत तेन, मन्ये मनस्तदीयं खलु खिन्नमेव ॥ ५३ ॥

स लन्दने यत्किञ्चि हाचरच्च प्रमापयत्येतदलं स्वभावात् ।
स चान्वभूद्भारतमेव युद्धस्थलं ममास्ते न विदेशपर्षद् ॥५४॥

सचेदिहायास्यदवश्यमत्राऽभजिष्यदान्दोलनमस्मदीयम् ।
व्यकारि तत्स्वास्थ्यमथाऽभिभूतो रुजा च सोऽभूद् बहुभिः समाभिः ॥५५॥
उपेत्य तंलन्दनदेशमेष महिष्ठचिन्ताकुलितः किलाप्तुम् ।
अपेक्ष्यवस्तूनि च तान्यकार्षीत्प्रयत्नमाराकरौषधानि ॥ ५६ ॥
दिनानि तेनेयुरिहान्तिमानि गतश्च कारागृहमस्मि नैन्याम् ।
मुहम्मदालेरवसानवृत्तमश्रुताविहाघातमगां महान्तम् ॥ ५७ ॥
लाहौरकांग्रेससमागमेऽसौ मयान्तिमेनावसरेण दृष्टः ।
समापतेस्तत्र ममाभिभाषांशत स रुष्टस्तदवालुलोचत् ॥ ५८ ॥
स कांगरेसं त्वरितं प्रधावद् विलोक्य यातं च तरिस्विनीतौ ।
अली स्वयं नानधिको महस्वी परस्य सोऽग्रेसरणं न सेहे ॥ ५९ ॥
'स सावधानीकृतवान् गभीरं जवाहर ! त्वामवधापयामि ।
तवाद्य मित्राणि च सङ्गभाञ्जि विहाय यास्यन्ति किलैकलं त्वाम् ॥६०॥
स्मरेरिमे त्वां गमयिष्यन्ति मृत्युपाशं स्वयं ते सुहृदः कांगरेस्याः ।
इत्यैरयत्सोऽलिरमङ्गलाढयां भविष्यवाणीमतिमात्रकट्वीम् ॥ ६१ ॥
अभून्मनोहार्यधिकोकनाडं कांग्रेससंयोजनमेतदेकम् ।
इहैव सेवादलभूमिकाया न्यासः स्वयं सेवकवर्गसत्त्वे ॥ ६२ ॥
इमे हि वर्गा दधते प्रबन्धं विशन्ति कारागृहमप्यसौख्यम् ।
परं न तेष्वान्तरिकं तदैक्यम तत् भून्नचैतेष्वनुशासनं तत् ॥ ६३ ॥
नारायणो डाक्टर एष सुब्बारावो हि हार्डीकर एव साधुः ।
अचिन्तयद् राष्ट्रियकार्यक्लृप्त्यै भवेत् स्वयंसेवकसंघ एकः ॥ ६४ ॥
यत्काङ्गरेसस्य निदेशनेन कुर्वीत कार्याण्यथ राष्ट्रियाणि ।
स मामयाचत्सहयोगमस्मै मया सहर्षं ह्यूररीकृतोऽसौ ॥ ६५ ॥
विचार एष प्रतिभाति मह्यम् उपक्रमोऽभूदधिकोकनाडम् ।
परं विदित्वाऽजनि विस्मयो मे कांग्रेसिनामत्र विरोधभावात् ॥ ६६ ॥
अवोचुरेके भविता भयावहः काँग्रेसिनामेष उपक्रमस्तु ।
इदं तु सैन्यं भवितेह तत्त्वं कांग्रेससत्तान्तकरं कदाचित् ॥ ६७ ॥
परे जगुः सेवकवर्गकस्य कृते भविष्यत्यनुशासनं तु ।
निदेशतः सञ्चरणं महीयोऽधिकारिणामित्यलमस्ति नान्यत् ॥ ६८ ॥

वदन्ति चान्ये न पदं पदेन संयोज्य तच्चङ्कमणं तु काङ्क्ष्यम् ।
ब्रुवन्ति केचित्पठनादिशालिनां संघट्टनं तद् विनिहन्त्यहिंसाम् ।।६९।।

हार्डीकरः किन्त्वलगत्स्वकार्ये श्रमेण चादर्शितवान् किशोरान् ।
सुशिक्षिता ये कुशलाः स्वकार्येष्वहिंसकाश्चापि भवेयुरेते ।। ७० ।।

ततो निवृत्तेन नवानुभूतिः प्रयागमागत्य मया च लब्धा ।
स वर्ष आसीत्किल कुम्भपर्वार्धकुम्भपर्वान्यतरोपसृष्टः ।। ७१ ।।

लक्षं जनानामधिसङ्गमं तदा समेत्य च स्नाति, ददाति दानम् ।
गङ्गा च मौलान्तरिताऽपि शीते संकोचतः सैकतमातनोति ।। ७२ ।।

तद्यात्रिणां वाससुखाय कल्पते वर्षे चतुर्विंशतिके तु धारा ।
भयावहाभूदिह यात्रिकाणां स्नानोद्यमः सङ्कटमूल आसीत् ।। ७३ ।।

नियन्त्रणादत्र च सावधानताहितानि कार्याणि विधाय भूयः ।
स्नानार्थिनां चाप्यवधार्य संख्यां यत्नो मया तत्कृतयेऽत्र कार्यः ।।७४।।

अहं न काञ्चिद्रुचिमत्र बिभ्रत् शुभेषु पर्वस्ववमज्ज्य पुण्यम् ।
संवेत्तुमासं न किलोत्सुको हि वृत्तं त्वजानं खलु वृत्तपत्रात् ।।७५।।

निदेशितं प्रान्तिकशासनेन न सङ्गमे स्नान्तु जनाः किलेति ।
श्रीमालवीयोऽस्य विरोधकोऽभूत् स्नानास्पदं सङ्गम एव यस्मात् ।।७६।।

द्वयोरपि प्राणसुधर्मरक्षादृशा स्वपक्षोऽभ्युचितस्तदासीत् ।
परं सदा प्रान्तिकशासनस्य भवन्ति कार्याण्यविवेकजानि ।।७७।।

विशेषतस्तेन निदेश एष क्षोभाय लोकस्य प्रकाशितोऽभूत् ।
विहाय यत्नं जनमानसस्यावहेलनं कः सहतां विवेकी ।।७८।।

तस्मिन् दिनेऽहं चलितः प्रभाते द्रष्टुं महिष्ठामिह कुम्भमेलाम् ।
स्नानस्य संकल्पलवोऽपि नासीत् तटं प्रविष्टेन मया श्रुतं यत् ।।७९।।

श्रीमालवीयेन कृतास्ति सौम्या संप्रार्थना सङ्गम-मज्जनार्था ।
अस्वीकृतिं प्राप्य ततस्तदीयां, स रुष्ट आसीत्क्षुभितश्च लोकः ।।८० ।।

सत्याग्रहं कर्तुमयं द्विशत्या नृणां गतोऽग्रेसरतां स धीरः ।
रुचिर्ममासीदिति सोऽहमस्मिन् सत्याग्रहे सम्मिलितः सजोषम् ।।८१।।

निःश्रेणिमादाय किलोच्चवारामुल्लङ्घ्य गन्तुं समुपागतोऽहम् ।
आच्छिद्य निःश्रेणिमिमां न्यरुन्धत्ते राज्यभृत्या इति संस्थिताः स्मः ।८२।

मध्याह्नमारोहति चोष्णरश्मौ वयं वृताः पत्तिभिरश्ववारैः ।
सत्याग्रहो नोऽधिकृतां दुराग्रहस्तेषां च नः खेदमजीजनत्परम् ।।८३।।

अथाश्वसेनाधिकृतो निदेशं कमप्यदत्तानुगयूथपाय ।
प्रतीयते स्माश्वचमूरियं नः शिरस्युपारोढुमिवास्ति दिष्टा ।।८४।।

स्वपार्श्ववर्ती तु मया निदिष्टः कथं न लङ्घ्या बत काष्ठवारा ।
आरूढमालोक्य तु मां समन्ताज्जनास्समारुह्य बहिर्निरैयुः ।।८५।।

निःसारिताः काश्चन काष्ठवल्ल्यो मार्गश्च कश्चित्प्रविकल्पितोऽभूत् ।
केनापि दत्तश्च ध्वजस्त्रिरङ्गो बद्धो मया मूर्धनि वारकायाः ।।८६।।

ऊर्ध्वं स्थितः सर्वमपश्यमत्र तद्यात्रिणां वारकलङ्घनञ्च ।
तद्रोधनं पत्तिभिरश्ववारैः शान्तैश्च दान्तैरथ सावधानैः ।।८७।।

न तत्र कश्चित्क्षतविक्षतोऽभूत्ततोऽवतीर्याहमगां त्रिवेणीम् ।
निमज्य तत्रैत्य च मालवीयं स्वस्नानवृत्तेन किलोदसाहयम् ।।८८।।

महामना अप्ययमेत्य तूष्णीं तामश्वपंक्ति प्रविलङ्घ्य चारात् ।
गङ्गाजले मज्जितवान् स वृद्धो यूनां मनो लज्जितवांस्तदानीम् ।।८९।।

सर्वे वयं तं त्वनुकृत्य भूयस्त्रिवेणिकायां विनिरुध्यमानाः ।
निवारितं तत्त्वभवन्नियन्त्रणं प्रतिक्रिया चापि न काप्यकारि ।।९०।।

स सर्वकारः खलु मालवीये विरुद्धचेष्टां न चिकीर्षति स्म ।
महानुभावस्य च तस्य सङ्गाद्वयं विमुक्ताः लघवोऽपि दण्डात् ।।९१।।

प्रजानुरोधी नृपरोषपात्रं नृपानुरोधी जनताभ्युपेक्ष्यः ।
प्रजानृपाणां हितचिन्तकस्तूभयोः प्रियोऽभूत्किल मालवीयः ।।९२।।

(प्रायो हरिद्वारमुपागतोऽसौ विलोकितुं स्वर्षिकुलं सदागात् ।
सरस्वतीमन्दिरमेत्य चास्य विद्यार्थिनस्तान् समुपादिशच्च ।।९३।।

स एकदा तानदिशत्स्वदोहया—पिबन्तु दुग्धं च पठन्तु विद्याम् ।
जपन्तु तन्नाम सदाचरन्तु मनोरथा वः परिपूरिताः स्युः ।।९४।।

श्लोकैः स्वकीयैः पुनरादिशच्च सभाश्च शालाः परितो विधेयाः ।
सेवा च कार्या निजदेशधर्मयोर्नेता तु नूनं त्वतिदुर्लभोऽस्ति ॥६५॥

नरपतिहितकर्ता द्वेष्यतां याति लोके, जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने, नृपतिजनपदानां दुर्लभः कार्यकर्ता ॥

श्रीमज्जवाहरलालनेहरुचरितकाव्यमिदं पुनः
पृथ्वीप्रशस्तिप्रभृतिनानाकाव्यसोदरतां गतम् ।
तस्यास्य सप्तदशस्तु सर्गः कोकनाडमुहम्मदा-
लीशीर्षकोऽयमुपैति सोऽन्तमुपेन्द्रवज्राद्यैः श्रितः ॥

मत्पिता राष्ट्रपिता च

उपजातिः

अष्टादशः सर्गः

ततश्चतुर्विंशतिसंख्यवर्षे किलोनविंश्यास्तु शताब्दिकायाः ।
समागतं तत्सहसैव वृत्तं यदत्र कारास्वरुजत्स गान्धिः ॥ १ ॥
अतश्चिकित्सालयमेव नीतश्चिकित्सतः शल्यचिकित्सया च ।
आकर्ण्य तद्भारतवर्ष एष स्तब्धो भयेनास्म वयं परीताः ॥ २ ॥
निरुद्धनिःश्वासगतिश्च सर्वो जनोऽपि वृत्तानि प्रतीक्षते स्म ।
अनाश्वसन् सङ्कटकालवृत्ते द्रष्टुं स गान्धिं तदवस्थमैच्छत् ॥ ३ ॥
दलान्यथायन् प्रतिपुण्यपत्तनं तं द्रष्टुमार्तं परितोऽपि देशात् ।
आसीच्चिकित्सालय एव तावद्रक्षाबलावेष्टित एष बन्दी ॥ ४ ॥
तद्दर्शनादेशमवाप्य केचित्सखाय एवैनमुपागतास्तु ।
आवां चिकित्सालय एव सन्तं व्यलोकयावाहमु मत्पिता च ॥ ५ ॥
कारां चिकित्सालयतो न नीतः कार्श्यं किलासीदपनीयमानम् ।
तन्निग्रहस्यात्पितवांस्तु कालं विमुक्तवांस्तं च स सर्वकारः ॥ ६ ॥
षड्वार्षिकान्निग्रहकालतोऽयं द्विवार्षिकाद् वन्दिगृहे निवासात् ।
मुक्तोऽधिमुम्बापुरमब्धिकूले स स्वास्थ्यसिद्ध्यै न्यवसज्जुहूषु ॥ ७ ॥
जुहूमथास्मत्परिवार आगात्समुद्रकूले लघुबङ्गलायाम् ।
वयं न्यवात्स्माधिकपक्षकालं चिरादवाप्तो मनसावकाशः ॥ ८ ॥
इहास्मि ततुं प्रमदेन शक्तः सन्धावितुं चापि यथेष्टदेशे ।
आरुह्य चाश्वं खलु सम्मदेन विहर्तुमासं सितसैकतेषु ॥ ९ ॥
अत्राधिवासस्य न लक्ष्यमासीन्मुदावकाशव्यतियापनं नः ।
श्रीगान्धिना त्वत्र विचारणा सीत्तत्तत्समस्यासु पुरःस्थितासु ॥१० ॥
पिता ममैच्छत्कथयानि गान्धिं स्वराजिनां वाञ्छति तद्दलं किम् ।
न सक्रियां तस्य सहानुभूतिं विन्देयमत्रास्त्वथ निष्क्रियं तत् ॥ ११ ॥

अहं सचिन्तोऽभवमत्र या मामिमाः समस्याः कलयन्ति खिन्नम् ।
तासु प्रकाशो निपतेत्स कश्चित् यथाऽग्रिमः स्याद्विदितः क्रमो मे ।।१२।।

स्वराजिनामस्ति यथानुबन्धस्तथा च तैर्गान्धिरगात्प्रभावम् ।
सौहार्दसौजन्यसमन्विताऽपि वार्ता न साऽसूत समन्वितिन्तु ।। १३ ।।

न साम्मनस्यं हि तयोर्मिथोऽभूदित्यत्र पत्रेष्वगमत्प्रकाशम् ।
न कापि शङ्का मम गान्धिनाऽभूत् समाहितेत्यस्मि जुहूं जिहासुः ।।१४।।

स्वनीतिरीत्या स भविष्यचिन्तां सुदीर्घकालाय क्रमं क्रियाणाम् ।
न सम्मतोऽभूद्विनियन्तुमत्र स लोकसेवामदिशच्च धृत्या ।। १५ ।।

काङ्ग्रेसकार्यक्रमतः समाजसुधारपूर्वं रचना तु कार्या ।
प्रतीक्षणीयः समयश्च युद्धानुरूपकार्यस्य न विप्लवस्य ।। १५ ।।

भयं किलास्माकमिदं तदासीत् समागते तत्समये न नाम-
काण्डं तु चौरीचतुरध्वतुल्यं भवेद्यदुत्पातयतात्समग्रम् ।। १७ ।।

रुद्धञ्च मा भूदमुना नियुद्धमित्यस्य प्रश्नस्य समाहितौ तु ।
श्रीगान्धिना किञ्चिदपीह नोक्तं मध्ये यदप्युक्तमभून्न व्यक्तम् ।।१८।।

अस्मासु नैके स्फुटबोधकामा आसन् यदेते क्व यियासवः स्मः ।
कांग्रेसमस्मिन्विषये स्वघोषं कुर्यान्नवा चेति बुभुत्सवः स्मः ।। १९ ।।

स्वतन्त्रताप्त्यै तु समाजसृष्ट्यै वयं कियद्भ्यः परिवर्तनेभ्यः ।
हठं करिष्याम इतीह चास्मन्नेतार एष्यन्ति कियन्नु तुष्टिम् ? ।।२०।।

इत्यादि च प्राक् कियतस्तु मासानिहोत्तरप्रान्तिकमेलनेऽहम् ।
स्वभाषणेऽध्यक्षतया प्रदत्ते स्वाधीनतायां बलमादधां यत् ।।२१।।

षड्विंशवर्षे मयि तद्वसन्ते नामागतो गेहमुपागतेऽभूत् ।
तस्योपहाराद्विषमज्वराच्च तदाभवं किञ्चन मुच्यमानः ।।२२।।

सम्मेलने तर्ह्यनुपस्थितस्य व्याख्यानमेवागमदेतदत्र ।
तां रोगिशय्यामधिशय्य यत्तु ज्वरातुरेणापि मया व्यलेखि ।।२३।।

कांग्रेसमध्ये विषमां समस्यां स्वाधीनतायाः विशदां विधातुम् ।
उत्केषु चास्मास्वपरे सखायो दूरं गता नेतृभिरुज्झिता वा ।।२४।।

सर्वत्र साम्राज्यसमर्थनाञ्च स्तुवन्ति तस्यादरगौरवञ्च ।
तद्वर्त्ततां नाम च देशबन्धुषु स्वपादपीठेष्विव सावहेलम् ।।२५।।
अस्मज्जनांश्चोपनिवेश एषां स्वक्रीतदासानिव रक्षताद्वा ।
स च स्वदेशे ददतां प्रवेशं तेभ्योऽस्मदीयेभ्य उदारनृभ्यः ।।२६।।
स राजदूतत्वमधात्तु शास्त्री इम्पीरियरमेलनके जगाद ।
सप्रूः सरस्तेजबहादुरः स्मयात् साम्राज्यसाम्राज्यकरोऽस्तु देशः ।।२७।।
महान् समुद्रश्च पृथक्करोति स्मास्मानुदारात्किल नेतृवर्गात् ।
पृथक् पृथग्द्वीपपदे वसामः पृथक्पृथक्चात्र गिरो वदामः ।।२८।।
स्वप्नेषु चास्माकमथापि तेषां स्वप्नान् प्रपक्ष्यन्त्यथ तेऽपि चेच्च ।
किमप्यहो नैव समानमासीत् तदा वयं किं नु चयेम लक्ष्यम् ।।२६।।
परं तदैवं न विचारयामो न च स्फुटं चिन्तयितुं लषामः ।
विशेषतो राष्ट्रियचेष्टितेषु स्वभावतोऽस्पष्टसधार्मिकेषु ।।२०।।
वर्षे चतुर्विंशतिके प्रवृत्ते जनैः सदस्यः स्म्रियते स्वराजी ।
अन्तर्विरोधञ्च सदोविभङ्गं प्रति प्रजल्पन् किमयं विदध्यात् ।।३१।।
केचिद्विनोदाय वभुः प्रसङ्गाः समा निरास्यन् किल तत्र वर्षे ।
आयव्ययादेरनुमानपत्रं, यदास्त कार्यक्रममुख्यमूलम् ।।३२।।
स्वराज्यलाभाय च भारतस्य विनिश्चिताः स्युश्च पणा अवश्यम् ।
इत्यस्तु च प्रस्तुत एव भव्येऽस्मिन् गोलपीठे विषयो विवादे ।।३३।।
वङ्गेऽपि नेतर्यथ देशबन्धौ सभा निरास्यद् व्ययहेतुयाच्ञाः ।
सभासमित्योरुभयत्र वायस्रायस्तदा तद्गतराज्यपालः ।।३४।।
हस्ताक्षराण्यङ्कितवान् स्वकीयस्वीकारचिह्नानि विधानकृन्ति ।
व्याख्यान्यथासन् समितिष्वथाभूत् उपद्रवाभो विजयस्य हर्षः ।।३५।।
स्वराजिनां चाभवदत्र वृत्तपत्रेषु सम्यञ्चि च शीर्षकाणि ।
प्रकाशिता चासुरितोऽतिरिक्तं न किञ्चनापि स्पृहणीयमासीत्।।३६।।
किञ्चातिरिक्तं प्रतिकर्तुमासन्निमे समर्था इति वेद लोकः ।
भूयोऽपि भूयांसि च तानि कर्माण्येवाकरिष्यन् गतनव्यतानि ।।३७।।
उत्साह आसीद्गलितो जनास्तच्चायव्ययादेरनुमानपत्रम् ।
तद्राज्यपालेन सदा च वायस्रायेण हस्ताक्षरितं सहन्ते ।।३८।।

अतः परस्तात्स पदक्रमस्तु स्वराजिनां प्राप्तसदस्यतानाम् ।
अवश्यमासीत्किल दुर्लभोऽयं सभासमित्योर्भवनाद्धि बाह्यः ॥३९॥
अस्यैव वर्षस्य च मध्य एव कदाचनेहाहमदादिवादे ।
समग्रदेशस्य तु काङ्ग्रेससभाऽधिविष्टाभवदुत्सवाभा ॥४०॥
अस्यां किलाशाभ्यधिका स्वराजिवर्गस्य गान्धेश्च घने विरोधे ।
आकस्मिकी व स्थितिरभ्युदीता विलक्षणा विस्मयकारिणी नः ॥४१॥
आरम्भमस्या अकरोत्स गान्धिः काङ्ग्रेस्विधाने परिवृत्तिमिच्छन् ।
मताधिकारे च सदस्यताया विधानमासीत्परिवर्तनीयम् ॥४२॥
प्रथमां विधानधारा आसीदिहैषा जनः शान्तिमयैरुपायैः ।
स्वराज्यमिच्छेतन्तेहकाङ्ग्रेसे भवेत्सदस्यश्चतुराणकैः सः ॥४३॥
इत्येष आसीन्नियमोऽधुना श्रीगान्धिः किलैच्छत् चतुराणकानाम् ।
स्थाने स्वहस्तेन निकृत्तसूत्रमात्रां ददानोऽस्तु स न सदस्यः ॥४४॥
मताधिकारे परिवृत्तिरेषाऽतिन्यूनतां नेष्यति सभ्यसंख्याम् ।
तस्यातिसङ्कोचविधौ तथेयं समाधिकारं भजते स्म नेमम् ॥४५॥
परं विधानाक्षरवैपरीत्यं न जातु गान्धिः प्रतिवीक्षते स्म ।
इमं विधानेन समं हठञ्च विपश्यतो मे प्रतिघात आसीत् ॥४६॥
अहं तदा मन्त्रिपदं विहातुं न्यवेदयं कार्यसमित्यधीक्षम् ।
इहान्तरे किञ्चन नूतनं तूपस्थितं येन मया कृतं तत् ॥५०॥
या भारतीया समितिर्गरिष्ठा प्रस्ताव एषोऽत्र धृतः पुरस्तात् ।
पितुर्ममाथापि च देशबन्धोर्महान् विरोधः परिदर्शितोऽभूत् ॥५१॥
अन्ते च तत्र स्वविरोधरोषं प्रदर्शयन् प्राङ्मतसङ्ग्रहात्सः ।
पर्याप्तसङ्ख्यैर्निजपक्षगैश्च साकं समुत्थाय बहिर्गतोऽभूत् ॥५४॥
ततोऽपि तस्यां समितौ स्थितास्तत्प्रस्तावपक्षप्रतिरोधिनोऽन्ये ।
स स्वीकृतोऽभूद्बहुना मतेन प्रत्याहृतोऽभूत्तु पितुर्हठेन ॥५३॥
श्रीदेशबन्धोश्च पितुश्च तेन स्वराजिनां चापि बहिर्गमेन ।
गान्धिः प्रभावं कमपि प्रपन्नस्तद्भावना चोपहता नितान्तम् ।
काचित्सदस्योक्तिरिमं च खिन्नं तथाकरोत्स्वं समभालयत् सः ।
व्यक्तं तदासीद्यदसौ गभीरां व्यथामयासीत्स्वमतापमानात् ॥५५॥

हृत्स्पर्शिभिः शब्दलवैः समित्याः पुरः किल व्यानगसौ विचारान् ।
आकर्ण्य यान् केऽपि सभासदोऽस्य सहानुभूत्या समरौत्सुरत्र ॥५६॥
अयं त्वसाधारण एव चेतःप्रकम्पकश्चास्त किल प्रसङ्गः ।
काचित्सदस्योक्तिरिति प्रमादादलेखिषं वस्तु तदन्यदासीत् ॥५७॥
श्री डेवथो निन्दित आस्त गोपीनाथस्य तूद्देश्यमिह स्तुतं तत् ।
तत्राभवन्यानि च भाषणानि तान्यस्य दुःखं त्रिगुणित्यकार्षुः ॥५८॥
गान्धिः स्वपत्रे समितेरुदन्तं लिखन्नगादीद्-बहुना मतेन
स्थितश्चतुर्ष्वेषु विचारणेषु स्वमल्पमेवागणयं त्वनेन ॥५९॥
प्रस्ताव एषोऽत्र च नाम गोपीनाथान्वितोऽजीजनदागभीरताम् ।
स्थितौ विशेषादिह भाषणानि गम्भीरतां ताँ समितेरहार्षुः ॥६०॥
तत्रान्तिमां प्रस्तुतिमत्र कर्तुं वैवश्यतोऽहं क्रमशो गभीरः ।
ततोऽतिःदुखाकुलितात्प्रसङ्गात् पलायितुं तावदभूवमार्तः ॥६१॥
तां प्रस्तुतिं चास्मि बिभेमि कुर्वन् जाने च नाहं स्फुटमप्यकार्षम् ।
न वेति यद्वक्तरि निर्मलं मे मनो न च स्पृष्टमिदं द्विडंशै ॥६३॥
चित्ते तु मे रोषभरोऽयमासीत् कांग्रेसनीतिं प्रति काप्युपेक्षा ।
तद्ध्येयभूतां प्रति चाप्यहिंसां प्रत्युत्तरादायितयाऽवहेला ॥६३॥
आसीत्सदस्येषु समर्थिकाऽस्याः सा सप्ततिः किन्त्वतिविस्मितोऽहम् ।
श्रीगान्धिभाष्येण सहास्ति लेख्या अहिंसयाप्ता घटना महत्त्वम् ॥६४॥
विज्ञायतेऽतो यदवैत्यहिंसां गान्धिः कियद्गौरवशालिनीं ताम् ।
अज्ञानतो ज्ञानपुरस्सरं वा कृताप्यहिंसावमतिर्न सह्या ॥६५॥
गान्धेर्हि कार्येषु च कार्यनीतौ मूलात्मना सन्निहिताऽस्त्यहिंसा ।
इत्येव च व्यक्तमभूत्तदानीं तदीरितैः स्वैर्विविधैर्वचोभिः ॥६६॥
श्रीनेहरूर्यद्यपि तं प्रमादं संशोध्य वस्तुस्फुटनामकार्षीत् ।
तथापि किञ्चित्समपेक्ष्यते साऽनुवादकैरेवमगादि भूयः ॥६७॥
स्वराजिनो नो बहिरागमंस्ते प्रत्याहृतो नाप्यभवद्विचारः ।
तत्रास्त मात्रा नियता तु सूत्रे सदस्यतायाः प्रतिरक्षणाय ॥६८॥
अंशोऽयमेषां न मतोऽभवत्तत्तस्यैव रोधाय बहिर्गतास्ते ।
तन्निर्गमेऽभून्मतदातृसंख्या त्रिंशत्पराः सप्त च परत्रषष्टिः ॥६९॥

तदा स गान्धिः पुनरन्यमेव प्रस्तावमाधात्समितौ सयुक्ति ।
स्वराजिनश्चेन्न वहिर्गताः स्युस्तदाथिकान्येव मतानि तेषाम् ।।७०।।
इत्येष तस्यांशतया प्रक्लृप्तः सदस्यताया प्रतिरक्षकोंऽशः ।
प्रत्याहृतो दण्डविधानरूपोऽहिंसाव्रतेनान्तरकोमलेन ।।७१।।
स चैष निन्दात्मक एव गोपीनाथान्वितो गान्धिपुरस्कृतोऽभूत् ।
तं देशवन्धुः समशोधयद्यत्स्वदेशभक्तिस्तु समर्हणीया ।।७२।।
संशोधनं तत्खलु मूलघातमहिंस्यसिद्धान्तमिमं निहन्ति ।
ततो मतानामभवत्तु पक्षेऽष्टौ सप्ततिः सप्ततिरन्यपक्षे ।।७३।।
अहो ! इयन्तो मम नाममात्राद् अनुव्रताः सन्ति शुभामहिंसाम् ।
इत्याकलय्य प्रतिघातमेकं गान्धिर्गतो दुःसहमेव चित्ते ।।७४।।
कथं स्वहस्तेन निकृत्तसूत्रे गान्धिस्तथाऽधाद् दृढमाग्रहं तम् ।
इत्येतदद्यापि न वेद्मि किं तं घोरं विरोधं मनसो न यातम् ।।७५।।
मन्ये स काङ्ग्रेससदस्यतायाः कृतेऽधिकारं मनुते स्म तस्य ।
खाद्यादिरूपे रचनात्मके यः कार्यक्रमे श्रद्दधते मनुष्यः ।।७६।।
अन्योऽपि मन्येत तमेनमन्तर्नो चेत्स काङ्ग्रेसतनोर्निरैतु ।
आसीन्मतं तस्य बहुत्वयुक्तं तथाप्यकार्षीत्प्रतिपक्षसन्धिम् ।।७७।।
आश्चर्यमागामिह मासषट्के स नैकधा स्वं मतमन्वपश्यत् ।
मन्ये स कर्तव्यविमोहतुल्यं तं कान्दिशीकत्वमिवागतोऽभूत् ।।७८।।
महात्मनस्तस्य कृते कदाचिन्न चित्तमेतन्मम चिन्तयेत्तत् ।
तस्यापि हन्त द्विविधा मतिः साऽन्तर्द्वन्द्वतुल्यं कलयेद्दशान्तम् ।।७९।।
मताधिकाराय कृतः श्रमः स्यादित्यस्ति नूनं स्तुतिमद्विचारः ।
आरोप्यमाणे तु बलादमुष्मिन् स्तुत्या समं स्यादपवादयोगः ।।८०।।
गान्धिः सदा दुष्करसम्मुखीनोऽभवत्किलाज्ञातजनेषु जाग्रत् ।
सत्याग्रहाख्ये समरे न कश्चित् साम्मुख्यमस्य प्रभवेत्तु कर्तुम् ।। ८१ ।।
तत्रास्य बुद्धिः सहजा प्रमादशून्यं पदं विन्यसितुं प्रयुङ्क्ते ।
सामाजिकीं संस्कृतिमानिनीषुस्तूष्णीं स कुर्यादपि कारयेच्च ।। ८२ ।।
दक्षस्य तस्यान्तरतो नियोद्धुं मत्यामथो शान्तिमिहानुरोद्धुम् ।
आसीत्प्रियस्त्वेकतरोऽपि पक्षः मध्यस्थता तस्य कृते तु नासीत् ।। ८३ ।।

सभासु कर्तुं च विरोधमेष निषेवितुं वा कलहं कदाचित् ।
स्वराजिनामोदृशि कार्यतन्त्रे न तद्रुचिः काचिदुदासितस्य ।। ८४ ।।
स मन्यते चेत्समितौ यियासा तदा न तत्र प्रभुताविरोधः ।
साधीयसां संरचने विधीनां कार्यन्तु सभ्यैः सरकारसाह्यम् ।। ८५ ।।
गन्तव्यमेवात्र न सत्सभासु गतेन वक्तव्यमहो सुयुक्तम् ।
स्यादब्रुवन्वापि च विब्रुवन्वा पापीति तस्याभिमतो मनुः सः ।। ८६ ।।
स्वराजिभिः किञ्चन नोररीकृतं ततोऽभवद्दुष्करमेतदीरणम् ।
तथापि गान्धिः स्वपथं समाक्लृपत् स्वराजिभिः साकमपि प्रशस्तधीः ८७
निकृत्तसूत्रं चतुराणकी च मताधिकाराय मते अभूताम् ।
स्वराजिनां कञ्चन सत्सभासु शुभाशिषां योगमदात्तटस्थः ।। ८८ ।।
जातः पृथग् राजनयाच्च गान्धिरिति स्म शिष्टिर्ब्रिटिशस्य मन्यते ।
लोकप्रियत्वं लघुतामुपैति तस्य प्रभावादिवति शास्तृवर्गः ।। ८९ ।।
दासेन पश्चात्कृत एष रङ्गतोऽग्रगोऽभवन्नेहरुरस्य साम्प्रतम् ।
तौ नायकत्वं दधतोऽधुनेति वदन्त्यहो ! पञ्चदशाब्दतोऽमी ।। ९० ।।
प्रदर्शितं च प्रतिवारमेतज्जानन्ति ते साधु न भारतीयान् ।
यदाप्रभृत्यागत एष राजनीतौ न लोकप्रियतास्य हीना ।। ९१ ।।
साधारणे लोकगण तु सेयं निरन्तरं चास्ति हि वर्धमाना ।
लोका न गान्धेरनुयान्तु कामान् भवत्यहो दुर्बलता जनेषु ।। ९२ ।।
परं मनस्स्वादरभार आस्ते लोकस्य गान्धिं प्रति वर्धमानः ।
समुत्थिता देशदशानुकूल्ये आन्दोलनेष्वत्र भवन्ति लोकाः ।। ९३ ।।
अन्यत्र तूष्णीं च भवन्ति लुप्ताः सुप्ता न ते जातु भवन्ति लोके ।
नेता न वै कौतुकवेत्रयोगादान्दोलनं चालयतेऽत्र कश्चित् ।। ९४ ।।
आसाद्य वैदेश्यदशाविशेषं लोकेभ्य आप्नोति स नाम लाभम् ।
लाभाय वा यत्नमिहातनोति नोत्पादयत्येष दशाविशेषम् ।। ९५ ।।
लोकप्रियत्वं पठितेषु गान्धेस्तत्क्षीयते वर्धते चानुवेलम् ।
उत्साहतस्ते तमनुव्रजन्ति प्रतिक्रियास्वेनमथाक्षिपन्ति ।। ९६ ।।
तदापि तेषां बृहती तु सङ्ख्या प्रह्वीभवत्यस्य पुरः समानम् ।
कार्यक्रमाद् गान्धिकृतात्किलान्यः कार्यक्रमो हन्त न वर्तते नः ।। ९७ ।।

अन्यान् श्रमोद्यादिदलान्न कश्चित्पृच्छत्यहो तत्सहोगिनोऽपि ।
आतङ्ककर्तॄन् प्रतिहिंस्रभावान् नाद्यात्र कश्चित्प्रतिभाषते च ॥ ९८ ॥
तान् व्यथितांश्चापि पुरातनांश्च पश्चाद्गतांश्चाप्यभिमन्यते ना ।
काङ्ग्रेसगा उच्चजनाः समाजवादिक्रमैश्च क्षुभिता भवन्ति ॥ ९९ ॥
वर्षे चतुर्विंशतिके च राजनीतिप्रयुक्तं विमनस्त्वमासीत् ।
ततः परं मत्पितुरत्र गान्धेर्मैत्रं पुनः प्राक्तनमेव पुष्टम् ॥ १०० ॥
परस्परं सत्यपि हार्दभेदे सद्भावनास्त्यादरभावना च ।
अस्त्यन्यतस्तत्र च कोऽपि हेतुरन्योन्यमेताविह मानयेते ॥ १०१ ॥
श्रीगान्धिलेखा निचिता 'विचारप्रवाह' ग्रन्थेऽस्य च भूमिकायाः ।
अस्मत्पिता लेखकतामुपेतः स्वहार्दमाभासयते जनेभ्यः ॥ १०२ ॥
महात्मनां वा महतां जनानां श्रुतं मया वृत्तमनेकरूपम् ।
परं न तद्दर्शनसौख्यमाप्तं शङ्का हि तेषां विषये ममास्ति ॥ १०३ ॥
अहन्तु विश्वासमुपैमि पुंसि पुंस्त्वे च वीरेऽप्यथ वीरतायाम् ।
ग्रन्थेऽत्र ये सन्निचिता विचारास्ते सन्ति पुंसः किल पुंस्त्वपूर्णाः ॥१०४॥
श्रद्धापुमर्थौ निहितौ किलात्र तौ मानवीयप्रकृतेर्महागुणौ ।
श्रद्धाविहीनः पुरुषार्थहीनः पृच्छत्यमूभ्यां भविता फलं किम् ॥१०५॥
अस्योत्तरं 'स्याद्विजयोऽथ मृत्युः' न तस्य सन्तोषकरं च भावि ।
तथाप्ययं याति विनीतवीरो व्यक्तिर्लघुर्बिभ्रदजेयशक्तिम् ॥१०६॥
स श्रद्धया चाचलयोत्थितः सन् स्वदेशजान् मातृभुवो हिलाय ।
स्वात्मानमेवार्पयितुं च कष्टं सोढुं च सन्देशमिमं ददानः ॥१०७॥
लक्षस्य लोकस्य च हृत्सु तस्य प्रतिध्वनिर्गुञ्जति बद्धमूलः ।
स्विन्वर्गपङ्क्त्या च समापयत्स्वां स भूमिकामत्र समुच्चितार्थाम् ।१०८।
न सन्ति किं नः सविधे नृसिंहाः परिस्थितीनां प्रभवः प्रशासकाः ।
व्यक्तं स गान्धि नहि साधुताया महात्मतायाश्च दृशाऽभ्यनन्दत् ।१०९॥
सोऽभूद् दृढः प्रह्वयितुं न शक्यो स आत्मशक्तिं प्रशशंस गान्धेः ।
स्पष्टाऽऽयसी काप्यबले कृशे च लघावमुष्मिन् स्फुरतिस्म शक्तिः।११०।
शिलोच्चयस्येव दृढत्वमस्मिन् शारीरिकीं जातु नमेन्न शक्तिम् ।
सा शक्तिरास्तां महती महीयस्यथो महिष्ठेति न तत्र भेदः ॥१११॥

तस्याकृतिर्मूर्तिरथार्धनग्नो देहो लधीयः किल धौतवस्त्रम् ।
किमप्यभून्नेदृशमत्र येन कश्चित्प्रभावः क्वचनापतेच्च ॥ ११२ ॥
नृसिंहता कापि च राजलक्ष्मीस्तस्मिन्नवश्यं वशिमानमानयत् ।
पुरःस्थितं यस्तु परं सहर्षमाज्ञानुवृत्त्यै विवशीकरोति ॥ ११३ ॥
सज्ञानपूर्वं समधाद्विनम्रतां स्वस्मिन्नपूर्वामभिमानिताञ्च ।
तथापि शक्तिस्त्विह साधिकारा भृताऽभवत् काप्यचलप्रतिष्ठा ११४।
मर्मेदमेष स्वगतं तु वेद कदाचिदाज्ञापयति स्म सम्राट् ।
यत्पालनीयं भवतिस्म तूर्णं शान्ते गभीरे नयने तथास्ताम् ॥ ११५ ॥
परस्य चेतोगतिमार्गिणी ते बध्नीत एवान्यजनस्य चित्तम् ।
निर्विश्य चित्ते मृदुलध्वनिर्वागाकर्षतीव प्रतिबोध्य भावम् ॥ ११६ ॥
एकोऽस्तु वा सन्तु सहस्रसंख्यास्तच्चुम्बकाकर्षणमाशु भावि ।
श्रोता भवत्येष स मन्त्रमुग्धो भावं भजत्येव च बुद्धिगम्यम् ॥ ११७ ॥
गान्धिर्न बुद्धिं स्पृशतीत्यवश्यं पूर्वं स चित्तं हरते जनस्य ।
वाग्मित्वहेतोर्न च मञ्जुवाक्यावलीससम्मोहन एकवीरः ॥ ११८ ॥
भाषा ऋजुश्चार्थवती सदासीच्छब्दैरनावश्यककैर्विमुक्ता ।
सत्यत्वमेवास्य च पारदर्शि व्यक्तित्वमुच्चं च जनं रुणद्धि ॥ ११९ ॥
स्वदर्शनेनैव जनस्य चित्तेऽनुभावयत्युच्चतरात्मशक्तिम् ।
सम्भावये तं परितः परम्परापर्यावृतिं तादृशमासुवन्तीम् ॥ १२० ॥
परम्परां तामविदंश्च तस्याः पर्यावृतेरुद्गतधीश्च कश्चित् ।
तेनाभिभूतो न भवेत्तथासौ परं प्रभावः पततीह तस्मिन् ॥ १२१ ॥
अयं चमत्कार इहास्त्यवश्यं विरोधिनः स्वाञ्जयति स्म गान्धिः ।
वाग्वज्रमस्मै यदुपानयन्ति न तत्प्रयुज्यात्र भवन्त्यशस्त्राः ॥ १२२ ॥
स्तौति स्म गान्धिः प्रकृतेः स शोभाम्, नृकल्पितां सुन्दरतामपश्यन् ।
स ताजहर्म्यं बलतो गृहीतां व्यर्थां स्म वेत्ति प्रतिमूर्तिमेकाम् ॥ १२३ ॥
स घ्राणशक्तेरपि न्यूनतायां कलां स्वरीत्याच्छंति जीवनस्य ।
कलामयं तत्परिकल्प्य धत्ते सोऽकृत्रिमं सार्थकमिङ्गितञ्च ॥ १२४ ॥
न विद्धता तत्र न वक्रतास्ति नाशिष्टता नापि लघुत्वलेशः ।
यत्रास्मदीयाः किल मध्यवर्गा दुर्भाग्यतः सन्ति, भवन्ति मग्नाः ॥१२५॥

अन्तःशमं प्राप्य शमं परेभ्यो ददाति गान्धिर्दृढनिर्भयश्च ।
पदक्रमैः कण्टकितेऽपि मार्गे स जीवनस्यैति निरन्तरञ्च ॥ १२६ ॥
स मत्पिता राष्ट्रपितुस्तु भिन्नो व्यक्तित्वमस्मिन्प्रभुताऽपि चासीत् ।
स्विन्वर्गपङ्क्तिस्तमपि स्म नौति, सोऽभूत्समाजे विविधेऽपि केन्द्रम् १२७।
न्यायाधिपेनाङ्ग्लमहाशयेनैकेनोक्तमासीन्मम पूज्यपित्रे ।
यत्रापि गत्वोपविशत्ययं वै तत्रैव मुख्यो भवतीति वाक्यम् ॥ १२८ ॥
न नम्र आसीन्न मृदुस्तथासीत् गान्धेः प्रतीपः प्रतिपक्षमर्दी ।
असम्मतानां विषये कठोरो न स क्षमां तेषु कदाचिदाधात् ॥ १२९ ॥
निजं स्वभावं च स राजतुल्यं हठादनुध्यायति सन्ततं सः ।
आकर्षणस्यैव स गोचरोऽभूत्तिरस्कृतेरेव च कस्यचित्सः ॥ १३० ॥
न कोऽप्युदासीनतटस्थभावं तस्मिन् भजत्यारुचितोऽरुचेर्वा ।
विशालभालस्तरलाधरोऽसावासीच्च सुश्लिष्टहनुः सुरूपः ॥ १३१ ॥
आश्चर्यशालास्विटलीगतासु या रोमसम्राट्प्रतिमूर्तयोऽर्द्धाः ।
तस्याकृतिस्ताभिरभूत्समाना तत्रत्यमित्रैरपि गीतसाम्या ॥ १३२ ॥
विशेषतो जीवनपश्चिमेषु वर्षेषु शीर्षासितकेशपूर्णः ।
शालीनतां कामपि भव्यताञ्च सोऽधादिदानीं क्वचनैव दृश्याम् ।१३३।
शिरस्तु मेऽमुच्यत मध्यकेशैः पितुस्तु केशा अभवन् स्थिरास्ते ।
जानाम्यमुं तं प्रति पक्षपातं परन्तु सभ्या स्म्रियतेऽस्य सत्ता ॥ १३४ ॥
अहं किल स्वं परितस्तदीयामाश्चर्यशक्तिञ्च महाप्रतिष्ठाम् ।
गवेषयामीह वृथैव मोहात् क्वासौ क्व चाहं तुलयामि कस्मात् ॥१३५॥
वर्षे चतुर्विंशतिके तु गान्धि प्रत्यैषयं किञ्चन तातचित्रम् ।
स्वराजिभिः साकममुत्र काले गान्धेरभूत्काचन रज्जुकृष्टिः ॥ १३६ ॥
न श्मश्रुणी चाभवतां तु चित्रे सुश्मश्रु दृष्टं समभूत्तदास्यम् ।
इति स्म तद्विस्मयकारि जातं गान्धिश्चिरं चित्रमपश्यदेतत् ॥ १३७ ॥
अश्मश्रु चास्यं च हनूश्च काञ्चित्कठोरतां प्राकटयत्पितुर्मे ।
शुष्केन हास्येन हसन् स चाह ज्ञातं मया केन समं नियोध्यम् ॥ १३८॥
इहाक्षिणी चाविरतश्च हासो गान्धेर्मुखे या व्यदधुः सुरेखाः ।
तास्तन्मुखस्याश्लथयन्दृढत्वं तथापि नेत्रे तु चमत्कृते ते ॥ १३९ ॥

हंसस्य चाम्भस्तरणेन तुल्यं संसत्कृतीनां करणं पितुर्मे।
तन्न्यायविज्ञानविधानबोधानुरूपमासीदनुकूलमस्य ॥ १४० ॥

स ह्यस्य खेलस्य विधेर्विधानैः सम्यक्प्रतीतैरनुशासनं स्वम्।
दले,स्वकीये त्ववतिस्म चान्यान् स्वराजिनां साह्यविधावयुङ्क्त।१४१।

परन्तु तूर्णं स्वजनैः कृतानां स आपदां सम्मुखतामयासीत्।
स्वराजिवर्गेण हि काङ्ग्रेसानुगैः समं कैश्चन योध्यमासीत्॥ १४२ ॥

कांग्रेसशक्त्यै परिवर्तना ईदृग्जनास्तत्र भृता अभूवन्।
निर्वाचनं तत्र किलाभ्युपेतं यदर्थमर्थो बहुरर्थ्यते स्म॥ १४३ ॥

अर्थः किलार्थोऽर्थवतां समाजादतः प्रसाद्याः प्रसभं जनैस्ते।
तेषां च केचित्किल प्रातिनिध्यं स्वराजिवर्गस्य कृतेऽपि नेयाः॥१४४ ॥

अमेरिकासम्भवसाम्यवादी स कोऽप्यगादीच्चयनातिकष्टम्।
निर्वाचने निर्धनतो मतस्य धनस्य कार्याधनितश्च याच्ञा॥ १४५॥

आश्वासनं चोभयतः प्रदेयमन्योन्यतो वः प्रतिरक्षयिष्ये।
इत्यस्ति निर्वाचनकर्मनिष्ठो दुर्वारणो विप्रतिषेध एकः॥ १४६ ॥

इतीदृशैर्हेतुभिरेष वर्गः सुदुर्वलः पूर्वत एव जातः।
सभासमित्योरनिशञ्च कार्यः परैर्दलैराग्रहिलैश्च सन्धिः॥ १४७ ॥

अस्माच्च हेतोर्दृढभावनायां सिद्धान्तरूपे च नहि स्थिरत्वम्।
शनैः शनैर्वर्गगतानुशिष्टिः कार्यप्रकारश्च विकारमायात्॥ १४८ ॥

सभ्याश्च तस्या बलिनश्च दक्षाः काठिन्यमुत्पादयितुं सचेष्टाः।
स्वराजिवर्गास्फुटघोषणाभिर्गताः सभायाः प्रभुतां विरोद्धुम्॥१४९ ॥

अन्येऽपि शक्ताः किल खेलमेनं सङ्क्रोडितुं किन्त्विह सर्वकारः।
स्वराजिषूत्पाद्य मिथो विरोधं खेलेऽत्र निर्णीतिमशात् प्रदेष्टुम्॥१५०॥

दलस्य सभ्येष्वथ दुर्बलेषु नानाविधास्ताः सुविधाः प्रयुक्ताः।
उच्चैः पदानामथवा प्रलोभः सभ्यैस्तयोरेकतरं विचेयम्॥ १५१ ॥

तेषामथो योग्यतया विवेकशीलत्वमाचार्यकमत्र नीतौ।
इत्यादयो भूरिगुणाः प्रशंसास्पदत्वमीयुः सुखदाः समन्तात्॥ १५२ ॥

आनन्दवातावरणे स्थितास्ते समन्ततः शासकवर्गक्लृप्ते।
न यत्र कोलाहल आपणस्य न यत्र च क्षेत्ररजोऽभिषेकः॥ १५३ ॥

स्वराजिनां स स्वर आस्त मन्दो केचित्कुतश्चित् समितेः प्रदेशात् ।
सत्रुविपक्षं प्रति लोभनष्टाः पिता ममागर्जदभाषतोच्चैः ।। १५४ ।।
'छित्त्वा क्षिपाम्यङ्गमहं सदोषं परं यदा तत्स्वयमेव देहात् ।
पृथग्भवेत्तर्हि न भर्त्सनायास्तस्याः किमप्यत्र फलं भविष्णु ।। १५५ ।।
इतीदमादौ तिलकेन लोकमान्येन चार्थान्तिरतः प्रयुक्तम् ।
परन्त्विदानीं समयेऽनुकूले पदं प्रगृह्यं च फलं तदीयम् ।। १५७ ।।
इतीह मन्वानजनस्तदर्थे, विश्वासघातेऽपि गतैरमीभिः ।
स्वराजिवर्गे चलति स्म कार्यं घृणा तु दासस्य पितुश्च जाता ।।१५८।।
सभासमित्योर्विफलं स्वकर्म यतः प्रतीतं तत उद्विजेते ।
उद्वेगवृद्ध्यै च तयोरिहाभवद्वैरं मिथोहिन्दुषु मुस्लिमेषु ।। १५६ ।।
कांग्रेसिकाः केचन चैकविंशे येऽस्माभिरीयुः सह बन्दिगेहम् ।
प्रादेशिकीं शिष्टिमधि प्रपन्ना ये मन्त्रिभावं पदमुन्नतं वा ।। १६१ ।।
तदाऽभवन्नः किल कोऽपि गर्वो वयं स्म शिष्ट्या विदिता अवैधाः ।
इति प्रदिष्टा इह बन्दिभावं यस्याः सदस्या अभवन् पुराणाः ।। १६२।।
भविष्यतीयं पुनरस्ति तुष्टिः क्वचित्प्रदेशे सहयोगिनस्ते ।
अवैधताघोषणया सहास्मान् प्रवेशयिष्यतिच वन्दिगेहम् ।। १६३ ।।
ते मन्त्रिणस्तत्समितेः सदस्याः नूत्ना अभूवन्निपुणा मतेभ्यः ।
तेऽस्मांश्च तां दुर्वलताञ्च वुद्ध्वाऽजानन्कथं नोऽस्तुच लाभकृत्वम्१६४
तेऽस्मत्क्रियारीतिषु यूथपेषु मनोरथेष्वप्यभवन्नभिज्ञाः ।
अन्यत्र यानाच्च पुरो निषिद्धैः समैश्च तैः क्रान्तिदलेऽप्यमेलि ।। १६५ ।।
कांग्रेसिकानां निजपूर्वसार्थविनिग्रहेऽतिक्षमता समेतम् ।
पुराणशासित्रनुशासकेभ्यो ज्ञानं मयोक्तुयदलभ्यमस्ति ।। १६६ ।।
दिसम्बरेऽभूदथ काङ्ग्रेससम्मेलनं तत्र च बिल्वग्रामे ।
सभापतिश्चात्र बभूव गान्धिः सभापतीनामपि सोऽभवत्पतिः ।। १६७।।
प्रधानभावेन तु तस्य भाषणं नारोचतैवात्र परन्तु मह्यम् ।
स्फूर्तिर्न तस्मात्कलिता हि काचित् तद्वाक्यतो मन्त्रिपदं किलापम् १६८
रुग्णः पिता चोष्मणि पञ्चविंशे श्वासोऽतिकष्टाय बभूव तस्य ।
हिमालयेऽसौ डलहोजिमार्गात् साकं कुटुम्बेन तमन्वगाञ्च ।। १६६ ।।

यात्रां तदन्तर्डलहोजितोऽथ चम्पान्तमेतं कृतवन्त आस्म।
जूनाह्नि चम्पां क्वचिदागताः स्मस्तदागतं तत्र तु तारत्रम् ॥ १७० ॥
श्रीदेशबन्धोर्निधनं ततश्च विज्ञाय शोकेन पिताऽऽस्त सन्नः।
नोवाच शब्दं कमपि व्यथेयं तस्मै किलासीददया नितान्तम् ॥ १७१ ॥
नाहं कदाचित्तमपश्यमेवं दुःखातुरं स्वानुपमप्रियेण।
मिश्रेण मुक्तः सहसा हि सोऽभूत् भारं च सर्वं प्रतिरोप्य तस्मिन् ॥१७२॥
संवर्धमानोऽभवदेष भारः क्षोभस्तयोश्चाखिलदुर्बलत्वात्।
फरीदपुर्यां किल देशबन्धोः श्रान्तस्यतद्भाषणमन्त्यमासीत् ॥ १७३ ॥
अन्येद्युरेते परिहायचम्पां प्रातः प्रविष्टा इह एव पश्चात्।
क्रमेणडलहोजिमथापि रेलं ततः प्रयागं कलिकात्तिकाञ्च ॥ १७४ ॥

श्रीगुरुचरणदासस्वामिचरितामृतनिबन्धनबन्धुरा
यल्लेखनीप्रथितामुना कविना प्रणीते मञ्जुले।
श्रीमज्जवाहरलालनेहरु चरितकाव्ये सर्गको-
ऽसौ'मत्पिता राष्ट्रपिता च' नाम्नाष्टादशोऽयं निर्गतः।

साम्प्रदायिकताप्रवाहः

हरिगीतिका

एकोनविंशः सर्गः

नाभागकारागारतः प्रत्यागतोऽहं शैत्यके
रुग्णोऽभवं, युद्धं तदासीत्सावधिज्वरशत्रुणा ।
शारीरिकं कार्श्यं ज्वरो वा माऽक्षिपत् शय्योपरि
तस्मादहं तादृक्स्वभावो नाभवं नैवाभवम् ॥१॥
स्वास्थ्यगर्वो विश्रुतो मे, यश्च भारतवासिनां
रुग्णत्वभुग्नत्वस्वभावोऽसौ न मे रोचततराम् ।
स्वस्थं शरीरं यौवनं चाश्रित्य रोगे प्राभवम्
यातेऽपि चास्मिन् कार्श्यतः शय्यामहं चिरमाश्रयम् ॥२॥
स्वास्थ्यं ममाभूत्तच्छनैरेभिर्दिनैर्निजपार्श्वगाद्
वस्तूच्चयादथ नित्यकार्यात्कर्मतन्त्राद्‌भूतम् ।
वैराग्यमनुभूतं मया ताटस्थ्यतो दृष्टं जगत्
गाढाच्च काननतो बहिर्निर्गत्य च स्थितम यत् ॥३॥
मस्तिष्कमिह यादृङ् ममाभूत्स्वच्छमथ शक्त्या भृतं
तादृङ्न पूर्वमभूत्कदाविन्नूत्नमनुभूतं मया ।
दीर्घकालिकरोगमुक्तैः स्यात्तथान्यैः सुविदिता
मम कृते तावत्प्रतीताऽऽध्यात्मिकी तदियं दशा ॥४॥
आध्यात्मिकीति पदं मया संकीर्णधर्मे नोदितम्
एषानुभूतिः खलु ममान्तः सर्वथा प्राभावयत् ।
राजनैतिक-भावनामय-वायुमण्डलतोऽस्म्यहं
दूरमुत्थित इति मया त्वनुभूतमस्मिन्नवसरे ॥५॥
ध्येयैश्च शक्तिभिरत्र यैर्याभिश्च राजनयाध्वनि
प्रेरितोऽहं तानि ताश्चालोकयं ताटस्थ्यतः ।
स्पष्टदर्शनतश्च तस्मादुत्थिता मम मानसे
तर्का वितर्का नैकरूपा ये मया न समाहिताः ॥६॥

किन्तु जीवनराजनीत्योर्धर्मदृष्ट्या दर्शना-
दनुदिनं जातो विरुद्धो नात्र बहु वक्तुं क्षमः।
व्यञ्जितुं शक्यो मयासौ ऋजुतया नाभूत्परं
एकादशाब्दीपूर्वजातस्यास्य संस्कारश्चिरात् ॥७॥

किन्त्वियत्सम्यक् स्मृतिं मे स्पृशति यत्तस्याः स्थिते-
र्मम विचारणपद्धतौ मयि चाभवद् गहनः प्रभावः।
द्वित्रांश्च वर्षान्यावदेष विशेषतः कुत्रापि सीमनि
सर्वं स्वकीयं कार्यजातं विहितवांस्तु तटस्थवत् ॥८॥

निःसंशयं चैषा स्थितिः स्वाभिर्मद्युमबाह्यगाभिः
समभवद्घटनाभिरासं यासु नाहमलं क्षमः।
चर्चामकार्षं राजनैतिकतत्परीवर्तास्पदं
चासीत्ततोऽपि महत्त्वभाक्सा हिन्दुमुस्लिमविक्रिया ॥९॥

या किलोत्तरभारते समदर्शयत्स्वीयं प्रभावं
समभवन्बहवो हि तस्मिंस्तेषु कलहोपद्रवाः।
येषु सीमान्ते पशुत्वक्रूरते परिदर्शिते ये
सन्देहरोषमयेन वातावरणकेनोत्पादिते ॥१०॥

जातु नाम न नाम येषां प्रायशो वयमत्र श्रृण्मः
कलहजनकः पूर्वमासीद् गोवधो वक्रेन्दु(बकरीद) काले।
हिन्दुमुस्लिमपर्वणां समुपस्थितिः किल वैमनस्यं
जनयति स्म यथा मुहूरम-रामलीलासंगतत्वम् ॥११॥

अस्मारयद् दुःखदकथां हि मुहूरमो यस्मिन् स्रव-
न्तिस्माश्रुजाला मुस्लिमानां प्राक्कथाजनितव्यथाभिः।
रामलीलाऽऽनन्दपूर्णं पर्व चास्ते यत्र पुण्यं
पापवृन्दं जयति, तेन च हृष्यति स्म मनो मदीयम् ॥१२॥

नोभे मिथःश्लिष्टे सदैते किन्तु वर्षत्रयमतीत्य
श्लिष्यतः स्म मिथः कदाचित् सूचयन्ती जनसुभाग्यम्।
रामलीला हिन्दुतिथितः शुक्लदशमीमाश्विनस्य
मान्यते च मुहूरमोऽयं मुस्लिमानां भिन्नमासे ॥१३॥

किन्त्विदानीं कलहहेतुर्जनित एष सदोद्यतो यो
मसजिदानामग्रतो वाद्यप्रयोगो धर्ममूलः ।
मुस्लिमाः पूजाक्षणे बाद्यध्वनिं न मनाक् सहन्ते
तेन तेषां वन्दनायां मन्वते ते विघ्नपातम् ॥१४॥

प्रतिपुरं मसजिदमनेकं,येषु पूजा पञ्चवारं
प्रतिदिनं क्रियते हि मुस्लिमबन्धुमिस्तु नमाजनाम्नी ।
तत्र शोभायात्रिका वरयात्रिका वा यूथयात्रा-
कलकलं कोलाहलं वाद्यप्रयोगैर्वा करोति ॥१५॥

इति कलहशङ्का निरन्तरमेषु सैव जजागरीति
मुख्यतो मसजिदपदे सायं नमाजावधिप्रवृत्तौ ।
यूथयात्रा वर्तमाना वाद्ययोगं यदि विधत्ते
तेन कोलाहलविशेषादापदुत्तिष्ठति मितान्तम् ॥१६॥

अथ विशेषादत्र काले हिन्दुमन्दिरवृन्दमध्ये
कुर्वतां नीराजने किल शङ्खघण्टारवमवश्यम् ।
हिन्दुभक्तानां विरोधो मुस्लिमैः क्रियते नितान्तम्
मन्दिरेष्वार्तिकत्थो धारयत्यतिभीष्मरूपम् ॥१७॥

आश्चर्यमत्याश्चर्यमेतद् यत्समाधातुं सुशक्यम्
रक्षयद्भिर्भावमन्योन्यं विधाय तु कालभेदम् ।
तस्य हेतोरीदृशीमन्ये न कटुता तत्र जन्ये-
दातिमात्रं शात्रवं कटुकलहजनयितृ कष्टम् ॥१८॥

साम्प्रदायिक एष जोषस्तर्क एष विचार एषः
ध्यानमेतत्खलु मिथः सम्बन्धमाश्रयते न कञ्चित् ।
किन्तु तदुभयशासको वर्गस्तृतीयस्तौ विरोद्धुं
प्रेरयत्यतिसुकरमनयोर्जोशरोषोत्तम्भनाद्यम् ॥१९॥

उत्तरेऽस्मिन् भारते स्वल्पेषु नगरेषूत्थितानां
साम्प्रदायिक विग्रहाणां दीयते बहुधा महत्त्वम् ।
येषु नगरग्राममण्डलकप्रदेशेषु न्यवात्सुः
हिन्दुमुस्लिमकाः सुशान्ताः संवसन्ते संवदन्तः ॥२०॥

तेषु नैषां विग्रहाणां प्राभवत्स्वल्पः प्रभावः
किन्तु वृत्तान्तीयपत्रैः सर्वथा साधारणानाम् ।
अप्यमीषामतिमहत्या संप्रकाशनसुप्रसिद्ध्या
नागरिकजनमानसेऽप्येतद् भृतं कटुवैमनस्यम् ॥२१॥
साम्प्रदायिकनेतृभिः शीर्षस्थितैरेतद् विबृद्धं
साम्प्रदायिकराजनैतिकयाचनाकटुताञ्च नीतम् ।
ईदृशैः कलहैश्च मुस्लिमनेतृभिः स्वमताहवाग्रह-
दुर्ग्रहैः प्रतिगामिदलगै राजनीतेरपगतैस्तैः ॥२२॥
असहयोगान्दोलनेषु च वर्षपूगैः कोणसंस्थैः
पृष्ठनिष्ठैरेत्य बहिरेतत्प्रतीकारे च साह्यम् ।
विहितमधिकाः प्रस्तुता एतैश्च नूतनयाचनास्ता
भारतस्यैक्यं तथात्मस्थितिमिमां निघ्नन्ति लक्ष्यम् ॥२३॥
हिन्दुप्रगतितो याः प्रतीपास्तदधिकृतिरक्षासु लग्ना
नेतृतामवलम्ब्य ये सरकारपुत्तलिका भवन्ति ।
तेऽत्र यद्यदुपेयमाप्तुं यत्नमाकलयन् न तेषां
किञ्चिदपि ते प्राप्तवन्तो नाप्नुयुर्वा तैरुपायैः ॥२४॥
साम्प्रदायिकनेतृभिस्तैः सम्प्रदायहितं न सिद्धम्
केवलं जातीयविद्वेषस्य विस्तारः प्रणीतः ।
कांग्रेसमसमञ्जससमुद्रे मग्नमेषां चेष्टितैस्तैः
स्तद्धि राष्ट्रियभावनानां प्रतिनिधित्वमभूद्प्रधानम् ॥२५॥
एकसिद्धिः सर्वसिद्ध्यै जायते भुवि मानवाना-
मिति विचार्यैतन्न नानालक्ष्यसाधनलग्नमभवत् ।
साम्प्रदायिकवैमनस्यस्याभवत्तस्मिन् प्रभावः
छद्मकांग्रेसीयाश्च केचित्सम्प्रदायहृदोऽप्यभूवन् ॥२६॥
कांग्रेसनेतारस्तु धीरा दृढतरा अभवन्सुवीरा-
स्ते न कस्मिंश्चित्कदाचित्पक्षपातमगुः कुतश्चित् ।
हिन्दुमुस्लिमयोर्न केवलमन्यमतवादेऽल्पसंख्या-
नामिदानीमीसवीयैः सह सिखानामपि च पक्षे ॥२७॥

जातयो ह्यत्राल्पसंख्या आग्रहात्याग्रहसमेता
याचना नाना पुरस्कृत्यात्र सिद्धयै प्रोद्यतन्ते ।
अस्यानिवार्या परिणतिः समभूद्यथा ते हिन्दुमुस्लिम-
पक्षगासउभयेऽतिवादः काङ्ग्रेसमुपालभन्ते ॥२८॥

बहुदिनेभ्यः प्राक्च सहयोगे किलोपक्रान्तमात्रे
हिन्दुमुस्लिमयोः समस्यां किल समाधातुं स गान्धिः ।
युक्तिमदिशत्-सोऽत्र यद्यत्साध्यते सैषा समस्या
'यदि बृहज्जातिःकिलोदारा च सद्भावानुगा स्यात् ॥२९॥

इति स मन्वानोऽत्र मुस्लिमयाचनाः सर्वास्तु मेने,
तैः सह व्यापारमल्पं कर्तुमपि नायं किलैच्छत् ।
अपितु तान्निजपक्षगान् कर्तुं सदैवायतत गान्धिः
सोऽवधार्यहि वस्तुमूल्यं दूरदर्शितया प्रवृत्तः ॥३०॥

किन्तु ये प्रतिवस्तुमूल्यज्ञानिमन्याः सन्ति चान्ये
ते किलापणभावतो व्यापाररीतिषु समलगन्वै ।
ते व्ययं पश्यन्ति तं यो वस्तुनः क्रयणे प्रदेय-
स्तेऽत्र पीडामनुभवन्तः क्रीतवस्तु तु नाद्रियन्ते ॥३१॥

सुकरमितरालोचनं सुलभञ्च दोषारोपणं
परहेतुकथनं च स्वदर्शितरीतिवैफल्ये सुखम् ।
नापरध्यति नो विचारो वा प्रयासोऽनुक्तपूर्वो
ज्ञानपूर्वकमन्यजनविघ्नावपातनमेव तदिदम् ॥३२॥

वयमिमं दोषं वदामः साम्प्रदायिकनेतृगम्यं
सर्वकारगतञ्च, तेऽस्मद्दोषमेव वदन्ति चैनम् ।
सत्यमस्मन्मार्गबाधां सर्वकारानुगतयेमे,
ज्ञानपूर्वकमेव प्रस्तरपातनेन किलासृजन्ति ॥३३॥

सत्यमेतद् ब्रिटिशसरकारः पुरापि च साम्प्रतम्
कार्यनीतिमधिश्रितोऽस्मासु स भेदकरीं सदा ।
भेद्यतामथ शास्यतामिति रीतिरस्ति हि विश्रुता
सर्वतः साम्राज्यवादिजनस्य सफलत्वं श्रिता ॥३४॥

मात्रयाऽत्र यया सफलतां नीतिरेषाऽभ्यश्नुते
तत्तया रोहति हि शोषितवर्गमूर्धनि शासनम् ।
नात्र दोषारोपणं नो नापि कश्चन विस्मयः
स प्रमादोऽस्माकमवहेलाऽव्यवस्थाकारिणाम् ॥३५॥

कां व्यवस्थां वा वयं बिदधाम भेदविधाविहाऽऽ-
स्ते च निश्चप्रचमिदं वणिजामिवैषा व्यापृतिः ।
तत्क्रमेण च कार्यंकरणं कमपि लाभं नाप्नुता-
ऽस्माभिरधिकादधिकमपि दत्तं न योगक्षेमकृत् ॥३६॥

उच्चतोऽप्युच्चामिहास्मद्वाचमल्पयितुं तृतीयो
वर्ग आस्ते यः किलोच्चतमां गिरं वक्तुं समर्थः ।
याञ्च वक्ति गिरं स सत्यापयितुमपि शक्नोति ता-
मस्ति पृष्ठबलं हि तस्य स्वयमयं विक्रयकरः ॥३७॥

राष्ट्रियं सामाजिकं यदि दृष्टिकोणं नाश्रिताः स्मः
तर्हि तुल्यबलं न शत्रुं तमभियातुमलं भवामः ।
यदि वयं साम्प्रतिकमार्थिकमेव नैतिकमेव कल्पं
संश्रिताः परिवृत्तिमस्मिन् शोधनं वान्वाचरामः ॥३८॥

भारतीयीकरणमेतत् शिथिलयति नः संप्रहारे
वास्तविकमुत्तेजनं न प्राप्नुमः सम्भूय याताः ।
यत्र नूनं लक्ष्यमस्माकं किलैकं शिष्यते यद्
यच्च लब्धं तत्पुरा परिवेषणीयं प्राप्तृवर्गे ॥४६॥

अत्र तत्परिवेषणेऽस्मासु प्रभवतीत्थं तृतीयो
वर्ग एष किलानिवार्यतया प्रभावधृतप्रवाहः ।
यं पुरस्कर्तुं स इच्छति येन तस्मै तत्प्रयच्छति
मौनमन्ये संश्रिता अनयं नयं वा तं सहन्ते ॥४०॥

किन्तु रूपान्तरतया यदि राजनैतिककल्पचिन्ता
स्यात्ततोऽप्यधिका च सामाजिकपृथक्कल्पानुचिन्ता ।
तर्हि संयुक्ताभ्युपायस्यासितुं किल भूमिकां ता-
मतिदृढां वयमत्र काञ्चन शक्नुमो नूनं कथञ्चित् ॥४१॥

तत्तले स्वातन्त्र्ययाञ्चाया विचारश्चेष्टते यः
सोऽयमासीदिति वयं सहगान् जनाननुभावयेम ।
वर्तमानाया व्यवस्थाया न केवलभारतीयं
संस्करणमस्माकमिष्टं यस्य पृष्ठे ब्रिटिशशिष्टिः ॥४२॥

स्यादिहौपनिवेशिकं यन्नः स्वराज्यं, नास्य लब्ध्यै
युध्यते भिन्नस्य तस्माद्राजनैतिककल्पमात्रे ।
नात्र शङ्का राजनैतिक्यात्मतन्त्रतयाभिप्रेतं
तादृशं स्वातन्त्र्यमिच्छामो वयं चविनैव युद्धात् ॥४३॥

सर्वसाधारणजनस्य कृते न तस्मिन् किञ्चिदधिक
चार्थिकं सामाजिकं परिवर्तनं स्यात् संनिविष्टम् ।
किन्तु यार्थिकनीतिराङ्गलदेशकोषैश्चाल्यते सा
या च मुद्रास्फीतिराद्रियते निरूप्येतेह सेयम् ॥४४॥

तन्निरोधे स्यात्सुकरमास्माकसामाजिकमशेषं
कल्पमिह परिवर्तितुं ध्रुवमिति तथाहमचिन्तयम् ।
अद्य तत्परिवर्धयामि न राजनैतिकमात्मतन्त्र्यं
प्राप्स्यते तदिहैकलं सामाजिकं चानेष्यतीदम् ॥४५॥

किन्त्वमी सामाजिकत्वं राजनैतिकतां च नीताः
नायका नः किल निजे लौहे चतुष्कोणीयकोष्ठे ।
साम्प्रदायिकतां स्वराज्यायत्ततां दधतीं समस्यां
संकुचितसीमनि सदैवाचिन्तयन्निति निश्चितम् ॥४६॥

किन्तु दृष्टिः सर्वदैषा राजनीतिसमाजयोः
कल्पयोरेव स्थिराभूदिति पराजीयन्त एते ।
ब्रिटिशशिष्टयास्तत्र तस्या आस्त पूर्वं तत्प्रभुत्वं
किन्त्वमी वै तदतिरिक्तं किमपि कर्तुं नालमभवन् ॥४७॥

ते हि साक्षाद् युद्धयोगेऽप्यत्र नासन् क्रान्तिकारा
मुख्यतः संस्कारवादिविलोचनेन विलोकयन्तः ।
निर्गतः कालश्च यत्राभूत्तथा भारतगतानां
राजनैतिक-जातिगत-बैत्तिकसमस्यानां समाधिः ॥४८॥

आसीदपेक्षा साम्प्रतं च क्रान्तिकारिदृशा विधेया
योजनास्ताः क्रान्तिकारिभिरस्त्युपायैः पूरणीयाः ।
किन्तु तेषु न कोऽपि नासीद्योऽनुरुन्ध्येत्तामपेक्षाम्
कर्म कुर्याच्चाभ्युपायः क्रान्तिकारिजनोपदृष्ट्या ॥४९॥

निश्चितं स्वाधीनतासङ्ग्रामकेऽस्मिन् ध्येयगतया-
ऽऽदर्शगतया साम्प्रदायिकविषमुपात्तं न्यूनमत्या ।
न स्वराज्येन स्वराज्यार्थेन वा युद्धेन कांश्चित्
नैव जनतानित्यजीवननैकविधबन्धानपश्यत् ॥५०॥

तैर्नियुद्धं यत्र तत्र यदा तदा सहजस्य बुद्ध्या
किन्तु दुर्बलमायुधं नः कुण्ठितीकर्तुं सुशक्यम् ।
अन्यतः कार्यान्तरेष्वपि तत्प्रयोगोऽभूद्विधेयो
नात्र तर्को वा विवेकस्तत्प्रतीकारे न कष्टम् ॥५१॥

धर्मनाम्ना यातना एता उपोद्बलिता अभूवन्
सम्प्रयुक्ताश्चेति पुनरपि विस्मयावहमेतदखिलम् ।
हिन्दुमुस्लिमयोस्तु मध्यमवर्गतो धर्मैकदृष्ट्या
तेषु कार्येष्वपि च याच्ञा सास्त जनसंवेदनाभिः ॥५२॥

जनतया वा निम्नमध्यमवर्गयाऽपि तया न तेषां
कोऽपि सम्बन्धः किलाभूदर्जिता तैः समनुभूतिः ।
यापि जातिर्याचनां जातीयरूपां प्रस्तवीति
प्रायशः शोधे कृते सा किङ्करत्वस्यैव सिद्ध्यति ॥५३॥

किङ्करत्वं तत्पुनः प्राप्नोति मध्यमवर्गमध्ये
शेखरस्थः कोऽपि लोकः पूर्णमुष्टौ वर्तमानः ॥५४॥

किन्तु याच्ञैषापि कांश्चिन्निजकृपापात्राणि कर्तुं
प्राप्स्यते सत्तात्र काचित्स्थायिनी वाऽस्थायिनी वा ।
ईदृशीभिर्याचनाभिर्लघुभिरासीदधिकमधिकं
मध्यमश्रेणीषु कस्यचिदेव कुहचित्कोऽपि लाभः ॥५५॥

किन्तु ताभिः प्रायशो राष्ट्रियसमुन्नतिमार्गमध्ये
नवनवा बाधा समुदपद्यन्त नूनं चैकताध्वनि ।
हन्त, चातुर्येण याच्ञास्ताः स्वधार्मिकसम्प्रदाये
मांसपिण्डमिवोपदर्श्य दिगम्बरत्वमिवावरीतुम् ॥५६॥

इत्थमासन् राजनीतेर्ये जनाः प्रतिगामिनस्ते
साम्प्रदायिक-जातिगत-नेतृत्वरूपमिहारुरूपम् ।
राजनैतिकक्षेत्रमायत् कार्यशतमपि यत्त्वकुर्वन्
तन्न जातिकपक्षपातादपि तु राजनयावरोधात् ॥५७॥

राजनैतिकवस्तुषु त्वासीदमीभ्यः सर्वदैतद्
रोधसम्भावनमहो बत, खेददासीद् दुर्दशेयम् ।
तत्स्वराज्यविरोधहेतोः शूलवद् दुःखाकरं नो
मुस्लिमैर्नेतृभिरिहाधिकमेव चित्रं विहितमुक्तम् ॥५८॥

भारतस्वाधीनतायां भारतस्य च राष्ट्रियत्वे
काप्यपेक्षा नास्त तेषामिति किलाभाति स्म तर्हि ।
हिन्दुजातिकनायका यद्यपि प्रवदन्ति साक्षात्
राष्ट्रियत्वं किन्तु तेषां तेन नासीद् बन्धलेशः ॥५९॥

वास्तविककार्यं हि कर्तुं न क्षमास्ते ब्रिटिशशिष्टिं
सम्प्रसादयितुं प्रयत्नानाचरन्मोघाननेकान् ।
हिन्दुमुस्लिमनायकास्ते साम्यवादं चान्यदृष्टया
सत्यनाशकदुष्प्रयत्नान् सर्वदाऽनिन्दन्ननेकान् ॥६०॥

स्थापितस्वार्थेषु बाधाकरमशेषं प्रस्तुतं प्रति
सम्मतिस्तेषामिहाभूद् दर्शनीयाऽऽश्चर्यहेतुः ।
मुस्लिमानां नेतृवर्गो बह्वयासीद् बह्वकार्षीत्
राजनैतिकमार्थिकं स्वातन्त्र्यमानैषीद्विकारम् ॥६१॥

व्यक्तिगतसामूहिकाभ्यां तं स्वरूपाभ्यामुभाभ्यां
जनतया शिष्ट्या किल व्यवहारमेवंविधमकार्षम् ।
येन किञ्चिद्गौरवं तेषामरक्ष्यत किन्तु हिन्दू-
नेतृवर्गस्तादृशं किञ्चिन्नहि त्वारादकार्षीत् ॥६२॥

मुस्लिमा बहुधाऽभवन् कांग्रेसमध्ये भूरिसङ्ख्याः
येषु योग्या व्यक्तयोऽप्यभवन्प्रसिद्धा भारतेऽस्मिन् ।
सर्वतो लोकप्रियास्ते राष्ट्रियं मुस्लिमदलं स्वं
स्थापयित्वा जातिगतदलतो न तेऽपि विरोधमैच्छन् ॥६३॥

पूर्वमेषामत्र कार्ये किमपि साफल्यं प्रणीतम्
पठितलिखिता मुस्लिमाः प्रतिभान्ति यावत्तेन साकम् ।
किन्तु सर्वे मध्यमश्रेणीगताः सन्त्युत्तमास्ते
नैषु कोऽपि च नायकोऽभवदेकसंख्यतया समर्थः ॥६४॥

स्वस्वकार्ये तेऽलगन्निति सर्वसाधारणजनानां
भज्यते सम्बन्ध एभिर्नैव ते हि गतास्तदन्ते ।
स्वच्छभवनेषूपविष्टास्ते हि गोष्ठीं कल्पयन्तः
स्वीकृतेरथ निश्चितेरन्योन्यमेते क्रममकुर्वन् ॥६५॥

जातिनेतारोऽग्रखेले तानतीताः पटुतरास्ते
राष्ट्रियान्मुस्लिमजनांस्ते मन्दमन्दमितो हरन्तः ।
येषु सिद्धान्तेषु सुदृढास्तेऽभवंस्तेभ्योऽपि चैतान्
मोचयन्तस्ते शनैश्च शनैरि मानाकर्षयन्त ॥६६॥

नेऽपि चाग्रगतस्य दुष्करमेव प्रत्यावर्तनं स्यात्
इति मनस्यवधाय गमनाद्विरतिमुपयान्तो निवृत्ताः
अल्पदोषस्वीकृते रीत्या निजस्थितिपोषणार्थम्
प्रायतन्त परन्तु ते पश्चाद् गताः पश्चादभूवन् ॥६७॥

अल्पदोषस्वीकृतेरितरात्मदोषस्वीकृतिं ते
कर्तुमिव विवशा अभूवंस्तत्फलं चाभवदिहान्ते ।
किमपि तेषां नावशिष्टं यत्स्वकीयं ब्रूयुरेते
आश्रितेषु च सर्वसिद्धान्तेषु चैक इहावशिष्टः ॥६८॥

एष सिद्धान्तश्च तेषां जातिगत आधार आस्ते
सम्मिलितनिर्वाचनाख्योऽसौ किलाल्पदुषाभ्युपेतः ।
येन तेऽग्निपरीक्षणादस्माद्विनिर्गत्यापि तत्र
त्यक्तुमाधारं पराधीना अभुः सिद्धान्तहीनाः ॥६९॥

यांश्च सिद्धान्तानथाचरणं च ते प्रथमं सगर्वं
पोतमूर्धनि वद्धवन्तस्तेषु तन्नामावशिष्टम् ।
जातितः सम्प्रति किलैते कांगरेसे वै विशिष्टाः
सन्ति तेषां किन्तु राष्ट्रियभावनापतनं दयार्हम् ।।७०।।

वर्षपूगमिह व्यतीतं तत्कथाध्यायोऽन्तिमोऽयं
खलु चतुस्त्रिंशेऽत्र वर्षेऽलिख्यताद्धा त्रयोविंशे-
तत्परस्ताच्चैष वर्गो दृढतरोऽभूत्साम्प्रदायिक-
वर्गसाम्मुख्ये च योद्धृत्वं दधानोऽप्यभ्यतिष्ठत् ।।७१।।

सत्यमिदमास्ते स गान्धिः साम्प्रदायिकमुस्लिमानां
याचनाः काश्चन कदापि पुपूर्षुरभवदरोचमानः ।
सार्थवाहा राष्ट्रियास्ते मुस्लिमास्तं रुन्धति स्म
याचनानां चापि तासां कुर्वते कठिनं विरोधम् ।।७२।।

विंशवर्षात्किञ्चिदूनत्रिंशवर्षावधिककाले-
ऽन्योन्यचर्चाभिश्च वादविवादकैरपि चोद्यमास्ते ।
हिन्दुमुस्लिमयोः समस्यानां समाधानाय क्लृप्ता
एकतासम्मेलनाख्याभिः प्रसिद्धास्ते प्रयत्नाः ।।७३।।

तेषु मौलानामुहम्मदनामकः कांग्रेससंस्था-
ध्यक्ष आह स यच्चतुर्विंशेऽब्दकेऽभवदुत्तमं तत् ।
एकविंशतिदिवसकेन हि तत्किलानशनेन गान्धे-
र्योजितं दिल्ल्यां प्रसिद्धं सज्जना यस्मिन्नुपायन् ।।७४।।

एषु भूयांसः प्रयत्नाः साम्मनस्यार्थं प्रयुक्ताः
केऽपि च प्रस्तावबन्धास्तत्र लोकैरनुमतास्ते ।
किन्तु मुख्यः प्रश्न एषां नो समाधीयत तदानीं
नैव शक्तान्यत्र तानि शतानि वै सम्मेलनानाम् ।।७५।।

साम्मनस्यं बहुमतैर्नो तद्धि सर्वमतेन साध्यम्
षोडशाणकपूर्णरूप्यकवत्समैरनुमोदितेन ।
तत्र शङ्कोदेति भूयः साम्प्रदायिकनेतृवर्गो
वाञ्छतीह न वाञ्छतीमं वा समाधानप्रयत्नम् ।।७६।।

तेषु भूयांसोऽभवन्नतिविश्रुता ये राजनीतौ
प्रगतिलेशं नो सहन्ते ये च कतिचन कामयन्ते ।
उभयविधनेतृषु न किञ्चित्साम्यमत्र विलोक्यते स्मा-
स्मिश्च वैषम्ये कथं सम्भाव्यते स्म च साम्मनस्यम् ॥७७॥

वास्तविकदुष्करतयाऽतिगभीरया प्रकटीकृतं य-
त्कतिपयेषामेव पुंसां नात्र दोषो भवति हेतुः ।
अत्र शिष्या अपि बलेन हठेन साकं याचनाः स्वाः
प्रस्तुवन्ति च भावयन्ति त्रिकोणसंघर्षं प्रदेशे ॥७८॥

एष पञ्चाम्बुप्रदेशः सर्वविग्रहहेतुरुदितः
तत्र हि प्रत्येकजातिभयान्मिथो भयमुत्थितं सत् ।
जोषदुर्भावौ च जनयति हन्त वातावरणमस्मिन्
केषुचित्कृषकेषु भूमिस्वामिषु च जनितो विवादः ॥६९॥

हिन्दवो भूस्वामिनः कृषकाश्च मुस्लिमजातयो
बङ्गदेशे साम्प्रदायिकवैरगाथाः ख्यापयन्ति ।
सिन्धुपञ्चनदीयहिन्दुः श्रीपतित्वं संश्रितोऽयं
मुस्लिमाश्चैवाधमर्णाः सन्ति तत्र कृषीबलाश्च ॥८०॥

तत्र चाप्यधमर्णवर्गप्राणपीडकधनिकवर्गं
प्रति विरुद्धो भाव एति स साम्प्रदायिकरूपतां ताम् ।
मुस्लिमानां साम्प्रदायिकनेतृभिर्निर्धनदलेऽस्मिन्
धनिकवर्गं प्रति विरोधो जन्यते निजहेतुभिस्तैः ॥८१॥

अस्ति चैवाश्चर्यमिदमिह हेतुभिस्तैर्निर्धना
नैव सम्बद्धा मनागपि किन्तु तेषां प्रातिनिध्यम् ।
नेतृभिस्तैः प्राप्तमासीत्तद्वशाच्च बलं महत्तत्
हिन्दुनेतारो धनिकवर्गस्य दधते प्रातिनिध्यम् ॥८२॥

धार्मिकः प्रश्नोऽपि चेत्थं जायते स्म स आर्थिकः
वर्गबन्धनमार्थिकं श्रयते स्म नत्वनुभूयते ।
वर्धमानमिदं कदाचिच्चार्थिकं कलहस्वरूपं
संश्रयेत्तत्र च मिथो भेदो निवर्तेताञ्जसायम् ॥८३॥

प्रतिनिधित्वं मिलितमिदमभ्युत्थितं स्याद्वैरिनाशे
साम्प्रदायिकभेदसत्त्वे जातिगतकलहान्निवृत्तौ ।
राजनैतिकमैक्यमवलम्ब्यं सुकरमेतद्भवेत्
चेन्न मध्यगतस्तृतीयो वर्गं आत्मार्थं श्रयेत् ।।८४।।

एकतासम्मेलनं दिल्ल्यां समाप्तमभूत्तदानीं
हिन्दुमुस्लिमविद्रवोऽभूत्तत्क्षणात्प्रथितः प्रयागे ।
विद्रवेऽस्मिन्खलु हताहतसंख्यया नासीन्महत्त्वं
किन्तु मज्जनिभूमिजातात्क्लिश्यतेऽस्मान्मानसं मे ।।८५।।

अहमघावं च प्रयागं कार्यकर्तृभिरेव साकं
विद्रवो यातः समाप्तिं प्रागिहास्माकं प्रवेशात् ।
तत्फलत्वेनैधितोऽभूद्यो मिथो दलयोर्विरोधः
योऽभियोगश्चाचलत्सोऽभूदनेकदिनप्रयोगः ।।८६।।

विस्मृतं मयका यथाऽयं विद्रवः कथमुद्गतोऽभूत्
तत्र चाब्देऽब्दान्तरे वा रामलीला बाधिताभूत् ।
रामलीलोत्सवनिमित्ताश्चाभवन् शोभाभियात्रा
गुरुगरीयस्योऽत्र मस्जिदसन्निधौ वाद्यावरोधः ।।८७।।

तद्विरोधे रामलीलाचरणमेव जनैर्निरुद्धम्
लक्षलक्षाधिकजनानामुत्सवोऽयमभूत्प्रयागे ।
अष्टवर्षाण्येष तत्र न समभवत्तत्स्मृतिरिदानीं
दुःखदा मयि जाग्रतीयं व्याकुलीकुरुते मदन्तः ।।८८।।

बालकाले रामलीलां द्रष्टुमेष यदाभ्यगच्छम्
तत्स्मृतिर्मेऽखण्डिता साद्यापि जनयति सम्प्रमोदम् ।
तां विलोकयतां कियान्हर्षोऽभवत्स कियांश्च जोषः
मण्डलादखिलान्महान् सम्मर्द एतां द्रष्टुमागात् ।।८९।।

एष हिन्दूनामभूत्परमोत्सवः परमत्र मुस्लिम-
दर्शका अपि तत्र सम्मर्दे सहर्षाः समभिलंस्ते ।
सर्वतो हर्षप्रकर्षो वर्षतीव विमोदमोदौ
याति च व्यापाररूपमपीह नूतनचमत्कारम् ।।९०।।

अथ गतेषु दिनेषु भूयःस्वहमभूवमहो किशोरो
रामलीलां द्रष्टुकामोऽगच्छमाप्नुवमिह न जोषम् ।
स्वाङ्गकल्पैरथ च शोभायात्रिकाभिरिहोद्विजेऽहम्
रुचिरिहोच्चैर्मानदण्डं संश्रिताऽऽमोदप्रमोदे ॥६१॥

तत्र कालेऽप्यहमपश्यं—यत्स सम्मर्दो जनानां
रामलीलाँ दर्शमथ दर्शं प्रहर्षं बहुलमाप्नोत् ।
अत्यरोचत रामलीला तेभ्य आसीत्तन्मनोज्ञं
खलु मनोरञ्जनमिदं यदिहाष्टवर्षावधि निरुद्धम् ॥६२॥

बालकानामेव नहि यूनामथो जरतामपीमां
द्रष्टुमवसर एव नाभूल्लब्ध इति चिन्तयति चेतः ।
जीवने दैनिकनिरन्तरकर्मतो हर्षोत्थजोषे
प्रोज्ज्वलो वर्षैकदिवसो दुर्लभोऽभूद्धन्त तेषाम् ॥६५॥

सर्वथा तुच्छेन चैतद् व्यर्थकेन विरोधजेना-
भवदहो कलहेन जनितं साम्प्रदायिकतोत्थितेन ।
धर्मधार्मिकभावने स्यातामिहोत्तरदायिके ते
हन्त परमानन्ददे ते परिणतिं कां प्रापिते स्तः ॥६४॥

येन तद् गुरुमण्डलाश्रममण्डनं काव्यं प्रणीतं
श्रीजवाहरलालनेहरुचरितकाव्यमिदं तदीयम् ।
अस्य चायं साम्प्रदायिकताप्रवाहो नाम सर्गो
नूनमत्र समाप्तिमागादूनविंशो द्रुतमनसा ॥६५॥

नगरपालिकाकार्यम्

द्रुतविलम्बितम्

विंशः सर्गः

नगरपालिकयाहमवापितो निजसभापतिगौरवमत्र यत् ।
तदिह धारितवान्निजकर्मणा कथमपि द्विसमासमयाधिकम् ॥१॥
प्रतिदिनं तु मनो मम खिद्यते विरतिमिच्छति कर्मपथादिदम् ।
अवधिरास्त च वत्सरकत्रयं समभवं प्रथमात्परमाकुलः ॥२॥
यतितवांश्च तदुत्तरदायितागुरुभरादसुकात्स्वविमुक्तये ।
अहमरोचयमेव सुकर्म तत् समयमप्यददामवधानतः ॥३॥
सफलतामपि काञ्चिदवाप्नुवं स्वसुहृदामलभे शुभभावनाः ।
स सरकार इह स्तुतवांश्च मां नगरपालिकयान्वितकर्मभिः ॥४॥
स सरुषो नृपनैतिककर्मसु स्वयमतुष्यदमुष्य ममोद्यमैः ।
परमहं स्वमपश्यमिहाभितो निगडितं परितश्च नियन्त्रितम् ॥५॥
अवितथं स्तवनीयसुकर्मणोऽनुमतिमत्र ददाति न शासनम् ।
पथि ममात्र हि विघ्नपरम्परा प्रणिहिता भवतीति च भावये ॥६॥
न कथयामि यथाधिकृतो जनः प्रतिविदन्मम कर्म विबाधते ।
अपितु सत्यमिदं यदिह स्थितैः सहयुजा मयि विस्मयदा कृता ॥७॥
परमिहास्त सुशासनमेकतस्त्वपरतः परिषद्यजनासनम् ।
प्रथममन्यमयन्त्रयदायसे नवलतापरिवृत्तिविवर्जिते ॥८॥
नगरपालिकया सरकारकेसमुचिता नृपवित्तनये स्थितिः ।
सततनिर्भरया भवितव्यमाश्वसितविश्वसितान्तरयैतया ॥९॥
नगरपालिकया च विधानतो नहि समाजविकासविधौ क्वचित् ।
करनियोजनकल्पविधौ मनागपि भवेन्न तया यतनं श्रितम् ॥१०॥
विधिवशाद्विहिता अपि योजना अनुमताः स्युरिमाः क्रिययान्वयै ।
अनुमतिञ्च त एव किलाप्नुयुः सरणिमस्य च ये ताचिरजीविनः।११।

समभवन्मम दुःखमिदं तदा घटनमिष्टमभूत्तु समाजगम्।
विरचनं किल राष्ट्रगमप्यथाप्युपनतेऽवसरे समपेक्षिते ॥१२॥
शिथिलगामि तदा खलु शासनं नृपनयद्रुहि सत्त्वरतां श्रितम्।
इदमिहान्तरमर्हति लेख्यया शिथिलसत्वरशासनवेगयोः ॥१३॥
समभवन्निह मन्त्रिवशानुगा जनपदे सरकारविभागिनः।
नगरपालिकयान्वितकर्मणां न जनतासु भवन्ति च कोविदाः ॥ ॥१४॥
अवितथं नहिताननु पृच्छति क्वचन कोऽपि तदीयविभागगः।
अधिकृतोऽपि न चावदधाति तान् सिविलसर्विसशासकचालितः ॥१५॥
भरतभूस्थितशासकमौलयः प्रचलितामनुयन्ति च धारणाम्।
यदिह शासनकर्म विशेषतः पुरुषवत्सुखशान्तिविधायकम् ॥१६॥
अधिकृतत्व-पितृत्व-विचारतोऽभवदियं कलिता किल धारणा।
अनुभवन्ति न केऽपि समाजकानुचरतोचितकर्मविशिष्टताम् ॥१७॥
नगरपालिकयाप्यधमर्णतादमितया सरकारक्षणेन च।
पुरुषदृष्टयतिरिक्ततदीयदृक्कलितया धनिवत्स विलोक्यते ॥१८॥
नगरपालिकया वचनानुगाः प्रतिकृताः किमु तेऽत्र ऋणांशकाः।
प्रतिकृतावथ सा भवति क्षमा अवति सा द्रविणं किमु शोषितुम् ।१६॥
इति भवत्यनुकूलमपेक्षितं सकलमेव च शिष्टिबुभुत्सितम्।
परमितोऽपरमप्यनयोचितं किमनुशिक्षण-संस्करणादिकम् ॥२०॥
किमियमस्ति नु संघटनं तथा ऋणपरिग्रहनिग्रहणे रता।
नगरमङ्गलकामनयाप्यसौ प्रकुरुते तदपीह किलाल्पकम् ॥॥२१॥
धनदरिद्रतया च ततोऽल्पकं प्रकुरुतादिति शिक्षणपीडनम्।
न रुचिरस्ति हि शिष्टिकृतामिह प्रतिदिनं किल सङ्कुचतीह तत् ॥२२॥
अधिकृताँ शिशवः स्ववशानुगे समधियन्ति हि शिक्षणकेतने।
व्ययभरैर्भरितात् सरकारतो द्रविणसाह्यपरिग्रहचालिते ॥२३॥
भरतभूनगराणि विभागतो द्विविधतां दधतीति विदुर्जनाः।
सघनवासतया गहनान्यथो विरलवासतया विरलानि च ॥२४॥
परविधेषु ततावनिमण्डले प्रतिगृहं भवतीह हि बंगला।
उपवनं प्रतिवङ्गलसम्मुखे सिविललाइनिति तद्वितितं विदुः ॥२५॥

इह वसन्ति किलाङ्ग्लशासकाः सवणिजश्च सुमध्यमवृत्तयः ।
भरतभूमिभवा अपि शासकाः सिविललाइनितिभागमुपासते ।।२६।।
नगरपालिकया धनमर्ज्यते गहनतो नगरान्नतु सन्ततात् ।
व्ययमियं कुरुते गहनाय यं तमतिशय्य सदा वितताय तु ।।२७।।
विततदेशतया सरकादयोऽधिकतया वितता रचिताः पुनः ।
शुचितया नगरं च विशेषितुं व्ययभराधिकमेव करोति सा ।।२८।।
सरकजालमिदं च परिष्कृतिं समभिवाञ्छति विद्युदलङ्कृतिम् ।
सलिलयोर्गविधौ नलनालिकादिरचनापि बहुः समपेक्ष्यते ।।२९।।
न नगरं गहनं त्ववधीयते न सुविधाऽप्युचिता नलविद्युतोः ।
इह च वीथिपथादिपरिष्कृतिर्न च चिराय चिराय विधीयते ।।३०।।
न सरका इह साधुतराः स्थिता निविडवीथिषु विद्युदविद्युता ।
नलकनालिकयोश्च नवस्थितिं नगरवासिजनः सहतेऽखिलाम् ।।३१।।
न कुरुते खलु कोऽप्युपलम्भनं यदि करोति तदैति न तत्फलम् ।
लघुजनाः प्रभवोऽथ महाजनाः सिविललाइनि सन्ति हि संस्थिताः ।।३२।।
समतया विनिवेशयितुं त्वहं करभरं धनिकेष्वधनेषु च ।
इह सुधारयितुं तदवस्थितिं धरणिमूल्यभिदाधृतिमाश्रयम् ।।३३।।
मम विचारमिमं प्रविकाँक्षितं त्वरितमेव निरास्थदिहाधिकृत् ।
कथितवान् करधारणमीदृशं धरणिनीतिविरुद्धमिदं भवेत् ।।३४।।
मम मतेन करे विनिधारिते सिविललाइनि भार इहापतेत् ।
नियमिते सरकारमतेन तु प्रणिहता भवति व्यवसायिता ।।३५।।
सकलवस्तुमहार्घतया जना व्ययभरेण भवन्ति निपीडिताः ।
इति समाजविरोधिकरैः सदा नगरपालिकयाभ्युपजीव्यते ।।३६।।
अयमहो बहुहानिकरः करोऽत्यसहनीयतया न मयाऽऽदृतः ।
अवदधामि स सम्प्रति हीयते गुरुतरे नगरे क्रमशः स्वयम् ।।३७।।
नगरपालिकया तदधीक्षको हृदयहीनजनैः सहकर्मकृत् ।
श्रमभरेण पुरातनरेखया चलितया हठिरासभक्तया ।।३८।।
चलति वेगितया न कदाप्यसौ वलयते न मुखं च दिगन्तरे ।
मम च सार्थिजनोऽपि दिगन्तरेऽधिकतया त्वधिरेखगतिप्रियः ।।३९।।

मुकुरवादिभिरेषु च कैश्चन स्वकृतिषूत्सहन परिदर्शितम् ।
सकलतस्तु सदस्यगणेभवत्यपरिवर्तनदृङ् न तु दूरदृक् ॥४०॥
इह हि सन्ति पुराविधयः शुभाः किमिह तर्हि विधेयमहो नवम् ।
नवविधिः खलु सम्भवति श्रितः परिणतो परिपूर्तिविधौ खरः ॥४१॥
इति निरुत्सहनस्य जनस्य तैः प्रगतिरोधिभिरद्भुतवाग्बलैः ।
मुकुरवादिसदस्यगणोऽप्यहो समभवज्जडवादमदाकुलः ॥४२॥
परमिहाभवदेकविचारणा सुविहिता भवतोह प्रतीतिगा ।
जनयिता किल जोषमिमं जने स्वजनलाभचिकीर्षितहेतुका ॥४३॥
परमिहापि रुचिर्नहि शाश्वतं शुभकरी भवितेह यशस्करी ।
इति भयेन सदस्यगणोऽधिकं कलयते नहि जोषमिह स्थितः ॥४४॥
प्रतिसमं सरकार विचारणाऽधिकृतवर्ग-समाचरणाश्रयाः ।
नगरपालिकया कृतकर्मणां ननु न चेर्ति दधत्यनुलोचनम् ॥४५॥
अनुदिशन्ति च तद्गतदूषणान्युपदिशन्ति फलञ्च विशेषतः ।
भरतभूमिहिताय न सम्भवत्यखिलतादृशसंस्थितिनिर्मितिः ॥४६॥
प्रकटितानि हि तद्गतभूषणान्यथ न तद्रचनास्ववधीयते ।
सकलमेव हि कर्म तदन्तरे नगरपालिकया तु विधीयते ॥४७॥
न रचना खलु सा जनतान्त्रिकी न च भवोदयमेकल तान्त्रिकी ।
तदुभवद्विगलोदित सन्तापावुभयदोषगणस्त्विह धीयते ॥४८॥
तदुररीकरणीमिदं भवेन्नियमनं सरकारकृतं मनाक् ।
परमिहेदृश संस्थिति यन्त्रणं भवतु वै जनतान्त्रिकशासनम् ॥४९॥
भवतु लोकहिताय स चोद्यतो भवति विग्रह एव पुरान्यथा ।
भवति वा सरकारवशानुगा परवशेष सदेदृश संस्थितिः ॥५०॥
सति तथा सरकार इहा खिलाः स्वमततः परिचालयतादिमाः ।
स्तुतिरियं च भविष्यति कर्मणा सुयश यति सैव न दुर्भशः ॥५१॥
स्थितिरियं न भविष्यति तोषदा जननियन्त्रणमुत्खनतीह सा ।
नगरपालिकयाचधृतास्तु सभासदमे विरच्यते तदुपासन एव ते ॥५२॥
सति तथा तु स एव निपेव्यते नगरपालिकयान्वयवर्णितः ।
जनसमाजहितेन न सान्विता करसमर्जनतोऽप्रियतांगता ॥५३॥

अपिच तत्र मताधिकृतिर्मनाक् कतिपयेषु जनेषु नियन्त्रिता ।
यदि मताधिकृतामिह योग्यता भवति तर्हि मताधिकृतिः स्तुता ।।५४।।
इह हि मोहमयीसदृशेऽपि पुरे मतदसीमितत्तैव नृणां स्थिता ।
प्रमुदिता दशया निजया सभासद इहानुभवन्त्यभितोऽभयम् ।।५५।।
यदपि कारणमस्तु न पालिकाप्रभृतयः सफलत्वनिदर्शनम् ।
परमिहाग्रसरे नगरे स्थिता अपि विदेशगता अतिशेरते ।।५६।।
नहि तदुत्कुचितग्रहणादिकं भवति किन्त्वनुशासनशैथिली ।
अपि च पक्षपतित्यतिदुर्बला गति रहो मतिरस्ति प्रमादिनी ।।५७।।
सहजमेतदहो जनतान्त्रिके सफलता विहिता जनसङ्ग्रहे ।
भवतु नूनमिहोत्तरदायिनी जनमनःसु शुभैव च भावना ।।५८।।
इह लभेमहि शासनसंयुतं विततमेव हि वायुसुमण्डलम् ।
यदिह वाञ्छितकं जनतन्त्रके नहि तदाप्नुम एव कुतश्चन ।।५९।।
न जनशिक्षणयत्न इहादृतो न विदितत्वकृतो मतसंग्रहः ।
इति जनस्य मतिर्लघुवस्तुवित्पतति व्यक्तिषु वात्र मताहवे ।।६०।।
नगरपालिकया क्रियमाणके भवति वै सरकाररुचिः परा ।
इयमिहास्तु हि राजनयाद्बहिर्भ्रुकुटिरुच्छ्र्यते सति राष्ट्रिये ।।६१।।
नगरपालिकया प्रतिचालिते चलति राष्ट्रियता नहि पुस्तके ।
सपदि तद्भवनाद्विनिवार्यते तदपि राष्ट्रियनेतृजनाकृतिः ।।६२।।
अवतरत्यथ राष्ट्रियकध्वजं भजति भङ्गमिदं सहसान्यथा ।
इह न कश्चन राष्ट्रमहासभानुगत आद्रियते किल किङ्करः ।।६३।।
अथ न चेत्सरकारमनोरथो नगरपालिकया परिपूर्यते ।
भवति सा स्थगिता खलु शिक्षणादिषु कृता सरकारसहायता ।।६४।।
क्वचन कालिकटादिषु शासनं नृपनयान्विनितः कृतवन्दिनः ।
क्वचन किङ्करतावसरं न ते प्रतिभजन्त्विति बन्धमकारयन् ।।६५।।
इति समग्रपदेषु तदीप्सितो भवति राजनयः प्रतिरोधकः ।
न पुरुषस्य किल क्षमतेऽर्हतो न च निदानमिहाधिकयोग्यता ।।६६।।
प्रथितमेव किलोक्तनिदर्शनैः कियदिहात्मवशत्वमवस्थितम् ।
कियदिहास्ति च तज्जनतान्त्रिकं जनमतोद्यतसंस्थितिशासनम् ।।६७।।

समभवन्मम दुःखमिदं तदा घटनमिष्टमभूत्तु समाजगम् ।
विरचनं किल राष्ट्रगमप्यथाप्युपनतेऽवसरे समपेक्षिते ॥१२॥
शिथिलगामि तदा खलु शासनं नृपनयद्रुहि सत्वरतां श्रितम् ।
इदमिहान्तरमर्हति लेख्यया शिथिलसत्वरशासनवेगयोः ॥१३॥
समभवन्निह मन्त्रिवशानुगा जनपदे सरकारविभागिनः ।
नगरपालिकयान्वितकर्मणां न जनतासु भवन्ति च कोविदाः ॥ ॥१४॥
अवितथं नहिताननु पृच्छति क्वचन कोऽपि तदीयविभागगः ।
अधिकृतोऽपि न चावदधाति तान् सिविलसर्विसशासकचालितः ॥१५॥
भरतभूस्थितशासकमौलयः प्रचलितामनुयन्ति च धारणाम् ।
यदिह शासनकर्म विशेषतः पुरुषवत्सुखशान्तिविधायकम् ॥१६॥
अधिकृतत्व-पितृत्व-विचारतोऽभवदियं कलिता किल धारणा ।
अनुभवन्ति न केऽपि समाजकानुचरतोचितकर्मविशिष्टताम् ॥१७॥
नगरपालिकयाप्यधमर्णतादमितया सरकारक्षणेन च ।
पुरुषदृष्टयतिरिक्ततदीयदृक्कलितया धनिवत्स विलोक्यते ॥१८॥
नगरपालिकया वचनानुगाः प्रतिकृताः किमु तेऽत्र ऋणांशकाः ।
प्रतिकृतावथ सा भवति क्षमा अवति सा द्रविणं किमु शेषितुम् ।१९॥
इति भवत्यनुकूलमपेक्षितं सकलमेव च शिष्टिबुभुत्सितम् ।
परमितोऽपरमप्यनयोचितं किमनुशिक्षण-संस्करणादिकम् ॥२०॥
किमियमस्ति नु संघटनं तथा ऋणपरिग्रहनिग्रहणे रता ।
नगरमङ्गलकामनयाप्यसौ प्रकुरुते तदपीह किलाल्पकम् ॥२१॥
धनदरिद्रतया च ततोऽल्पकं प्रकुरुतादिति शिक्षणपीडनम् ।
न रुचिरस्ति हि शिष्टिकृतामिह प्रतिदिनं किल सङ्कुचतीह तत् ॥२२॥
अधिकृताँ शिशवः स्ववशानुगे समधियन्ति हि शिक्षणकेतने ।
व्ययभरैर्भरितात् सरकारतो द्रविणसाह्यपरिग्रहचालिते ॥२३॥
भरतभूनगराणि विभागतो द्विविधतां दधतीति विदुर्जनाः ।
सघनवासतया गहनान्यथो विरलवासतया विरलानि च ॥२४॥
परविधेषु ततावनिमण्डले प्रतिगृहं भवतीह हि बंगला ।
उपवनं प्रतिवङ्गलसम्मुखे सिविललाइनिति तद्वितं विदुः ॥२५॥

इह वसन्ति किलाङ्गलशासकाः सवणिजश्च सुमध्यमवृत्तयः ।
भरतभूमिभवा अपि शासकाः सिविललाइनितिभागमुपासते ॥२६॥
नगरपालिकया धनमर्ज्यते गहनतो नगरान्नतु सन्ततात् ।
व्ययमियं कुरुते गहनाय यं तमतिशय्य सदा विततायतु ॥२७॥
विततदेशतया सरकादयोऽधिकतया वितता रचिताः पुनः ।
शुचितया नगरं च विशेषितुं व्ययभराधिकमेव करोति सा ॥२८॥
सरकजालमिदं च परिष्कृतिं समभिवाञ्छति विद्युदलङ्कृतिम् ।
सलिलयोर्गविधौ नलनालिकादिरचनापि बहुः समपेक्ष्यते ॥२६॥
न नगरं गहनं त्ववधीयते न सुविधाऽप्युचिता नलविद्युतोः ।
इह च वीथिपथादिपरिष्कृतिर्न च चिराय चिराय विधीयते ॥३०॥
न सरका इह साधुतराः स्थिता निविडवीथिषु विद्युदविद्युता ।
नलकनालिकयोश्च नवस्थितिं नगरवासिजनः सहतेऽखिलाम् ॥३१॥
न कुरुते खलु कोऽप्युपलम्भनं यदि करोति तदैति न तत्फलम् ।
लघुजनाः प्रभवोऽथ महाजनाः सिविललाइनि सन्ति हि संस्थिताः ॥३२॥
समतया विनिवेशयितुं त्वहं करभरं धनिकेष्वधनेषु च ।
इह सुधारयितुं तदवस्थितिं धरणिमूल्यभिदाधृतिमाश्रयम् ॥३३॥
मम विचारमिमं प्रविकाँक्षितं त्वरितमेव निरास्थदिहाधिकृत् ।
कथितवान् करधारणमीदृशं धरणिनीतिविरुद्धमिदं भवेत् ॥३४॥
मम मतेन करे विनिधारिते सिविललाइनि भार इहापतेत् ।
नियमिते सरकारमतेन तु प्रणिहता भवति व्यवसायिता ॥३५॥
सकलवस्तुमहार्धतया जना व्ययभरेण भवन्ति निपीडिताः ।
इति समाजविरोधिकरैः सदा नगरपालिकयाभ्युपजीव्यते ॥३६॥
अयमहो बहुहानिकरः करोऽत्यसहनीयतया न मयाऽऽदृतः ।
अवदधामि स सम्प्रति हीयते गुरुतरे नगरे क्रमशः स्वयम् ॥३७॥
नगरपालिकया तदधीक्षको हृदयहीनजनैः सहकर्मकृत् ।
श्रमभरेण पुरातनरेखया चलितया हठिरासभवत्तया ॥३८॥
चलति वेगितया न कदाप्यसौ वलयते न मुखं च दिगन्तरे ।
मम च सार्थिजनोऽपि दिगन्तरेऽधिकतया त्वधिरेखगतिप्रियः ॥३९॥

नियतमेव न राष्ट्रमहासभामनुगता न वशन्ति समक्षतः ।
ब्रिटिशशासनकिङ्करतां क्वचिद्यदि वशन्ति तदात्र परोक्षतः ॥६८॥
नगरपालिकया निजमाध्यमे यदि जनो विनियुज्यत ईदृशः ।
तदपि नो सहते किल शासनं तदिदमेत्यवधानविचार्यताम् ॥६९॥
गणितमेव चतुर्दशवर्षतस्त्रिगुणलक्षजनैरिह वन्दिता ।
स्ववशतातिनिमित्तकृताग्रहैरधिगतेभि दृढनिश्चयधारिभिः ॥७०॥
यदि न राजनयस्य दृशेक्ष्यते न भवतीह तदा खलु संश्रयः ।
त्रिगुणलक्षमितेषु जनेष्वमीष्वभवदेकतमोऽपि न दोषभाक् ॥७१॥
अपितु सर्व इमे सुजनाः सदाचरणचारुयशोभिरलङ्कृताः ।
समजनान्तरतो महिताः व्रतैः सुनियमैश्चयमैरभवन् वृताः ॥७२॥
सपदि सम्परिहृत्य निजार्थकं जनपदेषु परार्थपरायणाः ।
मनसि जोषजुषोऽग्रसराः क्षमाध्ययनसत्यदयादिषु तत्पराः ॥७३॥
निजविभागहितासु च संस्थितिष्वधिककर्मकराः सुलभा नराः ।
समभवन् इह सर्वजनक्रिया न सरकार इमांस्तु न्ययूयुजत् ॥७४॥
इह भवेयुरिमे प्रतिदण्डिताः सहयुजश्च सहानुभवाः पुनः ।
गलति चेदिह कर्म, गलेदिदं न तु भजेयुरिमे स्थिरजीविकाम् ॥७५॥
इति विचिन्त्य सदा सुजनद्रुहा ब्रिटिशशासनकेन निर्दशिता ।
मलिनता मतिमानसयोर्निजा धवलता तनुमात्रगता तथा ॥७६॥
स सरकार इहाग्रयते जनं हतमतिं च मुखस्तुतिपण्डितम् ।
अपवदत्यथ लौकिकसंस्थितीर्न खलु ता निजकर्मरता इति ॥७७॥
अथ च संस्थितयो नृपनीतितो बहिरिता निजकर्म वितन्वताम् ।
परमिमाः सरकारहिताय तामनुनता उपयान्ति महिष्ठताम् ॥७८॥
अहह, शिक्षणकेन्द्रगता बुधा विवशतामुपनीय नियोजिताः ।
जनपदेषु गताः सरकारतः प्रजनयन्तु सदा प्रणयं परम् ॥७९॥
विगतपञ्चदशाब्दिकवेलया कठिनताः किल राष्ट्रमहासभा ।
असहताथ तदीयजनैः कृतं नवनवापदुपायनभोजनम् ॥८०॥
परिहिता विषमोत्तरदायिता न च यशः श्रितमत्र, न वै सुखम् ।
चरमतो वलवांश्च सुरक्षितः स सरकार इह प्रतिरोधितः ॥८१॥

सफलताधिगताऽथ प्रशिक्षणेऽत्र कथितश्रमतश्च समर्थिता ।
स्वबलनिर्भरता, पटुता, स्थिरस्थितिरियं च विपत्स्वपि शाश्वती ॥८२॥
इह च या सरकारकुभावना हृतवती गुणगौरवमुन्नतम् ।
हलचलैर्विहितैस्तदिहार्पितं पुनरपीति न कश्चन संशयः ॥८३॥
इह च विश्वजनीनपराक्रमे हलचलेष्वविशन् बहुला जनाः ।
परमयोग्यतया निजया जडा अकृतयश्च जना अपि सङ्गताः ॥८४॥
भवति विश्वसनीयमिदं पुनर्वृतवती खलु राष्ट्रमहासभा ।
पटुतरान् कुशलान् गुणिनो जनान् अपि च योग्यतयेतरतोऽधिकान् ।८५।
इह परापि दिगस्ति विदन्ति यां न सरकारजना न च स स्वयम् ।
अभिलषन्ति जनाः कृतक्रान्तयो न सरकारकृतां निजजीविकाम् ॥८६॥
दधतु काङ्ग्रसिका नहि जीविकां क्वचन मास्तु च तद्विनियोजनम् ।
इति निशम्य परं सुखिनो मुदा विदधतेऽत्र शुभागमनं गिराम् ॥८७॥
इह च काङ्ग्रसिकान्प्रति कथ्यते नहि भवन्ति हि क्रान्तिकरा इमे ।
क्षणिकमासिकक्रान्तिविधानतः परमिमे पुनरादधते शमम् ॥८८॥
इतरमाग्रहमध्यवसायकं क्वचन राजनयाक्रमणं नवम् ।
विदधते जहतीह महत्त्वकं शिथिलयन्ति तु जोषमशेषकम् ॥८९॥
समधिरोहति जानुनि वै वपा, मृगयते निजरक्षणमन्तरम् ।
इति विलोक्य तु मध्यमवर्गजानुगतिमादधतेऽग्रसराः सदा ॥९०॥
प्रयतनैः किल काङ्ग्रसिकान्नवान् नगरपालिकयेदृशसंस्थया ।
अपि समन्वयितुं त्ववरुन्धते, सकलकालबलिग्रहकाम्यया ॥९१॥
स्वयमिहायतते किल शासनं सकलकाङ्ग्रसिकाननुवञ्चयत् ।
नियतकर्मकरादिपदादिमान् न शिथिलीभवितुं ददते क्षणम् ॥९२॥
अहमिहैकसमाधिककालतो नगरपालिकया सह कर्मभिः ।
अनुभवामि न शक्तिषु चात्मनः समुचितां विहितामुपयोगिताम् ॥९३॥
अहमिहाधिकतोऽधिकमाचरम्, प्रकृतकर्म झटित्यवसीयताम् ।
प्रथमतोऽधिकदक्षतया भवेदिति च न प्रभवामि पदान्तरम् ॥९४॥
परिजिहासितमेतदधीक्षकास्पदमिदं न तु सभ्यगणैर्मतम् ।
मयि हि सभ्यगणैर्मम मित्रकैः सुजनता प्रथिता दयया समम् ॥९५॥

तदनुरोधनिराकरणे मया सपदि दुष्करमास्त हि तत्क्षणम् ।
परमिहापरवर्षसमाप्तये प्रभुरभूवमहं न किलासितुम् ॥९६॥
लिखितमुक्तिदलोऽथ निरश्वसम्, नववसन्तसमागमनोत्सवे ।
इह च पञ्चकविंशतिवत्सरे दयितया पतितं ज्वरविष्टरे ॥९७॥
कतिपयाननयद्दिवसानियं लखनवे स्थितरुग्णजनालये ।
इह च कर्णपुरे बत कांग्रसं समधिवेशितवत्स्वधिवेशनम् ॥९८॥
सुबहुकालमहं विकलान्तरो भ्रमणमेव निरन्तरमाचरम् ।
लखनवं प्रतिवारमगामहं क्वचन कर्णपुरात्त्रिसमागमात् ॥९९॥
इह दिनेष्वपि कांग्रसमन्त्रिषु प्रथमतां दधता मयकाऽऽसितम् ।
नवभिषग्वरमन्त्रणया मया स्विटजरेषु चिकित्सनमामतम् ॥१००॥
स्वयमहं खलु भारततो बहिर्गमनमैच्छमनच्छमनास्तदा ।
न हि मम प्रतिभाति स सत्पथो व्यमृशमेष्यतिदूरगतस्य दृक् ॥१०१॥
सकलवस्तु विलोकयितुं दृशा विमलया प्रभवामिपुरा यथा ।
स्वमनसस्तिमिरैर्भृतकोणके प्रहितुमेष सहे न नवद्युतिम् ॥१०२॥
षडधिके किल विंशतिवत्सरे वयमगाम जलाध्वनि वेनिसम् ।
कमलयेन्दिरया सहितोऽभवं विजयलक्ष्मिकया रणपण्डितः ॥१०३॥
भगिनिकाभगिनीपतियुग्मकं किल विदेशगतं प्रथमोद्यतम् ।
न वयमत्र पुरा क्वचिदुद्यताः समभवाम विदेशयियासया ॥१०४॥

ऋग्वेदसायणभाष्यभाषानूक्तिभिर्यो भूमिकां
प्रथममण्डलसप्तविंशतिसूक्तसहितामन्ववादीत् ।
तेन रचिते श्रीज्जवाहरलालनेहरुचरितकाव्ये
त्वेष विंशः सर्ग एति युतो नगरपालिककृतैः ॥१०५॥

यूरोप-प्रवासः

उपजातिः

एकविंशः सर्गः

अथात्र यूरोपपुराप्रवासात्त्रयोदशाब्दादधिकं व्यतीतम् ।
अब्दाश्च ते क्रान्तिनियुक्तभूयःपरीवृतिस्था अभवंस्तदीयाः ॥१॥
अज्ञासिषं विश्वमहं तदा यत्तद्युद्धरक्तादिभये निमग्नम् ।
नवं च विश्वं मम मार्गमद्य प्रतीक्षमाणं समभूच्चिरेण ॥२॥
आशासिषि स्यादुपसप्तमासः प्रवास एकाब्दिक एव वा मे ।
परं वयं त्वत्र किलाब्दमेकं स्थिताश्च मासान्नव वस्तुतोऽमि ॥३॥
वेला किलेयं मनसस्तनोश्चाभूद्विश्रमायातिविनोदनाय ।
विशेषतः स्फीततरप्रदेशे कालो जिनेवानगरे व्यतीतः ॥४॥
मोण्टानदेशस्य च पर्वतीये स्वास्थ्यप्रदे चारुचिकित्सवासे ।
षट्विंशवर्षे भगिनी च कृष्णाऽऽप्युपागता साप्यवसच्च साकम् ॥५॥
नाहं स्वपत्नीं बहुकालमासं त्यक्तुं समर्थः सततं दिदृक्षुः ।
अतः किल स्वल्पतराय यातोऽस्म्यनेहसेऽन्यान् रुचिरप्रदेशान् ॥६॥
स्वस्थाभवत्स्तोकमियं तु यस्मै क्षणाय तस्मिन्वयमभ्रमाम ।
दिनानि वै कानिचिदेव देशे शर्मण्यपारस्यगुरुण्डमुख्ये ॥७॥
श्रृङ्गे गिरेर्यस्य किलोषिताःस्मः स सर्वतश्चारुहिमैर्वृतोऽभूत् ।
तत्रान्वभूवं पृथगेव जापः यूरोपतो भारततश्च तं स्वम् ॥८॥
वृत्तानि वृत्तानि हि भारतस्याभवन् विदूरे परमार्थतोऽपि ।
स दूरतः कौतुकदर्शकः सन् तद्वृत्तपत्राण्यपठं कदाचित् ॥९॥
यच्चायते स्मात्र तदध्यगाञ्चाध्यायञ्च तस्मिन्नवधानदानैः ।
नवं च यूरोपममुष्य नव्यां तां राजनीतिं च तदर्थशास्त्रम ॥१०॥
अतिस्वतन्त्रानथ मानवीयानमुष्य सम्बन्धगुणानपश्यम् ।
अचिन्तयञ्चास्य पुराणनव्यस्वरूपयोरन्तरमन्तरेण ॥११॥

स्थितो जिनेवानगरे स्वभावात् तद्राष्टसंघीयक्रियाकलापे ।
अधां रुचिं च श्रमिकौकसि स्वां विशेषतश्चान्तरराष्ट्रियेऽपि ॥१२॥
अथागते शैत्यकरे तु काले, तत्क्रीडनेष्वास्त रतं मनो मे ।
तत्रैव रुच्या कियतश्च मासानेष्वेव लग्नोऽभवमुज्झितान्यः ॥१३॥
हिमोपरि प्लायितवानहं पुरा चलन् स्खलन्वावृतपादुकोऽद्धा ।
यथेष्टकाष्ठद्वयबद्धपाद स्खलन् कृतार्थो नवलानुभूत्या ॥१४॥
अस्मिन्नहं मुग्ध इवाभवञ्चारम्भे ममाभूदतिकष्टमस्मिन् ।
पातञ्च पातं दृढसाहसेनोद्युक्तस्य मेऽन्ते समभूत्प्रमोदः ॥१५॥
दिनेषु चैतेषु न काचनाभूदुल्लेखनीया घटना कुटुम्बे ।
गच्छत्सु चामूषु मदीयपत्नी शक्ति तथा स्वास्थ्यमिह प्रपन्ना ॥१६॥
स्वल्पैरिहाभूदथ भारतीयैः साकं च साक्षात्करणावकाशः ।
सत्यं गिरावत्र वसद्भिरेव स्तोकैर्वयं सम्मिलितास्तु लोकैः ॥१७॥
न तान्विनान्येन तु केनचिन्नः कदापि जातोऽवसरोऽपि दृष्टेः ।
पादोनवर्षद्वयकं व्यतीतं यूरोपदेशे वसतामिदं नः ॥१८॥
अत्राभवन्क्रान्तिकराः पुराणा निर्वासिता भारततस्तु दृष्टाः ।
विज्ञातसंज्ञा मयकास्त तेषां स श्यामजीकृष्ण इति श्रुताख्यः ॥१९॥
स्वभार्यया त्वातुरया जिनेवास्थितस्य गेहस्य समुच्चभागे ।
कृताधिवासो जरसाभिभूतः सोऽभूद्यथा तस्य तथैव भार्या ॥२०॥
तयोर्न भृत्या अभवन्नतस्तद्गृहं किलासीन्न तदच्छकक्षम् ।
कक्षेषु येषु प्रतिबध्यते स्म श्वासो रजोवेष्टितवस्तुभृत्सु ॥२१॥
स श्यामजी भूरिधनोऽपि तस्य व्यये न विश्वासमधाद्वराकः ।
स ट्राममारुह्य गतागतानि नारोचतैवात्र पणावनाय ॥२२॥
चेत्कोऽपि तं द्रष्टुमिहागमत्तं सशङ्कदृष्टयैव स पश्यतीमम् ।
महाशयोऽयं ब्रिटिशानुगः किं जिघृक्षुरास्ते किमु मद्धनस्य ॥२३॥
भृतञ्च तत्पाटिकमत्र वृत्तपत्रैस्तदीयैरभवत्पुराणैः ।
आकृष्य तान्येष जनानदर्शयत्सजोषमेषामपठच्च लेखान् ॥२४॥
यान् द्वादशाब्दादलिखत्पुराऽयं तान् भारतीये तु समाजवादे ।
पुरातनस्यैव युगस्य गाथाः प्रायः स्ववार्तासु किलाचकाशत् ॥२५॥

हैमस्थिते सद्मनि भारतीये किं किं पुराभूत्कतमे च लोकाः ।
सम्प्रेषितास्ते कुटिलेन तस्य भेदान् ग्रहीतुं ब्रिटिशेन तस्मिन् ॥२६॥
विज्ञाय चैतान् स्म चमत्करोति संगोप्य चात्मानमिति स्म वक्ति ।
तद्गेहभित्तिश्च वृता पुराणैर्ग्रन्थैर्भृताभिस्त्वलमारिकाभिः ॥२७॥
ग्रन्थांश्च तान् कोऽप्यपठन्न चापि कोऽप्यैरयत्तान् पठितुं तु कश्चित् ।
अतो रजांस्येषु समाश्रितानि श्लिष्टान्यपश्यञ्जनमातुराणि ॥२८॥
ग्रन्थास्तथा वृत्तदलानि तत्रासन् कुट्टिमेऽप्यापतितानि दुःखात् ।
न तान्यभूवन् दिवसैस्तथात्वे सप्ताहकैर्वा लुठितानि मासैः ॥२९॥
सर्वत्र तत्रास्त च शोकमुद्राविद्रावितं सर्वममङ्गलेन ।
स जीवनस्याप्यनभीप्सितोऽभूज्ज्ञातस्य लोकस्य यथा प्रवेशः ॥३०॥
शून्येष्वलिन्देषु तमोवृतेषु गच्छन्बिभेति स्म जनः प्रतीतेः ।
कोणे क्वचित्किनु निजस्वरूपमाच्छाद्य मृत्युः प्रतितिष्ठतीति ॥३१॥
तत्रागतानां तु विनिर्गतानां बहिः सुखेन श्वसितोपलब्ध्या ।
बाह्यस्य वातस्य च सेवनेन प्रत्यागतोऽभून्मनसः प्रसादः ॥३२॥
स श्यामजी दित्सति सम्पदं स्वां स्वदेशशिक्षार्थिहिताय सर्वाम् ।
स निर्मिमीषत्यथ ट्रस्टमेकं ट्रस्टीपदार्थञ्च स मामपृच्छत् ॥३३॥
नेच्छामि तामुत्तरदायितां तां पश्यामि चैवापदमेव सम्पदम् ।
व्यचारयं नात्र रुचिः प्रदर्श्या शङ्केत वित्तं मम वाञ्छतीति ॥३४॥
न कोऽप्यजानात्कियतीयमास्ते शर्मण्यकार्षापणमूल्यदृष्ट्या ।
महीयसीं हानिमयं श्रितोऽस्तीत्यहो प्रवादः प्रथितः पृथिव्याम् ॥३५॥
प्रायो जिनेवापथतोऽत्र केचिन्निर्यान्ति लोके प्रथिता जनास्ते ।
तेषां कियन्तोऽपि हि राष्ट्रसंघे सम्मेलनायापि समापतन्ति ॥३५॥
ते शासकाभा न किलोपसर्प्या श्रीश्यामजीतुल्यजनैः कदापि ।
अशासकाः केचन भारतीया अप्यागमंस्तत्र च काङ्ग्रेस्याः ॥३७॥
स श्यामजी द्रष्टुमिमान् प्रयत्नं करोति तद्दर्शनतश्च तेषाम् ।
हृदि प्रभावो भवति स्म योऽसावुद्वेगकृच्चाभवदद्भुतश्च ॥३८॥
न केवलं सम्मुखतो जनानामेकान्ततोऽप्यस्य हरन्ति दृष्टिम् ।
दृष्टा अपि व्याजकृतक्षमार्थाञ्जलि प्रयान्त्यन्यदिशञ्च भीताः॥३९॥

अतस्तयोर्जीवनमेकलं सद् व्यतीयते स्मेति पुराप्यलेखि ।
न बालवत्सा न च बन्धुमित्र-सार्था अभूवन्नयोः कुतश्चित् ॥४०॥
मनुष्यजीवेषु न केनचित्तौ सम्पर्कभाजौ भवतः स्म तस्मिन् ।
पुराणगेहे च पुराणवेलास्मृती इवैतौ समतीतकालौ ॥४१॥
न साम्प्रतं तावनुकूलकालौ कालानुकूलावथ चापि न स्ताम् ।
विश्वं मुदा याति पराङ्मुखं सद् यद्यप्यभूदक्षिण पुराणतेजः ॥४२॥
नासोत्तयोर्मय्यथ साम्यमेकं तथापि नैतौ प्रति चेतसोऽहम् ।
सहानुभूतिं च समादधाञ्च निरोद्धुमासं न कथञ्चन प्रभुः ॥४२॥
तदैव वृत्तं प्रकटत्वमाप्तं यच्छ्यामजी मृत्युमगादकस्मात् ।
सा गौर्जरी सन्महिलापि किञ्चिद्दिनान्तरं तं पतिदेवमन्वगात् ॥४३॥
या देशनिर्वासनतोऽपि जीवनं तेनैव साकं व्ययति स्म साध्वी ।
धनं विदेशे निजदेशजानां स्त्रीणां च शिक्षार्थमदात् प्रभूतम् ॥४५॥
अन्यस्य चैकस्य प्रसिद्धपुंसो नामाहमाकर्णयमत्र भूयः ।
महेन्द्रमेनं च सहप्रतापं प्रागभ्यपश्यं स्विटजर्प्रदेशे ॥४६॥
अत्यन्तमासीत्सबलं किलाशावादित्वमद्यापि तथेक्षयेऽहम् ।
वसन् स वायाविह वास्तविक्या नावस्थया रक्षति बन्धमल्पम् ॥४७॥
चमत्कृतोऽहं प्रथमेऽस्य दर्शने विलक्षणं वेषविधिं दधानम् ।
त्रिविष्टपस्योच्चतमस्थलेऽसौ किलानुकूलो न तु सोष्मदेशे ॥४८॥
नेपथ्यमासीच्च तदर्धसैनिकं रूस्ये किलोच्चे यदुपानहौ स्तः ।
कोटाम्बरे विस्तृतपाटिकानि भृतानि चित्रैरथ वृत्तपत्रैः ॥४९॥
वस्तुष्वमीष्वास्त च वैथमैनं हॉल्वेगपत्रं किल दर्शनीयम् ।
शर्मण्यदेशे घृतकौलपत्यः सवैथमैनः प्रथितः पृथिव्याम् ॥५०॥
आसीत्पुनः कैसरचित्रमेकं तेन स्वहस्ताक्षरितं च तत्र ।
त्रिविष्टपस्याथ दलाइलामाऽलिखन्मनोज्ञाक्षरकं तदत्र ॥५१॥
इतोऽतिरिक्ताऽन्यमितानि पत्रचित्राणि तत्पाटिकमाश्रितानि ।
एतानि वस्तूनि बहूनि पश्यञ्जनोऽदधाद्विस्मयमेष च स्मयम् ॥५२॥
स एकदा मामवदन्ममैका मञ्जूषिकाऽलुप्यत चीनदेशे ।
यस्यां तु पत्राणि भृतानि भूयोमूल्यानि तत्पाटिकके दधामि ॥५३॥

इय सुरक्षा किल कर्गलानामित्यस्ति मे पाटिकवृन्दकारणम् ।
स्वपार्श्वं ऊरुजठरादिकाङ्गे सदा भवेयुर्निहितानि तानि ।।५४।।
त्रिविष्टपे चाप्यफगानदेशे जापानके या घटनाश्च चीने ।
वृत्तानि तासाञ्च कथानकानि महेन्द्रपार्श्वे सुबहून्यभूवन् ।।५५।।
स जीवनं स्वं विविधाभिरेवावस्थाभिराजीवदनेकरूपम् ।
यासामुदन्तोऽतितरां मनोज्ञः सर्वाधिकं जोषमधात्समाजः ।।५६।।
आसीदिहानन्दसमाज एकस्तत्कल्पितोऽस्यास्त च मूलमन्त्रम् ।
'आनन्दतो जीव' इतीह, संस्था लटावियायां सफलेयमासीत् ।।५७।।
आसीत्प्रचारस्य नवः प्रकारः, कालानुकालेषु समादृतेषु ।
सम्मेलनेषु प्रहिणोति पत्रं स वै जिनेवानगरादिषु स्वम् ।।५८।।
सन्देशपत्राणि सदस्यवर्गं प्रत्येष सम्प्रेषयति स्म नित्यम् ।
पत्रेषु हस्ताक्षरगं च नामालिखत्स दीर्घं विविधं विचित्रम् ।।५९।।
म. प्रेति संकेतयते महेन्द्रप्रतापनामाश्रितनैकनाम ।
नामानि चैतानि तदीययात्रास्पदप्रदेशानवबोधयन्ति ।।६०।।
स सम्प्रदायादथ जातिबन्धात् स्वमुद्गतं दर्शयते प्रकारैः ।
विचित्रनामप्रकरस्य नीचै 'र्मनुष्यजातेरिह सेवकोऽयम्' ।।६१।।
इत्युल्लिखन्नन्तविशेषणं च नितान्तमेवाश्रयतेऽनुकूलम् ।
तदीयवार्तासु महत्त्वदानं सुदुष्करं भाति सदैव मह्यम् ।।६२।।
स मध्यकाले लिखितेन तेनोपन्यासपात्रेण समः प्रतीतः ।
मन्ये स 'डॉनक्विकजोटसे' ऽस्यां विंश्यां शताब्द्यां पुनरागतोऽभूत् ।।६३।।
परं स वै षोडश-आणकोऽभूत्सत्यस्तथाऽऽसीत्स्वविचारपक्वः ।
कामामपश्याम च तत्र वृद्धां महोदयां पेरिसकप्रवासे ।।६४।।
सा कस्यचित्सन्निधिमेत्य तस्य मुखं यदापश्यदिहावधानात् ।
उन्नम्य हस्ताङ्गुलिमभ्यपृच्छत्-को वै भवानित्यतिरोषणेव ।।६५।।
भयानका शोणितपा तदानीं सा प्रत्यभान्नोत्तरतोऽभिभूता ।
सोच्चैःश्रवास्तावदभूद्यथोक्तमस्माभिराकर्णयितुं न शक्ता ।।६६।।
सा स्वेच्छया कल्पयति स्म मिथ्या स्वधारणास्तासु न सान्यथाधीः ।
भवेयुराभ्यः प्रतिकलमूलाः शतं यथार्थाः परमच्युतेयम् ।।६७।।

इतोऽतिरिक्तः स च मौलवी मामिहेटलीवर्त्मनि पश्यति स्म ।
'उबेदउल्ला' इति यस्य नाम स प्रत्यभान्मे चतुरो विशेषात् ॥६८॥
तद्योग्यता पूर्वयुगीन-राजनैतिक्यभूत्काचन चातुरी च ।
सम्पर्कमाप्तो न नवीनधाराविचारलेशैरपि मानसेन ॥६९॥
संयुक्तराज्यस्य तथा च संयुक्तस्य प्रजातान्त्रिकशासनस्य ।
स योजनां कल्पितवान् समस्यासमाधये रक्षितसम्प्रदायाम् ॥७०॥
सोऽचर्चयत् तत्प्रथितं किलेतस्तुम्बूलकुस्तुन्तुनियेति देशम् ।
तस्मिन् स्वकीयानि कियन्ति सोऽब्रूतान्दोलनानीह पुरस्कृतानि ॥७१॥
परं न तत्राहमधां तु किञ्चिद् ध्यानं ततो विस्मृतवानिदानीम् ।
मासानतीत्यैक्षत चाब्रवीत्तांल्लालाश्रिये लाजपताय सर्वम् ॥७२॥
तस्मिन्नभूदस्य महान् प्रभावस्ततस्त्वसौ चिन्तयति स्म भूयः ।
वर्षेऽत्र संसच्चयनेऽप्युबेद-उल्ला महत्त्वप्रतिभागिहाआसीत् ॥७३॥
तद्भाषणस्यातितरां विचित्रस्तथा प्रतीपः परिणाम ऊढः ।
हेजाजमीयाय ततस्तु किञ्चिद्वृत्तं तदीयं न मयोपलब्धम् ॥७४॥
तस्माद्विभिन्नोऽथ स बर्कतुल्लाऽऽसीन्मौलवी कोऽप्यपरो विदेशे ।
अपश्यमेनं किल बर्लिनेऽहं स वै मनोरञ्जकवृद्ध आसीत् ॥७५॥
अत्यन्तमुत्साहभृतोऽतिसाधुर्वराक आसीत्सरलो न तीव्रः ।
नूत्नान्विचारानुररीकरोति विश्वं नवं बोद्धुमभूत्सयत्नः ॥७६॥
हा, सेनफ्रांसीसपुरे किलान्त्यां गतिं गतोऽभूदिह सप्तविंशे ।
स्यात्सप्तविंशे वयमत्र याता अभूम तं स्विट्जरदेशमारात् ॥७७॥
तन्मृत्युवृत्तं मयकातिशोकाच्छ्रुतं स्रुतं वाष्पमिहाक्षियुग्मात् ।
आसन्ननेके किल बर्लिनेऽस्मिन् दलं कृतं यैरिह युद्धकाले ॥७८॥
तद्भारतीयं दलमास्त भग्नं तेषामभून्नात्र हि सौमनस्यम् ।
मिथोऽभजंस्ते नहि मित्रभावमन्योन्यमेतैः कलहायितं च ॥७९॥
विश्वसघातञ्च मिथः प्रकल्प्य भीता अभूवन्निति मे प्रतीतम् ।
सर्वत्र मन्ये स्थितिरीदृशोयं जातेव देशाद् बहिरासितानाम् ॥७९॥
प्रातिस्विके कर्मणि भारतीयास्ते बर्लिनस्था अलगन् सुमध्याः ।
लग्नं किलाभूदिह क्रान्तिचिह्नं दूरे स्थितास्ते किल राजनीतेः ॥८०॥

नियुद्धकालेऽस्य पुरातनस्य चर्चा मनोरञ्जनमादधाति।
भूयांस एषामिह विश्वविद्यालयेऽध्यगुर्यत्र च तत्रभूयः इतस्ततश्च॥८१॥
शर्मण्यछात्रैः सह तैः सुशीला जीवन्त्यहो जीवनमीदृशं ते।
पिबन्ति मद्यं च सहानुभूत्या समादृताः संस्कृतिमेतदीयाम्॥८२॥
युद्धेन तेषामभवन्न चार्थः स राष्ट्रियोन्माद इहोद्गतोऽभूत्।
आसन्नहो चञ्चलिता अनेन, विद्रोहभावाद् ब्रिटिशं प्रतीमे॥८३॥
शर्मण्यदेशं प्रति पक्षपातं विनाप्यहो! तान् ब्रिटिशस्य शत्रून्।
प्रत्यानता भारतराष्ट्रियत्वाद्द्वेष्या अभूवन् ब्रिटिशा न चैते॥८४॥
युद्धस्य चोपक्रम एव केचित् ते भारतीया अतिक्रान्तिकाराः।
ये स्विट्ज़रं चाभ्यगमन्नितश्च शर्मण्यमाकल्पितनूत्नसंस्थाः॥८५॥
आमन्त्रयंस्ते हरवद्दयालुं संयुक्तराज्यस्य तटात्तु पश्चिमात्।
अमेरिकातः कतिचिद्धि मासान् व्यत्याप्य तावत्स समागतोऽभूत्॥८६॥
संस्थाऽभवत्तावदियं प्रपूर्णा महत्त्वदृष्ट्या त्वलमुद्गता च।
शर्मण्यशिष्टिर्निजलाभमैच्छत् संयोजितैस्तैर्ब्रिटिशप्रतीपैः॥८७॥
भावैरतः सा त्वनुकूलमेव तस्याभवन्नूतनसृष्टिरेषा।
ते भारतीया निजराष्ट्रियाणां मनोरथानांपरिपूर्तये च॥८८॥
परिस्थितेरान्तरराष्ट्रियाया लाभं च लब्धुं प्रयता अभूवन्।
शर्मण्यलाभाय न केवलाय निजोपयोगं न वशन्ति तेऽन्तः॥८९॥
किन्त्वत्र तेषां चलतिस्म नो धीः पश्यन्ति चास्मान्समपेक्षमाणाः।
शर्मण्यशिष्टिर्यदुपेतुमार्ता तत्तावदस्मत्सविधे किलास्ते॥९०॥
अतः किमप्यायुधमाप्तमेतैः शर्मण्यशिष्ट्या व्यवहर्तुमुच्चैः।
शर्मण्यदेशः किल भारतस्य स्वातन्त्र्यसिद्ध्यै कुरुतात्प्रतिज्ञाम्॥९१॥
विश्वासमप्यादधतां यथात्र सर्वात्मनाऽसौ सुदृढः स्थितः स्यात्।
इत्यादिनाऽमूल्यपणेन सन्धिः शर्मण्यदेशेन कृतोऽभवत्सः॥९२॥
इह प्रतिज्ञातमिदं तया च शर्मण्यदेशो विजयं किलाप्ते।
अत्रत्यशिष्टिः किल भारतस्य स्वाधीनतां स्वीकुरुते पुरेति॥९३॥
प्रतिज्ञया वापि पणेन नान्यैः पणैर्महद्भिर्लघुभिश्च सन्धौ।
तद्भारतीयं दलमत्र युद्धे शर्मण्यसाहाय्यसमुद्यतं सत्॥९४॥

सम्मान्यते सा समितिः समन्ताच्छर्मण्यशिष्टचा समुदारया च ।
तत्प्रातिनिध्यं प्रति चादरं तं विदन्ति वैदेशिकराजदूताः ॥६५॥
विशेषतोऽनेन नवीनयूनां दलेन राज्यानुभवं विनैव ।
स्वल्पेन च स्वल्पदिनैर्यदाप्तं महत्त्वमेतेन तु तेषु केचित् ॥६६॥
मूर्धानि आसन् भ्रमिता, अथैतेऽपश्यन्-वयं किञ्चन नाम कार्यम् ।
ऐतिह्यमद्यान्वचराम चारु, युगान्तकारि त्वतिदुष्करञ्च ॥६७॥
रोमाञ्चकानां घटनाशतानां तेष्वेव कैश्चित्कृतमाभिमुख्यम् ।
ते बालबालं किल रक्षिताश्च युद्धान्तकाले च महत्त्वहीनाः ॥६८॥
उपेक्ष्यमाणा अभवंस्तथैते, नमस्कृतोऽभूद्धरवद्दयालुः ।
न सौमनस्यं समितौ च तस्मिन्, विश्वासपात्रं स न चोभयोर्यत् ॥६९॥
शर्मण्यशिष्टिः समितिस्तथैनं तूष्णीं स्वकार्यान् निरसारयाताम् ।
षड्विंशवर्षेऽथ च सप्तविंशवर्षेऽस्मि यूरोपनिवासकाले ॥१००॥
अपश्यमाश्चर्यदृशा यदेते यूरोपगाः सम्प्रति भारतीयाः ।
कस्माद्दधन्ते हरवद्दयालौ रोषं महान्तं कटुतामनल्पाम् ॥१०१॥
तदा सहि स्वीडनमध्यवासीऽहं न तं द्रष्टुमलं तदासम् ।
युद्धे समाप्ते किल बर्लिनस्था सा भारतीया समितिः समाप्ता ॥१०२॥
आशासु तेषां जलमभ्रमच्च तज्जीवनं नीरसमेव जातम् ।
द्यूतं महत्क्रीडितमेतदासीद्याताश्च तस्मिन्हि पराजयं ते ॥१०३॥
नियुद्धवर्षेषु महत्त्वमाप्तं वाग्वज्रपाता अभवंश्च तेषु ।
सर्वास्ववस्थासु तदन्तरन्तु स्याद्भारभूतं किल जीवनं तत् ॥१०४॥
अहो वराका मुखयाचितस्य चिन्ताविहीनस्य च जीवनस्य ।
भाग्यं गृहीत्वा भुवि नागताश्च प्रत्यागतास्ते न च भारतं स्वम् ।१०५।
पराजिते नाभवदेव तेषां शर्मण्यदेशे क्वचन प्रतिष्ठा ।
तपस्विभिस्तैर्विपदां बहूनां कर्तव्यमासीत्पुनराभिमुख्यम् ॥१०६॥
केचित्तु तेषां ब्रिटिशेन देशं प्रत्येतुमासन् विहितानुदेशाः ।
भूयोभिरेषामिह वासबन्धः शर्मण्यदेशे सहनीय आसीत् ॥१०७॥
तेषां दशाभूद्दयनीयरूपा आसन्निमे नागरिका हि राज्ये ।
यात्रार्थपत्राण्यपि तेषु नासन् वैधानि यैस्ते क्वचिदागताः स्युः ॥१०८॥

शर्मण्यदेशाद्बहिरेतुमेषां सम्भावना नास्ति कदाचनापि ।
शर्मण्यदेशेऽपि निवासमध्ये बाधा अनन्ता अभवन्तमीषाम् ॥१०९॥
तत्रत्यशिष्टैः पुरुषैर्मतास्ते तत्राधिवासं प्रभवन्ति कर्तुम् ।
चिन्ताभिपूर्णं विपदाभिभूतं चाभूत्तदीयं खलु जीवनं तत् ॥११०॥
दिने दिने कापि न कापि चिन्तान्वारोहतिस्माधिशिरः किलैषाम् ।
किमश्नुयामेति कथञ्च जीवेमेत्युत्तराभाव इमानिहाहन् ॥१११॥
वर्षात्त्रयस्त्रिंशकतोऽथ नात्सीप्रभाव एषामतिदुर्भगत्वम् ।
अवीवृधच्चेच्छतशोऽपि नात्सीमतानुगाः स्युः शमितास्तदा स्युः ॥११२॥
शर्मण्यदेशे विमता अनार्या वैदेशिकाश्चापि किलैशियायाः ।
न स्वागतं तत्र भवत्यमीषां, वासोऽपि साधुत्वविनिर्भरोऽस्ति ॥११३॥
साम्राज्यवादे मम पक्षपातो यदि ब्रिटेनस्य स भारते स्यात् ।
सा घोषणाऽकारि च हिट्लरेण ब्रिटेनसद्भावनलब्धये वै ॥११४॥
अतो न कस्मैचन भारतीयायैष प्रदातुं बलमिच्छति स्म ।
येन ब्रिटेनस्य कृतोऽपराधः, आराधनं चास्य न कारितं स्यात् ॥११५॥
ये बर्लिने देशनिकारिताश्च दृष्टा मया केचन भारतीयाः ।
तेषामभूदेकतमस्तु पिल्ले श्रीचम्पकश्रीरमणोऽपि कश्चित् ॥११६॥
पुरातनस्यैष दलस्य सभ्यः प्रसिद्ध एष भ्रमणे-रुचिश्च ।
स भारतीयैर्युवभिर्नवीनैः प्रदत्तकुत्स्योपपदस्तदासीत् ॥११७॥
स केवलं राष्ट्रियताप्रधानभाषाध्वना शोचितुमर्हति स्म ।
प्रश्नस्य कस्यापि समाधितोनाग्लायन्नभूदार्थिकतादिदृष्ट्या ॥११८॥
सरस्टील-निर्मापित हेलमेट्से शर्मण्यके क्वापि स्वराष्ट्रवादे ।
प्रीतिदधाति स्म स चात्र, तस्य नात्सीभिरासीच्च रहस्यमैत्री ॥११९॥
मासा व्यतीताः कतिचित्तु कारागारे मया वृत्तमभूदधीतम् ।
यच्चम्पकश्रीरमणस्य जातं देहावसानं किल बर्लिनेऽद्य ॥१२०॥
वीरेन्द्रनाथः किल भारतीयप्रसिद्धवंशोदित आस्त चैकः ।
स सर्वथा भिन्नरुचिस्तु चट्टोपाध्याय आसीत्पुरुषोऽद्भुतश्च ॥१२१॥
'चट्टो' इतीमं कथयन्ति लोकाः सोऽत्यन्तयोग्यः सुखदःस्वभावात् ।
परं स्वयं सन्ततदुःखपूर्णः पुराणजीर्णाम्बरवेष्टितोऽभूत् ॥१२२॥

प्राथोऽस्य च स्वाशनपानक्लृप्तिः सुदुष्करैवाभवदाङ्लिकी सा ।
मनोविनोदं प्रतिमोदमानमनस्कता नो व्यजहात्परं तम् ॥१२३॥
यदा पठन्नासमिहांग्लदेशे तदा स कक्षाः कतिचिन्मदग्रे ।
यदा च हैरोऽध्ययने प्रविष्टस्तदा स आसीदधि-आक्सफोर्डम् ॥१२४॥
तदा प्रभृत्येष न भारतेऽस्मिन् प्रत्यागतोऽभूदपि चोन्मनाः सन् ।
गृहस्मृतिस्तं विकलीकरोति सोऽत्युत्सुको भारतवर्षमेतुम् ॥१२५॥
समानि कौटुम्बिकबन्धनानि समाप्तिमाप्तानि किलास्य तावत् ।
सुनिश्चितं चेत्स कदाचिदत्र समेष्यति प्राप्स्यति दुःखमन्तः ॥१२६॥
स ज्ञास्यतीहास्ति न चानुकुल्यं परं व्यतीतेष्वपि वत्सरेषु ।
कृतासु यात्रासु च दूरगासु किञ्चिद् गृहाकर्षणमत्र जायते ॥१२७॥
निर्वासितः कश्चिदपि स्वदेशाद् रोगात्कदाचिन्न विमुच्यतेऽस्मात् ।
यो मैजिनीति क्वचिदुच्यतेऽर्थादात्मक्षयो नाम निगद्यते सः ॥१२८॥
अवश्यमेतत्कथयामि देशान्तरेषु देशाद्बहिरासितानाम् ।
न भारतीयस्य तु कस्यचिन्मे प्रभाव आसीन्मनसि प्रकृष्टः ॥१२९॥
संवेदना यद्यपिकाचिदस्ति प्रभावितश्चास्मि किलाहमेतैः ।
प्राशंसमेतद्बलिदानकानि न्यधामथैतेषु सहानुभूतिम् ॥१३०॥
ते वस्तुतो यासु विपत्सु मग्ना याश्चापदस्तैः कतिचित्प्रसोढाः ।
अद्यापि चैता विवशाः सहन्ते ता वीक्षमाणोऽस्मि किलातिखिन्नः॥१३१॥
नाहं किलापश्यमिह प्रभूतांस्ते सन्ति नूनं समतीतसङ्ख्याः ।
विश्वत्र विश्वे वितता इदानीमिति प्रतीयन्त इहाल्पकास्ते ॥१३२॥
तेषाञ्च नामान्यपि कानिचिद्धै स्वल्पानि तावन्मयका श्रुतानि ।
केचित्तु लोकादिह भारतीयादत्यन्तमेवाद्य पृथक्त्वमाप्ताः ॥१३३॥
येषाञ्च सेवां कृतवन्त एते निर्वासनादण्डमिमं दधन्ते ।
ते सर्वथा विस्मृतवन्त एतांस्तेष्वेष कांश्चिन्मिलितोऽस्मि धन्यान् ॥१३४।
वीरेन्द्रनाथःकिल तेषु चट्टोपाध्याय आसीत् स च मानवेन्द्रः ।
बङ्गीययोर्मामनयोश्च बुद्धेः प्राभावयत्कोप्यतिरेक एकः ॥१३५॥
वीरेन्द्रनाथः प्रथमं प्रदिष्टस्तं मानवेन्द्रं कथयानि रायम् ।
स क्रान्तिकारी प्रथमः किलाभूदितः पलाय्यैष च रूसमार्गात् ॥१३६॥

अत्रास्य कामिण्टरनेऽग्रगण्यं स्थानं तदाभून्नियतं महीयः।
संस्थास्त सा ह्यान्तरराष्ट्रियैका या साम्यवादानुगमप्रधाना ॥१३७॥
पश्चादयं तामजहादिमायं हि रूसाद्बहिर्देशगताः स्वसंस्थाः।
स्थानीयतत्कालभवस्थितीनां विचारकालेऽवगणय्य नैजीः ॥१३८॥
नीतीर्विनिर्धार्य दृढाग्रहेण तत्पालनं कामयते स्म सर्वथा।
स्याचीनदेशं गतवानमुष्याः स राष्ट्रियायाः प्रणिधित्वमाप्य ॥१३९॥
ततः परं भारतमागतोऽसौ निगृह्य कारागृहवासमाधात्।
व्यमुच्यतापीति च तन्महत्त्वं पृथक्स संस्थामिह क्लृप्तवांश्च ॥१४०॥
या रेडिकल् इत्यभिधीयते स्म यया समस्थाप्यत साम्यवादः।
पञ्चाशवर्षे चतुरन्विते‌ऽसौ दिवंगतो जन्वरिपञ्चविंश्याम् ॥१४१॥
अनेन रायेण च राजधान्यां रूसस्य साक्षात्करणं ममाभूत्।
होरार्धकालेऽध्यगमं तदीयं रूसात्पृथक् सम्प्रति साम्यवादम् ॥१४२॥
प्रह्वः किलासीत्प्रतिसाम्यवादं न नूनमासीद् दृढसाम्यवादी।
वीरेन्द्रनाथस्त्रिभिरेष वर्षैः कारागृहे तिष्ठति भारतीये ॥१४३॥
एभ्योऽतिरिक्ता अपि भारतीया यूरोपदेशेष्वभवन् भ्रमन्तः।
क्रान्तिकारिस्वरमाश्रयन्तः जोवातु चित्तञ्च न्यवोधयन्नः ॥१४४॥
कौतूहलात्तानिह पर्यपृच्छन् प्रश्नानहं तान् दमितानवैमि।
ब्रिटेनशिष्टेश्च रहस्यवेदिवर्गस्य मुद्राभिरिहाङ्कितास्ते ॥१४५॥
यूरोपदेश्यानमरीकदेश्यानपि स्म पश्याम इमे बहूंश्च।
अनेकदा वीलनवे च रोमारोलां प्रयाताश्च विलामथोल्गाम् ॥१४६॥
तदन्तिकं गन्तुमिमे च गान्धेः पत्रं गृहीत्वा प्रयतामहे स्म।
एकस्य यूनः स्मृतिमप्यमूल्यां जाने किलान्स्र्ठटॉलर नामकस्य ॥१४७॥
न नास्तिशिष्टावधुनास्ति शर्मन्देशोऽयमित्यस्ति यथा तथैव।
न्यूयार्कदेशेऽपि च नागरिक्याः स्वाधीनतायाः न समार्थनास्ति॥१४८॥
सा केवलं संघहिताय रोअर श्रीवाल्डविन् नेतृवराय युज्यते।
तथा जिनेवास्वभवत्सुमैत्री मुर्कजिना श्रीधनगोपकेन ॥१४९॥
यूरोपयानात्प्रथमं स्वदेशे श्रीफ्रैंकबुक्मैनमिहाभ्यपश्यम्।
स आक्सफोर्डे वर्गास्य साहित्यमपि प्रदत्तवान् ॥१५०॥

आश्चर्यमागामिदमप्यधीत्य, न बुद्धिवादेन किलानुयातम् ।
आकस्मिकं तत्परिवर्तनं च दोषस्य चोरीकरणं यतस्ततः ॥१५१॥
धर्मस्य वै चोद्धरणं पुनस्तत् मदीयदृष्टौ सुगमं न चासीत् ।
नाहं त्वबोधं मतिमन्त एव, ये भान्ति तेष्यद्भुतभावभाव्याः ॥१५२॥
तेऽपीयता वेगबलेन नोद्याः कथं भवन्तीति कुतूहलं मे ।
स फ्रैंकबुकमैन इहामिलन्मामामन्त्रयच्चात्र रुमानियायाम् ॥१५३॥
आयोजिते चान्तरराष्ट्रिये स्वे सम्मेलने साधुगृहप्रयुक्ते ।
पश्चात्तपाम्येष न तत्र गन्तुं यत्प्राभवं द्रष्टुमिमां मनोज्ञाम् ॥१५४॥
भावाभिभूतत्वमितीह नाभूदद्यापि तृप्तं न कुतूहलं मे ।
पश्यामि वृत्तान्यपि वर्धयामि वर्गानुचेष्टामिहचाक्सफोर्डे ॥१५५॥

कृष्णयाजुर्वेदतित्तिरिसंहितासायणगिरां
व्याख्यां स्वगुरुणा विरचितां समपीपदद्यो विस्तृताम् ।
तेन कविनानूदिते श्रीनेहरूचरिते महा-
काव्ये गतः सर्गो युरोपेतत्प्रवासश्चैकविंशः ।

पारस्परिको मतभेदः

अनुष्टुप्

द्वाविंशः सर्गः

अस्मासु स्विट्जरं देशं प्राप्तेषु समनन्तरम् ।
आङ्ग्लदेशेऽभवत्सर्वहरताल: प्रवर्तितः ॥ १ ॥
येनात्युत्तेजितोऽभूवं सपक्षो हरतालिनाम् ।
किञ्चिद्दिनानन्तरं स दुरन्तमगमद्यदा ॥ २ ॥
तदा मम प्रभाति स्म स्वस्मिन्नाघातपातनम् ।
कांश्चिन्मासाननुप्राप्तेतद्देशगमने मया ॥ ३ ॥
तत्रेङ्गालखनिस्थानां श्रमिकाणां कलिश्च सः ।
प्रवर्तते स्म चाद्यापि ध्वान्ताक्रान्तार्धलन्दने ॥ ४ ॥
एकं चास्मि खनिं यातोऽल्पीयसेऽहमनेहसे ।
डरवीशायरं मन्ये स्यादिदं तत्खनिस्थलम् ॥ ५ ॥
नराणामथ नारीणां बालकानां मुखानि च ।
पीतान्यपश्यं प्रत्यक्षं प्रायश्चिपिटितानि च ॥ ६ ॥
इतोऽप्यधिकमक्षीणि यदुन्मीलयते नृणाम् ।
तदासीदभियोगानां हरतालिषु योजनम् ॥ ७ ॥
न्यायालयेषु ग्राम्येषु स्थानीयेष्वथवा नृषु ।
श्रमिकेषु यथैवासीत् नृषु, नारीष्वहो तथा ॥ ८ ॥
न्यायाधीशाश्च तेष्वासन् तत्खनीनां निदेशकाः ।
प्रबन्धका वा यैः कार्याः श्रमिकाणां विनिर्णयाः ॥ ९ ॥
विनिर्मितैर्विधानैस्तैऽपराधेष्वल्पकेष्वपि ।
अदण्ड्यन्त वराकास्तैर्व्याघ्रै र्वा अजशावकाः ॥ १० ॥
अरुष्यमहमत्यन्तं तत्रैकत्राभियोगके ।
यत्रैकस्मिन् काष्ठगेहे दृष्टास्त्रिचतुराः स्त्रियः ॥ ११ ॥

सवत्सा इव ता गावो, हरतालिस्थले श्रमम् ।
कर्तुं गतान् धिक्कुर्वन्त्योऽनीयन्तात्राभियोगतः ॥ १४ ॥
युवत्यो मातरश्चैतास्तासाञ्च लघवोऽर्भकाः ।
अपूर्णजठरा आसन् दुःखिताश्चेत्यलक्ष्यत ॥ १३ ॥
दैर्घकालेन कलिनात्यन्तं कृशकलेवराः ।
ग्रस्ता नितान्तदुर्गत्या प्रतिभान्ति स्म ता भृशम् ॥ १४ ॥
श्रमिकद्रोहिणां तेषां तन्मुखग्रासछेदिनाम् ।
प्रति ताः कटुतामन्तर्दधत्यः प्रतियान्ति च ॥ १५ ॥
श्रीमतां श्रेणिका हन्त, वर्गन्यायकरा इमाः ।
दुर्गतान् प्रति कुर्वन्ति कीदृशं न्यायमित्यहम् ॥ १६ ॥
प्रायः पठितवान् नैकपुस्तकेषु यदा तदा ।
भारते त्वीदृशन्यायवार्ताः सन्ति दिवानिशम् ॥ १७ ॥
किन्तु यत्किञ्चनापि स्यादाङ्ग्लदेशे किलेदृशः ।
न्यायस्य तूदाहरणं न जातु समभावयम् ॥ १८ ॥
अनेन हेतुना तेन दुर्न्यायेनातिदुःखितम् ।
मनो मम दुराघातपातेनेवाकुलीकृतम् ॥ १९ ॥
अन्यच्चैकं विलोक्याहमाश्चर्यं भृशमागतः ।
हरतालिष्वभूद् व्याप्तं तद्भीतेर्वायुमण्डलम् ॥ २० ॥
निश्चप्रचं तैः पुरुषैः परुषैश्चापि शासकैः ।
अत्यन्तं भापिता आसन् सर्वे येनासहन्त ते ॥ २१ ॥
मन्येऽसहन्त ते मानहानयेऽपि कृतानि तैः ।
तूष्णीमेवाखिलान्येषां तानि दुर्वर्तनान्यपि ॥ २२ ॥
सत्यमेतद् दीर्घकालकलिना श्रान्ततां गताः ।
तेषां च साहसं भङ्क्तुमकर्तुं तत्सहायताम् ॥ २३ ॥
अन्यश्रमिकसंघानां श्रमिकैस्तत्सहायिभिः ।
त्यक्तमासीत्साहचर्यं, नासंस्ते भारतीयवत् ॥ २४ ॥
भारतस्य दरिद्रस्य श्रमिकापेक्षयाऽन्यतः ।
सर्वतः श्रमिकाणाञ्चास्त्यन्तरं स्वर्गमर्त्यवत् ॥ २५ ॥

आसीद्ब्रिटेनश्रमिकसङ्घोऽद्यावधि वै दृढः।
सत्यं हि कृत्स्नदेशस्य श्रमिकाणां न केवलम्॥ २६॥
विश्वश्रमिकसङ्घानामप्यस्ति समवेदनम्।
तेषाञ्च विषये भूयान् प्रचारोऽप्यद्य जायते॥ २७॥
इतोऽतिरिक्तान्यपि ते साधनान्यत्र बिभ्रति।
भारतश्रमिकाणान्तु भाग्यं न पुनरीदृशम्॥ २८॥
तथापि भयभीतेषु श्रमिकाक्षिषु सर्वतः।
किञ्चिदद्भुतसादृश्यं दृश्यतेऽधीनताकृतम्॥ २९॥
निर्वाचनं तत्र वर्षे भारतेऽस्मिंस्त्रिवार्षिकम्।
प्रादेशिक्या विधानार्थसभाया लोकसंसदः॥ ३०॥
नाहं रुचिमधां तत्र निर्वाचनविधौ मनाक्।
किन्तु तत्राभवच्छब्दयुद्धं वत घनाघनम्॥ ३१॥
स्विट्जर्देशमपि प्राप्ता ध्वनयस्तस्य केचन।
स्वराजदलमेतर्हि काङ्ग्रेसदलतां गतम्॥ ३२॥
तद्विरोधाय मदनमोहनो मालवीयकः।
श्रीलाजपतरायश्च व्यधत्तां नूतनं दलम्॥ ३३॥
राष्ट्रियं दलमित्येतत्तन्नामकरणं कृतम्।
नाहमध्यगमं नूत्नप्रत्नयोर्मूलतोऽन्तरम्॥ ३४॥
वस्तुतोऽद्य विधानार्थसभायै दलतो दले।
तावदेवान्तरं यावदीश्वर्या ईश्वरीयके॥ ३५॥
यथार्थः कोऽपि सिद्धान्त एकस्मादपरं दलम्।
न पृथक्कुरुते स्मेति स्थितिस्तात्कालिकी स्थिता॥ ३६॥
स्वराजदलमत्रैकं नवीनं योद्धृरूपकम्।
स्वीचकार परेभ्यश्च कठोरां नीतिमग्रतः॥ ३७॥
राष्ट्रियं च दलं नम्रां नीतिमूरीचकार तत्।
मात्रामात्रकृतं चासीत् तत्त्वतो न तदन्तरम्॥ ३८॥
समाजदलतश्चैतत्सरकारसमर्थनम्।
तच्च पूर्णतया हिन्दूपक्षस्य परिपोषकम्॥ ३९॥

पुरातनं च सुदृढं पन्थानं स समार्थिथत् ।
सामाजिक्या सांस्कृतिक्याऽऽर्थिक्या दृष्ट्वा स मन्यते ॥ ५४ ॥
सनातनं धर्ममेव श्रुतिस्मृतिपुराणगम् ।
भारतीया नृपाः भूमिपालास्तं मन्यते हितम् ॥ ५५ ॥
परिवर्तनमेकञ्च वाञ्छतिस्मान्तरङ्गतः ।
यद्भारताद्बहिर्यायात्तद्वैदेशिकशासनम् ॥ ५६ ॥
तेनाधीतं यौवने यद्, राजनीतौ च शिक्षितम् ।
तयोरद्यापि तद्बुद्धौ प्रभावोऽस्ति प्रतिष्ठितः ॥ ५७ ॥
युद्धानन्तरगायाः स विश्याः शत्यास्तु जीवनम् ।
जगत्क्रान्तिकरं सोनविश्या दृष्ट्यास्म पश्यति ॥ ५८ ॥
अथवा टी.एच्. ग्रीनस्य जानस्टूवर्टमिलस्य च ।
ग्लैडस्टनस्य मौलेर्वा दृष्ट्यापश्यत्स वै जगत् ॥ ५९ ॥
समाजविज्ञानदृशा चतुरब्दशतपूर्वया ।
हिन्दूसंस्कृतिदृष्ट्या वा पश्यतीमां स भूमिकाम् ॥ ६० ॥
विचित्रा संगतिरियं परस्परविरोधिनाम् ।
परस्परविरोधानां समाधानविधायिनीम् ॥ ६१ ॥
स्वशक्ति विश्वसंश्चैष कल्पने विस्मयाय नः ।
उत्तिष्ठतो यौवनाच्च विचित्रक्षेत्रगामिनीः ॥ ६२ ॥
स सार्वजनिकीः सेवाः कुर्वन्नाश्चर्यभूरभूत् ।
काशीहिन्दूविश्वविद्यालयस्थापनकीर्तिभाक् ॥ ६३ ॥
याथार्थ्यं तत्परत्वं च तस्यास्ते पारदर्शकम् ।
तस्य भाषणशक्तिश्च प्रभावभरशालिनी ॥ ६४ ॥
स स्वभावेन मधुरो व्यक्तित्वेन च मोहकः ।
प्रियः स भारतीयानां हिन्दूनां स त्वतिप्रियः ॥ ६५ ॥
राजनीतौ न बहवः सन्ति तेन सुसम्मताः ।
न चैनमनुयान्तोऽप्याद्रियन्ते प्रेमपूर्वकम् ॥ ६६ ॥
दीर्घयावस्थया सार्वजनिक्या दीर्घसेवया ।
स वशिष्ठो भारतीयराजनीतेरिहास्ति च ॥ ६७ ॥

किन्त्वीदृशां समयतः पश्चाद्गानामिवाप्यहो ।
सर्वथा चाधुनिकतो जगतः पृथगासिनाम् ॥ ६८ ॥
तेषां भाषाध्वनेर्ध्यानं लोकाः कुर्वन्ति साम्प्रतम् ।
केचित्तु नावगच्छन्ति नापेक्षन्ते च केचन ॥ ६९ ॥
एतैर्हेतुभिरासीत्तत्स्वाभाविकमिह स्वतः ।
मालवीयो न स्वराज्यदले सम्मिलतादिति ॥ ७० ॥
इदं दलं राजनीतिदृशा तस्मै सुदूरगम् ।
कांग्रेसनीतिसंबन्धे दृढमास्तेऽनुशासनम् ॥ ७१ ॥
सोऽकाङ्क्षतानुग्रदलं राजनैतिककर्मसु ।
साम्प्रदायिककार्येषु च स्याच्चेतः स्वतन्त्रता ॥ ७२ ॥
इदं द्वयमपि प्राप्तं तेनाभूद् राष्ट्रिये दले ।
यस्यासौ जनकोऽप्यासीन्नायकश्चाप्यवर्तत ॥ ७३ ॥
किन्तु लालालाजपतरायस्तत्कथमाश्रितः ।
इति मे सुगमं नाभूदतस्तत्रान्वचिन्तयम् ॥ ७४ ॥
पश्चात्तु प्रह्वतां तस्य दक्षिणं पक्षमाश्रिताम् ।
साम्प्रदायिकनीतिं च प्रति प्रीतिमवागमम् ॥ ७५ ॥
तस्मिन्वर्षे जिनेवायामहं लालामवेक्षयम् ।
सह तेन च या वार्ता अभवंस्ता न तादृशः ॥ ७६ ॥
याभिः प्रतीयतां तस्य कांग्रेसं प्रति रूक्षता ।
कथञ्चाभूदिदमिति नाद्यावधि किलाविदम् ॥ ७७ ॥
निर्वाचनफले केचिदाक्षेपास्तेन ये कृताः ।
तैरवागममस्त्यस्य चित्ते किमधुना चलत् ॥ ७८ ॥
स आक्षिपद्धि कांग्रेसनेतॄन् बाह्यजनैः सह ।
षड्यन्त्ररचनायां ये सन्ति सन्ततसोद्यमाः ॥ ७९ ॥
काबुलेषु च कांग्रेसशाखोद्घाटनतश्च तैः ।
षड्यन्त्रसृष्टी रचिता काचिदित्यपि भाषितम् ॥ ८० ॥
अहं पश्यामि तेनैषु स्वकीयाक्षेपवस्तुषु ।
न कदाचिदपि प्रोक्ता सूक्तियुक्तिः समर्थिका ॥ ८१ ॥

पुनः पुनः प्रार्थनायां कृतायामपि स त्विदम् ।
विवृत्यान्ववदन्नापि प्रमाणं किञ्चिदन्वशात् ॥ ८२ ॥

स्मरामि स्विट्जरे देशे भारतीयेषु केषुचित् ।
वृत्तपत्रेषु लालाजीकृताक्षेपानपीपठम् ॥ ८३ ॥

तथास्तब्ध इवातिष्ठं दधत्कांग्रेसमन्त्रिताम् ।
काङ्ग्रेसविषये सर्वं वेदनीयमवेदयम् ॥ ८४ ॥

इह काबुलकांग्रेससमितिः काङ्ग्रेसतः ।
सम्बन्धयितुमासीन्मे करः सन्धिकरः स्वयम् ॥ ८५ ॥

श्रीदेशबन्धुदासेन शुभारम्भोऽस्य कारितः ।
न तदा नाद्य वा ज्ञातं क्वाऽऽसीदाक्षेपमूलता ॥ ८६ ॥

तथापि तत्स्वरूपं तु निरूप्य कथयाम्यहम् ।
यावत्कांग्रेससम्बन्धमाक्षेपाणाममूलता ॥ ८७ ॥

न जानेऽहं स लालाजी कथं भ्रान्तपथोऽभवत् ।
नानापवादेऽप्येतेन बिश्वासः स्यात्कृतोऽञ्जसा ॥ ८८ ॥

संभावयाम्युवेदुल्लामौलवेस्तेष्वहःस्विमम् ।
मन्त्रणावसरे काचिल्लीला प्रावीभवद् दृढम् ॥ ८९ ॥

यद्यप्यस्यां न मे काचित्तादृशी धीरजायत ।
निर्वाचनदिनेष्वेतद् तादृशत्वं प्रजायते ॥ ९० ॥

तत्राद्भुतं जायते यन्मस्तिष्कं विकृतिं व्रजेत् ।
सारासारविचारश्च जनानाममपमृज्यते ॥ ९१ ॥

निर्वाचनानामेतेषाँ यावत्पश्याभि कौतुकम् ।
जुगुप्सा वर्धते तेभ्योऽरुचिश्चैकोपजायते ॥ ९२ ॥

जुगुप्सैषाऽरुचिश्चेयं लोकतन्त्रीयभावतः ।
सदा विप्रतिपन्ना स्यात्स हि निर्वाचनाश्रितः ॥ ९३ ॥

शङ्कायितैरलं, देशे साम्प्रदायिकतोत्थितम् ।
वातावरणमुद्वीक्ष्य तत्रोत्थानमपेक्षितम् ॥ ९४ ॥

राष्ट्रियस्य दलस्यास्य तादृशोऽन्यदलस्य वा ।
मुस्लिमानां मनस्यासोद्धिन्दूसंख्योत्थितं भयम् ॥ ९५ ॥

हिन्दूनां च मनस्यासीद् रोषो मुस्लिमवर्गगः ।
ते व्यपेक्षाप्रभावं स्वं दर्शयन्तीति पश्यताम् ।। ९६ ।।
अनेकेषां च हिन्दूनामनुभूतिरभूदियम् ।
यथा 'यदस्ति सविधे तत्सर्वं न्यस्यतामिह' ।। ९७ ।।
अन्यथाच्छिद्य संभिद्य सर्वं संस्कुर्महे वयम् ।
इति मुस्लिमवर्गस्यास्तेऽस्मानुद्दिश्य घोषणा ।। ९८ ।।
अन्यतः 'सर्वकारेण सह सङ्गतितो भयम् ।
प्रदर्श्यानुग्रहांल्लब्धुमपि यत्नानचीकरन् ।। ९९ ।।
हिन्दूमहासभानेन महत्त्वमधिकं श्रिता ।
हिन्दूराष्ट्रियताया हि प्रातिनिध्यं बिभर्ति सा ।। १०० ।।
साम्प्रदायिकते तत्र हिन्दूमुस्लिमयोरिमे ।
प्रतिस्पर्धितया तत्रान्योन्यस्याभिमुखं स्थिते ।। १०१ ।।
महासभायाः कलहृष्टाभिश्चेष्टाभिरुद्गतात् ।
परिणामान्मुस्लिमानां साम्प्रदायिकता तता ।। १०२ ।।
इत्थं घातप्रतीघातप्रक्रियायां च भारते ।
साम्प्रदायिकतानां स पारदो भृशमुत्थितः ।। १०३ ।।
विशेषाच्च समस्येयं देशस्याल्पमहीयसोः ।
सङ्ख्यादिदृष्ट्या दलयोरगात्कलहहेतुताम् ।। १०४ ।।
अद्भुता चास्त वार्तेयं देशभागेषु केषुचित् ।
आसीत्प्रतीपावस्थेयं सिन्धुपञ्चाम्बुदेशवत् ।। १०५ ।।
तत्र हिन्दूशिष्यसङ्ख्या सम्भूयापि न मुस्लिमैः ।
समाना किन्त्वभूत्स्वल्पा ततस्तौ बिभ्यतस्ततः ।। १०६ ।।
यथा हि हिन्द्वाधिक्येषु प्रदेशेष्वत्र मुस्लिमाः ।
विभ्यति स्म तथैवैते मुस्लिमाधिक्ययोस्तयोः ।। १०७ ।।
यदि सत्यं वदामेह मध्यमश्रेणयो जनाः ।
सेवावृत्त्यनुसन्धानपराश्चेतसि बिभ्यति ।। १०८ ।।
मास्म नः सेवावसरश्छिन्नो भूदिति शङ्किताः ।
किञ्चित्संस्थापितस्वार्था भूमिपाला धनान्विताः ।। १०९ ।।

अप्येतदाचूलमूलं कदाचित् परिवर्तनम् ।
अस्माकं सर्वनाशाय कल्पेतेति च बिभ्यति ॥ ११० ॥

साम्प्रदायिकतावृद्धावस्यां हानिर्महत्यभूत् ।
सा स्वराजदलस्यास्य मुस्लिमानां विनिर्गमात् ॥ १११ ॥

स्वसाम्प्रदायिकीसंस्थासमाश्रयणतः पुनः ।
हिन्दूनां निर्गतानां च स्वराष्ट्रदलसंश्रयात् ॥ ११२ ॥

यावदासीच्च सम्बन्धो हिन्दूनेतृभिरस्य च ।
तावल्लालामालवीययोगोऽभूद् भूरिशक्तिमान् ॥ ११३ ॥

साम्प्रदायिकताकेन्द्रे चात्र पञ्चनदे महान् ।
प्रभावोऽभवदेतस्य दलीयबलवर्धकः ॥ ११४ ॥

स्वराजदल-काङ्ग्रेसपक्षतो युद्धभारभृत् ।
पिता ममाभूदिति यं वोढुं तस्य सहायकः ॥ ११५ ॥

स देशबन्धुदासोऽभूत् कलहानन्दलम्भकः ।
पिता च मम कस्याञ्चित् स्थितावपि न युद्धतः ॥ ११६ ॥

स्वचित्ताहरणे शक्तः सर्वां शक्तिं स चार्पिपत् ।
प्रतिपक्षबलं वर्धमानं वीक्ष्य विशेषतः ॥ ११७ ॥

स प्रायुङ्क्त घनाघातान् प्रतिघातांश्च सोढवान् ।
दलयोः कोऽपि कस्यापि नानुरोधमिहाकरोत् ॥ ११८ ॥

शिष्टतापि परित्यक्ता तत्र शिष्टधुरन्धरैः ।
स्मृतिर्निर्वाचनस्यास्य कट्वी समभवत्सदा ॥ ११९ ॥

राष्ट्रियं तु दलं प्राप साफल्यं भूरिमात्रया ।
साफल्येन परं तेन संसदाभा कृशीकृता ॥ १२० ॥

दलं तदाकृष्टिकेन्द्रं नम्रां नीतिमशिश्रयत् ।
स्वराज्यदलमप्यासीत्कांग्रेसे दक्षिणो भुजः ॥ १२१ ॥

तत् स्वशक्तिविवृद्धयै च बहून् संदिग्धपूरुषान् ।
प्रावेशयद्दले येन श्रेष्ठतास्याप्यनश्यत ॥ १२२ ॥

राष्ट्रियेण दलेनात्र नम्रनीत्याऽधराध्वना ।
उपाधिधारिणो भूमिपालांश्च मिलमालिकान् ॥ १२३ ॥

अन्यांश्चापि च संगृह्य तथायोजि निजं दलम् ।
मञ्जूषिका भानुमत्या इव यद्विस्मयावहम् ॥ १२४ ॥
क्व राजनीतिर्गम्भीरा क्वेमे च चपलाः स्वतः ।
वानरार्द्रकसम्बन्ध इवैषामप्यलक्ष्यत ॥ १२५ ॥
षड्विंशवर्षस्यास्यान्ते घटितं दुःखदं तु यत् ।
जातीयवैमनस्यस्य तदधःपातदर्शनम् ॥ १२६ ॥
शयानो रोगशय्याय श्रद्धानन्दो महाशयः ।
धर्मान्धेन मदान्धेन मुस्लिमेनाहतो हतः ॥ १२७ ॥
यो गोरक्षभुशुण्डीनामग्रतो वक्षसा स्थितः ।
तद्गोलीसम्मुखस्यास्य तस्याभूदीदृशी गतिः ॥ १२८ ॥
अष्टाब्दात्पूर्वमेतेन नेत्रैवार्यसमाजिनाम् ।
दिल्ल्यां जामामस्जिदस्य वेद्यां स्थित्वा प्रबोधिता ॥ १२९ ॥
हिन्दूनां मुस्लिमानां च सभा नूनं गरीयसी ।
भारतस्य स्वराष्ट्रस्य स्वातन्त्र्यं चैकतां प्रति ॥ १३० ॥
स एव जनसम्मर्दो हिन्दूमुस्लिमयोर्जयः ।
इति घोषणयाकार्षीत् स्वागतं तस्य वाग्मिनः ॥ १३१ ॥
मस्जिदाद्बहिरागत्य तैश्च तद्घोषणोपरि ।
स्वशोणितैः सुसंयुक्ता मुद्रैकाप्यङ्किताऽभवत् ॥ १३२ ॥
तस्यैवाद्य स्वदेशीयभ्रात्राऽऽक्रान्तस्य योगिनः ।
शान्तस्य चैवाश्रान्तस्य प्रोड्डीनाः प्राणपक्षिणः ॥ १३३ ॥
घातको हन्त सोऽपश्यत्करोमि शुभकर्म तत् ।
भविष्यति शुभोदर्कं यन्माँ नाकाय नेष्यति ॥ १३४ ॥
कायिकक्लेशसहने साक्षान्मृत्योरुपेक्षणम् ।
साहसं, कायिकं नाम साहसं स्तौमि नित्यशः ॥ १३५ ॥
मन्येऽस्मासु च भूयांसः स्तुवन्तीदृशसाहसम् ।
अभयं त्वभयं दृष्टं श्रद्धानन्दे महात्मनि ॥ १३६ ॥
प्रांशुत्वं, भव्यमूर्तित्वं, कषायवसनं पुनः ।
अपि प्रवयसः साक्षाच्चक्षुषी च चमत्कृते ॥ १३७ ॥

आननेऽन्यप्रसादेषु सामर्षद्युतिधावनम् ।
सजीवमिव तच्चित्रं को नु विस्मर्तुमर्हति ॥ १३८ ॥

प्रायस्समक्षमायाति ममाक्ष्णोस्तत्प्रभावकृत् ।
स्तौमि तन्मनसा तत्र तत्र चित्रं महात्मनः ॥ १३९ ॥

श्रीमद्भागवते द्विसप्ततिरहो स्तोत्राणि यानि स्थिता-
न्येषां भारतभाषयानुवचनं पद्यात्मकं योऽकरोत् ।
तेनानूदितमामकीनकथया रूपं घृतं नेहरू-
काव्यस्यास्य च सर्ग एति मतभेदाख्योऽत्र द्वाविंशकः ॥ १४० ॥

ब्रसेल्से पीडितानां सभा

स्रग्धरा

त्रयोविंशः सर्गः

षड्विंशाब्दावसाने वरलिनमगमं तत्र चाध्यागमं य-
त्तूर्णं भावि ब्रसेल्से पददलितनृणां जातिसम्मेलनं तत्।
हृष्टस्तेन स्वदेशं प्रतिदलमलिखं राष्ट्रियायाः सभायाः
भूयात्सम्मेलनेऽस्मिन् प्रतिनिधिविधिना योगदानं किलेति ॥१॥

प्रस्तावोऽयं यथाभूदतिरुचित इति प्रेषितोऽहं ब्रसेल्से
राष्ट्रीयायाः सभायाः प्रतिनिधिपदवीं लम्भितो भारतीयैः।
क्रान्तं सम्मेलनं तत् 'फरवरिमुखतः' कस्य सा स्फूर्तिरासी-
दित्येतन्न स्मरामि प्रथमपरिचयो वलिनस्यैष दत्तः ॥२॥

देशान्निर्वासितानामिह नृपनयिकानां जनानां परेषा-
ञ्चोग्रादुग्रान् विचारानननुगतजनताया अयं केन्द्र आसीत्।
यस्तामाकर्षति स्म स्वदिशमिति तदा पैरिसेनैष साम्यं
विन्दन् मन्दं च मन्दं वरलिनमिति विख्यातिभाक् साम्यवादे ॥३॥

अन्योन्यं जातयस्ताः पददलितनृणामुग्रभावाः श्रमेणा-
जीवन्त्यश्चापि ताभिः सह समिततया कर्म कर्तुं प्रवृत्ताः।
ध्यानं लोकेषु जाग्रत्समभवदथ तेऽत्यन्वभूवन् नितान्तं
रुद्ध्वा साम्राज्यवादं स्ववशिमवलनं सर्वथा सर्वकार्ये ॥४॥

शर्मण्या युद्धहेतोरधिकृतिरहितास्तद्धितेच्छास्तटस्थाः
यच्चापि स्याच्च तत्र प्रयतनमचिरं कार्यमेकत्र संस्थैः।
आङ्ग्लीयाः पारसीका इटलिवसतयश्चाभवंस्तद्विरुद्धाः
नैवैच्छन् यत्नजातं किमपि तदुपमं ते हि साम्राज्यवादाः ॥५॥

तेषामेकोऽस्ति हेतुर्बरलिनमिह ये केन्द्रतां तत्र निन्युः
तेषां चातिप्रसिद्धाः प्रयतननिरताश्चीनदेश्या अभूवन्।
ये क्योमिन्ताङ्गवर्गे ज्वलनदलगताः केचिदासन् सदस्याः
तर्ह्यासीदेष वर्गोऽनुदिनजयकरश्चीनदेश्यस्तरस्वी ॥६॥

प्राचीनास्ते च तस्याप्रतिहतगतिसंवेगतस्तत्र भूमौ
लुण्ठन्ति स्म स्ववन्तस्तदिह नवचमत्कारके चीनदेशे।
शक्तिः साम्राज्यवादिन्यपि निजसहजाभ्यासधृष्टत्वमुख्यान्
दोषांस्तत्याज भाति स्म च झटिति भवेच्चीनसंप्रश्नसिद्धिः ॥७॥

क्योनिन्ताङ्गी च हर्षात् पुलकितवपुराभाति सातिप्रफुल्ला
सा ताः सर्वापदोऽपि स्वयमनयदिहागामिनीर्यास्तदग्रे।
अन्तर्राष्ट्रीयदृष्ट्या प्रचरणपथतः स्वां गतिं वर्धयेत
येनैषा प्रायशोऽस्मिन्नधिदलमधिकां स्वस्थितिं साधयेत ॥८॥

इत्येषा काङ्क्षमाणाऽभवदिह च दलं वाममस्या विशेषाद्
यद्युक्त्वा साम्यवादैरितरजनपदस्थैः स्वकार्यं करोति।
तेजश्चास्मिन्प्रचारेऽध्रियत यदपरक्षेत्रवर्गेऽपि चैनीं
तत्कालीनामवस्थां निजदलविषयाञ्चापि ससाधयेत ॥९॥

तावन्नैतद्विभेषु ग्रहिलरिपुदलेष्वास्त भिन्नं न भूयो-
ऽन्योन्यस्पर्धिष्वभात्तद् बहिरवगमिनां युक्तसाम्मुख्यकर्तृ।
क्योमिन्ताङ्गस्य यूरोपियप्रतिनिधयः स्वागतं व्याहरंस्ते
जातैः सम्मेलनस्यास्य च पददलितानामिमे जन्मदाः स्युः ॥१०॥

केचिद्वै साम्यवादास्त इव च विदिता अप्युपक्रान्तिकालाद्
आसन् पक्षेऽस्य किन्तु प्रकृतविषयतस्ते पृथक् चान्वतिष्ठन्।
लैटिन्योतामरीका सकृतिसहयुजं कर्तुमस्यास्तदापि
प्रायः संयुक्तराज्यं व्यथयति किल तामर्थसाम्राज्यवादैः ॥११॥

अध्यक्षस्योग्रस्वभावादभवदिह यतो मैक्सिकोनीतिरुग्रा
तद्वै संयुक्तराज्यप्रतिभटममरीकादलं नेतुमैच्छत्।
तस्मादेतद् ब्रसेल्सेऽधिकरुचिमदधादत्र सम्मेलनेऽपि
शिष्टिर्ह्येषा न शिष्टिप्रतिनिधिपदतोऽत्रार्हति स्माभिगन्तुम् ॥१२॥

ताटस्थ्येनैकमस्मिन् नृपनयविदुरं द्रष्टुमेवान्वयुञ्जन्
ते जावाहिन्दचीना अरब-शफरिकासीरियामिश्रदेश्याः।
फैलस्तीनाश्च संस्थाः प्रतिनिधिपुरुषान् प्रैषयंस्ता व्रिसेल्से
तद्भिन्नाश्चोग्रवादा अपि प्रतिनिधितां प्राप्य जग्मुः श्रमिष्ठाः॥१३॥

ये केचिद्वा युगात्तच्छ्रमिककलहतो मुख्यभागं गृहीत्वा
सम्बद्धा आसुरेतेऽप्यधिसभमभवंस्तत्र ते साम्यवादाः।
तस्मिन् सम्मेलने ते न खलु सममिलन् साम्यवादित्वहेतोः
केषाञ्चित्सङ्घकानां श्रमिकजनभृतां प्रातिनिध्यं दधुस्ते ॥१४॥

आध्यक्ष्येऽस्याः सभाया अवृणुत जनता जार्जलेसब्रिमेवं
व्याख्यानं तेन दत्तं सबलमतितरां येन सिद्धं महत्त्वम्।
यादृक्ताादृङ् न साभून्न च घटितवती साम्यवादेन भाग्यम्
निःसन्देहं नहीमेऽप्यविकलमिलिताः साम्यवादैः सखायः ॥१५॥

नैतेष्वास्ताथ तेषु क्वचिदपि समये सन्धिसम्भावनापि
कार्यं कर्तुं तथापि द्विगतसमतया संगतिः सम्भवासीत्।
यां तत्र स्थायिसंस्थां निरमिनुतममू चापि साम्राज्यवादं
सोढुं यद्वा विरोद्धुं तदधिपतिरभूज्जार्जलेसब्रिरेव ॥१६॥

पश्चात्तत्तुं स बाध्योऽभवदिह सहसाकारितायाश्च हेतोः
तत्सार्थैर्ब्रैटिशस्थैः श्रमिकपरिकरैस्तन्न हि स्वीकृतं यत्।
तर्ह्येतद्वै दलं स्वं मनसि हि मनुते साधु सम्राड्विरोधि
शीघ्रं वृद्धिं गतं चाभवदिदमुदितः सर्वकारस्तदा यः ॥१७॥

मन्त्रित्वादिप्रतिष्ठां कथमिव विजहात्वेष वर्गोऽभ्युपेतां
भीष्मायां क्रान्तिदायां कथमिव चरणौ पाशयेद्राजनीतौ।
तत्सब्रिः कार्यबाहुल्यकजनितनिजव्यस्ततामेव पूर्वं
पश्चाच्च त्यागपत्रं व्यतनुत स शनैस्तत्सदस्यत्वतोऽपि ॥१८॥

पश्चात्तापो ममापि प्रभवति स पुरा भाषणं स्तौमि यस्य
तस्मिन्नेवेदृशं तन्निपतितमभवद् तत् परीवर्तनं तु ।
यच्चापि स्याद्दलं ते प्रथितसुयशसः सन्ति संरक्षका वै
लीगस्यास्यास्ति यत्तं सुचिरपरिचितं हन्ति साम्राज्यवादम् ॥१९॥

आईंस्टीनस्तदेको भवति तदपरा चास्ति सन्यातसेना
रोमांरोला तृतीया भवति मम मता तस्य संरक्षकेषु।
फैलस्तीने यहूदी-अरबगतरणे लीगमत्रास्य पक्षम्
जग्राहेत्येव तेषु प्रथम इह जहौ लीगमेनद्ब्रुषेव ॥२०॥

तस्मात्सम्मेलनाद्वा परमिह बहुधा लीगगोष्ठयोऽधिविष्टाः
काले काले विभिन्ने पद इति महतीं प्राप्तवानस्मि ताभ्यः।
सामग्रीं तामधीनस्थितजनपदगानां समस्याशतानां
सन्धानार्थं किलापं सततमुपनिवेशप्रदेशोद्भवानाम् ॥२१॥

ताभिश्चाहं समस्याभिरिह चरमदिग्देशजश्रान्तिजीवि-
संघर्षा ये चलन्ति प्रतिपदमहमज्ञासिषं तत्सहायः।
भूयोऽधीतं मयासीदिह किमपि च नावेदिषं पूर्वमेव
तज्ज्ञाने नास्त सत्यं न खलु मम मनागप्यभूत्तेन योगः ॥२२॥

सम्पर्के साम्प्रतं यत्क्वचिदपि विषये सम्मुखीनत्वमाप्तं
ये तेषामान्तरेषु प्रकटपरिचयं यान्ति संघर्षजाताः।
अन्ताराष्ट्रीयमेषां जगदिह भवति स्म द्वितीयं तृतीयं
तत्रास्ते वै तृतीये जगति मम रुचिश्चापि संवेदना च ॥२३॥

यूरोपीयाश्च संघाः श्रमिकजनकृताः सन्ति नूनं त्रयोऽमी
आद्यस्तेषां स मार्क्सो यमिह विहितवान्-नाममात्रावशिष्टः।
द्वैतीयीकः शताब्दात्प्रथममिह तु यो लब्धवानात्मलाभं
प्रस्तावा यत्र तेजोबलमतिमिलिता उद्गता जात्वकार्यम् ॥२४॥

तस्य प्रस्ताव आसीद्धनपतिनृपतन्त्रेऽथवा युद्धकार्ये
न ग्राह्यः कोऽपि भागः परमिदमयथार्थं महायुद्धभासीत्।
बोल्शेविक्यैस्तृतीयः खलु स विरचितः संघ आसीत्समग्रे-
ऽप्यस्मिन्नान्दोलने यो नियमनगमनप्रेरणे दातुमासीत् ॥२५॥

सोऽयं नीतः समाप्ति सुमहति समरे वर्तमानेऽसमाने
तौ च द्वावैटलीयौ श्रमिककृतिकरौ प्रापयत् प्राणदण्डम्।
कृत्वा मिथ्याभियोगानकरुणममरीका ससाम्राज्यवादा
कृत्स्ने प्रान्तीयविश्वे समजनि घटनैषा किल क्लान्तिहेतुः ॥२६॥

यत्कार्यं च द्वितीये जगति समभवत्तत्र जाताऽरुचिर्मे
हिन्दुस्थाने हि जातोऽनुभव इह स नो ब्रैटिशानां विधीनाम्।
तस्मादावश्यकत्वान्मम मतमभवत्साम्यवादेऽनुकूलं
स्युर्दोषास्तत्र नायं भवति कपटभाङ् नापि साम्राज्यवादी ॥२७॥

सम्बन्धः साम्यवादे मम न खलु तदीयेन सिद्धान्तकेन ।
यस्मान्नो वेद्म्यहं तं बहुषु हि विषयेष्वन्तरा सूक्ष्मभावात् ।
तस्मिन् काले मदीयः परिचय इह स स्थूलभावात्ससीमः
एता वार्ताताश्च रूसे गुरुगुरुपरिवृत्तिक्रिया मामकर्षन् ॥२८॥

रुष्टोऽहं साम्यवादे प्रभुसदृशविधेर्योद्धवच्चापि वृत्ते
रूपाच्चाशिष्टताया असहमतजनद्वेषनिन्दादितश्च ।
तेषां दृष्टचा मदीया इह सकलमनोभावना बोधहीनैः
सम्पन्नानां च शिक्षाभरणमधिगतैः पुंभिरासन् समानाः ॥२६॥

एकञ्चाश्चर्यमासीदहमिह समितौ रुद्धसाम्राज्यबुद्धे-
र्लीगस्यास्यासमग्रे लघुलघुविषयोत्थे विवादे विशेषात् ।
पक्षे चैङ्ग्लोअमेरिक्जनपरिकलितेऽतिष्ठमासं तदीये
कार्यं कार्यं कथं चेति च विधिविषये सम्मतस्तैः स्वभावात् ॥३०॥

ते चाहञ्चाखिलेभ्यः प्रवितत-विततेभ्यस्तथालङ्कृतेभ्यः
प्रस्तावेभ्यो विरुद्धाः ऋजुलघुरुचयो घोषणापत्रकेभ्यः ।
यूरोपीयास्तु देशाः समधिकरुचयस्तादृशेष्वेव भूयः
साम्यासाम्यादिवादिष्वपि भवति भिदा प्रस्तुतौ सम्मतौ च ॥३१॥

सामान्येनास्म सज्जा वयमिह च मिथः साम्मनस्ये प्रसन्नाः
केचित्त्वस्मासु गेहान् प्रति सपदि गता नागमन् गोष्ठिकासु ।
सर्वे ये सन्ति वैदेशिकतदुपनिवेशीयकार्यालयाश्च
ब्रासेल्सात्काङ्गरेसाद् भृशमपि च भयं मन्वते मानसेन ॥३२॥

ब्रैटेनो लेखकः श्र्यङ्गर इदमलिखद् त्रासदं हासदञ्च,
प्रायः काङ्ग्रेसमध्येऽप्यभवदतिशयो गुप्तचारोच्चयानाम् ।
भूयांसः काङ्गरेसप्रतिनिधय इहासन्नहो गुप्तचारा
इत्यस्यैकं निदर्शं वयमखिलमनोरञ्जनं प्राप्तवन्तः ॥३३॥

मन्मित्रं पैरिसे यद्वसति विनयश्चाल्या त्वामरीकेयमेकम्
तं द्रष्टुं पारसीकः प्रतिनिधिरगमत् प्रष्टुमेनं सुहृद्वत् ।
प्रश्नान् पृष्ट्वा स सम्यक् तमिममपरीकाजनं पर्यपृच्छत्
किं मां त्वं प्रत्यजानाः प्रथममपि भवन्तं किलाद्राक्षमेषः ॥३४॥

ध्यानात् दृष्ट्वामरीकाजनमिमवदन्नाहमत्र स्मरामि
कुत्राहं त्वां कदा वा नयनविषयतां नीतवान्वा न वेति ।।
भूयोऽसौ गुप्तचारस्तमिमकथयद्यद् ब्रिसेल्से सभायां
त्वां नीग्रोप्रातिनिध्ये स्थित इह मिलितः पृष्टवांश्चापि भूयः ।।३५।।

आश्चर्यं तं तु दृष्ट्वा वददहह तदा कृष्णरंगेन वक्त्रं
रञ्जित्वा पाणिपादादिकमपि भवतः सम्मुखे संस्थितोऽस्मि
साम्राज्यद्रोहिसङ्घेऽध्यविशदिह च कोलोनमध्ये कदाचित्
तत्राहं सङ्गतश्चावसितमिदमभूद्धि तत्रत्यकार्यम् ।।३६।।

उक्ताः स्मो यात पार्श्वे भवति खलु डुमेडॉर्फमध्ये मनोज्ञः
सेवकोवेन्जेदिहेतोर्हितवहनमहः पश्यतैनं किलेति'
प्रत्यागच्छत्सु चास्मास्विदमनुगदितं स्वस्वपास्पोर्टपत्रा
ण्यत्रापूर्याण्यहं तु स्वपरिदलमिदं न्यस्य कोलोनकक्षे ।।३७।।

तत्रागच्छं डुमेहार्फमिह हि कियतेऽनेहसेऽभ्यागमाम
तस्मान्नीतोऽस्मि माद् ग्ब्रिटिशयुगलकेनैव साकं तु 'थानाम्' ।
एकां होरां स्थिताः स्मस्तदनु परिहृतास्तावता दूरभाषै
र्विज्ञाताशेषवृत्तैर्नरपतिपुरुषैः स्वागतस्थानतोऽस्मात् ।।३८।।

साम्राज्यद्रोहिलीगं प्रविगतशरदामन्तरे साम्यवादं
प्रत्यानम्रीभवन्मेऽलगदिह न परं तत्स्वरूपाद्विहीनम्
दूरात्पत्रैरहं तत्प्रगतिगतिविधिं ज्ञातुमासं समर्थः
एकत्रिंशेऽभवद्यत् सहमतमनयोः काङ्ग्रेसाधिपत्योः ।।३९।।

तत्राहं भागभाग्यत्समभवममुतोऽरुष्यदेतत्तु मह्यम्
स्वस्मान्निष्क्राम्य मां तत्पृथगकुरुत चैकेन प्रस्तावकेन ।
मञ्जूरीकुर्वतीह स्फुटमहमुररीकृत्य रोषस्य हेतून्
नाजानां मेऽवकाशं वितरितुमभवत्सर्वथा वै समर्थम् ।।।४०।।

प्रत्येकं व्यक्तिमत्र स्थितिपरवशतामाप्य भङ्क्तुं विधीनां
कर्तुं बाध्योभवेच्चेदधिकृतिभिरयं तत्र प्रष्टव्य एवं ।
यूरोपं सप्तविंशे सहसि मम पिताभ्यागतोऽहं तमत्रा-
द्राक्षं वैवेनिसेऽतः परमधिवसतिस्त्वेकदेशास्पदाभूत् ।।।४१।।

अस्मास्वासीत्पिता मे, ह्यनुजभगिनिका, धर्मपत्नी, ततश्च:
केषाञ्चिद्वासराणां कृत इह विगता रूसमास्कोऽभियात्राम् ॥४२॥
यात्रैषास्माकमासीत्त्रिचतुरदिवसाऽऽकस्मिकी तत्क्षणेन
निर्णीता किन्तु हर्षोऽभवदधिकतरो यद्गता: स्मोऽत्र मास्कोम्
तस्यैतादृग्घि साक्षात्कृतिरपि समभूत्तुष्टये हृष्टये च
पर्याप्ता मूलरूपं प्रकटयितुमियं नाभवन्न क्षमाभूत् ॥४३॥
किन्त्वेतेन प्रदत्ताऽध्ययनविषयिणी भूमिका कापि मह्यम्
पित्रे तत्सर्वमासीत्त्रमिह मुवियद्वा समष्ट्येकदृष्टि: ।
तस्यासीत्सर्वशिक्षा विधिविषयतया संविधानोपयुक्ता
तस्माच्चाकारकोषान्नहि सुकरममूत्तस्य निष्क्रामणञ्च ॥४४॥
यत्पूर्वं घोषणासाइमनकमिशनेनान्विता भारतेऽभू
त्तर्ह्यस्मैतेऽत्र मास्कोपुरि प्रथममियं वृत्तपत्रेष्वधीता ।
पश्चाद्यात: पिता मे प्रिविपरिषदि यल्लन्दनं तर्हि तत्र
हिन्दुस्थानाभियोगे क्वचन स सरजान् साइमन् संगतोऽभूत् ॥४५॥
प्रत्नेऽस्मिन् भौमिपत्ये प्रथममहमपि व्यापृतोऽत्राभियोगे
किन्त्वस्मिन्नाभवन्मे रुचिरधिकतरा त्वैकेदाहं च यात:
पित्रा कर्तुं विमर्शं सहि मम वचनात्तस्य कार्यालयेऽपि
कालेऽस्मिन् दूरसंस्थो न मिलितुमलमभूवात्र श्री साइमनं तु ॥४६॥
वर्षोऽयं सप्तविंशो व्यदिगमनदिशं याति यूरोपदिशो
भूयोऽतिष्ठाम चेत्ति स्वगृहगमन मारीचतास्मभ्य मेकम् ।
यूरोपे दक्षिण प्राच्यपि गमनमभूदिष्टयस्वाकमादौ
टववाँ मिश्रे च कञ्चित्समयमपनयेमेति चाचिन्तयाम ॥४७॥
नासीदद्यावकाश: क्वचिदपि गमनस्येति मद्रासदेशे
कांग्रेसस्याधिकेशे श्रयितुमपि ममोत्सुक्यमासीन्नितान्तम् ।
तेनाहं मे च भार्या सपदि मदनुजा चापिसा पुत्रिका मे भार
सेल्सात्प्रस्थिताऽस्मो मम नु स जनक: तस्मात् त्रिमासीम् ॥४८॥
यच्चरितकादम्बरी हरिवंश-मारुति-शर्मचरितै
र्गान्धिमरिमाणं च नेहरूचरितमथतच्छास्त्रिचरितम् ।
अंशत: प्रास्तौत्तदीयेनेहरूचरिताख्यकाव्ये-
ऽस्मिन् सभामिह पीडितानां वक्ति सर्गस्त्रयोविंश: ।

पुना राजनीतौ

शार्दूलविक्रीडितम्

चतुर्विंशः सर्गः

यूरोपादहमेत्य सुष्ठुतरया बाह्यान्तरावस्थया
प्रत्यायां परमस्ति साम्प्रतमपि स्वस्था न पत्नी मम ।
पूर्वापेक्षितया तु सास्ति विरुजेत्यासीन्नमे चिन्तापि
शक्तिर्जीवनमप्यहो मयि भृतं सद्योऽन्वभूवं हृदा ॥ १ ॥

अन्तर्द्वन्द्वमथो मनोरथपथभ्रंशावधानं च मां
प्रायः पीडयतः स्म यत्खलु पुरा शिष्टे न तेऽप्यद्य मे ।
याऽतिव्यापकतां च सम्प्रति नवां दृग्विन्दुरेखोधिकां
लक्ष्यं राष्ट्रियतागतं लघुतया पर्याप्तमाभाति मे ॥२॥

स्वातन्त्र्यं खलु राजनैतिकमिहास्त्यावश्यकं किन्तु तत्
सत्यायां दिशि केवलं चरणयोर्विन्यासमात्रं मतम् ।
तत्सामाजिकमप्यहो न भविता यावच्च यावत्तयोः,
सम्यग्राज्यसमाजयोर्विरचनं तावन्न देशोन्नतिः ॥ ३ ॥

यावद्देशसमुन्नतिर्न भवति व्यष्टेः समष्टेरियं
तावद्देशनिवासिनामिह नृणामभ्युन्नतिः स्यात्कुतः ।
विश्वस्यास्य समा मम स्फुटतयाऽऽभाताः समस्या ध्रुवं
विश्वं ह्याधुनिकं प्रतिक्षणमिदं दृष्टं परीवृत्तिमत् ॥ ४ ॥

सम्यज्ज्ञातमिदं मया बत मनाङ् नो राजनीतौ न वा
नूत्नास्वद्यतनीष्ववस्थितिषु वाऽन्यत्रापि यस्मिन्रुचिः ।
वृत्ते सांस्कृतिके विदेशविषये देश्ये च वैज्ञानिके
यूरोपे परिवर्तनानि विषयेष्वेष्वासतामेरिके ॥ ५ ॥

तेषामध्ययने यदा नवनवः स्वादोऽनुभूतो मया
रूसे सौवियतेऽभवन् कतिपये नोपक्रमाः साधुवत् ।
आकर्षन्तदपीह मामण्यमहो भातिस्म यद्दीयते
विश्वस्मै नयतेऽप्यनेन नवलः सन्देश आशामयः ॥ ६ ॥

यूरोप: स्थिरमासनं मृगयते स्मापञ्चविंशाब्दके
घोरं त्वाधिकसङ्कटं तदुपरि प्राप्तव्यमासीत्परम् ।
किन्त्वस्मादहमागतोऽत्र कलयन् यत्नोऽयमास्ते बहि-
र्ह्यासन्ने हि भविष्यतीह भविता विश्वे महोपप्लवः ॥ ७ ॥

विस्फोटा बहवो महान्त इह च स्युः सर्वतो विश्वत-
श्चात्रायातवतो मम प्रथमतः कार्यं किल प्रत्यभात् ।
यद्देशो घटनाभिराभिरभितः शिक्ष्येत नित्योद्यत-
स्तिष्ठेदित्यवधेयमत्र सकलैर्देशस्य सत्सेवकैः ॥ ८ ॥

सज्जैषा त्वभवद्विचारविषया लक्ष्ये न सन्दिग्धता
कस्याप्यस्तु न कापि राजनयिकस्वातन्त्र्यरूपे मनाक् ।
सर्वैः स्पष्टतयाऽवगम्यमिदमेवास्त्येकमात्रं च न-
स्तद्भिन्नं यदुदीर्यते ह्युपनिवेशाद्यं न तत्सत्स्मृतम् ॥ ९ ॥

आस्ते तत्पृथगेकमन्यदपि नः सामाजिकं वस्तुतः
कांग्रेसं तदुपेष्यतीति कलनं स्यात्सम्भवातिक्रमः ।
कांग्रेसं किल राजनैतिकमिदं राष्ट्रीयसंस्थानकं
ह्यन्योपायविचिन्तनस्य न कृतोऽभ्यासो ह्यनेन क्वचित् ॥ १० ॥

किन्त्वस्यामपि दिश्यनेन सुकरः स्यात्कश्चनोपक्रमः
कांग्रेसाद् बहिरप्यहो युवसु च श्रान्तिप्रियेष्वप्यथ ।
दूराद्दूरतरं विचारसरणिः शक्यापसारा ध्रुवम्
इत्यस्मै शुभकर्मणेऽयतिषि वै गन्तुं ततोऽहं बहिः ॥ ११ ॥

एतस्मादतिरिक्तमस्मि निवसन् ग्रामे तदन्तर्गतो
ज्ञातुं संस्थितिमैच्छमध्ययनतो मासानिहैवावसन् ।
किन्त्वेतन्न भवत्यहो घटनया प्रत्येकया निश्चितम्
तासामत्र हि कर्णयेयुरनिशं काङ्ग्रेसनीतिं प्रति ॥ १२ ॥

अस्मासु त्वयितेषु दक्षिणदिश कांग्रेसिकावर्तके
भूयोऽहं पतितोऽस्मि हा निगडितश्चास्म्यत्र कार्यान्तरैः ।
प्रस्तावा निहिताश्च कार्यसमितौ स्वातन्त्र्यसांग्रामिकाः-
स्ते साम्राज्यविरोधिसंघविषयाभीतिक्षितश्चापरे ॥ १३ ॥

प्रस्तावान्मम सर्वशोऽत्र समितौ मञ्जूररीकुर्वतां
सभ्यानां सुसमर्थनैरपि कृतप्रस्तावनामापितान् ।
कांग्रेसस्य महाधिवेशनमहेऽप्येते मया प्रस्तुता
आश्चर्यं जनयन्ति यावदखिलास्ते स्वीकृताः सङ्गतैः ॥ १४ ॥

प्रस्तावं चरमं समर्थितवती एनीवसन्ताभिधा
चातुर्दिक्कसमर्थनैः समभवद्धर्षो महान् मानसे ।
खेदं चेदमजीजनन्नहि जनास्तानर्थतोऽज्ञासिषु-
र्वाच्यं वा स्वमनोनुकूलमनयन् छित्त्वा च भित्त्वा गिरम् ॥ १५ ॥

कांग्रेसात्परमेव मे स्ववशताप्रस्ताव एषोऽन्तिमो
जातो वादविवादगोचर इति स्पष्टीकृतो मद्भ्रमः ।
प्रस्तावा मम कांगरेसमततो नूनं दधुर्भिन्नतां
नूत्नं कञ्चन दृष्टिकोणमनयन्प्राकाश्यमेते पुनः ॥ १६ ॥

निःसन्देहमिमं जनाः सुबहवोऽरोचन्त तत्रैकतो
नारोचन्त तथान्यतः कतिपये नैनं व्यरुन्धत् परम् ।
तेऽजानन्नन् सन्त्यमी हि सहजा वा तात्त्विका इत्यमी
स्वीकृत्येतरथाथवा न किमपि स्याद् दोषभागीदृशाम् ॥ १७ ॥

पिण्डं मोचयितुं किलोचितमिदं स्वीकार्यमेवाखिलं
कार्यं चात्र महत्त्वशालि तरसा ध्यानेन कार्यं पुरा ।
इत्थं तेषु दिनेषु स स्ववशताप्रस्ताव आसीन्न वै
काञ्चित् जीवनशालिनीं बलवतीं दातुं नवां प्रेरणाम् ॥ १८ ॥

द्वित्राब्दान्तरतो यथा स बलवाञ्जातस्तथा नाद्य सः
तर्हि व्याप्तिमयं महोन्नतिमयं व्यानक् स भावं परम् ।
श्रीगान्धिर्मदरासमेव मदयन्नासीत्स्ववासेन तं
ह्यायातिस्म स कांगरेसिकमहे न त्वस्य नीतेर्धृतौ ॥ १९ ॥

सभ्योऽभूत्खलु सोऽस्य कार्यसमितेः किन्तूपवेशेष्वसौ-
नोपातिष्ठदिह स्वराजदलतस्तेजस्वितायाः परम् ।
कांग्रेसं प्रति राजनैतिकरुचिस्तस्याभवत् सम्मतिं
दातुं, कर्म च कर्तुमप्यनुमतिं प्राप्तुं सदा यत्नवान् ॥ २० ॥

नाहं वेद यथाऽधिवेशनमहे प्रस्तावधानं कृतं
तत्तस्याभवदप्रियं प्रियमहो किं किं कया मात्रया।
उत्पश्यामि स तन्न रोचयति, यत्तन्मत्प्रवृत्या तथा
दृक्कोणेन निवेदितं समभवन्नूनं न तत्कारणात् ॥ २१ ॥

किन्त्वेतेन महात्मना क्वचिदपि प्रत्युक्तमेतन्न यत्
प्रत्यालोचनवार्तया त्वलमहो गम्भीरधीरस्थितेः।
प्रस्तावस्य गुणागुणौ न विदितौ नोक्तौ हि पित्रा मम
तत्रानेहसि स ह्यभूद् बहिरतो यूरोपदेशं गतः ॥ २२ ॥

व्यक्ताभूदयथार्थता स्ववशताप्रस्तावमूलस्य सा
निन्दायां किल साइमन् कमिशनस्याथो बहिष्कारणे।
प्रस्तावे ह्यपरत्र चात्र चलितो योऽसौ विचारः परम्
निर्णीतञ्च फलात्मनाखिलदलाह्वानं विधानार्थकम् ॥ २३ ॥

तस्यां सर्वदलीय संसदि कृतं स्यात्तद्विधानं महत्
माङ्टीयदलप्रयोगमपि तैर्यत्नो ग्रहीतुं कृतः।
स्वातन्त्र्यस्य हि भाषया न खलु ते कर्तुं विचारं क्षमाः
यातुं तूपनिवेशतुल्यपद-तद्रूपं समर्था इमे ॥ २४ ॥

कांग्रेसस्य तु मन्त्रिता पुनरपि स्वीकार्यतां मे गता
सासीत्कारणमत्र किञ्चन निजं वैयक्तिकं तद्यथा।
अध्यक्षोऽत्र तदा पुरातनसुहृद डाक्टर् स अन्सारिक
ऐच्छत्स्यामहमत्र मन्त्रिपदभाग् ध्यायामि चाहं तथा ॥ २५ ॥

प्रस्तावा उररीकृता मम यदा, तर्ह्यस्ति कार्यं मम
द्रष्टुं कार्यमपीह सम्प्रति भवत्येतैः समानं न वा ?।
यत्सत्यं निखिलप्रभावहननं प्रस्तावजातस्य मे
जातं सर्वदलीयसङ्गतिकृते प्रस्तावकेऽस्मिन् नवे ॥ २६ ॥

यत्किञ्चित्त्ववशिष्टमेव तदभूदन्यच्च मन्मन्त्रिता-
स्वीकारस्य यथार्थकारणमभूद् भीतिस्तथैषा सताम्।
कांग्रेसस्य हि मा स्मभूत्समदली संसच्च माङ्ट्स्थिते
र्हेतुः साम्मनसे च मूर्धविनतौ तत्त्यागपत्रादिके ॥ २७ ॥

कांग्रेसं पतितँ तदा द्विविधतापङ्के तु जातूग्रता-
मालम्ब्येह च नम्रतां क्वचिदिदं दोलायमानं त्वभूत् ।
एतन्मास्म नमत्कदाचिदिति मे यत्नोऽभवत्सर्वथा
स्वातन्त्र्यान्निजलक्ष्यतो न विरमेदित्यास्त मच्चेष्टितम् ॥ २८ ॥

कांग्रेसस्य हि वार्षिकोत्सवमनु प्रारभ्यतेऽनेकशः
संस्थानामपि कश्चिदुत्सवचयोऽद्याभूत्प्रजातन्त्रकम् ।
आध्यक्षेऽस्य वृते सकृत् स्व्यकरवं मन्ये तथाहं स्वकं
सङ्कोचस्तु ममाभवन्न हि तदा तद्योजकं वेद्म्यहम् ॥ २९ ॥

वर्षादर्दुरवद्धि जातघटने वस्तुन्यहं नो रमे
किन्त्वन्तेऽभवमेव तस्य सदसोऽध्यक्षोऽनुतापाय तत् ।
यादृक्षस्य हि वस्तुनोऽत्र युगपज्जन्माथ मृत्युर्भवेत्
तादृक्षं समभूदिदं किल सदोनाम्ना प्रजातन्त्रकम् ॥ ३० ॥

मासान् कानपि याचिता प्रतिलिपिः प्रस्ताववृन्दाचिता
मोघाभून्मम याचना प्रतिलिपिर्नाद्यापि साऽऽसादिता ।
तद्दृष्ट्वा मम ग्लानिरेव समभूल्लोका नवं तन्वते
आलम्ब्याथ तटस्थतां विदधते तद् भाग्यमात्राश्रितम् ॥ ३१ ॥

अत्रालोचनमस्ति सत्यसहितं कार्यं श्रयामो हि यत्
तत्पूर्तिं प्रति निश्चयेन यतनं कर्तुं न जानीमहे ।
वृद्धेरादिमलक्षणं परिहृतं कार्यं समारभ्य तत्
तस्या अन्तिमलक्षणं बत गतं नूनं समाप्तिं विना ॥ ३२ ॥

मद्रासाद्वयमुद्यताः स्ववसतिं यातुं तदभ्यन्तरे
दिल्लीतो विदितं यथाऽजमलखान्वैद्यः स मृत्युं गतः ।
कांग्रेसस्य सभासदः स हि पुरा, सम्मानयोग्योऽभवत्
अन्यच्चापि महत्त्वमस्य महतः कांग्रेससभ्येष्वभूत् ॥ ३३ ॥

यादृक् प्रत्नविधानतः शिशुवयस्यासीत्तदध्यापनं
स्वृद्धं पालनपोषणं च समभूत्तस्मिन्नवत्वं कुतः ।
सोऽयं मुद्गलकालिकीं विभवनीमन्वागतः सभ्यताम्
साधुत्वं मृदुभाषितां च परिहासादिप्रियत्वं दधत् ॥ ३४ ॥

साक्षात्कारसुखं ददाति सततं शिष्टाचरण्यः पुरा-
कालीनैः स धनेश्वरैरुपमितो दृष्टचा क्रियाभिस्तथा ।
श्रुत्वा तस्य च मन्दमन्दवचनान्यात्मा प्रसीदत्ययं
चास्यं तस्य समानमास्त हि मुगल्सम्राण्मुखेनाभया ॥ ३५ ॥

नैतादृक्षजनाः कदाचन विशन्ति ध्वान्तधूल्यावृते
मार्गे राजनयस्य कुत्रचिदपि त्रासोपहासप्रदे ।
अद्यान्दोलनकारिणो गतिविधीन् दृष्ट्वाङ्गरेजा इमान्
प्राचीनान् पुरुषान् स्मरन्ति सहसाऽविश्वासखिन्नैर्मुखैः ॥ ३६ ॥

प्रारम्भे वयसो हकीमजिरयं नो राजनीतिं मना-
गस्प्राक्षीत्स हकीमनामकपरीवारस्य मुख्योऽभवत् ।
स्वव्यापारनिमग्न एष न परं कर्माविदन्नास्पृशत्
किन्त्वन्त्यासु समास्वकृष्यत महान् कांग्रेसकं प्रत्यसौ ॥ ३७ ॥

तात्कालिक्यथ कांगरेसघटना प्राचीनमित्राणि च
अन्सारी सहकारकश्च तमिमं स्वातन्त्र्यदिश्यैरयन् ।
पाश्चात्या घटनाश्च पञ्चनदगं मार्शल्विधानं तथा
तच्चित्ते गहनं प्रभावमदिशत् श्रीगान्धिसन्मित्रता ॥ ३८ ॥

कांग्रेसे विरलं गुणं समनयद्वैशिष्टचमत्राधिकं
नूत्नप्रत्नजनेषु यः स्वकलयाऽसौ राष्ट्रियान्दोलने ।
वृद्धानां सहयोगमावहदथो यूनां बलं वर्धय-
न्नत्रान्दोलनकर्तृहृत्सु दृढतामुत्साहतोऽचीक्लृपत् ॥ ३९ ॥

सोऽयं स्वीयनिदर्शनेन सुहृदोः सम्माननासम्भृतो-
र्हिन्दूमुस्लिमयोः परस्परमयं सान्निध्यमस्थापयत् ।
श्रीगान्धेस्तु स साम्प्रदायिककलावासीत्परामर्शदः
तातो मामक एतदीयसखितां निर्व्याजमेवार्जिजत् ॥ ४० ॥

यातेऽब्दे मयि दोषदृष्टिवशतो हिन्दूसभानायका
आचक्षन्त—'सदोषशिक्षणवशात्पारस्यतत्संस्कृतेः ।
हिन्दूभावनयाऽनभिज्ञ इति यत्तद्दुर्वचो मत्कृते
संस्कृत्यादिकया युतो बत न वा, जानामि नो पारसीम् ॥ ४१ ॥

यत्सत्यं जनको ममाम्रियत वै भारत्यपारस्ययोः
संस्कृत्योः किल वायुमण्डल इयं दिल्लीत एवागता।
अद्याप्येषु दिनेषु जातविकृतिष्वेषा समालोक्यते
दिल्यां लक्ष्मणपुर्यहो प्रवितता तत्केन्द्रतां बिभ्रतोः ॥ ४२ ॥

काश्मीरेषु च ब्राह्मणेषु समये तद्रूपतास्वीकृते-
रास्ते काचन शक्तिरित्यवतरन्तस्तेऽस्यां स्वतोऽवातरन्।
उर्दूपारसिकाविशेषरसिकाश्चैवाभवन्नञ्जसा
वेषादावपि चास्थया नवलया रूपान्तरं संश्रिताः ॥ ४३ ॥

यह्यावश्यकतामगादधिगमश्चाङ्ग्लादिभावात्मनः
साहित्यस्य च संस्कृतेरवचयस्तह्यनमप्याश्रयन्।
अद्याप्यत्र लसन्ति केऽपि यशसा पारस्यभाषाविदौ
राजा शीलनरेन्द्रनाथसपरूश्रीतेजबह्वादरौ ॥ ४४ ॥

इत्थं मत्पितरि स्थिता प्रणयिता ख्याते हकीमे च सा
साम्यं चाप्युभयोरनेकविषयं नैतावदेवाभवत्।
ताभ्यां वंशपरम्परागततया प्राकाशि सौहार्दजः
सम्बन्धः किल येन सा प्राणयिताप्यावद्धमूलाभवत् ॥ ४५ ॥

अन्योन्यं किल बन्धुवर्यमवदत्तद् युग्ममप्येतयो
रासीद्राजनयस्तयोस्तु विरलः सम्बन्धवीजो लघुः।
कौटुम्बिक्यविधासु तौ न मिलतः स्मासीद्धकीमश्रियः
प्राचीने हि विधौ, नवे मम पितुः कश्चिद्विशेषाग्रहः ॥ ४६ ॥

यादृक्षं त्ववगुण्ठनं समभवत्तस्मिन् हकीमान्वये
तादृक्षं न विलोकितं क्वचिदपि प्रायो मया कर्हिचित्।
किन्तु श्रीलहकीमजिः स्म मनुते स्वातन्त्र्यमासां हितं
स्त्रीस्वातन्त्र्यमिहाबहेद् भरतभूस्वतन्त्र्यमक्लेशतः ॥ ४७ ॥

साफल्येऽस्ति कमालपाशकलिते स्त्रीसाह्यमेवादिमं
स्वस्थं चापि निदानमित्ययमगादीत्तत्प्रमाप्याग्रतः।
तन्मृत्युः प्रतिघातमेकमतनोत्काङ्ग्रेसवक्षःस्थले
ननं तस्य सहायको गरुतरस्त्यक्त्वा तदन्तर्हितः ॥ ४८ ॥

दिल्लीमागतवत्सु सत्सु महती भातिस्म काचित्क्षतिः
आस्माकीननिवासभूतनगरी दिल्ली हकीमं विना।
बिल्लीमारमुहल्लयाधिकतरो भूयश्च तद्गेहतो-
ऽस्माकं बन्धनमास्त तत्र मनसो गम्भीरमन्तस्तलात् ॥ ४६ ॥

अष्टाविंशतिपूरणी खलु शरत्पूर्णेह नीत्याभवत्
देशे ह्यत्र समन्ततो हलचलानामास्त भूयान् भरः।
इत्थं भाति यथा नवा प्रसरणा यद्वा नवं जीवनं
सर्वेष्वेव समूहकेषू विविधेष्वासीत्समान् सारयत् ॥ ५० ॥

देशादस्मि यदा बहिः समभवन्मन्दं परीवर्तनं
यन्मे सम्मिलितं महत्तरमभात् सुप्तं तथा निष्क्रियम्।
षट्विंशे यदभूत्, श्रमक्लमगतं तत्साम्प्रतं नूतनं
शक्त्या पूर्णमभूत् क्रियामयमिति प्रत्यैत्प्रमाणीकृतम् ॥ ५१ ॥

कार्यागारगते गणे श्रमवतां क्षेत्रेषु कृष्यां पुनः
वर्गे मध्यमवर्गिणां नवयुवक्रान्ते पुनर्मण्डले।
सामान्येन च शिक्षितेष्वपि मिलत्येकं नवं जीवनं
श्रान्त्याजीवजने दले हलचलो भूयान् विवृद्धोऽभवत् ॥ ५२ ॥

सप्ताष्टाब्दपुराकृतं श्रमवतां संघं हि कांग्रेसिकं
तद्दाढर्येन युतं च प्रातिनिधिकं चाभूत्स्थिरं संगतम्।
संख्यायामथ संघटेऽप्युभयथाप्यासीदिहाभ्युन्नति-
र्जाता तस्य विचारणापि रणगा चोष्णाऽधिका पूर्वतः ॥ ५३ ॥

जायन्ते हरतालकाः श्रमिकगात्तद्वर्गचैतन्यतो
वस्त्रोद्योगगृहेषु चापि रयलेषु श्रान्तिजीव्येकता।
एतेष्वप्यभवन्स्वतो दृढतराः संघाः श्रमाजीविना-
मेष्वप्यास्त स कार्यकारयुनियन् तद् रेलवेयूनियन् ॥ ५४ ॥

वृद्धया संघटनस्य सार्धमयिता वीजाः कलेः पश्चिमात्
हिन्दुस्थानदलानि संघटनया स्पर्धामपि प्राक्रमन्।
स्पर्धा शात्रवकारणं त्वजनयत्तेषां दलानां मिथो
भेदं येन बभवूरेषु प्रथमद्वैतीयतार्तीयकाः ॥ ५५ ॥

नम्रस्तत्र यदाभवत्स प्रथमः संस्कारवादी तथा
आमूलं परिवर्तनं तदपरः क्रान्ति प्रकाशं श्रितः ।
तार्तीयीकतया तु तत्र विदिते नानामतान्यासत
मात्राभेदकृनानि तान्यवसरं दृष्ट्वा सरन्त्यत्र च ॥ ५६ ॥

स्वे पार्श्वे परिवर्तयन्ति कृषका यावत्किलास्मिन् क्षणे
जागर्तिः किल तेष्वदृश्यत तदा साकेततद्देशयोः ।
अन्यायस्य विरोधनाय च सभा आयोजिता नित्यशः
साक्षादन्वभवञ्जना न कृषका दुःखावसानं गताः ॥ ५७ ॥

साकेते किल कर्षणान्वयजुषा दत्ता विधानेन सा
त्वाजीवाधिकृतिर्ययाऽस्त जनिता काचित्किलाशा परा ।
प्रारब्धः किल गौर्जरैस्तु कृषकैः संघर्ष एको महान्
ऐच्छच्छासनमत्र यत्करधने वृद्धि विधातुं पराम् ॥ ५८ ॥

एते सन्ति कृषीवलाः निजनिजावन्याः स्वयं स्वामिनो
यत्रैमे किल शासनेन सह तं सम्बन्धमाविभ्रति ।
संघर्षः सरदारवल्लभपटेलाहूतसत्याग्रहो
यस्मिन् वीरतया जयन्ति कृषका देशो यशो गायति ॥ ५९ ॥

साफल्यं किल बारडोलिकृषकैः पर्याप्तिमाप्तं यथा
किन्त्वेषां समरस्य सत्यफलता त्वासीत्प्रभावो नृषु ।
हिन्दुस्थानकृषीबलस्य च कृते बारडोलिरासीदियं
खल्वाशाविजयप्रतीकमभवच्छक्तेश्च संसूचकम् ॥ ६० ॥

हिन्दुस्थानविशेष एष स पुनर्यूनां नवानामिहा-
सीदान्दोलनविस्तरः प्रतिपदं संघाः सभा स्थापिताः ।
आयोज्यन्त च यत्र तत्र परितः सम्मेलनान्यप्यहो
प्राभूवन्विविधा इमे बहुविधानीमानि चानेकशः ॥ ६१ ॥

केचित्क्रान्तिकरैर्विचारचरितैः केचिच्च तच्छास्त्रगैः
सिद्धान्तैर्निरता विचारसरणावर्द्धने धर्मस्य च ।
उत्पत्तिर्भवतात्कुतोऽपि कुहचित्तेषां भवेच्छासनं
यूनामद्य समाजशीर्षकसभाः सर्वाः सजीवा इमाः ॥ ६२॥

कायाकल्पमिवाखिलस्य जगतः कर्तुं परीवर्तनं
वाञ्छन्तिस्म समेऽपि ते प्रयतनं कुर्वन्ति चैतादृशम् ।
वर्षोऽयं किल राजनैतिकदृशा सैमन्कमीश्वन्वहि-
ष्कारार्थं कृतये च सर्वदलतः सम्मेलनस्याभवत् ॥ ६३ ॥

अस्मिन्नग्रदलेन वै सहकृतं कांग्रेसमत्यद्भुतं
साफल्यं प्रतिपद्यते कमिशनं यत्राप्यगच्छत्ततः ।
पश्चाद् गच्छ कमीशनेति परितो घोषैः कृतं स्वागतं
सर्वैर्भारतवासिभिः स सरजान् सैमन् धृतो नामतः ॥ ६४ ॥

तन्नामैव न तेऽविदन् पदयुगं त्वाङ्ग्ल्या गिरोऽव्याहरन्
गोबैकेति समाप्यते पदयुगेऽस्मिन् ज्ञानमेषामलम् ।
एताभ्यां प्रतिभाति यत्कमिशनश्रोत्रे सदोद्वेजिते
तेनोद्वेगवशेन ते च चकिते स्यातामथाजायताम् ॥ ६५ ॥

केचित्प्राहुरिहैकदा कमिशनं वेस्टर्नहोटल्स्थितं
रात्रावन्धतमस्यकर्णयदिदं सैमन्त गो बैक् इति ।
इत्थं रात्रिमुखेऽपि पृष्ठपतनं मत्वा भृशं रुज्यतां
तेषां मानवगीर्भ्रभोऽभवदहो गोमायुरावेऽप्यहो ॥ ६६ ॥

नाजानन्निह मानशालिनगरे दिल्ल्यां मतल्ल्यां पुराम्
शून्ये काननके वसन्ति मुदिता गोमायवोऽपि स्फुटम् ।
सिद्धान्तान्प्रमुखान् विधानविषयान् सम्मेलनं निर्धरत्
काञ्चिद्दुष्करतां किलाननुभवत् प्रास्तौत् पुरस्तात्सताम् ॥६७॥

सिद्धान्तान् किल लोकतन्त्रसरणौ संसत्स्वरूपानुगां
स्तान्निर्धारयितुं प्रभुर्भवति वा तद्रूपरेखाविधौ ।
सत्या दुष्करता तथा कठिनता तूपस्थिता सम्मुखे
जातीनां किल साम्प्रदायिकजनैरत्राल्पसंख्यैः कृता ॥ ६८ ॥

जातीनामिह दुर्ग्रहप्रतिनिधीभूता अनेके जना
आयाता न हि सन्धिपत्ररचनं जातं परं दुष्करम् ।
तत्सम्मेलनमेतदप्यजनि नः प्राचीनवन्निष्क्रियं
यूरोपात्प्रतिवर्तितो मम पिताऽस्मिन्नावहत्सद्रुचिम् ॥ ६९ ॥

अन्त्योपायतया न्ययोजि समितिर्लब्वी किलैकाधुना
तस्याश्चात्र सभापदिर्मम पिता निर्धारितोऽभूत्तदा ।
अस्याः कार्यमहो विधानरचना, सत्सम्प्रदायाश्रये
प्रश्ने चापि समस्तवस्तुविवृतिप्रस्तावनं चाभवत् ॥ ७० ॥

एषाऽभाष्यत नेहरूसमितिरित्यस्याश्च लेखात्मकं
कार्यं तत्किल नेहरूविवृतिरित्युक्ता तदानीं जनैः ।
सर्श्रीतेजबहादुरोऽपि समितेरस्याः सदस्योऽभवत्
सप्रूस्तद्विवृतेः किलोत्तरवहोऽभूदंशतः कस्यचित् ॥ ७१ ॥

नाहं तत्समितेः सदस्यपदतः कांग्रेसमन्त्रित्वतो
भूयः कार्यमिह व्यधां तदसंमंजस्यं चिरं चिन्तयन् ।
वेदाहं यदि वस्तुतो त्रिटिशगा सत्ता विजेयास्ति न-
स्तर्ह्येषा विवृतिर्विधानरचनं चास्तेऽफलं सर्वथा ॥ ७२ ॥

अन्या दुष्करता ममेयभवद्-ध्येयं समित्यानया-
ऽस्माकं सम्मतमेव तत्क्तमहो ! ध्येयं तथा विस्मृतम् ।
मद्दृष्ट्या त्वनया यथार्थफलता दर्श्या स्वकीयेदृशी
यत्रादर्श्यत साम्प्रदायिककलेः किञ्चित्समाधानकम् ॥ ७३ ॥

नाशासे नियमेन सन्धिविधिना प्रश्नोऽयमत्युत्कटो
नित्यत्वाय समाहितोऽत्र भविता ध्यानान्तरायं विना ।
हिन्दुस्थाननिवासिनो निजमनो युञ्जन्तु सामाजिके
राष्ट्रस्यार्थिकमङ्गले च न पुनस्तत्सम्प्रदायानले ॥ ७४ ॥

सम्भाव्यं समभूद्यथोभयदिशोः कालाय कस्मैचना-
नत्या व्यक्तय ऊररीकृतपणाः स्युस्तर्हि शान्तिर्भवेत् ।
तस्मात्तत्समितेः कृतेषु करणीयेष्वेष न प्रत्यहन्
तस्याः प्रत्युत यावती सहकृतिः शक्याऽकरोत्तावतीम् ॥ ७५ ॥

एकत्रावसरे प्रतीतमधुना साफल्यमासाद्यते
द्वित्रा एव तु निर्णया अवशिषन् पञ्चाम्बवीयादयः
हिन्दूमुस्लिमशिष्यगो विषय आसीत्स त्रिकोणाश्रितः
पञ्चाम्बौ समितिः स्वकीसविवर्तिं नत्नाशयेनायुनक् ॥ ७६ ॥

एतस्मिन्विषये तया च विहिता या संस्तुतिः प्रस्तुता
भागाङ्कैर्नवलैस्तु लोकगणनासम्बन्धिभिः पोषिता।
किन्त्वासीत्तदपार्थमेव निखिलं शङ्कामयालम्बना-
न्मध्ये किञ्चिदिहान्तरं निरसितुं न द्वित्रपारं गतम् ॥ ७७ ॥

स्वीयायाः समितेरमुत्र विकृतौ कर्तुं विचारं तदा
जातं सर्वदलीयमेव तदिदं द्वैविध्यमग्ना वयम्।
वाञ्छामो हि न साम्प्रदायिकसमाधानेऽत्र विघ्नो भवेत्
इच्छामश्च नमेम नात्मवशताप्राप्तेः प्रयत्ने क्वचित् ॥ ७८ ॥

अभ्यर्थ्यं त्वभवत् यदात्मवशताप्रश्ने तु सम्मेलनं
मन्ये यस्य निजाङ्गकस्य परमां स्वाधीनतामर्पयेत्।
येनास्मिन् विषये यदन्तरिह यद्वाञ्छेत्स कुर्वीत तत्
काङ्ग्रेसं दृढतापुरस्सरमिह स्वस्वप्नमेवाश्रयेत् ॥ ७९ ॥

अन्ये वाप्यनुभृत्यनीतिसरणिं यत्कार्यमस्मान्निजं
गृह्णीयुस्तदधीनतास्तरमधिष्ठायैव तत्तत्स्वतः।
सन्नद्धस्तु पिता ममेह विवृतेः स्वीकारणे तत्क्षणम्
नायं नन्तुमिहाल्पमप्यलमभूदिच्छन्नपीह क्वचित् ॥ ८० ॥

अत्रासीत् सुमहद्दलं कृतिमतां स्वातन्त्र्यमेवेच्छतां
तेनोक्तोऽस्मि हृदा दलप्रतिनिधीभूयाहमावेदये।
स्वातन्त्र्ये लवमात्रमप्यपचयं संकल्पयत्कल्प्यते
तस्विन्नस्ति न नोऽन्वयस्तनुरपीत्येतत्सदा धीयताम् ॥ ८१ ॥

अस्माभिः स्फुटता कृतेयमपि यत्सम्मेलनस्याध्वनि
नो किञ्चित्प्रतिबन्धकं क्वचिदपि न्यस्याम वाचाप्यहो।
इच्छामो हि न साम्प्रदायिकमनःसंवादमार्गे मनाक्
अप्येते वयमन्तरायमिति तं रक्षाम यत्नैर्नवैः ॥ ८२ ॥

एतादृश्यतिगौरवास्पदपदे चैतादृशी धीरता
नैवासीत्फलिनी यतो हि भविता सेयं नकारात्मिका।
तस्मिन्नेव दिने प्रणीय सखिभिः स्वातन्त्र्यसङ्घं नवम्
स्वीया साभिरुचिः क्रियात्मकमपि स्वारूप्यमालम्भिता ॥ ८३ ॥

प्रस्तावात्मनि याः किलाधिकृतयो दत्ता विधानेऽभवन्
न्यस्ताभूदवधेश्वरादिवचनाद् धारेयमेषु ध्रुवम् ।
तत्क्षेत्राधिकृतिर्नछेत्स्यत इति प्रत्तात्र गौरन्तिमा
तत्सम्मेलननिर्णयो मम मनोधातं महान्तं व्यधात् ॥ ८४ ॥

निःशङ्कं हि विधानमेतदखिलं वैयक्तिकीसम्पदः
सिद्धान्तानधिकृत्य निर्मितमिति व्यक्तिप्रधानं भवेत् ।
किन्त्वेतासु रियाश्रितासु महतामत्रार्धसामन्तवत्
स्वामित्वेऽप्यचलाधिकारकरणी धारेति नैवोचितम् ॥ ८५ ॥

एतेन स्फुटतां गतं यदिह ये कांग्रेससन्नायका-
स्तेभ्यश्चातितरामकाङ्गरसिकाः स्निह्यन्ति भूस्वामिषु ।
ते सामाजिकजीवनोन्नतिमतां बद्धान् समूहानपि
त्यक्त्वा तान् समुपेक्ष्य वा विदधते तैरेव सौहार्दकम् ॥ ८६ ॥

इत्थम्भूतपरिस्थितावपि ममाभातिस्म भद्रेतरं
काङ्ग्रेसस्यप्रधानमन्त्रिपदतः कुर्वे क्रिया राष्ट्रियाः ।
तच्चाधृत्य मया विचिन्तितमतोऽहन्त्यागपत्रं ददै
हाहा, भारतवर्ष आत्मवशतासंधे सदस्योऽस्म्यहम् ॥ ८७ ॥

अत्र श्रीलसुभाषचन्द्रवसुनापि त्यागपत्रं निजं
दातुं प्रार्थितमित्यहं च स च न प्राप्तौ सभासम्मतिम् ।
आवां प्रत्यवदच्च कार्यसमितिः स्वातन्त्र्यसंघे युवां
कार्यं कर्त्तुमिहार्हतो न खलु तत्काङ्ग्रेसतो भिद्यते ॥ ८८ ॥

सत्यं चेदमभूदिहात्मवशतां कांग्रेसमाघोषयत्
शश्वल्लक्ष्यतया ततोऽहमभितः प्रासीदमाशान्वितः ।
आश्चर्यं प्रतिभाति तेषु दिवसेष्वाराधितोऽस्म्यञ्जसा
प्रत्यादातुमहंरुषाप्रणिहितं स्वत्यागपत्रं सुखात् ॥ ८९ ॥

तच्चैदं बहुधा भवन्न दलतो ह्यन्यो दलो भिन्नतां
तह्यांकाङ्क्षत, येन केनचिदपि प्रोग्रामसद्धेतुना ।
श्रीगान्धिर्न दलैःकृत सु समितिष्वायाति सम्मेलने-
ष्वंशं चापि न सेवतेस्म लखनौसंसद्यगान्नाप्ययम् ॥ ९० ॥

एतस्मिंश्च किलान्तरे भ्रमति तत्सैमन्कमीशन्निह
कृष्णैः केतुभिरस्य तर्हि जनता 'गोवैक' घोषैस्तथा।
वार्ता वृद्धिमुपागता लवपुरे, देशे च रोषप्रभा
व्रूते स्वागतमत्र राजपुरुषः सम्मर्दसंघर्षगः॥ ९१॥

लालालाजपतिर्विरोधसमितेर्नेतृत्वमाधारयत्
सोऽयं मार्गतटे प्रदर्शनकृतामग्रेस्थितोऽभूद्यदा।
उद्दण्डेन तदाङ्गरेजयुवकेनासौ हतो वक्षसि
दण्डाधातपरम्परा प्रवितता तत्रापरैः पूरुषैः॥ ९२॥

तस्यान्ये पुरुषाः स्वभावपरुषाः सम्मर्दमध्ये स्थितान्
निर्दोषानपि ताडयन्ति मनुजान् दण्डैः सलोहाग्रकैः।
वीथ्यो राजपथाः प्रदर्शनकरैः क्रान्तावकाशा भृशं
तत्राशङ्कितराजपूरुषमहासङ्घर्षघातैरपि ॥ ९३॥

अस्माकं सकलाः प्रदर्शनविधाः शान्ता भवन्त्येव ताः
लालाजोह विदन्नपि प्रगतिमानभ्यागतः संकटे।
तस्योपर्यथ पूरुषैः कृतमिदं त्वाघातजातं यथा
तेषां सा विषमा च याशविकतोद्विग्नान्करोति स्म तान्॥ ९४॥

तावद्दण्डकठोरघातसहनेऽभ्यस्ता न च स्मो वयं
तेनैतादृशघोरपाशविकतां मन्यामहे दुःसहाम्।
अस्माकं महतो महीयसि तथा लोकप्रिये नेतरि
पञ्चाम्बौ प्रणयैकभाजनतया सम्भावनीये जने॥ ९५॥

श्रीमल्लाजपतौ कृता व्यवहृतिर्यैषा मदान्धैर्ध्रुवं
सा निन्द्या नितरां हि पाशविकता, व्यामूढता, भीरुता।
तां दृष्ट्वा निखिलेऽपि भारततले तत्रोत्तरेऽस्मिस्तथा
पञ्चाम्बौ च महानमर्ष उदभूच्चाश्चर्यमाविष्कृतम्॥ ९६॥

हाहा स्मो वयमत्र निर्बलतमाश्चैवासहाया भृशं
हृद्रोगस्य रुजातिपीडितमुरो दण्डेन जंघन्यते-
यत्रैषामभिनन्द्यवन्द्यमहसां सन्नायकानामपि
हास्माकं बत मानहीनहृदयं नो दीर्यते पश्यताम्॥ ९७॥

लालाजी निजकायिकीं हृतितर्तिं भीष्मामवाप्तस्तदा
या यूनापि दृढेन केनचिदहो सोढुं क्षमा नाभवत् ।
सप्ताहैः कृतवत्यसौ कृशमिमं क्षीणं तथा जर्जरम्
मृत्योर्दारुणहस्तयोर्निगडितप्राणं गतासुं क्रमात् ॥ ९८ ॥

कायिक्या अपि दुःसहातिविषमाऽऽसीत्कष्टदा मानसी
या धीरं च गभीरमप्यलमिमं भूयोऽनयत्क्लिष्टताम् ।
तत्र व्यक्तिगतोऽपमानपरमोऽप्यासीढ्यं राष्ट्रियं
नूनं तस्य किलानुतापनविधावुद्दीप्तदावानलः ॥ ९९ ॥

हिन्दुस्थानमनोऽपमानमभवत्तद्राष्ट्रियं वस्तुतो
यत्तस्मात्परमेव मृत्युरभवल्लालाजियो दुःखदम् ।
तेनामर्षरुषैतदीयहृदयेऽप्येकाभिमानाकृतिं
प्राप्ता तर्ह्यनिवार्यतैव समभूत्सा मृत्युहेतुः स्मृतेः ॥ १०० ॥

अत्रेदं गमनीयमेव तदिदं ज्ञात्वैव पश्चाद्भवाम्
गाथामुत्तरभारते भगतसिंहस्य प्रियां मन्वते ।
सांलोकप्रियतां तदैव जनता सम्यक्तया ज्ञास्यति
तत्कार्यस्य तले यदैव मनसा तन्मूलमुद्द्रक्ष्यति ॥ १०१ ॥

या वार्ताऽत्र तदैरयत्तदनुमादृष्टि विना कस्यचित्
किञ्चिकर्म न निन्दनीयमिह तत्सभ्येतरत्स्यादिति ।
अस्मात्पूर्वमहो जना नहि भगत्सिंहं विदन्तिस्म तं,
हिंसातङ्कवशेन च प्रियतया सोऽभूत्सुसम्भावितः ॥ १०२ ॥

आतङ्कानुगतेह संचरति सा त्रिंशत्समाभ्यो मया
बंगेऽस्या प्रथमक्षणान् विजहता चिन्त्या न कस्याप्यभूत् ।
सा लोकप्रियता यया किल भगत्सिंहोऽभवत्सज्जित-
स्तस्या हन्त न केनचिच्छततमोऽप्यंशो बभूवार्जितः ॥ १०३ ॥

एतस्या प्रकटस्य वृत्तविषयस्यास्तित्वमङ्गीकृतं
कर्तुं कः प्रभवेदिदं हि मनसा स्वीकार्यमेवाखिलम् ।
तद्वत्स्पष्टमिदं च सत्यमपि तद् त्वातङ्कवादः क्वचित्
वेगं धारयते परं न युवसु त्वाकर्षणं तस्य तत् ॥ १०४ ॥

नूनं पञ्चदशाब्दतः प्रतिपदं हिंसा जनैर्निन्द्यते-
ऽहिंसा चाप्यभिनन्द्यते तदिह तद्वातावृतिः शोधिता।
यस्याः सत्परिणामतो जनमनो नो राजनीतावपि
प्रायः साधनतां नयत्यमुमिहातङ्कं तटस्थीभवन् ॥ १०५ ॥

यद्ववर्गीयकनिम्नमध्यमजनेष्वर्थात् सुशिक्षात्मसु
कांग्रेसेन कृतः प्रचारविसरो हिंसाविरोधे महान्।
आस्ते तेषु स सप्रभावमधिकं, तेषां क्रियाशीलता
सेयं सत्वरशक्तिताप्यनुभवत्यातङ्कदोषानिमान् ॥ १०६ ॥

याभ्यां क्रान्तिकरेषु कर्मसु मनो यातिस्म तेषां पुरा
ते पश्यन्ति न साध्यते भुवि जनैः क्रान्तिः किलातङ्कतः।
सोऽयं निष्फल एव जर्जरतनुः सत्क्रान्तिमार्गेऽश्मभि-
र्बाधामेव तनोति, सोऽद्य शवतां प्राप्तोऽस्त्यहो सर्वतः ॥ १०७ ॥

तस्येयं शवता न शासनकृता कार्यैः कृतास्ते निजै-
र्जानीते दमनं हि शासनमिदं तत्सीमनं चान्ततः।
नह्युन्मूलयते तदत्र विकृतिं मूलादिति ज्ञायते
सोऽयं क्रान्तिकरप्रवृत्तिषु विशन् मुग्धश्च भात्यर्भकः ॥ १०८ ॥

वाल्येऽस्मिन्नतियातवत्यथ सहैवातङ्कवादोऽप्ययं
निर्यातीह भवन्तु नाम कुहचित्कर्माणि वा कानिचित्।
मन्दं मन्दमिमानि बन्धनमिवायान्तीह किन्तु प्रजा
हिन्दुस्थानगता विचार्य विजहात्यद्यापि हिंसामिमाम् ॥ १०९ ॥

आधिक्येन न विश्वसन्ति मनुजा हिंसां तु वैयक्तिकी-
मातङ्कप्रियतां च किन्तु वहवो ध्यायन्ति चाद्यापि ताम्।
आगन्तुं समयोऽर्हतीह घटितैर्हिसात्मकैः साधनैः
स्वातन्त्र्यं समुपार्जितुं प्रयतनं त्वावश्यकं स्यादिति ॥ ११० ॥

एतच्चाभवदेव कुत्रचन नः पार्श्वस्थदेशे पुरा
प्रश्नोऽयं किल तात्त्विकस्य विषयीभूतो विवादस्य नः।
कालस्तं निकषे कषिष्यति, यदप्यास्तां, किलातङ्कवाक्-
स्वीकार्यैरिह साधनैर्न भविता कश्चिद् विचारान्वयः ॥१११॥

इत्थं नार्जिजदत्र कर्मभिरयं हिंसात्मकैः किन्त्वसौ
लालालाजपतेश्च राष्ट्रियमतेश्चैव प्रतिष्ठामपात् ।
इत्येतत् समकालिकैः खलु जनैर्मन्येऽनुभूतं भवेत्
ख्यातोऽत्रैष युवापि नेतृषु भगत्सिंहः प्रतीकीभवन् ॥११२॥

तत्कार्यं च जनैस्तु विस्मृतमिहैकं तत्प्रतीकं स्थितं
पञ्चाम्बौ प्रतिलोकवासमथ तन्न्यूनं प्रदेशोत्तरे ।
तन्नामाद्य गृहे गृहेऽस्ति गदितं गीतेषु गाथास्वपि
प्राप्तं तेन हि विस्मयावहमितो लोकप्रियत्वं परम् ॥११३॥

लालालाजपतिश्च साइमनकमीशनरोधकादाग्रहात्
दण्डाघातविधानतः परमसौ दिल्लीसभायामगात् ।
तद्देहे प्रतिघातचिह्ननिवयोऽद्यापि स्म संदृश्यते
तज्जाभिश्च रुजाभिरेष बहुलं कष्टं स्म भुङ्क्ते चिरात् ॥११४॥

सा चायोज्यत तत्र सर्वदलगात्सम्मेम्लनाद् यत्परं
तस्मादत्र यथा कथञ्चन मतिः स्वातन्त्र्यगाऽभ्युत्थिता ।
न ह्येतत् स्म्रियते विवादविषयः प्रारम्भतः कोऽभवत्
तत्राहं धृतवानिहैषसमयोऽद्यास्त्येव यश्चिन्तितः ॥११५॥

निर्णेतव्यमिह स्वयं च यदिदं तत्क्रान्तिकारि क्षणं
स्वीकुर्मो भवतीह राजनयिके सामाजिके सद्मनि ।
कायाकल्प इहास्त्यपेक्षित इतो ध्येयेऽथवा साधने
संस्कारं वदतामिति प्रवचनं नासीन्महत्त्वास्पदम् ॥११६॥

एतन्मेऽप्यभविष्यदत्र गलितं ध्यानान्न चेदंशतो
लालाजी तदखण्डयिष्यदिह नो नालोचयिष्यत्तथा ।
सोऽस्मांश्चावहितानिहात्यकुरुत प्रायो ब्रिटिश्देशगे
नैहाशा क्रियतां किल श्रमवतां वर्गे च तन्मेऽर्थितम् ॥११७॥

नाहं तेष्वधिकारिणोऽपि महतो नेतृन् प्रशंसामि वा
हिन्दुस्थानंमनीषिणः स्ववशतां ते नान्वमोदन्त चेत् ।
साम्राज्यं वदता विरुद्धमथवा किञ्चित्कृतं तैर्भवेत्
तेषामन्यतमश्च चेज्जिगमिषुः स्यात्तं समाजं प्रति ॥११८॥

कांग्रेस्यां समितौ मया यदुदितं लाहोरमागत्य तत्
लालाजी समलोचयत् तद्खिलं साप्ताहिके 'पीपुले'।
एकैकं च तदंशमुद्धृतवता या लेखमाला कृता
तस्या आदिम आगतः प्रकटतामन्तर्हितो लेखकः ॥११६॥

यः साङ्ख्ययोगदृगाश्रथं वेदं प्रधानमिहालिखत्
तद्ब्रह्मसूत्रगसूत्रभाष्यमपोह्य वैदिकसाक्ष्यतः।
तदनूदिते श्रीमज्जवाहरलालनेहरुजीवने
काव्ये चतुर्बिंशो गतः सर्गः पुनर्नृपनीतिगः ॥

यष्टिप्रहारानुभवः

उपजातिः

पञ्चविंशः सर्गः

लालातनौ यष्टिभिराहतायां पश्चात्तदाधाररुजा मृतायाम् ।
कमीशनः साइमनो यतोऽगात् प्रदर्शनान्यस्य कृते ततोऽगुः ॥ १ ॥

आसीद्यथासुः स हि लक्षनावं कांग्रेसमत्रापि तदास्त सज्जम् ।
केभ्यश्चनाहर्म्यं इहौघयात्राः सभा अभूवंश्च प्रदर्शनानि ॥ २ ॥

यानि प्रचाराय तथानु पूर्वाभ्यासाय लोकैरनुयोजितानि ।
अगामहं तत्र चकार कर्माण्यारम्भिकाण्यासत शन्तमानि ॥ ३ ॥

शान्तैश्च कार्त्स्न्येन व्यवस्थितैश्च तैर्लम्भितं यत्सफलत्वमत्र ।
उद्वेजितास्तेन पदाधिकाराः पदे पदेऽकुर्वत तन्निरोधम् ॥ ४ ॥

तथौधयात्राक्रमणाद्विरुद्धा प्रवर्तिताज्ञा विविधस्थलेषु ।
मयापि चात्रानुभवः कृतोऽभूत् धातस्य तैः पूरुषयष्टिदण्डैः ॥ ५ ॥

गतागतत्वे गतिरोधमेव श्रित्वा निदानं निहतौघयात्रा ।
अस्माभिरत्रावसरो न देयः शङ्कायतस्येति कृतो निरोधः ॥ ६ ॥

स्मरामि यावद्विहितानि तावत् तैः षोडशानां लघुमण्डलानि ।
पृथक् पथा तानि सभाप्रदेशे सम्प्रेषितुं चाक्रियत व्यवस्था ॥ ७ ॥

विधानदृष्ट्या स निदेशभङ्गोऽभूत्सध्वजानां युगपत्प्रयाणम् ।
एकस्य तेषामहमग्रगोऽस्मि गोविन्दपन्तस्त्वपरस्य मद्वत् ॥ ८ ॥

शून्योऽयमासीत् खलु राजमार्गो मन्मण्डलं नागशतद्वयेऽगात् ।
तावच्चतुर्वाजिपदाधघाता दृष्टाश्च पृष्ठे त्रिदशाश्ववाराः ॥ ९ ॥

क्षणेन तेऽस्मानुपगम्य वाजिपङ्क्त्या समन्तात्प्रविकीर्णवन्तः ।
दण्डाभिधातैर्हतवन्त आरादिहान्वधावन्प्रपलायमानान् ॥ १० ॥

घातं च घातं समपातयंस्तान्, अश्वानुपर्यापततोऽवलोक्य ।
जाग्रत्स्ववृत्तिर्मनसेरितोऽहं स्वं रक्षितुं साहसभञ्जिदृश्यात् ॥ ११ ॥

किन्त्वस्मि मन्ये मम कापि वृत्तिर्मां स्वस्थलेऽस्थापयदात्मसंस्थम् ।
आद्यः प्रहारोऽत्र मया स सोढो मृत्पृष्ठतो रोपित एष मन्दः ॥ १२ ॥

मध्येपथं स्वं स्थितमन्वपश्यमेकाकिनं पूरुषकैः परीतम् ।
अस्मत्स्वयंसेवकवीरवर्गं ये ताडयन्तः परिपातयन्ति ॥ १३ ॥

स्वयं किलाहं निजमावरीतुं मार्गैकदेशं प्रतियामि मन्दम् ।
परं पुना राजपथेऽवरुद्धो मनस्यकार्षं सहसा विचारम् ॥ १४ ॥

ममैकतोऽत्रापसृतिर्न योग्येत्ययं क्षणेनैव कृतो विनिर्णयः ।
विचारसंघर्षविनिर्णयानामेषां स्मृतिर्मेऽविकला समेषाम् ॥ १५ ॥

तस्वाभिमानस्य फलं ममासीत् यन्नेरितुं शक्ष्यति कातरत्वम् ।
तथापि सा कातरसाहसिक्यमध्यस्थरेखातितरां कृशासीत् ॥ १६ ॥

मयाश्रितं साहसिकत्वमन्तर्बहिश्च सादी मदुपर्यरोहत् ।
स भ्रामयन् यष्टिमुदीरयन् स्वं चाश्वं मयोक्तो-जहि ताडयेति ॥ १७ ॥

शिरश्च तिर्यक्कृतमात्मवृत्त्या यष्टिप्रहारात्तु ततोऽवितुं स्वम् ।
पृष्ठे ममायं च धमाधमेति द्विर्दुष्प्रहारं कृतवान् सरोषम् ॥ १८ ॥

अभ्राम्यदन्तः समकम्पताङ्गं तथाप्यहं नाचलमित्यपूर्वम् ।
क्षणेन तत्पूरुषयूथमस्मान् स्थानान्निवार्याश्वमुखे न्ययुङ्क्त ॥ १९ ॥

एकत्रितास्तत्र पुनस्तदास्मत्सार्था वहच्छोणित-शीर्षगात्राः ।
गोविन्दपन्तस्य दलं तदास्मानभ्यागमत्ताडितसर्वसार्थम् ॥ २० ॥

सर्वे वयं पूरुषसम्मुखेस्थाः प्रवेशितास्तत्र तमोऽन्धमासीत् ।
तत्रैकतश्चाधिकृतः समेताः सम्प्राप्तवृत्तः परतश्च लोकः ॥ २१ ॥

सम्मर्द एवं सुमहानिहाभूत् अस्मान् परागन्तुमिमेऽदिशंश्च ।
पथाथ तेनैव गता वयं च ते सादिभिश्चानुगता निहन्तुम् ॥ २२ ॥

इयं हि लघ्वी घटनापि दीर्घैर्निरूपिता वाक्यकदम्बकैर्यत् ।
मय्येतयाऽपाति महान् प्रभावः यत्राङ्गिकं कष्टमिदं मुदेऽभूत् ॥२३॥

तद्विस्मृतोऽहं हि विचिन्त्य चित्ते यदस्मि नूनं सुदृढः शरीरे ।
यष्टिप्रहारान् विषमान् विसोढुं स सम्मुखे स्थातुमथालमासम् ॥ २४ ॥

येनाभवद् भूरि च विरमयो मे यदत्र कृत्स्ने घटनाप्रवाहे ।
सन्ताड्यमानस्य च यष्टिघातैर्बुद्धया ममाकारि सुसाधु कार्यम् ॥२५॥

स्वभावनानामवबोधपूर्वं विश्लेषणं तर्ह्यपि यत्त्वकार्षम् ।
व्यायाम एव त्वभवत्सहायः परेद्युरस्माद्विषमे क्षणेऽपि ॥ २६ ॥

आगाम्यभूत्तर्हि कमीशनं तत् प्रदर्शयिष्याम इमे विरोधम् ।
तदाभ्यतिष्ठच्च पिता प्रयागे स वृत्तपत्रादधिगत्य वृत्तम् ॥ २७ ॥

मयि प्रहारस्य तु यष्टिकानां चिन्तातुरः स्यात्परिवारयुक्तः ।
रात्रावकार्षं किल दूरभाषं क्षेमं समग्रं न विधत्त चिन्ताम् ॥ २८ ॥

चिन्ता तु तेषामभवन्मदर्था शान्त्यासितुं प्राभवदेष नापि ।
स त्वर्धरात्रे प्रति लक्षनावम् प्रस्थातुमैच्छद् गतवाष्पयानः ॥२९॥

स मृत्तरण्या चलितः परं सा विकारतो रुद्धगतिः स्वमार्गे ।
संस्कारमाप्ता नववादनेऽत्र क्लान्तं तथा श्रान्तमिमं त्वनैषीत् ॥ ३० ॥

इहैव काले वयमुद्यताः स्मस्तामोघयात्रां प्रतिगन्तुमुत्काः ।
केनाऽपि कार्येण यथा न दीव्येत्तथा प्रदीप्तं नगरं स्ववृत्तैः ॥ ३१ ॥

सूर्योदयात्प्राग्बहुसंख्यलोकाः स्थानं प्रपन्ना नगरस्य दिग्भ्यः ।
नैकौधयात्रा लघवोऽप्यगण्याः कांग्रेसकार्यालयतः प्रयाताः ॥ ३२ ॥

चतुश्चतुःपूरुषपङ्क्तिशस्ताः सहस्रशो यन्ति जवेन यावत् ।
वयं महौघेन गताश्च तावन्मध्येपथं पूरुषकैर्निरुद्धाः ॥ ३३ ॥

स्थानाग्रतो यो विततायतोऽभूत् इहार्धमीलः खलु भूमिभागः ।
तत्राधुना नूतनमस्ति क्लृप्तं स्थानं यतः पङ्क्तिनियन्त्रिताः स्मः ॥३४॥

अस्माकमेषा च महौघयात्रा तत्रावरुद्धा प्रगतेर्विरक्ता ।
तत्पत्तिभिः सादिभिरेव तावत् सैन्यैः समागत्य वृताः समन्तात् ॥ ३५ ॥

सहानुभूत्या समुपेयिवांसः सम्मर्दमेकं किल क्लृप्तवन्तः ।
ते कौतुकादोघविशालभागं द्विशस्त्रिशश्चापि विपर्यतिष्ठन् ॥ ३६ ॥

दूरे दलं किञ्चिददृश्यताद्धा तत्सादिनां द्वित्रिनरात्ममासीत् ।
यत्क्षेत्रमेतत्परिवेष्टयद्वा अस्माकमेवानुदिशं प्रधावत् ॥ ३७ ॥

क्षेत्रे स्थितांस्तच्च विमर्दयत्सत् सन्ताडयन्नृंश्च चचाल शश्वत् ।
अश्वांस्त्यजन्तो मुहुराक्रमन्तो दृश्यं किलैकं समुपाहरंस्ते ॥ ३८ ॥

पथि स्थितैः कौतुकिभिः सहैते तैर्वाजिपादैः परिमर्दिता ये ।
आक्रामकाणामथ पृष्ठभागे भूपृष्ठतस्तूदतिष्ठन्ननेके ।। ३९ ।।

हाहेति ते भग्नदेहा रुदन्तः क्षेत्रस्य युद्धाङ्गणतां वदन्तः ।
दुर्दर्शदृश्यं तदवेक्षितुं च विमर्शितुं नः समयोऽपि नासीत् ।। ४० ।।

ते सादिनोऽस्मच्छिर आरुरुक्षंस्तद् वाजिनः संघटिताः प्रपङ्क्त्या ।
वयं निजस्थानमृदेव श्लिष्टाः स्रस्ताश्च नो किञ्चिदिमे निवृत्ताः ।। ४१ ।।

अश्वाग्रपादा अवलम्बमाना आसन् किलास्मन्नतमस्तकेषु ।
तत्पृष्ठपादा अखिलं शरीरं त्वधारयन्नेजितवेपिताङ्गम् ।। ४२ ।।

ते पत्तयः सादिनश्चैव सर्वे स्वयष्टिका व्यक्तिषु पातयन्तः ।
भयावहं घातमकुर्वतास्मास्वन्तःप्रतीकारविचारकेषु ।। ४३ ।।

स्वसम्मुखस्थं धरणौ निपात्य तदश्वमारुह्य तदीययष्ट्या ।
तमेव सन्ताड्य तदङ्गभङ्गं बिधातुमासीन्मन उद्यतं मे ।। ४४ ।।

पूर्वेद्युरासीम्मम यो विवेको भग्नोऽद्य सोऽभूत्करुणातिरेकात् ।
स्थानान्न चाल्यं न च पात्यमत्रेत्यासीत्सुशिक्षा प्रतिबोधयन्ती ।। ४५ ।।

स्वमूर्धरक्षामतिरिच्य नान्यत् किमप्यकार्षं करतोलनेन ।
अज्ञासिषं सम्मुखता किलात्र करिष्यते दुर्घटनां कठोराम् ।। ४६ ।।

अस्मज्जना यत्र भुशुण्डिकानां गोलीभिराभिर्भुवि भर्जिताः स्युः ।
कालः स दीर्घः प्रतिभाति यावद् यद्यप्यसौ मैनटिकी क्रियाऽभूत् ।।४७।।

पश्चात्सरन्त्यां क्रमशस्तु पङ्क्तौ स्थितः पृथक्चोभयतोऽपि मुक्तः ।
निर्वाधघाताः पतिता मदङ्गे पश्चाद्विकृष्यास्मि परत्र नीतः ।। ४८ ।।

तेनास्मि विक्षोभमवापमन्तः द्वित्रैस्तु घोराक्रमणं विभाव्य ।
मद्रक्षणं तत्र विचिन्त्य चित्ते सोऽयं प्रयत्नो विहितः स्वमत्या ।। ४९ ।।

अध्योघयात्रं निजपङ्क्तितस्तु शतं पदानामपसृत्य पश्चात् ।
पुनः स्वपङ्क्तिं परिकल्प्य धैर्यात्तत्र स्थितास्ते पुरुषाश्च दूरे ।। ५० ।।

इत्थं स्थितेभ्योऽस्मदपेतदृष्टिर्दूराद्गतं साइमनं कमीशन् ।
कृष्णध्वजैन्यक्कृतिसम्प्रदर्शाद् गोपायितं स्वं तदलं प्रभतम् ।। ५१ ।।

ततः प्रकल्प्याविरतौघयात्रां काङ्ग्रेसकार्यालयमागताः स्मः ।
ततो यथास्वं च विकीर्य याता अहं पितुः पार्श्वमगां प्रतीष्टः ॥ ५२ ॥

उत्तेजना सामयिकी गता सा प्रत्यङ्गमप्यात्मरुजः श्रमश्च ।
सम्पीड्यमाने मम सर्वगात्रे ते चाभिघाताः प्रकटाः स्वचिह्नैः ॥ ५३ ॥

न मर्मघातः क्वचनाभवन्मे इत्येव सौभाग्यमयः क्षणोऽभूत् ।
न भाग्यवन्तः कतिचित्तथासन् ये घोरघातैः परिपीडितास्तु ॥ ५४ ॥

गोविन्दपन्तो मम सन्निधिस्थस्तत्ताडनं भूर्यभवत् कठोरम् ।
स दीर्घकालं स्वकटिं किलर्जुं कर्तुं नहि प्राभवदिद्धशूलः ॥ ५५ ॥

न चापि कार्यं बहु कर्तुमासीदयं समर्थोऽभवदल्पचेष्टः ।
अहं तु शारीरिकशक्तिबोधात् सहिष्णुताया अभिमानमागाम् ॥ ५७।

आघातवृन्दान्यथ घातिनां तान्यादेशदानां च मुखानि तानि ।
न विस्मृतिं यान्ति कठोरकाणि प्रकाशयन्ति स्फुटनिष्ठुरत्वम् ॥ ५७ ॥

सन्ताडकास्ते किल सारजान्ता यूरोपजास्ते पशुघातमघ्नत् ।
मन्देन वेगेन तु भारतीयास्ते प्राहरन् जीवदयार्द्रचित्ताः ॥ ५८ ॥

तत्सारजान्ताननिष्ठुरत्वं सा रक्तपातस्पृहयालुता च ।
उन्मत्ततायाश्च प्रमत्ततायाः सीमान्तमेवास्पृशदन्तरस्थम् ॥ ५९ ॥

सहानुभूतिर्मनुजत्वमेषां चित्तेषु नाम्नापि न शिष्यते स्म ।
तस्मिन् क्षणे ताडितवर्गगानां मुखान्यभूवन् घृणया भृतानि ॥ ६० ॥

अहिंसया जीवनमावहन्तो विरोधिवर्गे मनसा च वुद्ध्या ।
स प्रेमभावो न विलावशिष्टः नास्मन्मुखेऽभासत साधुभावः ॥ ६१ ॥

तथापि नान्योन्यविरोधहेतोः शङ्कायतं किञ्चन नो न चासीत् ।
नासीत्कलिर्व्यक्तिगतो हि कश्चिन्न चाभवत्पूर्वपरो विरोधः ॥६२॥

तदाऽद्भुतानां च महाबलानां स्मः प्रातिनिध्ये किल शक्तिकानाम् ।
यास्तावदस्मान् विवशीकृतांश्च क्षिपन्ति नस्तावदितस्ततश्च ॥ ६३ ॥

याभिर्मनो बुद्धिमधिष्ठिताभिरुद्वेल्लितास्ताश्च मनोभिलाषाः ।
द्वेषञ्च रागञ्च विबोध्य याभिरन्धायुधीकृत्य वयं प्रयुक्ताः ॥ ६४ ॥

अन्धास्तथैते प्रपलायमाना जानीमहे नो क्व कथं व्रजामः ।
उत्तेजनायां स्थिरतां वहामस्तस्यां गतायां पुनरैम प्रश्नम् ॥ ६५ ॥

किमर्थमेतत् क्रियते नु सर्वं कस्मै च लक्ष्याय विचेष्टितानि ।
नार्थो न लक्ष्यं किमपि प्रबुद्धं प्रदर्शितः केवलमेष मोहः ॥ ६६ ॥

यश्चित्रकाव्यविवेचनायां भूमिकां महतीमलेखीत्
तत्कृतिः श्रीमज्जवाहरलालनेहरुचरितकाव्यम् ।
अस्य सर्गः पञ्चविंशोऽयं समाप्तिमुपैति यस्मिन्
वर्णिता यष्टिप्रहारानुभवगाथा खेदयन्ती ॥

श्रमिकसङ्घीयं काङ्ग्रेसम्

शालिनी

षड्विंशः सर्गः

तस्मिन् वर्षे भारतेऽस्मिन् विशेषाद् वर्गाधारात्सर्वसम्मेलने च ।
साइम्नस्याथो बहिष्कारकार्ये व्यस्तैवासीद् राजनीतिः प्रभावात् ॥१॥

चित्ताकृष्टिः किन्तु सा मामकीना दिश्यन्यस्यामेव लग्नाधिकासीत् ।
कांग्रेसस्यासं प्रधानो हि मन्त्री तद्दाढर्ये तत्सङ्गतौ चेक्षमाणः ॥२॥

लोकध्यानं धार्मिकेष्वावधेयमासीदिष्टं चापि सामाजिकेषु ।
अद्यत्वे जाग्रत्परीवर्तनेषु लोकाः प्रायः सन्त्युदासीनकल्पाः ॥ ३ ॥

आधीनत्वे प्राप्तसीम्नां च पोषे मद्रासे कांग्रेसकाले धृतानाम् ।
अर्थायास्मै देशभागेषु भूयो भ्रान्त्वाः क्लृप्ताः सर्वगम्याः समे च ॥ ४ ॥

व्याख्यानानि प्रायशस्तत्र दत्तान्यध्यक्षत्वं चाधृतं तत्र तत्र ।
मालावारे पाञ्चनद्ये च दिल्ल्याम् युक्तप्रान्ते च प्रदेशेष्वमीषु ॥ ५ ॥

मुम्वापुर्यां वङ्गदेशे च यूनां संघेष्वास्थां छात्रसंसत्सु चाहम् ।
युक्तप्रान्ते ग्रामवृन्दे श्रमैकाजीवानां वा कार्यशालासु चागाम् ॥ ६ ॥

प्राधान्येनासीदयं तत्र सारो यद्रूपं स्याद् देशकालानुरूपम् ।
यादृक् श्रोता तादृगेवाभवत्तत् स्वाधीनत्वं राजनीतौ समाजे ॥ ७ ॥

स्वातन्त्र्येष्वप्यार्थिकञ्चेदमादौ प्राप्तव्यं स्यात् राजनीतौ समाजे ।
मुख्यत्वेनाधीतिनां कर्मिकाणां वर्गे काङ्क्षेऽहं समाजे च मुक्तिम् ॥ ८ ॥

राष्ट्रान्दोलामेरुदण्डाः किलैतेऽत्यन्तं सङ्कोचेन राष्ट्रीयचिन्ताम् ।
कुर्वन्तीति प्राक्तने गौरवे स्वे वेगो देयो हानिरुल्लेखनीया ॥ ९ ॥

वैदेशिक्या हन्त शिष्टचा च हानिः का न्वध्यात्मे काधिभूते च क्लृप्ता ।
घोराः पीडा भोजनीया जनौधैर्वासः कार्यः पारके चात्र राज्ये ॥ १० ॥

एकैकं तन्नः प्रतिष्ठाहरं स्याज्जातीयोऽसौ घोर एवापमानः ।
तत्रैष स्यान्नः प्रतिष्ठानुरोधः स्वाधीनाः स्यामेति तत्सिद्धये च ॥ ११ ॥

वेद्यामस्यां मातृभूमेर्वयञ्च स्वात्मानं वै तद्बलिं कल्पयेम ।
एतत्त्वासीत् साधु बुद्धं न कस्य हिन्दुस्थानीत्यात्मनादं श्रृणोति ॥ १२ ॥

मच्चित्तेऽपि प्रोद्यतो राष्ट्रभावः काचिद् दीप्तिर्जीविते गद्गदत्वम् ।
हिन्दुस्थानस्यान्यदेशस्य जातु प्राचीनत्वं नान्धवत्स्तौमि चायम् ॥१३॥

हिन्दुस्थानस्य स्तुतिः सा यथार्था भूयो भूयो भाषणाद्या श्लथाऽभूत् ।
नैकावृत्त्याश्चेदमासीत्फलं यद्युद्धे नैवेक्षामहे मुख्यलक्ष्यम् ॥ १४ ॥

नाग्रे यान्ति प्रायशोऽन्ये विशेषाः कार्तार्थ्यञ्चाच्छादयत्यस्मदन्तः ।
एतैः स्तोत्रैर्दीप्तिमायाति चेतः प्रोत्साहो नो लभ्यतेऽस्मद्विचारैः ॥ १५ ॥

हिन्दुस्तानान्नागतोऽहं समाजे सत्यं पश्चात्पाद एव स्थितोऽहम् ।
नैके तारावच्चमत्कारमाप्ता मन्दं मन्दं कष्टतोऽभ्यागतोऽस्मि ॥ १६ ॥

श्रान्त्याजीवानान्तदान्दोलनञ्च संघाधारादस्ति सामाजिकं तत् ।
यूनां संघा अप्यहो मादृशा ये प्रत्यायान्ति प्रेरयन्तः समाजम् ॥ १७ ॥

सप्तोपेते विंशवर्षे युरोपात्प्रत्यायातोऽपश्यमत्रैकरूपम् ।
अस्पष्टं तं गोलमूल्यं समाजवादं देशे वायुवार्यङ्गभूतम् ॥ १८ ॥

वैयक्तत्वेनात्र पूर्वं समाजवादी भूयान् भारते राजते स्म ।
एते प्रायः स्वप्नद्रष्टार आसन् मन्दं मन्दं मार्क्सवादाभिभूताः ॥ १९ ॥

जीवानां वा मानवानां कृते वा सूते काचिद्वै दयेमं समाजम् ।
तादृक्षास्ते तत्सुधारार्थिनोऽमी प्रत्येकस्मिन् वै युगे सम्भवन्ति ॥ २० ॥

मार्क्सात्पूर्वंचाप्य यमी लोक आसन् निःस्वे कार्ये यान् दयेयं युनक्ति ।
तेभ्यो दत्तं ह्रीश्वरेणास्त वित्तं मार्क्सो निःस्वे निः स्वताक्रान्तिमीष्टे ॥२१॥

एकः कर्ताहं समाजीति मेऽभूत् ख्यातः कांग्रेसीति किञ्चिन्महत्त्वम् ।
मादृक्षाश्चान्येऽपि कांग्रेसिका ये मद्वत्कर्तुं संप्रवृत्ता विचारम् ॥ २२ ॥

एषा वृत्तिः सर्वतो युक्तप्रान्ते प्रान्तीयायां प्राप्यते तत्सभायाम् ।
यत्रास्माभिः पूर्वतो नम्रकार्यारम्भः कश्चित्कल्पितः कार्यवाहः ॥ २३ ॥

कश्चित्तेषां मार्क्सवाद्यस्ति पूर्ण इत्यावर्ते भारते वा विदेशे ।
यत् किञ्चित्तत्सौवियद्रस आसीत् तेनेद्धं तत्पञ्चवर्षीययोगैः ॥ २४ ॥

वेद्यामस्यां मातृभूमेर्वयञ्च स्वात्मानं वै तद्वलिं कल्पयेम ।
एतत्त्वासीत् साधु बुद्धं न कस्य हिन्दुस्थानीत्यात्मनादं शृणोति ॥ १२ ॥

मच्चित्तेऽपि प्रोद्यतो राष्ट्रभावः काचिद् दीप्तिर्जीविते गद्गदत्वम् ।
हिन्दुस्थानस्यान्यदेशस्य जातु प्राचीनत्वं नान्धवत्स्तौमि चायम् ॥१३॥

हिन्दुस्थानस्य स्तुतिः सा यथार्था भूयो भूयो भाषणाद्या श्लथाऽभूत् ।
नैकावृत्त्याश्चेदमासीत्फलं यद्युद्धे नैवेक्षामहे मुख्यलक्ष्यम् ॥ १४ ॥

नाग्रे यान्ति प्रायशोऽन्ये विशेषाः कार्तार्थ्यञ्चाच्छादयत्यस्मदन्तः ।
एतैः स्तोत्रैर्दीप्तिमायाति चेतः प्रोत्साहो नो लभ्यतेऽस्मद्विचारैः ॥ १५ ॥

हिन्दुस्तानान्नागतोऽहं समाजे सत्यं पश्चात्पाद एव स्थितोऽहम् ।
नैके तारावच्चमत्कारमाप्ता मन्दं मन्दं कष्टतोऽभ्यागतोऽस्मि ॥ १६ ॥

श्रान्त्याजीवानान्तदान्दोलनञ्च संघाधारादस्ति सामाजिकं तत् ।
यूनां संघा अप्यहो मादृशा ये प्रत्यायान्ति प्रेरयन्तः समाजम् ॥ १७ ॥

सप्तोपेते विंशवर्षे युरोपात्प्रत्यायातोऽपश्यमत्रैकरूपम् ।
अस्पष्टं तं गोलमूल्यं समाजवादं देशे वायुवार्यङ्गभूतम् ॥ १८ ॥

वैयक्तत्वेनात्र पूर्वं समाजवादी भूयान् भारते राजते स्म ।
एते प्रायः स्वप्नद्रष्टार आसन् मन्दं मन्दं मार्क्सवादाभिभूताः ॥ १९ ॥

जीवानां वा मानवानां कृते वा सूते काचिद्वै दयेमं समाजम् ।
तादृक्षास्ते तत्सुधारार्थिनोऽमी प्रत्येकस्मिन् वै युगे सम्भवन्ति ॥ २० ॥

मार्क्सात्पूर्वंचाप्य यमी लोक आसन् निःस्वे कार्ये यान् दयेयं युनक्ति ।
तेभ्यो दत्तं हीश्वरेणास्त वित्तं मार्क्सो निःस्वे निः स्वताक्रान्तिमीष्टे ॥२१॥

एकः कर्ताहं समाजीति मेऽभूत् ख्यातः कांग्रेसीति किञ्चिन्महत्त्वम् ।
मादृक्षाश्चान्येऽपि कांग्रेसिका ये मद्वत्कर्तुं संप्रवृत्ता विचारम् ॥ २२ ॥

एषा वृत्तिः सर्वतो युक्तप्रान्ते प्रान्तीयायां प्राप्यते तत्सभायाम् ।
यत्रास्माभिः पूर्वतो नम्रकार्यारम्भः कश्चित्कल्पितः कार्यवाहः ॥ २३ ॥

कश्चित्तेषां मार्क्सवाद्यस्ति पूर्ण इत्यावर्ते भारते वा विदेशे ।
यत् किञ्चित्तत्सौवियद्रस आसीत् तेनेद्धं तत्पञ्चवर्षीययोगैः ॥ २४ ॥

इत्येषोऽर्थस्तैर्न दृष्टस्ततोऽयं संघो म्लानिं काञ्चिदाधत्त शोच्याम् ।
काङ्ग्रेसं तद्यद्युयुत्सुत्वमाधात् वेगं कृष्ट्वा सङ्घशैथिल्यमाधात् ॥३८॥
त्रिंशे वर्षे चात्र सत्याग्रहस्य संग्रामः प्रावर्तताशेषदेशे ।
स्वातन्त्र्यार्थः संघ एषस्तदानीं कांग्रेसस्यैवान्तराविष्ट आसीत् ॥३९॥
अष्टाविंशे चान्त्यषण्मासकाले ऊनत्रिंशे चापि कृत्स्ने मदीयः ।
चर्चापात्रं निग्रहो यत्तदासीत् तेनाप्येतत्संघकार्यं निरुद्धम् ॥ ४० ॥
नाहं जाने वृत्तपत्रैरुदीर्णं मित्रैर्वा मे यद्यदुद्गीर्णमासीत् ।
तेषां पृष्ठे वास्तवत्वं किमासीत् तेषां मूले कारणं वा किमासीत् ॥४१॥
तैस्तैस्तेषां चावधानप्रदानैश्चित्ते किञ्चिन्निश्चितत्वं निरस्तम् ।
साशङ्कोऽहं सर्वदा चाप्यतिष्ठम् कस्मिन्काले निग्रहः स्यान्ममेति ॥४२॥
मुख्यत्वेनावेदिषं यद् भविष्ये यत्किञ्चित्स्याद्दैनिकं जीवनं मे ।
किञ्चिद्रूपं निश्चितं नाप्स्यतीति तस्मात्तादृक् साधनीयः स्वभावः ॥४३॥
आकस्मिक्या वै परीवृत्तताया आनिश्चित्यस्यापि शीघ्रातिशीघ्रम् ।
अभ्यासी स्यां वन्दिगेहादिवासे मन्ये जातोऽहं कृतार्थः स्वयत्ने ॥ ४४ ॥
गृह्यैर्लोकैश्चापि यत्नः कृतोऽयं साफल्यं नाप्तं तु तैर्यादृशं मे ।
अस्माज्जातो निग्रहो मे यदापि किञ्चिन्नूत्नं नानुभूतं तदा मे ॥ ४५ ॥
वृत्ते चास्मिन्निग्रहेऽस्याभवन्मे भूयाँल्लाभः केवला नैव हानिः ।
सोऽभ्यासो मे जीवने स्वादुताया उल्लासस्याप्येवमुत्पादकोऽभूत् ॥४६॥
स्वातन्त्र्यस्य प्रत्यहं मूल्यशाली लाभः प्राप्तद्रव्यवत्प्रत्यभान्मे ।
अष्टाविंशेऽहर्निशं कर्म कुर्वन् ऊनत्रिंशाप्रैलघस्रं गतोऽहम् ॥ ४७ ॥
अन्तेऽप्रैलेऽस्मिन्नभून्निग्रहो मे कश्चित्कालो वन्दिगेहाद्बहिश्च ।
मध्ये मध्ये यो व्यतीयापितोऽभूत्तत्रावैतथ्यं मया भूरि दृष्टम् ॥ ४८ ॥
स्वस्मिन्गेहे प्राघुणिक्योऽद्भुतोऽहं कश्चित्केषाञ्चिद्दिनानां कृतेऽस्मि ।
इत्येवाभात्कर्मजातेऽखिले च नैश्चित्यं मे व्याप्तमात्मैकतन्त्रे ॥ ४९ ॥
कारागारात्कर्हि चाह्वानमायातीत्येषा शङ्काऽपिपक्षे स्थितासीत् ।
अष्टाविंशन्तस्य सामीप्यतश्च काङ्ग्रेसं तत्कालिकातः समायात् ॥५०॥
तस्याध्यक्षो मत्पिता निश्चितोऽभूत् तन्मस्तिष्कं मानसं चात्र मग्नम् ।
तच्चेतः सम्मेलने चापि सर्ववर्गीये तत्कार्यवाह्याञ्च लग्नम् ॥ ५१ ॥

कांग्रेसेन स्वीकृता कार्यवाही भूयादेवेति स्म वाञ्छत्यथार्यः ।
जानाति स्माहं सदा सम्मतोऽस्मीत्यस्मिन्प्रश्ने साम्मनस्यं मयेष्टम् ।।५२।।

एतेनासौ रुष्ट आसीत्ततोऽत्र नैवास्माभिस्तत्र वादः कृतोऽभूत् ।
संघर्षस्त्वासीदमुत्रावयोर्वै लोका अस्मद्वैमनस्यं किलौहन् ।। ५३ ।।

प्रायः पूर्वञ्चावयोर्बुद्धिभेदोऽभूदेवायं किन्तु नैवंविधोऽयम् ।
अस्मादावां भिन्नपक्षाश्रयौ स्वो नैवं पूर्वं चापरं जातु जातम् ।। ५४ ।।

आवामेतेनास्व चैवातिदुःखौ वार्तावृद्धिं प्राप्तवत्यत्रचसीत् ।
कांग्रेसं चेन्मन्यते नो मदुक्तम् तस्याध्यक्ष्यं नाहमूरीकरिष्ये ।। ५५ ।।

तस्यैषोक्तिर्युक्तियुक्ता किसासीत् वैधानिक्यासीदृशा सङ्गता च ।
वार्तावृद्धिं ये तथा नाभ्यकांक्षन् तेषामासीद्विक्लवत्वाय संगः ।। ५६ ।।

ध्यायाम्येतं काङ्ग्रेसे तथान्या संस्था स्थाप्यास्ते जना आक्षिपन्ति ।
चेतस्तूच्चैश्चैरयन्त्युत्तरस्याधायित्वं तत्प्रायशो धातुमेते ।। ५७ ।।

आशा चैषा जायते रोपमात्रादन्ये स्वीयां नीतिमुद्वर्तयेयुः ।
नावं चैनां नोदितुं कार्यभारो नैवास्माकं मूर्ध्नि चारोपितः स्यात् ।।५८।।

यत्रैषां चैवोत्तरादायितास्मास्वारोप्येताद्धाद्य वा नाधुनापि ।
कार्यार्थी तां संसदं क्षेप्तुमर्हाः नाप्येतां च प्रष्टुमर्हाम किञ्चित् ।। ५९ ।।

तत्राऽद्यत्वे भारतीये प्रभुत्वे यद्वत्तद्वत्तत्र हित्वाऽऽक्रमं तम् ।
क्षेपाक्षेपादन्तरा कोऽस्ति मार्गः क्षेपश्चायं खण्डनात्माखिलः स्यात् ।६०।।

भूयोप्येतंखण्डनात्मानमत्र नेतुं साफल्यं मम स्यात्समग्रम् ।
सन्नाहः स्यात्प्राप्तकाले समग्रं भारं चात्येतां व्यवस्थां वरीतुम् ।।६१ ।।

स स्याद् देश्यः सैनिको वा विभागो वाह्यो वा स्यादान्तरो वाथ कश्चित् ।
याच्ञाऽन्येषां चाधिकारावलीनां यद्वच्छ्रान्त्याजीविनां सैन्यभागे ।।६२।।

शिष्टैः कार्यं कर्तुमेते न शक्ता अङ्गीकृत्याक्षेप आयाति तुच्छः ।
श्रीमद्गान्ध्यालोचकेष्वेष दृष्टः पन्थाः क्षेपं कुर्वते ते च निन्दाम् ।। ६३।।

किन्त्वन्ते चेत्कथ्यते तावदार्यैरेतत्कार्यं कार्यमित्युत्पदास्ते ।
कांग्रेसे चैवंविधा नैकलोकाः ये तत्कार्यं चेतसा नाद्रियन्ते ।। ६४ ।।

अत्यावेगात्ते तमेवाक्षिपन्ति नैवौद्युक्तास्तं विहातुं भवन्ति ।
सारल्येनैवास्य विज्ञायतेऽर्थो नैष न्यायं केनचिद्वै विधत्ते ।। ६५ ।।

कांग्रेसे वै कालिकातेयकेऽस्मिन् किञ्चित्कष्टं तादृगेवाजनिष्ट ।
वार्ता काचित्साम्मनस्यस्य जाता वर्गद्विन्द्वे दर्शितः कोऽपि पन्थाः ।।६६।।

अन्ते वार्ता सास्तमेव प्रयातास्ताश्चर्चा वै गोलमूल्ये क्षिपन्ति ।
नाप्येतासु श्रीरभूत्कापि भद्रा प्रस्तावः स्व्याकारि सम्मेलनस्य ।। ६७ ।।

तस्मिन् किन्तु ब्रैटिशी शिष्टिरुक्ता वर्षेणैकेनाद्रियन्तां विधानम् ।
नो चेत्कांग्रेसं पुनः स्वात्मलक्ष्यं स्वाधीनत्वं नाम तद् धास्यतीति।।६८।।

सत्यं प्रस्तावेन तेनैकनस्राह्वानं दत्तं वर्षकालावधिश्च ।
निःशङ्कं चोपानयल्लक्ष्यभूतात् स्वातन्त्र्यं स्वात्कष्टबानास्त नीचैः ।६९।

नैवाभ्यर्थ्यं सर्वसम्मेलनस्य तत्स्वातन्त्र्यं सर्वराज्यीयमासीत् ।
आसीत्प्रस्तावः स सद्बुद्धिपूर्णः काले येनास्मिन् स भेदो निरुद्धः ।।७०।।

यद्भेदार्थं कोऽपि सज्जोऽपि नाभूत् तेन त्रिंशे यो विरोधो निरुद्धः ।
तस्मिन्कांग्रेसीयलोकान्नियम्य स्थाने त्वेकस्मिन् समे स्थापितास्ते ।।७१।।

स्पष्टञ्चैतत् नैकवर्षेण शिष्टिः मञ्जूरीकुर्यात्समेषां विधानम् ।
शिष्टचा युद्धं नूनमासीदचाल्यं कालेचास्मिंस्तत्फलं नास्त साध्यम् ।।७२।

देशस्यासीत्सा स्थितिः शोचनीया यस्यां श्रीमद्गान्धिनेतृत्वमध्ये ।
शिष्टचा सार्कं क्रान्तयुद्धस्य किञ्चित् तत्साफल्यं नैव सम्भाव्यते स्म ।।

कांग्रेसीये व्यक्तसम्मेलनेऽहं प्रस्तावस्याऽस्यान्वकार्षं विरोधम् ।
यद्यप्यासीदुन्मनस्को विरोधः सत्यप्यस्मिन् वै प्रधानोऽस्मि मन्त्री ।।७४।

यच्चापि स्यान्मन्त्रिताऽखण्डिता मे भातिस्मैतद्यत्करोतिस्म पूर्वम् ।
ख्यातः कश्चिद् वै 'विकार आफब्रे'ऽसौ यो नात्याक्षीत्स्वं पदं सर्वकालम् ।।

कांग्रेसाध्यक्षो भवेत्कोऽपि नाम मन्त्री भूयां तस्य सम्भालनाय ।
कांग्रेसस्याभूद्धि संघातकार्यं दीर्घं कालं यावदस्यैव हस्ते ।। ७६ ।।

इङ्गालान्तं वै खनीनां विशालक्षेत्रस्यान्तर्वर्तते झारियेति ।
कांग्रेसाच्चाकालकेर्यात्कुसत्र हिन्दुस्थानट्रेडयूथं तदासीत् ।। ७७ ।।

तत्राद्यौ द्वौ वासरौ कार्यवाह्यां भागो नीतः कालिकातां ततोऽगाम् ।
आसीत्सोऽयं पूर्व एवावकाशष्ट्रेडयूथे कांग्रेसके मेलनस्य ॥ ७८॥

आसं नूत्नस्तत्र किन्तु श्रमाढये कृष्याढ्ये चैवास्मि वर्गेऽपि कार्यम् ।
यद्यत्पूर्वं साम्प्रतं चाप्यकार्षं तेन प्राप्तोऽत्यन्तलोकप्रियत्वम् ॥ ७९ ॥

तां गत्वाहं दृष्टवान् वै सुधारवादिष्वग्रेयात्स्वपि क्रान्तिमत्सु ।
संघर्षः प्राचीन आस्ते स जाग्रत् प्रश्नश्चासीत्संघसम्बन्धमूलः ॥ ८० ॥

अन्ताराष्ट्रीयः स संघोऽथ विश्वशान्तेः साम्राज्यप्रतीपश्च संघः ।
एतैः संघैष्ट्रेडयूथेन योज्यः सम्बन्धो वा नेति संचिन्त्यमासीत् ॥ ८१ ॥

अन्ताराष्ट्रीयश्रमाढयस्य काचित् सम्मेलाभूद्या जिनेवाख्यपुर्याम् ।
तस्यां कश्चित्प्रातिनिध्येन युक्तः संप्रेष्योऽनेकोऽथवा कश्चिदेकः ॥८२॥

आभ्यामप्यासीन्महत्त्वेन युक्तं कांग्रेसस्यास्योभयोः पक्षयोस्तत् ।
नानादृष्टेरन्तरं दूरगामि शान्त्या कार्यं स्यादशान्त्याथ कार्यम् ॥८३॥

एकत्रासन् माडरेटाः पुराणाः शङ्कादृष्ट्या राजनीतिं मिषन्तः ।
उद्योगादौ यद्धनाढयश्रमाढयावन्योन्यं संघृष्यतो राजनीत्या ॥ ८४ ॥

नैतद्युक्तं तैर्विरोधापहारे स्वव्यापारादग्रतो नैव गम्यम् ।
तत्राप्येतैर्मन्दमन्दं विचारैः साकं प्रश्नः स्वः समाधेय एकः ॥ ८५ ॥

एतेषामुद्देश एषोऽस्ति यत्तेऽवस्थां श्रान्त्याजीविनां साधयेयुः ।
नेता ह्येषामास्त एन्.एम्. स जोशी प्रायो हिन्दुस्थानतोऽगाज्जिनेवाम् ॥

अन्यो वर्गोऽस्माद्विशेषाद्युयुत्सुर्युद्धे श्रद्धावानयं राजनीतौ ।
साक्षाद्दृष्टि क्रान्तिकर्त्रीं स्म धत्ते आसन्नस्मिन् भाविनः साम्यवादाः ॥

नायं तेषामास्त संयन्त्रणायां हस्ते मुम्बापुर्यवस्त्रश्रमाढयः ।
तन्नेतृत्वेऽभूद्विशालो हृतालो यः साफल्यं प्राप्तवान् सीमितश्च ॥८८॥

मुम्बागिर्नीकामगारैकयूथो नव्यो यूथोऽस्थाप्यतान्यप्रभावी ।
अग्रेवृद्धस्यास्य वर्गस्य शिष्टौ जी० आई० पी० रेलवेस्वस्थयूथः ॥८९॥

कांग्रेसस्य ट्रेडयूथस्य सत्त्वात् कार्यागारः कार्यकर्ता त्विहासीत् ।
एन्० एम् जोशी-तत्सुहृद्धस्तगामी श्रेयः सङ्घान्दोलनस्यास्ति तस्मिन् ॥

उग्रो वर्गः सप्रभावः श्रमाढ्येष्वासीन्नीतेस्तु प्रभावं न चक्रे ।
नेयं सन्तोषावहा वृत्तिरासीन्नैवानेन त्रातुमर्हः स वृत्तम् ॥ ९१ ॥

अन्योन्यस्मिन् सा कलिः सोऽप्यतोषः सोऽयं वर्गष्ट्रेडयूथं ग्रसिष्णुः ।
नासीदिच्छा वादवस्तूपवृद्ध्या वा शङ्कासीद्भेदवृद्धेर्मिथश्च ॥ ९२ ॥

तट्ट्रेड्यूथान्दोलनं यौवनीयद्वारस्थं सद्दुर्बलं किञ्चिदासीत् ।
तत्सञ्चारे तत्पराश्च श्रमाढ्या नैवासंस्ते ह्यस्ति चेदृक् प्रवृत्तिः ॥९३॥

एते लोके संप्रयुज्य श्रमाढ्यान् स्वार्थं प्रायः साधयन्तीति सिद्धम् ।
हिन्दुस्थाने ट्रेडयूथेऽपि तेषां यूथेष्वासीत्स्पष्टतः सा प्रवृत्तिः ॥ ९४ ॥

वर्षैः कार्यं कुर्वता जोशिना च सोत्साहत्वं साधितं स्वस्य यूथे ।
दृष्ट्या ये तं प्रस्खलन्तं च नम्रम् मन्यन्ते चाप्यत्र वै राजनीतेः ॥९५॥

तेऽपि स्वीकुर्वन्ति यज्जोशिनात्र क्षेत्रे सेवास्ताः कृताः श्लाघनीयाः ।
नम्रेष्वग्रेगामिषु प्रायशोऽमी शब्दाः केभ्यश्चिज्जनेभ्यः प्रयोज्याः ॥९६॥

झर्यायां मे चाग्रगे वर्ग आसीत् सान्द्रः स्नेहः सानुभूत्या विशिष्टः ।
नूत्नो नूत्नोऽहं गतस्तत्र, चेतष्ट्रेडयूथस्यास्मिन्नियुद्धेऽभ्रमन्मे ॥ ९७ ॥

अस्माद्युद्धात्स्यां सदाहं वहिश्चेत्येतन्निर्णीतं मया पूर्वमेव ।
झर्यानिर्याते तदैवात्र मय्याऽऽसीत्कांग्रेसस्याथ निर्वाचनञ्च ॥ ९८ ॥

ज्ञातं मेऽभूत्कालिकातागतस्यागामिन्यब्देऽध्यक्षतायां वृतोऽस्मि ।
नम्रैर्नाम प्रस्तुतं मे तदर्थमुग्रः प्रत्यर्थी मया हारितः स्यात् ॥ ९९ ॥

रेलश्रान्त्याजीवकेष्वेष कार्यं भूयोऽकार्षीदित्यहं तद्दिने चेत् ।
तत्रोपांस्थां नाम नैजं तदाहे प्रत्याकर्षिष्यङ्कृते कार्यकर्तुः ॥ १०० ॥

सत्यं मे तत्सर्वथा भात्ययुक्तं कार्यं किञ्चिद् यत्तु नात्र श्रितं स्यात् ।
यश्चाद्यत्वे नूत्न एवागतः स्यात् सोऽकस्मादध्यक्षतायां वृतः स्यात् ॥

एकञ्चास्यास्ते प्रमाणं स्वतोऽपि हिन्दुस्थाने श्रान्तिसंघो नवोऽभूत् ।
तस्यैतच्चान्दोलनं शैशवस्य द्वारे तिष्ठद्दुर्बलं सर्वथाऽभूत् ॥ १०२॥

अष्टाविंशे श्रान्तिजीविष्वखण्डो द्वन्द्वानां चैवाग्रहाणां क्रमोऽभूत् ।
ऊनत्रिंशेऽप्येतदेवास्त वृत्तं मुम्बापुर्यां वस्त्रयन्त्रे श्रमाढ्याः ॥ १०३ ॥

खिन्ना आसन्योद्धुकामाश्च सर्वे नेतृत्वं तेऽकार्षुरान्दोलनानाम् ।
सा बंगीयैः शाणयन्त्रेषु क्लृप्ता कार्यारुद्धिर्भूयसी भीषणाऽऽसीत् ॥१०४॥

यन्त्रेष्वेतेष्वायसेष्वप्यभूत्सा श्रान्त्याजीवैर्नामिशेदेषु क्लृप्ता ।
रेलाजीवैरप्यभूत्कल्पिता च टीनागारे द्वन्द्वमासीच्चिराय ॥ १०५ ॥

श्रान्त्याजीवैः सात्र बद्धादरेण प्रक्रान्तासीन्नैकमासावधिश्च ।
अस्यां लोकानाञ्च सा सानुभूतिर्भूयस्यासीत्किन्तु सम्प्रोज्झितै तैः ।१०६

एतर्ह्येभिर्यन्त्रितायन्त्रिताभ्यां हस्ताभ्यामत्रार्जितो लाभ आसीत् ।
लाभस्यासी द्वैशतांशो जनेभ्यः स्वैरेवात्रावर्तितः कश्चिदेव ॥१०७।

अस्याः कम्पन्याश्च ब्रह्मानुवृत्त्या तैलोत्पादिन्याभवद् बन्धलेशः ।
इत्थं सम्पिण्डाविमौ वत्सरौ च श्रान्त्याजीवानां कृते क्लेशदौ स्तः १०८॥

श्रान्त्याजीवानां दशा चानुघस्रं क्षीणक्षीणा दीनदीना तथासीत् ।
हिन्दुस्थाने युद्धतोऽनन्तरौ च वर्षावास्तां मोददौ मानवानाम् ॥१०९ ॥

कार्पासस्याथो शणस्यात्र भागाः षड्वा पञ्चाब्दान् स्ववर्गे विभक्तौ ।
ज्ञाताज्ञाताभ्याञ्च लाभांशमूल्यम् भोक्तॄणां जैवेषु तेषां विलीनम् ॥

श्रान्त्याजीवानामवस्था च यादृश्यासीत्तादृश्येव सा संस्थिताभूत् ।
तेषां पारिश्रामिके कापि वृद्धिर्जाता साऽभूत्तुल्यमूल्या महार्घैः ॥१११॥

एतर्ह्येते चार्जयंस्तत्क्रमेण तैस्तैर्मार्गैर्भग्नगेहे वसन्तः ।
तेषां नार्येश्चाम्बरं नाप्नुवन्ति मुम्बापुर्याः श्रान्तिजीवास्तु दीनाः ॥११२।

शाणे यन्त्रे कर्मकर्तुं श्रयाढयास्तेभ्योऽत्यन्तं दुर्गता आसते स्य ।
तेषां वासः कालिकातानगर्या होरामेकां मृत्तरीयात्रयाऽऽप्यः ॥ ११३॥

तस्मिन्नेते कीर्णकेशाश्च जीर्णशीर्णैर्वस्त्रैच्छन्नदेहाऽर्धनग्नाः ।
रोटीमात्रं प्राप्तुमेताश्च कार्यं कुर्वन्तिस्म द्रव्यसिन्धुं प्रवोढुम् ॥ ११४ ॥

प्रौढः सोऽयं ग्लासगो-शैत्यदिश्यागच्छेत् तस्यात्कश्चिदंशोऽभियायात् ।
हिन्दुस्थानस्थायिनां जैबमध्ये त्यक्त्वा तु तत्पात्राणि श्रान्तिजीवान् ॥

अस्यां वेलायां महार्घ्याकुलायां यन्त्राण्यासन् सौख्यसंचालितानि ।
श्रान्त्याजीवानां दशा त्वेकरूपा तेषां भागे कोऽपि लाभो न यातः ।।११६।

किन्त्वेतद्ध्यस्तं गता सापि वेला ज्ञाताज्ञाता या प्रसूते स्म लाभान् ।
जातं वित्तस्यार्जनं दुष्करं तत् सर्वो भारोऽक्षिप्यत श्राग्तिमत्सु ।।११७।।

यन्त्रस्वाम्या विस्मृताः पूर्वलाभं तं ते सर्वं भुक्तवन्तः क्षुधार्ताः ।
इच्छालाभाभावतः कार्यजातं स्यात्प्रक्रान्तं तत्कथं वा किमर्वम् ।।११८।।

श्रान्त्याजीवेष्वस्फुरद्व्यग्रतेयं, वादा जाताः कार्यरोधाश्च शान्ताः ।
द्रष्टारोऽभूवन्नहो विस्मितास्ते यन्त्रस्वाम्यं शासनञ्चापि भीतम् ।।११९

श्रान्त्याजीवान्दोलने वर्गचित्तिरुद्भूतास्ते चाभवन्नुग्रभीमाः ।
ह्रातुं तैर्विग्लायते राजनीतेर्मूलावस्थां भिन्न अन्दोलनेऽपि ।।१२०।।

क्रान्तिर्नूनं राजनैतिक्यनेका एकस्मादान्दोलनात्सास्त भिन्ना ।
किञ्चिद्दूरं सङ्गते अप्यहो ते येनाङ्कत्वापूर्णमासीद् भविष्यम् ।।१२१।।

ऊनत्रिंशेऽग्रेसरस्याथ वर्गस्यानेके ते नामिनः कार्यवन्तः ।
शिष्ट्या नीता निग्रहं, श्रान्तिजीवाश्चैवाकस्मादेव हा क्रामितास्ते ।।

मुम्बायुर्याः कामगारैक्यूथनेतारो वङ्गेऽथ पञ्चांबुदेशे ।
युक्तप्रान्ते चाभवन्ये विशिष्टास्ते नीता वै निग्रहं शासनेन ।। १२३ ।।

तेषां केचित्साम्यवादा अभूवन् केचिच्चैतैः साम्यभाजः श्रमाढ्याः ।
संधीयास्ते निग्रहं प्रापिताः सा पूर्वावस्था मेरठस्याभियोगे ।। १२४ ।।

साधान्विषान्यच्चतुः संख्यकान् स प्रावर्तिष्टाकल्पतास्मै च गोष्ठी ।
यत्राध्यक्षो मत्पिताभूत्सदस्या अन्सारी चाहं च केचिन्मदन्याः ।।१२५।।

कार्यं तत्रास्माकमासीद् दुरूहं नासीदस्मिन् द्रव्ययोगः सुखेन ।
लक्ष्मीवन्तः साम्यवादान्प्रतीमे नैवाबिभ्रत् सानुभूतिं समाजे ।। १२६ ।।

वाक्कोलाः पूर्णेन पारिश्रमेण प्राप्तेनैवोत्कण्ठितास्तावदासन् ।
तच्चैतद्रक्तस्य संशोषणेनैवासाद्यं स्यात्कस्यचिद् दुर्बलस्य ।।१२७।।

अस्मद्गोष्ठ्यां प्राड्विवाकाः प्रसिद्धा आसन् यद्वन्मत्पिता वा तदन्ये ।
शश्वत्तेऽस्मन्मार्गनिर्देशनोत्का अस्मात्सर्वस्माद् व्ययाद् रक्षयन्ति ।।१२८

किन्त्वेतेषां मेरठे दीर्घकालं वासो यातायातमासीन्न शक्यम् ।
तद्भिन्नानन्यान् गतास्ते समेऽपि द्रव्योपायं मन्वते स्माभियोगम् ॥१२६।

रक्षागोष्ठीभिस्तदन्याभिरासीत् सम्बन्धो मे मेरठस्याभियोगात् ।
एम्० एन्० रायस्याभियोगैस्तथान्यैः प्रत्येकत्राभूत्स्वमित्रेषु खेदः ॥१३०

लुब्धत्वं तत्तुल्यवृत्तिष्वपश्यम् अस्माच्चैवाघातमेतं श्रितोऽहम् ।
पञ्चाम्बौ ते सैनिकन्यायनिष्ठा आसन् भूयांसोऽभियोगाः प्रवृत्ताः ॥१३१।

तत्र्येकेन प्राड्विवाकेन नेत्रा पूर्णं शुल्कं दातुमस्म्यागृहीतः ।
राशिः सोऽभूद्भूरि नासाववोचत् आसन्नेते सैनिकन्यायबद्धाः ॥१३२॥

तेष्वेवास्ते कोऽपि तन्मित्रमेको वाक्कीलोऽपीत्येष नाचिन्तयच्च ।
तेष्वेकैः स्वं स्थायिसम्पत्तिजातं विक्रीयर्णं चापि कृत्वाऽभियोगे ॥१३३॥

तस्मिन्नाप्तं तस्य मित्रस्य साह्यं दत्त्वा शुल्कं प्राड्विवाकस्य तस्य ।
अस्मात्पश्चाच्चानुभूतिर्ममाभूदत्यन्तं या दुःखदा ग्लानिदाऽऽसीत् ॥१३४।

निःस्वान्निःस्वान्मानवात्ताम्रमुद्राः संचित्याहं रूप्यकाणि प्रकल्प्य ।
दीर्घेदीर्घैर्व्यंकनिर्देशपत्रैर्वाक्कीलानां लाभपूर्ति त्वकार्षम् ॥ १३५ ॥

एषा वार्ताऽखेदयन्मां नितान्तं सर्वं चेदं व्यर्थमासीत्प्रतीतम् ।
एतादृक्षे चाभियोगे हि रक्षां कृत्वाप्यन्ते तत्फलं नो निरस्यत् ॥ १३६ ॥

नानादृष्ट्या मेरठस्याभियोगे रक्षाकार्यं चानिवार्यं तदासीत् ।
रक्षागोष्ठी तस्य षड्यन्त्रकस्य न प्रापेयं सौहृदं चाभियुक्तैः ॥ १३७ ॥

नानाजातीया इमे चाभवंस्ते ऽन्योन्येषां तत् सौमनस्यं न भूयः ।
मासान्कांश्चिच्च व्यतीत्याभियोगं गोष्ठी भग्ना व्यक्तिशोऽकारि साह्यम् ।

रूपं साधात् राजनैतिक्यवस्था यादृक् तस्मिन् ध्यानमाकृष्टमासीत् ।
त्रिंशे वर्षे सर्व एवास्म कारागारे बद्धा राष्ट्रमुक्त्यै सयत्नाः ॥ १३९ ॥

वेदाङ्गतां किल साधिता साहित्यशास्त्रस्याप्यहो
युक्तिभिः श्रुत्युक्तिनिश्चानेन कविना कल्पिता ।
श्रीमज्जवाहरलालनेहरुचरितनामनि चारुकाव्ये
सर्गो गतः षड्विंश एष श्रमिकसङ्घिककांग्रसाख्यः ॥

विक्षोभवातावरणम्

अनुष्टुप्

सप्तविंशः सर्गः

ऊनविंशे लवपुरे काङ्ग्रेसमधिवेशितम् ।
दशाब्दादथ तद् भूयः पञ्चाम्बावायुयुक्षितम् ।। १ ।।
दशाब्दात्प्राक्तनीर्वार्ताः स्मरन्ति स्म जनाः पुनः ।
घटना जलियाँवालोद्याने जाताः सुनिर्ममाः ।। २ ।।
तत्सैनिकविधानञ्च साकं तेनावमाननाः ।
अमृतसरसक्षेत्रे काङ्ग्रेसस्याधिवेशनम् ।। ३ ।।
ततश्चासहयोगस्यान्दोलनस्याप्युपक्रमः ।
एतेषु दशवर्षेषु घटिता घटना नवाः ।। ४ ।।
हिन्दुस्थानाकृतिः कृत्स्ना गताद्य परिवर्तनम् ।
सभानां किन्तु बाहुल्यमद्याप्यासीदुपस्थितम् ।। ५ ।।
राजनैतिकविक्षोभो वर्धते स्म निरन्तरम् ।
संघर्षवातावरणं घटते स्म च वेगतः ।। ६ ।।
संघर्षस्यैष्यतो दीर्घा छाया प्राक् पतति स्म च ।
अखिले भारते वर्षे साङ्गोपाङ्गे समन्ततः ।। ७ ।।
सभायां समितौ नासीद् बहोः कालान्नृणां रुचिः ।
ऋतेऽङ्गुल्यग्रगण्येभ्यो भ्रमद्भ्यस्तच्चतुष्पदे ।। ८ ।।
सभाः समितयश्चैता रेखाताडनतत्पराः ।
सत्तास्वेच्छामयी यासां शिष्टिरावृणुते मुखम् ।। ९ ।।
हिन्दुस्थाने लोकसभाऽस्तित्वस्य च सभासदः ।
प्राप्नुवन्ति हि भरणमित्यासीद् व्याजमप्युत ।। १० ।।
सभाया अन्तिमं कार्यं सफलं यन्निगद्यते ।
यत्र ध्यानं गतं पुंसामष्टाविंशेऽभवच्च यत् ।। ११ ।।

न साइमन् कमीशन् नः सहयोगमवाप्नुयात् ।
इति प्रस्तावमात्रं यत्तत्रासीत्स्वीकृतं जनैः ॥ १२ ॥
ततो लोकसभाध्यक्षः सर्वकारान्तरेऽभवत् ।
संघर्षेऽपि पटेलो हि विट्ठलोऽभवदात्मवान् ॥ १३ ॥
स्वराज्यपक्षतोऽध्यक्षः सर्वकारमनोव्यथाम् ।
जनयन् बहुधा पक्षच्छेदयत्नान्न वारितः ॥ १४ ॥
एवंविधेऽपि विषये कदाचिद् ध्यानमागतम् ।
जनानां मुख्यतो बाह्येष्वेव तेषु रतं मनः ॥ १५ ॥
सभानां विषये कश्चिद् भ्रमो मे पितुरन्तरम् ।
अस्पृशद्बहुधाऽगादीत्सभा निष्फलतामयम् ॥ १६ ॥
अतो निर्गन्तुमद्राक्षीदुचितावसरञ्च सः ।
वैधानिकेऽपि मस्तिष्के तद्रीतिप्रीतिमत्यपि ॥ १७ ॥
वर्तमानदशायां स परिणाममिमं श्रितः ।
यद्भारते विधानोक्ता रीतयः सन्त्यमूर्था ॥ १८ ॥
स वैधानिकमस्तिष्कं सान्त्वयन् बहुधाऽवदत् ।
भारते नास्त्यहो किञ्चिद्विधानं नास्ति तद्गतिः ॥ १९ ॥
अत्रैकस्य दलस्येच्छा नरस्याथ प्रसोष्यति ।
मायिकस्येव मञ्जूषा विधीन् पारावतानिव ॥ २० ॥
स्वभावाच्च प्रभावाच्च नासीत्क्रान्तिकरः पिता ।
अभविष्यत्प्रजातन्त्रवादो मध्यमवर्गजः ॥ २१ ॥
तदा निःशङ्कमत्रैषोऽभविष्यत्स्तम्भ उन्नतः ।
किन्त्ववस्थानुरोधेन सहते स्म स नाटकम् ॥ २२ ॥
क्षुभ्यति स्म च भूयोऽसौ चर्चयापि किलानया ।
वैधानिकान्दोलनस्य विषये कृतया जनैः ॥ २३ ॥
श्रीगान्धिस्तावदद्यापि तटस्थो राजनीतितः ।
कांग्रेसे कालिकातायां सत्यं सोऽभूत्समागतः ॥ २४ ॥
जानाति घटनाचक्रं परामर्शान् ददात्यथ ।
कांग्रेसनेतॄन् बहुधा जिज्ञासून् न ह्युपेक्षते ॥ २५ ॥

कैश्चिद्वर्षैर्विशेषेण स हि खादीप्रचारणे ।
संलग्नो भारते कृत्स्नेऽभ्राम्यदन्तिकदूरतः ॥ २६ ॥

क्रमात्प्रान्तमथैकैकं मण्डलं क्षेत्रमप्ययम् ।
महत्त्वशालि नात्याक्षीद्ग्रामं ग्राममगादहो ॥ २७ ॥

सर्वत्र जनसम्मर्दाः समवेताः प्रतीक्षया ।
सज्जीभवन्ति कार्याणां क्रमं पूरयितुं स्वतः ॥ २८ ॥

इत्थं स भारतस्यास्य यात्राभिस्ताभिरुत्तरात् ।
दक्षिणान्तं प्राग्गिरिभ्यः पश्चिमाम्भोनिधेस्तटम् ॥ २६ ॥

यावत्क्रमेण देशस्य विशालस्य दिगन्तरम् ।
एकैककोणमद्राक्षीत् खादीं प्राचीचरत्तराम् ॥ २७ ॥

नाहं मन्ये यदन्येन केनापि पुरुषेण तु ।
भारतस्येयती यात्रा कृता स्यात्कर्हिचित्क्वचित् ॥ २८ ॥

प्राक् परिव्राजकाः केचिद् भ्रमन्ति स्म समन्ततः ।
तद्यात्रासाधनान्यासन् मन्दगामीनि वै तदा ॥ २९ ॥

वर्षे कृतापि तद्यात्रा न तुल्या दिनयात्रया ।
श्रीगान्धे रेलकृतयाऽथवा मृत्तरिक्लृप्तया ॥ ३० ॥

स रेलमृत्तरिभ्यां च गच्छन्नपि न तद्वशः ।
पदातिरपि याति स्मानुगच्छज्जनदुर्गमः ॥ ३१ ॥

भारतीयजनानां स प्राप्तवान् ज्ञानमद्भुतम् ।
कोटिकोटिजनाश्चास्य दर्शनेन कृतार्थिताः ॥ ३२ ॥

ऊनत्रिंशे स वै खादीयात्रयात्र समागतः ।
युक्तप्रान्ते निदाघे च घोरेऽवात्सीत्स पक्षतः ॥ ३३ ॥

कदाचन कदाचिच्च तेन साकमहं वसन् ।
तदर्थं जनसम्मर्दं समवेतं तु यादृशम् ॥ ३२ ॥

अपश्यमिह तादृक्षं न पुरा नाप्यतः परम् ।
अभूत्तान् जनसम्मर्दान् पश्यतो विस्मयो महान् ॥ ३३ ॥

इयं दशा प्राक्क्षेत्रेषु गोरक्षपुरमण्डले ।
दृष्टा शलभवर्गस्याक्रमणस्यातिशायिनी ॥ ३३ ॥

ग्रामेषु गतमृत्तर्या गव्यूतेरन्तरालतः ।
सहस्रेभ्यो जना दृष्टा अधिकाः पञ्चविंशतेः ॥ ३४ ॥

सभासु पुनरेतेषां लक्षलक्षाण्यलक्षयम् ।
उच्चैरुच्चारयन्त्राणां ग्रामादिषु विलोपतः ॥ ३५ ॥

भाषणाकर्णने नूनं दुष्करे हन्त सत्यपि ।
समायान्ति स्म ते द्रष्टुं न श्रोतुमिति निश्चितम् ॥ ३६ ॥

आत्मनि न्यसितुं भारं न गान्धिर्भूरि भाषते ।
अन्यथा प्रतिहोरं स कथं तावत्प्रभाषताम् ॥ ३७ ॥

अहो विशालक्षेत्रेषु लक्षलोकेषु गान्धिना ।
स्पन्दनेनैव वक्त्रस्य कार्यबोधः प्रसारितः ॥ ३८ ॥

कृत्स्नस्य युक्तप्रान्तस्य यात्रायां सह तेन यत् ।
न स्थितस्तत्र हेतुर्मेऽनुपयोगः किलाभवत् ॥ ३९ ॥

श्रीगान्धिसहयात्रित्वे ते घातप्रतिघातकाः ।
पादोपमर्दास्ते चासन् न मामाकर्षितुं क्षमाः ॥ ४० ॥

कार्यान्तरं च पर्याप्तं ममासीद्राजनैतिकम् ।
यदग्रे केवलः खादीप्रचारः प्रत्यभाल्लघुः ॥ ४१ ॥

अराजनैतिके कार्ये लग्नो गान्धिर्न रोचते ।
मह्यं स खलु तत्कुर्वन् क्षोभास्पदमजायत ॥ ४२ ।

वस्तुतस्तद्विचाराणां पृष्ठभूमिं तु मन्मतिः ।
अवगाहितुमप्येषा सर्वदाऽभवदक्षमा ॥ ४३ ॥

तदा स खादीकार्यार्थं संगृह्णन्नभवद्धनम् ।
दरिद्रनारायणार्थं तस्यासीत्स उपक्रमः ॥ ४४ ॥

तात्पर्यं संगृहीतेन धनेनानेन निर्धनान् ।
गृहोद्योगादिकार्येषु व्यापृतान् स करिष्यति ॥ ४५ ॥

किन्त्वप्रत्यक्षरूपेण दारिद्रचस्यैव गौरवम् ।
वर्धमानं प्रत्यभान्मे नारायणपदार्पणात् ॥ ४६ ॥

नारायणो दरिद्राणां दरिद्रास्तस्य ते प्रियाः ।
इति सर्वत्र धर्मस्य भावना मे न रोचते ॥ ४७ ॥

अनिवार्यतया सात्र प्रणाली प्रतिहन्यताम् ।
सहते दरिद्रतां यात्र या च सूते दरिद्रताम् ॥ ४८ ॥
दरिद्रता घृणापात्रं ममैषा स्म प्रतीयते ।
संघर्षेणोन्मूलनीयं तन्मूलमिति मे मतम् ॥ ४९ ॥
ये संकुचन्ति तत्कर्तुं ते मन्यन्ते तदौचितीम् ।
वस्तूनां न्यूनतां चैतेऽपरिहार्यां तु मन्वते ॥ ५० ॥
जीवनापेक्षितानि स्युर्वस्तूनि सुलभानि यत् ।
तदसम्भवने वेति ब्रूयुर्दारिद्र्यवादिनः ॥ ५१ ॥
अस्मत्समाजे धनिका निर्धनाश्च निरन्तरम् ।
आसन्, सन्ति, भविष्यन्तीत्येतत्तेषां हि दर्शनम् ॥ ५२ ॥
यदा कदापि विषयेऽस्मिन् विवाद उपस्थितः ।
तदा धनं धनाढ्यातां न जघन्यासएवसः ॥ ५३ ॥
भारते च विदेशे च दृष्टिरेषाऽभवत्पुरा ।
परं न जाने किं कश्चिदाशास्तां भवितुं तथा ॥ ५४ ॥
कथं वा कल्पतामेषा दृष्टिरेव शुभङ्करी ।
भविष्यति समाजस्य समाधानकरी तथा ॥ ५५ ॥
अभूल्लोकसभाऽऽलस्यतन्द्रानिद्रालुरित्यहम् ।
प्रोक्तवांस्तत्कार्यरीतिश्चौन्मनस्यकरी स्थिता ॥ ५६ ॥
सम्भावये रुचिं तस्यां धत्ते स्म न जनो मनाक् ।
बी. के. दत्तो भक्तसिंहोऽक्षिपतां यद् बमद्वयम् ॥ ५७ ॥
मन्ये तत्प्रतिघातेन निद्राभङ्गोऽञ्जसाऽभवत् ।
न कश्चिदाहतस्तत्राभूत् क्षेपो जागराय सः ॥ ५८ ॥
यथोक्तमभियुक्ताभ्यां कोलाहलप्रक्लृप्तये ।
व्यस्ततोत्पत्तयेऽकारि न तद् घाताय कस्यचित् ॥ ५९ ॥
तेनास्तव्यस्तता नूनमभूदधिसभं बहिः ।
आतङ्ककारिणां कार्यान्तराणि न तथाभवन् ॥ ६० ॥
युवाङ्ग्रेजाधिकारी च गोल्या लवपुरे हतः ।
यो लाजपतरायस्योपर्यवर्षत्स्वयष्टिकाः ॥ ६१ ॥

बङ्गेषु चान्यभागेषु प्रतिभाति स्म तत्तदा ।
आतङ्ककारिणां चेष्टाः प्रारब्धाः पुनरित्यपि ॥ ६२ ॥
षड्यन्त्रोक्ताभियोगाश्चोपक्रान्ताः क्वापि तान् विना ।
दृष्टिबन्धे वन्दिगेहे चारुध्यन्तायतो जनाः ॥ ६३ ॥
क्षिप्रं हि तेषां संख्यायां वृद्धिर्जाता महीयसी ।
कालक्षेपो न सह्योऽभूद्भीतानामधिकारिणाम् ॥ ६४ ॥
षड्यन्त्रोत्थाभियोगेषु लाहौरे पुरुषैः कृता ।
घटनाः काश्चन तदाऽसाधारण्य इति श्रुतम् ॥ ६५ ॥
इतोऽपि हेतोर्लोकानां ध्यानमासीदितो गतम् ।
न्यायालये बन्दिगृहे व्यवहारश्च तादृशः ॥ ६६ ॥
विरोधे वन्दिनोऽनेकेऽनशनान्दोलनं श्रिताः ।
तद्वस्तुतः कस्य हेतोरुपक्रान्तं न तत्स्मृतम् ॥ ६७ ॥
किन्त्वन्ते स महान् प्रश्नोऽजायतेति च बन्दिषु ।
विशेषाद्राजनयिकेषु भवेद्व्यवहृतिः कथम् ॥ ६८ ॥
हरितालं वर्धते स्म सप्ताहान्यावदीदृशम् ।
येनास्तव्यस्तता काचित्कृत्स्ने देशेऽभ्यजायत ॥ ६९ ॥
अभियुक्ता वपुःकार्श्यान्न न्यायालयमागताः ।
भूयो भूयः कार्यधारा स्थगितीक्रियते स्म च ॥ ७० ॥
इति भारतशिष्टयात्र विधानं तादृशं कृतम् ।
यथाभियुक्तवाक्कीलौ विनापि न्याय ईयताम् ॥ ७१ ॥
कारागारेषु विहिते व्यवहारेऽपि तत्र तैः ।
अनिवार्यतया कश्चिद्विचारः क्रियतेस्म च ॥ ७२ ॥
हरितालं यदा मासं यावदासीत्प्रवर्तितम् ।
तदाकस्माल्लवपुरं गतोऽहमपि चाभवम् ॥ ७३ ॥
कांश्चिच्च वन्दिनस्तत्र द्रष्टुमाज्ञापि लम्भिता ।
तस्याश्च लाभो लब्धोऽभूद् भक्तसिंहस्य दर्शनम् ॥ ७४ ॥
यतीन्द्रनाथदासादीनप्यपश्यमहं तदा ।
वदनं भक्तसिंहस्याभवदाकर्षकं परम् ॥ ७५ ॥

बुद्धिमत्त्वं व्यज्यतेस्म गभीराच्छान्ततस्ततः ।
न तत्र रोषो दृश्योऽभूत्सौजन्याढ्यवचोदृशि ॥ ७६ ॥
मासं यावदनश्नन् वै मन्येऽहं पुरुषो व्रती ।
आध्यात्मिकीं च सौजन्यपूर्णां दध्यात्प्रभां मुखे ॥ ७७ ॥
यतीन्द्रनाथदासस्तु ततोऽपि मृदुलोऽभवत् ।
कन्यकावत् कोमलतां धत्ते स्म स सुशीलताम् ॥ ७८ ॥
मद्दर्शनक्षणे पीडा तस्यासीन्महती तदा
पश्चादनश्नन्नेवासावेकषष्टिदिनैर्मृतः ॥ ७९ ॥
भक्तसिंहः पितृव्यं स्वं द्रष्टुमैच्छद्विशेषतः ।
अजीतसिंहं यो लाला इव निर्वासितः पुरा ॥ ८० ॥
अपि तस्य समाचारं लब्धुमासीत्स उत्सुकः ।
स हि निर्वासितो देशाद्विदेशे न्यवसत्समाः ॥ ८१ ॥
श्रुतं मयामेरिकायां दक्षिणायां तु सोऽवसत् ।
परं कोऽपि समाचारो निश्चितो नाप्यतेऽस्य सः ॥ ८२ ॥
सरदारोऽजीतसिंहो मृतो वा जीवतीति वा ।
अपि न ज्ञातमस्माभिः किं तस्य प्रतिवेद्यताम् ॥ ८३ ॥
यतीन्द्रनाथदासस्य मृत्युनाखिलभारते ।
शोकः क्षोभश्च विततोऽभवत्प्रश्नस्तथोत्थितः ॥ ८४ ॥
व्यवहारो भवेत्कीदृग् राजनैतिकवन्दिषु ।
इत्यत्र सर्वकारेण समितिः कापि निश्चिता ८५ ॥
तद्विचारानुसारेण नवीना नियमाः कृताः ।
विभक्तास्त्रिषु वर्गेषु देशे सर्वेऽपि वन्दिनः ॥ ८६ ॥
नियमैस्तैः सुधारस्य काचिदाशा प्रतीयते ।
वस्तुतस्तु न भेदोऽभूदनेनाप्यत्र कश्चन ॥ ८७ ॥
दशाऽसन्तोषजननी सैकान्तात्यन्ततोऽभवत् ।
अस्ति चाद्यापि हृदये दयाभाववियोगतः ॥ ८८ ॥
निदाघप्रावृषौ याते तापवृष्ट्या शनैः शनैः ।
आगता च शरत्कृत्स्नं निर्मलीकुर्वती जगत् ॥ ८९ ॥

प्रान्तीयास्वथ कांग्रेससमितिष्वभवन्नवः ।
उत्साहो ऽभूल्लवपुरे कांग्रेसमधिवेशितुम् ॥ ९० ॥
सर्वा अध्यक्षचयने संलग्ना अभवंस्तदा ।
चयनस्यास्य महती भवतीह च प्रक्रिया ॥ ९१ ॥
अगस्तमासतः सेयमक्टूबरसमाप्तितः ।
ऊर्नाविंशेऽध्यक्षतायै गान्धेरासीन्मतैकता ॥ ९२ ॥
द्विःसाभापत्यतस्तस्य न नेतृषु पदोन्नतिः ।
स हि नैकाब्दतस्तेषां पतिरासीत्प्रभावतः ॥ ९३ ॥
तदा सर्वस्य भातिस्म युद्धावसरसन्निधौ ।
स्वयमूढोऽपि भारोऽयं गान्धावेव निधीयताम् ॥ ९४ ॥
विधिवत्स विधातव्यः सम्प्रत्यस्य सभापतिः ।
नेत्रानेन समः कश्चिदन्यो नासीत्कुतोऽधिकः ॥ ९५ ॥
प्रान्तीयाभिः समितिभिः सभापतिपदाय तत् ।
सर्वथा स्तुतियोग्यस्य श्रीगान्धेः संस्तुतिः कृता ॥ ९६ ॥
तेजीयसि विरोधेऽपि कृते तत्र च गान्धिना ।
युक्त्यपेक्षाप्रतीत्यात्र काचिदाशा कृताऽभवत् ॥ ९७ ॥
अस्यान्त्यनिर्णयार्थञ्च तैर्लक्ष्मणपुरे तदा ।
कृत्स्नभारतवर्षीयकाङ्ग्रेससमितिः कृता ॥ ९८ ॥
सर्वेऽप्याशासते स्मान्ते स्वीकृतिं तत्र खल्वमी ।
तथा नाभूदन्त्यघट्यां मम नाम समागतम् ॥ ९९ ॥
बलं तत्राहितं तैश्चानुमोदनसमर्थनैः ।
गान्धेरस्वीकृतिः सान्तेऽजनयत्सर्वविस्मयम् ॥ १०० ॥
विषमायां च पतिताः केचनात्र परिस्थितौ ।
केचित् काञ्चिद्रुषमपि गान्धये चेतसाऽवहन् ॥ १०१ ॥
अन्यस्यानुपलब्धौ च वैवश्येन जनैरहम् ।
निर्वाचितः स्थितौ तस्यां स्वीकर्तुमवशोऽभवम् ॥ १०२ ॥
पूर्वं कदापि संक्षोभमविवेकं च तादृशम् ।
नान्वभूवमहं तस्मिन् चयने स्वस्य यादृशम् ॥ १०३ ॥

नूतनः श्रमिकक्षेत्रे मार्गान्वेषणतत्परः ।
किञ्चित्सङ्कुचितो नात्माभिप्रायं व्यक्तवानहम् ॥ १६० ॥
प्रायः प्राग्रसरेष्वेव दलेषु व्यञ्जयाम्यहम् ।
स्वाभिप्रायमितीहाहं सर्वतो रक्षितोऽभवम् ॥ १६१ ॥
नाहं संचालनाध्यक्षो निष्पक्षः सन् सभापतिः ।
इति ट्रेडयूनियनखण्डे नवे नम्रदलोदये ॥ १६२ ॥
उभयत्राप्यहं मूकदर्शकत्वमुपेयिवान् ।
वामपक्षस्य नेतारो दक्षिणं दूरमैरयन् ॥ १६३ ॥
इति वामे तथा दक्षे पक्षे चैवोत्थिते कलौ ।
मध्यस्थोऽपि दलो भूयान्वैवश्यं किञ्चिदन्वभूत् ॥ १६४ ॥
यद्येतस्य दलस्य स्यात्सम्यक्तन्मार्गदर्शनम् ।
तदायं संयमे रक्षेत्तद्द्वयं स्वाञ्च वश्यताम् ॥ १६५ ॥
ट्रेडयूनियनकाङ्ग्रेसं भेदाघाताच्च वञ्च्यताम् ।
खण्डेषु चापि जातेषु न स्यात्परिणतिः कटुः ॥ १६६ ॥
यत्किञ्चिदभवत्तत्र तेन श्रमिकसङ्गमः ।
आन्दोलने निजे घोरं प्रतिघातमयादयम् ॥ १६७ ॥
येन नाद्यापि तत्स्वास्थ्यमविन्दत्पूर्ववच्छुभम् ।
सर्वकारः किलाक्रामत्पूर्वमग्रेगतान् दलान् ॥ १६८ ॥
मयराष्ट्राभियोगोऽयं तस्यैवाभूत्फलं यथा ।
सर्वकारस्य चाक्रान्तिः शान्तिं नाद्यापि गच्छति ॥ १६९ ॥
स्वामिभिर्दृष्ट एषोऽस्ति लाभपूर्तिकरः क्षणः ।
ऊनत्रिंशत्रिंशयोर्यत् महामन्दाध्यंताऽभवत् ॥ १७० ॥
तत्कारणादितश्चेतो घाताच्च प्रतिघाततः ।
ट्रेडयूनियनसंघस्य तदा कार्श्यमभूत्परम् ॥ १७१ ॥
भारते श्रमिवर्गस्य कालः कठिन आगतः ।
विवशास्ते स्म पश्यन्ति पतन्तीमात्मनो दशाम् ॥ १७२ ॥
तदनन्तरमेवाथ साम्यवादिदलस्ततः ।
पृथग्भूतो निर्बलत्वं तस्यावर्धयताधिकम् ॥ १७३ ॥

पञ्चत्रिंशेपि योग्यत्वाद् गोखले राजनैतिकैः ।
महद्भिः सह मान्योऽभूद्गण्यश्चेत्यपि विश्रुतम् ॥ ११८ ॥
अबुल कलाम आजाद आकृत्या तादृशोऽभवत् ।
या तद्विद्वत्तया लोकेऽगमदादरणीयताम् ॥ ११९ ॥
स राजनैतिकगुणः कदाचन मतो भवेत् ।
महावैदुष्यदोषोऽपि न मय्यारोपितः क्वचित् ॥ १२० ॥
सितेषु केशेष्वपि मे गभीरायामथाकृतौ ।
एषोस्म्यतिवयस्त्वेन दोषेणाद्यापि वञ्चितः ॥ १२१ ॥
एति पार्श्वं लवपुरे काङ्ग्रेसस्याधिवेशनम् ।
अत्रान्तराले घटना घटन्ते ताः किलैकशः ॥ १२२ ॥
ज्ञायते यत्स्वया शक्त्या वर्धन्ते ताः किलाग्रतः ।
महत्यो व्यक्तय स्तत्र सम्भागं स्तोकमाभजन् ॥ १२३ ॥
ज्ञायते स्म यथा किञ्चिद् बृहद् यन्त्रं प्रवर्त्तते ।
तदन्तरङ्गवद्याति व्यक्तिरग्रेसरन्त्यसौ ॥ १२४ ॥
भाग्यस्य प्रगतिं ताञ्च रोद्धुं ब्रिटिशशासनम् ।
ततोऽप्यग्रेऽक्रमील्लार्डइर्विनोऽघोषयत्स्वयम् ॥ १२५ ॥
आसंस्ते घोषणाशब्दाश्चारुचातुर्यसम्भृताः ।
यत्तात्पर्यं बह्वपि स्यान्न किञ्चिदपि चेति च ॥ १२६ ॥
वयं च बहवोऽमन्येमहि नो किञ्चिदित्यलम् ।
यद्यस्मिन् पूर्वं एवार्थोऽभविष्यत्तर्हि नेप्सितम् ॥ १२७ ॥
संनिधत्ते स्म तस्याञ्च घोषणायामनुक्षणम् ।
आशु सम्मेलनं दिल्ल्यां नेतृणाञ्च निमन्त्रितम् ॥ १२८ ॥
अनेकेषां दलानाञ्चाभवन्नामन्त्रिता जनाः ।
गान्धिः, पिता, पटेलश्चाध्यक्षोऽसौ लोकसंसदः ॥ १२९ ॥
ते नम्रदलनेतारः सप्रूस्तेजबहादुरः ।
सर्वेषामपि सम्मत्या प्रस्तावोऽभूत्प्रकल्पितः ॥ १३० ॥
यस्मिंल्लार्डेविनस्यासन्स्वीकृता घोषणापणाः ।
भारवन्तः सर्वकारस्वीकारात्परभाविनः ॥ १३१ ॥

नम्रप्रगतिशीलानां दलानामुररीकृतिः ।
प्रस्तावविषये साभूद् विजयो विस्मयावहः ॥ १३२ ॥
कांग्रेसस्य कृते नूनं तदभूदवतारणम् ।
सर्वसम्मतभावेन तदभूदुन्नतं पदम् ॥ १३३ ॥
तस्मिन्नेको घातकोऽपि ग्रहोऽभूद्विनिवेशितः ।
तेषां हि पणबन्धानां दृष्टिभेदेन दर्शने ॥ १३४ ॥
कांग्रेसीयाः सारवतस्तान् निवार्यान् स्म मन्वते ।
येषां पूर्तिं विना कश्चित्सहयोगोऽस्त्यसम्भवः ॥ १३५ ॥
तेषां दृष्ट्या न्यूनमात्राः पणबन्धा इमेऽभवन् ।
कांग्रेसकार्यसमिताविदमासीत्स्फुटीकृतम् ॥ १३६ ॥
तथेदमपि यत्सोऽर्थो भाविकांग्रेसकावधिः ।
परं नम्रदलस्यैता याच्ञा आसन्बहूत्तराः ॥ १३७ ॥
तासां विवरणं साधु न तु तत्र बलाहितिः ।
सहयोगादपि चानङ्गीकारं यावन्न तद्बलम् ॥ १३८ ॥
तेषां दृष्ट्या महान्तोऽपि सन्तस्ते न पणाः किल ।
अन्ते तदभवद् यत्र पूर्णो नैकोऽपि तत्पणः ॥ १३९ ॥
अस्मासु चाधिकाः कारागारेष्वासन्निपातिताः ।
अन्यैर्विंशतिसाहस्रैः पुरुषैः सह संगताः ॥ १४० ॥
तदास्मत्सुहृदो नम्रदलीयाः सहयोगिनः ।
सहयोगं बन्दिगेहपातिनां तन्वते स्म ते ॥ १४१ ॥
यैरत्र सर्वमिलिते प्रस्तावे स्वाक्षरं कृतम् ।
न ते सहानुभूत्यापि समगच्छन्विनिग्रहे ॥ १४२ ॥
अस्मास्वनेके सन्देहादजानंस्तद्भविष्यति ।
परं नाशासते स्मैतदेतावन्नु भविष्यति ॥ १४३ ॥
काचिदाशा तु संयुक्ते कार्येऽस्मिन्नन्तरेऽभवत् ।
कांग्रेसीयैर्जनैरत्र स्वदमोऽयं कृतो महान् ॥ १४४ ॥
इति श्रमिकनेतारोऽन्ये च ब्रिटिशशासनम् ।
अभ्यस्ताः सहयोगेन नोपयास्यन्ति साम्प्रतम् ॥ १४५ ॥

अस्माकं बहवो येऽस्मिन् प्रस्तावे न रुचिं दधुः ।
ऐक्यं कांग्रेस-सभ्येषु रक्षितुं तत्र सङ्गताः ॥ १४६ ॥
अस्मिन् महति सङ्ग्रामे वयं भेदस्य लेशतः ।
स्वात्मानं रक्षितुं यत्नान् नूत्नप्रत्नान् समाश्रिताः ॥ १४७ ॥
इदन्तु ज्ञातमेवासीत्पणबन्धान्न शासनम् ।
स्वीकरिष्यति तानस्मत्कृतानित्यस्ति सम्भवः ॥ १४८ ॥
इत्थं चास्मत्स्थितिस्तस्य समक्षे सुदृढा भवेत् ।
वयं स्वदक्षिणदलं सन्नेष्यामः सुखेन च ॥ १४८ ॥
कांश्चिदेवात्र सप्ताहाननुष्ठातव्यमास्त तत् ।
दिसम्बरे सन्निहिते सन्निधत्तेऽधिवेशनम् ॥ १५० ॥
परं श्रमिकवर्गस्याग्रेसराणि दलान्यहो ।
अस्माद्राष्ट्रियकांग्रेसात्संकुचन्ति स्म चेतसा ॥ १५१ ॥
न विश्वसन्ति तन्नेतृन् आदर्शान्प्रतिगामिनः ।
वस्तुतस्तत्तथैवासीत्काङ्ग्रेसं किल राष्ट्रियम् ॥ १५२ ॥
ऊर्नात्रिंशेऽखिले वर्षे सङ्घास्ते श्रमजीविनाम् ।
ह्विट्लेकमीशनप्रश्ने विक्षुब्धा आसते स्म ते ॥ १५३ ॥
वामपक्षो बहिष्कारं सहयोगन्तु दक्षिणः ।
कमीशनस्यास्य कर्तुमुद्यतोऽभूत्स्वचित्ततः ॥ १५४ ॥
दक्षिणस्य कियन्तोऽपि नेतारोऽत्र कमीशने ।
सभासदीकृतास्तेषां समस्या व्यक्तिगामिनी ॥ १५५ ॥
अन्यास्विव स्थितावस्यां वामपक्षे ममत्वतः ।
कांग्रेसस्यापि नीतेश्च स पक्षो मम रोचते ॥ १५६ ॥
वयं तु साक्षात्संघर्षं कर्तुमास्म समुद्यताः ।
तदा कमीशनैरस्मत्सहयोगो निरर्थकः ॥ १५७ ॥
अथ नागपुरे ट्रेडयूनियनकाङ्ग्रेसके ।
कमीशनबहिष्कारप्रश्नोऽभूत्प्रश्न उत्तमः ॥ १५८ ॥
अन्येष्वपि विवादार्हप्रश्नेषु सफलत्वतः ।
वामपक्षः स्म जयति, तटस्थः प्रकटेऽभवम् ॥ १५९ ॥

इत्थं श्रमिकवर्गस्य संघास्त्रेधाऽभवन्निह ।
ट्रेडयूनियन् दलो, नम्रदल: साम्यदलस्तथा ।। १७४ ।।
व्यवहारे त्रयोऽप्येते निष्कर्माणश्च निर्बला: ।
मिथ: कलहतश्चैषामुद्विग्ना: श्रमिका: समे ।। १७५ ।।
त्रिंशादनन्तरं कारागारवासितया त्वहम् ।
सर्वेभ्योऽपि दलेभ्यस्तां गतो नूनमसङ्गताम् ।। १७६ ।।
कारागाराद् बहिर्भूतोऽज्ञासिषं यदिहैकताम् ।
आनेतुं परितो यत्ना: प्रवर्तन्ते हितैषिणाम् ।। १७७ ।।
परं न ते सफलिता: संघा नम्रदलस्य तु ।
रेलकर्मकृतां सङ्घात्काञ्चिच्छक्तिमवर्धयन् ।। १७८ ।।
दलान्तराणां साम्मुख्ये तेषां लाभो महानभूत् ।
सर्वकार: किलैतेषां स्वीकारमकरोत्स्थिते: ।। १७९ ।।
जिनेवाश्रमि-गोष्ठीषु संस्तुती: स्वीकरोत्यमू: ।
जिनेवागमनार्थायाकृष्टा आसन्निमान् प्रति ।। १८० ।।
ते च स्वेन सहैव स्वान् सङ्घानपि विकृष्य तान् ।
नीतवन्तो जिनेवायां सम्मेलनशुभक्षणे ।। १८१ ।।
ट्रेडयूनियनसंघेषु ते चैक्यस्थापनोद्यमा: ।
अनन्तरं सफलिता: सहयोगं मिथ: श्रिता: ।। १८२ ।।

येनालेखिषताऽऽशतं सुरगिरा नानानिबन्धा: शनै-
र्ये प्राकाश्यमुपागता: सपदि ते रत्नाकरे मासिके ।
तत्सृष्टे किल मामकीनकथया तुल्यार्थके नेहरू-
काव्ये याति स सप्तविंशतितमो विक्षोभसर्गो महान् ।।

मुख्यं मतग्रहणमेकलघुप्रयोगे
संशोधने कृतिमयेऽभवदित्यवैभि ।
संशोधनञ्च पतितं तदभूदुभे च
सङ्ख्ये प्रकाशमयिते हि मतामतानाम् ॥ १३ ॥

प्रस्तावमुख्यमनयन्विधितो विचार-
पट्टे दिसम्बरसमाप्तिनिशीथकाले ।
वर्षस्य सोऽक्षियत सञ्चरतः समाप्तौ
वाऽऽगामिनश्च समुपक्रम एव सन्धौ ॥ १४ ॥

इत्थं यदाऽवधिरगात्स समाप्तिमब्दः
कांग्रेसकेन कलकृत्तभवेन दत्तः ।
नून्नो विनिर्णय इहैष कृतस्तदैव
संङ्ग्रामसज्जनमुपक्रमितं ततश्च ॥ १५ ॥

कालस्य चक्रमचलद् वयमत्र वेत्तुं
नाशक्नुमास्तु कथमेतदुपक्रमोऽयम् ।
इत्यत्र चाधिकृत आस्त स भारतीय-
कांग्रेसनामधरणो गुरुगान्धिरेव ॥ १६ ॥

यां योजनां स विदधीत तयैव कार्यं
कार्यं जनैरिति वयं तमनुव्रताः स्मः ।
कांग्रेसके लवपुराचरिते च सीमा-
प्रान्तात्समागतमनेकजनैः समीपात् ॥ १७ ॥

तस्मात्स्वयं प्रतिनिधिस्तु स खान अब्दुल्
गफ्फारखान इह वर्षगणैः समायात् ।
किन्त्वैषमो लवपुरे युवयूथमागात्
सम्पर्कमाप नृपनीतितरङ्गकैस्तम् ॥ १८ ॥

तेषां नवेषु तरुणेषु च मानसेष्वा-
विष्टं प्रभावमनयंश्च विचारमेनम् ।
उत्साहमप्यमुमिमे सह नीतवन्तः
स्वातन्त्र्यनाम्नि समरे किल सङ्गताः स्मः ॥ १९ ॥

पारं ममाभवदहो न सुखस्य नैवा-
वारं ममाभवदहो ! बहिरस्मि सीम्नः ।
किन्त्वस्य को मयि पुरा भवति प्रभावः ?
इत्यस्य किञ्चन महत्त्वमभून्न तत्र ।। ६ ।।

आसन् हि तत्र महतोऽपि महीयसोऽपि
प्रश्नाः समक्षमुदिता मम ते महिष्ठाः ।
उत्साहपूरितमभूत्सकलं च तत्र
किं वा चरं किमचरं च समस्तमेव ।। ७ ।।

गम्भीरताऽध्यवसरस्य ततातस्य-
संग्रामघोषकरणाय समे समेताः ।
शङ्कासमाहितिभिरेष न सम्मताभि-
र्वार्ताभिरेष समयः स मयास्त याप्यः ।। ८ ।।

घोषेण येन भुवनं किल कम्पितं स्यात्
स्यात्स्पन्दितं सकलजीवनमप्यनेन ।
दूरे भविष्यति भविष्यति किन्नु देशे
नेदं वचोभिरुदितं हृदि भावितं स्यात् ।। ९ ।।

अस्माकमस्मदतिवल्लभवान्धवाना-
मग्रे स्थितः समरसङ्कट एष दृष्टः ।
गम्भीरतामयमुपाहरते विचारो-
प्युत्साहमुत्तरधरत्वमपि प्रसूते ।। १० ।।

अस्माभिरत्र च वितीर्णमिदं मतं यत्
स्वारामसौख्यमिलनानि हरिष्यते नः ।
शारीरमानसिककष्टशतावतारः
कर्ता रहो दिवसरात्रिषु सम्प्रहारम् ।। ११ ।।

स्वाधीनतासमरचालनहेतुकस्य
कार्यक्रमस्य विषयेऽखिलसम्मतोऽथ ।
प्रस्ताव आस्त उररीकृत एष यस्मिन्
साहस्रकेषु नरविंशतिकाविरोधः ।। १२ ।।

मुख्यं मतग्रहणमेकलघुप्रयोगे
संशोधने कृतिमयेऽभवदित्यवैभि ।
संशोधनञ्च पतितं तदभूदुभे च
सङ्ख्ये प्रकाशमयिते हि मतामतानाम् ॥ १३ ॥

प्रस्तावमुख्यमनयन्विधितो विचार-
पट्टे दिसम्बरसमाप्तिनिशीथकाले ।
वर्षस्य सोऽक्षियत सञ्चरतः समाप्तौ
वाऽऽगामिनश्च समुपक्रम एव सन्धौ ॥ १४ ॥

इत्थं यदाऽवधिरगात्स समाप्तिमब्दः
कांग्रेसकेन कलकृत्तभवेन दत्तः ।
नून्नो विनिर्णय इहैष कृतस्तदैव
संङ्ग्रामसज्जनमुपक्रमितं ततश्च ॥ १५ ॥

कालस्य चक्रमचलद् वयमत्र वेत्तुं
नाशक्नुमास्तु कथमेतदुपक्रमोऽयम् ।
इत्यत्र चाधिकृत आस्त स भारतीय-
कांग्रेसनामधरणो गुरुगान्धिरेव ॥ १६ ॥

यां योजनां स विदधीत तयैव कार्यं
कार्यं जनैरिति वयं तमनुव्रताः स्मः ।
कांग्रेसके लवपुराचरिते च सीमा-
प्रान्तात्समागतमनेकजनैः समीपात् ॥ १७ ॥

तस्मात्स्वयं प्रतिनिधिस्तु स खान अब्दुल्
गफ्फारखान इह वर्षगणैः समायात् ।
किन्त्वेषमो लवपुरे युवयूथमागात्
सम्पर्कमाप नृपनीतितरङ्गकैस्तम् ॥ १८ ॥

तेषां नवेषु तरुणेषु च मानसेष्वा-
विष्टं प्रभावमनयंश्च विचारमेनम् ।
उत्साहमप्यमुमिमे सह नीतवन्तः
स्वातन्त्र्यनाम्नि समरे किल सङ्गताः स्मः ॥ १९ ॥

साधारणा अपि च साधुतरा अपीमे
गम्भीरकर्मकरणोद्यमिनः किलासन् ।
प्रान्तान्तरीयजनवन्नहि भूरिवार्ता-
कारा न ते चिकुरचर्मभिदस्वभावाः ॥ २० ॥

ते सङ्घतं स्वजनवर्गमिहाथ कर्तुं
तन्मानसे जनयितुं च नवान् विचारान् ।
लग्नाः, प्रयत्नसकलत्वमपि प्रयाताः
त्रिंशाब्दकादकलयंश्च विशिष्टभागम् ॥ २१ ॥

कांग्रेसतो लवपुरप्रभवात्परञ्च
पित्रा ममाभिहितसांसदवर्ग एकः ।
कांग्रेससङ्घत इमामजहात्सभाञ्च
स्वत्यागपत्रसहलेखनदानतोऽथ ॥ २२ ॥

प्रायः समेऽपि बहिरागतवन्त एते
कैश्चिद् बहिर्गमनतो विहितो निषेधः ।
यद्यप्यनेन चयनावसरे कृतस्य
तेषां प्रणस्य जनितः समभूत्स भङ्गः ॥ २३ ॥

भाविक्रियाक्रमकृते स्म न भाति किञ्चित्
कांग्रेससम्मिलनजं क्व गतं तदोजः ।
कस्यापि तत्र विदितं न कितैतदासीद्
देशः प्रदास्यति रणे किमु योगदानम् ॥ २४ ॥

अग्रे सृताः वयमियन्न हि साम्प्रतं नः
प्रत्यागतिः समुचिता नच सम्भवासीत् ।
देशस्य किं नु रुचितं भवितेति चापि
नास्माकमास्त विदितं किल सर्वथापि ॥ २५ ॥

आरब्धुमत्र समरं स्वगतस्वदेश-
नाडीपरीक्षणकृतस्तु विनिर्णयोऽयम् ।
एषा तिथिर्जनवरीगतपञ्चविंशी
स्वाधीनतादिवसतां लसताद्दधाना ॥ २६ ॥

अस्यां तिथौ जनपदे निखिले प्रतिज्ञा
स्वाधीनताप्तिविषया विहितास्तु लोकैः ।
इत्थं स्वकार्यविषये हृदि शङ्किताः स्मः
कर्तुञ्च किञ्चिदथ चेतसि साभिलाषाः ॥ २७ ॥

उत्साहपूरितहृदो घटनाप्रतीक्षाः
स्थातुं न चापि चलितुं प्रभवोऽभवाम ।
आसं वसञ्जनवरीमुखतः प्रयागे
प्रायः पिता मम तदा व्यचरद्बहिश्च ॥ २८ ॥

आसीन्नु कुम्भसमयः स च माघमेला-
कालोऽभवत् प्रविशतां तु प्रयागराजे ।
नारीनृणां प्रतिदिशं किल लक्षलक्ष-
सङ्ख्यावतामहमहंप्रथमेतिभावान् ॥ २९ ॥

आसन्निमेऽखिलविधाः कृषकाः श्रमाढ्या
व्यापारिणो विपणिनः खलु शिल्पिनश्च ।
औद्योगिका अपि महाव्यवसायशीलाः
सन्तो महान्त इह हिन्दव आगतास्ते ॥ ३० ॥

सम्मर्दमेनमथ सङ्गमगामिमार्गे-
ष्वायान्तमप्यहमिमं सततञ्च यान्तम् ।
धाराप्रवाहमविखण्डितमीक्षमाणः
सत्याग्रहेषु सहयोगमवैम्यमीषाम् ॥ ३१ ॥

सत्याग्रहेषु सरलेषु च शान्तिपूर्णे-
ष्वाकारणां खलु निशम्य समागताः स्युः ।
दद्युः कियन्तमथ नात्र सहानुयोगं
स्वातन्त्र्यसङ्गरशुभाक्रमणेषु सद्यः ॥ ३२ ॥

जानन्त्यमी लवपुरे विहितं कियन्तं
प्रस्तावमप्यवदधत्यपि वा कियन्तः ।
विश्वास एष सुदृढोऽद्भुत एव चैषां
येनोपयान्ति परितो विमलां त्रिवेणीम् ॥ ३३ ॥

वर्षैः शतैरथ सहस्रमितैरमीषां
पूर्वे जना अपि समाययुरत्र पद्भ्याम् ।
देशस्य दूरतमतोऽपि दिगन्ततोऽपि
पूतत्रिवेणिसलिलेऽत्र निमज्जनाय ॥ ३४ ॥

एते न किं स्ववशतामधिगम्य देशे
स्वं जीवनं सुखयितुं किल तत्पराः स्युः ।
धर्मे यथा नहि भवन्ति रतास्तथार्थे,
नो राजनैतिकपथं किममी श्रिताः स्युः ॥ ३५ ॥

मस्तिष्ककेषु जटिताः किमु धर्मबाह्या-
चाराश्च रूढिनियताश्च मिता विचाराः ।
यत्तत्र किञ्चिदपरं न विशत्यमीषां
नैतद्वदामि खलु वेद्मि महत्त्वमेषाम् ॥ ३६ ॥

धर्मार्थकामनिपुणा अथ मोक्षदक्षाः
पूर्वेऽभवन्नृषिमुनिप्रवरा अमीषाम् ।
अत्रोदितान् नवविचारभरानमीषां
चित्ते चिरात् प्रचलतः परिभावयामि ॥ ३७ ॥

रोहावरोहमवयामि किलान्तरङ्गे
ऽमीषामपीह परिवर्तितमेव रूपम् ।
देशस्वरूपरचनासु सहायकत्वं
सत्यं प्रमापयति तेषु विचारवत्त्वम् ॥ ३८ ॥

अस्पष्टता किल विचारमनोरथाना-
मप्यानमद्विचलतां जनतासु काचित् ।
सा द्वादशाब्दविमिते समये गतेऽस्मिन्
रोहावरोहमुदपादयदत्र कञ्चित् ॥ ३९ ॥

शङ्का विचारविषये च न शक्तिसारे
तेषां कदापि समभूदिह नाम काचित् ।
शङ्का तथापि जनिता तत उत्थिताश्च
प्रश्ना न येऽत्र समयेन समाहिताश्च ॥ ४० ॥

एते कियन्नु वितता ? कियती च शक्ति-
रन्वेति तान् ? कलितकर्मसु योग्यता का ?
धैर्यस्य वा गुरुतरस्य कियत्क्षमत्वम् ?
इत्यादयः समुदिता बहवो बुभुत्साः ॥ ४१ ॥

सांयात्रिकाश्च गणशो गृहमाययुर्नः
आसीदिदं निकटमेव हि तीर्थकस्य ।
विद्याधिपीठमभवत्पुनरत्र भार-
द्वाजाश्रमे गतयुगादतिपूर्वतोऽपि ॥ ४२ ॥

मेलादिनेषु मिहिरोदयतोऽस्तवेलां
यावज्जना अगणिता गृहमाययुर्नः ।
आगन्तुकेषु कतिचिद्रुचिमादधुस्ते
कांग्रेसिके नियतकार्यचयेन नीतौ ॥ ४३ ॥

मन्ये कुतूहलवशान्महतां च येषां
नाम श्रुतं मम पितुस्त्ववलोकनाय ।
अभ्याययुर्जनगणाः, भविता किमग्रे ?
इत्यस्य चापि विवृतिं परिवेत्तुकामाः ॥ ४४ ॥

ते चार्थिकीः कठिनताः कथयन्ति तासां
व्यावृत्तये च करणीयमविधीनपृच्छन् ।
येषाञ्च ते प्रियतरा अभवन्नमीषां
यान् प्रायशो वयमिहातितरां प्रयुञ्ज्मः ॥४५॥

आत्रिंशतोऽप्युपशतं च जनाः समीयु-
र्यूथानि यूथमनुयान्ति निरन्तराणि ?
प्रत्येकमालपमथामिलमन्ततस्तु
तच्चाप्यभूत्कठिनमित्यनमं स तूष्णीम् ॥ ४६ ॥

सीमा नतेरपि भवेदिति वै मयात्मा
गोपाय्यते परमशेषमिदं वृथाऽभूत् ।
घोषा जयस्य खलु तीव्रतरा भवन्तो-
ऽलिन्दा जनैर्वृततराश्च भवन्त एते ॥ ४७ ॥

द्वाराद् गवाक्षविवरान्निमिषन्ति लोका
जातं सुदुष्करमिहाशनभाषणादि ।
नानेन विक्लवपरत्वमभूत्क्रमेण
क्षोभोऽप्यभूदथ समुद्भवति स्म रोषः ॥ ४८ ॥

आयान्त्यहो तदपि हन्त जना अनन्ताः
प्रेमार्द्रलोचनचमत्कृतिभिर्मिषन्तः ।
यत्रानुवंश्यधनहीनतया सहाय-
त्वाप्ताः प्रभान्ति विनयप्रणयौ विभातः ॥ ४९ ॥

ते भ्रातृभावसहितां च सहानुभूतिं
याचन्त इत्यहह कोऽयमुदारभावः ।
श्रद्धाविवेकविनयप्रणयातिरिक्त-
स्तेषां व्यनक्ति किल नो हृदयस्य रिक्तिम् ॥ ५० ॥

मित्रं प्रियं मम गृहे महिला त्वतिष्ठत्
संलापमात्रमपि मे कठिनं तयाभूत् ।
प्रत्येकपञ्चपलतः परमागतेन
यूथेन संलपितुमस्मि बहिः प्रयामि ॥ ४१ ॥

मध्ये वयं बहिरुदीरितघोषशब्दान्
सम्मर्दभाषणरवानपि चानुशृण्मः ।
मत्पारवश्यमवलोक्य हसन्त्यसौ म-
ल्लोकप्रियत्वपरिभावितमानसाभूत् ॥ ४२ ॥

सत्यं त्विमे पितरमेव दिदृक्षवो मे-
ऽभ्येताः पिता च बहिरास्त ततो मयैषाम् ।
अग्रे समेत्य कुशलादिविवित्सयापि
संलापमात्रमुपहार्यमभूदवश्यम् ॥ ४३ ॥

सा मामपृच्छदपि ते हृदि वीरपूजा
ऽसौ रोचते किमनया न समेति गर्वः ।
तत्प्रश्नमुत्तरयतो मम कापि लज्जा
जाता च साऽवददिह त्वनुभूय भूयः ॥ ४४ ॥

क्षन्तव्यमित्यहमिहोत्तरमार्गणेऽस्मिन्
दौष्कर्यमन्वभवमेव न पारवश्यम् ।
भूयो व्यचारयमहं निजभावनानां
विश्लेषणं विदधदत्र विचारणानाम् ॥ ४५ ॥

ता नैकधा समभवन्निह सत्यमस्ति
लोकप्रियोऽहमभवं विधियोगतोऽत्र ।
मामाद्रियन्त लिखिताः पठिताश्च लोका
स्त्रीपूरुषेषु तरुणेषु च नायकोऽस्मि ॥ ४६ ॥

तेषां दृशा मम समीपगतास्ति काचिद्
वीरत्वकान्तिरुदिता मयि गीतयश्च ।
एतादृशश्च घटिता मयि ताश्च वार्ता
या विस्मयं स्मयमथास्मितया वहन्ति ॥ ४७ ॥

न न्यूनतास्ति किल काचन योग्यतायां
निष्ठापि नेहरुगता प्रथते गरिष्ठा ।
इत्यादिना मयि वदन्ति विरोधिनोऽपि
वृद्धत्वगौरवमयीं निजसम्मतिं ताम् ॥ ४८ ॥

घोरे पशावपि महात्मनि वा प्रभावो
न स्यादमुष्य जनताप्रणयस्य लोके ।
किन्त्वस्मि नोभयगतं स्वमवैमि तस्मा-
दस्मिन्मतिर्मम रता प्रणयप्रसादे ॥ ४९ ॥

तेनाहितो मयि मदो नवसाहसं च
शक्तिश्च काचन नवा नवजीवनाढ्या ।
मन्येऽहमस्मि निजकर्मसु यत्स्वतन्त्रो
यच्चैकतन्त्र इव सोऽस्य खलु प्रभावः ॥ ५० ॥

किन्त्वस्मि चेतसि चिराय विचारयामि
नो वर्धितोऽस्त्यधिकमेव ममाभिमानः ।
मय्यस्ति केषुचन काचन योग्यतेयं
या मां न तेषु विषयेष्वपटुं व्यनक्ति ॥ ५१ ॥

किन्त्वेष सम्यगवयामि विलक्षणेयं
वार्तापि नास्ति 'पुरुषो न भवत्ययोग्यः' ।
जानामि ता अपि च निर्बलताः स्वकीया
आत्मेक्षणव्यसनमेव मम प्रतिष्ठा ॥ ५२ ॥

तेनैव कासुचन संघटनास्वसक्तो-
ऽभूवं, तथान्वभवमत्र रहस्यमेकम् ।
लोकप्रियत्वमिदमस्ति न साधुतायां
बुद्धौ च निर्भरमिदं बहुधाप्यवाञ्छ्यम् ॥ ५३ ॥

तत्किं स्वनिर्बलतयार्जितमस्ति किं वा
लोकप्रियत्वमिदमस्ति गुणैर्विशिष्टैः ।
प्रश्नो यथावदयमस्ति पुरः स्थितो मे
विश्लेषणेन न गुणाः प्रथिता निदानम् ॥ ५४ ॥

नो बौद्धिकी निपुणता मयि तादृगस्ति
सामान्यतोऽतिशयितापि न सा निदानम् ।
मत्तोऽधिकं च बलिदानमिहापरेषा-
मस्तीति नैतदपि कारणतां दधाति ॥ ५५ ॥

वीरो महानिति मदर्थकथा वृथास्ति
वीरोचितं किमपि नैव मयाभिनीतम् ।
यां बौद्धिकीमथ मम क्षमतां वदन्ति
यां कायिकीमपि च तामपि दर्शयन्ति ॥ ५६ ॥

सा केवलं मयि लसत्यभिमानमूला
स स्वं स्ववंशमथ राष्ट्रमधिश्रितोऽस्ति ।
अन्यप्रभाववशगेन मयात्र किञ्चि-
त्कार्यं न कार्यमिति मेऽस्त्यभिमानरूपम् ॥ ५७ ॥

अद्यापि नाधिगतमुत्तरमेतदीय-
मित्यन्यथाऽस्य परिमार्गणमाश्रितोऽहम् ।
आकर्णितं मम पितुश्च पटाः प्रयान्ति
प्रक्षालनाय किल पैरिसधाविकायाम् ॥ ५८ ॥

कार्येषु ये खलु महत्सु निजं नियोगं
वाञ्छन्ति ते कठिनघातसहिष्णुतां च।
धैर्यं क्षमत्वमपि नूनमिहार्जनीय-
मित्यस्मि धर्मनियमांश्च यमांश्च मन्ये ॥ ६६ ॥

त्यागात्मिका दृगथ जीवति वर्जनानि
आनन्दजानुभववैमुखिका च मह्यम्।
नो रोचते, न च मनो मम कर्षतीदं
न त्यक्तवानहमिहास्मि विदन्महत्त्वम् ॥ ६७ ॥

मूल्यं समानमिह नास्ति समं तु देशे
काले च वस्तु महितं भुवि गर्हितं स्यात्।
मित्रेण तेन महिलाकृतिना तु पृष्टः
प्रश्नोऽद्य यावदिह नोत्तरमाप्तवान्मे ॥ ६८॥

सम्मर्दजा मनसि मे खलु वीरपूजा
गर्वं त्वखर्वमिह किं न हठात्प्रसूते।
नारोचत प्रथमतस्तु पलाय्य दूरं
यातुं मनो भवति मे स्म परं क्रमेण ॥ ६९ ॥

जातं मम व्वसनमेतदभावखेदा-
त्खिन्नोऽभवं द्वयमपीह न सान्त्वनायै।
अन्ते तु काञ्चन ममान्तरिकीमपेक्षां
सम्मर्द एष समपूरयदित्यभान्मे।

एतावतीं सुमहतीमिह लोकसङ्ख्यां
वाक्शक्तितोऽहमखिलां परिभावयामि।
शक्नोमि कारयितुमत्र निजेप्सितं च
मस्तिष्क-मानस-युमेऽधिकृतिं करोमि ॥ ७० ॥

इत्येतया मननयाऽनुभवामि सत्ता-
मेते तु मय्यतितरामनयं प्रचक्रुः।
विश्वासतः प्रणयतश्च मनो ममैषां
संस्पन्दते स्म बहुशश्च विकम्पते स्म ॥

कार्येषु ये खलु महत्सु निजं नियोगं
वाञ्छन्ति ते कठिनघातसहिष्णुतां च।
धैर्यं क्षमत्वमपि नूनमिहार्जनीय-
मित्यस्मि धर्मनियमांश्च यमांश्च मन्ये ॥ ६६ ॥

त्यागात्मिका दृगथ जीवति वर्जनानि
आनन्दजानुभववैमुखिका च मह्यम्।
नो रोचते, न च मनो मम कर्षतीदं
न त्यक्तवानहमिहास्मि विदन्महत्त्वम् ॥ ६७ ॥

मूल्यं समानमिह नास्ति समं तु देशे
काले च वस्तु महितं भुवि गर्हितं स्यात्।
मिश्रेण तेन महिलाकृतिना तु पृष्टः
प्रश्नोऽद्य यावदिह नोत्तरमाप्तवान्मे ॥ ६८॥

सम्मर्दजा मनसि मे खलु वीरपूजा
गर्वं त्वखर्वमिह किं न हठात्प्रसूते।
नारोचत प्रथमतस्तु पलाय्य दूरं
यातुं मनो भवति मे स्म परं क्रमेण ॥ ६९ ॥

जातं मम व्यसनमेतदभावखेदा-
त्खिन्नोऽभवं द्वयमपीह न सान्त्वनायै।
अन्ते तु काञ्चन ममान्तरिकीमपेक्षां
सम्मर्द एष समपूरयदित्यभान्मे।

एतावतीं सुमहतीमिह लोकसङ्ख्यां
वाक्शक्तितोऽहमखिलां परिभावयामि।
शक्नोमि कारयितुमत्र निजेप्सितं च
मस्तिष्क-मानस-युमेऽधिकृतिं करोमि ॥ ७० ॥

इत्येतया मननयाऽनुभवामि सत्ता-
मेते तु मय्यतितरामनयं प्रचक्रुः।
विश्वासतः प्रणयतश्च मनो ममैषां
संस्पन्दते स्म बहुशश्च विकम्पते स्म ॥

जाता तयोर्मनसि मे च प्रतिक्रियापि
तद्भावुकत्वमिह जागरितं सदाभूत्।
सन् व्यक्तिवाद निरतोऽनुभवामि चान्त-
स्तद्भक्तयः प्रविचलन्ति कदाचनेति ॥ ७२ ॥

भाति स्म मे व्यथितदुःखितचित्तलोकै-
रेतैः सहैव विपदां निवहे वसेयम्।
श्रेयो भवेत्तदिह नूनमितो यदेको
मुक्तिं भजे स्वसुखसाधनसङ्ग्रहेषु ॥ ७३ ॥

ता भित्तयो विचलिता अपि न च्यवन्ते
पश्यामि ताः समधिरुह्य समन्ततोऽहम्।
सा चाभिमानसरणिः क्रमशो वपेव
चित्तं जनस्य परिपुष्यति नित्यशश्च ॥ ७४ ॥

न ज्ञायते च विदधाति च तत्स्थविष्ठं
सौभाग्यतः प्रतिहता च विशीर्यतेऽपि।
उन्मत्तलोकविहितात्प्रतिघाततोऽसौ
कार्त्स्न्येन चावतरतीत्यपि मेऽनुभूतम् ॥ ७५ ॥

एतादृशस्य न खलु प्रतिघातकस्य
यातेऽब्दकेऽत्र समभूत्क्वचिदल्पभावः।
देशेऽत्र कर्कशतरो मम जीवनस्य
विद्यालयोऽयमभवत्कृतमानभङ्गः ॥ ७६ ॥

यन्नाम कष्टसहनं स गुरुः कठोरः
कार्याणि कारयति निष्ठुरमानसः सन्।
सद्भाग्यमेतदिह मेऽस्त्यपरं च यत्र
संस्कारमाप्नवमनेकविधं पितृभ्याम् ॥ ७७ ॥

मत्पारिवारिकजनाः सुहृदश्च सार्थाः
सर्वेऽपि मत्सहकृतः परितः समासन्।
ते संस्कृतौ च वचसां मनसश्च सम्य-
ग्दृष्टिस्थितावविकृतौ च मदीयबुद्धेः ॥ ७८ ॥

भारश्च सार्वजनिकोत्सव-पालिकादि
स्थानीयसंस्थितिषु संस्थितिकान्तरेषु ।
शोभाप्रयाण-स्वपराद्यभिनन्दनेषु
वर्षोत्सवेषु पतति स्म महान् मतो मे ।। ७९ ।।

नित्या विनोदमयता प्रतिहन्यते स्म
सा चात्र वास्तविकता विनिवर्तते स्म ।
भाषा सुदीर्घवितता प्रणियुज्यते स्म ।
सर्वो जनः शुचिरथो रुचिरः स्म भाति ।। ८० ।।

दृष्ट्वा तदेतदखिलं भवतीयमिच्छा-
ऽत्युच्चैर्हसानि रसनां बहिरानयानि ।
शीर्षानमेना विपरीततनुर्भवानि
गम्भीरमास्यमखिलं खलु हासयानि ।। ८१ ।।

पश्यानि लोकवदनानि विकारभाञ्जि
मच्चेष्टया विचलितानि विचेष्टितानि ।
आस्वादयानि किल दर्शनकौतुकानि
किन्तु प्रसिद्धिरवरुद्धवती ततो माम् ।। ८२ ।।

अस्येव भारतभुवश्च गभीरताया-
मेव स्थितं यदिह विश्वजनीन वृत्तम् ।
सम्मान्यतां तदयते न तु चञ्चलत्व-
मित्याद्यमन्त्रयमिमामनियन्त्रितेच्छाम् ।। ८३ ।।

तत्कर्तुमासमिह नैष सदा समर्थ-
श्चेष्टाविशेषमिह काञ्चन सत्सभायाम् ।
शोभा प्रयाण समये क्वचनाप्यकार्षम्
मुद्विग्नचित्तशमनाय विशेषतोऽहं ।। ८४ ।।

अस्मत्समादरविधौ विहिते सुशोभा-
यात्रासु जातु सहसैव जहामि सङ्गम् ।
सम्मर्दगोऽविदित एव भवामि शोभा
यात्रीयमृत्तरिनिविष्टकलत्रगश्च ।। ८५ ।।

स्वा भावना दमयतो जनतासमक्षं
कुत्रापि कृत्रिमविधौ व्यवहारिणश्च।
मस्तिष्कमेति मम कञ्चन दम्यभावा
दुद्वेगमित्यहमिह स्ववशश्चरामि ॥ ८६ ॥

नो चेदमुत्र कृतकृत्रिमरूपकेण
स्थातव्यमत्र भवति स्म जनोत्सवेषु।
स्यात्क्वापि मासिकदले लिखितं यदेष
हिन्दूकुटुम्बविधवासदृशं चरामि ॥ ८७ ॥

प्राचीनहिन्दुविधवाबहुमानदोऽपि
क्षोभं गतोऽस्मि किल तेन समत्वकेन।
उद्देश्यमस्य मम नम्रतया प्रहास-
वैमुख्यसद्गुणनिदर्शनमस्तु नाम ॥ ८८ ॥

आत्मन्यहं जबनतामनुभूय वर्ते
हासोपहासपटुतामपि भावयामि।
एतान् गुणानभिलषामि च तासु हिन्दू-
नारीष्वपि प्रकटितस्फुटमन्दतासु ॥ ८९ ॥

गान्धिः कदाचिदवदद्यदि नो विनोद-
शीलत्वमेमि न तदा भवितास्मि जीवन्।
दूरं न यामि, किल दुष्करमेव मेस्या-
त्तज्जीवनं यदि विनोदसुखं न यायाम् ॥ ९० ॥

लोकप्रियत्वमथ लम्भितमानपत्र
माधृत्य तद्गतविचित्रपदां च भाषाम्।
मत्पारिवारिकजनः कुरुते प्रहासं
पत्नी स्वसा च समुदीरित शब्द गुम्फा ॥ ९१ ॥

गुम्फा इमे न मयि केवलमीरितास्ते
सामाजिकेषु सकलेष्वपि सम्प्रयुक्ताः।
। त्यागमूर्तिमथ भारतभूषणं मां
जल्पन्त्यथैष, मम मोदमदात्प्रयासः ॥ ९२ ॥

शिष्टश्चिरं व्यवहरन् समितौ सभायां
यां श्रान्तिमेमि किल विश्वजनीनकायाम् ।
सा चापयाति शनकैरसुकैः प्रहासैः
यत्रेन्दिरापि मिलिता भवदात्मजा मे ॥ ९३ ॥

मातैव केवलमिमाः सकला अवोचद्
यत्सादरैर्मयि समैरपि वर्तनीयम् ।
सा स्वात्मजेन सह हासविलासमेवं
नैवान्वमोदयदनेन पिता त्वतुष्यत् ॥ ९४ ॥

स स्वेन केनचिदथ प्रथनक्रमेण
भावान् विचारसहितान् प्रकटी करोति ।
सम्मेलनैर्जयजयेति विशेषघोषै-
रस्वादुसार्वजनिकोत्सवगैर्विवादैः ॥ ९५ ॥

तै राजनैतिकघनाघनघातकैश्च
बाह्यं प्रभावमगमं न किलान्तरङ्गम् ।
बाह्योऽप्ययं च बहुधा भवति स्म तीव्रो
गम्भीर एव च परन्तु मदन्तरन्यः ॥ ९६ ॥

सङ्घर्ष आस्त विचरन्निह वास्तवोऽसौ
योऽभूद्विचाररुचिविश्वसनेषु नित्यम् ।
बाह्या परिस्थितिरथान्तरभावनाभिः
मस्तिष्कजाभिरसकृत्कलहायते स्म ॥ ९७ ॥

निर्वापिता न मनसो मम जातु 'सान्त-
र्ज्वाला स्थितोऽस्मि बहुधा समरस्थलीव ।
अन्योन्यजेतुमनसः खलुशक्तयोऽमू-
र्नानाविधाः मनसि मे सततं यतन्ते ॥ ९८ ॥

युद्धादितो झटिति मुक्तिमहं तु काङ्क्षे-
ऽप्यन्वेषयामि समताञ्च समन्वयञ्च ।
यत्ने किलास्मि पतितः समरे स्वराज्य-
संप्रापके, शममगाममुना किलान्तः ॥ ९९ ॥

सङ्घर्षमान्तरिकमल्पितवांस्तु बाह्यः
कारास्थितः कथमिदं निखिलं लिखामि।
कारान्तरे बहिरथास्मि गवेषयामि
तावेव, चानुभवयुक्तविचारलेखैः ॥ १०० ॥

एतैरहं सपदि शान्तिमुपाश्रयिष्ये
सन्तोषमान्तरिकमप्युपसादयिष्ये ।
इत्याशयेन विलिखामि किलात्मगाथां
कुर्वन्तु नाम कवयोऽप्यनुवादमस्याः ॥ १०१ ॥

चत्वारिशृङ्गेति-ऋचा निरूपितकाव्यरूपरसादिकं
यः काव्यमीमांसेति लेखं लिखितवानतिविस्तृतम् ।

तत्कृतौ श्रीमज्जवाहरलालनेहरुचरितकाव्ये
पूर्णस्वाधीनत्वमथ परमिति गतः सर्गोऽष्टविंशः ।

सविनयाज्ञाभङ्गोपक्रमः

वसन्ततिलका

एकोनत्रिंशः सर्गः

स्वाधीनतादिवस एत्य तडित्प्रकाशः
सोत्साहमञ्जयति देशगतं तदौष्म्यम् ।
त्रिंशेऽब्दके जनवरीति वरेण्यमासे
षड्विंशके शुभदिनेऽखिललाभदेऽस्मिन् ॥ १ ॥

तस्मिन् दिने प्रतिपदं सुमहत्सभाना-
मायोजनं कृतमभून्न विवेचनानाम् ।
गम्भीरतासहितया तु समग्रशान्त्या
स्वाधीनताप्तिविषये विहिताः प्रतिज्ञाः ॥ २ ॥

शोभाप्रयाणघटनानि सभायुतानि
नूनं प्रभावजनकान्यभवन्महान्ति ।
गान्धिस्त्विदं दिवसयोजनया बलं तत्
प्रापद्यतास्य समपेक्षितमेतदासीत् ॥ ३ ॥

नाडीं जनस्य स हि वेत्ति ततोऽप्यवेदी-
त्कालोऽयमस्ति किल योद्धुमुपक्रमस्य ।
तस्मात्परं च घटना अघटन्त नैकाः
नाट्ये रसातिशयकोद्बलने यथा स्यात् ॥ ४ ॥

अभ्यागतः सविनयो निकटे स आज्ञा-
भङ्गो यथैदिधदथैष तथा तदोजः ।
अस्मत्स्मृतिं स्पृशति तत्स्म यथैकविंशा-
दान्दोलनं कृतमभूत्कथमित्यशेषम् ॥ ५ ॥

आकस्मिकं स्थगनमस्य ततश्च चौरी-
चौराकथामनु कृतं स्मृतमन्तरासीत् ।
अद्यानुशासनमिहास्त्यधिकं तदात्वात्
कीदृक्च युद्धमिदमस्ति किलेत्यजानन् ॥ ६ ॥

युद्धस्य पद्धतिरमुष्य च बुध्यते स्म
विज्ञायते प्रतिजनं स्म दृढं यदत्र ।
गान्धिः किलोत्कटतया बलमादधाति
दृष्ट्या स्वया त्वपरिहार्यतमामहिंसाम् ॥ ७ ॥

वर्षात्पुरा जनमताविह संशयः स्यात्
किन्त्वद्य नैष लवलेशतयापि शक्यः ।
विश्वास एष सुदृढः कथमस्तु हिंसा
कुत्रापि न स्वयमथापि न कैतवेन ॥ ८ ॥

चेतसा भवेत्सविनयस्य तदास्मदाज्ञा-
भङ्गस्य भाविनि भविष्यति कः प्रभावः ।
शङ्कासुकातिविकलीकुरुते स्म चित्तम्
किं नैष पूर्ववदुपैष्यति तं विरामम् ॥ ९ ॥

गान्धिः स्वयं स्वसरणिं श्रित एव चात्र
कञ्चिद्विचारमकृतेत्यपि भावयामि ।
चिन्तामुपैति विषये स हि यत्र, तत्र
रीत्यन्तरेण विमृशत्ययमित्यजानाम् ॥ १० ॥

संस्कर्तुमत्र करणीयमहिंसयैव
युद्धं तदीयदृशि नास्त्यपरोऽभ्युपायः ।
सम्यक्तया व्यवहृतश्च स एक एव
रामस्य बाण इव सिद्धिमुपैत्यमोघः ॥ ११ ॥

तत्किं नु वाच्यमिममत्र विवर्तितुं वै
कर्तुं तथा च सफलं स्थितयो विचार्याः ।
तास्वानुकूल्यमुपलभ्य किल प्रयोज्यं
नैवान्यथेति विमृशन्तु परिस्थितीनाम् ॥ १२ ॥

एतत्फलं भवति यन्न सदाप्यहिंसा
सिद्ध्यत्यतो न सफला न च सार्वभौमी ।
गान्धेरसह्यमिदमास्त दृढो हि तस्य
विश्वास आह सफलामथ सार्वभौमीम् ॥ १३ ॥

तस्मात्परिस्थितिषु तास्वसमासु युद्धे-
हिंसासु चानुपरतास्वपि स प्रयोज्यः ।
रूपान्तरं स्थितिषु तासु गतासु चायं
रूपान्तरं गमयतां नियमेन नित्यम् ।। १४ ।।

नायं किल स्थगिततामुपनीयतां य-
त्तेनाभ्युपायविफलत्वमधिश्रितं स्यात् ।
मन्ये स एवमनुचिन्तयते परं तद्-
वैचारिकीं सरणिमत्र न भालयामि ।। १५ ।।

तेनास्त तावदिदमप्युपदर्शितं नो
यत्तद्विचारसरणौ जनितोऽस्ति भेदः ।
भङ्गे त्विते सविनये सति चैव हिंसा-
काण्डेऽपि तत्स्थगनमत्र तु नोचितं स्यात् ।। १६ ।।

आन्दोलनावयवतां तु गता न हिंसाऽऽ
ज्ञाभङ्ग एष भविता किल शान्तिपूर्णः ।
तच्चेष्टितानि सकलान्यपि रोधितानि
व्यावर्तितान्यपि भवेयुरिति स्म वक्ति ।। १७ ।।

आश्वासनादसुकतो समतुष्यदन्त-
रित्यस्मदादिकजनस्य समाहितिः सा ।
प्रश्नोऽभवत्कथमुपक्रमतामथेमं
कुर्याम कीदृशमथो विनयेन भङ्गम् ।। १८ ।।

यः स्यात्कृतार्थ इह चाप्यनुकूल एव
लोके प्रियत्वमपि यात्विति चिन्तयत्सु ।
गान्धिस्तु तावदुपयुक्ततरां स्वयुक्तिं
व्यक्तीचकार लवणस्य महत्त्वयोगात् ।। १९ ।।

उत्पादनार्थककरे लवणस्य काचि-
दाक्रान्तिरुद्भवति सा स्म विनिश्चितात्र ।
सम्बन्धितो विधिरभूदिह भञ्जनीयः,
साश्चर्यमत्र पतिताः स्म विशङ्कमानाः ।। २० ।।

राष्ट्रीयसङ्गरमिमं लवणाभिषङ्गं
वक्ति स्म चाखिलमसङ्गतमेव भाति ।
एकादश प्रथितवानिह नाम वार्ताः
स्वीयाश्च गान्धिरिति विस्मयहेतुरासीत् ॥ २१ ॥

ता राजनैतिकसमाजसुधारबद्धाः
काश्चित्तु नाम भुवि भद्रतरा अपि स्युः ।
तेषामियं च समयेऽत्र धृता तु सूची
कीदृक्प्रयोजनवती समभून्न तावत् ॥ २२ ॥

स्वाधीनतेति पदमेकमनेकवाच्यं
गान्धेर्मुखादपरमर्थमवोचदेतत् ।
अस्मन्मुखाच्च परमर्थमिति प्रतीमो
नासीद्विवादसमयोऽग्रसरज्जनानाम् ॥ २३ ॥

सा भारते नयनयोः पुर एव राज-
नैतिक्यरूपनिचयेऽनुदिनं प्रवृद्धा ।
तेजस्वितामवहदत्र समस्तवस्तु-
मन्दत्वकारकतया निविडा दृढाऽऽसीत् ॥ २४ ॥

पश्यन्ति नागरजना निजहर्षकालं
ते कर्षकाश्च विषमं भयमेव चास्याम् ।
गान्धिर्मुरारिरिव मार्गमगात्तृतीयम्
पत्रैः प्रचालयति वायसराजचित्तम् ॥ २५ ॥

प्रस्थाय सावरमतीपुलिनाश्रमाच्च
पश्चान्न पश्यति स कोटिजनानुगम्यः ।
वार्ता ह्यभूल्लवणसंयमभञ्जिनी सा
सोत्साहवर्धितसमग्रजना जयाय ॥ २६ ॥

तत् कृत्स्नभारतसमर्थितकाङ्ग्रेस-
मध्याविशत्त्वहमदादिकवादमध्ये ।
युद्धस्य मूर्धनि समापतितस्य हेतो
रन्त्याय कार्यनियमाय तदध्यवेशि ॥ २७ ॥

संग्रामनायकशिरोमणिरत्र नान्धि-
नोंपास्थदेष हि समुद्रतटं गतोऽभूत् ।
मध्येपथाच्च विनिवर्तितुमेष नाभूत्
त्सज्जस्ततः कतिपयेऽप्यभवन्विचाराः ॥ २८ ॥

चेत्कार्यकर्तृनिवहो विनिगृह्यते नः
किं किन्नु तर्हि करणीयमिहास्मदाद्यैः ।
चेन्नाधिवेशयितुशक्यमिदं जनानां
सभ्यांस्तदत्र समितेरपरान् विदध्युः ॥ २९ ॥

भङ्गप्रवर्तनमुखे खलु लार्डइर्विन्
प्रावोचदत्र जनताप्रतिबोधनार्थम् ।
तस्योत्तरे लिखति स स्म च यंगइंड्या-
पत्रे तु गान्धिरिह काँश्चन वैधबन्धान् ॥ ३० ॥

यत्पूरणेन भविताबसरो विधान-
भङ्गस्य कस्यचिदपीति स आर्थिथत्तत् ।
सम्पूर्णमद्य विनिषेध इति स्वमुद्रा
मूल्ये समत्वमिति चार्धविधिः करस्य ॥ ३१ ॥

रोधः करस्य लवणेऽपि च सैनिकाना-
मर्धीकृतिश्च गुरुशासकवेतनानाम् ।
सिन्धोस्तटे च निजपोतगतिश्च हिंसा-
मुक्तस्य राजनयिकस्य विमोचनञ्च ॥ ३२ ॥

बन्धश्च गुप्तचरकर्मणि चात्मरक्षा-
हेतोः शतघ्निनियमो न निहन्तुमन्यान् ।
एकादशापि भुवि शिष्टिविधौ सुधाराः
स्युः स्वीकृताः किल प्रशासनशासनाभ्याम् ॥ ३३ ॥

स्वस्थानकेऽपि सदृशानधिकारतोऽपि
सभ्यान् नियुञ्जतु सभापतयः सभासु ।
स्थानप्रदेशभिदया समितिष्वशेषं
रिक्तं पदं प्रतिपदं परिपूरितं तैः ॥ ३४ ॥

इत्थं युगं तदभवत्किल यत्र सैक-
तन्त्रप्रशासकजना अधिकारमापुः।
कांग्रेसतश्च समरं तमचालयंस्ते
मन्त्र्यादिभिः प्रकटितात्र महाजुगुप्सा ।। ३५ ।।

चीत्कारपूर्वकमिमेऽभ्यदधुश्च हा हा,
भ्रष्टं च नष्टमिदमस्त्यथ काङ्ग्रेसम्।
यत्त्वेकतन्त्रविधिमप्यधुनानुशिष्टि
स्वीकृत्य गायति गुणान् गणतन्त्रकस्य ।। ३६ ।।

भूयश्च पत्रनिवहा अपि नभ्रवर्ग्या
अस्मान्दिशन्ति गणतन्त्रगुणांश्च लाभान्।
तूष्णीं वयं तदुपदेशमशृणुम तेषाम्
निर्लज्जता भवति का किमु मत्सरत्वम् ।। ३७ ।।

इत्थं च भारतभुवोऽवयवेषु तस्या
नन्वेकतन्त्रमभितः प्रसृतं कुतश्चित्।
दन्दम्यमाममुना निजतन्त्रकेण
दुःशासनेन निखिलं त्वभवद्धि राष्ट्रम् ।। ३८ ।।

वाचा तु केवलमिमे गणतन्त्रवादं
स्तुत्वा हृदा कलितकेवलतन्त्रसौख्याः।
जानन्ति नात्र क्वचनापि कदापि कश्चित्
संस्थापयिष्यति न तद्गणतन्त्रराज्यम् ।। ३९ ।।

अंग्रेजशासनमिह स्वहितं स्वशक्ति
रक्षत्यहो निजनिवारकनिग्रहेषु।
नित्यं परायणतया सह सर्वयत्नान्
कुर्यात्किलेदमपि साहजिकं वदामः ।। ४० ।।

किन्त्वस्य नाम गणतन्त्रमिति प्रचार्य
तद्भाबि भव्यपुरुषान् परिवञ्चयेद्यत्।
संस्थापयेदपि विलिख्य निजप्रशंसा-
प्रस्तावनाय किल संग्रहकेन्द्रकेषु ।। ४१ ।।

काांग्रेसमीदृशदशामुपयद्विधान-
सिद्धक्रमेण चलितुं न समर्थमासीत् ।
तस्माद्विधानबहिराचरणेन लोके
ख्यातं भविष्यति भविष्यति नूनमेतत् ॥ ४२ ॥

नो गुप्तमस्ति किमपीति सभात्वमस्य
कीदृङ्मतं यदि न कर्म न मर्म गुप्तम् ।
नास्माभिरत्र विषये विहितः प्रयत्नो
युद्धं हि नः स्फुटतया जनतासमक्षम् ॥ ४३ ॥

कार्यं न सिद्ध्यति कदापि च गोपनेन
केन्द्रे प्रदेशविषयेऽपि न जानपद्ये ।
नार्यो नराश्च महिताः परितो हि कारा-
गारे निवेश्य सकलोद्यमवञ्चनीयाः ॥ ४४ ॥

कश्चालयिष्यति पुरः खलु कर्मतन्त्र-
मस्यां स्थितौ च पुरतोऽस्त्यपि मार्ग एकः ।
प्रत्नश्चमूपतिरुपेत्य रणेऽत्र मृत्यु-
मन्यस्य कार्यकरणावसरं प्रदत्ते ॥ ४५ ॥

युद्धस्थले समुपविश्य सभासमित्यो-
रायोजनं न सुशकं मुहुरस्मदाद्यैः ।
किञ्चित्कदाचिदिह तद्विहितं परं तु
प्रायो विनिग्रहमगाम जनैः सहायैः ॥ ४६ ॥

सौविध्यमेतदपि नाम न चास्मदीयं
यद्युद्धपङ्क्तिमनुपृष्ठमवस्थितः स्यात् ।
अन्यत्र वा क्वचन मन्त्रिमुखा जनास्ते
ऽवस्थाय चिन्तयितुमप्युपयान्तु कालम् ॥ ४७ ॥

स्थित्वा पदे सुमहति स्वयमग्रतश्च
स्थातव्यमित्यपि किलास्ति नवः क्रमो नः ।
ये चैकतन्त्रविधिनाऽत्र भवन्ति मुख्या-
स्तेऽप्यग्रतः प्रथमनिग्रहमाप्नुवन्ति ॥ ४८ ॥

कार्यं तदैव खलु ते व्यदधुर्यदा ते
    कस्याप्यबाधगुरुसान्त्वनिरुद्धवीर्याः ।
न स्वां सभां समितिमावहितुं तु शेकु-
    र्यस्या दधुः प्रतिनिधित्वमपि स्वयं ते ।। ४९ ।।

गोष्ठी यदैव समितेर्भवति स्म तर्हि
    सत्तैकतन्त्रपुरुषस्य समाप्तिमेति ।
नायं च कस्यचन मूलसमस्ययासी-
    त्सम्बद्धकर्मणि च निर्णयमादधाति ।। ५० ।।

आन्दोलनस्य लघुभिर्लघुभिः कथाभिः
    सम्बन्धिते तु विषये स विधातुमार्हत् ।
कांग्रेसकैकविभुता किल वन्दिगेह-
    सोपानमास्त गमनागमने जनानाम् ।। ५१ ।।

नित्यं क्रमोऽयमचलत् खलु यत्र नूत्ना
    आयान्ति यान्ति पुनरत्र जनाश्चिरत्नाः ।
इत्थं विधाय पुनरुद्यममन्तिमं च
    कांग्रेसबन्धुजनतानुमताः प्रयातुम् ।। ५२ ।।

कश्चिन्न वेत्त्यहमदादिकबादतोऽमी
    कस्मिन्कदा कथमथो मिलिता भवामः ।
स्यामापि नाम मिलिताश्च मिथो न वेति
    प्रातिस्विकं पदमुपेत्य दधाम कार्यम् ।। ५३ ।।

आह स्म—'विष्टरनिबन्धनपूर्वकं स्या-
    त्कारागृहेषु गमनाय सदैव सज्जा ।'
तन्नायडूवचनतस्त्वरितं समेऽपि
    संप्रस्थिता निजगृहान्निजकार्यकेन्द्रान् ।। ५४ ।।

प्रत्यागतिक्षण इमे मिलिताः—पिता च
    गान्धिस्तथाहमिह जम्बुसरे तु होराः ।
गान्धिस्तदा स्वदलसंगत एव सिन्धु-
    यात्रार्थमग्रमचरल्लवणाग्रहाय ।। ५५ ।।

दण्डं करे धृतवता खलु धावतेव
श्रीगान्धिनाऽत्र विहिता खलु दण्डियात्रा।
तस्यानुयात्रिकगणा अपि तद्वदेव
शान्तप्रसन्नभयहीनमुखा अधावन् ॥ ५६ ॥

इत्थं तदा कृतमभून्मयका तु गान्धे-
स्तद्दर्शनं हृदयकम्पनकारि दृश्यम्।
जम्बूसरे मम पिता सुविमृश्य सम्यक्
श्रीगान्धिना स्वभवनं निचिकाय दातुम् ॥ ५७ ॥

तद्यत्प्रयागगतमाप्रथितं स्वनाम्ना
आनन्दहर्म्यमिति सम्प्रति तस्य नाम।
भूयात् स्वराज्यभवनं त्विति गेहमेत्य
तद्घोषणापि विहिता स्वयमादरेण ॥ ५८ ॥

कांग्रेसकार्यकृतिनामधिकारदानं,
भागे च कुत्रचिदकारि चिकित्सितौकः।
तस्मिन्दिने स विधिकार्यविधौ न शक्तो
वर्षात्परं तु मयका निधिपामकार्षीत् ॥ ५९ ॥

अप्रैलमासि स गतोऽब्धितटं च गान्धिः
सर्वे वयं लवणशासनभञ्जनाय।
तस्यानुशासनमभूविम वीक्षमाणा
मासैश्च कैश्चन विधिं तमशिक्षयाम ॥ ६० ॥

स्वेच्छाचरैरधिगताऽभवदेव शिक्षा
कृष्णाऽऽगताऽथ कमलापि तदाग्रहाय।
धृत्वा च ते पुरुषवेषमभातमग्रे
स्वेच्छाचरैर्नच धृता करयष्टिकापि ॥ ६१ ॥

स्वेच्छाचरेषु पटुतामथ योग्यताञ्च
शिक्षा नियन्त्रणविधावकरोज्जनानाम्।
सप्ताहमप्यकलयाम च राष्ट्रियं तं
सत्याग्रहस्य दिवसाज्जलियानकाण्डात् ॥ ६२ ॥

अप्रैलमासि दिवसः प्रथमोऽस्य षष्ठोऽ-
स्मिन्नह्नि दाण्डिवसतौ लवणे विधानम् ।
गान्धिस्त्वभञ्जयदिहाब्धितटे निदिष्टं
कांग्रेससंघटनमप्यथ तत्र पश्चात् ॥ ६३ ॥

लग्नं तडिद्वदनसंस्पृशि काल एष
देशेऽखिलेऽपि नगरेषु समन्ततोऽपि ।
ग्रामेषु चापि निखिलेषु समं प्रवृत्ता-
वाज्ञाविभङ्गलवणीयविधानभङ्गौ ॥ ६४ ॥

ता रीतयो लवणनिर्मितये विचित्रा
आविष्कृताश्च विहिता वितताश्च सद्यः ।
नाज्ञासिषं किमपि, किन्तु यदेव यस्मा-
ज्ज्ञातं तदेव लिखितं लघु पत्रिकासु ॥ ६५ ॥

सर्वंप्रकाशितमिदं च वितीर्णमासीत्
पात्रं कटाहसहितं परितः प्रदत्तम् ।
अन्ते च भद्रमिव किञ्चन संप्रणीतं
विक्रीतमप्यथ जनेषु महार्घमेतत् ॥ ६६ ॥

तच्छोभनं भवतु वाऽशुभमेव वस्तु
नास्मिंस्तु कस्यचन कश्चिदिहाग्रहोऽभूत् ।
भग्नं भवेल्लवणगामि विधानमेत-
दित्याशयेन विहितो भवति स्म यत्नः ॥ ६७ ॥

उत्साह उल्लसति सर्वजनेष्विदानी
मित्युन्निशम्य हृदयं स्म दधाति लज्जाम् ।
पूर्वं हि गांधिकथिते मम संशयोऽभू-
त्सोऽद्यापयात इति मोहतमो निरस्तम् ॥ ६८ ॥

ते विस्मयेमहि यदत्र महानुभावे
लोकान् प्रभावयितुमस्ति कियत्सुधीत्वम् ।
तान् सङ्घट्य्य च निजेप्सितमेव कर्म
तैरेष कारयितुमस्ति कियत्समर्थः ॥ ६९ ॥

अप्रैलमासि दिवसः प्रथमोऽस्य षष्ठोऽ-
स्मिन्नह्नि दाण्डिवसतौ लवणे विधानम् ।
गान्धिस्त्वभञ्जयदिहाब्धितटे निदिष्टं
कांग्रेससंघटनमप्यथ तत्र पश्चात् ॥ ६३ ॥

लग्नं तडिद्वदनसंस्पृशि काल एष
देशेऽखिलेऽपि नगरेषु समन्ततोऽपि ।
ग्रामेषु चापि निखिलेषु समं प्रवृत्ता-
वाज्ञाविभङ्गलवणीयविधानभङ्गौ ॥ ६४ ॥

ता रीतयो लवणनिर्मितये विचित्रा
आविष्कृताश्च विहिता विततश्च सद्यः ।
नाज्ञासिषं किमपि, किन्तु यदेव यस्मा-
ज्ज्ञातं तदेव लिखितं लघु पत्रिकासु ॥ ६५ ॥

सर्वंप्रकाशितमिदं च वितीर्णमासीत्
पात्रं कटाहसहितं परितः प्रदत्तम् ।
अन्ते च भद्रमिव किञ्चन संप्रणीतं
विक्रीतमप्यथ जनेषु महार्घमेतत् ॥ ६६ ॥

तच्छोभनं भवतु वाऽशुभमेव वस्तु
नास्मिंस्तु कस्यचन कश्चिदिहाग्रहोऽभूत् ।
भग्नं भवेल्लवणगामि विधानमेत-
दित्याशयेन विहितो भवति स्म यत्नः ॥ ६७ ॥

उत्साह उल्लसति सर्वजनेष्विदानी
मित्युन्निशम्य हृदयं स्म दधाति लज्जाम् ।
पूर्वं हि गांधिकथिते मम संशयोऽभू-
त्सोऽद्यापयात इति मोहतमो निरस्तम् ॥ ६८ ॥

ते विस्मयेमहि यदत्र महानुभावे
लोकान् प्रभावयितुमस्ति कियत्सुधीत्वम् ।
तान् सङ्कुटय्य च निजेप्सितमेव कर्म
तैरेष कारयितुमस्ति कियत्समर्थः ॥ ६९ ॥

अप्रैलमासि च चतुर्दशतारिकायां
प्राप्तो विनिग्रहमहं खलु मध्यदेशे।
आरोढुमुद्यममिहाद्रियमाण एष
रेलं तु रामपुरसम्मिलने प्रयातुम् ॥ ७० ॥

तस्मिन्दिनेऽभवदिहैष ममाभियोगः
कारागृहे लवणभङ्गकृते निरुद्धः।
षाण्मासिकीमिह गतोऽस्मि नियन्त्रणाञ्च
कांग्रेसभारमददामिह गान्धिपित्रोः ॥ ७१ ॥

गान्धिनं तं स्व्यकृत तत्पितुरेव साभा
पत्यस्य भारमिह वोढुमभून्नियुक्तिः।
स्वास्थ्येऽप्यसाधुनि स सङ्गरभूमिकाया-
मुत्साहपूर्वकमवातरदत्र सम्यक् ॥ ७२ ॥

सञ्चालने च बलशालिनि शासनेऽभूदा-
न्दोलनं प्रथमतोऽस्य विशेषलाभम्।
किन्त्वस्य शक्तिरपि संक्षयमाप भूयः
स्वास्थ्यं तदप्यतितरां विकृतं तदासीत् ॥ ७३ ॥

तर्ह्यागमन् पुलकदा वहुवृत्तपाशाः
शोभाप्रयाणखरयष्टिकठोरघाताः।
गोलीनिपात-बहुचर्चितनिग्रहेषु
चायोजितानि हरितालशतान्यभूवन् ॥ ७४ ॥

पेशावरीयदिवसो गढदेशघस्र
श्चायोजितौ तदितरेऽपि रणोत्सवाश्च।
वैदेशिकस्य किल वस्त्रमुखस्य वस्तु-
जातस्य तेषु दिवसेषु बहिष्कृतिश्च ॥ ७५ ॥

अश्रावि हन्त मयका मम वृद्धमाता
ग्रीष्मातपेऽपि विपणौ धरणां ददाति।
साकं तया मम कृशे मृदुले स्वसारौ
वैदेशिकीयवसनस्य विरोधमाप्ते ॥ ७६ ॥

तन्न्यस्तवन् मनसि तीव्रतरं प्रभावं
तच्चापि यत् कमलयापि कृतं तथेति ।
तस्माच्च साधिकमपि व्यथितेति शृण्व
न्नाश्चर्यमन्तरदधां हृदि तां विचिन्वन् ॥ ७७ ॥

जानामि तामहमहो बहुवर्षकाला-
त्सज्जां प्रयागनगरेऽपि च मण्डलेऽपि ।
शक्त्यानया च निजनिश्चयतश्च सेय
त्कार्यं करोति तदभून्मम विस्मयाय ॥ ७८ ॥

स्वास्थ्यं पतन्न हि समीक्षितमातपे सा
सर्वं दिनं भ्रमति हन्त निदाधकाले ।
सा योग्यतां प्रथयतिस्म च संघटय्य
स्वाधीनतासमरवीरगणांश्च भूयः ॥ ७९ ॥

वृत्तं तु किञ्चन मया श्रुतमेतदीयं
कारास्थितेन तदनन्तरमागतेन ।
पित्राऽभ्यधायि कमलाकृतकार्यजातं
प्राशंसि सङ्घटनशक्तिरथापि तस्याः ॥ ८० ॥

मातुश्च मे खरतरातपसम्भ्रमंतं
स्वस्रोश्च नासहत हन्त पितास्मदीयः
वाङ्मात्रतः क्वचिदिमाः प्रतिषेधति स्म
रुद्धाः कदाचिदपि ता न हि तत्प्रभावात् ॥ ८१ ॥

प्रारम्भिकेषु दिवसेषु च यानि वृत्ता-
न्यत्रागतानि किल तेषु महत्त्वभाञ्जि ।
अप्रैलमासि घटना घटितात्र याऽभू-
त्पेशावरेऽथ सकलेऽप्यनुसीमप्रान्ते ॥ ८२ ॥

पाठानका हि निजसाहसतः प्रसिद्धाः
शान्तिस्वभावविषये न तु विश्रुतास्ते ।
एतैर्निदर्शनमिदं प्रथितं तु हिन्दु-
स्थानेऽद्वितीयमितरे पुनरन्वकार्षुः ॥ ८३ ॥

वीरैरिहैव गढदेशसमागतैस्तै
नि:शस्त्रलोकनिचये न कृत: प्रहार:।
गोलीप्रचारविनिदेशमिमे स्वभर्तु-
र्नापालयन् प्रतिहता किल तैस्तदाज्ञा ॥ ८४ ॥

वीरा हि नाम न कदापि निरायुधेषु
सम्मर्दवर्तिषु जनेषु नियुञ्जतेऽस्त्रम्।
तेषां तु तै: सह सहानुभवो यथाभूद्-
देश्यै विदेशसरकारतिरस्कृतिश्च ॥ ८५ ॥

जानन्ति सैन्यनियमान्न तथा चरन्ति
सामान्यत: परमिमे सनिदेशभङ्गा:।
भङ्गाग्रहेण चलतेव बलान्नियुक्ता
निर्यास्यतोऽस्य ब्रिटिशस्य भयान्न चेलु: ॥ ८६ ॥

एषां यदा तु हृदये प्रभुशासनस्या
स्तित्वेन निश्चितिरुदेति तदा तु तेषाम्।
जागर्ति कश्चन सहानुभवो निजेच्छा
ताभ्यां वशीकृतहृदो मृदु ते चरन्ति ॥ ८७ ॥

कैश्चिद्दिनै: समुदितोऽभवदेष भावो
यत्साम्प्रतं ब्रिटिशशासनमस्तमेति।
सप्ताहकै: सविनय: खलु भङ्ग एष
प्रोन्मूलितं ब्रिटिशशासनमूलमाह ॥ ८८ ॥

सैन्येष्वपि प्रववृते यदयं विचारो
नाभूत् स्थिरश्चिरमसंगतिदर्शनेन।
आसन्नभाविसमये न भविष्यती-
दमित्युद्गते स्थिरमभूदनुशासने तत् ॥ ८९ ॥

पश्चादिदं त्ववहितं नहि पूरुषाणां
चित्ते द्विधा स्थितिरियं न कृतास्पदा स्यात्।
तत्राभवन् बहुविधा किल विस्मयाढ्या
वार्ता:, स्त्रियोऽपि समरेऽवतरन्ति ता: स्म ॥ ९० ॥

ता निर्गता बहिरहो न हि यद्यपीहा-
भ्यासोमनागपि न विश्वजनीनकार्ये।
वैदेशिकानि वसनानि च मद्यकानि,
विक्रीणतां विपणिषूद्धरणामदुस्ताः ॥ ६१ ॥

सवषु हन्त नगरेषु च केवलानां
शोभाप्रयाणमुदगान् महिलाशतानाम्।
प्रायः स्त्रियश्च पुरुषानतिशेरतेस्म
दार्ढ्येऽभवन्नपि च ताः पुनरेकतन्त्राः ॥ ६२ ॥

नैकञ्च ता लवणभङ्गमकार्षुरेतं
यावत्परत्र विनयेन विधानभङ्गान्।
लार्डेविनः समदिशत्प्रतिबन्धमन्यं
तेनापि कार्यकरणे बहु साह्यमाप्तम् ॥ ६३ ॥

वृद्धाश्च ते किल यथा च यथाऽप्यभूवन्
भङ्गे तथैव च तथावसराः प्रवृद्धाः।
भङ्गस्वरूपमिदमेव ततोऽत्र जातं
यद्यन्न्यषिध्यत तदेव जना अकुर्वन् ॥ ६४ ॥

प्रारम्भिकोऽभवदमुष्य तु सूत्रपातः
कांग्रेसतत्पुरुषयोः करमात्रगामी।
एकेन नोद्धृतमनेकनिदेशजालैः
संसाधितुं प्रयतते स्म स सर्वकारः ॥ ६५ ॥

कांग्रेसकार्यसमितेश्च सभासदस्ते
प्राप्ता विनिग्रहमथो नवला नियुक्ताः।
इत्थं निरन्तरमिदं कुरुते स्म कार्यं
सर्वत्र चाचरति सर्वनिदेशभङ्गम् ॥ ६६ ॥

आदेशभङ्गविनिदेशनपालनान्य-
त्याश्चर्यकारकतया प्रतिपालितानि।
पत्रप्रकाशननिदेशनमेव सम्यङ्-
नाभूत्प्रपालितमिति त्रुटिरत्र सासीत् ॥ ६७ ॥

यन्मुद्रणालयनियन्त्रणया तदिष्टं
यच्चापि तत्प्रतिभुवो धनराशिरिष्टः।
काँग्रेसमत्र धनराशिनिदेशभङ्गं
पत्रप्रकाशननिरोधमथादिशत्तान् ॥ ९८ ॥

तद्दुष्करं समय एष हि वृत्तदाना-
त्तद्वृत्तपत्रधनलाभकरोऽयमासीत् ।
तत्रापि नम्रदलपत्रमभून्निरुद्धं
जातं फलं ततमभूदपवादलक्षम् ॥ ९९ ॥

तेन स्थितश्चिरमिहास्त महान् प्रलोभो
व्यापारमाहरत सोष्मदलं किलैषाम्।
तत्पश्यतां मनसि खेदभरोऽभवत्तद्
भूयः प्रकाशनमुपाक्रमतापि पत्रम् ॥ १०० ॥

मेमासपञ्चमदिने स च गान्धिराप्तो
दुर्निग्रहं तदिह सिन्धुतटे स्थितानि।
यन्त्राणि तानि लवणस्य च सञ्चयार्थं
कोष्ठान्यवापुरखिलानि दुराक्रमोधम् ॥ १०१ ॥

यत्राऽऽस्त निर्दयतया पुरुषैः कृतानां
क्लेशात्मनामतिशयो घटनाक्रमाणाम्।
यष्टिप्रहारहरतालसमूहयात्रा-
कार्यक्रमैरिह च मोहमयी प्रसिद्धा ॥ १०१ ॥

यष्टिप्रहारक्षतविक्षतसञ्चिकित्सा
हेतोश्चिकित्सितपदानि कृतान्यभूवन्।
अन्या अपीह बहवोऽतिमहत्त्वशीला
वार्ताः प्रकाशनपदानि च भूर्यभूवन् ॥ १०२ ॥

ग्रामेषु चात्र बहवोऽप्यभवन् प्रयत्नाः
ये न प्रकाशपदवीमुपयातवन्तः।
जूनान्ततो मम पितापि गतोऽत्र मुम्बा-
देवीपुरं कमलया सहितोऽथ मात्रा ॥ १०३ ॥

यन्मुद्रणालयनियन्त्रणया तदिष्टं
यच्चापि तत्प्रतिभुवो धनराशिरिष्टः ।
काँग्रेसमत्र धनराशिनिदेशभङ्गं
पत्रप्रकाशननिरोधमथादिशत्तान् ॥ ९८ ॥

तद्दुष्करं समय एष हि वृत्तदाना-
त्तद्वृत्तपत्रधनलाभकरोऽयमासीत् ।
तत्रापि नम्रदलपत्रमभून्निरुद्धं
जातं फलं ततमभूदपवादलक्षम् ॥ ९९ ॥

तेन स्थितश्चिरमिहास्त महान् प्रलोभो
व्यापारमाहरत सोष्मदलं किलैषाम् ।
तत्पश्यतां मनसि खेदभरोऽभवत्तद्
भूयः प्रकाशनमुपाक्रमतापि पत्रम् ॥ १०० ॥

मेमासपञ्चमदिने स च गान्धिराप्तो
दुर्निग्रहं तदिह सिन्धुतटे स्थितानि ।
यन्त्राणि तानि लवणस्य च सञ्चयार्थं
कोष्ठान्यवापुरखिलानि दुराक्रमौधम् ॥ १०१ ॥

यत्राऽऽस्त निर्दयतया पुरुषैः कृतानां
क्लेशात्मनामतिशयो घटनाक्रमाणाम् ।
यष्टिप्रहारहरतालसमूहयात्रा-
कार्यक्रमैरिह च मोहमयी प्रसिद्धा ॥ १०१ ॥

यष्टिप्रहारक्षतविक्षतसच्चिकित्सा
हेतोश्चिकित्सितपदानि कृतान्यभूवन् ।
अन्या अपीह बहवोऽतिमहत्त्वशीला
वार्ताः प्रकाशनपदानि च भूर्यभूवन् ॥ १०२ ॥

ग्रामेषु चात्र बहवोऽप्यभवन् प्रयत्नाः
ये न प्रकाशपदवीमुपयातवन्तः ।
जूनान्ततो मम पितापि गतोऽत्र मुम्बा-
देवीपुरं कमलया सहितोऽथ मात्रा ॥ १०३ ॥

सर्वं परिच्छदमबन्धयदत्र यातुं
स्नेहात्तु तत्र न गतोऽनवलोक्य सोऽस्मान् ।
प्रस्थानतः प्रथमवासर एव नैनी-
केन्द्रीयवन्दिगृहमेत्य स मामपश्यत् ॥ १११ ॥

संस्कृते चलचित्रगतगीतानुकृतिगीतोच्चयं
यः किलारचयन्महान्तं तेन रचिते चारुरुचिके ।
श्रीजवाहरलालनेहरुचरितकाव्ये सर्गं ऊन-
त्रिंशकोऽवसितोऽस्ति राष्टपिता च मत्कपितेतिनामा ॥

नैनीकारागारे वासः

शालिनी

त्रिंशः सर्गः

नैनीकारागारवासं प्रपन्नः सप्ताब्दस्यानन्तरं भूय एषः ।
तत्रत्यं तज्जीवनं विस्मृतं मे किंचित्किंचित्प्राप संस्कारमात्रम् ॥१॥
केन्द्रीयेऽस्मिन् रक्षितो बन्दिगेहे यत्प्रान्तेऽस्मिन् विश्रुतं गौरवेण ।
अत्रैकाकी वासमेषोऽन्वभूवमासीद्भिन्नो मे चतुष्कश्चतुष्कात् ॥२॥
यस्मिन् भूयांसः सहस्रद्वयात्तेऽवात्सुः केचिद्बन्दिनोऽन्ये मदन्ते ।
अस्मिन् गोलाकारयुक्ते चतुष्के भित्तेरन्तर्मृत्तिकावर्णगेहे ॥३॥
कोष्ठान्यासन्यान्यभद्राणि नूनं संकीर्णाऽभूद्वीथिरेषां चतुर्णाम् ।
मध्यादास्तां द्वे मदर्थं सुगुप्ते अन्योन्यं ते संगते तावदास्ताम् ॥४॥
एकं त्वासीत्स्नानशौचादि कर्तुं त्वन्यद्वासं कर्तुमेकान्ततश्च ।
कोष्ठद्वन्द्वं चाभवत्तत्र रिक्तं कञ्चित्कालं तत्तथैव स्थितञ्च ॥५॥
विक्षोभस्यानन्तरं बाह्यकस्य धावं धावं चाद्य यावद्व्यतीतात् ।
पश्चादस्माज्जीवनादन्वभूवम् तस्मिन्नेकान्तं तथोदासभावम् ॥६॥
श्रान्तश्चाहं तावदासं यथाहं घस्रान् द्वित्रान् गाढनिद्राण आसम् ।
ग्रीष्मर्तुप्रारम्भहेतोश्च रात्रौ बाह्ये कोष्ठात्कोष्ठभित्त्यन्तराले ॥७॥
संकीर्णेऽपि व्यात्तभागे सुषुप्त्यै प्राप्तादेशोऽभूवमित्यस्ति चित्रम् ।
पर्यङ्को मे श्रृङ्खलाभिर्निबद्धो मन्ये नीत्वा तं न यायां कुतश्चित् ॥८॥
सोऽयं भित्तिं वाधिरोढुं कदाचित् सोपानत्वं नापितः स्यान्मयेति ।
रात्रौ श्रूयन्ते स्म नादा विचित्रा ते भित्तीनां यामिका यान् ब्रुवन्ति॥९॥
दीर्घान् शब्दान् जातु ते घोषयन्ति ये तत्रान्ते तीव्रवायोरिवार्ताः ।
हाहाकारा भान्ति पीडासमुत्थाः कोष्ठाभ्यन्तर्यामिका नामजस्रम् ॥१०॥
उच्चैरुच्चैर्वन्दिनः स्वान् सशब्दं संख्यायन्तः साधु तान् निर्णयन्ति ।
रात्रौ कश्चिच्चाधिकारी चतुष्केऽस्माकं भ्राम्यन्पृच्छतीवान्यवृत्तम्॥११॥

दूरे त्वासीन्मच्चतुष्कं चतुष्कादन्यस्माद्यत्तेन तन्न श्रुतं मे ।
नैवाजानां किं तदस्तीति पूर्वं पूर्वं त्वाभादस्मि यत् काननान्ते ।।१२।।
स्वक्षेत्रेभ्यो वन्यजन्तून्निरस्यन् चीत्कुर्वन् स्याद्वा कृषीकारवर्गः ।
आरण्या वा जन्तवोऽरण्यसंगाः संगीतं गायन्त्यमी मुक्तकण्ठम् ।।१३।।
मन्ये चेदं ध्यानमेवास्ति मे यद् गोलाकारा भित्तयो बन्दिगेहे ।
रुद्धान् वन्दित्वाभिमानेन युक्तान् कर्तुं तावन्नो चतुष्कोणरूपाः ।।१४।।
तासां कोणानामभावेन तेषां वक्रत्वानां चाप्यभावेन भूयान् ।
दान्तव्याः स्मो गोलचक्रेऽत्र नूनमित्याध्यानात्स्मर्यते वन्दिभावः ।।१५।।
आकाशाख्ये संवसन् वन्दिवर्गस्तस्मिन्नीलेऽल्पे विताने स्थितोऽयम् ।
उद्यन्नानामेघखण्डे निजानामूर्मीणामालोकते राजतीं भाम् ।।१६।।
आकाशे चार्द्रां सतृष्णां च दृष्टिं विन्यस्यापि स्वां निशं यापयामि ।
एषा भित्तिस्तावदावेष्टयन्ती कूपे मग्नोऽस्मीति साऽबोधयन्माम् ।।१७।।
तारापूर्णः कश्चिदाकाशभागो यावान् दृश्यस्तावदाभात्स मिथ्या ।
भातिस्मायं कृत्रिमस्तारकाणां कश्चिद्भागः क्वापि दृष्टान्तरूपः ।।१८।।
मत्कोष्ठं वा मच्चतुष्कं समग्रे कारागारे भण्यते श्वानगेहम् ।
तन्नामेदं प्राक्तनं तेन नासीत्कश्चिद्बद्धो नाभवद् बध्यमानः ।।१९।।
एतत्कोष्ठं वै लघिष्ठं पृथक्स्थं, दूरे रक्ष्याश्चात्र रक्ष्याः पृथक्त्वात् ।
भीमा भीष्मा वापि ये सापराधा इत्यर्थं नाभूत् पृथङ्निर्मितं तत् ।।२०।।
पश्चादेतद्राजनीतौ गृहीतान् बन्दीभूतान् बद्धदृष्टींश्च रोद्धुम् ।
आसीद्ग्राह्यं तत्प्रयोगेऽपि कृत्स्ने कारागारे ये पृथक् स्थापनीयाः ।।२१।।
दूरे चास्मान्मच्चतुष्काच्च किञ्चित् वस्तु न्यस्तं यद्विलोक्यापि दूरात् ।
चेतो घातं प्राप्नुवन्मे तदासीन्नूनं दीर्घं पञ्जराभं भ्रमार्थम् ।।२२।।
पश्चाज्ज्ञातं यन्त्र आसीत्स कश्चित् यत्ते लोकाश्चालयन्ति स्म युक्ताः ।
तस्मिन्नेकस्मिन्क्षणे षोडशैव युज्यन्ते ते पुरुषा एकवारम् ।।२३।।
दर्शं दर्शं तन्ममाभ्यस्तमासीत् प्रत्याभात्तन्मूर्खतामात्रमेकम् ।
मानुष्यास्तत्रास्त शक्तेः प्रयोगः सोऽयं वन्योऽसभ्यवर्गप्रयोज्यः ।।२४।।
तत्पार्श्वेनोपैमि चाहं यदापि स्मृत्यामाभातीदृशो मे तदायम् ।
कालं कञ्चिन्नाप्तवन्निर्गमं तद् व्यायामार्थं वा निमित्तान्तरेण ।।२५।।

पश्चात्प्रातश्चान्धकारेऽपि ह्योरामर्धांमस्मि क्वापि निर्गन्तुमर्हः ।
आधृत्याहं भित्तिमन्तर्भ्रमाय प्राप्तोऽस्म्याज्ञां धावनायापि तत्र ।।२६।।
एष प्रातःकाल एवात्र मह्यम् तैराज्ञप्तो येन नान्यैर्मिलामि ।
तेन प्रातः पर्यटन्नस्मि नव्यं भव्यं चागां स्वास्थ्यमन्तः शरीरे ।।२७।।
अस्मिन्नल्पे काल एवाधिकस्य व्यायामस्य प्राप्तये धावितोऽस्मि ।
एषोऽभ्यासो वर्धितोऽभूत्क्रमेण क्रोशं यावच्चैष धावामि नित्यम् ।।२८।।
प्रातः शीघ्रं तच्चतुर्वादने वा तस्मात्पूर्वं च प्रबुद्धो भवामि ।
शीघ्रस्वापादप्यभूच्छीघ्रबोधस्तेजोऽभावात्तत्र नाहं पठामि ।।३०।।
तारादृष्टी रोचते सा स्म मह्यं तद्दृष्टया चाप्येष कालं मिनोमि।
स्वप्नस्थानादूर्ध्वमेव ध्रुवो मे नोचैः पश्यन् भित्तितः स्मैष भाति।।३०।।
शान्तिं काञ्चिद्यामि तद्दर्शनेन ताराश्चैनं पर्यटंत्येव शश्वत् ।
स स्वस्थाने निश्चलस्तिष्ठतीति प्रीतेरुद्योगस्य सोऽभूत्प्रतीकः ।।३१।।
मासं यावन्नाभवत्कोऽपि सार्थो नत्वेकाकी किन्तु तत्राप्यभूवम् ।
तस्याध्यक्षाः पाचकाः शोधकाश्च सर्वेऽप्यासन् मच्चतुष्के भ्रमन्तः ।।३२।।
जात्वेवायन् वन्दिनः कार्यहेतोः प्राधान्येनायात् स कन्विक्तनामा।
वास्त्वारम्भी दीर्घकालेन दण्डं भुञ्जानोऽन्ये चापि चाजन्मदण्ड्याः।।३३।।
साधारण्येनात्र चाजन्मदण्डो विंशत्याल्पैर्वास्ति वर्षैः स भोग्यः ।
कारागारेऽस्मिन्मया विंशतेरप्याधिक्येनासन् वसन्तस्तु दृष्टाः ।।३४।।
स्कन्धे वस्त्रस्यान्तरे लग्नकाष्ठा नैन्यां दृष्टा वन्दिनो लक्ष्यभूताः ।
यत्रैतेषामङ्क्यते दण्डक्लृप्तिः साक्षाच्चैषां लिख्यते मुक्तिकालः ।।३५।।
कश्चिद्वन्दी त्रिंशवर्षेऽर्द्धबृद्धस्तत्पट्टेऽभूत्षण्णवत्यां विमुक्तिः ।
मन्येऽनेकैर्युक्तदण्डैः स बद्धः षट्षष्ट्यब्दैर्भोग्यदण्डः किलासीत् ।।३६।।
व्यत्येत्यब्दानां शतं जन्मवन्दी कञ्चिद्बालं वा स्त्रियं वाप्यदृष्ट्वा ।
यात्यस्माद्वै लोकतोऽदृष्टजन्तुर्मानुष्यात् किं त्रुटयते लोकबन्धात् ।।३७।।
चेतोऽन्तस्तैर्घुट्यते त्रुटयते च मस्तिष्के तैर्भीतिविद्वेषरोषैः ।
पूर्णाश्चैते तत्प्रतीकारभावैः श्रेयः प्रेयश्चात्मनो विस्मरन्ति ।।३८।।
दोषेष्वेवाजीवनं धारयन्तो मन्दंमन्दं त्यक्तविद्वेषवैराः ।
यन्त्राणीव प्राप्तजाड्याः स्वकालं नो जानन्तो हन्त ते यापयन्ति।।३९।।

तेषां सर्वे वासराः सोमभौमेत्याद्याः साम्येनैव निर्यान्ति सर्वे ।
एका भीतिश्चान्तरा भावनानां काचित्तेषां नैति चित्ते न बुद्धौ ॥४०॥
काले काले वन्दिनो यत्तुलाभिस्तोल्यन्ते वा मानयन्त्रैर्ध्रियन्ते ।
मस्तिष्के वा मानसे शुष्यमाणामत्याचारैर्मूच्छितां भावनां किम् ॥४१॥
तेषां कश्चित्तोलयित्वाभ्युपायं कञ्चित्कर्तुं किं कदाचित्स्थितः स्यात् ।
युक्तीः काश्चिन्मृत्युपक्षाद्विरुद्धाः प्रस्तुन्वन्ति प्राज्ञवर्गाः प्रिया मे ॥४२॥
कारागारे सङ्कटाकीर्णमेतत् दीर्घं दृष्ट्वा जीवनं चिन्तयामि ।
घोलं घोलं मारणात्प्राणदण्डः सद्योमृत्युं वन्दिनां किं न कुर्यात् ॥४३॥
एत्यापृच्छत्कोऽपि मां जन्मवन्दी किं स्यादस्माकं विनिग्राहितानाम् ।
किं नामेदं नः स्वराज्यं कदाचित्स्यादुद्धर्तास्मात्स्थलान्नारकीयात् ॥४४॥
के चाप्येते वन्दिनो जन्मना स्युस्तेषामेके स्युः समूहापराधात् ।
यत्रैवास्मिन् पञ्च-पञ्चाशदाद्याः सामूहिक्यावस्थया दण्डिताः स्युः ।
कश्चित्केचिद्वा सदोषा भवन्ति प्रायेणैषां वस्तुतः संशयेऽहम् ।
तेषामीदृक्षाभियोगे निपातो नो दुर्वारः साक्ष्यसंवेदनाभ्याम् ॥४६॥
वर्धन्तेऽमी स्तेयदोषा इदानीं कारागारावासवृद्धिश्च वर्षैः ।
लोकाः क्षुद्भिः पीड्यमानाः समन्तात् किं वा कुर्युर्वर्महीनाः स्वहीनाः ॥४७॥
निन्दन्त्येते यावदात्मापराधात् किं न्वेषां दृग् याति नैवार्थहेतौ ।
एतेभ्योऽन्ये कर्षका अप्युपेता भूखण्डे ते युद्धमभ्याचरन्ति ॥४८॥
उद्यम्यन्ते यष्टिकास्तत्प्रहारा नो सह्यन्ते ते ध्रियन्ते मनुष्याः ।
कारागारेऽन्ये लभन्ते प्रवेशं तस्मिन् दीर्घां वन्दितां ते भजन्ते ॥४३॥
एकस्यैवानेकलोका गृहस्य वन्दीभूताः, शिष्यते नारिवर्गः ।
यत्तत्कृत्वा निर्वहन्ते पुनस्ताः पुंसामेषां कोऽपि नो भाति दुष्टः ॥५०॥
प्रत्येकं ह्येतेषु चित्ते शरीरे स्वस्थो ग्राम्यादुत्थितो जीवनाच्च ।
यद्येते स्युः शिक्षिताः किञ्चिदेव प्रत्यावृत्ता स्याद्रुचिश्चाप्यमीषाम् ॥५१॥
देशस्यैते सम्पदः स्युर्युवानः दारिद्र्यं तज्जं हरेयुः प्रयत्नैः ।
हिन्दुस्थाने सन्ति पक्वापराधा अप्येतस्मिन्ये समाजं द्विषन्ति ॥५२॥
एके जायन्ते नितान्तं भयार्त्ता नैवं भूताः सर्व एवेति जाने ।
कारागारे बालका वा युवानः प्रौढा वा ते सन्ति दृष्टा मयापि ॥५३॥

ये प्रायेणैवाभवन् सज्जनानां दृष्टान्तास्ते, येषु विश्वासमेमि ।
तषां दोषादोषयोः कोऽनुपातस्तं विज्ञातुं कोऽपि नाभ्येति यत्नम् ।५५।।
न्यूयार्कस्थे सिङ्गसिङ्गेतिकारागारेऽध्यक्षः श्री लुई लीतिनामा ।
अङ्कान् दत्तेऽसौ मनोरञ्जकान्यैः पञ्चाशत्स्युर्नैव दोषैकजीवाः ।।५६।।
वैवश्येनैते भवन्तीह दुष्टास्तेषां यत्ना नो समाजस्य योग्याः।
ज्ञातं चैतद् दोषवृत्तिर्विशेषात् गाढावासे नूत्नसभ्यत्वकेन्द्रे ।।५७।।
दोषाजीवाः सन्त्यथामेरिकायां कारागारः सिंगसिगा प्रसिद्धः ।
भीमा भीष्माः प्रेषितास्तत्र नित्यं प्रोक्तं तेषां पूर्वतः प्रातिशत्यम् ।।५८।।
हिन्दुस्थाने चानुपातोऽयमल्पः नीत्यामार्थिक्यामथो संस्कृतायाम् ।
आजीवश्चेत्प्राप्यतामत्र भूयान् शिक्षापि स्यात्तर्हि निर्यान्तु दोषाः ।।५९।।
कारागारा भारते रेचिताः स्युस्तन्मौलिक्या योजनायाः फलं स्यात् ।
अस्यामस्माकं समाजव्यवस्था सर्वाप्येषा स्यात्परीवर्तनीया ।।६०।।
अस्मादन्यश्चाभ्युपायोऽयमास्ते कुर्वन्नास्ते तं ब्रिटिश्शर्वकारः ।
सङ्ख्यावृद्धिः पूरुषाणां च बन्दिगेहानाञ्चाप्यत्र क्लृप्तिर्नवीना ।।६१।।
हिन्दुस्ताने वन्दिगेहेषु लोकाः संप्रेष्यन्ते संख्यया वा ययामी ।
धत्ते दृष्ट्वा तां ठणत्कारमन्तर्हाहा ! घोरोऽन्याय आस्ते जनेषु ।।६२।।
मन्त्री ब्रूते बन्दिसाहाय्यगोष्ठ्यास्त्रायस्त्रिंशेऽब्देऽत्र मुम्बादिपुर्याम् ।
लक्षञ्चाष्टाविंशतिः सा सहस्राणामासीद्या बन्दिसंख्याऽखिलेति ।।६३।
बङ्गे लक्षं तत्त्वसंख्यासहस्राण्यासन्नेते वन्दिनः प्रान्तयुग्मे ।
कृत्स्ने देशेऽनेन कृत्वानुमानं जाने लक्षाणां दशैते स्युरेव ।।६३।।
नैवा संख्या सर्वदा वन्दिगेहे रुद्धानां स्याद् वन्दिता ह्यल्पकाला ।
सङ्ख्या स्वल्पा स्थायिनां भावनीया सत्यप्येवं सास्ति संख्या न लघ्वी।
हिन्दुस्थाने वै विशालास्पदेषु कारागाराः सन्ति केचिद्विशालाः ।
युक्तप्रान्तस्यास्ति तद्गौरवाप्तिश्चेन्नामैतद् गौरवं स्वीकृतं स्यात् ।।६।।
अत्रैवासोदस्ति वा विश्ववन्दिगेहेभ्यो वै कुप्रबन्धातिरेकः।
वन्दो व्यक्तिर्मानवः प्राणवांश्चैतत्संस्कारस्यात्र यत्नो विधेयः ।। ६५ ।।
ईदृक्कश्चित्कुत्रचिद् वा विचारो युक्तप्रान्ते कस्यचिन्नाभ्युदेति।
बन्दीभावो मा स्मभूत्कश्चिदित्याख्यातं युक्तप्रान्तवैशिष्ट्यमेकम् ।।६६।।

युक्तप्रान्ते बन्दिभिर्नैष यत्नः प्रारभ्येताथो कृतार्थो नहि स्यात् ।
यत्नं कुर्वन्नेक एवात्र कश्चित् साहस्रेषु स्याद्वशन्नेव भग्नः ॥६८॥
कारागारेऽत्यन्तदुःखक्रमोऽयं यद्रुध्यन्ते बालकाः पाञ्चदश्याः ।
प्रायश्चैते तैजसाश्च प्रवीणाः संस्कार्याः स्युः प्राप्तकालाः सुखेन ॥६९॥
कालात्कस्माच्चित्तदध्यापनादेरारम्भे कैश्चित्कृतो वन्दिगेहे ।
किन्त्वेतत्सर्वात्मना व्यर्थमल्पं वेला खेलादेरपीहास्ति काचित् ॥७०॥
एषामग्रे नैति यद्वृत्तपत्रं नैवाप्येते पुस्तकं वा पठन्ति ।
विष्कम्भान्तर्यापयन्ते दिनार्धम् दीर्घाः सन्ध्याः कर्मशून्या नयन्ति ।
संलापांस्ते प्राप्नुवन्ति त्रिमासात् पत्रालापं चापि तत्रैव काले ।
सेयं सीमाऽमानवी क्लिष्टरूपा केचिल्लाभं नामुतोऽपि प्रयन्ति ॥७२॥
सन्त्येवैते प्रायशश्चानधीता पत्राण्येते लेखयन्ति प्रभुभ्यः ।
ते स्वं कार्यं नातिविस्तारयन्ति तल्लेखांस्ते भाविगर्भे क्षिपन्ति ॥७३॥
पत्रे प्रायः साधु नो लिख्यतेऽस्मिन् नैवोपेति स्थानमेतद् बहुत्वात् ।
साक्षात्कारो दुष्करः सर्वथैषाम् तस्मै कस्मैचित्प्रदेयं हि किञ्चित् ॥७४॥
एकस्मादेतेऽन्यकारागृहेषु प्रत्यावृत्ता यान्ति चायान्ति वर्षात् ।
तेषां गृह्या नाभिजानन्ति तेषां स्थानं तस्मात्पत्रतो नास्ति योगः ॥७५।
दृष्टाः केचिद्वन्दिनोऽपीदृशा मे संपर्कं ये नाप्तवन्तः कुटुम्बैः ।
वर्षैरेके ज्ञातवन्तोऽपि नैते किंवा तेषां जातमस्मद्वियोगे ॥७६॥
त्रिभ्यो मासेभ्यः परं ते मिलन्तः काञ्चिन्नव्यामेव लब्ध्वानुभूतिम् ।
वार्तालापे सर्व एवैकदैव लोहाधारे सम्मुखस्था रमन्ते ॥७७॥
तैरन्योन्यं भाष्यते तारतारम् एतैर्नैषां मानवीयोऽपि सङ्गः ।
यो वै कश्चित्सम्भवोऽप्यस्ति सोऽपि नो जातः स्यात्स्नेहबन्धानुरूपः ।७८
कस्याप्येकस्यैव तेषां सहस्रे भोज्यं स्वादिष्टं च सम्मेलनञ्च ।
पत्रालापोऽप्यञ्जसेत्यादि नानासौविध्यं स्यात्प्राप्तमित्यस्ति सत्यम् ७९
लक्षं लक्षं वन्दिनो राजनीतेः कारागारे संविशन्ते यदा ते ।
तर्ह्येतेषां वन्दिनां कापि संख्या वृद्धापि स्यादल्पिकैवोत्तमानाम् ॥८०॥
स्त्रीपुंसाभ्यां राजनीत्यापि बन्धे पञ्चोद्रिक्ताभ्यां विशेषो न कश्चित् ।
नैवैताभ्यां सौविधी दीयतेऽत्र तौ सामान्यैर्वन्दिभिः साकमास्ताम् ॥८१॥

पित्रे नैवारोचतेदं—तत्रानीयापि गान्धिना ।
न साक्षात्कारणं नूनं तापनं पीडनं हि नः ॥ ५३ ॥
त्रयोदशे दिने ज्ञातं सप्रूजयकराविह ।
समागतौ स गान्धिश्च ताभ्यां साकं स्थितोऽधुना ॥ ५४ ॥
काराकार्यालये युष्मान् सर्वानप्याह्वयन्त्यमी
पिता नानुमतो, वन्दिगेहाध्यक्षास्तदा बहून् ॥ ५५ ॥
विनयांश्चाप्यनुनयानकार्षुश्चाक्षमापयन् ।
तदा निर्णीतमेकान्तेऽस्माभिः श्रीगान्धिदर्शनम् ॥ ५६ ॥
पश्चात्सर्वानुरोधेन सरदारः पटेलकः ।
जयरामदासोऽस्माभिर्नायडूश्चाप्यवर्तत ॥ ५७ ॥
तस्यां निशि पिता चाहं महमूदश्च कोष्ठके ।
श्रीगान्ध्यधिष्ठिते नीतास्तत्रैवावस्थितास्तदा ॥ ५८ ॥
पटेलो जयरामश्च सहास्माभिररक्ष्यताम् ।
यथा मिथः परामर्शोऽक्रियेत सुखतः समैः ॥ ५९ ॥
त्रयोदशात्पञ्चदशं यावदास्माकचिन्तनम् ।
सप्रूजयकराभ्यां तत्काराकार्यालयेऽचलत् ॥ ६० ॥
पत्रालापेन चास्माभिः स्वविचाराः प्रदर्शिताः ।
यस्मिन् न्यूनाः पणा दत्ताः पूर्तये भङ्गरोधनात् ॥ ६१ ॥
सहयोगे शासनस्य करणीये च ये स्थिताः ।
पश्चात्स पत्रसँल्लापो वृत्तपत्रैः प्रकाशितः ॥ ६२ ॥
पितुः शरीरेऽपकृतं वार्तालापेन तेन च ।
षोडशेऽगस्तमासस्य सोऽकस्माज्ज्वरितः परम् ॥ ६३ ॥
तेनावरुद्धमस्माकं प्रस्थानं, वयमन्ततः ।
एकोनविंशे निशि च प्रस्थिताः स्मो विशेषतः ॥ ६४ ॥
मुम्बापुरीसर्वकारो यात्रायां सर्वसौविधीम् ।
वन्दिगेहे यारवदे चावधत्ते स्म मत्पितुः ॥ ६५ ॥
यदा यरवदां प्राप्तास्तदा घटितमद्भुतम् ।
यन्न विस्मृतमद्यापि काराधिष्ठातृमार्टिनः ॥ ६६ ॥

कारागारौदास्यतो विग्नचित्ताः केचिद्दृष्टा वन्दिनः क्रन्दमानाः ।
ते वै बालाः कोमला गद्गदेन कण्ठेनास्मिन् क्रोशमाना भवन्ति ॥९६॥
तेषामास्यान्यल्पसंसात्वनानि यद्वै तेषां दुर्लभं सर्वथात्र ।
उत्फुल्लन्ते यत्कृतज्ञत्वभावाद् यच्चाप्युत्साहेन भास्वन्ति सन्ति ॥९७॥
सत्यप्येवं वन्दिनां मित्रताया औदार्यस्याप्यत्र नैके प्रसङ्गाः ।
दोषाजीवः कश्चिदन्धः कदाचिन्मुक्तो बन्धाद् द्वादशाग्रैस्तु वर्षैः ॥९८॥
गच्छन्तं तं प्रीयमाणास्तु सर्वे साहाय्येनाभ्यर्चितुं कामयानाः ।
कश्चित्तेषां चोलवस्त्रं स्म दत्ते अन्यस्त्वादादन्तरीयं स्वकीयम् ॥९९॥
तस्मिन्नेवाथो दिने प्राप्तमन्यः पादत्राणद्वन्द्वमस्मै ददाति ।
ज्ञातं कारागारकौदार्यमासीद् बाह्यौदार्यात्सर्वथैवातिरिक्तम् ॥१००॥
त्रिंशो वर्षः स्फूर्तिदाभिः कथाभिःसाश्चर्याभिश्चाप्यवस्थाविधाभिः ।
पूर्णोऽभूच्छ्रीगान्धिनाऽऽश्चर्यशक्त्या सर्वं राष्ट्रं स्फूर्तमुत्साहितञ्च १०१
गान्धौ काचिन्मोहनी शक्तिरास्ते स्मृत्यारूढं गोखलेप्रोक्तमासीत् ।
'गान्धेरग्रे मृत्तिकैवाञ्जनं स्याद्' इत्याख्यातं तेन सत्यं प्रियञ्च ।१०२।
शान्त्या पूर्णोऽसौ विनीतोऽपि भङ्गो राष्ट्रोद्देश्याऽऽपूर्तये विग्रहस्य ।
शस्त्रं चैतच्छास्त्रमप्येकमास्ताम् इत्येतत्तत्सत्यमद्य प्रतीतम् ॥१०३॥
देशे मित्राण्यप्यहो ! शत्रवोऽपि विश्वासं ते तुल्यमेवोपपन्नाः ।
साफल्यं प्रत्यस्मदुत्साहसिद्धिः सङ्क्रान्तेयं कर्मकारिष्वजस्रम् ॥१०४॥
सोऽभ्युत्साहः कश्चिदभ्यन्तरेऽपि कारागारस्य प्रविष्टः क्रमेण ।
सामान्यास्ते वन्दिनोऽप्येवमाहुरायात्येतन्नः स्वराज्यं समक्षम् ॥१०५॥
आशास्त्येषां स्यादमीषां च भद्रमातुर्येणाकुर्वते तत्प्रतीक्षाम् ।
वार्तालापं चापणस्यापि शृण्वन् काराध्यक्षोऽप्याशया संयुतोऽभूत् १०६।
पार्श्वे प्राप्तं तत्स्वराज्यं विदन्तः काराध्यक्षा निम्नगा अप्यभैषुः ।
तत्रास्माभिर्दैनिकं पत्रमेकमप्यानासाद्यानुभूतो विषादः ॥१०७॥
हिन्दीसाप्ताहिक्यपत्रेण तावद् वृत्तानि ज्ञायन्त इत्याश्रयोऽभूत् ।
वृत्तान्येतान्येव सत्कल्पनानामासन्पर्याप्तानि तूत्तेजनानि ॥१०८॥
नित्यं यष्टीनां प्रहारा अभूवन् गोलीकाण्डाः सैनिकन्यायवृत्तिः ।
राष्ट्रीयेणापि ध्वजेनाथ निर्यन् कश्चित्कारावासमाप्तो दशाब्दम् ।१०९॥

कारागारौदास्यतो विग्नचित्ताः केचिद्दृष्टा वन्दिनः क्रन्दमानाः।
ते वै बालाः कोमला गद्गदेन कण्ठेनास्मिन् क्रोशमाना भवन्ति ॥९६॥
तेषामास्यान्यल्पसंसात्वनानि यद्वै तेषां दुर्लभं सर्वथात्र।
उत्फुल्लन्ते यत्कृतज्ञत्वभावाद् यच्चाप्युत्साहेन भास्वन्ति सन्ति ॥९७॥
सत्यप्येवं वन्दिनां मित्रताया औदार्यस्याप्यत्र नैके प्रसङ्गाः।
दोषाजीवः कश्चिदन्धः कदाचिन्मुक्तो बन्धाद् द्वादशाग्रैस्तु वर्षैः ॥९८॥
गच्छन्तं तं प्रीयमाणास्तु सर्वे साहाय्येनाभ्यर्चितुं कामयानाः।
कश्चित्तेषां चोलवस्त्रं स्म दत्ते अन्यस्त्वादादन्तरीयं स्वकीयम् ॥९९॥
तस्मिन्नेवाथो दिने प्राप्तमन्यः पादत्राणद्वन्द्वमस्मै ददाति।
ज्ञातं कारागारकौदार्यमासीद् बाह्यौदार्यात्सर्वथैवातिरिक्तम् ॥१००॥
त्रिंशो वर्षः स्फूर्तिदाभिः कथाभिःसाश्चर्याभिश्चाप्यवस्थाविधाभिः।
पूर्णोऽभूच्छ्रीगान्धिनाऽऽश्चर्यशक्त्या सर्वं राष्ट्रं स्फूर्तमुत्साहितञ्च १०१
गान्धौ काचिन्मोहनी शक्तिरास्ते स्मृत्यारूढं गोखलेप्रोक्तमासीत्।
'गान्धेरग्रे मृत्तिकैवाञ्जनं स्याद्' इत्याख्यातं तेन सत्यं प्रियञ्च ।१०२।
शान्त्या पूर्णोऽसौ विनीतोऽपि भङ्गो राष्ट्रोद्देश्याऽऽपूर्तये विग्रहस्य।
शस्त्रं चैतच्छास्त्रमप्येकमास्ताम् इत्येतत्तत्सत्यमद्य प्रतीतम् ॥१०३॥
देशे मित्राण्यप्यहो ! शत्रवोऽपि विश्वासं ते तुल्यमेवोपपन्नाः।
साफल्यं प्रत्यस्मदुत्साहसिद्धिः सङ्क्रान्तेयं कर्मकारिष्वजस्रम् ॥१०४॥
सोऽभ्युत्साहः कश्चिदभ्यन्तरेऽपि कारागारस्य प्रविष्टः क्रमेण।
सामान्यास्ते वन्दिनोऽप्येवमाहुरायात्येतन्नः स्वराज्यं समक्षम् ॥१०५॥
आशास्त्येषां स्यादमीषां च भद्रमातुर्येणाकुर्वते तत्प्रतीक्षाम्।
वार्तालापं चापणस्यापि शृण्वन् काराध्यक्षोऽप्याशया संयुतोऽभूत् १०६।
पार्श्वे प्राप्तं तत्स्वराज्यं विदन्तः काराध्यक्षा निम्नगा अप्यभैषुः।
तत्रास्माभिर्दैनिकं पत्रमेकमप्यानासाद्यानुभूतो विषादः ॥१०७॥
हिन्दीसाप्ताहिक्यपत्रेण तावद् वृत्तानि ज्ञायन्त इत्याश्रयोऽभूत्।
वृत्तान्येतान्येव सत्कल्पनानामासन्पर्याप्तानि तूत्तेजनानि ॥१०८॥
नित्यं यष्टीनां प्रहारा अभूवन् गोलीकाण्डाः सैनिकन्यायवृत्तिः।
राष्ट्रीयेणापि ध्वजेनाथ निर्यन् कश्चित्कारावासमाप्तो दशाब्दम् ।१०९॥

इत्यायान्तिस्मात्र वृत्तानि कृत्स्ने देशे नारीषूदभूच्चाभिमानः ।
मातुः पत्न्या वा भगिन्यादिकानां कार्यैर्जातः कोऽपि सन्तोष आसीत्११०
यद्यप्याभ्यो दूर एवाहमासम् कारागारे किन्तु सान्निध्यमाप्तम् ।
एकं कार्यं कुर्वतां नूनमन्तः पार्श्वायातं ह्यश्नुतेऽभेदभावम् ॥१११॥
ह्रस्वो लीनो हन्त दीर्घे कुटुम्बे तन्माधुर्यं तत्र चापि व्यवस्थम् ।
आश्चर्ये मां पातयत्येव चेदं ह्यन्योत्साहोऽजीहरद्रोगमस्याः ॥११२॥
कंचित्कालं यावदेषा च भूयः कृत्वा कार्यं नीरुगेव स्थिताऽभूत् ।
बाह्याः संघर्षं भयं कुर्वतेऽमी सोढ्वा कष्टं चास्मि कारागृहस्थः ।११३॥
इच्छन्नासं वै बहिर्नास्मि शक्तो कष्टं काराजीवनं कर्मपूर्णम् ।
क्लृप्तं त्वासीत् चक्रचङ्क्रामणेन होरास्तिस्रः कृत्यते चापि सूत्रम् ।११४।
द्वे होरे चाहं वयाम्येव नित्यं नीवारं सासीन्मयाज्ञात्र लब्धा ।
कार्याण्येतान्यत्यरोचन्त मह्यम् नाभूदस्मिन् स श्रमो न क्लमश्च ॥११५॥
काले कार्ये लग्न इत्युत्सवेऽस्मिन् मस्तिष्कं मे विज्वरत्वं प्रयाति ।
भूयिष्ठं कालं नये पाठलेखे स्वच्छत्वे वासस्य वा वाससोऽहम् ॥११६॥
कारागारेऽहं श्रमं स्वेच्छयैवाकार्षं वन्दित्वं ममासीन्न तादृक् ।
इत्थं बाह्यं काण्डमाभ्यन्तरञ्च जानन्नैनीजेलकालं व्यनैषम् ॥११७॥
हिन्दुस्थाने वन्दितायाश्च शैली सेयं नाङ्ग्लाच्छासनादन्यथासीत् ।
तन्त्रं तस्यास्त्येव यत्सुव्यवस्थम् तस्मादेवास्याधिकारो दृढोऽस्ति॥११८॥
किन्त्वस्मिन् नैवास्ति चिन्ता विशेषात् मर्त्यानां संसाधनानां विकासे ।
साध्वी काराया व्यवस्थेति दृश्यमित्येषा तद्दृष्टिरस्त्येव सम्यक् ।११९।
अस्मद्देशे किन्तु कश्चित्कदाचित् कारालक्ष्यं व्यक्तिसंस्कारमेनम् ।
नो सन्धत्ते नावधत्ते जनानामात्मोद्धारे साधु साहाय्यदानम् ॥१२०॥
एषां ध्यानं केवलं व्यक्तिदान्तौ कारागारान्निर्गतः स्यादशक्तः ।
नष्टोत्साहः स्यात्तथेति प्रबन्धो वश्यत्वं चेदृक् च दण्डव्यवस्था ॥१२१॥
वन्दिष्वेवात्राधिकारिस्थलानां केचित्कार्यं निर्वहन्तीति दृष्टम् ।
भीत्या लोभाद् वोपहारस्य हेतोरेते सर्वे तत्सहाया भवन्ति ॥१२२॥
वृत्तिग्राहा ईदृशः सन्ति चाल्पाः कारागारान्तर्हि ते यामिकाः स्युः ।
मौखर्यं चात्र प्रभावान्वितं स्यात् पैशुन्यं मौखर्यमत्र प्रयोज्यम् ॥१२३॥

संयुक्ते कार्ये न ते स्युः प्रदिष्टा इत्यानायासं सुविज्ञातमस्ति ।
भिन्धिच्छिन्ध्येतांश्च संशाधि नित्यमित्येवासीन्नीतिराङ्ग्लप्रभूणाम् १२४
कारागारा(बाह्यदेशेऽपि शिष्टावेषैकैवास्पष्टरूपा प्रणाली ।
किन्त्वत्रैषां नाम भेदोऽस्ति भूयान् अत्युच्चे तन्नामरूपे किल स्तः ।।१२५।।
कारावच्चात्रापि निर्देशवर्तित्वाप्त्यै बाह्येऽपि प्रदेशेऽस्य पश्चात् ।
शस्त्रास्त्राद्या शक्तिरा रक्षिता स्यात् गोप्यं रूपं स्पष्टतामेति यस्याः १२६
राज्यानामेषामिदानीन्तनानां कारागाराः सन्ति भूयोव्यपेक्षाः ।
वन्दी लोकश्चिन्तयत्येतदन्तः कारा-सेना-पौरुषाद्यान्यपेक्ष्य ।।१२७।।
कार्याण्यन्यानि प्रबन्धात्मकानि तुच्छानीवाभान्ति वै शासनस्य ।
हस्ते शिष्टिर्यस्य तत्कामपूर्त्यै राज्यं सत्यो मार्क्ससिद्धान्त एषः ।।१२८।।
मासं यावत्कोष्ठमध्यासितोऽहमेकाकीति प्राप्तवाँस्तावदन्यः ।
सान्त्वं प्राप्तं नर्मदादिप्रसादेऽत्राभ्यायाते सार्धमासद्वयान्ते ।।१२९।।
अस्मत्कोष्ठे त्रिंशजूनेऽन्त्यधस्त्रे काचिज्जाता त्वस्तता व्यस्तता च ।
तत्राकस्मात्प्रातरानीयतास्मिस्तातः श्रीमान् सैयदश्चापि नेता ।।१३०।।
एतौ सुप्तावेव यद्विष्टरे स्वे सौख्येनाकस्माद् गृहीतावभूताम् ।
कारागारेऽस्मिन्निवासार्थमेतौ तस्याध्यक्षैः संनिवेश्यावभूताम् ।।१३१।।

कालिदासभवभूतियुगेऽभूत्कतरः करुणनिबन्धपटीयान् ?
इत्यालेखि बिचारसहोऽसौ येन स कोऽपि निबन्धविशेषः ।

तस्य कृतौ श्रीयुक्तजवाहरनेहरुचरितेकाव्ये त्रिंशः ।
सर्गो नैनीकारागारे वासाख्यो ऽवसितोऽस्ति स एषः ।।

यरवदायां सन्धिचर्चा

अनुष्टुप्

एकत्रिंशः सर्गः

पितुर्निग्रहणात्पश्चात्तेन वा सार्धमेव सा ।
अवैध्युद्घोषिता कार्यसमितिस्तत्र तत्क्षणम् ॥ १ ॥
तेन नूत्ना स्थितिरियं नूनमेवाभ्युपस्थिता ।
उपस्थिता हि समितौ सभ्याः स्युर्निग्रहं गताः ॥ २ ॥
सभापतिभ्यः सर्वेभ्यः कार्यवाहिभ्य एव ये ।
अदीयन्ताधिकारास्तेऽन्येभ्योऽप्येतानदापयन् ॥ ३ ॥
काश्चित् स्त्रियोऽपि चैतस्मिन्नयोज्यन्त तदा स्वयम् ।
कमलाप्यत्र सोत्साहं साभ्यायान्मम गेहिनी ॥ ४ ॥
कारागारेऽभ्यागतस्यातिमात्रं वै पितुर्मम ।
स्वास्थ्यं चिन्तास्पदमभूत्तर्हि विश्राममिच्छतः ॥ ५ ॥
ज्ञात्वा बुद्ध्वा नैव शिष्टिः स्थितिमेतामकारयत् ।
सा हि तत्कष्टनिर्वाणं कर्तुमासीत्समुत्सुका ॥ ६ ॥
नैनीकारागृहे नालं साभवत्कर्तुमत्र च ।
मच्चतुष्के च चत्वारो वयमास्म व्यवस्थिताः ॥ ७ ॥
अधिष्ठाताऽन्यत्र कोष्ठे विस्तृते पितरं मम ।
न्यविविक्षत किन्त्वेष प्रतिषेधकरोऽभवम् ॥ ८ ॥
अत्र ह्यस्मासु कोऽप्येकस्तं द्रष्टुमभवत् स्थितः ।
वर्षारब्धा तेऽच्यवन्त च्छदयः सर्वतो दिशम् ॥ ९ ॥
रात्रौ पितुर्विष्टरस्य प्रत्यहं स्म विचार्यते ।
अस्मत्कोष्ठस्य निकटेऽलिन्दे स्थाप्येत नन्विति ॥ १० ॥
दशपादायते तत्र पञ्चपादतते कुतः ।
स्थाप्यतां यत्र वर्षाम्बुपरिहारसुखं भवेत् ॥ ११ ॥

मध्ये मध्ये ज्वरेणापि पीड्यते स्म पिता मम ।
अन्ते कारागृहाध्यक्षैरलिन्दः कारितो नवः ॥ १२ ॥
नवेनानेन न पितुः कश्चिदर्थः स्म सिध्यति ।
तन्निर्माणात्परं ह्याशु व्यमुच्यत पिता मम ॥ १३ ॥
तदास्मासु स्थितास्तत्रोपयोगं तमनीनयन् ।
श्रुतं सप्रूजयकरौ सन्धियत्नं समाश्रितौ ॥ १४ ॥
जुलाईमास एव स्यात्कांग्रेसे चाङ्ग्लशासने ।
सन्धिरित्यस्माभिरासीदधीतं वृत्तपत्रके ॥ १५ ॥
यद्दीयते स्म मत्पित्रे सुविधार्पणभावतः ।
तत्र पत्रव्यवहृतिः पठिताभूदशेषतः ॥ १६ ॥
या इर्विने जयकरे जाता सप्रूमहाशये ।
पश्चाज्ज्ञातं शान्तिदूताविमौ गान्धिमपश्यताम् ॥ १७ ॥
न तु ज्ञातं यदनयोः किङ्कार्यं सन्धिनामुना ।
प्राप्तासीत्प्रेरणा ताभ्यां लघुव्याख्यानतः पितुः ॥ १८ ॥
मोहमय्यां निग्रहात्प्राक् यद्वक्तव्यं प्रसारितम् ।
तद्रूपं निरमाद् डेरी ह्रेल्डः स्लोकाम्ब-लेखकः ॥ १९ ॥
इदं पितुः सुसम्मत्या निर्मितं सम्मतञ्च यत्-
सत्याग्रहो निवर्तेत स्वीकृते पणबन्धने ॥ २० ॥
इयमेका स्पष्टरूपा चापक्वोक्तिरवर्तत ।
प्रतीक्ष्या पणबन्धेषु गान्धेश्च मम सम्मतिः ॥ २१ ॥
सभापतिर्हि कांग्रेसे तस्मिन्वर्षेऽभवं स्थितः ।
स्मरामि नैन्यां पित्रा मे चर्चैतस्याः कृताभवत् ॥ २२ ॥
पिताखिद्यत यच्छैघ्र्येऽस्पष्टं व्याख्यानमैरयत् ।
तदभिप्रायदुष्टत्वकल्पनासम्भवो यतः ॥ २२ ॥
वस्तुतस्तत्तथा जातमप्यभूत् भिन्नबुद्धिभिः ।
अस्माकं स्पष्टवक्तव्यमपि तैः क्रियतेऽन्यथा ॥ २३ ॥
सप्तविंशे जुलायाह्नि सप्रूजयकरौ स्वतः ।
नैनीकारागृहे द्रष्टुमस्मानभ्यागतौ रहः ॥ २४ ॥

श्रीगान्धिपत्रमानीतं संलपामो दिनद्वयम् ।
यावत् पिता ज्वरांशेन बाधितः श्रममन्वभूत् ॥ २५ ॥
अस्मच्चर्चा परिभ्राम्येतस्ततो मूलमागता ।
राजनैतिकदृग्विन्दुर्भिद्यते स्म हि नः सदा ॥ २६ ॥
काठिन्येनान्योन्यभाषाभावान्वयमधीमहे ।
स्पष्टं च दृश्यते नैष सन्धिकालः किलावयोः ॥ २७ ॥
न कार्यसमितेः सभ्यैर्गान्धिना च विमर्शनात् ।
प्राक्किञ्चिद्वक्तुमस्माभिस्तेषां नैवोररीकृतम् ॥ २८ ॥
इत्याशयशया चैका पत्रिकास्माभिरर्पिता ।
श्रीमद्गान्धिविचाराय विलिख्य प्रहिता ततः ॥ २९ ॥
एकादशदिनान्ते च श्रीसप्रूस्तांविनोत्तरम् ।
समादाय पुनश्चास्मान् द्रष्टुमभ्यागतोऽभवत् ॥ ३० ॥
इर्विनस्यामतमभूद्यर्वदागमनं न नः ।
तत्रेदानीं रक्षितोऽभूद्गान्धिः कारागृहे यतः ॥ ३१ ॥
नायं तु वल्लभं द्रष्टुं नैवाबुलकलामकम् ।
न चापि कार्यसमितेः सभ्यान्द्रष्टुममन्यत ॥ ३२ ॥
तौ तर्हि बहिरेवास्तां सर्वकारप्रतीपगौ ।
सक्रियौ तद्विरुद्धे चान्दोलने यत्नतत्परौ ॥ ३३ ॥
सप्रूरपृच्छत् किं यूयं यर्वदां गन्तुमुद्यताः ।
वयमब्रूम-श्रीगान्धिं द्रष्टुं सर्वत्र सर्वदा ॥ ३४ ॥
किन्तु यावन्न सुहृदः पश्यामोऽन्यान्न तावता ।
निर्णयं कमपि प्राप्तुं न शक्ताः स्म इति स्थिताः ॥ ३५ ॥
संयोगात्तद्दिने तस्मात्प्राग्दिने वा त्वधीमहे ।
वृत्तपत्रे मोहमय्यां यष्ट्याघातो महानभत् ॥ ३६ ॥
सरदारो वल्लभश्च मालवीयो महामनाः ।
तसद्दुकोऽप्यहमदः शेरवानी तथापरे ॥ ३७ ॥
ते कार्यसमितेः सभ्याः स्थानापन्नास्तथा स्थिराः ।
निगृहीता अभूवंस्ते सप्रूमब्रूम तं तदा ॥ ३८ ॥

श्रीगान्धिदर्शने शैघ्र्ये न दोषः कोऽपि वर्तते ।
परं यरवदां साकं गन्ता मह्मूदसैयदः ॥ ३९ ॥
नैनीकारागृहे ह्येष सहास्माभिरभूत्स्थितः ।
स हि कांग्रेसमन्त्रित्वादस्माभिः सममेष्यति ॥ ४० ॥
दिनद्वयात्परं तातो मह्मूदोऽहमप्युत ।
वयं नैनीवन्दिगेहाद् धूम्रयानविशेषतः ॥ ४१ ॥
अगस्तदशमाह्वयत्र प्रेषिताः पुण्यपत्तनम् ।
अस्मद्यानं न स्थितं तद्यानस्थानेषु कुत्रचित् ॥ ४२ ॥
वयं तानि त्वञ्जसैव पारयन्तो विनिर्गताः ।
क्वचिल्लघुतटस्थेषु यानं स्थानेषु तत्स्थितम् ॥ ४३ ॥
तथापि चाऽस्मद्यात्राया वृत्तान्तो यत्र सोऽभ्यगात् ।
तत्रैव जनसम्मर्दो महानासीत्समागतः ॥ ४४ ॥
यत्र स्थिता नापि यत्र स्थिताः सर्वत्र सर्वतः ।
समवेता जनाः प्राप्ता वयमेकादशे निशि ॥ ४५ ॥
पुण्यपत्तनपार्श्वे च वातायनसमाह्वये ।
प्रसिद्धे खिड़कीस्थाने प्राप्ता रात्रौ द्वियामतः ॥ ४६ ॥
आशास्महि वयं गान्धेः प्रकोष्ठे वासयेमहि ।
अथवा शीघ्रमेवैनं द्रक्ष्याम इति भाविताः ॥ ४७ ॥
यर्वदा-वन्दि-गेहस्याध्यक्षस्तदकरोत्तथा ।
परन्तु समये सोऽयं प्रबन्धः पर्यवर्तत ॥ ४८ ॥
यश्चापि पुरुषाध्यक्षो नैनीतः साकमागतः ।
तद्द्वारा यरवदास्थास्तथाऽबोध्यन्त किञ्चन ॥ ४९ ॥
अधिष्ठाता मार्टिनोऽस्मान्न रहस्यमिदं जगौ ।
पितुस्तु मार्मिकैः प्रश्नैरिदमज्ञायतान्ततः ॥ ५० ॥
सप्रूजयकराभ्येतौ गान्धिर्दृष्टो भविष्यति ।
ताभ्यामाशङ्कितं चित्तं दृढं स्यान्नूनमन्यथा ॥ ५१ ॥
फलस्वरूपेणैतस्य वयं रात्रिवृतं दिनम् ।
यावदन्येषु कोष्ठेष रक्षिताः स्मस्तटस्थवत् ॥ ५२ ॥

अपृच्छत्पितरं—कीदृग्भोजनं रोचतेऽत्र वः।
पिता प्रत्यवदत्—प्रायो लघु साधारणं तथा ॥ ६७ ॥
प्रातश्चायात्स रात्रेश्च भोजनं यावदुक्तवान्।
सर्वाणि भोज्यवस्तूनि नैन्यां यान्यागमन् गृहात् ॥ ६८ ॥
पिता यान्यपि वस्तूनि तत्रालेखितवान् क्रमात्।
साधारणानि तान्येष श्रुत्वा विस्मयते स्म सः ॥ ६९ ॥
रिजे भोज्यगृहे तानि सेवाये स्युर्लघून्यपि।
साधारणान्यपि मतान्यत्र तान्यद्भुतान्यभुः ॥ ७० ॥
अहञ्च महमूदश्च मार्टिनस्य तदा मुखे।
आरोहावरोहौ पश्यन्तौ विनोदं परमं गतौ ॥ ७१ ॥
चिराद् यरवदावन्दिगेहे भारतनायकः।
न्यवसद्यस्य भोज्यानि खर्जूराणि-अजापयः ॥ ७२ ॥
सन्तराणि फलान्यत्र विशेषः कश्चिदिष्यते।
पिता नवो राष्ट्रनेता ततोऽत्यन्तविलक्षणः ॥ ७३ ॥
पुण्यपत्तनतो नैनीं प्रत्यावृत्ताः पुनर्वयम्।
महान्ति यानस्थानानि लङ्घयन्तो लघौ स्थिताः ॥ ७४ ॥
किन्त्वासीज्जनसम्मर्दस्तत्र तत्राधुना महान्।
चत्वराण्यावृतान्यासन् क्वचिद्यानपथान्यपि ॥ ७५ ॥
हरदायामिटारस्यां सोहागपुरकेऽधिकः।
क्वचिद् दुर्घटना दैवात्प्राप्ताप्यन्तर्न्यवर्तत ॥ ७६ ॥
पितुः स्वास्थ्यं पतत्तीव्रं वन्दिगेहे चिकित्सकान्।
आमन्त्रयत भूयिष्ठान् गरिष्ठान्स्वान् परानपि ॥ ७७ ॥
स्पष्टं वन्दिगृहं तस्य कृतेऽपथ्यमवर्तत।
नानुकूला चिकित्सात्र सम्भवत्यस्य कर्हिचित् ॥ ७८ ॥
तथापि यर्हि केनापि सुहृदा वृत्तपत्रके।
मुक्तये लिखितं तर्हि पिता मेऽस्मिन्नरुष्यत ॥ ७९ ॥
सोऽशङ्कत—जना ब्रूयुर्लिखितं स्यान्मदिच्छया।
इविनं चालिखन्मह्यं न विशेषोऽस्तु कश्चन ॥ ८० ॥

आन्दोलनं चालनीय न वेति स्पष्टमास्थितः।
करग्रहणकालो हि भूयो निकटमागतः ॥ ९५ ॥
करग्रहणकार्ये च प्रत्यासन्नाभवद् विपत्।
अन्नमूल्यं निपतितं भारते भावमान्द्यतः ॥ ९६ ॥
करबन्धान्दोलनार्थमुपयुक्ततरः क्षणः।
नान्योऽदृश्यत—स द्वेधा भङ्गतश्चाप्यभङ्गतः ॥ ९७ ॥
भूस्वामी कृषिकारश्चेत्युभावपि कृषेः फलात्।
तद्वर्षीयकरं पूर्णं दत्तामितिह न संभवः ॥ ९८ ॥
यदि पूर्वस्य वर्षस्य कश्चिदंशोऽस्ति रक्षितः।
इदानीं वा ऋणं प्राप्तुं कुतश्चिच्छक्यमस्ति चेत् ॥ ९९ ॥
भूस्वामिनस्तु कश्चित्स्यादाश्रयोऽपि कदाचन।
निःस्वक्षुधार्तनग्नस्य कृषिकारस्य का गतिः ॥ १०० ॥
न कुत्रचित्प्रजातन्त्रे सिद्धे कृषकसंघटे।
एतादृश्यां स्थितौ तेभ्यः करप्राप्तेर्हि सम्भवः ॥ १०१ ॥
भारते तु प्रभावोऽसौ कृषकाणां न विद्यते।
क्वचित्काङ्ग्रेसमेवैषां पक्षधृक् साह्यकृद् भवेत् ॥ १०२ ॥
अस्ति श्रेयस्करं चान्यत् सर्वकारो बिभेत्ययम्।
कृषकाणामसह्यायां स्थितौ ते स्युः समुत्थिताः ॥ १०३ ॥
दुर्विधोत्साहिताश्च स्युरिति तानेष नार्दयेत्।
परन्त्विमे गताः शिक्षां दीक्षां चैतादृशीं युगात् ॥ १०४ ॥
विपद्यापतितायां ते दैववादाः सहिष्णुताम्।
अत्यजन्तः सहन्ते तां सहन्ते तदुपर्यपि ॥ १०५ ॥
तदानीं गुर्जरे प्रान्तान्तरेष्वपि चलन्त्यहो।
करबन्धान्दोलनानि राजनैतिकरूपतः ॥ १०६ ॥
तान्यासन्वै सविनयैराज्ञाभङ्गैः सहोत्थितैः।
सङ्गतानि, परं प्रान्तास्ते प्रजा-राजसाक्षिणः ॥ १०७ ॥
युक्तप्रान्तस्थितिस्तेभ्यो भिन्नासीन्नूनमत्र हि।
भूस्वाम्यं तदधीनत्वं तृतीयञ्च तदन्तरे ॥ १०८ ॥

कृषकेन करे रुद्धे भूस्वामी स्यात्प्रभावितः ।
इत्येष स्यात्स्ववर्गस्य प्रातिनिध्याद्विचारितः ॥ १०९ ॥
कांग्रेसं राष्ट्रिया संस्था तस्मिन् सन्ति च सङ्गताः ।
भूस्वामिनोऽपि लघवो गुरवश्चेति विश्रुतम् ॥ ११० ॥
तन्नेतारोऽपि भीताः स्युर्मा स्म भूद् वर्गविग्रहः ।
भूस्वामिनो न रुष्टाः स्युरिति ध्येयं समैः सदा ॥ १११ ॥
अतः सविनयाद् भङ्गात्षण्मासावधि ते बुधाः ।
ग्रामेषु करवन्धस्यान्दोलनात्स्वमजूगुपन् ॥ ११२ ॥
निजमत्याऽनुकूलेऽस्मिन्समये वर्गवादतः ।
नेत्थं नाप्यन्यथा प्रश्नमिममत्रान्वचिन्तयम् ॥ ११३ ॥
इदं त्वन्वभवं—वर्गसङ्घर्षस्वीकृतौ क्षमम् ।
नाधुना किल कांग्रेसं, करदाननिषेधकृत् ॥ ११४ ॥
भूस्वामिनोऽपि कृषकानुभयान् 'दत्त मा करम्' ।
इति वक्तुं समर्थं तन्नूनमासीत्स्वकार्यकृत् ॥ ११५ ॥
निषिद्धास्तेन ते दद्युः करं भूस्वामिनो यदि ।
तदा दोषः स तेषां स्यात्कांग्रेसं नापराध्यति ॥ ११६ ॥
अक्तूबरे यदा कारागारतो मुक्तिमाप्नवम् ।
आह्वयन्त्यौ प्रतीते मे आर्थिकी राजनैतिकी ॥ ११७ ॥
उभे अपि दशे ग्रामेष्वाकार्याकार्य मामिमे ।
अब्रूतां करबन्धस्यान्दोलनं क्रियतामिति ॥ ११८ ॥
कृषकाणां प्रकाशासीदार्थिकी सा विपन्नता ।
भङ्गान्दोलनमन्यत्र फलद् ग्रामेऽभवत्कृशम् ॥ ११९ ॥
स्तोकाः स्तोकाश्च यूथस्था जना यान्ति विनिग्रहम् ।
न वातावरणे सा भूदुष्णता न तरस्विता ॥ १२० ॥
नगरे मध्यमश्रेण्या जनाः श्रान्ता इवाभवन् ।
शोभायात्रासु भागेन हरतालेषु योगतः ॥ १२१ ॥
प्रत्यक्षतः प्रतीतं मे धातव्यं नवजीवनम् ।
अत्यावश्यकमस्त्यत्र भर्तव्यं नवशोणितम् ॥ १२२ ॥

ऋते कृषकवर्गाच्चाद्यागमिष्यति तत्कुतः।
निधानं तदखण्डं च परिपूर्णं च साम्प्रतम् ॥ १२३ ॥
इदं भविष्यति पुनर्जनतान्दोलनं नवम्।
येन तेषां हितानां स्यात्सम्बन्धो गहनः परः ॥ १२४ ॥
यच्चात्र मार्मिकं वस्तु प्रत्यभान्मम किञ्चन।
तत्समाजव्यवस्थायाः प्रश्नोत्थापनमन्वितम् ॥ १२५ ॥
यत्र प्रयागे न्यवसं तस्मिन् स्तोकेऽप्यनेहसि।
मत्सार्थैश्च मयैतेषु विषयेष्वाहितं मनः ॥ १२६ ॥
शीघ्रं प्रान्तीयकांग्रेससमितिः सा निमन्त्रिता।
भूयो वादविवादान्ते मञ्जूरीकृतमादरात् ॥ १२७ ॥
करबन्धान्दोलनं तत्प्रतिमण्डलमाशु च।
उपक्रमितुमादिष्टमधिकारप्रदानतः ॥ १२८ ॥
प्रान्तस्य च क्वचिद्भागे नारभेमहि तत् स्वयम्।
आहितं कार्यकारिण्या भूस्वामिकृषकेषु तत् ॥ १२९ ॥
यथा न वर्गवादस्य प्रश्नः कश्चिद् भवेदिति।
सहयोगे प्रधानेऽपि कृषकाणामवस्थिते ॥ १३० ॥
यदेत्थमग्रतः सर्तुमधिकारोऽध्यगम्यत।
तदैवास्मत्प्रयासेण वाञ्छितः प्रथमः क्रमः ॥ १३१ ॥
सप्ताहात्परतश्चैतदान्दोलननिपत्तये।
सम्मेलनं मण्डलस्य कृषकाणां निमन्त्रितम् ॥ १३२ ॥
मनो ममातिसन्तुष्टं मुक्तेनैव विनिग्रहात्।
मया दिनेऽत्र प्रथमे साधु कार्यमनुष्ठितम् ॥ १३३ ॥
सम्मेलनेनैव साकमेका साधारणी सभा।
आयोजिता भूदस्याञ्च प्रदत्तं दीर्घभाषणम् ॥ १२४ ॥
अस्मिंश्च भाषणे पश्चाद् बन्दिगेहे निवेशितः।
ततस्त्रयोदशे घस्रे मासस्याक्तूबरस्य तु ॥ १३५ ॥
अहं कमलया साकं पितृदर्शनकाम्यया।
दिनत्रयकृते यातो मसूरीं दूरितामयाम् ॥ १३६ ॥

तद्दर्शनेन सन्तोषो ममाभूत्-स शनैः शनैः ।
स्वास्थ्यमर्जयतीहेति स्वयं पार्श्वं प्रवर्तयन् ॥ १३७ ॥
तानि त्रीणि दिनान्यत्र व्यतीतानि शमेन मे ।
यथा, तथैवानन्देन तान्यद्यापि स्मराम्यहम् ॥ १३८ ॥
पुनः स्वपरिवारेण साकमागत्य वासतः ।
कियन्मनो मोदतेस्म, रोचतेस्म कियच्च तत् ॥ १३९ ॥
मम पुत्रीन्दिराऽत्रासीद् भागिनेय्यश्च बालिकाः ।
अहमक्रीडमाभिश्चाभ्राम्यं राजकुटुम्बवत् ॥ १४० ॥
कनिष्ठा त्रिचतुराब्दा राष्ट्रध्वजकरा पुरः ।
'ध्वजः स्यादुन्नतोऽस्माक' मिति गायन्त्यगान्मुदा ॥ १४१ ॥
पित्रा सहैतानि त्रीणि दिनान्यन्त्यानि मेऽभवन् ।
अतः परं ह्यसाध्येन युक्तो रोगेण मत्पिता ॥ १४२ ॥
स च प्रयागागमनं सहसा निश्चिनोत्यथ ।
मन्ये मन्निग्रहस्याशु भाविनः शङ्कया स्वयम् ॥ १४३ ॥
परिस्थितिं मदीयां वा स सम्यक् पश्यतादिति ।
ऊनविंश्यां प्रयागे तद् भाव्यं कृषकमेलनम् ॥ १४४ ॥
अतः सप्तदशे त्वावां ततः प्रस्थातुमुद्यतौ ।
पितास्मद्गमनात्पश्चात् प्रस्थाताष्टादशे दिने ॥ १४५ ॥
कमलाया ममाप्येषा यात्राभूद् घटनामयी ।
देहरादूनतो यास्यन् प्राप्तो निग्रहसूचनाम् ॥ १४६ ॥
अपि सा लक्ष्मणपुरे किञ्चिद्घोरा स्थितस्य मे ।
समागता न तु प्राप्ता जनसम्मर्दवेष्टनात् ॥ १४७ ॥
मानपत्रमदान्मह्यमेषा नगरपालिका ।
ततो मृत्तरियानेन प्रयागं निशि चागतौ ॥ १४८ ॥
मार्गे स्थले स्थले कुर्वन् व्याख्यानं कृषकव्रजे ।
प्रयागं प्राप्तवन्तौ स्वो रात्रावष्टादशे दिने ॥ १४९ ॥
ऊनविंशे प्रातरेव पुनरन्याधिसूचना ।
मामाख्यात्सर्वकारस्ते पृष्ठमेषोऽनुगच्छति ॥ १५० ॥

ज्ञातं कतिपयीर्होरा एवातिथिरिहास्म्यहम् ।
निग्रहात्पूर्वं कृषकसम्मेलनगमोत्सुकः ॥ १५१ ॥
अत्र सम्मेलनेऽस्माभिः प्रातिनिध्येन योजिताः ।
केचिज्जनाः समाहूता अभवन्नहि सर्वशः ॥ १५२ ॥
प्रयागमण्डलस्यास्मिन् शतान्यायान्ति षोडश ।
सम्मेलनेन प्रारब्धः करबन्ध ऋताग्रहः ॥ १५५ ॥
केचित्समकुचन् मुख्या अपि कार्यकरा इह ।
ते ह्यान्दोलनसाफल्ये मनसा सन्ति शङ्किताः ॥ १५४ ॥
यतः कृषकवर्गस्य भापनाय दमाय च
भूस्वामिनां साधनानि सुबहूनि समासते ॥ १५५॥
तेषाञ्च पृष्ठतः पुष्टः सर्वकारोऽस्त्यवस्थितः ।
कृषका नात्र तिष्ठेयुरित्यासीत्तत्र कारणम् ॥ १५६ ॥
परं सा षोडशशती कृषकाणां पृथक्स्तरा ।
यस्याश्चित्ते न सङ्कोचो नापि शङ्कालवः स्फुटः ॥ १५७ ॥
सम्मेलने चाहमपि भाषणं कृतवान् मनाक् ।
चतुश्चत्वारिंशदतिशतां भञ्जितवान्नवाम् ॥ १५८ ॥
धारेयं सार्वजनिक-सभामध्येऽभिभाषणम् ।
निषेधति स्म मे त्वेषा प्रतिनिधिसभाऽभवत् ॥ १५६ ॥
ततोऽहं पितरं नेतुं परिवारं समागमम् ।
धूम्रयानस्थानगामियानमासीद् विलम्बितम् ॥ १६० ॥
अवतीर्णास्तानहन्तु तत्र त्यक्त्वा सभान्तरम् ।
प्रस्थितो यत्र पार्श्वस्थग्रामग्राम्याः समागमन् ॥ १६१ ।
निश्यष्टवादनान्ते चाहं कमला च श्रमार्दितौ ।
सभास्थानाद् गृहं यान्तावुत्सुको पितृदर्शने ॥ १६२ ॥
वेदाहं सोऽपि मां द्रष्टुं भाषितुं चोत्सुको भवन् ।
मां वै प्रतीक्षमाणः स्यात्सम्भाषितविनिग्रहम् ॥ १६३ ॥
परं मार्गे मृत्तरिनः संरुद्धा दृष्टमद्गृहे ।
निगृह्य यमुनापारेऽनीये नैन्यां स्वकोष्ठकम् ॥ १६४ ॥

एकाकिनी तु कमला सानन्दभवनं गता।
प्रतीक्षमाणान्मां सर्वान् बन्दिभूतं न्यवेदयत ॥ १६५ ॥
नववादनवेलायामहमन्तः प्रवेशितः।
न पितापुत्रयोः स स्नेहो न गणितस्तैरुपेक्षितः ॥ १६६ ॥

येन विद्यापीठभवनातिथितया समुपेयुषां
राष्ट्रियाणां धार्मिकाणां नायकानां बहुविधा।
साभिनन्दनपत्ररचनाऽकारि तत्कृतनेहरू
चरितकाव्ये सर्ग एकत्रिंश एति ससन्धिकः।

युक्तप्रान्ते करबन्धः

वियोगिनी

द्वात्रिंशः सर्गः

दिवसाष्टकतः परं पुनर्नयनीमागतवान् कृतग्रहः ।
समगान्महमूदसैयदः स सखा नर्मदयाप्रसादकः ।।१।।
सहसा रणजीतपण्डितोऽप्यमुना साकमिहागतोऽभवत् ।
कतिचिद्दिवसानतीत्य मे त्वभियोगश्चलितोऽभवत्ततः ।।२।।
मयि तत्र च धारयाऽनयाऽपि तदाप्येष विचालितोऽभवत् ।
अभवच्च तयोरिहाश्रयो मम तद् भाषणमेषमः कृतम् ।।३।।
न मया विशदत्वमाहितं लिखित स्वं वचनीमम‍र्पितम् ।
मयि दण्डततिस्त्रिधापतत् धनतः सप्तशती-शरद्द्वयम् ।।४।।
धनदानमृते तु पञ्चमास्वितरः कालविधिर्विनिर्मितः ।
इदमस्ति मदीयबन्धनं भुवि वारे किल पञ्चमे कृतम् ।।५।।
इदमाग्रहणं च दण्डनं मम भङ्गीयविधौ प्रभावकृत् ।
नवजीवनमाहितं बलं पितुरेतद् बहुधा यशस्करम् ।।६।।
कमला पितरं यदावदन्मम काराभवने प्रवेशनम् ।
प्रतिघातमिवान्वभूत्पिता कृतपीडाहृति चाह निश्चयम् ।।७।।
अधुना नहि रुग्णशायने पतितास्मि क्रमशो युवा भवन् ।
निजकर्म करोमि ,रुग्णता मम देहे प्रभुतां न धास्यति ।।८।।
युववत्कृतनिश्चयोऽभवन्न तु सङ्कल्पबलैस्तदामयम् ।
दमनीयमभूद्धि तद्वपुर्हठतः कृन्तति नैति दम्यताम् ।।९।।
कियतः समयात्तदाकृतो स्फुटमेवान्तरमप्यदृश्यत ।
यदवेक्ष्य जनोऽतिविस्मितः क्व नु दृष्टं रुधिरं च तत्कफे ।।१०।।
अधुना न लवोऽपि तस्य यत् किल सङ्कल्पबलं तदद्भुतम् ।
तदिदं महतोऽभिमानतोऽकथयन्मां समुपागतः पिता ।।११।।

कतिचिद् दिवसान् स्थितश्च स स्थितवत्यस्य च वर्धते रुजा ।
रुधिरं परिणामतोऽधिकं कफमध्ये पुनरप्यदृश्यत ॥१२॥
इह चोत्सहमान एव स स्वककर्माण्यकरोत्समन्ततः ।
अथ भङ्गसदाग्रहस्य तं प्रतिघातं बलवद्ददाति सः ॥१३॥
प्रहिणोति पदे पदे पिता विवृतादेशशतान्ययं क्रमात् ।
दिनमेकमथो विनिश्चितं व्रियतां तद्दिनमुत्सवात्मना ॥१४॥
मम जन्मदिनं तदाभवत्प्रतिवर्षीयनवम्बरे यतः ।
इह वन्दिगृहे निवेशकान्नवलाद्भाषणतोंऽशपाठतः ॥१५॥
दिवसेऽत्र बहुत्र यष्टयः प्रचलन्तिस्म सभाः विसर्जिताः ।
समुदायगतं च भञ्जितं निगृहीतं च सहस्रपञ्चकम् ॥१६॥
अभवत्स च रुग्ण एव यत् पुनरेषोत्तरदायिता परा ।
तदुपर्यतिशक्तिसंक्षयः पुनरारोग्यविकारकारकः ॥१७॥
विनिवेदितमत्र सर्वथा क्रियतां विश्रम एव केवलः ।
अथ चिन्तितमत्र विश्रमो नहि लभ्यो जनकेन भारते ॥१८॥
मतिरस्य हि मुक्तिसङ्गरेष्विह सा रोहति चावरोहति ।
सुजनाश्च विमर्शकारणादपि तं यान्त्यखिलं दिवानिशम् ॥१९॥
नगराणि समुद्रयात्रयाऽभ्ययितुं शृंङ्गपुरं च रङ्गुनम् ।
डचइण्डियनं च तद्दिशा मयका प्रस्तुतमग्रतः पितुः ॥२०॥
मम तन्मतमस्य सम्मतम् इदमस्मै समयोचितोदितम् ।
अपि कोऽपि चिकित्सकः सखा सह यायादिति तावदर्थितम् ॥२१॥
कलकत्तमसो गतोऽप्यभूत्परमस्वास्थ्यविवृद्धितोऽवशः ।
न तदग्रसरोऽभवत् स्थितः किल सप्ताहकसप्तकं बहिः ॥२२॥
कमलाञ्च विना कुटुम्बगाः सकलास्तेन सहाभवञ्जनाः ।
सुचिरं कमला प्रयागके किल कांग्रेसकृतानि साकरोत् ॥२३॥
अहमाशु विनिग्रहं गतः करबन्धे हि करोमि यत्कृतिम् ।
परमस्य विवर्धनं ततोऽभवदान्दोलनकस्य नेतरत् ॥२४॥
दिवसे कृषकैकमेलनेऽवसितेऽथ प्रतिनिध्युपस्थितौ ।
मम निग्रह एष रोषकृत्स्वयमुत्साहविवर्धनोऽभवत् ॥२५॥

प्रतिनिध्युदयद्दिवाकराः प्रसृता ग्रामसहस्रकेषु यत् ।
कृषकामिलनस्य निर्णयान् स्वकरान् वा व्यकिरन्पदे पदे ।।२६।।
दिवसेषु चतुर्षु मण्डले विततोऽभूत् करबन्धसङ्क्रमः ।
प्रमुदा च पदे पदे जनाः स्वयमान्दोलनकेऽत्र सङ्गताः ।।२७।।
इह तेषु दिनेषु दुष्करं नववृत्तप्रविसारणं ह्यभूत् ।
जनतासु निवेदनं वयं किमु कुर्मोऽत्र विमुक्तये इति ।।२८।।
किमु कुर्वन्तु जना इतीदमप्यसुगम्यं स्वनिदेशबेषणम् ।
नहि वृत्तदलानि वृत्तकान्युपगृह्णन्ति च नः प्रकाशितुम् ।।२९।।
हृदि विभ्यति ते प्रशासनं किल तान् दण्डयिता च मर्दिता ।
न च मुद्रणयन्त्रकाणि नः प्रतिविज्ञापनपत्रिका अयुः ।।३०।।
अथ पत्रकतारपत्रके अपि मार्गे भवतः स्म रोधिते ।
इतिवृत्तविसारणाय नः प्रति संदेशहराः समाश्रयाः ।।३१।।
चरमेष्वपि कर्हिचित्क्वचित्किल कश्चिद्विनिगृह्यते यदि ।
सकलं तु रहस्यमुद्गतं न च कार्यं समभूद् व्यये कृते ।।३२।।
इति वृत्तविसारकर्मणे परमं सङ्घटनं समीहितम् ।
इह किञ्चन यत्नसाफलं श्रितमासीत्कृतिकेन्द्रयोजनात् ।।३३।।
प्रमुखे निलये प्रदेशगो निलयः सङ्गमितः सदाऽभवत् ।
निलयः स च मण्डलेऽप्ययं किल ताभ्यामभवत्सुसङ्गतः ।।३४।।
इति वृत्तविसारणं क्वचित्सुकरं वैनरवेष्वजायत ।
बहुवृत्तचयोऽप्यवैधतां दधदप्यावहति प्रकाश्यताम् ।।३५।।
नगरे नगरे प्रहीयते किल चक्रक्रमतः प्रकाशितः ।
प्रतिवासरतोऽथवा क्वचित्प्रतिसप्ताहमयं प्रसार्यते ।।३६।।
नगरे नगरे च घोषणेत्यपि काचित्सरणिः प्रसारिणी ।
परमत्र विनिग्रहं गतो भवति स्मैष तु घोषको नरः ।।३७।।
न च बिभ्यति निग्रहाज्जनाः प्रतिवाञ्छन्त्युत तत्ससाहसम् ।
नगरेष्वपि वृत्तसारिणी सरणिः काञ्चिदगात्सुसाध्यताम् ।।३८।।
सरणिस्तु कदापि काप्यगान्न पुनर्ग्रामगणेऽनुकूलताम् ।
इह चक्रसरण्यमत्रकैरपि सन्देशहरैः समन्वयः ।।३९।।

परमस्ति न तत्प्रतोषकृत्प्रवरग्रामिककेन्द्रचालना ।
अथ दूरगतैर्विलम्बतः कथमप्येष समन्वयः स्थितः ॥४०॥
परमत्र कृषीबलैः कृते नवसम्मेलनके तु सौविधी ।
समभूत्प्रतिनिध्युपस्थितेः सकलं प्रासरदेव वृत्तकम् ॥४१॥
इति तानि शतानि षोडशान्यभवन्नः प्रविचारसाधनम् ।
हृदि विश्वसितं च नेतृभिः सहसान्दोलनसाफलं प्रति ॥४२॥
न च शङ्कितमस्ति शेषिता भुवि भूपालकृषीवलक्षमा ।
करबन्धमुपासितुं वयं ह्युभयानेव न्यबोधयेमहि ॥४३॥
परमत्र करं प्रदत्तवान् बहुभूपालजनो न कर्षकः ।
अपि राष्ट्रियसंसदे महानुभवं बिभ्रदपि क्षमो जनः ॥४४॥
दमनं बहुलं च तेष्वभूदपि तेषां बहुहानिसम्भवः ।
कृषकास्तु दृढा इवाभवन् न च तेऽदुः करबन्धने करम् ॥४५॥
अपि याति प्रयागमण्डलादिदमान्दोलनमन्यमण्डलम् ।
न बहुत्र तदस्ति घोषितम्, परमेते कृषका न तं ददुः ॥४६॥
न बहुत्र च भावसंक्षयादपि शेकुः करदानकल्पने ।
इति शासनमप्युदास्त भूपतयश्चापि मुनिव्रताः स्थिताः ॥४७॥
फलितं प्रति ते न निश्चिताः, सति भंगे नयसंगरे स्थिताः ।
अपि चार्थिकमन्दतां प्रभोः पुरतस्ते कृषकाः सुदुःखिताः ॥४८॥
उभयोरपि नानयोर्मिथः समभूदेव सभाहितिर्नवा ।
स्म बिभेति तरां हि शासनं कृषका मास्म भजन्तु विग्रहम् ॥४९॥
अथ लन्दनगोलपीठके मिलनं सम्भवि साध्ववर्तत ।
इति नात्र विवर्धिषु स्वयं समभूच्छासनमस्य संकटम् ॥५०॥
न च तत्प्रबलं स्वशासनप्रभुतापूर्णमिहाददृक्षत ।
इह भारतवर्तिनि स्फुटं फलमान्दोलनजं त्वदृश्यत ॥५१॥
नगरं विरहय्य संगरे कृषिकेन्द्रोऽजनि ग्राममण्डलम् ।
नवजीवनमागतं ततो सुदृढान्दोलनमूलमण्डले ॥५२॥
अमुना परिवर्तनेन ते नगरस्थाश्चकिताः श्रमं गताः ।
अपि मध्यमवर्गगा जनाः स्म निराशामवयन्ति काञ्चन ॥५३॥

इदमत्र विभाति यद् दृढं प्रथमान्दोलनतः कुतश्चन ।
नगरात्परिवर्तितं पुरा समभूद् ग्रामगतं यथा स्वयम् ।।५४।।
अभवत्किल राजनैतिकं तदिहैवार्थिकभूमिकास्थितम् ।
परिवर्तितमेतदीदृशं समभूत् प्रान्तविशेष एव च ।।५५।।
परिणाममगाम तस्य यन्नगराण्येव गतानि मुख्यताम् ।
अथ मध्यमवर्गगामिनी श्रमितास्य क्षतिहेतुतामधात् ।।५६।।
अधिमोहमयीं निरन्तरं यदुपक्रान्तिसमाप्तिसंगतम् ।
वितता कियती निराशता इदमान्दोलनवर्तिवर्तनात् ।।५७।।
इह तत्र परत्र शासनं त्ववहेलां च विनिग्रहं दधत् ।
प्रतिभाति तदत्र कृत्रिमं क्वचिदस्मान्निरगाच्च जीवनम् ।।५८।।
सहजं तदभूज्जनाश्चिरं कुहचित्क्रान्तिपथे नहि स्थिताः ।
बहुधा स्थितिरीदृशी कियद्दिवसांस्तिष्ठति भङ्ग एष तु ।।५९।।
अतिशक्तिरभूदनेकभाः स्थितिरद्यापि चलन्त्यसौ शनैः ।
अतिसीमनि कालविग्रहे चलितुं शक्ष्यति तत्प्रतीयते ।।६०।।
दमनं विततं प्रशासने किल कांग्रेसमुखाः सभाः समाः ।
अचलन्नधुना पि वैधता न कयाचित्तु कदापि सार्जिता ।।६१।।
इति ता दमिताश्च वन्दिषु व्यवहारोऽनुचितश्चिरं कृतः ।
रुजितं पुनरत्र शासनं क्षणमुक्तः पुनरेति वन्दिताम् ।।६२।।
सति दण्डविधावपि स्फुटं नहि सत्याग्रहिणो नमन्त्यमी ।
इति शासकसाहसं परं शिथिलीभूतमथो दिसम्बरे ।।६३।।
किल बन्दिगृहापराधतो नयिकाः केचन बन्दिनः स्फुटम् ।
इह वेत्रवताभिताडिता अभवन्नित्यभवन्मया श्रुतम् ।।६४।।
क्षुभिता वयमस्य वृत्ततस्तदवध्येव च दुष्टदर्शनम् ।
विषमश्रवणं च भारते ध्रुवमभ्यस्तमिवाभ्यजायत ।।६५।।
इह वेत्रहतिस्तु वन्दिनां मम सा स्याददतिदुष्टयातना ।
नवयौवनशालिनां मृदूत्तरदेहे च कृता तु दुःसहा ।।६६।।
पुनरत्र च नाममात्रके नियमभ्रंशमयेऽपराधके ।
इह वेत्रहतिस्तु जाङ्गलो पशुवृत्तिः किल साभिधीयते ।।६७।।

समकोष्ठकवर्तिनो वयं त्वलिखामात्र तदैव शासनम् ।
युगमासपरे तदुत्तरानुपलब्धौ तु विरोधदृष्टये ॥६८॥
अवताडितसंविदञ्जने किमपीह प्रतिकर्तुंकाम्यया ।
चरितं त्रिदिनव्रतं च तैः समकोष्ठैस्तु चतुर्भिरप्यदिः ॥६९॥
उपवासदृशा न तन्महत् परमभ्यासमृतेऽपि तत्कृतम् ।
वयमत्र कियत्क्षमा इति त्वविदन्तस्तदकुर्म साहसम् ॥७०॥
उपवासदिनेषु नात्यजं निजव्यायामनियन्त्रितक्रमम् ।
तनुभारहृतिं विना न मे क्षतिरेतेन च काप्यभूत्परम् ॥७१॥
उपवासमृतेऽपि वाह्यतो भृशमान्दोलनमेकमादृतम् ।
प्रहिताः किल वन्दिगेहिनां बहवः सम्मतयोऽपि शासनैः ॥७२॥
इह भाविनि चापराधके नहि वेत्रं क्वचन प्रयुज्यताम् ।
इति तत्र निदेशितं चिरं नहि कारागृहसीम्नि संस्थितम् ॥७३॥
क्वचन क्वचनेदृशी न चेद् घटनोत्तेजनिका समापतेत् ।
सुखशान्तिमयं तु जीदनं किल कारागृहवर्त्त्यवर्त्स्यत ॥७४॥
स ऋतः सुखदः प्रयागके किल शीतर्तुरतीव शोभनः ।
अलभेमहि लाभमद्भुतं रणजित्पण्डितसत्समागमात् ॥७५॥
स हि वेद वनावनक्रियामतिसङ्कीर्णमपि स्थलं स तत् ।
कुसुमप्रकरैः सुशोभितं कृतवान्वै लघु गॉल्फखेलनम् ॥७६॥
शिरसि प्रचरत्यहर्निशं नयनीवन्दिगृहान्तरिक्षतः ।
नवमारुतयानमण्डलं हृदयानन्दविनोदकारकम् ॥७७॥
इह पश्चिमपूर्वगोचराण्युपगच्छन्ति किल प्रयागतः ।
डचयावकचीनयात्रिकाण्यपि तान्यत्र विमानकान्यपि ॥७८॥
डचतस्तु महत्तमान्यमून्युपगच्छन्ति वटेवियां प्रति ।
सहसा क्वचनातिभाग्यतस्तमसि प्रातरतीव शोभने ॥७९॥
द्युतिमत्सु च तारकेष्वधः प्रचरन्मारुतयानमद्भुतम् ।
अतिदीव्यति कान्तिमण्डले हरति स्मैव मनोऽभिरञ्जनम् ॥८०॥
विमले गगने शुभे प्रगे तदुपर्युड्डयते मनोहरम् ।
तदिदं बहुरङ्गरञ्जितं सुभगं दृश्यमजीहरद् दृशम् ॥ ८१॥

अथ वन्दिगृहात्कुतश्चन प्रहितोऽभून्नयनीं महामनाः ।
स पृथङ्न्युषितः प्रकोष्ठके वयमेनं समयाम नित्यशः ॥८२॥
गृहबाह्यमपेक्ष्य चात्र तं परिचिन्वन्नधिकं हि वेद तम् ।
मुदितप्रकृतिः स चाभवत् स भृतो जीवनशक्तिधारया ॥८३॥
युवको रुचिमान् समन्ततो रणजित्साधु विवुद्धजर्मनीः ।
स्मरणे स विलक्षणं निजं मतिमादर्शयदत्र सात्त्विकीम् ॥८४॥
इह वेत्रलताभिताडनं श्रुतवानेष नितान्त रोषतः ।
अलिखत्खलु राज्यपालकं समभूद्रुग्णतनुस्ततोऽधिकम् ॥८५॥
न स वन्दिगृहस्य दुःसहं किल शैत्यं सहते स्म कोमलः ।
विकृतां च विलोक्य तत्स्थितिं नगरे प्रैष्यत चातुरालये ॥८६॥
कतिचिद्दिवसान्सवासितः समयात्पूर्वमसावमुच्यत ।
परमापि तदातुरालये सहजं स्वास्थ्यमनेन योगिना ॥८७॥
प्रथमे दिवसे श्रुतं मया कमला निग्रहमापितेति यत् ।
मुदमाप्नुवमस्ति सा चिरात्किल कारागृहवासकाङ्क्षिणी ॥८८॥
यदि सा पुरुषोऽभवच्चिरादुपयाताभवदेव निग्रहम् ।
नहि सा भगिनीद्वयं ममेतरनार्योऽप्यगमन् विनिग्रहम् ॥८९॥
परमत्र न शासनं स्त्रियं विनिगृह्णाति नयेन हेतुना ।
इति साऽभवदत्र वञ्चिताऽद्य मनः कामनया कृतार्थिता ॥९०॥
कियतीमिव सा प्रसन्नतां न गता स्यादिह निग्रहं गता ।
समयेन बिभेमि किन्त्वहं किल तत्स्वास्थ्यमभूद्विकारितम् ॥९१॥
अहमासमिहातिशङ्कितनुताद्वन्दिगृहे न तद्व्यथा ।
इह निग्रहकाल एकलः किल पत्रप्रतिनिध्यवेक्षकः ॥९२॥
कमलामयमभ्यमाचत प्रतिसन्देशमशेषभावतः ।
त्वरितं च तमादिशद्यथा हृदयेऽसीमसुखं ममोद्गतम् ॥९३॥
अतिगर्वमधामिहान्तरेऽनुगतास्म्यद्य पतिं यदञ्जसा ।
हृदि विश्वसिमीह न राष्ट्रियं ध्वजमेतन्नभवेन्नतं क्वचित् ॥९४॥
यदि चिन्तयितुं किमप्यसौ प्रभवेन्नेह दिशेत्तदीदृशम् ।
मनसा पुरुषापराधतः स्त्र्यविकारावनयोद्धृकाऽभवत् ॥९५॥

समये किल तत्र तन्मनस्युदितास्ताः प्रबला विचारणाः ।
सुनिराश्रयतैककारणाद् भुवि हिन्दूस्त्रियमाश्रयन्ति याः ॥९६॥
परुषा पुरुषापराधवाङ् नहि जाने क्व गता तदाऽभवत् ।
अभवच्च पिता तदातुरः कलकत्तानगरं गतश्चिरात् ॥९७॥
कमलाग्रहणेन वन्दितानयनेनाकुलतां गतोऽभवत् ।
स निवर्तितुमत्र गेहकं कृतवान् निश्चयमेव सक्रमः ॥९८॥
प्रथमं भगिनीं ममैषयत्स्वयमत्रागतवाननन्तरम् ।
नयनीगत एष मां प्रति प्रतियातः स हि मासयुग्मतः ॥९९॥
हृदयं मम घातमन्वभूत् पितृकार्श्यं समयेऽत्र पश्यतः ।
स मया यतनेन गूहितो वदनं तस्य हि मामभीषयत् ॥१००॥
कथितोऽपि न मे स्म भात्ययं कलकत्तां समपेक्ष्य निर्व्यथः ।
यदपश्यदिहाव्जं स्वकं न तदाश्वासकरं ममाभवत् ॥१०१॥
अपि तद्वदनं च शोथवद् यदपश्यन्तदसावहेतुकम् ।
मनुते स्म परं मनो ममाकुलितं तत्परिणामदृक् परम् ॥१०२॥
वदनं तदिदं च तस्य मे मुहुरायादवधानगोचरम् ।
नहि तद्वदनं तदीयवत्प्रतिभाति स्म तदानुपश्यतः ॥१०३॥
मम चेतसि भीतिरुद्गता भयमस्त्यागतमस्य सम्मुखे ।
अहमत्र पितुस्तु कल्पनां बलवत्त्वेऽकरवं सदारुचो ॥१०४॥
मरणस्य न कर्हिचिन्मया पितुरंशेऽत्र विचारणा कृता ।
मरणस्य हि चर्चयाऽप्यसौ हसति स्मामृततां विभावयन् ॥१०५॥
कथयत्यधुना त्वहं चिरं भुवि जीवामि, निरामयोऽस्म्यहम् ।
परमद्य मया स्म दृश्यते युवमित्रे स मृतेऽनुशोचति ॥१०६॥
अहमेक इवास्म्यसङ्गतः पुरुषैः सङ्गमितोऽस्मि नूतनैः ।
मरणं समुपैति मामिति त्वनुभूयेव करोति चेङ्गितम् ॥१०७॥
परमेष विचार एति च प्रतियाति स्म जिजीविषानुगः ।
परिवारजना वयं च तत्प्रणयाभ्यस्ततया तमन्तरा ॥१०८॥
बलयुक्तमिदं तदीयकं किल व्यक्तित्वमिमे न विस्मृताः ।
अथ जीवनशक्तिरात्मनो बलमाधाय बिभर्ति तं सदा ॥१०९॥

जगतः परिकल्पनामपि क्वचिदाकर्तुमलंभवाम नो ।
भवति स्फुटमास्यदर्शनात्त्वतिदुःखं बहुशङ्कयान्वितम् ॥११०॥
भयमेतदुपागतं त्विति स्वमनस्येष न जात्वचिन्तयम् ।
दिवसेषु च तेष्वहं स्वयं कमपि स्वास्थ्यविकारमध्यगाम् ॥१११॥
प्रथमस्य च गोलपीठकाऽऽमिलनस्यान्तिमवासरा अमी ।
अभवन्निह भाषणानि यान्यधिकालङ्करणानि तान्यहो ॥११२॥
परिदर्शितडम्बराणि चाप्यभवन् भावभृतानि सर्वथा ।
न च रञ्जनमल्पकं कृतं किल तैरस्मदशेषसङ्गिनाम् ॥११३॥
इह चापि मनोनुरञ्जने स घृणाभावलवोऽप्यवर्तत ।
बहु भाषणमत्र लम्बितायतवार्ताश्च विवादहेतुकाः ॥११४॥
सकलान्यपि वास्तवेतराण्यथ च व्यर्थतराणि भान्ति नः ।
परमेकमिहास्ति वास्तवं यदिह स्पष्टतयोपलक्ष्यते ॥११५॥
तदिदं यदमुत्र भारते कठिनेऽस्मिंश्च परीक्षणे क्षणे ।
भगिनीभिरथात्र बन्धुभिः परिपूताचरणेन शोभितैः ॥११६॥
सकलं जगदेव विस्मये विनिपात्येव सुरक्षितं यदा ।
इह सन्ति तदापि चेदृशाः नवसङ्ग्राममिमं हसन्ति ये ॥११७॥
प्रतिपक्षिजनेषु नैतिकं बलमाधाय निजं च संस्थिताः ।
स्फुटमद्य च दृश्यते, छलं किल राष्ट्रीयपदे चरत्स्वपि ॥११८॥
विषमाणि हि तानि कुर्वते निजकर्मण्यधिरोपितान्यहो ।
स्वहितानि च राष्ट्रधर्मणोऽभिधया भाव्यवनाय बिभ्रति ॥११९॥
इदमप्यथ गोलपीठकाभिमिलनं स्थास्नुनिजार्थभावकैः ।
प्रतिनिध्यपरैः प्रकल्पितं किल सम्मेलनमेकमस्ति यत् ॥१२०॥
अपरेषु च तेषु कैश्चनास्मदुपक्रान्तरणो व्यरुध्यत ।
कतिचिन्मुनयस्तटस्थिताः परिपश्यन्ति पुरा वदन्ति च ॥१२१॥
समये समये च नः स्मृतिं जनयन्तीह—तटस्थिता अपि ।
यदिह प्रतिवीक्ष्यतेऽपि यैः स्थितवद्भिः क्रियते क्रियापि तैः ॥१२२॥
परमत्र यदैव लन्दनात्प्रतिसूत्रं परिचाल्यते रहः ।
प्रतिवीक्षणमेतदन्तिमां स्थितिमायातितरामिहाञ्जसा ॥१२३॥

स्वविशेषहिताभिगुप्तये शकलान्यत्र मिलन्ति यान्यपि ।
किल भागमिहापि लम्भितुं ह्युपधावन्त्यनु ते परस्परम् ॥१२४॥
झटिति क्रियते स्म लन्दने खलु सम्मेलनमेतदित्यहो ।
लघु काङ्ग्रसमेति वामतः प्रजया भूरितया प्रभावितम् ॥१२५॥
इदमत्र विचारितं यदि प्रतिवेगः परिवर्तनात्मकः ।
उपयाति स राजनैतिकः क्वचिदामूलशिखोऽत्र भारते ॥१२६॥
इह ता जनभिन्नशक्तयो भवितारोऽधिगताः प्रधानताम् ।
अथवा महिमानमापिता इति तात्पर्यमिहोपलप्स्यते ॥१२७॥
अनिवार्यतया च ते बलं परिवृत्तौ दधते पुराऽऽशिखम् ।
इति नो विहितानि तद्धितान्युपघातं ध्रुवमेवबिभ्रति ॥१२८॥
इति भारतसंस्थिताहिताऽऽपदमेतामवलोक्य शङ्किताः ।
इति ते परिवर्तनं परे स्थितमत्यन्तनरुन्धतार्थिकम् ॥१२९॥
अभिलाष इहैष आस्थितो हितसिद्ध्यै ब्रिटिशं तु शासनम् ।
इह निर्णयशक्तिरूपतो नवसामाजिकरूपगुप्तये ॥१३०॥
यदिहोपनिवेशिके पदे बलमाधीयत तस्य मूलगा ।
कुरुते स्म तु कर्मधारणा, क्षुभितो मय्यभवत्तु नायकः ॥१३१॥
प्रथितः श्रमिणां स मां रुषाऽवददेतद्भवतोक्तमद्भुतम् ।
गुरुणा ब्रिटिशेन सन्धये त्वपनेया ब्रिटिशी चमूरितः ॥१३२॥
पृतना किल भारतीयका गणतन्त्रेऽस्मदधीनतां श्रयेत् ।
इति नूनमपेक्षितं भवेद् भविता सन्धिरिदं विना कथम् ॥१३३॥
इति मद्वचनं विरुन्धयन् श्रमनेता स ततोऽग्रतोऽवदत् ।
ब्रिटिशं यदि तुष्यतीदृशात् पणतोऽहं विरुणध्मि शक्तितः ॥१३४॥
परमस्ति तु राष्ट्रियां स्वतां कतमामप्यधिगन्तुमीप्सितः ।
पण एष विरोधितो हठान्न भवेदित्यनुदर्शनेन नः ॥१३५॥
अपि तु स्वहितावकाशतस्तदिदं वाञ्छितमेव नाभवत् ।
इदमत्र भयेन हेतुनापि भवेद्भारतगुप्तयेऽन्यदा ॥१३६॥
ब्रिटिशस्य हि सैनिका इमं परिरक्षन्ति पुरेव भारतम् ।
इतराक्रमणस्य शङ्कया कियदेतद् दयनीयकल्पनम् ॥१३७॥

भरतावनिजा हि मानवा निजवीर्येण सुरक्षिताः सदा ।
इति यच्चिरविश्रुतं ततो विपरीतं कियदस्ति चिन्तनम् ॥१३८॥
परमेतदवास्तवं वचो ब्रिटिशावश्यकता स्वहेतवे ।
गणतन्त्रसमागमे कुतः स्वहितं स्यान्निहितं तु साधितम् ? ॥१३९॥
इति गोलसुपीठविश्रुतप्रतिगामी न च साम्प्रदायिकः ।
प्रतिनिध्यपरोऽपि भारतोन्नतिवादी किल राष्ट्रवादवान् ॥१४०॥
अपि तु प्रतिनिध्यशोधनः स्वयमुन्नम्यत एव राष्ट्रियः ।
ब्रिटिशस्य निजस्य चोभयोर्हितमेकं निमिषत्यनेकधा ॥१४१॥
विततो बहुलार्थवाचकः किल दृष्टः स हि राष्ट्रधर्मकः ।
इह सम्मिलितो हि सङ्गरे गमनाद्वन्दिपदं समाश्रितः ॥१४२॥
अपरे किल वन्दिगेहिभिः करमेला अपि सन्ति मिश्रिताः ।
अपि निग्रहनीतिनिर्णये सुमताः पङ्क्तिगता इमे स्वतः ॥१४३॥
इतरेऽपि वसन्ति वाग्मिनो रणवीरा अथ राष्ट्रवादिनः ।
प्रतिदेशजवस्तुसंग्रहाद् इदमान्दोलनदत्तवृद्धयः ॥१४४॥
कथयन्ति सदा स्वराज्यगः किल सारो निहितोऽत्र वस्तुनि ।
बलिदानमपीह कुर्वता निजदेशप्रभवं निधीयताम् ॥१४५॥
शुभदैववशान्न तैरभूत् किमपि त्यक्तुमिहाभ्यपेक्षितम् ।
न हि वन्दितयाभवद्युतिः फलवाणिज्यविवृद्धिरप्यभूत् ॥१४६॥
अपरैस्तु धृतात्र बन्दिता, किल यष्टिप्रतिघातसम्मुखैः ।
गणयन्ति तदा स्म ते स्थिता विपणौ रुप्यकभारमर्जितम् ॥१४७॥
अथ तत्र भयेऽभ्युपस्थिते धृतवत्युग्रतनुं तु राष्ट्रवाक् ।
गमितो निजभाषणस्वरो लघुतां नम्रदलञ्च निन्दितम् ॥१४८॥
विपरीतविचारकैः कृतः क्षणसन्धिश्च समन्वयो द्रुतम् ।
किमपि स्मृतमत्र किं कृतं यदमीभिः किल गोलपीठके ॥१४९॥
अतिदूरगतं ह्यवास्तवं तदभूद्रिक्तमिहास्ति सङ्गरः ।
वसतिष्वथ ग्रामकेष्वयं भ्रमलेशोऽपि न तस्य चारमे ॥१५०॥
अथवा भयमस्ति सम्मुखे स्थितमित्यत्र परं पथि स्थिताः ।
घटना किल त्रिशसम्भवा इह राष्ट्रीयबलं व्यजिज्ञपन् ॥१५१॥

इति तस्य बलेन च स्थितेरिह साम्मुख्यमकार्ष्म शक्तितः ।
जनवर्युदितात्तु काण्डतो वयमत्यन्ततुदामुपागताः ॥१५२॥

'नगरस्ववशत्व' दानतः प्रथितश्रीलनिवासशास्त्रिणा ।
इह कापि घृणा स्फुटीकृता विदितैडिन्वरकाभिभाषणे ॥१५३॥

स विधिं विनयेन भञ्जयन्नुपयातिस्म तदा हि वन्दिताम् ।
अमुनाऽवसरे च तत्र तत्कृतमाभ्यां वयमास्म पीडिताः ॥१५४॥

मतभेदमिमे तु शास्त्रितो नयमार्गे वयमावहामहे ।
परमस्य सदैव मान्यतां मनसोरीकृतवन्त आन्तरात् ॥१५५॥

मृदु भावभृतात्स्वभाषणात् किल गोलाकृतिपीठसंसदः ।
रमजेन महाशयेन चाक्रियतास्यावसितिः सदा यथा ॥१५६॥

इह तेन समक्षरीतितः किल कांग्रेसजना निवेदिताः ।
प्रविहाय विदूषिताध्वनः प्रमिलन्त्वाश्विह भद्रवर्गतः ॥१५७॥

समये त्विह काङ्ग्रेसकं समितिं स्वामकरोत्प्रयागके ।
इतरैर्विषयैः सहात्र चाक्रियतैतद्वचने विचारणा ॥१५८॥

अहमासमवस्थितस्तदा नयनीवन्दिगृहे, तदागतः ।
श्रुतवांस्तु तदीयवृत्तकं कलकत्ताच्च पिता न्यवर्तत ॥१५९॥

अतिरुग्णतया स विष्टरे स्थित आहात्र किलोपयन्तु माम् ।
कथयन्तु सभासदो निजं मम शृण्वन्तु विचारमत्र च ॥१६०॥

इति तत्र समागतेषु चाकथयत्कोऽपि च रेग्जयाचनाम् ।
अधिकृत्य विलेख्यमुत्तरम् शिथिलीकृत्य तु भङ्गकक्रमम् ॥१६१॥

तदवेत्य पितातिरोषतः शयनाऽभ्युत्थितपूर्वगात्रकः ।
न करोमि तु सन्धिमाप्यते न हि यावत्फलमत्र राष्ट्रियम् ॥१६२॥

यदि चात्र भवाम्यथैकलो विरमाम्येष न मुक्तिसंगरात् ।
इति रोषजवोऽतिहानिकृत् सहसाऽवर्धयदस्य तापकम् ॥१६३॥

अतिथींस्तु विसृज्य तन्मतात् स चिकित्साधिकृतोऽखिलो जनः ।
पितरं मम तत्र सद्मनि स्थितमेकं व्यसृजद्विरामदः ॥१६४॥

इति शासनमैच्छदित्यदो मम मुक्तिर्भवितैव सत्वरम् ।
घटिकादशकात्समुज्झितः पितुरस्वास्थ्यनिमित्ततः पुनः ॥१७८॥

कमलापि तदेव लाक्ष्मणे पुरि षड्विंशदिनानि वन्दिताम् ।
अनुभाव्य विमोचिताऽभवत् समितेः साप्यभवत्सभासदा ॥१७९॥

ज्ञानेश्वरीपद्यमयानुवादसम्पादकः शोधकरश्च तस्याम्
गीर्वाणमुख्याश्रयणाद् गणेशप्रसादनाम्नोऽग्रकवेः कृतौ यः ।
तेनैव क्लृप्ते किलनेहरूश्रीकाव्येऽत्र सर्गो विगतः समाप्तिम्
प्रान्ते तु युक्ते करबन्धगाथामयो मितो नेत्रमहेशनेत्रैः ॥

बहवः पितृचिन्तयातुरास्त्वरितं गन्तुमिह प्रयागकम्।
अभिलष्य तदेव ते समे समितौ तत्र निमन्त्रितास्तदा ॥१२॥
दिवसद्वयतः समागताः कतिचिन्नः सविधस्थसद्मनि।
अधिवेशनवृन्दमारभन्त च यामिस्म कदाचिदेष्वहम् ॥१३॥
परमात्मनि नैकचिन्तनैर्व्यथिते ग्रस्त इवात्र किञ्चन।
उपयोगि न कर्तुमीश्वरो नहि किञ्चिच्च स संस्मराम्यपि ॥१४॥
प्रमिनोमि निदेशभञ्जनं सततं चालयितुं कृतान् क्रमान्।
सुहृदः सहचारिणश्च मे किल मुक्ता अधुना विनिग्रहात् ॥१५॥
त्वरितं पुनरत्र निग्रहे परिपात्याः पितरं दिदृक्षवः।
विहितान्तिमदर्शनाश्च तेऽन्तिममाशीर्वचनं जिघृक्षवः ॥१६॥
उषसि क्रमशः प्रदोषके पितरं द्वित्रजनाः समागमन्।
स च सङ्गिसखीन्पुरातनान् विहितस्वागतकानवेशयम् ॥१७॥
स च तान्निजसङ्गिनः सखीन् उपवेश्यापि शतं सुखासने।
परिपुष्टकलेवरोऽप्यहो द्युतिशून्येन मुखेन चान्वगात् ॥१८॥
परिचिन्त्य च तान् स्वसङ्गिनो द्युतिरायाति पुरा च तन्मुखे।
नमतीव शिरः करौ पुनः सहयुङ्क्ते त्वभिवादनोत्सुकौ ॥१९॥
अतिवक्तुमसौ न च प्रभुः कतिचित्तत्र पदानि वक्त्यसौ।
परिहासवचांसि पूर्ववत् निरयन्तेऽस्य मुखान्निरन्तरम् ॥२०॥
स्थित एष च वृद्धकेसरी वपुषात्यन्तिकविक्षतो यथा।
ह्रसिताखिलशक्तिरास्थितः परमद्यापि वरं प्रतिष्ठितः ॥२१॥
नरसिंह इवाथ सिंहवत् परिपश्यामि यदैव तं पुरः।
किमयं विमृशन् भवेदिति स्फुरति प्रश्नवरस्तदैष मे ॥२२॥
किमयं नहि कर्मणां रुचिं श्रयितुं चास्त्यधुना क्षमो मनाक्।
इदमत्र मम स्फुटं त्वभात् यदयं स्वात्मनि युध्यते स्वयम् ॥२३॥
प्रतिवस्तु निरेति तद्ग्रहात् स च तत्तत्स्ववशं निनीषति।
रणमेष चचार चान्ततः परिपूर्तिं न गतः कदाप्यसौ ॥२४॥
वदतः स्फुटतो मया सह स्वगतं सङ्कुचितेव वक्ति वाक्।
स विलिख्य विलिख्य पत्रके प्रकटीकर्तुमथैच्छदाशयम् ॥२५॥

वयमेव ततः प्रयागकं शव आवेष्टयत राष्ट्रियध्वजे।
तदुपर्यंपरो महाध्वजो व्यजनत्वं धृतवान् सुषुप्तके ॥३९॥

बहुमीलपथे महानहो जनसम्मर्दं उपेयिवानिमम्।
निजभावभृतं किलाञ्जलिं स समर्प्यैव निरुध्यते क्वचित् ॥४०॥

गृहमेत्य कृतोऽन्तिमो विधिस्त्वथ गङ्गामुपयातुमक्रमन्।
अतिशीतदिनानि सान्ध्यकं तिमिरं व्याप्तमथात्र सङ्गमे ॥४१॥

स चिताग्निरथोन्नतैर्निजैस्तमवालेट् किल हेतिमण्डलैः।
अभवद्विमलं वपुश्च तद् धृतमाहात्म्यमशेषभारते ॥४२॥

लघुकं हृदयस्पृशं महान् किल गान्धिः कृतवान् प्रभाषणम्।
वयमागमिताः स्वतो गृहान् धृतमौनाश्च विरक्तवृत्तयः ॥४३॥

गगनेऽगणितान्यथ तारकाण्यतितेजस्वितया च भान्त्यपि।
जगतोऽस्थिरतामिवाब्रुवन् लघुभिः स्पन्दितकान्तिभिः कणैः ॥४४॥

जननीमथ मां समागतं सहसंवेदनया दलायुतम्।
प्रिय-इर्विनदम्पती निजं मृदुसन्देशमवक्षतां प्रसूम् ॥४५॥

अनया च सहानुभूतिभिः सह सद्भावनया शुचां रुजा।
शिथिलीक्रियते स्म येन तां सहतामेष जनोऽद्य वञ्चितः ॥४६॥

अतिशान्तिरथातिसान्त्वनाऽधिगता गान्धिसमीपवर्तिभिः।
जननी च वयं समे जना बलमाप्ताः किल सोढुमापदम् ॥४७॥

अधुना न पितास्ति मे क्वचित् किल नेता सत्तु समक्षमक्षमः।
सुतया प्रियया सहागमं किल मासत्रितयात्तु सिंहलान् ॥४८॥

ससुहृद् दिवसानयापयामनुवारासहितैर्लियापदे।
समरोचत मह्यमास्थलं पितुरेतत्परमं हितावहम् ॥४९॥

तमहं नु किमाह्वयेऽत्र नो स हि श्रान्तोऽतितरां स्थितो भवेत्।
इति चिन्तयता विनिश्चितं किल तस्मै हृदि तारप्रेषणम् ॥५०॥

सहसा स्मृतमद्य मे पिता क्व नु वा जीवति यं समाह्वये।
दलमेकमुपागतं तु मे प्रतियातस्य ततः प्रयागके ॥५१॥

तदपूर्वमभूत् पितुः कराक्षरनिर्देशितप्रापकाह्वयम्।
बहुभिः किल लक्ष्मभिश्चितं बहुमुद्राभिरथाङ्कितं च तत् ॥५२॥

दिल्लीसन्धिः

मालिनी

चतुस्त्रिंशः सर्गः

कुदिनकुसमयेऽस्मिन् गोलपीठस्य केचिद्
भरतभुवि सुजाताः सांसदा मोहमय्याम् ।
सपदि जलधिपोतादागतास्तेऽवतीर्य
द्रुतमिह सरसप्रूशास्त्रिणो तु प्रयागम् ॥ १ ॥

तदितरपुरुषा मे विस्मृताः विप्रकर्षा-
दभवदिह च गान्धिः सांसदैः कार्यगोष्ठ्याः ।
इह च मम गृहेऽभूद् गुप्त एवाधिवेशो-
ऽखिलमपि सदसस्तद्वृत्तमत्रोदितं तैः ॥ २ ॥

परमिह घटनैकाऽऽरम्भ एवोपजाता
प्रकटयति स यस्यां खिन्नतां श्रीनिवासः ।
अकथयदयमात्मप्रत्ययस्यैव दोषं
यदिह मयि समायात्येव सङ्गप्रभावः ॥ ३ ॥

प्रवचनमधिकृत्यैडिन्वरायाः स्वकीयं
स खलु विशदमेवाब्रूत तत्सावधानः ।
अतिशयवचने वा शाब्दिकाडम्बरे वा
वहति मम मनस्तत्प्रब्रवीम्येष तादृक् ॥ ४ ॥

प्रतिनिधिभिरमीभिर्गोलपीठस्य किञ्चि-
त्प्रणिगदितमभून्नो मार्मिकं वा रहस्यम् ।
यदविदितचरं नः, किन्तु तैरेतदुक्तं
यदिह किमवगुण्ठेऽसर्जि षड्यन्त्रजातम् ॥ ५ ॥

किमकुरुत च लार्डः किं सरोवाऽयुकोऽसा
विति रहसि कृतानां सूचनामात्रमाप्तम् ।
श्रमिकसुहृद एते भारतीयास्मदीया
ददति खलु महत्त्वं व्यक्तिगे जीवने ते ॥ ६ ॥

ननुनचवचनास्तेऽपि श्रिता नोपहासं
नहि मनसि च लेशं तेऽवमानस्य यान्ति ।
परिचितनिजशक्तिर्गान्धिरिच्छत्यवश्यं
निजविमतजनानामागमं सङ्गमञ्च ॥ १४ ॥

ननु निजलघुकार्ये व्यक्तिभिर्वर्तनं तद्
भवति किमपि साध्यं वस्तु तद्वर्ततेऽन्यत् ।
इह ब्रिटिशप्रभुत्वेऽमूर्तवस्तुन्यमोघे
व्यवहृतिरपरं स्याद् वस्तु तत्सर्वथैव ॥ १५ ॥

इति मनसि विदन्नैवेष आशान्वितः सन्
मिलितुमगमदर्विन्नामकं तं महान्तम् ।
सविनयविधिभङ्गान्दोलनं प्रस्तुतं तद्
शिथिलितमधुनाऽऽसीत् सन्धिवार्ताप्रवृत्तेः ॥ १६ ॥

उभयमिलनकारी तूर्णमासीत्प्रबन्धः
प्रचलित इह दिल्लीं प्रत्यसौ विश्ववन्द्यः ।
अकथयदिह मां चेत्कार्यसंचालनार्थं
भवति गहनवार्ता तत्र सन्धावनेन ॥ १७ ॥

त्वरितमिह सदस्यानाह्वयिष्यामि युष्मान्
कतिपयदिवसान्ते प्राप्तमाह्वानमेतत् ।
वयमिह न्युषिताः स्मश्चैकविंशत्यहानि
प्रतिदिनमभिलामाप्यालपामापि दीर्घम् ॥ १८ ॥

अमिलदिह च गान्धिर्नैकधा श्रीविनेन
त्रिचतुरदिवसानामन्तरेणापि जातु ।
विमृशति सरकारो होन्डियाकार्यशाला-
स्थितपुरुषविशेषैर्निर्णयार्थं क्रियायाः ॥ १९ ॥

क्वचिदहनि किलैकः शब्द एवात्र बाधा-
मजनयदिह यत्रानेकघस्रा व्यतीयुः ।
इह सविनयभङ्गस्यैव वक्तुं किलेष्टे
स्थगनमुदितमासीद् गान्धिना वस्तुतत्त्वम् ॥२०॥

नहि सविनयभंगो नाम बाणोऽन्तिमोऽयं
सुशक इह विस्रष्टुं नापि शक्यः प्रयोक्तुम् ।
भरतभुवि ततोन्यन्नायुधं योद्धुमास्ते
स्थगनपदमिहैकं भासते स्म प्रयोज्यम् ॥ २० ।

इति समुचितकाले तत्प्रयोगः क्रियेता-
प्यनुचितसमयेऽसौ स्यान्निरुद्धोऽपि लोकैः ।
स्थगनपदमिदीदं योगरोधार्थमाहे-
त्युभयजनहितार्थं युज्यते तत्प्रयोगः ॥ २१ ॥

इह सविनयभङ्गं सर्वथा रोद्धुमिच्छन्
स्थगनपदविरोधं त्विर्विनोऽसौ करोति ।
परमिह सतु गान्धिस्तत्प्रयोगाभिकांक्षी
स्थगनपदनिवेशे स्वाग्रहं नो जहाति ॥ २२ ॥

चरमनियमने च स्वीकृतोऽभूत्स रोधः
स्थगनपदसमानं योऽर्थमन्यत्र धत्ते ।
न वसनमदिरादीनां च वैदेशिकानां
विपणिषु धरणा सा दास्यते भाविकाले ॥ २३ ॥

समय इह स भूयान् सन्धिसंयोजनानाम्
क्षणिकविषयवस्तूनां विशेषावधाने ।
व्यगमदिति न मूले वस्तूनि क्वापि चिन्ता
ऽक्रियत मनसिकृत्यास्मात्परस्तात्स सन्धिः ॥ २४ ॥

प्रतिदिवसविरोधो रोत्स्यते चानुकूले
त्विह समयपरिस्थित्यादिके मूलवस्तु ।
अपि समवहितं स्यादित्यमन्यामहीदं
मिलनमुभयनेत्रोस्तद्विरामाख्यसन्धिम् ॥ २५ ॥

सति हि विरमसन्धो मूलदः प्रश्नजालः
सकलमतिमतां स्याद्वै विमर्शास्पदं नः ।
प्रतिविधपुरुषाश्चाभ्यागमन्नद्य दिल्लीं
प्रति प्रणिहितचित्ताः केऽपि वैदेशिकास्ते ॥ २६ ॥

पुनरिह सविशेषामेरिकापत्रकाराः
मुनिजनव्यवहारं वीक्ष्य तेऽस्मासु रुष्टाः ।
अभिदधति च तेऽस्मान् किं न जानीथ यूयं
निखिलमपि तु वृत्तं केन्द्रतः प्राप्तपूर्वम् ॥ २७ ॥

तदपि च ऋतमासीद्वै महान्तो महान्तः
सपदि पदभृतस्ते गान्धिसम्मानकृष्टाः ।
इह परमसुभाग्यं जाग्रदासीद्धि गान्धे-
रिति तमनुगतानां दर्शनं मोदहेतुः ॥ २८ ॥

उपचितमिव दृष्टं काङ्ग्रेसप्रभुत्वं
क इह खलु विवेद स्यान्नु किं किं त्ववश्यम् ।
हितकरतरमेतत्काङ्ग्रेसानुकूल्यम्
तदधिकृतजनानां मित्रता वर्तनञ्च ॥ २९ ॥

परमिह [illegible] तत्परीवृत्तिरासीत्
[illegible]दर्शस्ते घृणां काङ्ग्रेसे ।
सकलमपि [illegible]स्य ते निन्दयन्तो
ऽब्रुवत [illegible] अलु कश्चिन्नोऽस्ति सम्बन्ध एतैः ॥ ३० ॥

इति नवघटनाभिः सम्प्रदायैकवादा
अपि सपदि विनिद्राश्चाप्यभुः शङ्किताश्च ।
क्वचिदुपनमतीयं या व्यवस्था पुरस्ता-
दिह किमपि समुच्चं स्थानमेषां न हि स्यात् ॥ ३१ ॥

इति बहुभिरुपेतो गान्धिराश्वासितश्च
यदिह कमपि सन्धिं सम्प्रदायेऽपि कर्तुम् ।
वयमिह निरताः स्मः काम्यते चेद् भवद्भि-
र्न खलु भवति सन्धौ तर्हि कश्चित्प्रबाधः ॥ ३२ ॥

अथ विविधविधानां मानवानां प्रवाहो
वहति तमनसारिद्राक्तरावा सभारात् ।
इह वयमवसाम श्रीलगान्धेः समपी
सति समवसरे चाद्राक्ष्म चास्पाक्ष्म लाभम् ॥ ३३ ॥

स्मृतिपथमथ नेदं याति मस्तिष्कमध्ये
विनिहितमिह किंस्विद्रूपमस्येति जाने।
तदपि तदभिमान्यं त्वेतदासीदवश्य
मिति विरचितरूपं स्यादनासक्तमेतत् ॥ ४१ ॥

अभिलषति न किञ्चिद्यत्फलं तेन तस्यो-
भयदिशि बलवत्त्वं स्यात्प्रजायां च राज्ये।
निजचरितबलैर्नैदञ्च सच्छासनानां
प्रभवति हितमार्गप्रेरणेनोपकर्तुम् ॥ ४२ ॥

इयमनुपमरूपा कल्पनास्तेऽसुबोधा
ह्यगणितगुणशीलाप्यस्ति काठिन्यपूर्णा।
मम लगति किलैषा वञ्चिता स्यात्सभापि
स्वहितदिशि सदस्यैः कैश्चिदाकर्षिता स्यात् ॥४३॥

परमिह यदि तस्य व्यावहारिक्यरूपं
क्वचन दिशि निरस्याचिन्त्यते तर्हि गान्धेः।
अभिमतमधिगन्तुं सद्विचाराश्रयं नः
किमपि भवति साह्यं प्राप्तमस्मादवश्यम् ॥ ४४ ॥

इदमतिविपरीतं साम्प्रतिक्या दलस्य
क्वचिदपि नवक्लृप्तेरव्यवस्थात इत्थम्।
इदमिह नियतायाः कल्पनायाः स्वरूपं
प्रकटयितुमिह स्यान् नैतिकं वाश्विकं वा ॥ ४५ ॥

इह खलु नृपसत्ताप्राप्तिमाधृत्य क्लृप्ता
त्विदमपि विपरीतं तद् व्यवस्थाध्वतोऽपि।
य इह जगति लभ्यः श्र्यार एच्. टानिशब्दै-
'रधिकतरखराणां गुञ्जनाभोजनं तत्' ॥ ४६ ॥

प्रतिनियततयेदं लोकतन्त्रं च गान्धे-
र्भवति न नृपनीतिः सर्वथाध्यात्मिकं तत्।
नहि बहुमतचिन्ता, नापि सङ्ख्यानुयानं
त्विह प्रतिनिधितापि स्यान्न सामान्यभावात् ।४७॥

तदवतरणिकेयं त्यागसेवाविशेषः
स च चरितबलेनाप्नोति कार्येषु सिद्धिम् ।
परमगहनधर्मः कीर्तितो लोकसेवा
चरितबलमथोक्तं सर्वतस्तद् बलिष्ठम् ।। ४८ ।।

कतितयदिवसात्प्राङ्मुद्रिते स्वीयलेखे
विवृतिरुपहृतास्ते लोकतन्त्रस्य तेन ।
स निजमिह जनैरा लोकतन्त्रैकवादं
मनुत इति वदत्येषोऽथ मानुष्यकेऽस्मिन् ।। ४८ ।।

अधनतरजनैः स्वात्मानुमेलोत्सुकश्चा-
धिकतरसुविधाभिर्जीवनायापनोत्कः ।
तदनु समतलं च प्रापितुं स्वं प्रयत्ना-
दधिकृतिरिह लभ्या चेत्तदा स्याभियोगः ।। ४९ ।।

पुनरिह विविनक्तीत्थं स तल्लोकतन्त्रं
वयमिह विदिताः स्यामैव कांग्रेसकस्य ।
प्रतिशरदधिवेशेऽवश्यमागन्तुकीतः
प्रतिनिधिजनसंख्यातो न मान्या प्रतिष्ठा ।। ५० ।।

अपितु चिरधृतानां तस्य सेवाव्रतानां
परिणतिरवधार्या वर्धमानाऽनुवारम् ।
अविफलमिह सत्यं पाश्चिमं लोकतन्त्रं
परमिह निकषे तद्रोप्यमाणं सदास्ते ।। ५१ ।।

भरतभुवि भवेत्तत्स्पष्टसाफल्यदृष्टया
विकसितिरिह विज्ञानस्य तस्येति याचे ।
प्रतिनियतफले स्तो लोकतन्त्रस्य नेमे
प्रकृतसमयनीतिभ्रंशपाखण्डरूपे ।। ५२ ।।

न च बहुतरसंख्या लोकतन्त्रे परीष्टिः
यदि कतिपयलोकाः प्रातिनिध्यं वहन्ति ।
निजनिधिजनभावाशादिकप्रातिनिध्यं
विदधति सदिदं स्यात्सङ्गतं लोकतन्त्रे ।। ५३ ।।

नहि बलमनुयोज्य प्रोल्लसेल्लोकतन्त्रं
न खलु भवति बाह्यं नूनमाभ्यन्तरं तत् ।
भरतभुवि न नूनं पाश्चिमं लोकतन्त्रं
कथयति स यथेदं तत्तथैवावसेयम् ॥ ५४ ॥

भवति किल कुतूहल्येव चेत् साम्यवादैः
भवति हि छविरेकाऽऽध्यात्मिकी तावदस्मिन् ।
इह कतिचन साम्ये श्रद्दधाना जनाना-
मभिलषितमथापेक्ष्यं च पक्षं विदध्युः ॥ ५५ ॥

अविदितमिदमास्ते नूनमेषां समत्वं
भवति नहि च तद्दूरङ्गमं तावदल्पम् ।
अपि च भवति भेदो दर्शने प्रापणेऽस्य
प्रथमदृशि हि साध्ये साधनेऽप्यस्ति भेदः ॥ ५६ ॥

इह भवति न लाभः साधनानां विशेषाद्
भरतभुवि कदाचित्कायशक्तिप्रयोगः ।
इति भवतु स गान्धिर्लोकतन्त्री न वाऽसौ,
स खलु कृषकवर्गप्रातिनिध्यं करोति ॥ ५७ ॥

स खलु शतशतानां तावदेषां प्रबुद्धा-
मथ च सुखशयानां पाति संकल्पशक्तिम् ।
स च प्रतिनिधिताया अस्ति तावद्विदूरे,
भवति हि प्रतिमानं कोटिकोटेः सजीवम् ॥ ५८ ॥

न स कृषक इहास्ते, तीव्रबुद्धिर्मनुष्यः
सुरुचिसहृदयोऽसावुच्चभावस्तपस्वी ।
अतिविशददृगेषो दान्तचेतोविकारो
ह्यभवदतिशयेनाध्यात्मिकप्रेरकश्च ॥ ५९ ॥

अतिशयबलशालिव्यक्तिता चुम्बकीया
प्रतिजनमपि कर्षत्यात्मदिश्येव दूरात् ।
अधिपरहृदयञ्चाश्चर्यहेतुं कृतज्ञ-
त्वसहितममत्वं सर्वथोत्पादयन्ती ॥ ६० ॥

तदपि स कृषकोऽस्ति प्रेक्षते तस्य दृष्ट्या
कतिपयचस्मेष्वाजीवनस्यान्ध एव ।
परमिदमिह तेषां भारतं, भारतं स्वं
वरमिह परिपश्यत्यस्य कम्पैः प्रकम्पम् ॥ ६१ ॥

स्थितिगतसहजांतःस्फूर्तिमप्येष वेद
समुचितसमये चोत्प्रेक्षते कर्म कर्तुम् ।
न खलु ब्रिटिशशिष्टचै स्वान्तिक स्थेषु मित्रे-
ष्वपि भवति समस्या वा कदाचित्प्रहेली ॥ ६२ ॥

क्वचिदपि परदेशे नाभवत्स्थानमस्य
स्फुरति यदिह देशेऽद्यापि सन्देशवाहान् ।
व्रतरतपुरुषान्वा पापमुक्तेरहिंसा-
सदृशकरुणभावान् भारतीया विदन्ति ॥ ६३ ॥

सविनयहृदयेनाप्याद्रियन्ते किलैतान्
प्रतिभृतमिदमीयं वाङ्ममं तत्कथाभिः ।
अपि कठिनतपोभिस्त्यागभूतैर्व्रतैश्च
प्रचलितसुरसत्तासाह्यतः कम्पिता भूः ॥ ६४ ॥

अहमिह च विचित्रादक्षयादात्मकोषात्
प्रवहदखिलकार्यां शक्तिमालोकयामि ।
किमपि बलममुष्मिन् भावयाम्येष गान्धौ
सपदि मुनिकथास्ता मत्स्मृतिं व्याप्नुवन्ति ॥ ६५ ॥

न खलु स वसुधाया अस्ति सामान्यमर्त्यः
स तु विरलतरः कोऽप्यस्ति दिव्यो मनुष्यः ।
बहुषु च समयेषु प्राप्यतेऽदस्तदक्ष्णोः
पुनरविदितशक्तेर्दर्शनं चेति मन्ये ॥ ६६ ॥

भरतभुवि किलास्यां ग्रामसुग्रामवत्या-
मपि च नवनवोद्योगैः श्रितायाममुष्याम् ।
प्रतिपदमिह मुद्राऽस्त्यङ्किता कार्षकीयं
निजसुतमपि देवं पूजयन्ती स्थितेयम् ॥ ६७ ॥

अनवलयदिहास्मत्संस्मृतीस्ताः पुराणी-
मंलिनसुमलिनाभाश्चाददर्शत्स देशम् ।
निजछविमपि, चापद्ध्वंस्तभूतां च सप्त-
स्वरभरितसुगीतं गायतः सान्त्वनाऽऽसीत् ॥ ६८ ॥

अपि च निजभविष्यद्गूहितं स्वप्नजालं
मधुरमधुरमन्तः पश्यतः शान्तिरागात् ।
परमिदमवतीर्यास्मिन्मनांस्याशयासौ
अबलयदथ कायं मोहयन्नो भविष्यम् ॥ ६९ ॥

इटलिगतमुखद्वन्द्वाभजैनस्सुराभो
भरतजनपदोऽसौ दिग्द्वयं पश्यति स्म ।
चरमदिशि च भूतं स्वं भविष्यं तथादौ
दिशि कलितवताप्यालम्बि सान्त्वं क्षणाय ॥ ७० ॥

वयमपि बहवोऽस्याः कृष्टिदृष्टेर्विभिन्ना
निजसुचिरतनाचारं विचारं च धर्मम् ।
इति सकलमभून्नः पारदेश्यं च हेयं ।
वयमिह नवभासः स्मः किलेति ब्रवीमः ॥ ७१ ॥

प्रगतिप्रभृति भाषामाध्यमैश्चिन्तयामः
कृषकदृशमिमे तां मन्महे च प्रतीचीम् ।
कतिपयमनुजाश्चालोकयन्ते समाजां
प्रथममवदधानाः साम्यवादानुकूलम् ॥ ७२ ॥

स्थितिरियमिह तस्यां प्रश्न एष प्रसूतः
वयमिह कथमास्थां गान्धिनीतावबाप्ताः ।
कथमिह बहुधा तद्भक्तयश्चानुगाः स्मः
कठिनमिह च दातुं तत्त्रयस्योत्तराणि ॥ ७३ ॥

न खलु परिचिनोति श्रीलगान्धि जनो यः
स च न समुपयायादुत्तरेणात्र तोषम् ।
भवति हि महदेतद्व्यक्तितत्त्वं यदीया
भवति न विवृतिः सा, वस्त्वनिर्वाच्यमेतत् ॥ ७४ ॥

मनुजमनसि यस्या जायतेऽत्राधिकारः
भवति जगति शक्तिर्व्यक्तितानामिकेयम् ।
इयमतिपरिमाणा वर्तते श्रीलगान्धौ
स हि बहुविधरूपो भासतेऽभ्यागतानाम् ॥ ७५ ॥

इदमवितथमेषां कर्षतीहान्तरङ्गं
परममुमुपयातास्तत्र चैवास्थिता ये ।
ध्रुवमवसितिरेषा बौद्धिकप्रत्ययोत्था,
इदमपि ऋतमेते सम्मतास्तेन नासन् ॥ ७६ ॥

न खलु न खलु सिद्धान्तैर्न चादर्शरूपै
र्न च पुनरवयन्त्येनं बहुत्वेन सम्यक् ।
तदपि यदिह कर्मारब्धमेतेन लोके
तदखिलमपि मूर्तं चापि चान्वक्षमस्ति ॥ ७७ ॥

तदवयितुमिहार्हद्बुद्धिरत्राद्रियाणा
चिरकृतिरहिता याऽप्राणया राजनीत्या ।
परिकलितसुरूपा बुद्धिरेषा वराका
किमपि जगति कार्यं स्वागतेनैव साऽर्चेत् ॥ ७८ ॥

पुनरिह भुवि वीरत्वेन चैवोपयोगात्
त्रिजगति महनीये कर्मणीहानुवाच्यम् ।
किमिह यमभितः स्यान्नैतिकत्वस्य तेजः
प्रसभमुपगतं स्यान्नित्यदेदीप्यमानम् ॥ ७९ ॥

मतिमपि परिभूयाद् भावनामप्यसौ चे-
त्यपि स च निजकार्यौचित्यमाधान्मनःसु ।
वयमनु चलितास्तं किन्तु तज्जीवनस्य
क्रममिह खलु नाङ्गीकर्तुमेतेऽलमास्म ॥ ८० ॥

इह भुवि यदि कार्यं मूलभूताद्विचारात्
पृथगवसितिमीयान्नैष योग्यो विधिः स्यात् ।
अयमिह कठिनत्वं हार्दसङ्घर्षमन्त-
जनयति नियमेनेत्यस्ति मिथ्यापथोऽयम् ॥ ८१ ॥

वयमिदमपि चाशास्मह्यय गान्धिरास्ते
स्थितिषु विचलितासु प्रस्थित: कर्मयोगी ।
इति वयमनुयामस्तं तु पन्थानमारात्
य इह समुचितो न: प्रत्यभात्पूर्वमेव ॥ ८२ ॥

इयदवधि स येन प्राचलत्सैष पन्था
इह समुचित आसीदग्रतश्चेत् कदाचित् ।
पृथगपि चलनीयं स्यात्पथा भिन्नकेन
तदपि भवतु तस्याकल्पनं मूर्खतैव ॥ ८३ ॥

प्रकटयति किलैतन्नाभवन्नो विचार:
सपदि विनियतास्ते नाप्यहो तेऽवदाता: ।
मनसि विनिहितासीद्भावना तर्कशुद्धो
भवतु नवपथो वा मास्तु गान्धे: स इष्ट: ॥ ८४ ॥

भरत भुवमिमां चास्मानपेक्ष्यैष सम्यक्
सपदि परिचिनोतीत्येष नैष्यत्यशुद्धम् ।
भवति य इह भक्तेश्चाधिकारीत्थमस्मिन्
ध्रुवमखिलजनाकाङ्क्षाभ्यपेक्षामति: स्यात् ॥८५॥

यदि वयमिह गान्धेराभिमत्यं विचारे-
ष्वनुकलयितवन्तस्तर्हि लोकस्य चापि ।
इति मनसि विचारं चाप्यकुर्मेह तच्चा-
भवदिव न च साभादाभिमत्योपलब्धि: ॥ ८६ ॥

स हि कृषकदृशा संपश्यतीत्यस्ति सत्यम्
परमिह जनुषाविद्रोहण: क्रान्तिकारी ।
गुरुगुरुपरिवृत्त्यै बद्धकक्षा भवन्ति,
न हि परिणतिशङ्का काचिदेतान् रुणद्धि ॥ ८७ ॥

असममपि यथासौ लोकमेकत्र सूत्रे
नियमयति विबुद्ध्यैकत्र लाभान्न वीर्यात् ।
मधुरदृगिह दृष्टौ, मिष्टवाक्चानुशिष्टौ
स्वयमनुचरणेन प्रेरयत्येष मार्गे ॥ ८८ ॥

ग्रहविधुग्रहविध्वोरङ्किते वत्सरे बै
स्मरति मम मनो यद्दाससंवाहकेति-
प्रथित उमरसोमानीह मुम्बा पुरीस्थः
सहि युगपरिवृत्ति द्रष्टुमास्ते न जीवन् ॥ ८९ ॥

वयमतिशयधन्याः स्मोऽद्य पश्याम एनां
स्थितिगतिमधुनैकत्रिंशबर्षे विलोक्य ।
हृदयमनुभवत्युल्लासपूर्णाभिमानं
किमपि नव इवायादेष वर्षोऽद्भुतः सन् ॥ ९० ॥

इह लकुटमपूर्वं भ्रामयन्निन्द्रजालो-
चितमतिपरिवृत्ति दर्शयत्येष गान्धिः ।
न खलु ब्रिटिशशिष्टेरन्तिमा भूत्पराप्तिः
समभवदभिमानो हेतुनानेन देशे ॥ ९१ ॥

वयमिदमभिमानं मातृशक्तौ च यूनां
महसि, तरसि चास्मद्बालकानां विदध्मः ।
स्वजनपदजनेषु प्रोल्लसत्साहसेषु
वितरितबहुयोगेष्वेव कुर्मोऽतिमात्रम् ॥ ९२ ॥

अयमभवदिहाध्यात्मिक्यलाभो ह्यपूर्वो-
ऽखिलसमयमहार्घ्यो विश्वलोकातिमूल्यः ।
परमिह दलितानां क्रीतदासोपमानां
द्विगुणितहितमासीन्नूनमस्माकमेतत् ॥ ९३ ॥

भवति मनसि चिन्ता भूय एषेह मा भूत्
तदपशकुनमेयाद्येन लाभो वियोगम् ।
अदयत मयि गान्धिः प्राचकाशन्ममत्वं
पितृमरणदिनान्यस्मत्समीपं त्वनैषीत् ॥ ९४ ॥

मम यदपि विवक्षावस्त्वभूत्तच्छृणोति
स्म स, सपदि च पूर्णं तत्करोति स्म मान्यः ।
इति मनसि ममाभूच्चेत्सखायस्तथाहं
तमिह परिभवामस्त्वहंयं कोमलः स्यात् ॥ ९५ ॥

अपि तदभिमतः स्यात्किं समाजैकवादः,
स्वयमपि स समाश्वासं किलादात्क्रमेण ।
अधिगतपथ एषोऽग्रे सरिष्यामि मन्दं
इति च मनसि मेऽभूत्प्राप्तकालं तदस्ति ॥ ९६ ॥

क्वचन दिवस एष स्वीकरिष्यत्यवश्यं
समय इह समाजस्यैव वादस्य सोऽयम् ।
अहमिह समपश्यं नाभ्युपायं किलान्यं
य इह परिहरेतान्यायहिंसादि दुःखम् ॥ ९७ ॥

भवतु मतविभेदः साधनेष्वस्य कश्चित्
परमिह स मतैक्यं धास्यते साध्यलक्ष्ये ।
इदमहमवधार्यावितिषि प्रागिदानीं
मम लगति स भेदः साध्यलक्ष्येऽपि तस्य ॥ ९८ ॥

पुनरपि फरवर्यामेकत्रिंशस्य दिल्ल्यां
वयमिह सह गान्धीर्विन्समस्यां प्रयामः ।
अगमदियमकस्मादेव रोधं तदानीं
बहुतिथसमयेऽसौ नाह्वयद् गान्धिमिर्विन् ॥ ९९ ॥

अलगदखिलवार्ता भङ्गमेवास्ति याता
कृतिसमितिसदस्या यातुकामा अभूवन् ।
प्रतिगमन-पुरस्ताद् भाविकार्यक्रमं स्वं
नियमयितुमिहाज्ञाभङ्गके चोपयातुम् ॥ १०० ॥

समितिरभवदाहूता विचाराः कृताश्च
इह हि विदितमात्रे सङ्गभङ्गस्य वृत्त ।
क्षणमपि नहि तिष्ठेत्कश्चिदस्मासु दिल्या-
मिति पुनरवकाशो नाधिवेशस्य नः स्यात् ॥ १०१ ॥

वयमथ विनियन्तुं स्वं स्वमाशामधामा-
क्रमणमिह कठोरं काङ्ग्रसे सम्भवीति ।
दमनमिदमिदानीं स्यादपूर्वं किलेति
खलु वयममिलामान्त्येन रूपेण तत्र ॥ १०२ ॥

कतिचन पुरुषास्ते जागरूका इहासन्
इति वरमचलत्सा सुव्यवस्था तदानीम् ।
वयमिह सरहस्यं कार्यमत्यन्तगुप्त्या
सह सफलतया तत्साधु सञ्चालयामः ॥ ११० ॥

कियदवधि परं नः स्पष्टमान्दोलनं त-
न्न मिलति सरहस्यैस्तैस्तु चेष्टाविशेषैः ।
अपि च विमतमासीदेतदारात्तु गान्धे-
रिति विवशति केन्द्रे कुर्वते स्थानलोकाः ॥ १११ ॥

सुपथमितरथा ते प्राप्तुमादेशजातं
त्वधिकृतिकृतरक्षं धिष्ठिता वीक्षमाणाः ।
सति च रहसि केन्द्रात्सम्भवे ते निदेशा
नियतजनपदेषु प्रेष्यमाणा अभूवन् ॥ ११२ ॥

इति वयमिममन्यांश्चापि कांश्चिन्निजेष्टान्
समितिषु सममूरीकार्यं नैतान् प्रकाशम् ।
न च कमपि प्रयोगं प्रापितान् वस्तुवृत्त्या
निजनिजनगराद्यं गन्तुमास्म प्रसक्ताः ॥ ११३ ॥

इह समयविशेषे प्राप्तमामन्त्रणं तत्
तडिदिव मुहुरिर्विन्गान्धिवार्ता प्रवृत्ता ।
चिरनिशि खलु वायस्रायहर्म्यान्निवृत्ते
रवसरमथ गान्धेर्वीक्षमाणाः स्थिताः स्मः ॥ ११४ ॥

स च चिरनिशि वासेऽभ्येत्य सम्बोध्य चास्मान्
अकथयदयि सभ्याः सन्धिरास्ते निवृत्तः ।
विवरणमथ दृष्टं तत्र धारा अनेकाः
सुचिरसहकथाभिश्चर्चिता ज्ञातपूर्वाः ॥ ११५ ॥

परमपरपदोक्तां तत्र संरक्षणार्थी
बलवदभिहतोऽहं तां निशम्यैव धाराम् ।
नहि कथमपि तस्या उद्यतोऽहं कदाचित्
न च किमपि तदोक्त्वा तत्र सर्वे प्रसुप्ताः ॥ ११६ ॥

अथ किमपि च कर्तुं क्वावकाशोऽवशिष्ट-
स्त्वभवदिह हि वार्ता नेतृभिः स्वीकृता च ।
क्वचिदनभिमतायामप्यमुष्यां न किञ्चित्
प्रतिकृतिविषयत्वाभावतः शक्यमासीत् ॥ ११७ ॥

किमिह निजविरोधं ज्ञापयामोऽत्र सन्धौ
पृथगिह नु भवामो घोषयामो नु भेदम् ।
इति सपदि कृते स्यात्कस्यचिन्नाम तोषः
परमिह चरमेऽस्मिन्निर्णये तस्य किं स्यात् ॥ ११८ ॥

कतिपयदिवसेभ्यो भङ्गजान्दोलनं तत्
स्थगितमिह न, रुद्धं सर्वकालस्य चासीत् ।
जगति च परिघोषं कर्तुमासीत्समर्थं
ब्रिटिशप्रभुपदं तद् गान्धिसन्धेश्च वृत्तम् ॥ ११९ ॥

कृतिसमितिसमक्षं तन्न चाग्रसृतं स्यात्
अहमिह च परेऽप्यर्थेऽभवन् सम्मतास्ते ।
स हि सविनयभङ्गस्तत्क्षणं विश्वमेद्भिः
भवतु च सरकारेणास्थिरः सन्धिरेषः ॥ १२० ॥

नहि वयमसहेमह्यन्यमित्रावबन्धं
न च प्रथमगतानां वन्दिगेहेषु कष्टम् ।
न खलु दिवसरात्रिव्यत्ययो वन्दिगेहे
यदपि वयमिहास्मः प्रोद्यताः सर्वदैव ॥ १२१ ॥

अपि च मथनकारी बन्दिगेहस्य कार्य-
क्रम इह परिचर्यो नो लघीयोमनोभिः ।
त्रिभिरनुचलिता सप्ताहकैर्या च वार्ता
खलु जनितवतीयं काञ्चिदाशां जनेषु ॥ १२२ ॥

इह चरमदशायां भज्यमाना तु वार्ता
सकलजनमनःसूत्पादयेत्तां निराशाम् ।
इति हृदि विमृशन्तः सर्वसभ्या इहास्या
सपदि सहमता अप्यस्थिरस्यास्य सन्धेः ॥ १२३ ॥

परमिह पण आसीदस्य सन्धेः कृतेऽस्म-
त्समहिमविषये स्यान्नैव कश्चित्प्रबाधः ।
यदवधि मम बन्धोऽस्त्यत्र वार्तासु यासु
प्रतिवचनवचोभिः काप्यभूदेव चर्चा ॥ १२४ ॥

मम रुचिरधिकासीत्केवले वस्तुयुग्मे
प्रथममिह न नीचैः स्यात्स्वतन्त्रत्वलक्ष्यम् ।
अपरमथ भवेत्कश्चित्प्रभावोऽस्य सन्धेः-
श्रमनिरतिषु युक्तप्रान्तकृष्याश्रयेषु ॥ १२५ ॥

करविनियमनायां भूरि साफल्यमाप्तं
बहुषु जनपदेषु क्लिष्ट आसीत्करोऽयम् ।
कृषकजन इहासीद्भूरिरङ्के निमग्नो
जगति च कृषिमूल्यादेर्महादुर्दशासीत् ॥ १२६ ॥

अत इह करदानं दुष्करं जातमासीत्
करविनि यमना चार्थैकनीत्यान्वितासीत् ।
क्षणिकनयिकसन्धौ भङ्गभङ्गः कृतः स्यात्
परमिह कृषकाणां का भवेदर्थसंस्था ॥ १२७ ॥

इति विशदमकार्षीदिर्विनेनापि गान्धिः,
सपदि हि करबन्धान्दोलनं रोधितं स्यात् ।
परमिह कृषकाणां सम्मतिर्दास्यते नो
यदिह निजबलान्तं दद्युरर्थं प्रयत्नात् ॥ १२८ ॥

परमिह विषयोऽयं प्रान्तसम्बद्ध आसी-
दिति न भरतभूमेः सर्वकारेण बद्धः ।
इति झटिति च युक्तप्रान्तशिष्टिः क्रमेऽस्मिन्
विमृशति तदुपेयं नाद्य युष्माभिरद्धा ॥ १२९ ॥

परिहरति च कष्टं सा यथाशक्तिरेषा-
मिति किमपि च दत्ते गोलमाश्वासनं सा ।
न खलु परमितः सा सम्भवत्येव चर्चा
समवसित इवासीच्चैष वार्ताप्रसङ्गः ॥ १३० ॥

अथ निजवशताया मुख्यलक्ष्यस्य चर्चा-
धिकमहिमवती सा शिष्यते स्माभिलापे ।
पुनरपरविभागः सन्धिधारागतो यो
भयमयमनुविष्टो नूनमित्यप्यपश्यम् ॥ १३१ ॥

किमिह निखिलवर्षं वीरतादर्शनस्या-
पि च बल भरिताया वस्तुवार्तावसित्याः ।
किमिति स्ववशतायास्तस्य प्रस्तावकस्य
किमिति च जनवर्या दोषनेत्राङ्किताह्नः ॥ १३२ ॥

कृतमखिलमिहैषां योजनं चैतदर्थं-
मिति विविधविचारे मार्चरात्रौ निमग्नः ।
मनसि परमशून्ये कल्पयन्मूल्यवस्तु-
क्षतिमिव सततोत्थामन्वभूवं चिराय ॥ १३३ ॥

सकलजगति रीतिः सा यथार्थाद्य दृष्टा
कृपणवदिह गर्जन्तो न वर्षन्ति मेघाः ।
परमिह तु समाजेऽन्योन्यसम्पर्कवाहि-
न्यकृपणकृपणानामस्ति सम्पर्क एकः ॥ १३४ ॥

यः कवित्वे चतुरुपाधिश्चास्ति षडुपाधिर्बुधत्वे
तेन कविना कौतुकेनाकल्पितेऽस्मिन् महति काव्ये ।
श्रीजवाहरलालनेहरुचरितनामनि सर्ग एषो-
ऽवसितिमेतश्चतुस्त्रिंशो हन्त दिल्लीसन्धिनामा ॥

काञ्चननगरीयं कांग्रेसम्

शिखरिणी

पञ्चत्रिंशः सर्गः

स गान्धिः कस्माच्चिन्मम समश्रृणोत्तामथ कथां
व्यथाया हार्दिक्या इति स करुणो मामकथयत् ।
परेद्युः, 'प्रातस्त्वं भ्रमितुमुपयायाः सह मया
ततो दीर्घं कालं किल समलपाव भ्रमिगतौ ॥ २ ॥

स मामश्राश्वासैरशमयत—सन्धौ न किमपि
प्रहीनं, सिद्धान्तो न च परिहृतः कोऽपि च मया ।
द्वितीयां धारां स व्यवृणुत विशेषार्थकलितां
यथा सा स्वातन्त्र्यप्रणयनविधेरस्त्वनुगता ॥ २ ॥

तदाधारः साक्षादभवदिह तद् 'भारतहितम्'
इति क्लिष्टः सोऽर्थो न खलु मनसा स्व्यक्रियत मे ।
तदालापैः सान्त्वं किमपि समभून्मेऽस्य मनसो
मया विज्ञप्तोऽसौ 'परिहरतु सन्धेर्गुणदुषौ' ॥ ३ ॥

अकस्मात्तूत्थाप्य क्वचन किमपीदं विरचनात्
स्वभावात्ते विभ्यत्स्वयि किमपि पश्याम्यविदितम् ।
यदस्मिन्सम्पर्के सुमहति न चातुर्दशसमे-
ऽप्यहं नैवाजानां तदति भयमुत्पादयति मे ॥ ४ ॥

तदज्ञातं तत्त्वं स्व्यकुरुत तिजाङ्के परमयं
न तु त्वस्य स्थाने स्वयमवहताश्रोत्तरदताम् ।
न पूर्वं वक्तुं स्यामलमयमहो कुत्र नयति
कुतश्चेत्यब्रूत स्फुटमविदितत्वं विवशवत् ॥ ५ ॥

दिनान्येकद्वानि द्विविधमतितायां निपतता
न वृद्धं कर्तव्यं किमिति परमेतत्तु नियतम् ।
विरोधो वै सन्धेरथ च कृतिरोधो न सुशकः
गतः कालः, सम्प्रत्यहमनुगतः स्यां व्यवहृतेः ॥ ६ ॥

विरुद्धः सिद्धान्तादिति तदभिमानोऽस्तु तुषितः
स्वराज्याख्ये प्रश्ने महति भविता किं फलमिदम् ।
न तत् किं साधु स्याद्यदि मधुरभावादनुभजे
तदर्थं चात्यन्तं सरलमनुकूलञ्च कलये ॥ ७ ॥

यथा मह्यं गान्धिस्तमुपदिशतिस्मातिसुगमम्,
समाचाराभिज्ञैः सह समभिलापेऽपि कथितम् ।
वयं स्वातन्त्र्येऽर्थे ध्रुवमपि चलाः स्मोऽत्र नितराम्
इतीदं लार्डेर्विन्निकटगमिना तेन कथितम् ॥ ८ ॥

यथा पश्चात्कश्चिद्भवतु न भ्रमो नापि विशयः,
स गोलाख्ये पीठे प्रतिनिधिमपि प्रेषयति चेत् ।
तदा कांग्रेसस्य प्रथममिदमुद्देश्यमवदत्
स्वतन्त्रत्वप्राप्तिस्तदिदमिह प्रस्तोतुमयिता ॥ ९ ॥

न तत्स्वीकर्तुं प्रभवति स इर्विन् परमसा-
विदं प्रस्तोतुं तत्परममधिकारं स्म मनुते ।
अतोऽहं तं सन्धि, तदुपकरणं कर्मकरणं
हृदा स्वीकृत्यास्मै स्वतनुमनसोः क्लेशमगमम् ॥ १० ॥

परं मध्ये मार्गो न मम यदभात्तेन तमयां
पुरा सन्धेः पश्चादपि च सह संलापसमये ।
स तावत्तान् सत्याग्रहपरिगृहीतांस्तदपरान्
विमोक्तुं श्रीगान्धिः प्रयतनमधाद्राजनयिकान् ॥ ११ ॥

अमीषां ये सत्याग्रहपरिगृहीताः समभवन्
समस्तास्ते सन्धेः परिणतिबलान्मुक्तिमगमन् ।
सहस्राण्यन्ये ये प्रचलदभियोगेन यमिता
विना वा तं ते ये स्वगृहयमिताः सन्ति बहवः ॥ १२ ॥

विना दोषारोपं क्वचन च विना दण्डनियमं
भृताः कारागारेष्वथ बहुसमाभिर्नियमिताः ।
अमीषां सम्बन्धे वितत इह रोषो जनपदे
विशेषाद् बङ्गेषु प्रथितनवनीतिष्वगणिताः ॥ १३ ॥

प्रमाणाभावोऽयं भवति सबलं यत्र विषये
प्रमाणं तादृक्षं समभवदिदं भारतमपि।
इहासीदारोपः स्वगृह्यमितेष्वेष बलवान्
स्थितो हिंसारूपैः कृतिसमुदयैः क्रान्तिककणः॥ १४॥

न सन्धेरङ्गत्वे परमिह तु भङ्गेषु विततं
विरोधं निर्हर्तुं स्थितिमथ समामानमयितुम्।
इहत्यानां मुक्तेरपि सुपरिपुष्टिं विहितवान्
परं नास्मिन् शिष्टिः सहमतिमधात्सा ब्रिटिशिनाम्॥१५॥

स गान्धिर्यां पुष्टिं किल भगतसिंहस्य नियतं
पुरा प्राणाघातं विनमयितुमाधाद् बलवतीम्।
न साप्येतैरद्धाऽभवदनुमता हन्त परुषै-
र्न तस्याः सम्बन्धोऽप्यभवदिह सन्धैर्विषयतः॥ १६॥

स दृष्ट्वास्मिंस्तीव्रां जनगणरुचिं भावपरतां
प्रयत्नञ्चाकार्षीत्परमयमभूत्तस्य विफलः।
तदानीं सत्यैका स्मृतिपथमिता कौतुकमयी
किलातङ्कोग्राणां हृदयपरिचायिन्युपकथा॥ १७॥

इयं मन्मुक्तेः प्रागथ पितृमृतेः प्राङ् नु परतो-
ऽभवत्स्थानेऽस्माकं मिलितुमुपयातोऽद्भुतनरः।
'अयं श्रीचन्द्रःशेखर, इति जनैरस्ति कथितः
पुरा नासौ दृष्टः श्रुत इह दशाब्दादपि पुरा॥ १८॥

यदा विद्याकेन्द्रं स मम सहयोगात्समगमत्
किशोरः कारायां नियमहननाद्वेत्रनिहतः।
स आतङ्कोग्राणां प्रमुखपदवीं प्राप्त इति मे
श्रुतं त्वासीद्वृत्तं परमिह रुचिं नाहमदधाम्॥ १९॥

अतस्तस्मिन्नेते कमपि समगां विस्मयमहं
स मां द्रष्टुं चायान्मम निगडमुक्तेरनुमितौ।
मिथः सामञ्जस्यं भवति खलु कांग्रेसब्रिटिशोः
स संजाते सन्धौ स्वदलफलजिज्ञासुरभवत्॥ २०॥

न कश्चिन्मार्गो मेऽस्फुरदिह चलन्येन स शमं
तथा तादृक्षाः स्युः स्फुटमुपगतास्तत्सहचराः ।
अहं तानेतावद् गदितुमलमासं—प्रयतनं
कृतीरातङ्कोग्राः सपदि परिहर्तुं विदधताम् ॥ २८ ॥

अमूभिर्ह्यस्माकं दलमपि भजेद्धानिमखिलां
दलं तेषामेताः पुनरपि करिष्यन्तिविकलम् ।
स सप्ताहैर्द्वित्रैः प्रचलति तु गान्धीर्विन—पर-
स्परालापे मृत्युं पुरुषबलगोलीभिरगमत् ॥ २९ ॥

दिवोद्याने कस्मिंश्चिदयमभवत्तैः परिचितः
ततस्तत्रायातैः पुरुषबलवर्गैर्वलयितः ।
स पृष्ठे वृक्षस्य स्वमवितुमकार्षीत्प्रयतनं
मिथो गोलीपाते क्षतपुरुषघातैरुपहतः ॥ ३० ॥

स सन्धेरस्थाणोः परमहमगां लक्ष्मणपुरम्,
समग्रे देशेऽस्मिन् सविनयकभङ्गं शमयितुम् ।
अशेषं कर्तव्यं सपदि कृतवान्—ताश्च सकलाः
प्रशाखाः शाखाश्च व्यदधमिह कांग्रेससमितेः ॥ ३१ ॥

इहास्मत्सार्थोत्थाः कतिपयजना रोषमभजन्
अमुष्मात्सन्धेस्ते त्वनलविकटज्वालवदयन् ।
इमान् भङ्गाद्रोद्धुं विवशयितुमासीन्न करणम्
व्यवस्थैषा सर्वैरिह निरपवादैरनुसृता ॥ ३२ ॥

कठोरं तस्यालोचनमपि कृतं कैश्चन बुधै-
र्ममासीत्स्वप्रान्ते परिणतिममुष्याकलयितुम् ।
रुचिः काचित्तीव्रा यदिह बहुषु प्राचलदियं
कराणां बन्धान्दोलनमिदमुपास्यं ध्रुवमिति ॥ ३३ ॥

ममेदं प्राथम्यादिह च करणीयं तदभवत्
विमुक्ताः स्युः सत्याग्रहपरिगृहीताः प्रतिदिनम् ।
सहस्रं ये चान्ये प्रतिदिनममुच्यन्त यमनात्
कियत्कालात्पश्चात् गृहनियमितानां कतिपये ॥ ३४ ॥

ततो भिन्नानाञ्चाप्यनुनिगडितानामिह चिरात्
स्वहिंसाकार्यैस्तैरथ न चिरतो मुक्तिमयताम् ।
अमी कारागारे कृतवसतयो यत्र विषये
विवादस्तेषाञ्चाप्यनुनिशमनं वीक्षणमपि ।। ३५ ।।

इमे मुक्ता ग्रामं जनपदमथो यं प्रतिगताः
स्वभावादत्रत्यैः प्रियमुपहृताः स्वागतममी ।
कृता सज्जा कैश्चित् पथि च निहिता वन्दनलताः
कृताः शोभायात्राः सविधि च सभाश्चापि विहिताः ।।३६।।

सभासु व्याख्यानान्यपि वितरितान्यत्र बहुशो
ऽथ सम्माने पत्राण्यपि च पठितान्यर्चितवता ।
इदं सर्वं स्वाभाविकमभवदाशासितमिदम्,
युगं चादो यस्मिन् पुरुषकरयष्टिप्रतिशतम् ।। ३७ ।।

विकीर्यन्ते यात्रा अपि समितयस्ता अपि सभाः
परीवृत्तं साक्षादिह सकलमित्यद्भुतमभूत् ।
परन्तेनाशान्ति मनसि पुरुषाः प्रापुरधिकां
समायातो भावो विजयजनितः केषुचिदभूत् ।। ३८ ।।

न वै हेतुः कश्चित् विजयिमनने स्वस्य समभूत्
परं चेदात्मा स्यादिह न मथितो वन्हिसदने ।
तदा तस्मान्मुक्तेः सुखमनुभवन्त्येव रसिकाः
परानन्दोल्लासं परममभिमानं च गमिताः ।। ३९ ।।

विशेषाद्यूथानामपि नवलयूनां स युगपद्
विमोक्षो नानन्दं जनयतु कियन्तं नु सुहृदाम् ।
कियांश्चैवैतेषां हृदि मुदभिमानो न जयतात्
कथञ्चैषां चेतः पुनरपि न चोत्साहमयताम् ।। ४० ।।

मया चेयं वार्ता खलु विलिखितास्मिन्हि विजये
भविष्यत्याक्षेपं कमपि स करिष्यत्यनुपदम् ।
बहुं दोषारोपं सपद्रि स विधास्यत्यपि पुनः
सदा शिष्टेर्वितावरणवसतो पालितजनः ।। ४१ ।।

तथा शिष्टैः सैन्याकृतिरभिमता यां न जनता
कदाचित्स्वाधारं वितरति न यां चात्र सहते।
अमीषां तत्तेजोविघटनकथातः परमिह
व्यथा का स्याद्गुर्वी कथमिह तदुर्वी न चलतात् ॥ ४२॥

पुरा नेदं ज्ञातं स्फुरितमपि चेदं न हृदये
परं पश्चाद् बुद्धं ज्वलितमिदमालोक्य सकलम्।
प्रशिष्टैस्तत्तन्त्रं सुगिरिशिमलातस्तलमिदं,
तु यावद्घातं तद् भृशमनुभवत्यात्ममनने॥ ४३॥

इदं श्रुत्वा दृष्ट्वा परमचकिताः स्मो वयमिह
प्रतिध्वानैरेषां नहि समयपत्रैर्विरमितम्।
भयेनाकम्पन्ते विदधति च कांग्रेससमिते-
रिमे यद्यप्येषां विकटदिवसानां परिकथाम्॥ ४४॥

मतेनैतेषां ते विजयनिनदं तादृशमधु-
र्यथा तैर्लोकेऽस्मिन्नलभि सुमहान् कोऽपि विजयः।
व्यतीतेऽस्मिन् सार्धे विगतघटनात् त्र्यब्दसमये
समाचारैः पत्राण्यतिविकलितान्यासुरसुकैः॥ ४५॥

इहोद्गीर्णः कोपः किल ब्रिटिशशिष्टैरपसरैः
सुहृद्भिश्चाशेषस्तदनुशतवृत्ताश्रयदलैः।
नवीनं त्वस्माकं त्वदभवदिहैकं स्मृतिपदं
ततो ज्ञातं त्रस्ता कियदिह समस्ताः समभवन्॥४६॥

कियच्चेतो दान्तं, पतित इह ग्रन्थिः स च कियान्
इयं नूनं काचित् समभवदपूर्वैव घटना।
न यावद्यात्राभिस्त्वथ कतिपयैर्भाषणलवै-
रमीष्वेतादृक्षं भयमुदितमासीत्सुविकटम्॥ ४७॥

यथार्थत्वेनासीद्ब्रिटिशपरिभूत्यै न हृदये
विचारो लोकानां न च मतिमतां नेतृमहताम्।
परं स्वभ्रातृणामपि च भगिनीनां सुमहति
व्रते त्यागे धैर्ये विजयकरभावोऽभवदयम्॥ ४८॥

कृतां ब्रिशे देशे यदपि तदभूद्गर्वजनकं
तदस्मानुच्चैरानयत निजदृष्टावतितराम् ।
स विश्वासश्चात्मन्यपि च जनितस्तेन सुमहान्
स्वयंदासानामुन्नमितशिरसां तानितमुरः ॥ ४६ ॥

वयं चेदं चित्तेऽनुभवमुपयामोऽखिलजगद्
यया कृष्टं सेयं ध्रुवमधिकृतायोजनमयी ।
प्रशक्तिर्नः शिष्टि दमयति पुरा ध्येयनिकटं
नयत्येषा नेयं परिभवति शिष्टि व्रिटिशजाम् ॥५०॥

यथार्थत्वेनास्मद्गतबहुजनानां मतमिदं
यथा दिल्लीसन्धावधिकसफला शिष्टिरभवत् ।
अमीषां यैरुक्तं वयमिह निजध्येयविषया-
ददूरेऽद्यावर्तेमहि महति संग्रामपुलिने ॥ ५१ ॥

इदं शिष्टेर्मित्रैः स्ववशिमयुद्धं नवयितुं
तथा दिल्लीसन्धिं त्रुटयितुमिवासीत्तदुदितम् ।
यथा सन्धेर्भङ्गाद्वयमिह सदोषा इति समं
जगज्जानीयान्नः स्ववशिमलाभाद्दुरयनम् ॥ ५२ ॥

स्वयुक्तप्रान्ते नः कृषकविषयाणामभिमुखे
स्वनीत्याऽस्याः शिष्टेः सकलसहयोगोऽस्त्यभिमतः ।
अतो युक्तप्रान्तीयमपि सरकारं सहयुजा
समारब्धं कार्यं व्यवहृतिरिहासीत्परिसृता ॥ ५३ ॥

व्यतीतास्ताश्चास्मिन्नुपरतियुगे द्वादश समा
अहञ्चैतैः साकं कृषकपरिचर्यासु मिलितः ।
सुदीर्घा लेखाली ह्यपि प्रचलितास्मासु सुचिरं
तथा प्रान्तीयायाः प्रमुखमिह पन्तं च समितेः ॥ ५४ ॥

तमेनं मध्यस्थं न्ययुयुजत कांग्रेससमिति-
श्चिरात्प्रान्तीयायां समपृचत शिष्टौ स मतिमान् ।
अपि स्वीकारोक्तिः स्फुरति कृषकाः सङ्कटगता
करं दातुं कञ्चिन्निपुणमसमर्था इति दृढम् ॥ ५५ ॥

अथैतेभ्यो देया सपदि करमुक्तिस्तु कियती-
त्ययं प्रश्नः शिष्टेः करतलगतं चोत्तरमिदम् ।
महीपालैः साकं भवति मिलिता शिष्टिरिति ते
महीपालास्तेषां दधतु करमुक्तेरिह भरम् ॥ ५६ ॥

महीपालास्तावन्न कमपि विधास्यन्ति नियमं
न यावत्सा शिष्टिर्नियमयति भूस्वामिषु च ताम् ।
न तेषां चिन्ताऽऽस्ते निजकृषकवर्गस्य विषये
ततो निर्णेतव्यं तदिदमिह शिष्टय्वैव सकलम् ॥ ५७ ॥

कराणां बन्धार्थं प्रकृतसमरो रुद्ध इति ते
प्रदिष्टाः कांग्रेस्यैरिह यदपि देयं ददतु तत् ।
परं दीर्घां मुक्तिं प्रतिनिधिरमीषामवरयत्
बहून् घस्रान् यावन्न च किमपि शिष्टिर्निरचिनोत् ॥ ५८ ॥

गतो माल्कम्हेली कुहचिदवकाशं नु चयनं
ततः कष्टं किञ्चिद् भजति किल कांग्रेससमितिः ।
अतस्तूर्णं कार्यं परिणतिसुखं कार्यमिह त-
त्पदस्थः सङ्कोचं श्रयति सहकारैः सममयम् ॥ ५९ ॥

यतो दीर्घं कालं स्थगितकरदानास्तु कृषकाः
विलम्बेनानेन प्रशिथिलतया कष्टकरणीम् ।
अवस्थां सम्प्राप्ताः परमविकलां हानिमधिका-
मपीमे तां हन्तातिशयमसहन्तार्थनिधनम् ॥ ६० ॥

परं दिल्लीसन्धेर्विकृतमभवत्स्वास्थ्यमिह मे
पुरा कारागारेऽप्यभवमिह रुग्णश्चिरमहम् ।
पितुर्मृत्यौ धातः पुनरिह विमर्शश्चिरचरो
ऽभवन्मत्स्वास्थ्यस्य क्षतिकर इतीहास्मि शिथिलः ॥ ६१॥

कराचीकांग्रेसे गमनसमये स्वास्थ्यमलभे
ऽस्य देशस्यैवोत्तरचरमदिक्कोणमयता ।
अमुष्यां यात्रेयं किमपि कठिना वर्त्मनि, महान्
मरुर्हिन्दुस्थानापरकरण एतां परयति ॥ ६२ ॥

तथाप्यस्यां दूरादपि किल दविष्ठादपि पदात्
समायाता लोकाः प्रकृतिमभजन्तेह सुभगाम् ।
जना राष्ट्रीयान्दोलनजनितशक्तिं प्रति परं
दधानाः संतोषं मनसि परमां शान्तिमभजन् ॥ ६३ ॥

इदं वै कांग्रेसं प्रति तमभिमानं स्म दधते
यदेतद्देशस्यार्थनमथ तदाह्वानमशृणोत् ।
सुयोग्यत्वेनास्योत्तरमपि ददाति स्म कृतिभि-
स्तपस्त्यागाभ्याञ्च प्रकटितवदस्तित्वफलितम् ॥ ६४ ॥

स्ववर्गे विश्वासं वहति भृशमुत्साहपरतां
भविष्यत्प्रश्नानां कलयति समाधानमुचितम् ।
भयं वा शङ्कां वा प्रति समवधानं च गहनं
सुशब्दाः प्रस्तावा अपि दधति ते मङ्गलपदम् ।: ६५ ॥

स्तरे वै राष्ट्रीयेऽधिगतरचनाः कार्यनिवहा
अमीभिः प्राप्यन्ते सपदि नवकल्याणकरताम् ।
विना नोच्चार्यन्ते गहनमननं ते क्वचिदपि
न वा ते पार्यन्ते सरभसमिमे चिन्तनमृते ॥ ६६ ॥

स वै दिल्लीसन्धिर्बहुमतबलात्स्वीकृत इहा-
प्रियोऽयं लोकानां न च स रुचितोऽभून्मतिमताम् ।
जनानामन्तस्तद्भयमुपजनिष्यन्निव गतो
यदेतानानाभा विषमविपदोऽस्मासु नयति ॥ ६७ ॥

किमप्येवं याति स्म च भुवि समक्षं समुदिता
इमे प्रश्ना देशे बहुलतररोषस्य जनकाः ।
अयं शूलारोपो भुवि भगतसिंहस्य स यथा
स भावोर्मिस्तीव्रः समुदलसदुद्गारस्ततले ॥ ६८ ॥

उदग्भागे देशे भवति स च पञ्चाम्बुविषयो
कराचीकांग्रेसे बहुतरजना अभ्ययुरतः ।
पुराणात्काग्रेसादभवदिह गान्धेः सुविजयः
कराचीकाङ्ग्रेसाधिपतिरभवद् 'वल्लभ' इह ॥ ६९ ॥

प्रसिद्धोऽस्मन्नेताखिलजनपदे लोकप्रियता-
तरस्वित्वाद्यैश्चाद्भुतगुणगणैः साधु विदितः ।
स गौर्जर्यां भूमौ प्रथितसुयशा नेतृषु वरः
पटेलो वीराणां धुरि स सरदारेति गदितः ॥ ७० ॥

तथापि प्राधान्यं सपदि समभूद् गान्धिमहतः
पुरः सीमाप्रान्तादपि दलमुपागादिह महत् ।
तदब्दुल्गफ्फारं त्वनुगतमभून्नेतृषु वरं
न लाल्कुर्तीवाले दलमिति पदं कस्य विदितम् ॥ ७१ ॥

दलञ्चैतल्लोकप्रियमिह गतं यत्र समभूत्
ततश्चाभूत्तालीध्वनिरतिशयात्स्वागतविधौ ।
इदं त्रिंशाप्रैलादतिगहनमुत्तेजनमपि
प्रपद्यास्मिन् शान्तिं त्यजति न पुरा साहसमपि ॥ ७२ ॥

इयं हिन्दुस्थाने सपदि निजमुद्रास्ति लिखिता
पदं तल्लाल्कुर्तीति श्रमिकभुवि साम्याश्रितदलम् ।
न वा पक्षोबामं वदतु नहि तत्तादृशमभूत्
खुदाई पूर्वास्तेऽत्र खिदमतगाराः सुविदिताः ॥ ७३ ॥

मिलित्वा कांग्रेसे विदधति हि कार्यं सहृदया
इहैकत्रिंशे ते तदवयवतामेव गमिताः ।
न लाल्कुर्तीवाले इति तदभिधा तादृशपटैः-
पुराणं वेशं ते परिदधति तस्मात्तदभिधाः ॥ ७४ ॥

न नीत्यार्थिक्या ते सह समुदिता राष्ट्रियतया
तथा सामाजिक्या अपि नवसमावेश उदितः ।
कराच्याः प्रस्तावेऽमिलदिह स गोल्मेज़विषय-
स्तथा दिल्लीसन्धिः समितिरिह रूपं यदकरोत् ॥ ७५ ॥

मया तन्मञ्जूरीकृतमथ च गान्धिः समदिशत्
तदत्र प्रस्तोतुं खलु समकुचं तत्र स मनाक् ।
इदं मत्स्वाभाव्यादभवदधिकं नैव रुचितं
कृतोऽस्वीकारो मेऽलगदिह नितान्तं त्वनुचितः ॥ ७६ ॥

इदं मे दौर्बल्यं स्थितिरियमसन्तोषजननी
मम प्रत्याभात्सा, न खलु भवितव्यं मयि तथा।
इतो वात्राहं स्यामभिमतदले वात्र परतो
विपक्षे वा कार्यो न खलु मयका कालविगमः ।। ७७ ।।

अतोऽन्त्यायां घट्यां व्यमृशमधिवेशेऽखिलजने
तमेनं प्रस्तोतुं स्व्यकरवमहं द्वित्रमिनटात् ।
स्वकीयान् भावांस्तान् प्रकटयितुमाभाषणमुखे
तमेनं प्रस्तावं महति जनवृन्देऽधरमहम् ।। ७८ ।।

भवन्तः स्वीकुर्युस्तमिममिति चाभ्यार्थयमिमान्
मदीयं व्याख्यानं यदवसरसूतेर्वरतरम् ।
पुराव्याख्यानेभ्यः प्रयतनकृतेभ्योऽतिसहजं
मदन्तः स्फूर्तेस्तद्धृदयगहनादेवमुदितम् ।। ७९ ।।

अहं प्रस्तावेषु प्रवचनमकार्षं तदितरे-
ष्वपि द्वित्रास्तेषां स्मृतिमुपगताः सन्ति विषयाः ।
इहार्थिक्यां नीतावथ भगतसिंहेऽधिकृतिषु
त्विहाद्ये प्रस्तावे समधिकरुचिर्नूनमभवम् ।। ८० ।।

अमुष्यासीत्तादृग्विषय इति कांग्रेसजगति
प्रवेशार्थं दृष्टेरपि नवतराया नव इति ।
पुनः कांग्रेसेनार्थिकदिशि न याद्यावधि कृता
सुचिन्ता तस्या अप्ययमवसरः स्यादिति दृशा ।। ८१ ।।

न तद् राष्ट्रीयत्वान्तरदिशि विचारं प्रथयते
सदार्थिक्या नीतेरिह मननतो दूरमयते ।
न हि ग्रामोद्योगानपि च निजदेश्यापणविधीन्
विहायैतत्किञ्चित्क्वचिदपि न वै चिन्तनमधात् ।। ८१ ।।

कराचीप्रस्तावः खलु सकलसेवाभिविधिषु
क्रमान्मूलोद्योगेष्वपि सपदि राष्ट्रीयकरणात् ।
तथान्योपायानां प्रचरणविधेर्निर्धनभरं
हरेत्तद्भारं वै धनिषु विभजेदित्युपनयः ।। ८३ ।।

समाजार्थे वादे नवचरणविन्यासवदयं
धृतः कांग्रेसेन क्वचन समवित्तिप्रणयतः।
न चासौ तद्वादोऽस्त्यणुरपि परं ह्यस्य कथनं
स साम्राज्यार्थोऽपि प्रतिपदमिहोरर्यक्रियत ॥ ८४ ॥

अनेन श्रेष्ठास्ते ब्रिटिशसरकारस्य पुरुषा
मृदुप्रस्तावेनाप्यतिगहनकूपे निपतिताः।
अहं मन्ये यत्तैः सततनिजदृष्ट्याऽत्र कलितं
धनं वोल्थेविक्यं रहसि हि कराचीमुपगतम् ॥ ८५ ॥

स कांग्रेस्नेतृणां नयति विकृति नीतिममलां
वसन्तीं नीत्यन्तःपुरपरिसरे वाह्यजगतः।
सुविच्छिन्ना गोप्यत्वपवनचक्रेण वलिता-
स्तदीया मस्तिष्का रहसिजकथाः श्रोतुमुचिताः ॥ ८६ ॥

पुनस्ता गाथास्तत्प्रणयपरपत्रेषु शनकै
रहस्याढयै रूपैरिह वितरिताश्चेतसि सताम्।
प्रभासन्ते गोप्यं यदि जवनिकोद्घाटनमिदं
क्रियेतान्तः किं किं विकसति शुभं हन्त बहुलम् ॥ ८७ ॥

अमीषां मान्येन प्रचलितप्रकारेण वहुशः
किल प्रस्तावास्तेऽधिकृतिविषयाश्चर्चिततराः।
परीणामं तेषामहमुपलभे यत्प्रथयते
तदुक्तिः फासिष्टैरिह वसति सा सम्मतिरिति ॥ ८८ ॥

इयत्युक्ता गाथा रहसि गतसाम्यस्थितजनः
समस्तं प्रस्तावं तदवयवकं वा घटितवान्।
कराच्यां तं मह्यं व्यतरदथ गान्धिं स मयका
हठाद् दिल्लीसन्धेर्विभजनभयादात्मनि कृतः ॥ ८९ ॥

स गान्धिर्मां तूष्णीं स्थपयितुमिहोत्कोचमददात्
अहं चान्त्ये घस्रे विषयसमितेः श्रान्तिसमये।
तथा कांग्रेसेऽपि श्रमपरिहृते तस्य शिरसि
न्यधां तं प्रस्तावं स्फुटमिति कथाकल्पनमिदम् ॥ ९० ॥

रहस्यव्यक्तिः सा ननु किमभिधा नास्ति ? न खलु तत्
प्रकाशं स्पष्टं तेऽभिदधति परं स्वं विदधति ।
विभिन्नैः सङ्केतै विदितमिदमेवं भवति यत्
मनस्तेषां कस्य ध्वनयति सुनामेति सततम् ॥ ६१ ॥

रहोरीत्या भ्रान्त्वा किमपि कथनं मे न सहजम्,
इमे एम्. एन्. रायं स्फुटमिह विवक्षन्ति कृपणाः ।
इति स्पष्टं वक्ष्ये परमिह मतं तादृशसता-
ममुष्मिन् प्रस्तावे किमिति सुविदन्त्वत्र सुधियः ॥ ६२ ॥

अमी शिम्लादिल्ल्योर्महिमवति तिष्ठन्ति सुपदे
परं नो जानन्ति स्वभिमतमिमे साम्यमनसाम् ।
स एम्. एन्. रायो वेतरतदनुगाः साम्यमनसः
कराचीप्रस्तावं तमिह घृणया वीक्ष्य जहति ॥ ६३ ॥

मतेनैतेषां तद्विशदविशदोदाहरणकं
मनोवृत्तेरेकं त्वचरमसुधारप्रणयिनाम् ।
स सम्बन्धो गान्धेर्मम किल घनिष्ठोऽस्ति सुचिरात्
व्यतीताः स्युर्वर्षास्तदनुगतयः सप्तदश ते ॥ ६४ ॥

अहं पार्श्वादेनं स्ववसरमगां वेत्तुमधिकं
तमेनं भीषित्वा छलयितुमिदं घोरमननम् ।
मिथो रक्षामो वै सततमनुरोधं प्रणयतः
परं स्यात्पार्थक्यं क्वचन मतभेदात्सुखमपि ॥ ६५ ॥

प्रवेष्टुं नौ शक्तो व्यवहृतिषु नैवापणविधिः
कथाक्लृप्तिस्त्वस्मात्प्रकटयति तेषां निजमनः ।
पुराणी कांङ्ग्रेसे निजमतमतेः पद्धतिरियम्,
गताब्देभ्यः सोऽयं गतिविधिरभूदत्र चलितः ॥ ६६ ॥

जना युक्तप्रान्तेऽखिलभरतभूकाङ्ग्रसमुखे
समाजप्रस्तावं सपदि प्रयतन्ते गमयितुम् ।
इहोनत्रिंशेऽस्याक्रियत मनसा स्वीकृतिरपि
प्रसिद्धात्सिद्धान्तान्नतु व्यवहृतेः, सोऽद्य समयः ॥ ६७ ॥

ततश्चायात्सत्याग्रह इह च दिल्ल्यां फरवरी-
मथैकत्रिंशेऽब्दे यदहमगमं गान्धिमनुगः-
प्रगेऽटाट्यां कर्तुं प्रकटितमिमं मेऽर्थविषयं
सहर्षं प्रस्तावं स्व्यकुरुत कराच्यां प्रथयितुम् ॥ ९८ ॥

स ऊचे—प्रस्तावं विरचय च मां दर्शय ततो
मयाऽयं प्रस्तावो व्यरचि, स किलादर्शि च ततः ।
तदीयान् संस्कारान् स्वयमिह च गान्धिर्विहितवान्
समित्यां कार्यिक्यां विषयसमितौ चापि निहितः ॥ ९९ ॥

उभाभ्यां साश्चर्यं सहमतिरमुष्मिन् प्रकटिता
ततः काङ्ग्रेसेऽसौ ससुखमनुमोदं परिगतः ।
क्रियासम्बन्धार्थेऽखिलभरतभूकांग्रससभा-
समक्षं विन्यस्तः प्रतिदिशमयं व्याप्तिमयितः ॥ १०० ॥

स्वविश्रामस्थानं समुपगतवद्भिस्तु सुजनैः
समं प्रस्तावेऽस्मिन् बहुसुबहु चर्चाऽपि समभूत् ।
परामर्शश्चैभिर्वितरित इहावेशि स मया
परं त्वस्य ध्वानः क्वचिदहनि नागान्मम गृहम् ॥ १०१ ॥

अहं मन्ये तस्मै यदि तमददर्शं क्वचिदिमं
तदाऽसौ तं दृष्ट्वा सुचिरमहसिष्यत्सपदि माम् ।
न तस्मै प्रस्तावः किल स समरोचिष्यत मनाग्
यतोऽस्याहं व्यज्ञासिषमरुचिरञ्चापि रुचिरम् ॥ १०२ ॥

कराच्यायानाच्च प्रथममभिलद्राय इह माम्,
अकस्मात्सोऽस्माकं गृहमुपगतः क्वापि दिवसे ।
स हिन्दुस्थानेऽस्तीत्यपि न मम विज्ञातमभवत्
तथाप्येनं पर्याचिनुवमधिमास्केऽधिकलितम् ॥ १०३ ॥

कराच्याञ्चापश्यं तमिममधिकं पञ्चमिनटान्
गताब्दैर्निन्दन्मामधिकमलिखद्राजनयिकम् ।
मदाघाते सोऽयं क्वचन सफलत्वं कलितवान्
मया साकं चास्य प्रचुरमतभेदोऽस्ति विदितः ॥ १०४ ॥

तथाप्येषाकृष्टिर्मम तमनुजाताऽथ च यदा
गृहीतोऽसौ चापद्गतिमगमदस्येह किमपि ।
प्रकर्तुं साहाय्यं समभिलषतिस्मैव च मनः
तदीयामत्यन्तामधिगतवतस्तर्हि पटुताम् ॥ १०५ ॥

स एकाकी मेऽभात् स हि सकलसार्थैः परिचितो
ब्रिटिश्शिष्टिः पृष्ठेऽलगदियममुष्येत्यपि स माम् ।
समाकर्षं नास्मिन् रुचिमधृत तद्राष्ट्रियदलम्,
इहत्याः साम्येष्टा अपि तमवहेलन्ति निकृतम् ॥ १०६ ॥

अयं वर्षान् रूसेऽवसदथ च योगं समददात्
कमिण्टर्नैभ्योऽगादिह पृथगवस्थानमकृतः ।
पृथग्जातः कस्मादिति न खलु जाने तमधुना
विचाराः के सन्तीत्यपि खलु न वेद्म्यस्य विषये ॥१०७॥

पुराणैः साम्येष्टैः क्व नु स मतभेदं बहति चे-
त्यपि प्रायो नाज्ञासिषि पुनरहं तादृशजनम् ।
परं सार्थैस्त्यक्ते भवति मम पीडैव हृदये
ततोऽनिच्छन्नप्यागममवनगोष्ठ्यां स्वयमहम् ॥ १०८ ॥

निदाघादेकत्रिंशशरदिभवाद् वर्षत्रितया-
त्पुरा कारागारे निगडितजनोऽयं सह रुजा ।
वसन्नत्येकान्ते जनयति दयां चेतसि परा-
ञ्चतुःपञ्चाशेऽयं तनुपरिहृतो शान्तिमगमत् ॥ १०९ ॥

कराच्यां कांग्रेसेऽन्तिमकृतिरभूत्कार्यसमिते-
र्निरुक्तिः सा कार्याऽखिलभरतभूकाङ्ग्रसमतात् ।
परं रीतिर्जाता यदिह समितेः पत्युरुदितान्
जनांस्तान् कांग्रेसं समभिमनुते तेष्वधिपदम् ॥ ११० ॥

कराच्यां जातायाः परमिह निरुक्तेः परिणतिः
शुभा नाभूद्यस्याः प्रथममवधानं न समभूत् ।
मुसल्मानैः सभ्यैः समभरतभूकांग्रससभा-
धिवेशेऽस्मिंस्तादृक्चयनविधिराक्षिप्यत परम् ॥ १११ ॥

विशेषादेकस्मिन् क्वचन मुसलिम्नामनि तु का-
प्यवज्ञा तैर्ज्ञाता निजदलजनाभावजनिता।
कथं नामैकस्यां समभरतभूपर्षदि समे
समावेश्या यासीत् प्रतिनिधिभिरापञ्चदशभिः ॥ ११२ ॥

यथार्थस्तत्राभूदिह कलहहेतुस्त्वविदितः,
स पञ्चाम्बुस्थानां निज इव नितान्तो न परतः।
परं तस्याभूद्यैश्चयनमतभेदः प्रकटितः
समे ते कांग्रेसात्परिषदमगुर्मानमहताम् ॥ ११३ ॥

अनेके कांग्रेस्या दृढपरिकरा लोकदयिता
क्रियाकर्तारोऽस्यां बत, सममिलंस्तेन झटिति।
बहून् पञ्चाम्बुस्थानिह मुसलमानान् समकृषन्
इयं चाधोमध्येस्थित-प्रतिनिधित्वं स्म वहति ॥ ११४ ॥

दृढः सम्पर्कोऽस्या मुसलिमजनैः साकमभव-
त्ततः सा द्राधिष्ठं दृढतरमभूत्सङ्घटनकम्।
तदुच्चश्रेणीनां मुसलिमनृणां सङ्घटनकम्
दृढत्वात्तत्कार्याण्यकुरुत जवाद् राजभवने ॥ ११५ ॥

इमेऽहङ्काराचार्यास्त्वरितमगमन् मुस्लिममता-
हवोक्तेरध्वानं निजजनतया बद्धरशनाः।
अतो जीवत्कक्षा द्रविणदिशि ये धूमिलदृशो-
ऽप्यमी देश्ये राज्ये व्यदधत हि काश्मीरसदृशे ॥ ११६ ॥

अभूद्यस्मिन् युग्मं मतप्रवणतानिर्धनतयोः
मिथः सक्तं दैवात्सलिलपयसोर्वातिमिलितम्।
अहङ्काराचार्या अथ च समितेर्नेतृषु पृथ-
ग्गतेरेषा वृत्तिः क्षतिमनयतास्मान् सुमहतीम् ॥ ११७ ॥

कराच्यां नास्माकं विदितमिदमासीत्परमितः
परं मन्दं मन्दं प्रकटितमभूद् भासितचरम्।
न तु ज्ञेयं तेऽमी चयनविधिवैमत्यविहिताद्
विरोधादेवास्मादिह पृथगभूवन्निति जनैः ॥ ११८ ॥

तृणं वात्यावेगादिव दलमिदं दूरमगमत्
यतो हेतोः सोऽन्योऽतिगहनगभीरोऽस्ति पतितः ।
कराच्यामेनं वाश्रृणुम मुसलिमहिन्दुकलहं
प्रवृत्तं चाकस्मान्मतसमरवत् कर्णपुरके ॥ ११९ ॥

द्वितीयं तद्वृत्तं श्रुतमिह च विद्यार्थिनमिमं
गणेशं ते जघ्नुर्गत इह स येषां हितकृते ।
महाभीष्मा आसन् प्रकटितमिथःपाशविकता-
विरोधास्ते चोपद्रवभुवि गणेशस्य वधतः ॥ १२० ॥

अमीषां बीभत्सं फलमिदमिहालेखि हृदये
यथा नूनं नान्यैर्बहुभिरपि कार्यैर्नहि तथा ।
अमुष्मिन् कांग्रेस्ये शिविरविषये तं विदुरिमे
जना युक्तप्रान्ते सहि सहचरोऽस्माकमभवत् ॥ १२१ ॥

युवा निर्भीकोऽयं विशदमतिमान् दूरदृगयं
परामर्शान् दाता क्वचन न नमत्साहसिकतः ।
स कर्ता कार्याणां प्रथितिपदनामादिविमुखः
प्रविष्टोऽभूद् हिन्दूमुसलिमरणे शङ्करसमः ॥ १२२ ॥

तयोरैक्यं तस्य प्रियतरमभूत्प्राणपणत-
स्ततोऽसौ स्वप्राणानजहदिह तस्मै कृतकृतिः ।
शिरो हस्ते धृत्वा समुदमयमग्रेऽसरदहो
जडाभ्यां हस्ताभ्यां तदवनितले पातितमभूत् ॥ १२३ ॥

अयं युक्तप्रान्तो निहततिमिराद् रत्नवरतो
गणेशाद्विघ्नानामपहरणतोऽवञ्चित इति ।
समाचारः प्राप्तः शिविरमखिलं शोकविकलं
कराच्यां सञ्जातं तिमिरपरिभूतं हतविभम् ॥ १२४ ॥

तथाप्येते चित्ते कमपि गरिमाणं स्म दधति
प्रियो युक्तप्रान्ते स खलु जननेता विगतभीः ।
प्रविष्टः सङ्घर्षे वितत इव मृत्योरिव मुखे
पदं न्यस्तं चाग्रे न खलु कृतवान् पृष्ठपथगम् ॥ १२५ ॥

प्रतिष्ठां प्रान्तस्याखिलभरतभूमेरपि परां
स्वनिष्ठां चाप्यन्तर्निहितगुरुतां रक्षितवता ।
प्रवीरेणानेनाखिलहृदयमुक्ताग्रथनतो
गले हारो मातुः प्रणिहित इति प्राह जनता ॥ १२६ ॥

द्वादशे वर्षे कवित्वं समुदितं समुदीक्ष्य यस्मै
बालकविरिति गुरुवरः श्रीघूटरो विरुदं व्यतानीत् ।
तेन कविना कल्पिते श्रीनेहरूचरिताख्यकाव्ये
सर्गं एष गतोऽस्ति पञ्चत्रिंश इह काञ्चनपुरीयः ॥

अस्मिन्नेवावसरे 'गले का हार हो जाता' इत्यस्याः समस्यायाः पूर्तौ ।
तिलक से भाल भूषित है सुगन्धित गात गान्धी से, बना श्रृङ्गार
चितरंजन जवाहर लाल मोती से । इत्याद्या सुमहती हिन्दीकविता
लिखिता । कर्णपुरकविसम्मेलने पठितेयं परां प्रशंसामुपगाता ॥

लङ्कायां विश्राम:

स्रग्धरा

षड्त्रिंशः सर्गः

आरामः कार्य इत्याग्रहिलपरिवृढा सम्मतिद्राक्तराणा-
मासीन्मह्यञ्च वातावरणमपि परीवर्तनीयं तथेति।
तेनाहं चिन्तयामि स्म हि महति निजे भारते विश्रमस्य
स्थानाभावं विशेषादिह मनसिभवस्यास्य सद्विश्रमस्य ॥ १ ॥

अत्रायास्यन् हि यत्र प्रियनृपनयिकास्तत्र तत्रामिलिष्यन्
सर्वाश्चैताः समस्याः क्वचिदपि न ममान्वागतिं वा अमोक्ष्यन्।
लङ्कायामेकमासं व्यतिगमयितुमानिश्चिनोमि स्म तस्मात्
सैवासीत् सन्निधाने जलधिपरिवृतत्वाच्च दूरे स्वदेशात् ॥ २ ॥

यूरोपात्सप्तविंशे निजजनपदकेऽभ्यागतस्यायमाद्यो
ह्यासीदेकोऽवकाशः, प्रथममवसरं प्राप्तवानत्र चाहम्।
पत्न्या पुत्र्या च साकं क्वचिदधिवसितुं, शान्त एकान्तदेशे
सेवार्थं मद्विनोदार्थमपि हि कमला सेन्दिरा साकमागात् ॥ ३ ॥

विश्रामः शान्तिपूर्णः क्वचिदपि विदितो नाभवत्पूर्वमीदृक्
चिन्ता काचिन्न यस्मिन्मम मनसि मनागप्युदेष्यत्यमुत्र।
एतादृक्षो न मेऽभूद् व्यतिगतसमये नापि मेऽसौ भविष्य-
त्यग्रे वा विश्रमोऽस्मादिति मनसि चिरं चिन्तयामि प्रमुग्धः ॥ ४ ॥

सप्ताहौ द्वौ व्यतीताविह परमसुखाद् विश्रमेऽस्मिन् नुवाया-
एलीयायां न तस्मादधिकमिह जनैः सर्ववर्गोद्भवैनः।
आतिथ्यं मित्रभावादतिशयगहनात्कल्पितं रोचते त-
त्वस्मभ्यं, पारवश्ये प्रणयपरिवृते पातयत्यप्यवश्यम् ॥ ५ ॥

चायोद्यानेषु चान्येष्वपि च कृतिपदेषु श्रमार्ता नुवाया-
एलीयायां सुदूरात्प्रतिदिनमगमन् लङ्घितानेकमीलाः।
सार्धं प्रेमोपहारान् वनकुसुमचयान् शाकहैयङ्गवीना
दीनन्यांश्चानयंस्ते वयमिह किमपि प्रत्युपाहार्ष्म तेभ्यः ॥ ६ ॥

संलापेनापि तेषु प्रणयमवयितुं नालमास्मो वयं यत्
अन्योन्यं चावलोक्य स्मितमनमितमावेद्य तूष्णीं स्थिताश्च ।
अस्माकं स्तोकगेहोऽभ्रियत वितरितैस्तैर्द्रंरिद्रैरपि स्वै-
स्तैस्तैर्वस्तूपहारैर्वयमिदमखिलं प्रैषयामास्म तेषु ॥ ७ ॥

किं वाऽनाथेषु दत्त्वा परममुपरमं प्राप्तवन्तोऽधिलङ्कम्
तद्द्वीपीयानि वस्तून्यतिशयविदितान्यैतिहासिक्य-खण्डात् ।
बौद्धानां तान् मठांश्चातिगहनगहनानप्यपश्याम जीर्णा-
स्तत्रैका बुद्धमूर्तिर्मम हृदि रुचिता चानुराधापुरेऽभूत् ॥ ८ ॥

वर्षान्ते दूनकारागृहमधिवसते मह्यमेकेन लङ्का-
मित्रेणास्यास्तु चित्रं प्रहितमभवदास्थापितं तन्मयात्र ।
स्वीये कोष्ठे तु पीठे तदिदमतिमहार्घं ममाभूच्च मित्रम्
गम्भीरैर्बुद्धमूर्तेरथ च शमपरैर्हावभावैः शमापम् ॥ ९ ॥

नैकेष्वौदास्यकालेष्विदमभवदहो साह्यकृन्मे नितान्तं
बुद्धो नित्यं ममान्तःकरणमहरतेत्यस्य हेतुर्न वाच्यः ।
न त्वासीद्धार्मिकोऽयं य इह नियमितो बौद्धधर्मे मताना-
मावेशस्तेषु नास्ते क्वचन मम रुचिर्लेशतोऽपीति सत्यम् ॥ १० ॥

तस्य व्यक्तित्वमेवाहरत मम मनस्तद्वदीशोरपीदं,
तीव्राकृष्टेर्निदानं मम मनसि सदाऽजायतेत्यस्मि जाने ।
मार्गे मार्गे मठेष्वप्यहमिह बहुशो भिक्षुकान् यानपश्यम्
सम्मानं लब्धवन्तः सपदि प्रतिपदं मे स्थिता यत्र तत्र ॥ ११ ॥

सर्वेषामेव वक्त्रेष्वभवदिह परः कोऽपि शान्त्यार्जवादेः
सांसारिक्याः शुचश्चाद्भुतविरतिमयो मुख्यभावोऽनुभूतः ।
सामान्येनैषु वक्त्रेष्वतिनिपुणमतिर्नैव चाभासते स्म
मस्तिष्के नाप्यमीषामतिभयजनकः कोऽपि सङ्घर्षकर्षः ॥ १२ ॥

एतेषां जीवनाध्वा जलनिधिमभियान्ती नदीव प्रतीतः
शान्त्या सामान्यगत्या छलरहिततया नोच्छलन् नापि तिष्ठन् ।
वात्योत्पाताभिरक्षि-प्रशममयमहापत्तनप्राप्तयेऽहम्
सोत्कण्ठस्तानपश्यं, निजमविदमहं वातिकोत्पातिभाग्यम् ॥ १३ ॥

अस्ति प्राप्यं प्रशान्त भवजलधितटे पत्तनं मे न किञ्चित्
यावानुत्पात-वात्याजव इह हृदये सोऽस्ति वाह्येऽपि तावान् ।
चेत्तादृक्पत्तनं मे किमपि मिलति यद् वातिकोत्पातशून्यम्,
तत्राप्यन्तः सुखेन स्थिरवसतिरहं स्यान्नु सन्तोषमाप्तः ॥ १४ ॥

कञ्चित्कालं तदासीत्सुखमयमिह मे पत्तनं तच्च यत्रा-
ऽऽतिष्ठेत् कश्चिज्जनश्च स्वपनमपि सुखं यत्र पश्येत् स्थितश्च ।
उष्णेऽस्मिन् श्रोणिवन्धे शमजनकमथो जीवनानन्दमन्त-
र्भर्तुं च स्यां समर्थः खलु मम मनसोऽभूच्च लङ्कानुकूला ॥ १५ ॥

तत्रत्यां वीक्ष्य शोभां मम हृदयमिदं हर्षपूर्णं किलासीत्
मासो विश्रामकालस्त्वरितमवसितः प्रस्थिताः स्मस्ततश्च ।
तस्या भूमेश्च तत्रत्यजनसमुदयस्यापि नैकाश्च वार्ता
नाद्याप्येताः स्मृतिं मे जहति परिहृता या मया खेदपूर्वम् ॥ १६ ॥

कारागारस्य दीर्घेष्वपि दिवसशतेष्वेव शून्येषु मृद्वी
साऽवात्सीत्साकमेवास्वथ लघुघटनाऽऽस्ते स्मृतो स्थायिनी मे ।
पार्श्वेऽभूज्जाफनाया ध्रुवमियमिति ते शिक्षकाश्छात्रवर्गैः
साकं त्वस्माकमेत्यावरुरुधुरहहा, भर्त्तारि साभिवादम् ॥ १७ ॥

तेषां छात्राः दृढैः स्वैरिह समवहिता उत्सुकैश्चापि वक्त्रै-
रेकश्चाभ्येत्य हस्ते समधृत मम वै हस्तमभ्याह मां च-
नाहं स्यां व्यग्रपादः क्वचिदपि समये इत्यहो तस्य नेत्रे
नूनं ते द्योतमाने, सुखविशदमुखं त्वङ्कितं नेत्रयोर्मे ॥१८॥

कोऽसावासीन्न जाने न खलु गृहनिवासादिसङ्केत आस्ते
विश्वासो वर्तते मे स इह निजवचोदार्ढ्यमावक्ष्यतीति ।
यर्ह्येषः सम्मुखीनो भवति विषमतत्तत्समस्याशतस्य
स्यान्नायं व्यग्रपादो न च भवति तदा पृष्ठपादः कदापि ॥१९॥

लङ्कातो दाक्षिणात्येन्दुसरससविधे दक्षिणं प्रान्तमेता
अत्राश्चर्यविहासीत्खलु तनुमनसोः शान्तिराकस्मिकीव ।
कोचीनं मालवारं बयमिव च गतास्त्रायमानोपकूलात्
हैद्रावादं प्रविष्टास्तदनुभजति यो देश्यराज्यप्रतिष्ठाम् ॥२०॥

एषां भूयांसि चान्यान्यतिशयितगतीन्यासते कानिचिच्च
भूयः पृष्ठस्थितानि ब्रिटिशमतिगते शिक्षया स्तश्च राज्ये ।
कोचीनं नाम तावत्सुभगतरमहो त्रायमाणोपकूल-
ञ्चोद्योगेनाग्रगामि स्थितमिह च शुभं चास्ति मैसूरराज्यम् ॥२१॥

हैद्राबादं पुराणीमनुसरतितरां हन्त सामन्तरीतिं
सर्वत्रास्मान् प्रजा स्वागतवचनभरैः सत्करोतिस्म राज्ये ।
राज्यं राज्याधिकारा इह निहितशुचा संयुता एव चासन्
अस्माभिः सङ्गतासूदयतु भयकरो मा प्रजासु प्रभावः ॥२२॥

मैसूरे तत्र मन्ये नृपनयिकविचारस्य च त्रायमाणे
स्वातन्त्र्यस्यावकाशः सपदि वितरितोऽभूदहो नागरस्य ।
त्रावन्कोरेऽपितावत्परमिह न तथा हैदराबादराज्ये
सत्कारे चापि वातावरणमिह मम श्वासरोधं करोति ॥२३॥

त्रावन्कोरेण पश्चादधिकृतिरियमाच्छिद्यते दत्तपूर्वा
मैसूरेणापि पश्चान्नृपनयिकपथान्नागरिक्यल्पतोऽपि
तच्चोहे लोहदण्डे महति खलु मया राष्ट्रियोऽयं ध्वजोऽपि
तत्राध्यारोपितोऽभूत्सुमहति जनसम्मर्दपूर्णोत्सवे च ॥२४॥

मत्प्रस्थानात्परस्तात्कतिपयदिवसानन्तरं स्तम्भ एषः
सम्पात्य च्छिन्नभिन्नोऽक्रियत तदपराधो ध्वजारोपणञ्च ।
यश्चैवारोपितोऽभूदिह किल मयका तस्य तादृग्विकारो-
ऽसत्कारश्चापि चित्ते मम महदकरोद् दुःखमन्तर्विरोधम् ॥२५॥

त्रावन्कोरेऽथ कांग्रेससमितिरुदिताऽवैधसंस्थेति तावत्
कश्चित्कांग्रेससभ्योऽपि न भवितुमिहार्हत्यथो नागरिक्यः ।
यद्यप्यत्रापि भङ्गाग्रहपरिहरणाद् वैधतां प्राप सेयम् ।
नूनं वैदेशिकादप्यधिकमिदमभूदुग्रधामेति मन्ये ॥२६॥

मध्याह्ने सूर्यतापः क्वचन सहनतां प्राप्नुतात्किन्तु तस्मा-
त्तापं प्राप्यातितप्ता भवति हि सिकता दुःसहेति प्रसिद्धम् ।
त्रावन्कोरं च मैसूरमपि ब्रिटिशतस्तीव्रतां प्राप्तमासीत्
यत्सामान्या च शान्ता नृपनयिकगतिस्तत्र सम्मर्द्यते स्म ॥२७॥

ताभ्यां सौविध्यमासीत्तदपि वितरितं, छिन्नमेतत्समस्त्र-
पृष्ठं यातः स्म राज्ये नृपनयिकदिशा मे क्रमादेवमेव ।
हैद्राबादं तु पादं नहि विनिहितवत्तत्र तस्मान्न तस्य
प्रत्यावृत्तेरपेक्षोदयमिह न गता नापि सौविध्यवित्तेः ॥२८॥

हैद्राबादे तु काचिन्नृपनयिकसभायोज्यते क्वापि काले
सामाजिक्यान्विता वा इह विषयदृशा दृश्यते धार्मिकी सा ।
ताभ्यामायोजनाज्ञा प्रथममिह भवेद्राज्यतः प्रापणीया
नाप्यस्मिन् वृत्तपत्रं किमपि भवति तत्सम्प्रकाश्यं कुतश्चित् ॥२९॥

बाह्यः कीटाणुरेकोऽपि न विशतु यथा हैदराबादराज्ये
बाह्यं तद्वृत्तपत्रं किमपि न लभतेऽत्र प्रवेशं विनाज्ञाम् ।
बाह्याद्दोषप्रभावात्पृथगवधृतिरासीदहो घोरतीव्रा
यस्यां तद्वृत्तपत्रं प्रविशति न पुरानत्रतीव्रस्वतन्त्रम् ॥३०॥

कोचीने स्मः प्रयाता धवलमहुदयानां प्रशाखापुरं तद्
द्रष्टुं तन्मन्दिरे चार्चनविधिमवलोक्यं पुराणे पुराणम् ।
ह्रस्वश्चायं समाजो ध्रुवमतिचिरजश्चाद्भुतश्चास्ति भूयः
ह्रस्यन्ती चास्ति संख्या प्रतिदिनमधुना तस्य सामाजिकानाम् ॥३१॥

प्रोक्ताः स्मो यत्र चैते विदधति वसतिं तद्धि जेरूसलेमा-
भासं विभ्राजमानं स्फुटमिदमभवत्प्राच्यनिर्माणरम्यम् ।
मालावारस्य कूले वयमुपनगराणीदृशान्यक्षिलक्षी-
कार्ष्माऽऽसन्यत्र तेऽमी अधिकतरजनाः सीरियन्नीसवीयाः ॥३२॥

स्यादेतत्स्वल्पलोकैर्विदितमिह मतं त्वीसवीयं शताब्द्या-
माद्यायामीसुजन्मान्तरमविशदहो यन्न यूरोपमान्यम् ।
हिन्दुस्थानस्य दक्षे तदतिदृढतया बद्धमूलं तदासीत्
यद्यप्येषामधीक्षेऽभवदुपनगरे सोरिया-एण्टियोके ॥३३॥

किन्त्वेषामीसवीयं मतमिदमधिकं भारतीयं किलासीत्
बाह्यैर्देशैश्च तस्यान्वय इह न बभूवेति विज्ञातमास्ताम् ।
दृष्ट्वा तां दाक्षिणात्ये वसतिमथ च नेस्टेरियन्मान्यतां या-
मत्याश्चर्यं गतोऽहं स गुरुरुदगिरच्चायुतं शिष्यसङ्ख्याम् ॥३४॥

अत्रासं मन्यमानः क्वचिदपरमते स्युर्विलीना इमे वै
नैतच्चाज्ञासिषं यद् भरतभुवि कदाचिद्वसन्तिस्म चैते।
प्रोक्तोऽहं तैः कदाचिद् भरतभुवि तदन्वीतसङ्ख्याधिकाऽऽसी-
देते वाराणसीं यावदिह च विततास्तह्यभूवन्नुदीच्याम् ॥३५॥

हैद्राबादं गताः स्मो वयमिह बहुधा नायडूं तत्सुते च
द्रष्टुं श्रीपद्मजां तामथ च मतिमतीं चारुलीलामणिं च।
यर्ह्येतद्गेहवासं व्यधिम च तदहे काश्चनाऽऽगुण्ठनस्था
नार्यः पत्नीं ममागुर्नयनविषयतांनेतुमेकत्रितास्ताः ॥३६॥

तासामग्रे बभाषे किमपि च कमला मा स्म दूरङ्गमंस्ताः
स्युः पुम्भ्योऽतीति तस्याभवदिह च फलं द्वित्रसप्ताहतोऽदः।
एकेनार्तेन पत्या लिखितमिह दलं त्वात्मपत्नीश्रितं यद्
युष्मत्पार्श्वादुपेता नहि मम वचनं मन्यते मत्कपत्नी ॥३७॥

किं वा मन्येत नैषा मम वचनमहो पूर्ववद्यच्छृणोति
कृत्वा वादं विवादं क्वचिदतिपरुषं भावमप्यातनोति।
एतत्पत्रं पठित्वा मनसि तु कमला विस्मिता सस्मिताभूत्
सप्ताहान् सप्त नीत्वा वयमिह पुनरप्यागता मोहमय्याम् ॥३८॥

काङ्ग्रेस्यां राजनीतौ सपदि निपतितोऽत्रागतस्तत्क्षणाच्च
भूयांसश्चाधिवेशा इह कृतिसमितेर्भाविनो नैकशीर्षाः।
हिन्दुस्थानस्थितिर्यत्सपदि विपरिवृत्ताऽभवद्यच्च युक्त-
प्रान्ते प्रायः कृषीणामभवदिह च या लालकुर्तीदलार्चा ॥३९॥

अब्दुल्गफ्फारखाने प्रगतिरपि कृता नेतरि श्रीदलेन
सीमाप्रान्ते ततः सा कृतिसमितिमुखे स्यादिहावेदनीया।
वङ्गेष्वत्यन्तविक्षोभणमुदितमभूद्यद्दशारूपमुग्रं
क्रोधासन्तोषवातावरणमिह तदन्तःप्रवृद्धं नितान्तम् ॥४०॥

प्रश्नास्ते सम्प्रदायेष्वधिजनितवतां विग्रहाणां तदासन्
काङ्ग्रेस्यैः सर्वकाराधिकृतजनगणैः साकमल्पाल्पमूलाः।
नैकेऽभूवन्विचार्याः पुनरपि च पुनः प्रश्नमुत्थापयेच्च
दिल्लीसन्धेर्विभङ्गे दलमुभयमथान्योन्यदोषाधिरोपम् ॥४१॥

प्रश्नश्चायं समायात्किमिदमुपगतं स्यान्नु कांग्रेसमस्यां
सङ्गोष्ठयां गोलपीठे किमिह च गमनीयं स्वयं गान्धिनापि ।
इत्याद्यान् प्रश्नयूथान् विमृशतु समितिः कांग्ररेसस्य सेति
व्यस्तोऽहं तत्समायोजनविधिषु परां व्यग्रतामन्वभूवम् ॥४२॥

शर्मण्येष्वावसन्यो दशदिवसमहेऽशेषसद्दर्शनोक्त-
सूत्राण्यध्यापयत्तान् सहृदयसुहृदो योगयुञ्जानचित्तान् ।
तेनेदं चारु तेने रसिकजनविनोदाय काव्यं महीयो,
लङ्काविश्रामनामाऽवसितिमुपगतस्तस्य षट्त्रिंशसर्गः ॥

सन्धिकालिक्योऽसुविधाः

शार्दूलविक्रीडितम्

सप्तत्रिंशः सर्गः

सङ्गोष्ठ्यां गमनीयमत्रभवता श्रीगान्धिना वा नवे-
त्येष प्रश्नवरः सदा समुदितो नाद्यापि निस्तीर्यते।
अन्त्ये चापि पले न कस्यचन किञ्चिज्ज्ञातमासीदिदम्
काङ्ग्रेसी नहि वेद कार्यसमितिर्गान्धिर्न वेद स्वयम् ॥१॥

प्रश्नस्योत्तरमाधृतं हि बहुषु स्थायिष्वहो किन्त्विहा-
नेका नूतननूतनास्तु घटनाः सञ्चालयन्ति स्थितिम्।
अस्य प्रश्नवरस्य चोत्तरवरस्यासन् समस्यास्तले
दुःसाध्याः कठिनाश्च ता न ददते निर्णेतुमत्र क्षणम् ॥२॥

शिष्टिर्नो ब्रिटिशस्य तस्य सुहृदश्चाख्यान्ति ते सन्ततम्
गोल्पीठेन विधानरूपरचनाऽऽस्ते निश्चिता रेखया।
रेखाश्चित्रगताः किलाभिलिखिताः स्थूला इदानीमिह
न्यासो रङ्गविशेषकस्य परमोऽयं शिष्यते केवलम् ॥३॥

काङ्ग्रेसं नहि मन्यते स्म तदिदं, चित्रं समस्तं तु तत्
निर्मातुं त्ववशिष्टमेव धवले पत्रे किलामन्यत।
यत्सत्यं किल सङ्घरूपरचनामाधृत्य संरक्षणैः
साकं तत्प्रतिबन्धचिन्तनमभून्मञ्जूररीकारितम् ॥४॥

किन्त्वस्मासु पुरैव भारतकृते ग्रन्थस्वरूपोचितं
भूयोभिस्तु विधानमेव परितस्तद्युक्तमित्यादृतम्।
एतत्स्वीकरणं च तादृशमहासंघस्य न स्वीकृतिः
यन्निर्माणमकारि तेन सभया गोल्मेज़ इत्याख्यया ॥५॥

स्वाधीनत्वमिदं च राजनयिकं सामाजिकैस्तैः परी-
वर्तैः साकमपि स्वसङ्घरचनारूपानुरूपं भवेत्।
तत्संरक्षणचिन्तनं मिलतु तैरस्मद्विचारैः पुन-
र्न्यूनं तत्प्रतिबन्धचिन्तनफलैरित्यस्त्यहो दुष्करम् ॥६॥

सामान्यप्रतिबन्धकैरबलतां यायान्निजाधीनता
काठिन्योद्धतिरस्ति भारतहितेक्षेतीदृशैः शब्दकैः ।
किञ्चिन्मात्रमियं पुनर्न सकला, नूनं कराचीसभे-
दं स्वच्छीकृतवत्यहो यदि तु तत्स्वीकारयोग्यं भवेत् ।।७।।

यस्मिन् सैन्य-विदेश्यप्रश्नसहिता, राजस्वयुक्तार्थिकी
नीतिश्चाधिकृता भवेच्च, ब्रिटिशादेर्देयता भारते ।
पश्चादापतिता भवेत्प्रथमतस्तद्देयताशोधने
स्यादस्याधिकृतिर्विधानमिह तत्स्वीकर्तुमर्हं भवेत् ।।८।।

अन्यच्चापि च मौलिकाधिकृतिसत्प्रस्तावविज्ञापितं
कञ्चिच्चार्थिकराजनैतिकपरीवर्तं च काङ्क्षामहे ।
एतत्सर्वमपि प्रतीतमभवद् गोल्मेजकान्फ्रेंसतो
हिन्दुस्थानिकवर्तमानप्रभुताकाराद्विरुद्धं तथा ।।९।।

काङ्ग्रेसस्य च ब्रैटिशस्य च दृशोर्भूयान् स भेदः स्थितः
तस्यास्याञ्च परिस्थितौ विनयनं सम्भाव्यते नाल्पकम् ।
नैवाशास्ति जनस्य कस्यचिदपि प्रायो हि कांग्रेसिक
स्यास्मिन् स्यात्समये समाहितिरिह ब्रैटिश्यकाङ्ग्रेसयोः ।।१०।।

नैराश्यं तदिदं च गान्धिहृदयेऽप्याशैकवादात्मनो-
प्याशा कापि किलाधिका न समभून्नासौ निराशः क्वचित् ।
अन्तं यावदयं प्रयत्ननिरतः सर्वे वयं चेतसा
पश्यामः सफला भवेम विफलास्त्याज्यो न यत्नो महान् ।।११।।

दिल्लीसन्धिरयं प्रयोजयति नो, गोल्मेज़कान्फ्रेंसके
हेतुद्वन्द्वकृतोऽवरोध उदितोऽस्मद्भागसङ्ग्राहणे ।
यावत्तत्र न दृष्टिबिन्दुमखिलं प्रस्तोतुमाज्ञा भवेत्
सर्वं वक्तुमिहात्मसम्मतमथ स्याम स्वतन्त्रा वयम् ।।१२।।

एतन्निश्चितपूर्वमस्ति, तदिदं हेत्वन्तरं तत्र चे-
त्युक्त्वा प्रस्तुतिखण्डनं न कुरुतात्सभ्यः सभाधीश्वरः ।
यूरोपस्य कथैव का वयमिह श्रीभारतेऽपीदृशि-
स्थित्यां नैव प्रहिण्महे प्रतिनिधिं गोल्मेज़कान्फ्रेंसके ।।१३।।

सङ्घर्षोऽत्र समुद्भवेदपि मिथः कांग्रेसशिष्ट्योः पुनः
सोढव्यं दमनं कठोरमपि च स्यात्तत्सम्मुखीनाग्रहः।
हिन्दुस्थानधरातले यदि भवेद् दह्येत चास्मद्गृहं
नूनं को नु जनस्तदा प्रतिनिधिस्तत्रोपयायान्मुधा ॥१४॥

को नामाग्निमिहत्यमेनमनवेक्षेतानुयायाच्च तं
वैदेशिक्यमिदं नु सुन्दरपुरं ह्वन्नन्दनं लन्दनम्।
मत्वा तत्र च शुष्कपण्डित इवैतस्मिन्विधाने नवे
स्वं वाक्याशयमेष दर्शयितुमेवात्राथ वादं श्रयेत् ॥१५॥

हिन्दुस्थानपरिस्थितिः स्थितिरपि प्रायः परीवर्तते
सीमाप्रान्तिक-बङ्गिकस्थितिरियं प्रान्ते च युक्तेऽप्यसौ।
बङ्गेषु प्रभवत्ययं न किमपीयं सन्धिवार्ता नवा
सङ्घर्षश्च निरन्तरोऽस्ति चलितो वृद्धिं गतो वास्त्ययम् ॥१६॥

भङ्गान्दोलनवन्दिनः कतिपये मुक्ताः परं नामतो-
ऽन्ये ते राजनयापराधयमिता बद्धाः सहस्राण्यपि।
दृग्बद्धा अपि वन्दिगेह-शिविरेष्वध्यासते दुर्दशां
राजद्रोहपरैश्च राजनयिकैः कार्यैर्निरुद्धाः परे ॥१७॥

सामान्येन च भाति यत्किलाक्रमणकं नाद्यापि मुञ्चत्यसौ
शिष्टिर्बङ्गसमस्यकाश्च कठिना आतङ्कवादात्सदा।
काङ्ग्रेसस्य च वृत्तयः सविनयाद्भङ्गादृतेऽल्पाः पराः
सातङ्काः किल संख्यया परिमिता रूपेण चाल्पाः स्थिताः ॥१८॥

एताभिस्त्वभिजायते कलकलो ध्यानस्य चाकर्षकः,
सातङ्काभिरमूभिरन्यपदवद् वङ्गेऽभवद् दुष्करम्।
तद् वातावरणं हि ताभिरजनि प्राभूत्प्रतीपं हि यत्
शान्त्या युद्धमिदं पुरो गमयितुं शिष्टेः कठोराद्दमात् ॥१९॥

तच्चैतद्दमनं द्वयोरपि समं सातङ्कनिस्तङ्कयो-
रापद्येत, न पूरुषाधिकृतयः शक्ता विवेक्तुं हि तान्।
नैकेषामिह दृष्टिबन्धनभृतां वर्षैर्विनैवाभितो
न्यायाच्चाप्यभियोगतोऽपि दमनं सातङ्ककार्यैर्विना ॥२०॥

अन्यैवास्तु कृतिश्च राजनयिकी हेतुर्दमे तादृशां
तेषामेष न दीयतेऽप्यवसरो यत्ते पुरस्कुर्वताम् ।
निर्दोषत्वमिह स्वकीयमथवा दोषं निजं जानताम्
दोषाभावकृतोऽभियोगकरणाभावोऽपि संभाव्यते ॥२१॥

यद्यप्यत्र विदन्ति यद् ब्रिटिशताशिष्टैः प्रतीपा द्रुषो
वैधानिक्युपदृष्टितोऽतिवितता यान्ति स्वतो रोप्यताम् ।
तज्जालं गहनं च दुर्निरयनं, प्रायो हि युक्ता अपि
न्यायाधीशनिदेशतः पुनरपि ग्राह्या भवन्तीह ते ॥२२॥

बङ्गानाममुनातिवक्रघटनात्काङ्ग्रेसलोकाः परं
वैवश्यं दधतेऽथ तेष्वभिनवः प्रश्नः सदोत्तिष्ठति ।
यावच्छक्यमिमे च तत्प्रतिकृतिं कुर्वन्त्यवश्यं परं
जानन्त्येव न तेन कोऽप्यवितथः प्रश्नः समाधीयते ॥२३॥

दौर्बल्यं परिभावनीयमिह ते यज्जायते, जायतां
तन्नामेति, परिस्थितेः परवशास्तेऽन्यन्न कर्तुं स्थिताः ।
तत्रास्य व्यवहार एष महतो रोषस्य हेतुः स्थितः
कांङ्ग्रेसस्य न पश्यतीह समितिर्बङ्गं कृशोपेक्षिणी ॥२४॥

कष्टस्यावसरे समेऽपि जहति प्रान्ता इमं प्रान्तकं
स्वस्थो नाप्यनुभूयते स्म सततं वङ्गोऽपि तस्यां स्थितौ ।
किन्त्वेतद् वितथं नितान्तमभवत्सर्वत्र संवेदना
बङ्गान् प्रत्यभवन् समे समुदिताः कर्तव्यमूढाः स्थिताः ॥२५॥

नैषां प्राप सहानुभूतिरुचितां तत्राकृतिं प्रोज्ज्वलां
प्रान्तः कष्टमपासितुं निजनिजं चोद्युक्त एवाभवत् ।
लोकेऽप्यत्र भवत्यसिद्धमखिलं कार्यं हि बाह्यं सदा
कर्तव्ये हि किलान्तरे न खलु तत्स्याच्छब्दशास्त्रे स्थितम् ॥२६॥

युक्तप्रान्तगतः कृषीवलगणो मज्जन्नभूद् दुःस्थितो;
प्रान्तीयः सरकार एष विषयं चैनं सदोपैक्ष्यत ।
नायं मुञ्चति तं करं न च तदुत्पन्नांशदानं महत्
ननं तस्य विमोचनस्य यतनं पारे परे न्यस्यति ॥ २७ ॥

तत्प्राप्तिश्च हठेन तेन समुपक्रान्ता, समूहात्मकं
स्वस्वत्वाहरणं च सर्वहरणं चारब्धमेवाभवत् ।
लङ्कास्थे मयि साग्रहं करपरिग्राहप्रयत्नादभूत्
द्वित्रेषु स्थलकेष्वभूत्कृषकविद्रोहैकमूलः कलिः ॥२७॥

सामान्येऽपि च तत्र भूमिपतयस्तत्कार्मिकाश्चाहृता
गान्धिमल्लिकसबोधनाय नयनीतालं तदाभूद्गतः ।
तद्वार्ताफलमीप्सितं न मिलितं, यन्मोचनं घोषितं
तन्नूनं लघुमात्रमेव समभूदाशासितात्सर्वतः ॥२९॥

ग्रामेषूदयते स्म हा कलकलः, कोलाहलो वर्धितः
शिष्टैर्भूमिमतां च तत्र दमनं वृद्धिं गतं सङ्गतम् ।
भूमेश्चाप्यधिकारतः परिहृताः स्वल्पा हृताः सम्पद-
श्चोत्पन्ना स्थितिरत्र यत्र सुमहान् संभाव्यते विप्लवः ॥३०॥

कांग्रेसस्य किल प्रयत्नफलितं मन्ये कृषीकर्मभि-
र्यद्धिसात्मकमत्र कर्म न कृतं सोढा स्वयं यातना ।
तेष्वासीत्तु बलप्रयोगविहितोऽत्याचार एको महान्
किन्त्वस्मादपि दूषणाद् गुणलवः कश्चित्प्रजातोऽभवत् ॥३१॥

उत्पन्नान्नमहार्घतानिरसना निःस्वेषु वा कर्षके-
ष्वन्नादरभवत्सुखञ्चय इहाच्छिन्ना न चेत्सम्पदा ।
पूर्वेभ्यः किल वत्सरेभ्य इति ते खाद्येष्वचिन्ताः स्थिताः
युक्तप्रान्ततलेऽपि वंगवदभूत्सन्धिर्नवो निष्फलः ॥३२॥

विक्षोभो हि निरन्तरः समभवत् फोजीसमे शासने
ह्यत्रत्ये विधिभिर्विशेषविहितैरादेशकैश्चासकृत् ।
स्वल्पेष्वप्यपराधकेषु महता दण्डेन चण्डोत्तरे,
संजातां स्थितिमत्र रोद्धुमुदितो गफ्फारखानोऽभवत् ॥३३॥

तनान्दोलनमाहितं स कटुकोऽभूच्छिष्टिदृष्टौ ततः,
सोऽयं षट्पदतोऽपि चोन्नततरः पाठानवीरः पुमान् ।
पुंस्त्वेनैव पदातिरेव गतवान् ग्रामेषु केन्द्राण्ययं
तत्र स्थापयितुं स लालकुरतीवर्गस्य सङ्क्रान्तवान ॥३४॥

यत्र क्वापि स याति तत्सहचरा वा पूरुषा यान्ति ते
ते सर्वत्र दलस्य कञ्चन नवं कृत्वा क्रमं प्रासरन् ।
शीघ्रं प्रान्ततनौ 'खुदाइखिदमतगारस्य'शाखास्तता
आसन् शान्तिमयास्तथापि वितथारोपेऽप्यहिंसाव्रताः ॥३५॥

शान्तानामपि पूर्वयुद्ध-वधवद्वृत्तस्य सोपद्रव-
प्रान्तस्यान्तिकवर्तिनां नियमितं स्वान्दोलनं सत्वरम् ।
हिन्दुस्थानिकराष्ट्रियप्रयतनैर्गाढान्वयं धारयत्
शिष्टेर्भीतिकरं किलाभवदिदं संवर्धमानं तु तत् ॥३६॥

शिष्टिस्तस्य न विश्वसित्यथ परा रूपे त्वहिंसात्मके
सा चेद्विश्वसिता भवेद्धृदयतो भीतिर्निरस्ता भवेत् ।
सास्मिंस्तामियतीं यथार्थमहितां शक्ति स्म पश्यन्त्यभूत्
दीर्घं कालमसौ न शाम्यति, परं द्रष्टुं समर्थाभवत् ॥३७॥

अस्यान्दोलनकस्य चात्र महतो नेता स गफ्फारखान्
एवासीदफगानमान इति यः सीमान्तगान्धीति च ।
नाम्ना चापि पठानमान इति चासीद्विश्रुतः संस्तुत-
स्तूष्णीं कर्मणिनिष्ठितेन दमनाद्भीतेर्लवो नाश्रितः ॥३८॥

दुःखैश्चापरिभूत एष परितो लोकप्रियत्वं गतः
सीमाप्रान्तमनःसु विस्मयकरं तत्प्रेरणादायकम् ।
अन्ये राजनयाश्रया इव न सोऽभूद्राजनीत्याश्रयः
तषां दक्षतया च पार्श्वपरिवृत्त्यादेरविज्ञातहृत् ॥३९॥

स त्वासीत्सरलेन चोन्नततरेणोपाश्रितो वर्ष्मणा
स्वान्तेनापि समाश्रितः कलकलाज्जल्पाज्जुगुप्सां गतः ।
हिन्दुस्थान-स्वतन्त्रतावपुषि चैषान्तर्हितामेव सः
सीमाप्रान्त-स्वतन्त्रतामभिलषंस्तद्वासिनः प्रैरिरत् ॥४०॥

नैवोद्वेल्लयति स्म तं विधिमयी वार्ता विधानं च तत्
तत्राधाच्च रुचिं मनागपि च तत्प्राप्त्यै स कर्माश्रयत् ।
श्रीगान्धिश्च तथाविधस्य विदधे शान्तस्य वै कर्मणो
रीतिं स्वेन विचारितां ध्रुवमनासक्त्या प्रसादप्रदाम् ॥४१॥

वादे जल्पवितण्डयोश्च नपतन् वैधानिके वा क्रमे
साक्षात्संघटनं समारभत चेतस्मिन् कृतार्थोऽभवत् ।
श्रीगान्धो सविशेषमेष भजते स्माकर्षणं मानसं
पूर्वं ह्रीपरिभावितोऽनुसरति स्मायाति नैवान्तिकम् ॥४२॥
पश्चात्केषुचनेह वस्तुषु समाधानाय तस्यान्तिकं
गन्तव्यं समभूदिति प्रगतिमज्जातं सखित्वं तयोः ।
आश्चर्यं यदयं पठानयुवकोऽहिंसामपेक्ष्येतरान्
सिद्धान्तादुररीचकार सहगान् स्वीकारयामास तान् ॥४३॥
उद्वेगस्य च कारणेऽपि दधते शान्ति समत्वं परम्
इत्येतद्यदि बोधितं सपदि तत्स्वस्मात्तु निष्ठाबलात् ।
एतद्वक्तुमसाम्प्रतं न लघुकां हिंसामपीहाश्रिताः
सीमाप्रान्तजना यथेतरजनाः, स्याद्भावुकत्वादियम् ॥४४॥
तद्धाराभ्युदिता तदा हि जनता किं कर्तुमुत्तिष्ठते
इत्येतत्प्रथमं प्रकाशयितुमप्यत्यन्तमेवाक्षमम् ।
किन्त्वात्मानमुदास्य कष्टसहने यद्दर्शितं त्रिंशके
सीमाप्रान्तभवैः पठानयुवकैः पश्चाच्च तत्त्वद्भुतम् ॥४५॥
सीमान्तस्य च गान्धिमेनमधिका शिष्टयाधिकारान्विता
अत्यन्तं किल भीरवश्च भरतावन्यां वसन्तो जनाः ।
सन्देहेन विलोकयन्ति दधते न प्रत्ययं तत्र च
शङ्कन्ते किमपि स्थितं क्षतिकरं षड्यन्त्रमेवानिशम् ॥४६॥
किन्त्वेतेषु गताब्दकेष्वनुगतैर्युक्तः स गफ्फारखान्
हिन्दुस्थानविभागकेषु वसतः कांग्रेसकार्यविहान् ।
पार्श्वस्थोऽपि निषेवतेऽतिगहनं सौभ्रात्रमातिष्ठते-
ऽन्योन्यं चाद्रियते ततो न हि लवः सन्देहाम्बुनः शिष्यते ॥४७॥
काङ्ग्रेसोयजनास्तु वर्षनिचयाद् गफ्फारखानं विदुः
सोऽयं नास्ति सहायकः किल सतामास्ते ततोऽप्युत्तमः ।
हिन्दुस्थानविभागकेष्वनुदिनं वीरं तथा निर्भयं
तं लोकाः प्रतिजानते सहचरं त्यागे परं साहसे ॥४८॥

श्रीगफ्फारपरीचयात्प्रथमतस्तद्भ्रातरं द्राक्तरं
जाने कैम्ब्रिजकालिजेऽध्ययनिनंशिक्षार्थिनं लन्दने।
पश्चात्तेन सहाभवच्च गहना मैत्री विधि ध्यायता
नूनं लन्दनवासिना प्रतिदिनं तेनाभवन्मे स्थितिः ॥४६॥

हिन्दुस्थानमुपागतोऽहमथ स त्वाङ्ग्लैकदेशे स्थितः
तत्र द्राक्तररूपतोऽधिवसति स्मैषो महायोधने।
नैनीबन्दिगृहे तमैक्षिषि परं तं भारतेऽप्यागतं,
सीमाप्रान्तिकलालकुर्तिदलमायुङ्क्ते स्म कांग्रेसकम् ॥५०॥

किन्त्वेषां पृथगेव संघटनकं स्वं तत्र चाराजत
चित्रासीत्स्थितिरेषिका, युगलयुग्गफ्फारखानोऽभवत्।
एकत्रिंशकवत्सरे दलमिदं निर्णीतवद्यद्दलं
कांग्रेसे विलयं प्रयातु किल लालकुर्तीदलं कीर्तिमत् ॥५१॥

श्रीगान्धिस्तु करांचिसम्मिलनतः पश्चाद्‌यियासामधात्
सीमाप्रान्तपदे परं न सरकारस्तत्तदामन्यत।
शिष्टैः कर्मकरास्तु लालकुरतीवर्गस्य कार्यक्रमान्
प्रास्तुन्वत् स्वयमत्र गन्तुमथ स प्रास्तौत् स्वयं वीक्षितुम् ॥५२॥

शिष्टिरतस्य न गन्तुमन्वमनुताद्धा मामपि प्रारुधत्
दिल्लीसन्धिदृशावयं त्वनुचितं मन्यामहे स्माग्रहम्।
एतान्प्रश्नचयानतीत्य समितेरग्रे समस्या न वा,
प्राचीनैव समागता प्रतिपदं या सम्प्रदायोद्भवा ॥५३॥

गोल्पीठान्वयतो महत्त्वमधिकं तस्यास्तदा चाभवत्
व्यक्तं शिष्टिरमुं पुरः प्रणयतादन्या हि नैतादृशः।
तत्सम्मेलनसांसदाश्च सकलाः शिष्ट्यैव नामाङ्किताः
वैशिष्ट्येन तदा तथापि न मनोनीता अभूवन्निमे ॥५४॥

शिष्टिश्चात्र विशेषतश्च हठतो राष्ट्रीयमुस्लिम्गणे
नेतुः कस्यचनापि नानुमनुते नामाङ्कनं यत्पुनः।
श्रीगान्धिस्तदपेक्षशात्र यदि चेच्छिष्टेर्निदेशादयं
सम्मेलः किल साम्प्रदायिकतया प्रश्ने भवेदुद्धृतः ॥५५॥

तर्ह्यस्मिन् न यथार्थराजनयिके नाप्यार्थिके प्रश्नके
पर्याप्ता भविता विचाररचना नास्यां विशेषस्थितौ ।
लाभः स्यादिह लन्दनोपगमनादस्मात्स गान्धिस्तदा
काङ्ग्रेसस्य पुरोऽवदद् भवतु तत्साम्मत्यमत्राधुना ॥५६॥

सर्वाणीह दलानि सन्तु मिलितान्यादौ च शोचन्तु ते
सम्मेले न भवेदुपस्थितमिदं वै सम्प्रदायानुगम् ।
तस्यैषा सहजा मतिः किल यथार्थैवाभवद्वस्तुतः,
किन्त्वेषा समितिर्न मानितवती गान्धेर्यथार्थं वचः ॥५७ ॥

अस्मादेव च कारणान्न गमनं गोलपीठसम्मेलने-
ऽस्माकं स्यादुचितं ततश्च गमनान्नास्वीकृतिः संभवेत् ।
सर्वेषामपि सम्प्रदायकृतिनां साम्मत्यतोऽस्याः समा-
धानान्वेषणयत्नमप्यरचयन्, साफल्यमाप्तं न तत् ॥५८॥

एकत्रिंशनिदाघके लघुमहत्प्रश्नातिरिक्ता इमे
केचित्प्रश्नवराः समक्षमभवन्नस्माकमावश्यकाः ।
सर्वस्मादपि देशतश्च समितिभ्योऽस्मत्सकाशे जनै-
र्विज्ञप्त्यः प्रहिता यथाधिकृतकैः सन्धौ समावेशितम् ॥५९॥

अस्माभिः कतिचिच्च तासु सविधे शिष्टैरपि प्रेषिताः
कांग्रेसे स्वतयापि सन्धिकदनारोपा अनेकेऽर्पिताः ।
अन्योन्यत्र किलैवमारुरुपतां ते वृत्तपत्रेष्वपि
कालेऽमुद्रयतां, न तेन च तयोः सम्बन्धशुद्धिः कृता ॥६०॥

एतान् प्रश्नलवांश्च संश्रितवतां संघर्षलेशाश्च ते
किञ्चिन्नैव महत्त्वमादधति, सत्संघर्षवृद्धेः कथा ।
संघर्षश्च स मौलिको न ध्रियते व्यक्तिष्वनेकास्वयं
संग्रामः स हि राष्ट्रियो जनपदेष्वार्थिक्यदोषोद्भवः ॥६१॥

संघर्षः स च मौलिकं तमधुनालम्ब्यैव वार्यो भवेत्
राष्ट्रीयं प्रथमं क्रमाहितमभूदान्दोलनं मूलतः ।
अस्माकं ह्युपरिस्तरीयजठरे वर्गे निजाभ्युन्नतेः
सद्वैकासिकसाधनाधिगमनस्येच्छा हि साभ्युत्थिता ॥६२॥

मूले तत्र च कापि राजनयिकी चैवार्थिकी प्रेरणा,
तच्चान्दोलनमत्र निम्नजठरे वर्गेऽपि सङ्क्रामितम् ।
देशे शक्तिसरूपतां गतमिदं ग्राम्या अपि प्रेरिता
नैवार्हन्ति किलात्र निर्धनतमं ये जीवनं जीवितुम् ॥६३॥

प्राचीना स्ववशा हि जीवनविधा मृष्टाऽभवत्सा ततः
गृह्यं कार्यमपीह साधकतमं नष्टं कृषेश्चाधिकम् ।
किञ्चिच्छासननीतितोऽप्यवनतं तद्यन्त्रयत्नोदयै-
र्भूमेर्गौरवमेधितं न शिथिला यन्त्रोन्नतिस्तज्जहौ ॥६४॥

ग्रामाश्चापि च तेऽतिभारदमिता निःसाधनाः पातिताः
साम्मुख्ये किल विश्ववैपणिकतायां सर्वतो घातिताः ।
वैदेशिक्यविकासिवस्तुतुलनां कर्तुं न ते प्राभवन्
तत्रौत्पत्तिकसाधनानि हि पुरातन्याकृतीन्यासत ॥६५॥

भूमेर्भागविधापि चाभवदियं क्षेत्राल्पताकारिणी
नैवामूलसुधारणा समभवत् तस्मात्कृषीजीवनाः ।
भूनाथाः कृषकाश्च सन्ति सततं यावन्महार्षं भवेत्
पूर्वं भारमिह स्वकं किल परेष्वेवासितुं सोद्यमाः ॥६६॥

इत्थं तैः कृषकैस्तथाल्पधरणीनाथैर्दरिद्रत्वतो
राष्ट्रीये विनिवेदितं निजवपुस्त्वान्दोलने चोभयैः ।
ते चैते श्रमजीवना अपि धराहीना अपि ग्रामगा
ये संख्यां महतीं गता अनुदिनं चास्मिन् समाकर्षिताः ॥६७॥

अस्य ग्राम्यजनस्य राष्ट्रियतया तेन स्वराज्येन वा-
सीदेतावदिह प्रयोजनमहो स्याद्भूविभागो नवः ।
भूयादल्पभुवां तु भूयसितरा भूमिस्तथाऽभूमतां
किन्त्विच्छाः कृषकोच्चयस्य किलता नेत्रा मितानूदिताः ॥६८॥

त्रिंशे यत्समभूदहो सविनयं ह्यान्दोलनं भङ्गकृत्
उद्योगेषु कृषौ च विश्ववितते मन्दार्थतादौ च सः ।
यातं तद्ध्यनुकूलतामिति पुरा नेत्रापि नाज्ञायत
मन्दार्घत्वमिदं हि ग्राम्यजनतां प्राभावयद्भूरिशः ॥६९॥

तस्मात्तेऽपि न तास्तदेतदथ तत्काङ्ग्रेसमग्रसरम्,
तेषां लक्ष्यमभून्न लन्दनगताः कुर्युर्विधानं जनाः।
लक्ष्यं भूप्रथया सुधारसुधया संजीवितं स्याज्जगत्
तैरज्ञायत भूपतित्वसरणिर्नास्मै युगायोचिता ॥७०॥

तस्यां च स्थिरता न सम्प्रति धृता जाता पुराण्येव सा
शिष्टिस्तु ब्रिटिशाह्वया न किमपि प्रायोऽनिनीषन्नवम्।
निर्णीते हि कमीशने खलु तया भूस्वाम्य-भूमिप्रथा-
द्वन्द्वे स्यात्परिवर्दनं न किमपीत्यादिष्टमासीत्पुरा ॥७१॥

इत्थं तत्समयेऽपि गुप्तमभवत्सङ्घर्षजातं स्थितो
त्याज्यं कैश्चन लोभनीयवचनैर्वा सन्धिना नाभवत्।
भूप्रश्नस्य हि मौलिकेन विधिना नूनं समाधानतः
संघर्षादसुकाद्विमुक्तिरभवत्साध्येति निश्चप्रचम् ॥७२॥

तच्चेदं ब्रिटिशान्तरान्निरयतामित्यादि सम्भावना
नासीदस्थिरभेषजैर्नहि रुजा वार्या, भवेत्कर्हिचित्।
नैषा चापि दृढेन तेन मनसा संगोपनाद्धार्यते
याथार्थ्येन चिकित्सितैव विजहेत्सा रोगिणं सर्वथा ॥७३॥

मन्येऽन्यैरिव शासनैर्ब्रिटिशकेनान्तर्भ्रमेणाखिलो
दोषो भारतवर्त्युपद्रवजयेष्वान्दोलनस्याहितः।
तस्येदं स्खलितं विचारविषयं नेता हि देशे स्थितो
याते पञ्चदशाब्दकेऽत्र जनता यस्मिन् परं स्निह्यति ॥७४॥

श्रद्धत्ते भजते च भक्तिभरिता मत्वा तदाज्ञां स्थिता
तेनान्दोलनचालकेन च सतास्मिन् भूरिभागो धृतः।
माहात्म्यं तु तदाज्ञयाऽनुचरतां साधारणानां नृणां
येषां प्रेरकतां प्रयान्ति घटनास्ताः पूर्वपश्चाद्भवाः ॥७५॥

याः सज्जीकृतवत्य एव जनतां नेतुस्तथाज्ञां हृदा
श्रोतुं तामनुवर्तितुं च विवशीकुर्वन्ति नित्यं च ताम्।
ऐतिह्ये हि परिस्थितिर्यदि न सा स्यादार्थिकी प्रेरणा
न स्याद्राजनयिक्यहो च घटना कस्तां तदा प्रेरयेत् ॥७६॥

कः स्फूर्ति भरतात्तदीयहृदये त्वान्दोलनं चालयन्
गान्धौ नेतरि वर्तते स्वजनतानाडीपरीक्षाविधिः।
जानात्येष परिस्थितौ हि कतरस्यां कर्म किं सेव्यतां
आनेया प्रगतिः कदा च कतमेत्येतच्च जानाति सः ॥७७॥

त्रिंशे भारतवर्षराष्ट्रियमिदं चान्दोलनं कुत्रचित्
कालेऽगादनुकूलतां स्वयमिदं सामाजिकीशक्तिषु।
तेनेदं बलमार्जयत्खलु महत् भातं च तद्वास्तवं
सत्यं तच्च पदे पदे प्रगतिमत्प्रत्तैदितीहासतः ॥७८॥

कांग्रेसं किल राष्ट्रिया प्रतिनिधिस्तन्मानवृद्धेः स्फुटम्
यत्तच्छक्तिरिहैधते विकसतीवास्तित्वमप्यस्य तत्।
अस्पष्टं किमपीह चाननुमितं वा वर्णनीयं गिरा
चासीत्किञ्चन चानुकूलमपि तच्चासीदिदं कालिकम् ॥७९॥

निःसन्देहमिमे कृषीवलजनाः कांग्रेसमावर्जिता
तैरेवास्य च शक्तिरप्यवितथा क्लृप्ता च संवर्धिता।
नीचैर्मध्यमवर्गकेन च पुनर्दत्ता दृढाः सैनिकाः,
उच्चैर्मध्यमवर्गकेन च सुहृद्भावेऽनुभूतं शिवम् ॥८०॥

ते वातावरणाद्विभीय विनयं कांग्रेसकेऽदर्शयन्
प्रायः सौत्रिकशिल्पशालपतयो हस्ताक्षरैराङ्कयन्।
न्यङ्गीकारदलानि, बिभ्यति हिते काङ्ग्रेसरोषान्वयात्
तस्मात्तादृशकार्यकारणमिमे त्यक्त्वानुरोधे स्थिताः ॥८१॥

यर्ह्यासन् भविकेषु वैधविषयेष्वर्चाञ्च चर्चां श्रिताः
गोलपीठे प्रथमेऽभिन्दनकरे श्रीलन्दने संस्थिताः।
तर्ह्याभात् यदिहाखिलप्रतिनिधौ काङ्ग्रेसकेऽज्ञानतो
मन्दं मन्दमियं यथार्थतनुभाक् शक्तिः समावर्जिता ॥८२॥

दिल्लीसन्धिपरे भ्रमोऽयमुदितश्चैवैधितोऽभून्नृणाम्
कैश्चिद्गर्वभृतैस्तु भाषणवरैर्नेदं परं त्रिंशतः।
पश्चात्संघटिताभिरत्र घटनाभिर्वर्धितोऽयं भ्रमो
शङ्का नास्ति किलात्र नेतृभिरिदं विज्ञायते स्माधिकम् ॥८३॥

यत्कास्का विपदो भयानि च पुरः प्रायान्ति तस्मान्नता-
न्यल्पानीत्यवहेलनां न गमिताश्चिन्तां च नीताः परम् ।
देशे चात्र निरन्तरं समतया संवर्धमाने उभे
सत्ते अस्फुटभावतो ह्यभवतां शिष्टेः किलोरुन्तुदे ॥८४॥

याथार्थ्येन तु धारणार्थमभवन्नो भूमिका वास्तवी,
सत्ता व्यक्ततरा हि शिष्टिकरगा सर्वात्मना साऽभवत् ।
लोकानामिह मानसेषु तदपि द्वैधात्मना सा स्थिता
सत्तावादिनमर्थशासनपदे साध्यानया संस्थितिः ॥८५॥

अस्मादेव विचित्रवायुवलयात्ते व्याकुलाः शासका
न ग्रामेषु विचित्रभाषणशतैर्यात्रोत्सवैर्वा क्वचित् ।
येषां तैर्विहिताप्यनन्तरमहो विज्ञापनारोषतः
संघर्षापरिहार्यता तदिति सा प्रत्यक्षतोऽदृश्यत ॥८६॥

कांग्रेसं स्वयमात्मघातविषये नोपक्रमं त्वर्हति,
शिष्टिश्चापि न तां द्विधा विभजितां सत्तां प्रसोढुं क्षमा ।
कांग्रेसस्य कदर्थने च तुलिता किंन्वेष गोल्पीठके
द्वैतीयीकसभायुजा नियमितः सङ्घर्षं आरुध्यत ॥८७॥

केनाप्यत्र च कारणेन ब्रिटिशं चासीदतीवोत्सुकं
श्रीगान्धिं खलु लन्दनं गमयितुं तत्संयमेन स्थितम् ।
तत्कार्यं न किमप्यनेन विहितं, प्रस्थानमेतद्यथा
यावच्छक्यमरुद्धमेव भवतात्तेनोद्यमोऽसौ कृतः ॥८८॥

एवं यत्नशतेऽपि नोपशमिता सङ्घर्षसम्भावना
भूयोऽवर्धत भावना हि कठिनं शिष्टेर्मनोऽभासत ।
दिल्लीसन्धिपरे च तत्र समये लार्डोर्विनो भारता-
द्यातो लार्डविलिंग्डनश्च समगात्तस्मिन्विशाले पदे ॥८९॥

ख्यातिस्तस्य तता यथैष कठिनो नायं मृदुः पूर्ववत्
नायं सन्धिकरोऽस्ति विग्रहपरो दण्डप्रधानोऽथवा ।
केचिद्राजनयं नयन्ति न जनाः सिद्धान्ततः किन्तु ते
दृष्टिं व्यक्तिगतामिहाविदधतेऽभ्यासः स तेषामभूत् ॥९०॥

ते चैतन्न विदन्ति यद् ब्रिटिशवत्साम्राज्यवादे रता
वायस्राजविशेषव्यक्तिमततः कुर्वन्ति नो शासनम् ।
तस्माद्वायसराजसंधिनियमाज्जातं न तत्रान्तरं
शिष्टेर्नीतिरपीह तु स्थितिवशाकिञ्चित्परीवर्तिता ॥६१॥

नैवोच्चाधिकृतश्च भाति न मनाक् कांग्रेससन्धिस्तथा
नो कञ्चिद् व्यवहारमेव खलु तेनाप्यत्र वाञ्छन्ति ते ।
शिक्षा शासनिकी प्रतीपमगमत्कांग्रेसतः सर्वत-
स्तेषां सा किल धारणापि विषमा सत्ताधिकारे ततः ॥६२॥

मन्यन्ते खलु ते यथाधिकृतिभिस्तुल्येन सद्वर्तने-
नैषां वर्धितमस्ति मानमधिकं चैष प्रभावः परम् ।
अद्यास्ते समयो यदावमननैस्तेषां मनः क्षीयता
मित्येतन्मननं किलाभवदहो जाडयस्य मौग्ध्यस्य वा ॥६३॥

हिन्दुस्थानिकशासनीयपरिषत्सेवासु नो मन्यते
जात्वेषा तु विचारमौलिककतेत्यस्त्येव विख्यातिमत् ।
यत्स्यात्कारणमस्तु तत्स्तभिततां धत्तेस्म सम्यग्दृढां
मुष्टिं शिष्टिरियं क्रमादधिकृताऽप्यत्राधिकां कर्कशाम् ॥६४॥

प्राचीनस्य च देशिकस्य वचसा साऽब्रूत चास्मानिदम्-
अस्मत्तातकटेः स्थविष्ठमिह मे त्वास्ते कनिष्ठाङ्गुकम् ।
सोऽहन्वः किल तोत्रवेत्रशतकैर्हन्म्येष वो वार्श्चिकैः
दंशैरग्निसमानतीव्रगरलैर्मूर्च्छाकरैस्तिग्मकैः ॥६५॥

नायात्सम्प्रति चालमित्यलमिति प्रोद्धावितुं स क्षणः
युक्तं तावदमन्यत प्रतिनिधिर्गोलपीठके यात्विति ।
वायस्रायुताधिकारिनिवहैर्दीर्घं स्फुटं चर्चितुं
श्रीगान्धिः शिमलामगाद् द्विरथ तत्कालोचितञ्चालपत् ॥६६॥

वंगादप्यतिरिक्तमत्र समये निःसीमनचिन्ताप्रदात्
तस्मिश्चापि च लालकुर्तिदमनेप्यान्दोलनेऽभूत्कथा ।
गान्धिर्मामपि तत्रचाह्वयदयं तत्राधिकारिष्वभू-
त्साक्षात्कारसमागमाद्यवसरा अप्यर्जिता नैकशः ॥६७॥

युक्तप्रान्तसमाश्रयां हि बहुशो वार्तामिहाहं श्रितः
स्पष्टाः स्पष्टतराश्च ताः समभवन्नारोपगुप्ता अपि ।
उक्तोऽहं यदिहाभवत् स्थितिरियं त्वद्धा विधुर्त्रिशके
भङ्गान्दोलनमेतदादमयितुं मासत्रयस्यावधिः ॥९८॥

शिष्ट्या तत्र समस्तयन्त्ररचना क्लृप्ताभवत्केवलं
तत्सञ्चालनमात्रवर्तनदमस्यासीद्विलम्बः किल ।
चिन्तित्वा त्विदमेव चेद् भवति नो वार्ता समाधानकृत्
तर्ह्येतत्कदनं क्रियेत नु कथं तत्सर्वथा रोधितम् ॥९९॥

इत्यस्मात्स बलप्रयोजकपथस्त्यक्तश्च वार्ताक्षणो
तत्रैवाभवदैतिहासिकतया ख्यातः स सन्धिर्मिथः ।
सन्धिश्चेदभविष्यदेव न तदा प्रायोक्ष्यतासौ दमः
सोऽयंसज्ज इहाभवत् क्षणनिमेषैरप्युदास्थास्यत ॥ १०० ॥

सङ्केतः किल चात्र तैर्वितरितो नाद्यापि चेत्साधुव-
त्कांग्रेसं बतवत्स्र्यति स्थितिरियं तत्कालमायास्यति ।
सर्वं चैतदतीव नम्रमृदुभिर्वाग्भिः प्रकाशीकृतम्
आवां चापि विदाव न प्रयतनैः सङ्घर्षरोधो भवेत् ॥१०१ ॥

अन्येनाधिकृतेन च स्तुतिरपि प्रोक्तेह कांग्रेसिकी
तत्रानेहसि सर्वलोकविषये चर्चाऽचलत्सात्विकी ।
यद्ग्राह्यं किल राजनैतिकतया सद्भिः प्रशान्तैरपि
कांग्रेसं किल राजनीतिरहितं पश्याम एवेदृशम् ॥ १०२ ॥

कांग्रेसं कुशलं न संघटनके इत्यस्ति हीनं वचः
त्रिशे तेन हि दर्शिता निपुणता तत्रापि पूर्णा परम् ।
गोल्मेजीयकमेलनेऽपि गमनं चिन्त्यं हि गान्धेर्यतः
यात्रा या शिमलासु नो सफलितान्याभूदगस्ते पुनः ॥१०३॥

गन्तव्यं न्वथवात्र नेति नियतं तावद्विधेयं पुरे-
त्येवं सत्यपि तस्य भारतपदस्यागो दुरूहोऽभवत् ।
वंगेष्वेव नसीमयुक्तपदयोरप्यस्य दृष्टाभवत् ।
आपद्वापततीति यावदिह न स्याच्छान्तिः स्थिराऽऽश्वासना ॥१०४॥

तावत्त्यक्तुमिदं स नेच्छति परं सन्धिस्तु कश्चित्स्थितः
यो व्याख्यानमयोऽभवत्पुनरयं पत्रप्रयोगात्मकः ।
अन्त्यायामभवच्च तद्धि सहसा घट्यां यथा यात्वयं
तेनैवात्र विमानकेन मतिमान् येन प्रयायुः परे ॥१०५॥

तच्चान्त्येऽभवदित्यथास्त्यवितथं, गन्त्री हि याताऽभवत्
सा यन्त्री शिमलापदात्प्रचलिता काचिद्विशिष्टाभवत् ।
सा प्राप्नोतु च कालकागतमिदं यानं किलेत्यग्रगा
गन्त्र्यस्तत्र निरोधिताश्च सकला इत्यव्यवस्था स्थिता ॥१०६॥

श्री गान्धेः सहगामितामहमगाम्मुम्बापुरीं यावता
प्रातः शोभनतांदधत्यथ ततस्तं त्यक्तवान् सादरम् ।
श्रीगान्धिर्जलधिं किलाविंकमथो यातः परं पश्चिमम्
वर्षद्वन्द्वकृते ममान्तिमभूत्तद्दर्शनं दर्शनम् ॥१०७॥

शीलस्वर्गमगादिह स्विटजरे देशे च मासत्रयं
व्याख्यानं च विवादमत्र कृतवान् यो वेदाविद्गोष्ठिषु ।
तेनेदं नवनेहरूचरितकं काव्यं प्रणीतं मुदा
सर्गोऽस्मिन् किल सन्धिकाविकलिपद्गाथात्मकोऽयं गतः ।

द्वितीया गोलपीठ परिषद्

अनुष्टुप्

अष्टत्रिंशः सर्गः

आङ्ग्लेन पत्रकारेण लिखितं मूलपुस्तकम्।
तत्रोल्लिखितमेतेन स्वकृतं गान्धिदर्शनम्॥ १॥
भारतेऽपश्यदेनं स गोलपीठे च भूयसा।
गान्धियात्राप्रसङ्गश्च तेनैवं वर्णितः पुरा॥ २॥
मुलतानविमाने ये नेतारः समुपस्थिताः।
तेऽजानन् कार्यसमितौ श्रीगान्धिप्रातिकूल्यभाक्॥ ३॥
षड्यन्त्रमेकं रचितं येन काले समागते।
कांग्रेससमितिर्गान्धिं करिष्यति बहिस्ततः॥ ४॥
बहिर्यास्यन्ति कांग्रेसात्तस्य नेमे सभासदः।
तांश्च सप्रू-जयकरौ मिमेलियषतो दले॥ ५॥
मिमेलिषामिमां तौच न गोपाययतः क्वचित्।
गान्धेरासीत्किलास्वच्छं मस्तिष्कं च तयोर्गिरा॥ ६॥
किन्तु मन्थरमस्तिष्को नेता चेदृशलक्षकम्
जनान्मन्थरमस्तिष्कान् दद्यान्नः स्वानुयायिनः॥ ७॥
तदा स्वपक्षे करणं तेषां स्यादतिशोभनम्
न जानेऽत्रोद्धृतं वृत्तं कियल्लन्दनयात्रिणाम्॥ ८॥
सप्रूजयकरादीनां गोलपीठसभासदाम्
विचारान् कियतः सत्यापयतीह च तान् कियत्॥ ९॥
विस्मापकं तु मे भाति नेता वा कोऽपि पत्रकृत्।
भारतीयां राजनीतिं विदन् कश्चिदुदीरयेत्॥ १०॥
तत्पठित्वास्मि चकितो नेतः पूर्वं कदाप्यहम्।
कञ्चित्क्वचिदिमां वार्तां कथयन्तं न शुश्रवान्॥ ११॥

किन्त्वस्मिन्नस्ति तत्किञ्चिद्यन्नावमतमुच्यताम् ।
तदाप्रभृत्यहं कारागार एव न्यवीवसम् ॥ १२ ॥
के तु षड्यन्त्रकर्तारस्तेषां किञ्च प्रयोजनम् ।
प्रायोऽहं च पटेलश्चात्युष्णौ स्व इति कीर्त्यते ॥ १३ ॥
इति स्वो गणितावावां तेषु षड्यन्त्रकर्तृषु ।
परं न भक्तः श्रीगान्धेः पटेलादुत्तमोऽपरः ॥ १४ ॥
स्वकार्ये स कठोरः स्याद् दृढश्च स्यात्कियानपि ।
किन्त्वादर्शे च नीतौ च स तद्व्यक्तित्वमर्चति ॥ १५ ॥
प्रतिज्ञातुं न शक्तोऽपि यथाऽऽदर्शमिमानहम् ।
तथैव मन्ये स यथा, कर्माकार्षं हि पार्श्वगः ॥ १६ ॥
अतो मया तद्विरुद्धाचरणं खल्पसम्भवम् ।
न मयैव, समैः सभ्यैः समितेस्तत्सुदुष्करम् ॥ १७ ॥
वस्तुतः समितिः सेयं गान्धिनैव विनिर्मिता ।
कैश्चित्सार्धैः समामन्त्र्य तेन नामाङ्किताक्यम् ॥ १८ ॥
निर्वाचनस्य सभ्यानां प्रथामात्रं तु पूरितम् ।
आधिक्येन स्तम्भरूपा अभवन् समितेरिमे ॥ १९ ॥
ये वर्षैस्तत्र समितौ समिताः सन्ति पार्षदाः ।
मतभेदेऽपि स्वभावातैः साकं राजनैयिके ॥ २० ॥
अंसेनांसं समायोज्य वर्षैः कार्याणि कुर्वताम् ।
भजतां भीतिसाम्मुख्यमन्योन्यासक्तचेतसाम् ॥ २१ ॥
सौभ्रात्रं च मिथो मैत्रीं विभ्रतां च समादरम् ।
संयुक्तं मण्डलं तेषमैक्यमेकशरीरवत् ॥ २२ ॥
प्राप्तानां नोपपद्येत षड्यन्त्राकल्पनं मिथः ।
गान्धिप्रभावः समितौ नेतृत्वं तस्य काङ्क्षितम् ॥ २३ ॥
वर्षैः कतिपयैरेतद्भवति स्म विशेषतः ।
तद्बहिष्कारयत्नेन सभ्यानां किं प्रयोजनम् ॥ २४ ॥
इहोष्णदलगानां वा स्यान्नम्रदलगामिनाम् ।
सन्धौ किलाशुतोषित्वात्स भारः समितेरभूत् ।
इति चेच्चिन्त्यते तेन विनास्मद्विग्रहस्य किम् ॥ २६ ॥

किं स्यादसहयोगस्य स्याच्च सत्याग्रहस्य किम् ।
स सजीवान्दोलनस्य मुख्यमङ्गं किलाभवत् ॥ २७ ॥
नाङ्गं सजीवान्दोलनस्यत्स स्वयं तत्किलाभवत् ।
स्वातन्त्र्यविग्रहस्तस्मिन्नेवायं निर्भरोऽभवत् ॥ २८ ॥
इदं वै राष्ट्रियं युद्धं सत्यं न तदुपक्रमम् ।
न चैतत्क्वचिदेकस्यां व्यक्तावेव समाश्रितम् ॥ २९ ॥
तन्मूलमस्माद्गहनं, परं युद्धस्य लक्षणम् ।
अयं सविनयो भङ्गः श्रीगान्धाववलम्बितः ॥ ३० ॥
बहिष्कारोऽयं तदीयो ह्यङ्गभङ्गाय कल्पते ।
नूत्नायां भूमिकायां च प्रासादस्थापनाय सः ॥ ३१ ॥
इदं कर्म कदाप्यत्र न चासेत्स्यत्सुदुष्करम् ।
एकत्रिंशेऽब्दके त्वस्य न किञ्चिद् ध्यानमप्यभूत् ॥ ३२ ॥
इदं ध्यानं मुदाधानं यत्त्रिंशे तेऽयतेमहि ।
श्रीमद्गान्धिं बहिष्कर्तुं काङ्ग्रेसाद् वयमीदृशः ॥ ३३ ॥
यदा तदिङ्गितेनैव कार्यं चलदभूत्समम् ।
तदा किमर्थं आसीन्नः षड्यन्त्ररचनाक्रमः ॥ ३४ ॥
यदैव गान्धिः काङ्ग्रेसात्पृथग्भावमकाङ्क्षत ।
तदैव कार्यसमितौ देशे च त्रास आपतत् ॥ ३५ ॥
सोऽस्मत्सङ्ग्राम एकाङ्गवत्पृथक्त्वं न कल्पते ।
तेन तादृशसंकल्पोऽपि न सह्योऽभवत्स नः ॥ ३६ ॥
वयं दधाम संकोचमपि तल्लन्दनैषणे ।
तस्यानुपस्थितौ हिन्दुस्थानकार्यभरो मयि ॥ ३७ ॥
एतच्च नाम नास्मभ्यं रोचते स्म कदाचन ।
वयं तत्स्कन्धयोः सर्वभारनिक्षेपशीलिनः ॥ ३८ ॥
न कार्यसमितेरेव सदस्यास्तद्बहिः स्थिताः ।
अपि ये गान्धिना बद्धास्ते ततोऽल्पेऽप्यनेहसि ॥ ३९ ॥
पृथग्भूय ततो लाभात्तेनैव सह संस्थितौ ।
विफलत्वमपि प्राप्तुं स्पृहयन्तिस्म सन्ततम् ॥ ४० ॥

स्वच्छं श्रीगान्धिमस्तिष्कमस्ति वा नेति निर्णयम् ।
न्यस्यामस्तेषु मित्रेषु, वयं त्वेतत्प्रविद्महे ॥ ४१ ॥
यद्राजनीतिरप्यस्याध्यात्मिकी भवति क्वचित् ।
यातिदुर्बोधतां याति ह्यनाध्यात्मिकचेतसाम् ॥ ४१ ॥
अस्यापि नीतिरूपस्य प्रयोगः क्रियते पुनः ।
विद्यापीठस्थापनायां विद्याकेन्द्रप्रवर्तने ॥ ४२ ॥
गृह्योद्योगविकासेषु विशेषात्खद्दरादरे ।
अस्पृश्यतावारणायामेतादृक्षवन्यकर्मसु ॥ ४३ ॥
तत्रापि भूयसी संख्या योजनासु विशेषतः ।
नियतास्तासु कोषाश्चाद्यापि विद्यन्त एव ते ॥ ४४ ॥
द्रव्याणि यस्य कार्यस्य कृते विनियतानि च ।
तानि तस्मिन्नेव कार्ये व्ययितानि भवन्ति च ॥ ४६ ॥
अन्यच्च सञ्चितं द्रव्यं तच्च तत्रैव रक्षितम् ।
स्थानीयायां च समितौ, तच्च कांग्रेसकर्मसु ॥ ४७ ॥
राजनैतिककार्येषु च व्ययीक्रियते क्रमात् ।
आन्दोलने साम्प्रतिकेऽसहयोगात्मके यथा ॥ ४८ ॥
श्रीगान्धिना च देशस्य निर्धनत्वेनास्म शिक्षिताः ।
स्वल्पेनापि धनेनात्रान्दोलनं क्रम्यतामिति ॥ ४९ ॥
भूयांसि चास्मत्कार्याणि स्वेच्छया निष्परिग्रहैः ।
जनैः कृतानि यान्यत्र क्रियन्ते धनदानतः ॥ ५० ॥
तत्र तद् द्रव्ययात्रापि भवत्युदरपूरणी ।
विश्वविद्यालयानां ये स्नातका अपि ते पुनः ॥ ५१ ॥
कुटुम्बभरणोद्युक्ताः नियुक्ता यैश्च वेतनैः ।
तान्याङ्ग्लदेश्यनिष्कर्मजनवृत्तिमितान्यहो ॥ ५२ ॥
गतपञ्चदशाब्देषु काङ्ग्रेसान्दोलनव्ययः ।
जातो यावान्नवैतावाञ्जायेतान्दोलनान्तरे ॥ ५३ ॥
स्याद्राजनैतिके क्वापि श्रमिकान्दोलने पुनः ।
शङ्केऽहं कुत्रचिद्देशे तावान्न्यूनोऽभवद् व्ययः ॥ ५४ ॥

कांग्रेसस्य समे कोषाः सर्वाश्चायव्ययक्रियाः ।
परीक्षिता भवन्त्येताः प्रतिवर्षं समक्षतः ॥ ५५ ॥
न कश्चिदंशो गुप्तोऽस्ति तेषामिति निवेद्यते ।
इति द्रव्य प्रयोगस्य नीतिरीतिरुदीरिता ॥ ५७ ॥
द्राधीयसा विवादेन प्रतिनिध्यन्तरैषणे ।
निरुद्धे, गोलपीठेऽगाद्गान्धिरेव स लन्दनम् ॥ ५८ ॥
निरोधोऽयं कृतो यस्माद् वयमैच्छाम भारते ।
ईदृक्षे कोमले काले सर्वे तिष्ठन्तु संयताः ॥ ५९ ॥
तदा हि स्थितिसम्भालः परमावश्यकोऽभवत् ।
अन्वभूम भवेन्नाम लन्दने गोलपीठकम् ॥ ६० ॥
आकर्षणैककेन्द्रन्तु तावदस्त्येव भारतम् ।
क्रिया या भारते, तस्या लन्दने स्यात्प्रतिक्रिया ॥ ६१ ॥
देशे स्याद् व्यस्तता नात्र तां वयं वारयेमहि ।
स्वसंघटनवृत्तं च साधु संसाधयेमहि ॥ ६२ ॥
किन्त्वेकस्य प्रतिनिधेः प्रेषणेनैतदेव नः ।
कारणं चाभवच्छक्यमासीद् तत्र परैषणम् ॥ ६३ ॥
ज्ञात्वा बुद्ध्वा वयं तावत्तथाऽकुर्मैकमत्यतः ।
न गोलपीठसम्मेले नैते सममिलाम यत् ॥ ६४ ॥
वैधानिकीषु वार्तासु चर्चां वादं विदध्महि ।
यस्य नान्तः क्वचिज्जातु नासीत्तद्विवृतौ रुचिः ॥ ६५ ॥
तत्र ध्यानं तदा शक्यं यदा मुख्येषु वस्तुषु ।
साम्मत्यं सर्वकारेण सह किञ्चित्प्रजायते ॥ ६६ ॥
मुख्यः प्रश्नस्तावदासीत्प्रजातन्त्रेऽत्र भारते ।
अर्प्यते कियती शक्तिः शासनाद्यधिकारिणी ॥ ६७ ॥
इत्यस्मिन्नेव निर्णीते साम्मत्यस्य परिच्छदम् ।
तद्विवृतिं च निश्चेतुं वाक्कीलः कोऽपि शक्नुयात् ॥ ६८ ॥
एषु मूलेषु कांग्रेसस्थितिः स्पष्टतराऽभवत् ।
अत्र वादविवादादेरवकाशोऽपि नाभवत् ॥ ६९ ॥

वयं मन्यामहेऽस्माकमध्वा यं गौरवावहः ।
यदेक एव सोऽस्माकं यायात्प्रतिनिधिर्बहिः ॥ ७० ॥
स चास्माकं भवेन्नेता योऽस्मत्स्थितिमुदाहरेत् ।
युक्तिसङ्गततां तस्याः स्वीकृतेश्चानिवार्यताम् ॥ ७१ ॥
सम्भवश्चेत्स ब्रिटिशमेतदर्थं प्रसादयेत् ।
कांग्रेसस्य यथा सोऽस्य प्रस्तावं स्वीक्रियादिति ॥ ७२ ॥
जानीमोऽस्या दुष्करत्वं तात्कालिक्यां स्थितौ परम् ।
परमस्याः किमपि नासीदतः शरणं परम् ॥ ७३ ॥
वयं न त्यक्तुमर्हामः स्वसिद्धान्तान्न च स्थितिम् ।
न चादर्शान्येषु बद्धा विश्वासं च भजामहे ॥ ७४ ॥
भाग्यशूरा वयं स्याम तदाऽत्र स्यात्प्रसन्नता ।
प्रसादे सर्वदुःखानां हानिरस्योपजायताम् ॥ ७५ ॥
इति मूलस्थवार्तासु सामान्ये सुप्रतिष्ठिते ।
वार्तान्तराणि सर्वाणि सिद्धानि स्युः स्वभावतः ॥ ७६ ॥
प्रत्युतास्ते सत्यमिदं ह्यस्माभिर्निश्चितं मिथः ।
भविता यदि साम्मत्यं गान्धिः समितिपार्षदान् ॥ ७३ ॥
कांश्चिद्वा सत्वरं सर्वानामन्त्रयति लन्दने ।
येन तत्र गताः सन्धिविवृतिं कुर्महे वयम् ॥ ७४ ॥
तत्र गन्तुमिहास्माभिरासीत्स्थातव्यमुद्यतैः ।
सति चात्यावश्वकत्वे वायुयानैस्तु गम्यताम् ॥ ७५ ॥
आमन्त्रितैर्दशदिनैः प्राप्तं स्याद्धि तदन्तिकम् ।
यदि मूले न सन्धिः स्यात्तदाग्रे तस्य का कथा ॥ ७६ ॥
कश्च प्रश्नो भवेदन्यः प्रेषणस्यात्र संसदि ।
अत एव वयं गान्धिमेकं प्रेषयितुं यताः ॥ ७७ ॥
एका चान्या सदस्यापि नायडूः श्रीसरोजिनी ।
संगता स्यात्तत्र मान्या कांग्रेसेन समर्थिता ॥ ७८ ॥
न तु प्रतिनिधिः साभूत्काङ्ग्रेसस्य सरोजिनी ।
आहूता भारतीयानां स्त्रीणां प्रतिनिधिस्त्वियम् ॥ ७९ ॥

समित्या तेन रूपेणानुमताऽभूदुपस्थितिः।
परं ब्रिटिशशिष्टेस्तु नेदमिष्टमभूत्क्वचित् ॥ ८० ॥
तस्यास्तु कार्यपद्धत्यां परिषद् गौणतामगात्।
इतस्ततस्त्यवार्ताभिः श्रान्ता सा स्यादितीप्सितम् ॥ ८१ ॥
तावच्च मौलिकान् सत्यान् प्रश्नानत्र विमर्शितुम्।
न साऽदात्समयं, काले च तूष्णींभावमाश्रयत् ॥ ८२ ॥
सास्वीकारनकारौ च द्वावेव प्रत्यषेधयत्।
केवलं वचनं प्रादात् वक्ष्यामश्चिन्तनात्परम् ॥ ८३ ॥
आसीत्तस्याः करे पत्रं जैत्रं तत्साम्प्रदायिकम्।
यदाऽऽमुक्तं तया तत्र प्रबलं साधु संसदि ॥ ८४ ॥
संसदो भारतीयास्ते सांसदा शिष्टिवागुराम्।
इमां स्वनिग्रहकरीं नाजानन् बद्धचेतसः ॥ ८५ ॥
भूयांसो ज्ञानवन्तोऽपि तथान्ये विवशा इव।
नासीत्सा संसदेषाऽऽराड् भानुमत्या हि पेटिका ॥ ८६ ॥
तस्यां स्यात्सर्व एवासीत्स्वस्य प्रतिनिधिः स्वयम्।
योग्या अप्यासतात्रैके स्वदेशे सम्भृतादराः ॥ ८७ ॥
अन्येषां तु कृते नैतद् वक्तुमप्यत्र शक्यते।
भारते राजनैतिक्या उन्नतेः प्रतिरोधिकाः ॥ ८८ ॥
संस्थास्तान् स्वप्रातिनिध्यं दत्त्वा संप्रैषयन्निह।
एते स्खलत्पदाः सर्वे प्रगतेश्च विरोधिनः ॥ ८९ ॥
व्यभ्राजन्त किलैतेषूदारास्ते प्रगतिप्रियाः।
पदे पदे ये फूत्कृत्य मार्गे न्यस्यन्ति वै पदम् ॥ ९० ॥
स्थापितस्वार्थसंस्थानामेते प्रतिनिधित्वतः।
साम्राज्यवादे बद्धास्ते ब्रैटिशे भूरि निर्भराः ॥ ९१ ॥
साम्प्रदायिकसंघर्षे लघुगुर्वीषु जातिषु।
प्रसिद्धाः प्रातिनिध्येन प्रायस्ते बहवोऽभवन् ॥ ९२ ॥
राजनैतिकदृष्ट्या ते सर्वप्रगतिवैरिणः।
स्ववर्गस्य कृते किञ्चित्प्राप्तुं कर्तुं समुद्यताः ॥ ९३ ॥

तदर्थं नाशयित्वापि प्रगतिं राजनैतिकीम् ।
त्याजयन्तः सम्प्रदायहितार्थीयस्वतन्त्रताम् ।। ९४ ।।
महद्दुःखमभूत्तेषां तदा घोषणयानया ।
अहो पराधीनजातेरधःपातः कियान् भवेत् ।। ९५ ।।
सात्र साम्राज्यवादस्य शतरंजाख्यखेलने ।
मुद्रा भवति सौख्येनेत्यासीत्सत्यं च वस्तुतः ।। ९६ ।।
नैते किलोच्चतरतां स्वामितां शीर्षतां गताः ।।
जनाः प्रतिनिधित्वं नो भारतीया अपि श्रिताः ।। ९७ ।।
सांसदास्ते गोलपीठसंसदो ब्रिटिशेन हि ।
नामाङ्कितीकृता दृष्ट्या स्वीयया साधु तत्कृतम् ।। ९८ ।।
ब्रिटिशा एवमस्माकं प्रयोगं विदधत्यहो ।
अस्माकमेव दौर्बल्यं व्यनक्त्यप्यवहेलनम् ।। ९९ ।।
वयं सुखेनान्योन्यस्य यत्नवैफल्यसाधने ।
नियुज्येमहि कर्तव्यकर्मभ्यः प्रविचालिताः ।। १०० ।।
अस्माकमुच्चवर्गस्था अद्यापि परिभाविताः ।
साम्राज्यवादिशास्तॄणां विचारैरेव खेलिताः ।। १०१ ।।
किं ते तदीयषड्यन्त्रान्नावगच्छन्ति मोहिताः ।
उतावगच्छन्तोप्येतान् मञ्जूरीकुर्वते धिया ।। १०२ ।।
ते भारते स्वतन्त्रत्वं लोकतन्त्रत्वमप्यदः ।
प्रवर्त्स्यतीत्येव भिया पारतन्त्र्ये स्थिता इह ।। १०३ ।।
इदमासीदवितथं यत्ते साम्राज्यवादिनाम् ।
साम्प्रदायिकवृत्तीनां धार्मिकाणां च मण्डले ।। १०४ ।।
एकस्मिन् स्थापितस्वार्थे समाजे ब्रिटिशान्विते ।
भारतीयप्रातिनिध्ये नित्यवन्नेतृतां गताः ।। १०५ ।।
श्रीमदागाखानहस्ते धातुमेवेत्थमुद्यताः ।
पूर्णकामो वर्ततेऽसौ कियत्सीमावधीह सः ।। १०६ ।।
ब्रैटिशे साम्राज्यवादे ब्रैटिशैरथ शासकैः ।
पूर्वपूरुषतोबद्धःस्तेषामेष च पार्श्वग ।। १०७ ।।

आङ्ग्लदेशेऽवसदतस्तत्स्वार्थजातं वेत्त्ययम् ।
बुध्यते तद्दृष्टिकोणं प्रतिनिधित्वे सक्षमः ॥ १०८ ॥
गोलपीठे सदस्येषां प्रतिनिधिस्तेषां स्वयम् ।
भवितुमर्हश्चापि शक्तः किन्तु भारत-सांसदः ॥ १०९ ॥
गोलपीठेऽस्मद्विरुद्धः पक्ष आसीद्यो गरीयान् ।
स्मो निराशा वयममुष्माद्विस्मिताः स्मस्तत्क्रियाकृतः ॥ ११० ॥
दिने दिने मनोऽस्माकमस्मादुद्विजतेस्म च ।
अपश्याम समस्यानाँ राष्ट्रियार्थिकतास्पृशाम् ॥ १११ ॥
मूलमुन्मूल्यते कीदृक् कर्म कुर्वन्ति कुत्सितम् ।
कीदृशीं षड्यन्त्रसज्जां कीदृशीमथ अवञ्चनाम् ॥ ११२ ॥
कूटनीतिं कीदृशीं ते वर्तयन्ति परार्थिकाम् ।
अस्मद्देश्याश्च वैदेश्यैरनुदारैः सुसङ्गताः ॥ ११३ ॥
तुच्छतुच्छेषु वार्ताश्च विषयेषु चलन्त्यमूः ।
यासामथेति समभून्नाभूच्चेतीति कुत्रचित् ॥ ११४ ॥
सत्यवार्ता ह्युपेक्ष्यन्ते ज्ञात्वा बुद्ध्वा निरन्तरम् ।
काष्ठपुत्तलिकाभूतैर्ब्रिटिशस्य करे स्थितैः ॥ ११५ ॥
कदाचित्प्रतियुध्यन्ते कतहायन्त एव च ।
कदाचिन्मिलिताः प्रीतिभोजानायोजयन्ति च ॥ ११६ ॥
परस्परं प्रशंसन्ति-अहो रूपमहो ध्वनिः ।
उष्ट्रकाणां विवाहेषु गायन्तो गर्दभा इव ॥ ११७ ॥
आरम्भादन्तपर्यन्तं लेबावृत्तिस्तु चर्चिता ।
पदानि च कियन्त्यत्र लघूनि च गुरूणि च ॥ ११८ ॥
आसन्दिकाः कियत्यश्च हिन्दूनां हैतवे स्थिताः ।
शिष्याणां ताः किपत्यश्च कियत्यो मुस्लिमार्थका: ॥ ११९ ॥
भारोपीयजनानां च यूरोपीयनृणामथ ।
कियत्यश्च कियत्यश्चासन्दिका नियता इह ॥ १२० ॥
किन्त्विमानि पदान्यासन्नुच्चानां श्रीमतां कृते ।
निर्धनानामहो वार्तां कश्चिदपि पृच्छति ॥ १२१ ॥

इहावसरवादित्वं प्रभवत् परिदृश्यते ।
प्रतीयते नवे तस्मिन् विधाने शासनस्य नः ॥ १२२ ॥

मृगयामांसखण्डेषु वर्गा एते वृका इव ।
रिक्तस्थानेषु दृक्पातं धातं वा कुर्वते चिरात् ॥ १२३ ॥

स्वाधीनताकल्पनापि संवावृत्तिषु संस्थिता ।
उच्यते तद्भारतीयकरणं नाममात्रतः ॥ १२४ ॥

सेनासु देश्यसेवासु पदेष्वन्येषु चाप्यमी ।
भारतीया लभेरंस्ते नियुक्तिमधिकाधिकाम् ॥ १२५ ॥

देशस्वातन्त्र्यमिच्छद्भिरयं कृत उपक्रमः ।
स्वातन्त्र्यं यद् भुज्यनेस्म मूढैस्तदपि हारितम् ॥ १२६ ॥

हन्त हन्त न कोऽप्यत्र चिन्तयत्यनधीनताम् ।
स्वदेशस्य विदेशीयशासनेनातिदीनताम् ॥ १३१ ॥

भारतस्यास्य सा लोकतान्त्रिकी स्यात्स्वता कथम् ?
पुरस्ताद् भारतीयानां समस्या या किलार्थिकी ॥ १३२ ॥

तस्या अस्ति समाधानं सर्वाधिकमपेक्षितम् ।
किन्तु सेवापदप्राप्त्यै संग्रामस्यास्त्युपक्रमः ॥ १३३ ॥

महाधैर्य-महोत्साह-महावीर्य-प्रवर्तितः ।
अयं स्वातन्त्र्यसङ्ग्रामः किमासीद् वृत्तिहेतुकः ॥ १३४ ॥

वयमादर्शवादाख्यं त्यागाख्यं मलयानिलम् ।
शीतलं सुरभिं त्यक्त्वा सेवेमहि मलानिलम् ॥ १३५ ॥

तस्मिश्च राजसे हर्म्ये गान्धिर्भाति किलैकलः ।
सम्मर्दे तु विभिन्नानां जनानां सुमहत्यपि ॥ १३६ ॥

तदीयेन स वेषेण तद्विशेषं विनाथवा ।
तेषु शेषेषु लोकेषु स सुखात्परिचीयते ॥ १३७ ॥

परं तदन्तिके लोके सम्मर्देऽत्र सुसज्जिते ।
दृष्टिसम्मृष्टि तो भिन्ना दृष्टिसम्मृष्टिरस्य तु ॥ १३८ ॥

तत्र संसदि दुःसाध्यात्यन्तमासीद्धितस्थितिः ।
भारतेऽपि स्थितानां यत्तदभूद्विस्मथावहम् ॥ १३९ ॥

कथं तु सहतेऽसौ तत्सर्वमित्यत्र भारते।
स्थितैरस्माभिरनिशं चिन्त्यतेस्म सविस्मयम् ॥ १४० ॥

धैर्येणाश्चर्यकारेण कुर्वन् कार्यक्रमं निजम्।
साम्मानस्यस्य तन्मुलं चान्वेष्टुं प्रभविष्यति ॥ १४१ ॥

किञ्चिद्विलक्षणं तेन कृतं येन प्रकाशितम्।
यथेदं राजनयिकं साम्प्रदायिकमावृणोत् ॥ १४२ ॥

मुस्लिमैः संसदि धृताः साम्प्रदायिकयाचनाः।
गान्धये नाभ्यरोचन्त स्वातन्त्र्याध्वनि बाधिकाः ॥ १४३ ॥

तथापि तेन तत्रोक्तं नापत्तिर्मम काचन।
याचना भवतां सन्तु चेन्मता वः स्वतन्त्रता।' १४४ ॥

तल्लाभाय भवन्तोऽपि कांग्रेसस्यानुगामिनः।
भवन्तु, याचनां मत्वा स्वातन्त्र्ये राजनैतिकीम् ॥ १४५ ॥

प्रस्ताव एष तस्यासीद् निजव्यक्तित्वशक्तितः।
नहि कांग्रेसपक्षात्तु प्रस्तोतुं किञ्चिदर्हति ॥ १४६ ॥

स आश्वासयदेतांश्च कांग्रेसं मंस्यते मम।
भवतां याचनाः सर्वाः कांग्रेसं स्वीकरिष्यति ॥ १४७ ॥

कांग्रेसे नाभवच्छंका सदस्यस्य च कस्यचित्।
गान्धिस्तेषां याचनास्तास्तत्र स्वीकारयिष्यति ॥ १४८ ॥

परं न मुस्लिमैस्तस्य प्रस्तावः स्वीकृतो ह्यसौ।
आगाखानः पक्षपाती स्वातन्त्र्यस्य भविष्यति ॥ १४९ ॥

इत्यासीद् दुष्प्रकल्पं तत्कांग्रेसं मन्यते स्म यत्।
साम्प्रदायिकता तत्र बाधिकाऽऽसीत् समन्ततः ॥ १५० ॥

वस्तुतः प्रतिगामित्वं तत्रासीद्राजनैतिकम्।
बाधकं, तज्जवनिका साम्प्रदायिकताऽभवत् ॥ १५१ ॥

यत्पृष्ठतस्तां मृगयामकरोच्चिरकाततः।
संसदे सर्वकारेण चातुर्येण स्वतन्त्रताम् ॥ १५२ ॥

विरुन्धताममीषां च नामाङ्कनमकार्यत ।
कार्यक्रमान् गतिविधीन् संसदो विभ्रता स्वयम् ॥ १५३ ॥

सदा पुरस्कृतस्तेन विरोधः साम्प्रदायिकः ।
जानता न समाधानं कदाप्येषां भविष्यति ॥ १५४ ॥

इत्थं साम्राज्यमाक्रम्य चिरं चालयितुं क्षमा ।
शक्तिरस्ति ब्रैटिशेऽस्मिन् शासने तत्तु साधितम् ॥ १५५ ॥

कञ्चित्कालं च चातुर्यात् कूटनीत्या च तद्दृढम् ।
करे धारयितुं शक्तिरप्यस्तीदमदर्शयत् ॥ १५६ ॥

भारतीया अकृतार्था गोलपीठसभापदे ।
न सासीत्तत्प्रतिनिधिर्नापि तच्छक्तिमापनी ॥ १५७ ॥

अकृतार्थत्वहेतुश्चासीदुद्देश्यस्य पृष्ठतः ।
विचारधाराऽभावो यः स तान्मार्गाद् व्यचालयत् ॥ १५८ ॥

तेऽकृतार्था यतस्तेषां शक्तिबोधो न चात्मनि ।
येन तैः स्थापितस्वार्थैस्तिरस्कर्तुं प्रभूयते ॥ १५९ ॥

एते हि तेषां साफल्ये बाधकाः सन्ति भारवत् ।
तेऽकृतार्था अतिशयात्साम्प्रदायिकताग्रहात् ॥ १६० ॥

साम्प्रदायिकभावा हि सुखोत्तेज्याः सदाभवन् ।
तेऽकृतार्था प्रगत्याश्च शक्त्याश्चाभावतोऽभवन् ॥ १६१ ॥

वस्तुतोऽस्यां गोलपीठसभायां न फलाफले ।
प्रष्टव्ये, काचिदाशापि ततः कर्तुं न युज्यते ॥ १६२ ॥

तथापि तस्यामभवत्पूर्वस्मादन्तरं मनाक् ।
आदिमा गोलपीठाख्यसंसदासीत्स्वरीतिका ॥ १६३ ॥

ध्यानं न भारतीयानां तस्या दिश्यपतत्तदा ।
सर्बे सविनये भंगे किलासङ्गं तदाऽभजन् ॥ १६४ ॥

शिष्ट्या च येऽत्र ब्रैटिश्यार्ऽथिनो नामाङ्कितीकृता ।
प्रायः कृष्णध्वजैर्घोषैर्विरोधस्तेष्वदर्श्यत ॥ १६५ ॥

एकत्रिंशे स्थितिः सर्वा समभूत्परिवर्तिनी ।
अतो गान्धिः स कांग्रेसप्रातिनिध्येन सङ्गतः ॥ १६६ ॥

यं यान्तमनुयान्तिस्म जनानां कोटिकोटयः ।
तत्सङ्गत्स्या प्रतिष्ठास्याः संसदः समवर्धत ॥ १६७ ॥

भारतेनापि तत्कार्यक्रमे काचिद्रचिधृता ।
किन्तु तत्राकृतार्थत्वादकीर्ति भारतं गतम् ॥ १६८ ॥

साम्प्रतं ज्ञातमस्माभिः शिष्टिः सा ब्रैटिशी कथम् ।
श्रीगान्धिगमनं तस्यां किमर्थं तर्ह्यकासङ्क्षत ॥ १६९ ॥

प्रतिष्ठापयितुं तस्याः प्रतिष्ठां भारतीयतः ।
भारतस्याप्रतिष्ठां सा कर्तुमैच्छत्पदे पदे ॥ १७० ॥

संसद्यस्यां कूटनीतेः षड्यन्त्राणां महानिधौ ।
सदावसरवादानां प्रभावः पर्यदर्श्यत ॥ १७१ ॥

न साऽकृतार्थतास्माकं भारतस्य प्रकथ्यताम् ।
संसदोऽस्याः कृतार्थत्वं भारतस्यास्य वञ्चने ॥ १७२ ॥

इयं हि जगतो ध्यानं भारतस्यास्य वास्तवात् ।
प्रश्नवृन्दात्परावर्त्य तदसाफल्यमाङ्क्यत् ॥ १७३ ॥

भारते जननेत्राणि स्वयमुन्मीलितान्यहो ।
तेषामभज्यतोत्साहोऽन्वभूयत च तैस्त्रपा ॥ १७४ ॥

सा शीर्षोत्थानवेलां च प्राददात्प्रतिगामिनाम् ।
भारतस्य हि साफल्याफल्ये स्यातां तु भारते ॥ १७५ ॥

प्रवर्तते स्म यन्नाम राष्ट्रियान्दोलनं त्विह ।
तल्लन्दने कूटनीत्या श्लथीकर्तुं न शक्यते ॥ १७६ ॥

राष्ट्रियत्वं मध्यवर्गजनानां श्रमजीविनाम् ।
तात्कालिकीर्दर्शयति समस्याश्च व्यपेक्षिताः ॥ १७७ ॥

तेनास्यान्दोलनस्याथ द्वे गती सम्भवे स्वतः ।
प्रथमाऽफल्य-साफल्यमन्यान्दोलन-चालनम् ॥ १७८ ॥

स्वातन्त्र्यप्रगतेर्मार्गे ल कानां च प्रवर्तनम् ।
द्वितीया समयं कञ्चिद्यावत्तद्‌म्यते बलात् ॥ १७९ ॥

वस्तुतो गोलपीठान्तर्भारते युद्धसंक्रमः ।
वैवश्य स्योपरागश्च द्वयमासीत्समीषतः ॥ १८० ॥

गोलपीठस्य युद्धेऽस्मिन् प्रभावः कोऽपि नापतत् ।
परं तेनाल्पकालाय दूषितं वायुमण्डलम् ॥ १८१ ॥

पञ्चाम्बौ धृतजन्मना ऋषिकुलेऽधीत्याथ चाध्यापिता
युक्तप्रान्तगतेऽत्र येन विविधा विद्याश्च भाषाश्च ताः ।
क्लृप्तेतेन हि नेहरूचरितके काव्ये तु सर्गः प्रया-
त्यष्टत्रिंशतयान्वितोऽत्र विरतिं द्वैतीयगोल्पीठकः ।

युक्तप्रान्तीयकृषीवलेष्वशान्तिः

पञ्चचामरम्

एकोनचत्वारिंशः सर्गः

प्रधानमन्त्रितां गतोऽस्मि राष्ट्रिये महासद-
स्यथो सदस्यतां दधे तदीयकार्यसंसदि ।
समग्रभारतीय-राजनीति-रीतिचिन्तको-
स्म्यहं बलात्तु जातु यत्र तत्र गन्तुमीरितः ॥ १ ॥

गतागतान्युपेक्षितुं मम स्वभावमप्यहं
विहाय यामि सन्नियोजितः सदा सभादिभिः ।
यथा यथा क्रियाभरस्तथोत्तरप्रदायिताऽ-
धिकाधिकं प्रवर्धिता तथा तथाऽधिवेशनम् ॥ २ ॥

द्रुतं द्रुतं निमन्त्र्यते सभादिकाधिवेशनं ।
विलम्बितं विलम्बितं समाप्यतेऽतिकार्यतः ।
कदापि सप्तवासरान् चतुर्दशापि वासरान्
निरन्तरं निवेश्यते सभादिकाधिवेशनम् ॥ ३ ॥

न केवलाधुना परस्परम्य दूषणेक्षणा-
द्विनिन्दनक्रियाचलत् क्रियान्तराणि धिष्ठिता ।
अनेकसङ्गमास्तदीयतैकभिन्नभिन्नक-
र्मणा नियन्त्रणं दिने दिने कठोरनिर्णयाः ॥ ४ ॥

अपीह कल्पिता भवन्ति निर्भरा भवन्ति ये-
ऽवशेषदेशसन्तताः स्वतन्त्रतारणादयः ।
परं मम प्रधानकर्म तूत्तरप्रदेशगं
कृषीवलेषु यत्र सावधानमस्ति नः सदः ॥ ५ ॥

इहोत्तरप्रदेशवर्तिकाङ्ग्रेसके शतं
तदर्थमस्ति च स्थितं सभासदां ततोऽधिकम् ।
प्रतिद्वितीयके तृतीयमासकेऽधिवेशनं
तदीयमध्यवेशयच्च कार्यकारिणी सभा ॥ ६ ॥

सपञ्चपञ्चपञ्चसंख्यकैः सदस्यकैस्ततो
मुंहुर्मुहुर्न्यवेशयङ्किलाधिवेशनान्यहम् ।
यदीयहस्त एव चाभवन् कृषीबलोच्चया
इयं कृषीवलानुबन्धि जातमस्ति नः सदः ।। ७ ।।

इदं विशेषवेद्यमस्ति यत्सभासदस्सभा
द्वयेन केऽपि भूभृतो निरन्तरं सुसङ्गताः ।
समस्तकार्यवाहिका तदीयसम्मतिं श्रिता
प्रदेशसंसदः सभापतिस्तदा तसद्दुकः ।। ८ ।।

स एव कार्यकारिणीं सभां कृषीबलोच्चया-
नुबन्धि तत्सदश्च नाम तद्दिनेष्वधीक्षते ।
स शोरवानिरास्त सुप्रसिद्धभूभृतां कुलात्,
प्रधानमन्त्रितामधात्स शीलवान् प्रकाशकः ।। ९ ।।

तथेतरेऽप्यनेकसांसदा महीधरा अभु-
र्महीभृतां कुलोद्भयाः किलाभवा महोदयाः ।
सभासदस्तथापरे प्रशस्तजीविकाभृतो
ऽत्र मध्यवर्गवर्तिनोऽभवन्विचारशालिनः ।।१०।।

प्रदेशकार्यकारिणीमधिष्ठितो न कोऽप्यभूत्
कृषीवलोऽथवा दरिद्रशिल्पजीवनो जनः ।
स्थितास्तु मण्डलीयसंगमेषु ते कृषीवलाः
न किन्तु ते कदापि तत्र चायने कृतार्थिताः ।। ११ ।।

निचायनेन निर्मितासु सत्सभासु संख्यया-
धिकास्तु मध्यवर्गगाः सुशिक्षिता जनाः स्थिताः ।
महीभृतां महाप्रभाव आस्ववर्ततानिशं
ततो न ताः सभाः कदापि सोष्मका उदीरिताः ।। १२ ।।

कृषीवलीयप्रश्नतस्तु सर्वथा न सोष्मकाः
प्रदेशजासु केवलः सदस्य एव सोऽस्म्यहम् ।
कृषीवलीयतत्सदस्यभूवमेव सेवको
विचारणाविमर्शनादिकर्मणां सहायकः ।। १३ ।।

युक्तप्रान्तीयकृषीवलेष्वशान्तिः

पञ्चचामरम्

एकोनचत्वारिंशः सर्गः

प्रधानमन्त्रितां गतोऽस्मि राष्ट्रिये महासद-
स्यथो सदस्यतां दधे तदीयकार्यसंसदि ।
समग्रभारतीय-राजनीति-रीतिचिन्तको-
स्म्यहं बलात्तु जातु यत्र तत्र गन्तुमीरितः ॥ १ ॥

गतागतान्युपेक्षितुं मम स्वभावमप्यहं
विहाय यामि सन्नियोजितः सदा सभादिभिः ।
यथा यथा क्रियाभरस्तथोत्तरप्रदायिताऽ-
धिकाधिकं प्रवर्धिता तथा तथाऽधिवेशनम् ॥ २ ॥

द्रुतं द्रुतं निमन्त्र्यते सभादिकाधिवेशनं ।
विलम्बितं विलम्बितं समाप्यतेऽतिकार्यतः ।
कदापि सप्तवासरान् चतुर्दशापि वासरान्
निरन्तरं निवेश्यते सभादिकाधिवेशनम् ॥ ३ ॥

न केवलाधुना पस्परम्य दूषणेक्षणा-
द्विनिन्दनक्रियाचलत् क्रियान्तराणि धिष्ठिता ।
अनेकसङ्गमास्तदीयतैकभिन्नभिन्नक-
र्मणा नियन्त्रणं दिने दिने कठोरनिर्णयाः ॥ ४ ॥

अपीह कल्पिता भवन्ति निर्भरा भवन्ति ये-
ष्वशेषदेशसन्तताः स्वतन्त्रतारणादयः ।
परं मम प्रधानकर्म तूत्तरप्रदेशगं
कृषीवलेषु यत्र सावधानमस्ति नः सदः ॥ ५ ॥

इहोत्तरप्रदेशवर्तिकाङ्ग्रेसके शतं
तदर्थमस्ति च स्थितं सभासदां ततोऽधिकम् ।
प्रतिद्वितीयके तृतीयमासकेऽधिवेशनं
तदीयमध्यवेशयच्च कार्यकारिणी सभा ॥ ६ ॥

परं न कुत्रचित्किमप्यहं विशेषभागभाक्
परोऽपि कोऽपि तादृशो न वक्तुमत्र शक्यते।
सुसंगतैः समूहजेषु कर्मसु प्रवर्तनं
स्वभाव एव चाभवत्समस्तकर्मकारिणाम्॥ १४॥
न कुत्रचिज्जनेऽधिकं महत्वमत्र दीयते
समस्त एव संगमे सदा बलं निधीयते।
सभापतिस्तदाऽभवत्किलाग्रणीः सभासदां
स एव प्रातिनिध्यभाङ्न सोऽधिकारभाग्वरः॥१५॥
अहं प्रयागमण्डलीयकांगरेसके सद-
स्यतामशिश्रियं, स टण्डनोऽस्य नेतृतां श्रितः।
अधीक्षते च तत्सदः कृषीवलीयवस्तुभिः
प्रधानभागभन्वधाद् व्यधाच्च कर्म तद्धितम्॥ १६॥
इहैव सर्वतः पुरः करावरोधनाग्रहः
प्रवर्तितोऽभवन्न तत्र हेतुरास्त तद्गतः।
न भावमान्द्यतः प्रयागवर्तिनः कृषीवलाः
सुदुर्गतिं गता इतीह नाभवद्विचारणा॥ १७॥
तदा ह्ययोध्यका प्रयागदुर्दशास्ततोऽधिकाः
परं प्रयागसंगमस्य सुष्ठुतैव कारणम्।
अभूच्च राजनैतिकीह साधिका च चेतना
तुरं हि तत्तदाभवत् सुराजनीतिकेन्द्रकम्॥ १८॥
समीपवर्तिषु प्रपाति कार्यकर्तृमण्डलं
पुरेषु वै लघुष्वपि प्रजागरस्य तन्महत्।
अनन्तर हि दिल्लिसन्धितः समस्तसूचना
लघुष्वमीषु ग्रामकेषु कारितास्तदाभवन्॥ १९॥
कृषीवलाश्च सूचिता विनीतभङ्गकाग्रहो
निरुध्यते, करप्रदानरोधनं न साम्प्रतम्।
उदीरिता च सम्मतिः करं प्रदातुमेव सा
ऽथ भावमन्दताश्रमाद् विमुक्तयेऽपि यत्यताम्॥२०॥

समस्थितावपीह यत्करप्रदानमीदृशं
सुदुष्करं भवेत्तु भावमन्दतास्वसम्भवम् ।
अतः करोचितः समग्रराशिरत्र दुर्भर-
स्ततस्तदल्पताहिताय यत्न आशु धीयताम् ॥ २१ ॥
कृषीवलप्रतीककैः समं च मन्त्रणा कृता
कृतास्थिरा च योजना करार्धराशिमुक्तये ।
क्वचित्स्थितौ ततोऽधिकां विमुक्तिमाप्तुमाग्रहो
विधास्यते किलेति तत्कृते प्रयत्यतां जनैः ॥ २२ ॥
कृषीवलीयमण्डलायनैर्विनीतभङ्गतः
पृथक् कृतात्र सर्वथा प्रयत्नसन्ततिः समा ।
किलार्थिकी दृगेव तत्र माध्यमं विचारणे
भवेद्यथा तदस्तु राजनैतिकाग्रहात्पृथक् ॥ २३ ॥
परं तदास्त दुष्करं मिथोऽमिलद्धि तद्द्वयम्
किलान्वयेन केनचित्प्रगाढमास्त सङ्गतम् ।
वयञ्च कांगरेससङ्गतैर्हि राजनैतिका
विनिश्चिताश्च विश्रुता इहास्म तत्र मज्जिताः॥२४॥
प्रयत्नमाचराम कस्यचित्त्वनेहसः कृते
नियन्त्रिता महीभृता कृषीवलेतरैश्च सा ।
कृषीवलीयसंघवच्चलेदियं च संस्थिका
परं न राजनैतिकत्व मुज्झितं वयं क्षमाः ॥ २५ ॥
नहि क्षमास्तदुज्झनं समीहितुं हृदाप्यहो,
यदेव कुर्महे वयं समाजशर्मणेऽपि तत् ।
स मन्यते च सर्वकार एष राजनैतिकम्
विनीतभंगसङ्गतिश्च सा पुनर्विभाव्यते ॥ २६ ॥
स चेत्पुनः प्रवर्तते तदात्र वीतसंशयं
किलार्थरीतिरञ्जसैव राजनीतिमाश्रयेत् ।
प्रकाशमानसंकटेषु सत्स्वपीह सन्ततं
प्रयत्न एष वर्तते स्म राजनीतितः परम् ॥ २७ ॥

यथार्थहेतुरस्य चास्ति दिल्लिसन्ध्यनेहसि
कृषीवलीयप्रश्न एष राजनीतितः पृथक् ।
स्थितो भवेदिति प्रयत्नमाचराम सर्वत-
स्तदेतदस्य शासनं प्रजाजनेषु वेदितुम् ॥ २८ ॥

पुरा च दिल्लिसन्धिरत्र गान्धिनेर्विनं प्रति
प्रतिश्रुतं विनीतिभङ्गनामकोऽयमाग्रहः ।
न तावदीरितो भवेद् भवेत्तु गोलपीठकं
किलैतदस्ति यावदेष यामि वा न याम्यहम् ॥२९॥

पुरानुशंसति स्वकागरेससंसदं
यदत्र गोलपीठकं दले ददात्वबाधनम् ।
प्रतीक्षयन्तु तत्परीणतिं च तेऽपि धैर्यतः
परं किलार्थिकाय संगराय नायमाशयः ॥ ३० ॥

इहोत्तरप्रदेशगामिनां कृषीवलात्मनां
समस्यया वयं तदाऽप्यभूम विह्वलीकृताः ।
कृतं हि तत्र कार्यजातमास्त साधुसङ्गतं
समस्तभारते हि दुर्गता कृषीवलस्थितिः ॥३१॥

स्ववार्तया च गान्धिना पुनः किलोपवर्गितं
पुनः प्रकाशितं प्रकाशिते च पत्रके स्वयम् ।
विदेशयात्रयापि पूर्वमेव तत्स्फुटीकृतम्
यदस्ति गोलपीठराजनीतितः पृथक् त्विदम् ॥ ३२ ॥

यदार्थिकेषु संगरेषु कांगरेस मुद्यते
प्रजाजनस्य वा कृषीवलोच्चयस्य मुख्यतः ।
इदं प्ररक्षतात्किलाधिकारजातमाग्रहात्
न तादृशोऽस्ति संगरे नियोक्तुमात्मनः स्पृहा ॥३३ ॥

तमेव चाप्युपेक्षितुं किलेच्छतीह किन्तु चे-
द्भवेत्तदत्युपेक्षितं तदा क्रदाश्रितं भवेत् ।
प्रजाजनं हि नैकलं वयं भवेविहातुमुद्यताः
इति स्म सोऽपि मन्यतेऽत्र दिल्लिसन्धिसंहितम् ।३४॥

यदत्र निर्विशेषराजनैतिकोऽयमाग्रहो
विनीतभंगसंज्ञको न रुध्यतेस्म सन्धितः ।
अहं तदीयचर्चया किलोत्तरप्रदेशगां
स्वकांगरेससंसदं च नेतृवर्गमात्मनः ॥ ३५ ॥
विमोचयामि दोषतो य एषु कोऽपि रोप्यते
यदेभिरस्ति साम्प्रतं करावरोधकारकम् ।
प्रचाल्य चात्र दिल्लिसन्धिबन्धनं श्लथीकृतम्
इयं च दोषरोपणा तदा किलास्तनो चिता ॥ ३६ ॥
कृतं हि दोषरोपणं तु येषु तेऽस्य तूत्तरं
क्षमाः प्रदातुमुद्यताः कृताः परन्तु बन्दिनः ।
अपीह वृत्तपत्रकेषु घोरयन्त्रणाऽभवत्
यथार्थतः करावरोधनाग्रहो न तैः कृतः ॥ ३७ ॥
न चापि तत्र संषदात्र कोपि योग आश्रितः
तथाऽर्थवश्यतो विनीतमंशतः पृथक् स्थितैः ।
अमीभिरत्र यत्कृतं न दिल्लिसन्धिरोधि तत्
तदस्ति कारणोचितं नवेति भिन्नमस्ति तत् ॥ ३८ ॥
परं यथा श्रमङ्कराः स्वकार्यशालयाऽऽहितं
स्वमर्थकष्टमासितुं भवन्ति तेऽधिकारिणः ।
परीहृतालमुख्ययत्नके तथा कृषीबला
अपीह तत्प्रकर्तुमत्र नाधिकारवञ्चिताः ॥ ३९ ॥
अथात्र दिल्लितोऽपि हैमशैलश्रृङ्गकावधि
स्थितिः समा तदाभवत्समस्तकर्मकारिणाम् ।
इमां च सर्वकार एष नाध्यगच्छदेव-स
स्फुटं तदौचितीमपि स्वयं समार्थिथत्तदा ॥ ४० ॥
नवोत्तराच्च विंशकात्परं कृषेः सुमन्दता-
श्रयान्निरन्तरं गतातिविक्रियां परिस्थितिः ।
पुरा कियद्भिरत्र वर्षकैर्महार्घतां गता
जगत्यभूच्च भारतेऽपि तत्र भाग उद्धृतः ॥ ४१ ॥

जगत्यशेषकेऽपि कार्यशालिकाकृषिष्वभू-
त्समुन्नतेर्न तारतम्यमित्यभून्महार्धता ।
इहापि भाववृद्धितः करेषु वृद्धिरागता
यया कृषीबलस्य सर्वलाभतल्लयोऽभवत् ।। ४२ ।।

समुच्चयेन कुत्रचित्किलापवादमन्तरा
कृषीबलस्थितिः समानरूपतो विरूपिता ।
इतीह नः प्रदेशके करो जवेन वर्धितः
शताब्दिकामिमां हि मूल्यपञ्चगुण्यताऽस्पृशत् ।।४३।।

इतीह भूमितोऽस्य सर्वकारदेयभागको
गतः किलोच्चतां परां महीभृतां ततोऽधिकाम् ।
कृषीबलाश्च सर्वदैव रोटिकाकृते परा-
स्यदर्शिनः स्थिता गता न जातु नाम विश्रमम् ।।४४।।

यदि क्वचित्षडीतयो विनाशयन्ति तत्कृषिं
तथापि तेन तावदेव दीयतां करादिकम् ।
क्वचिच्च मुक्तिवञ्चितानुदारतापुरस्सरं
करांशराशिसङ्ग्रहे तदात्वमात्रकर्षणे ।। ४५ ।।

यदाच्छतोऽच्छकर्षणेऽपि देयराशिदुर्भर-
प्रतीतितः कृषीबला भजन्ति दीनतां पराम् ।
तदा विपत्क्षणे तु साधुकारतो ऋणं विना
करादिदानमस्य दुष्करं परं महार्घकृत् ।। ४६ ।।

कृषिव्यवस्थयान्विताः समेऽपि वर्गका इमे
महीधराः, धरेश्वराः, कृषीबलाः, श्रमाश्रयाः ।
समेऽपि साधुकारवागुरासु बद्धकण्ठका
इहाद्य संस्थितै व्यवस्थया दधत्यमूनिह ।। ४७ ।।

अनेन कर्मणार्जितं महाजनैर्महाधनं
तदीयवागुरा महीं महीजनानबन्धयत् ।
अबन्धनाः स्वयञ्च ते, विधिश्च तत्सहायकः
स्वपत्रगैश्च शब्दकैर्निजाधमर्णमारिणः ।। ४८ ।।

शनैः शनैर्महीधरात्स्वतन्त्रतः कृषीबला-
दियं मही तदीयहस्तगामितां गताभवत् ।
प्रभूतमात्रया च ते महीपतां स्वयं गताः
महीभृतां च वर्गगा भवन्ति ते महीयसाम् ॥ ४९ ॥

महीपतिः कृषीबलः स्वभूमिकर्षणः शनै-
र्महीधरस्य साधुकारकस्य दासतां गतः ।
परस्य सेवकः कृषीबलस्तु दूरदुर्दशां
ततोऽतिदासतामधान्महीविहीनदीनवत् ॥ ५० ॥

कुसीदजीविनांमिहाद्य भूपतित्वधारिणां
कृषीवलैश्च कृष्णभूमिभिश्च नान्वयोऽभवत् ।
इमे च ग्रामवासिनोऽपि नागराः किलाभवन्
करग्रहश्च तैः स्वकार्यकारिषु प्रधारितः ॥ ५१ ॥

इमे च यन्त्रवद्दयां विना लघिष्ठचेतसा
निपीड्य तान् विचिन्वते करादिराशिसम्पदम् ।
कृषीवलस्य वर्धिताधमर्णतैव साक्षिवद्
वदत्यसौ महीपताप्रणालिकां खरां स्थिराम् ॥५२॥

प्रभूतकर्षका न कांचिदप्यधुश्च शेषतां
न कायिकीं न चार्थिकीं दधुर्न ते सहिष्णुताम् ।
सदा बुभुक्षिता दिगम्बरार्भकाश्च तेऽवसन्
प्रतीपगामिनीं स्थितिं न तेऽतिवर्तितुं क्षमाः ॥ ५३ ॥

समागतासु रुक्षु ते म्रियन्त एव लक्षशो
नवोत्तरे हि विंशकेऽत्र शासनैर्नियोजिताः ।
प्रदेशकोषतश्च शोधसंसदप्यदर्शयत्
सब्रह्मदेशभारते कृषी ऋणाष्टकोटिताम् ॥ ५४ ॥

इहाङ्कके महीभृतां महीपतित्वशालिना-
मृणानि संगतानि नो कृषीबलर्णमेव तत् ।
इहार्थनीतिशास्त्रसाधुकारपक्षगा चिरात्
ततोऽपि हा महार्णके महार्णवोच्छलत्कता ॥ ५५ ॥

इति प्रकारतश्च रूप्यकस्य मूल्यवृद्धितो
विरोधकेऽपि सत्यमुत्र भारतस्य सर्वतः।
पणस्य षोडशस्य ये दशाष्ट वा पणाः कृता-
स्ततः कृषीबलर्णमेककोटितोऽधिकं स्थितम् ॥ ५६ ॥

विशुद्धितः परं तथा च वृद्धितः परं शनै-
र्निरन्तरं पदार्थमूल्यपाततोऽस्ति दुर्दशा।
विशेषतस्तु ग्रामकेषु सर्वतोऽपि चाधिकं
सुसंकटं समापतत्तदस्ति वै ततः पृथक् ॥ ५७ ॥

इहोत्तरप्रदेशके पदार्थमूल्यतः करो
विचीयतामिति स्म नो निवेदनं स त्रिंशके।
अयं हि भाव आस्त एकसंख्यकेऽत्र वत्सरे
ततस्तदा तदात्वगं करादि चीयतामिति ॥ ५८ ॥

इदं परीक्षणं न नाम सौविधीमयं मतं
अनेकधा कृषीबलाः परम्पराऽपरम्पराः।
पदाथमन्दताभरश्च सर्वतोऽपि तुच्छके
कृषीबलेऽधिकः पतत्यसावितीह निश्चितम् ॥ ५९ ॥

परं परीक्षणं किलैतदेव सम्भवत्यथो
तदौचितीदृशापि युक्तमेव भासते च तत्।
कृषीव्ययाद् गृहव्ययस्य चेयतो प्रशस्यते-
ति सम्यगाकलय्य तत्करस्य राशिरिष्यताम् ॥ ६०॥

परं परीक्षणेन चाप्यनेन जीवनव्ययः
कियानपीह मान्यते लघुः परं स्थितिः परा।
इहास्ति भारते कृषिर्बहुनं चैह लाभदा
यथा निरूपितं पुरा कृषीबलास्तु केचन ॥ ६१ ॥

करं प्रदातुमक्षमा न यावदेभिरात्मन-
श्चलाचलात्र कापि नाम सम्पदा प्रदीयते।
अविक्रये च सम्पदो महाकुसीदतः कुतो-
ऽपि तै ऋणं न गृह्यते-करं न दातुमीश्यते ॥ ६२ ॥

इयञ्च योजनाऽऽदिमाऽस्थिराप्यभूत्पुरात्र नः
परम्परीणकर्षकैः करार्धमुक्तिराप्यताम् ।
सुदुर्गतैस्ततोऽपि चाधिका विमुक्तिरिष्यता-
गान्धि-हेलिमालकम्मतैक्यमत्र चाभवत् ॥ ६३ ॥

तदोत्तरप्रदेशवर्तिनो महीधरानयं
कृषीबलांश्च प्रत्यनाथतेदमेव तत्र यत्—
कृषीबलैर्यथाबलं करो निजः प्रदीयताम्
इहाङ्कोऽपि कश्चनामुनातिदेशितोऽभवत् ॥ ६४ ॥

कृषीबलैस्तदङ्कतः करो निजः प्रयोजितः
परं न सर्वकारपक्षतः स तैरभून्मतः ।
प्रदेशशासनं ततो महार्थसंकटेऽपतत्
करप्रणीतिरास्त तस्य योगमार्ग उन्नतः ॥ ६५ ॥

इयं जहाति चेदथाल्पतां नयत्यदः करं
तदास्य सर्वहानिरेव निश्चिता निभाल्यते ।
परं कृषीवलोच्छलादपीह शङ्कितोऽस्त्यदः
करे विमुक्तिदानतस्तमिच्छति स्म वै शमम् ॥६६ ॥

इहोभयत्र लाभलम्भनं किलास्त्यसम्भवं
कृषीबलप्रशासनान्तरे महीधराः स्थिताः ।
इहार्थदृष्टितोऽनपेक्षिता कृपाऽऽस्त सा त्विमेऽ-
त्र हानिमाप्नुयुस्तदैव तद्द्वयं सुखं व्रजेत् ॥ ६७ ॥

न शासनञ्च राजनीतिकारणेन तानिमान्
कदापि रोषयेत्सदैव तोषयेदिति स्थितौ ।
प्रदेशशासनेन तेन कर्षकेष्वयं स्थितो
महीप्रकर्ष एपु तत्र न ह्युपेक्षितो भवेत् ॥ ६८ ॥

इहान्ततः प्रदेशशासनेन मुक्तिघोषणा
कृषीबलेषु वै महीधरेषु चाभ्युदीरिता ।
विचित्रघोषणा च सा न वेत्तुमत्र शक्यते
न गम्यते ततोऽस्ति मुक्तिराशिरत्र वा कियान् ।६९।

लघीयसी किलास्त सेति निश्चितं मतं स्फुटं
त्वियं च वर्तमानवत्सरस्य कर्षणे स्थिता ।
पुराभवस्य वै ऋणस्य भारतो विमुक्तये
न किञ्चिदत्र घोषितं प्रशासनेन मौनिना ॥ ७० ॥

यदा कृषीवलोऽर्धवर्षदेयकेऽप्यलं न सः
प्रभुः कथं भवेदृणस्य तद्व्यपाकृतौ कृशः ।
महीधराः सदा पुरातने ऋणे करग्रहा-
दवाप्य राशियोजनां प्रकुर्वतेऽतिभीतिदाम् ॥ ७१ ॥

प्रदेयभागलेशशेषतोऽपि ते कृषीबले
ऽभियोगचालनेन तन्महीं ग्रहीतुमीशते ।
प्रदेशकांगरेसकार्यकारिणी कटुस्थितौ
न्यपप्तदेषु मन्यते स्म सा कठोरवर्तनम् ॥ ७२ ॥

परं न काञ्चिदप्यमुष्य साऽकरोत्प्रतिक्रिया-
मशक्तितो न रोद्धमप्यलं करात् कृषीबलान् ।
अपि त्वनारतं वयं करं प्रदातुमेव तान्
यथाबलं यथा भवेत्तथा न्ययोजयाम वै ॥ ७३ ॥

विपत्क्षणे सहानुभूतिमेव तेष्वदर्शयन्
तदीयसाहसं च सर्वमेव चाभ्यवर्धयन् ।
समेऽपि सम्मताश्च यत्करांशमुक्तितोऽप्ययं
करस्य राशिरस्ति वै कृषीबलैः सुदुर्भरः ॥ ७४ ॥

बलप्रयोगयन्त्रचालनं तदावधीरितं
प्रवर्तते स्म चावधीरितं द्विधापि तत्र तत् ।
सहस्रसंख्ययाधिकारहीनताभियोगकाः
प्रचालिताः गवीवृषौ च सम्पदश्च कुर्किताः ॥ ७५ ॥

महीभृतां च किङ्कराः कृषीवलप्रताडनं
प्रचक्रिरे तदा कियद्भिरर्पिताः करांशकाः ।
तदेव दातुमस्ति शक्तिरित्यमीभिरुच्यते
ततोऽधिकं प्रदातुमप्यलं स्युरेव ते क्वचित् ॥ ७६ ॥

इदं स्फुटं समेऽपि वस्तुतोऽभवन् भरान्विताः
करांशदानतो न तेऽभवन् परन्तु रक्षिताः।
विधेस्तदिञ्जनं जवादचीचलत्पथिस्थितं
प्रपन्नमर्दयत् समन्ततोऽप्यदीदलच्च तम् ॥ ७७ ॥

करांशकान् प्रदत्तवत्सु चापि वैधनिग्रहो
ऽभवत् पशुप्रभृत्यशेषवस्तुविक्रयोऽभवत्।
न चेददास्यदेषु कोऽपि तस्य या गतिर्भवेत्
प्रदत्तवत्सु चाखिलस्य सा त्वजायत स्थितिः ॥ ७८ ॥

न दानतोऽवशिष्टराशिरर्भकान् कलत्रकं
त्वपूपुषत् प्रदानतस्तु तेऽपि संकटं श्रिताः।
इमे प्रभूतसंख्यया समीयुरभ्यसूचयन्
भवन्निदेशवर्तिभिर्हितः करो यथाबलम् ॥ ७९ ॥

तथापि दुर्दशेयमास्त केवले प्रयागके
सहस्रशः कृषीबला हृताधिकारतां गताः।
सहस्रशश्च तद्विरुद्धनैकधाभियोगकाः
प्रचालिता इतीदृशीं दशां गताः समाकुलाः ॥ ८० ॥

समण्डलीयकाङ्ग्रेसकार्यकारिणीस्थलं
गृहं मदीयमाकुलं सदाभवत्कृषीबलैः।
ततो विविग्नमानसाः पलाय्य गन्तुकामवत्
क्वचिन्निलीय बा निवासकामुकास्तदाऽभवन् ॥ ८१ ॥

न दुर्दशां विलोकितुं क्षमोऽभवं प्रतिक्रिया-
मपीह कर्तुमस्म्यलं न कांगरेसमप्यदः।
कृषीबलीयविग्रहेषु घातचिह्नदर्शनात्
महीभृताञ्च किङ्करोच्चयस्य चाप्यनिन्दयम् ॥८२ ॥

इहातुरालयेषु ते कृषीबलाश्चिकित्सिता
न किञ्चनाप्यहो ! वयं विधातुमास्म ईश्वराः।
इहोत्तरप्रदेशसर्वकारनामतो दला
न्यलं विलिख्य चेरितानि नैनितालल्खनवोः ॥ ८३ ॥

इहास्मदीयसंसदा च नैनितालखनवोः
प्रशासनेन साकमन्वयः स्वतः कृतोऽभवत् ।
स वल्लभश्च पन्त एभिरेव नः समन्वयेऽ-
भवच्चिराय मध्यगोऽलिखच्च सर्वकारकम् ।। ८४ ।।

स सर्वदालिखत्तथाहमप्यलेखिषं सदा
सदः पतिस्तसद्दुकोऽपि भूयसाऽलिखत्तराम् ।
अथात्र जूनमासिकी तु वृष्टिरापतत्तदा
हृताधिकारकाः कृषीबलाः किमत्र कुर्वताम् ? ।।८५ ।।

स्वनेत्रयोः पुरः स्थितामकृष्टभूमिकां निजां
प्रपश्यतां कियन्नु कष्टमन्तरे श्रमश्रियाम् ।
न कृष्टिरेव नोप्तिरेव चेत्कृतोचिते क्षणे
तदा प्रमाद एष नो निहन्ति वै बुभुक्षितान् ।। ८६ ।।

सुदुःसहं तदास्त तत्स्वभावतो विरोधि चा-
प्यभूद्धृताधिकारताविधामतो न वस्तुतः ।
इह स्थितौ महीं कृषन्ति तर्हि तेऽपराधिनो
भवन्ति तन्महीमथापरः कृषेदितीतरम् ।। ८७ ।।

परामृशन्ति ते वयं किमत्र तान् दिशामहे
वृथा स्थितां वसुन्धरामृतौ कथं सहामहे ।
निदाघ एष गान्धिना समं च हेमशैलकं
गततदा मयोक्तमेकशासनाधिकारिणे ।। ८८ ।।

अपृच्छमेनमत्र चेद् भवान् भवेन्मम स्थले
तदाऽत्र कां स्वसम्मतिं कृषीवलेषु दर्शयेत् ।
तदुत्तरं किलोदमीलयत्तदा ममाक्षिणी
'तदुत्तरप्रदानतः प्रकाशयाम्यसम्मतिम्' ।। ८९ ।।

विधानतः कृषीबलो हृताधिकारतां गत-
स्तथापि तं न शासका निरुन्धतेस्म कर्षणात् ।
अपीह हैमशैलश्रृङ्गसंस्थितेन देशनं
विना न सांख्यिकीसमस्यकोपरि प्रचिन्तनम ।। ९० ।।

सुखं तदस्ति तत्कृते, न तस्य नैनितालका-
धिकारिणां कदापि नापि मानवैः सहान्वयः।
न ते हि मानवापदोऽप्यदृष्टवन्त एव यत्
कुतो जडेषु कर्गलेषु खेलतां तु चेतना ? ॥ ९१ ॥

वयं किलोदिताश्च तत्र हैमशैलशेखरे
यथा वयं कृषीवलान् स्वदेयदानहेतवे।
किलेरयाम चेत्समं न दीयतां यथाबलम्
महीभृतां हि किङ्करा इवैह वर्तयामहे ॥ ९२ ॥

पुरापि वस्तुतस्तदेव तेष्वभूत्प्रभाषितं,
यथाबलं प्रदीयतामिति त्वमीभिराहितम्।
सहैव ते प्रबोधिता न विक्रयः पशुव्रजे
विधीयतामृणं पुनः कुतोऽपि तैर्न गृह्यताम् ॥ ९३ ॥

इति द्वयोर्विचारयोः परीणतिश्च दर्शिता
कृषीवलस्य वैवशी महीभृताञ्च पारुषी।
निदाघ एष सर्वथाऽत्र सर्वतश्च दुस्तरो-
ऽथ दुष्करश्च सह्यतेस्म कष्टतोऽत्र कर्षकैः ॥ ९४ ॥

सहिष्णुता कृषीबलेषु नूनमस्ति साद्भुता
तथापदश्च तेषु हन्त दुस्तराः पतन्त्यमूः।
अकाल-सिन्धुवृद्धि-रोगभोग-शोक-निःस्वताः
सदैकमेकमत्र सह्यते सहातिनिद्रया ॥ ९५ ॥

इमे किलापदः स्वरक्षणं निजप्रकारतः
स्वतः प्रकुर्वतेऽधुना न चापदागता न वा।
प्रकृत्यनुष्ठितं न तत्प्रतीयते स्म तेन ते
जने जने कृतस्य तस्य मन्वतेऽस्य सह्यताम् ॥ ९६ ॥

अतश्च तासु ते प्रतिक्रियातुरा इहाभवन्
इयं हि राजनैतिकी कला किलास्ति शिक्षिता।
प्रदर्शयत्यसौ प्रभावमित्यहो मनांसि नो
दुनोति, वै धियं धुनोति तत्प्रयोजकत्वतः ॥ ९७ ॥

किमत्र तैर्न सम्मतिः किल श्रितास्ति नः समैः
परं सहायतापि नाऽत्र सह्यतामुपाहरत् ।
वयं हि तान् सुसंहतान्विधाय तेषु संस्थितां
सुशक्तिमप्यबोधयाम याऽनुपेक्ष्यतां गता ॥९८ ॥

अहो बलेन तैर्विमुक्तिरप्यसौ प्रसाधिता
मितास्ति साद्य चेत्परेद्युरर्जिताऽमिता भवेत् ।
इमे तपस्विनो यदत्र ताडिताश्च पीडिता-
स्तदस्ति दुर्मदान्धबुद्धिसम्पदां विजृम्भितम् ॥ ९९ ॥

अनीतिरेव सास्ति या कृषीबलैः सदा सखी-
वदेव सेविताऽऽदृता हसद्भिरङ्कके धृता ।
इहातिमात्रमाप्रयुज्यमानया तया कृतं
प्रकाशनं हि पश्यतां कृतेऽप्यभूत्प्रतापकृत् ॥ १०० ॥

कृषीबलेषु भूभृतां च किङ्करैः कृता इमे
सुदुर्विलासका वृकैरिवापि सन्ति विश्रुताः ।
सहिष्णुतां कृषीबलीयवर्गकस्य येऽञ्जसा
किलाञ्जयन्ति दुर्बलेऽविकार्भके बलेरिताः ॥१०१॥

प्रबोधिते कृषीबलीयवर्गकेऽधुनामुना
प्रकारकेण दुर्विलासकेन तेन विद्रुतम् ।
कृषीबलस्य चीत्कृतिं श्रृणोति कांगरेसकं
तदद्य भूमिपालकाङ्गरेसकं प्रबोधति ॥ १०२ ॥

कृषीवलैकता-प्रसूत-संघ-शक्तिरेषिका
करिष्यतीह कांग्रसस्य शक्तिमुज्ज्वलद्युतिम् ।
इयं प्रभावमात्रतोऽपि भापयिष्यति ध्रुवं
बलान्वितांश्च दुर्बलाननीतिवर्त्मवर्तिनः ॥१०३॥

यथा यथा निदाघ एष निर्गतस्तथा तथा
बलात्करादिसञ्चयः श्लथोऽभवद्बलोच्चयैः ।
हृताधिकारका असंख्यका अथो कृषीवला
नितान्तचिन्तनीयतां गता अभुश्च साम्प्रतम् ॥ १०४ ॥

यतो महावितर्कतर्कतः परं प्रदेशगा
कृषीवलस्थितिर्हि तत्र हेतुतामुपागता।
स निश्चितोऽभवत्किलोत्तरप्रदेशके समे-
त्य तां कृषीवलस्थितिं करे ग्रहीतुमीश्वरः ॥ ११२ ॥

प्रशासनेन या कथाभवद्धि हैमशैलके
किलोत्तरप्रदेशवार्तयापि तत्र तूत्थितम्।
स आङ्ग्लदेशगोऽभवत्तदापि तां परिस्थितिं
परीवृतिं च तत्र तर्ह्यवेदयाम गान्धये ॥ ११३ ॥

पुरा द्विमासगेषु सप्तवासरेषु वायवा
न्यथो च निर्विशेषकाणि पत्रकाण्यलेखिषम्।
प्रवासकावसानकालकेन तावदस्य ता-
न्युपाहरं स तूर्णभागमिष्यतीति चाशया ॥ ११४ ॥

स नोऽवदत्त्रिमासतः परं नवाम्बरे ध्रुवं
स आगमिष्यतीति कामितं हृदा तदाशया।
तदागमावधिन्यनेहसीह नाम भारते
न संकटं किमप्युदेष्यतीति निश्चिता वयम् ॥११५॥

तदागमात्पुरा वयं च सर्वकारसम्मुखे
निधाय तन्निवेदनं न सङ्कटं विधत्सवः।
तदागमे विलम्बतस्तु सत्वरं कृषीवला-
नुगा समस्यकाधिकाधिकं प्रपञ्चतां गता ॥११६ ॥

तदा च तस्य सन्निधौ प्रलम्बितारपत्रकं
परैषयाम तत्र वर्तमानवृत्तजातकम्।
वयं किमप्यथात्र कर्तुमुद्यताः विवश्यत-
स्ततः समेतमुत्तरं न कर्तुमस्म्यहं क्षमः ॥ ११७ ॥

विवश्यता ममापि तावदाकलय्य बुध्यताम्
यथैव रोचते तथा भवद्भिरत्र वृत्यताम्।
प्रदेशकांगरेसकार्यकारिणी त्यशेषभा-
रतीयकांगरेससंसदे तदप्यसूचयत् ॥ ११८ ॥

अहं पुनः समस्तवृत्तवेदनाय सम्मुखे
स्थितः परन्तु वस्तुनो गभीरतां विलोक्य तैः ।
स शेरवानिरुच्यते स्म सूच्यते स्म काङ्ग्रसं
प्रमूर्छते स्म तत्परामृशात्र कर्मणां क्रमे ॥ ११९ ॥

प्रवर्तिता विवृत्तिरत्र सर्वकारसंसदा
कृतानुशंसिकापि कापि चक्रव्यूहसोदरा ।
बहुश्च निर्भरीकृतोऽधिकारिषूच्चनिर्णयो
विमुक्तिरास्त चाधिकाथ पूर्वमुक्त्यपेक्षया ॥१२० ॥

परं न सालमास्त हन्त मुक्तिकारणान्यपि
स्वरूपमाप्तवन्ति काञ्चिदापदं न्यपातयन् ।
विवृत्तिरग्रिमेषु सास्त भूतपूर्वदेयका-
न्यचर्चितानि तत्र तानि पीडनाय कर्षिणाम् ॥१२१॥

हृताधिकारके कृषीवलीयवृन्दकेऽप्यहो
न किञ्चिदुक्तमास्त तत्र किं वयं प्रकुर्महे ।
गताब्दवत्किमद्य तान् कृषीवलान्यथाबलं
प्रदातुमादिशेम तां पुनर्दशां निरीक्षितुम् ॥ १२२ ॥

यथाबलप्रदानसम्मतिर्विमूढचेष्टितं
विमुक्तिमुक्तसर्वदानसम्मतिस्तु युज्यते ।
न चेत्समग्रमेव दीयते तदा न दीयतां
तदंशदानतो न चोभयत्र भ्रश्यताम् ॥ १२३ ॥

विलोक्यतामदानतो किमत्र वो भवेदिति
प्रदातुमस्ति सम्मतिस्समन्ततो यथोचिता ।
विलोकितं यदंशदानतो धनं तु वक्ष्यति
प्रणंक्ष्यतीह गेहगोधनादिकं किलेतरम् ॥ १२४ ॥

प्रदेशकार्यकारिणी कृषीवलान्विते क्रमेऽ-
त्र शोचतिस्म कालतः प्रयत्नतोऽवधानतः ।
विनिश्चिनोति च स्म यत्प्रशासनस्य योजना
व्यतीतकालतः कदापि शक्यते न वर्तितुम् ॥ १२५ ॥

अतो विमुक्तिराशिरप्यथान्यदेयराशयो
हिताय वै कृषीवलस्य लाघवे विवृण्वताम् ।
इति प्रणोदितं पुनः प्रशासनं विचारणे
प्रतीयते स्म यन्न कोऽपि भाविलाभसम्भवः ॥ १२६ ॥

यदिष्यते स्म चर्चितुं तदापतत्प्रवेगतः
प्रदेशकेन्द्रशासने हि कांगरेसदिश्यहो ।
कठोरवृत्तितां गते-महान्ति पत्रकाणि नो
लघीयसाऽन्तरेण नो मनस्तदीयमाश्रयन् ॥ १२७ ॥

बहुत्र चैतदुत्तरं स्थलाधिकारिभिः समं
स्वपत्रवर्तनं विधेयमित्यदीयतानिशम् ।
न केनचित्प्रकारकेण ते समुत्सहङ्गता
न कांगरेसगौरवं विवर्धतामितीच्छया ॥ १२८ ॥

पुरातनस्वभावतो हि गौरवस्य दृष्टितः
प्रवक्ति शासनं सदा तयैव तच्च शोचति ।
असह्यमस्य मुक्तिदापनेऽस्तु नो निदानता
यथाकथं यथामति प्रयत्यतेऽत्र तेन तत् ॥ १२९ ॥

विवृत्तयः समागताश्च दिल्लितस्तथान्यतो
यदानुशासनं किलाक्रमिष्यतीह नः सभाम् ।
यहूदिनां प्रसिद्धलोकवाक्यतः कनिष्ठिका
जवात्प्रवत्स्यंते शतं च वृश्चिको दशिष्यति ॥१३०॥

इह प्रतीपमाचरत्यनीतिवत् कया कया
दिशाऽऽक्रमिष्यतीह कांगरेसके कथं च तत् ।
इति श्रुतं च तन्नवम्बरेऽनसारितो मया
च वल्लभेन तेन तत्र कांगरेसमौलिना ॥ १३१ ॥

अनेन पूर्वलब्धसर्वसूचनाः प्रमाणिता-
श्च सीमप्रान्तयुक्तप्रान्तयोः कृते विशेषतः ।
निदेशनाश्च काश्चन प्रवर्तिताः स्युरित्यपि
प्रपन्नमास्त वंगकेन तर्हि तन्निदेशनम् ॥ १३२ ॥

विनिर्गतासु पञ्चषेषु सप्तवासरेष्वहो
निदेशनासु नूतनां परिस्थितिं तु सम्मुखे।
स्थितां प्रसूच्य चानसारिभाषितं तदा प्रमा
णिकासु संस्थितं किलानुमीयते मयास्म यत् ॥१३३॥

विवर्धनेन गोलपीठसंसदोऽतिसीमतो
निरुद्ध आस्त चाऽऽक्रमस्य कश्चन क्रियाक्रमः।
तदा हि गोलपीठसांसदा दिशे मृदा मृदु
निरर्थकं वचः सुखं किलालपन्त आसत ॥ १३४ ॥

यदीदमप्रियं न चेन्निनिरुध्य रक्षित भवेत्
तदा तु गोलपीठके स्फुटेन्मनःस्थकल्मषम्।
अतः परं तु वैमनस्यमाशु वृद्धिमाश्रितं
तथान्वभूयतेह घट्टनानि यान्ति वेगतः ॥ १३५ ॥

लघूंल्लघूञ्जनानुपेक्ष्य नः स्वयं प्रयान्ति ता
न भावि कोऽपि रोत्स्यतीह रोद्धुमस्ति कः क्षमः।
वयं तु सम्मुखीनतां निवोढुमत्र जीवनी-
यनाटके स्वभागमेव साधु दर्शयामहे ॥ १३६ ॥

अमुष्य दुःखमन्ततोऽस्तु किन्तु पात्रसंग्रहे
वयं स्थिता इति प्रयत्नमात्मनश्चरामहे।
परस्परं विरुद्धशक्तयोऽवतीर्य सङ्गरं
प्रकुर्वतां पुरः स गान्धिरागतो भवेत्सदा ॥ १३७ ॥

इति स्म विश्वसन्ति सर्व एव सोऽभ्युपेक्ष्य तं
सुसन्धियुद्धयोर्भरं स्वयं करे ग्रहीष्यति।
तमन्तरा न कोऽपि नः समुद्यतोऽभवद्भरं
सुदुर्धरं तु धर्तुमेनमित्यभूम नोद्यताः ॥ १३८ ॥

प्रदेशसर्वकार एकमन्यदप्यदोऽकरोत्
यतस्तु ग्राममण्डले स्थितिश्चलाचलाऽभवत्।
कृषीबलेषु मुक्तिपत्रकाणि यद्वितीरिता-
न्यमीषु मासमध्यतो विमुक्तिराशिरैष्यत ॥ १३९ ॥

न चेद्विमुक्तिरेषिका निरस्यते तदाखिला
करादिराशिराहिती भविष्यतीत्यलिख्यत।
तदर्थ एक एव यद् हृताधिकारता भवेत्
करादिराशिलब्धये धरादि कुर्कितं भवेत् ॥ १४० ॥

इहान्यवर्षकेष्वसौ करादिराशिरर्प्यते
स्म द्वित्रमासमध्यतोंऽशतोंऽशतः कृषीबलैः।
परं न सोऽधुनावधिः प्रदीयते स्म निष्ठुरैः
कृषीबलेषु नूतनं तदान्यपाति सङ्कटम् ॥ १४१ ॥

कृषीबलाश्च पत्रकाणि तानि दर्शयन्ति नो
विरुन्धति स्म दोषघोषणाञ्च कुर्वतेऽसताम्।
सुसम्मतिं च याचितुं भ्रमन्त्यहो इतस्ततः
प्रशासनाधिकारिणामभूद्धि जाड्यचेष्टितम्।१४२।

कृते प्रयत्नकेऽवदन् न वस्तुतस्तथैव नः
प्रतिक्रियां विधातुमास्त कापि भावना हृदि।
अनेन शान्तिपूर्णसन्धिवेलया न संस्थितं
किलानिवार्यसंगरः क्रमात्क्रमादुपस्थितः ॥ १४३ ॥

अथाधुना कृषीबलैश्च कांगरेसकर्मिभि-
र्विनिर्णयोऽत्र सत्वरं विधेय आस्त निश्चितः।
न गान्धिभारतागमावधिस्थनिर्णयं वयं
निरोद्धुमप्यलं बभूविमाधुना चिराय च ॥ १४४ ॥

किमत्र कुर्महेऽधुनाऽत्र सम्मतिर्भवेच्च का ?
वयञ्च विद्म एव यत्कृषीबलाः सुदुर्बलाः।
तनीयसा त्वनेहसामुना न शक्नुवन्त्यमी
करादिराशिमीदृशं कथञ्चनापि चार्पितुम्।१४५।

ददाम सम्मतिं नु कां प्रदीयतामिहेदृशी
कुतः प्रदीयताञ्च तैर्नवा कुतः पुरातनी।
नवं प्रदत्तमप्यहो पुरातने प्रवेक्ष्यते
तदा हृताधिकारता न किं शिरस्सु सम्पतेत् ॥ १४६ ॥

प्रयागकांगरेसके कृषीबलैकसेनया
सुशक्तितोऽत्र योद्धुमुद्यमः कृतो बलान्वितः ।
विनिर्णयः कृतः कृषीबलेषु दानसम्मति-
र्न युज्यते, न युज्यते प्रदेशकेन्द्रयोर्विना ॥ १४७ ॥

अतः स कार्यसंसदः पुरः समर्पितोऽभवत्
प्रदेशमण्डलद्विपक्षतस्तसद्दुकस्तदा ।
स टण्डनश्च शासनप्रबोधनाय संस्थितो
प्रयागमण्डलस्य नैष प्रश्न आस्त सर्वगः ॥ १४८ ॥

स आर्थिको विशुद्ध आस्त राजनैतिकस्तरे
समागतस्ततो विभुत्वमाप्तवान् स साम्प्रतम् ।
प्रयागमण्डलीयकांगरेसकं नु दिश्यताम्
न साधुभिः पणैस्तु सन्धि रिष्यतेऽत्रयावता ॥१४९॥

तदादिशेत्कृषीबलान्न तावता प्रदीयताम्
करादिराशिरित्यसौ लघुः किलास्त निर्णयः ।
वयं च तस्य सीमनि स्थिताः स्वकर्म कुर्महे
परं किमेतदत्र कर्तुमप्यलं भवाम हे ॥ १५० ॥

प्रशासनाद्विरुद्धयुद्धचालनादुदास्यते ।
स्म गान्धिभारतागमात्पुरा च कार्यसंसदा
प्रयत्यते स्म मुख्यतः किलार्थिकेऽत्र कर्मणि
त्वरां विधाय सा न वर्ग्यया समस्ययालगेत् ॥१५१॥

इयं न कार्यसंसदग्रगास्ति राजनैतिके
समाजगे न चापि सार्थिकेऽध्वनीह चाग्रगा ।
न रोचते स्म तद्धृदे कृषीबलैर्महीभृता-
मयं स्वभावदुष्करो विरोध आनुषङ्गिकः ॥ १५२ ॥

अहं समाजवामपक्षगो न योग्यतां दधे
समाजगे तथार्थिके पदे स्वसम्मतौ रणे ।
स चाहमन्वभूवमत्र वेत्तु कार्यकारिणी
यदुत्तरप्रदेशजा परिस्थितिस्तु कीदृशी ॥ १५३ ॥

सभासदोऽतिनम्रपक्षधारिणोऽपि नेच्छया
प्रवृत्तवृत्तवैवशान्नियोद्धुमुद्यता इमे।
अतो मयात्र संसदोऽधिवेशने प्रदेशत-
स्तसद्दुकस्य चेतरस्य चागमोऽतिरोचितः ॥१५४॥

न शेरवानिरेष नः सभापतिः किलोग्रतां
स्पृशत्यहो सदैव नम्रपक्षगः स्वभावतः।
अमुष्य वत्सरस्य चाप्युपक्रमे विचारतः
कृषीबलेषु कांगरेसनीतितः प्रतीपगः॥ १५५॥

परं सभापतिर्भवन् स वोढवान् सदोभरं
स बोधति स्म नापराऽस्ति कापि नः कृते गतिः।
प्रदेशकांगरेसकं च यद्यदक्रमत्पदं
तदस्य गाढयोगतो हि माध्यमात्सभापतेः॥ १५६॥

तदीयवाक्प्रयुक्तिभिः प्रभावितोऽभवद्भृशं
सभासदां गणः स कांगरेसकार्यसंसदः।
मम प्रभावतोऽपि सोऽधिकं प्रभावमार्जयत्
स संकुचन्नपि स्वयं न सक्षमो ह्युपेक्षणे॥ १५७॥

स उत्तरप्रदेशगामिकार्यसंसदेऽददात्
किलाधिकारमत्र कुत्रचित्स्थलेऽपि सार्हति।
करादिदानरोधनं निदेशितुं-सहैव च
प्रदेशगान् जनानसौ यथाबलं ततोऽरुधत्॥ १५८॥

प्रदेशसर्वकारतश्च सौमनस्यकारिणं
क्रियाक्रमं प्रवर्तितुं च सोऽदिशत्स्वसंसदम्।
क्रियाक्रमः स चालितोऽपि कालमत्र कंचन
श्लथीकृतोऽथ तस्य तत्र निष्फलत्वदर्शनात्॥१५९॥

प्रयागमण्डले विमुक्तिराशिरास्त वर्धितो
मनागितीह मन्महे परिस्थितौ समानताम्।
अवाप्य सौमनस्यमुद्भवेद्विरोधितां च ताम्
निरस्य तत् प्रशासनस्य तैर्मतं श्लथीकृतम॥१६०॥

परिस्थितेर्भृशं ह्यभूच्च साम्यमत्र शासनं
तथा च कांगरेसकं स्म पश्यति प्रभावुकम् ।
मिथो नियुद्धमास्त नैव सौमनस्यवार्तया-
पि साध्यमत्र निश्चितं यथार्थमेकमुत्तमम् ॥ १६१ ॥

उभावपि क्रमं च यं यमप्युपासितुं क्षमौ
प्रतीयते स्म स स्वसाध्यसिद्धये स्फुटः क्रमः ।
परिस्थितेः परिष्क्रियार्थमेव तत्तदादृतम्
प्रशासनस्य गुप्तयत्नसाधनं न लक्ष्यते ॥ १६२ ॥

परन्तु नस्तु शक्तिरास्त लोकनैतिकं बलम्
तदुद्यमश्च गुप्तकार्यवाहिभिर्न साध्यते ।
मया मदीयसङ्गिभिश्च कैश्चिदेतदीरितं
स्वभाषणेषु यत्स्वतन्त्रतारणो न शङ्कितः ॥ १६३ ॥

सुसन्निधायिनीह वै भविष्यति प्रवेशनं
परीक्षणेषु संकटेषु चापि नो बहून्मुखम् ।
वयं जनानबोधयाम ते भवन्तु सोद्यमाः
अतो वयं रणेरणा इतीह चर्चिता जनैः ॥ १६४ ॥

यथार्थतोत्र मध्यवर्गिकेषु कांगरेसिके-
ष्वकामना प्रतीयते स्म तत्स्थितिं प्रतीरितुम् ।
विनिर्गते भवेच्च युद्धमित्यमी स्म मन्वते
प्रवास एष लन्दने च गान्धिना वितर्क्यते ॥ १६५ ॥

अधीतिशालिनां क्रियाविहीनतास्थितावपि
प्रवृत्तश्रृङ्खलाः किलाचलन्निहाग्रतोऽग्रतः ।
इहोत्तरप्रदेशकेऽथ सीमप्रान्तके तथा-
त्र बंगदेशके जना विदुश्च कष्टमागतम् ॥ १६६ ॥

इहोत्तरप्रदेशकार्यकारिणी भयादतो
घटेयुरत्र घट्टनाश्च किंविधा अकारणाः ।
ऋणस्य वा उपक्रमाय ते प्रबन्धमाचरन्
प्रयागसंसदा कृतं कृषीबलानुशंसनम ॥ १६७ ॥

नचेत्प्रशासनासु सन्धये पणानुबन्धका
मिलन्ति बन्धुरास्तदा कृषीबलाः करादिकम् ।
न दातुमेव नोदनीयतां वहन्तु-तादृशं
प्रबन्धमाश्रयन्तु हन्त तत्र भागसंस्थिकाः ॥ १६८ ॥

अनेन निर्णयेन च प्रदेशशासनं रुषा
न सौमनस्यसिद्धये ऽदधाद् विचारणक्षणम् ।
अमुष्य वर्णनेन तेन च प्रदेशसंसदा
प्रभूय भाविविप्लवस्य चिह्नवत्स सम्मतः ॥१६९॥

द्रुतं द्रुतं च सम्मुखीनतोद्यमः समादृतः
प्रयागजे कृषीवलानुमेलने पुरोदितम् ।
इहोदितश्च तेजसा युतश्च कोऽपि निर्णयः
कृषीवला इहोदिताः करादिकं च रोधितुम् ॥१७०॥

न यावदत्र सौमनस्यकेऽनुबन्धसुष्ठुता
तदापि चान्ततोऽस्ति नो रणस्य नैष च क्षणः ।
करादिकं न दीयतामपि त्वयं यथोचितं
करादिकं प्रदीयतामितीह सर्वनिर्णयः ॥ १७१ ॥

यथोचिता वृथारणाय वार्तया विनिश्चयं
विधातुमर्थना कृता निरन्तरं च नैकशः ।
प्रयागजः स निर्णयो महीपतौ कृषीवले
तथेतरेष्वपि प्रवर्तते स्म तुल्ययोगतः ॥ १७२ ॥

नवाम्बरावसानके दिसम्बराद्युपक्रमे
किलोत्तरप्रदेशकस्थितिः किलेयमास्त यत् ।
इहान्तरैव बंगके तथा च सीमप्रान्तके
गताः परावधि प्रशासनप्रहारघट्टनाः ॥ १७३ ॥

नवा भयङ्करी च बंगके निदेशना विभुः
प्रवर्तिता, भवन्त्यमी नियुद्धलक्षणोदयाः ।
समुत्थितश्च प्रश्न आस्त गान्धिभारतागमे ।
प्रशासनप्रहारतः पुराथ किं परत्वतः ॥ १७४ ॥

किमेत्य सोऽनुपश्यति स्वसङ्गिनो नु बन्दिनः
नियुद्धमत्र चास्त्युपक्रमं गतो विवश्यतः।
वयं त्वविद्म सोऽचलत्किलाङ्ग्लदेशतोऽस्य चा
पि मासकस्य चान्ततः स मुम्बईं समेष्यति ॥१७५॥

वयं समेऽपि मुख्यकार्यशालिकाप्रदेशयोः
स्वकार्यतत्परास्तदागमाद्रणं जहीमहे।
नियुद्धदृष्टितोऽपि तत्समागमो निदेशनं
च सम्मतिश्च सर्वमास्त नः परं प्रतीक्षितम् ॥१७६॥

अमुत्र धावने वयं विवश्यतां परां गताः
रणस्य रोधने चिरादुपक्रमे च न स्वतः।
इदं द्वयं तु सर्वकारहस्तगं किलाभवत्
कृतोऽभवच्च तेन तत्कृते महान् समुद्यमः ॥ १७७ ॥

विद्वद्वर्यचरित्रकाव्यदशकं येनोपक्लृप्तं पुरा
नेतृणां चरितान्यथात्र लिखितुं चोपक्रमः सत्कृतः।
तेनैवात्र कृतेऽद्य नेहरुमहाकाव्ये किलैकोनित-
श्चत्वारिंशकसर्ग एष विगतोऽशान्ति वदन्कर्षिणाम् ॥

सन्धेरवसानम्

स्रग्धरा

चत्वारिंशः सर्गः

युक्तप्रान्ते विविधरचनाव्यस्तचित्तोऽप्यवाञ्छं
सीमाप्रान्तं विदितसुबहूत्पातमेतुं च वङ्गान् ।
गत्वा तत्राहमिह कलये संस्थितिं चात्र मित्रा-
ण्यालोकिष्ये चिरविरहितानीति चित्ते ममासीत् ॥ १ ॥

सर्वस्माच्चाधिकमहदिह प्रेक्षितुं राष्ट्रभक्ते-
रुग्राः सौम्या अपि सपदि ता भावनाः साहसं च ।
आत्मोत्सर्गानिह च विहितान् शूरवीरैरनेकान्
दृष्ट्वा मानं प्रकटयितुमेतान् प्रति प्रीत्सुकोऽस्मि ॥२॥

सीमाप्रान्ते क्वचन समये नास्म गन्तुं समर्थो
नो रोचेतेह नु मम गतिः सर्वकाराय किञ्चिद् ।
नेच्छत्येष प्रमुखपुरुषः कोऽपि तत्रोपगच्छेत्
तत्राबाधां जनयितुमतो नाग्रहेणोपयामः ॥ ३ ॥

वंगेष्वेषा स्थितिरनुपलं विक्रियां याति काञ्चित्
तं प्रत्यासीन्मम मनसि चाकर्षणं भूरि भूयः ।
किन्त्वत्रापि प्रगमनविधौ संकुचत्यन्तरं मे
तत्रात्मानं त्वकलयमहं सर्वथैवासहायम् ॥ ४ ॥

लाभं चापि प्रथयितुमहं तस्य शक्तो भवेयं
तस्मिन्प्रान्ते द्विदलकलहात्कांगरेसा अविभ्यत् ।
दूरे दूरे कृतवसतयो नान्तिकं यान्ति तस्य
प्रायः कस्मिन्नपि खलु दले गण्यते पार्श्ववर्ती ॥ ५ ॥

सेयं नीतिः प्रबलसबला कुक्कुटोष्ट्राश्रयासीत्
वंगप्रश्नः क्वचिदपि तया नो समाधीयते स्म ।
श्रीगान्धेर्लन्दनगमनतोऽनन्तरं घट्टने द्वे
जाते बंगेऽखिलभरतभूमानसं यत्र लग्नम् ॥ ६ ॥

याभ्यां ख्यातं हिजलिनगरं तच्चटग्राम एष
दृग्बद्धेभ्यो हिजलिनगरे कल्पितो बन्दिगेहः।
तस्मिन् जातेऽधिकृतगणकैर्वन्दिनां संप्रहारे
गोलीघातान्मरणमगमत्कोऽपि दृग्बद्ध एकः ॥ ७ ॥

इत्येतस्यां विचितिरभवच्छासनोद्घोषणायां
ते निर्दोषा इति परिहृतास्तत्र गोलीप्रहाराः।
किन्त्वेतस्यां कतिचन विचित्रा अभूवंश्च वार्ता-
स्तथ्यानीमानि च कतिपयान्यत्र साक्षात्कृतानि ॥ ८ ॥

एतान्यासन् पुनरिह प्रतीपानि तद्घोषणात-
स्तस्माद् भूयो दशदिगयना आर्थिथंस्तत्परीक्षाम्।
हिन्दुस्थानस्य च न सहजं रीतिमाश्रित्य नव्यां
उच्चादुच्चानधिकृतिजुषो योजयित्वा विधिज्ञान् ॥ ९ ॥

वंगे शिष्ट्या विचितिसमितिर्नूतनाऽऽवेशिताभूत्
सेयं शुद्धाऽभवदिह च साक्ष्याणि साऽऽगृह्य सर्वम्।
सम्यग्ज्ञात्वा व्यमृशदतनोद् बन्दिगेहाधिकारि-
वर्गे दोषं सकलमभिषन् प्राददुस्तां विवृत्तिम् ॥ १० ॥

निष्कर्षोऽयं यदधिकृतयः सन्ति मुख्यापराधा
गोलीकाण्डं त्वनुचितमभूत्सर्वथाऽकालिकञ्च।
इत्थं शिष्ट्या प्रकटितमभूत्सर्वथैवायथार्थम्
मान्या चासीद्धिजलिघटना नातिसाधारणीयम् ॥ ११ ॥

दौर्भाग्येनेदृशघटनया भूयते भारतेऽस्मिन्
कारागारे भवति कलहः शस्त्रिणस्तत्प्रधानाः।
निःशस्त्रेषु प्रहरणविधौ वन्दिषु प्रौढतां स्वां
प्रोज्यजंस्ते सपदि दमनं कर्तुमित्यस्ति सत्यम् ॥ १२ ॥

वार्तापत्रेष्विदमिह बहु श्रूयते पठ्यते च
तस्मादस्यां किमपि न बलं चाभवद् घट्टनायाम्।
अत्रत्यायामिदमिह फलं शासनोद्घोषणायाम्
पक्षेपातोऽनृतवचनता च द्वयं सिद्धमेतत् ॥ १३ ॥

सिद्धं चैतद् द्वयमपि पुनः शासनस्यैव शोधाद्
विश्वासो नाधिकतरतया पूर्वमेवेदृशीनाम् ।
अद्य त्वासां जगति सकलेऽभूद् घटस्फोट एव
तिष्ठेन्नैवानृतमिह चिरं गुप्तमास्तेति सत्यम् ॥ १४ ॥

काण्डादस्माद्धिजलिनगरे बन्दिगेहे प्रजातात्
पश्चाद्देशे क्वचन चलति स्मात्र गोली कदाचित् ॥ १५ ॥
अन्यादृक्षः क्वचन भवति स्मैव शक्तिप्रयोगः
एतद्वृत्तं भरतभुवि नो भूरिसंख्यां प्रयातम् ॥ १५ ॥

इत्याश्चर्यं यदिह कलहे बन्दिदेहेषु घाता
जायन्ते स्म प्रतिघटनमुद्घोष्यते बन्दिदोषः ।
कारागाराधिकृतपुरुषाः सर्वथा दोषमुक्ता
उद्घोष्यन्ते, क्वचिदपि न ते दण्डितास्तद्विभागैः ॥ १६ ॥

सम्यक् शोधे विहितमखिलं प्रार्थनं न श्रुतं स्या-
न्नस्वीकार्यं भवति तदलं यद्विभागेन क्लृप्तम् ।
स्पष्टं शिक्षा हिजलिनगराच्छासनेनास्त लब्धा
सम्यक् शोधे भवति हि भयं बन्दिगेहप्रभूणाम् ॥ १७ ॥

लोकैर्ज्ञातं हिजलिघटनाद् शासनोद्घोषणायां
यद्यत्तेषां भवति मनसाभीष्टमभ्युद्यते तत् ।
यद्यज्जातं तदिह न कदाचित्प्रकाश्यत्वमेति
प्रत्यक्षः स्यादधिकृतिजुषां नाम तत्रापराधः ॥ १८ ॥

अस्माद् घोरं तदभवदिदं यच्चटग्रामजातं
गोल्या व्याहन्नधिकृतिजुषं कश्चिदातङ्ककारी ।
तत्पश्चाच्चावहत कलहो हिन्दुमुस्लिम् जनेषु
यद्वा नाम प्रकथितमभूदस्य सन्दीपकैस्तत् ॥ १९ ॥

आसीत्स्पष्टं स्थितिरियमभूज्ज्यायसी चैष भूयान्
संघर्षोऽभूत्पुनरयमभूत्सम्प्रदायी न हन्ता ।
आघातोऽयं न खलु समभूद्धिन्दुमुस्लिमधिया वा
स त्वाघातः पुरुषपदभाज्येव तस्योग्रकस्य ॥ २० ॥

स्पष्टञ्चैतत्तदपि कलहो हिन्दुमुस्लिमजनेषु
प्रारम्भोऽस्याभवदिह कथं कारणेनाथ केन ?
नैतत्स्पष्टं कथितमभवद् व्यक्तिमुख्यैः सभारै-
रध्यारोपा विकटविकटा रोपिता अन्यवर्गे ॥ २१ ॥

आसीदस्मिन् विगतकलहेऽयं विशेषः पुनर्यत्
जात्योरन्यैर्नियतसमुदायैस्तु भाराङ्गलीयैः।
तेष्वप्येतै रयलमनुजैश्चेतरैः शिष्टिभृत्यै-
र्भागो जुष्टः प्रतिकृतिधियाऽभूत्कयाचिन्महत्या ॥ २२ ॥

तैर्वङ्गीयैः प्रथितपुरुषैः सेनगुप्तादिभिश्च
सङ्घर्षेऽस्मिन्किल कतिपयेऽन्येऽपि रोपाः कृतास्ते।
शोधं कर्तुं, त्वरितमभियोगं पुनर्मानदाने-
श्चैवाह्वानं कृतमिह कृतं नैव शिष्ट्या तु किञ्चित् ॥२३ ॥

आभ्यां ध्यानं मनसि घटनाभ्यां चटग्रामजाभ्यां-
मायातं वै दिशि भयकरीणां तु सम्भावनानाम्।
निन्दा क्लृप्ता बहुविधदृशाऽऽतङ्कवादस्य लोकैः
नूत्ना क्रान्तेः सरणिरपि तं वक्ति दोषप्रपूर्णम् ॥ २४ ॥

किन्त्वेतस्यान्यदपि च फलं सम्भवेदित्यभान्मे
भीतिश्चास्मादुदयदभवत्सम्प्रदायेषु हिंसा।
हिंसाकाण्डान्यथ मम न तान्यत्र रोचन्त एता-
न्येभ्यो बिभ्यत्पुनरिह हृदा भीरुहिन्दुर्न चास्मि ॥ २५ ॥

जानाम्येतद् भरतभुवि ते सन्ति भूयांस एवा-
द्याप्येतस्यां जनयितुमिहैते यतन्ते प्रभेदम्।
हिंसाकाण्डैरिह कतिपयैरीदृशैस्तेषु दीप्ते-
ष्वेकं राष्ट्रं मिलितसकलं दुष्करं स्याद्विधातुम् ॥ २६ ॥

स्वर्गं गन्तुं पशुबलिमदुः सम्प्रदायस्य नाम्ना
ये वै तेषामिह भयकरी शिक्षिता स्यात्तु हिंसा।
दुष्टो नूनं रुधिरपतनं राजनीति प्रयुक्तं
शक्यस्तस्यां भवति तु जनः शिक्षितुं साधुमार्गम् ॥ २७ ॥

लक्ष्यं तस्यैहिकमथ निजं नास्ति तद्राष्ट्रियं च
धर्मे हिंसा त्वतिभयकरी पारलौकिक्यसौ चेत् ।
नास्मिंल्लोके फलति खलु सा सद्‌गतिं तत्र दत्ते,
नैषा बुद्धिः कथमपि भवेद् युक्तिभिर्वै निरस्ता ।। २८ ।।

कादाचित्कस्तदुभयगतस्त्वन्तरस्यावसानं
हत्यानीत्याप्युपनयति साप्यधंधर्मस्वरूपम् ।
आतङ्काङ्के हतवति पदाधारिणं तत्फलेन
प्रत्येकस्यानुभवनमभूद् भीषणत्वस्य तस्य ।। २९ ।।

हिन्दुस्थानैक्यसखनिजवशत्वस्य तेनातिहानिः
सम्भाव्यैवेत्ययमनुभवोऽप्यत्र जातो जनानाम् ।
तत्पश्चाच्च प्रतिकृतिधिया घट्टिता घट्टना या-
स्ताभिर्ज्ञातं भरतभुवि सोत्पन्न एवोग्रवादः ।। ३० ।।

तामारभ्य प्रतिकृतिधिया वङ्गदेशे विशेषा-
त्संजातास्तादृशघटनकाः सन्ति बह्व्यः प्रसिद्धाः ।
वृत्तिश्चोग्रा प्रसरति पुरा भारताङ्ग्लेषु सेयं
हिन्दुस्थाने ब्रिटिशवशगेष्वस्ति चेयं प्रसृप्ता ।। ३२ ।।

चित्रं त्वेतत्स्वयमिह किलातङ्कारिष्वनेके
ऽप्येतां दृष्टिं दधति परमेषा दिशा काचिदन्या ।
तेषां राष्ट्रानुगतगतिकः सोग्रवादः किलास्ते
सामान्येनानुगतगतिकादुग्रवादाद् विपक्षः ।। ३२ ।।

एकत्रिंशे कतिपयदिनान्यस्मि नावम्बरीया-
ण्यागां कार्यक्रमनियमनात्कालिकातां स्वतन्त्रः ।
व्यक्तीः संघानपि मिलितवान् भाषणान्यप्यदाञ्च
तस्यां तस्यां सकलसदसायोजितायां सभायाम् ।। ३३ ।।

सर्वत्राहं स्फुटमकथयं तत्र चातङ्कवादे
स्वातन्त्र्यार्थे तमहितकरं व्यर्थमेकं प्रमादम् ।
नाहं तत्रापिशुनयमथो स्वीकृतातङ्कवादान्
नैवाप्येतानितरजनवत्कातरानप्यजल्पम् ।। ३४ ।।

व्यक्तं यैस्तैः कृतमिह कदाचिन्न वै साहसिक्यं
तेषामेषा परमजडता प्रत्यभात्सर्वदैव ।
यौ स्त्रीपुंसौ निजकरतले प्राणमादाय कार्ये
लग्नौ तावप्यहह वदतस्तानहो कातरेति ॥ ३५ ॥

अस्याश्चोक्तेः प्रतिफलमिदं जायते तत्र यत्ते
भीरूनेतान्निजपिशुनकान् दूरतो भाषमाणान् ।
कार्य्यं किञ्चिन्न च विदधतो नादरादीक्षयन्ते
तेनान्योन्यं प्रति किल घृणाद्वेषयोरुद्गमः स्यात् ॥ ३६ ॥

मामभ्येतं युवकयुगलं कालिकातास्थवाष्प-
यानस्थाने स्वयमुपगतं सायमीषद्वयस्कम् ।
विंशत्यब्दं शिथिलवदनं सञ्जितत्रस्तभावं
नेत्रज्योतिर्मदिदमिह किं कर्तुमायातमासीत् ॥ ३७ ॥

इत्येतच्चानुमितमभवत्तौ ममातङ्कवाद-
प्रातीप्योक्तात्प्रवचनचयाद्रोषणौ मय्यभूताम् ।
ताभ्यामुक्तं तव प्रवचनाद्विप्रतीपः प्रभावो
यूनां यूथेऽपतदिति न नौ रोचते मध्यपातः ॥ ३८ ॥

वादोऽस्मासु क्षणमुदयत क्षिप्रतायां तु कश्चित्
प्रस्थानस्याभवदिह मनाक्संनिकृष्टो हि कालः ।
तस्मिन्वादे खरप्रखरता भावनासोष्मता च
प्रादुर्भूता कतिचन मया प्रोदितास्तीव्रवार्ताः ॥ ३९ ॥

तौ त्यक्त्वाहं स्थलसवनकात् त्वारुहं कर्णमानो
भूयोऽप्येवं कृतवति भवत्याचरिष्याम एते ।
नूनं तत्तद्यदितरजनैष्वाहितं त्वादृशेषु
इत्येतान्तौ दृढपरिकरौ प्रोक्तवन्तौ प्रवाचम् ॥ ४० ॥

यद्यप्यस्मात्प्रचलितमभूद्वाष्पयानेन साकं
मध्येमार्गं निशि निजपदे वै शयानेन चित्रम् ।
मन्मस्तिष्के भ्रमदिव तयोः किञ्चिदुत्तेजितोक्तं
भूयो दृष्टं सपदि च मया मानसेनानुभूतम् ॥ ४१ ॥

अस्त्येवास्मिन्युवकयुगले जीवनं चापि तेजो
न्याय्ये मार्गे यदि तु चलतात्तत्कियच्छोभनं स्यात् ।
खेदो मेऽभूद्यहमनयोरग्रतः शीघ्रतायां
किञ्चिद्भूद्रव्यहृतिपरं प्राब्रुवं नाद्रियाणः ॥ ४२ ॥

हन्तैताभ्यां सह चिरमहं जल्पितुं चेदवाप्स्यं
तावानेष्यं ध्रुवमुपदिशं राष्ट्रसेवाविधात्रीम् ।
स्वातन्त्र्याप्तेरदिशमनयोः साहसत्यागभावौ
नित्यापेक्षाविह च भविके जीवनेऽयोजयिष्यम् ॥ ४३ ॥

तस्मात् पश्चादपि च बहुधा तौ मया स्मर्यमाणौ
नाम्ना धाम्नापि नहि विदितौ दुर्लभावेव जातौ ।
भूयो भूयः स्मरति मम तौ जीवमानौ मृतौ वा
अण्डद्वीपे क्वचन यमितौ वन्दिगेहे स्थितौ वा ॥ ४४ ॥

मासे दैसम्बर इह कृषीकारसम्मेलनं तद्
द्वैतीयीकं समभवदिदं वै प्रयागे पुनर्नः ।
भूयश्चाहं स्ववचनवशादाशु, कर्णानिकेऽगाम्
एन् एस् हार्डीकरविनयतो राष्ट्सेवादलीयात् ॥ ४५ ॥

राष्ट्रीयान्दोलनमनुगतं चास्त सेवादलं तत्
कांग्रेसाद्वै तदिरमभूत्तत्सहायः स्वतन्त्रम् ।
एकत्रिंशे कृषकमिलनेऽस्मिन् स्वयंसेवकीयः
सङ्घायोऽभूदिह सुविदितं काङ्ग्रेसाङ्गमेकम् ॥ ४६ ॥

मुख्यं स्थानं हुबलिनगरे तस्य कर्णानिकेऽभूत्
तस्मिन् हार्डीकरसुहृदसावाह्वयन्मां क्रियासु ।
सोऽनैषीन्मामटितुमपि चास्मिन् प्रदेशे विलोक्य
लोकोत्साहं प्रबलितमहं विस्मितः स्तब्ध आसम् ॥४७॥

प्रत्यावृत्तावहमुपगतस्तत्र शोलापुरञ्च
यन्नामाभूज्जगति विदितं सैन्यकानूनकाले ।
तेनानेनाटनपरिकरेणात्र कर्णाटके मे
प्रत्युद्यातादरणसदृशं रूपमाधायि भव्यम् ॥ ४८ ॥

मद्व्याख्यानान्यपि परिणतान्यत्र प्रस्थानगीता
नीत्येष्वासीत्समरगरिमा नैव संगीतयोगः ।
युक्तप्रान्तादधिगतमहो वृत्तमासीद्यथार्थं
तत्राथातं परुषपरुषं शासनं तद्ध्यंकार्षीत् ॥ ४९ ॥

मुम्बापुर्यां सह कमलयाभ्यागतोऽभूवमस्मिन्
प्रस्थाने, सा पुनरपि रुजा बाधिताभून्मयास्याः ।
मुम्बापुर्यामिह सुविहिताऽभूच्चिकित्साव्यवस्था
तत्रैवेदं श्रुतिगतमभूच्छासनस्योग्रवृत्तम् ॥ ५० ॥

युक्तप्रान्ते तदु निरचिनोन्नैव गान्धिप्रतीक्षा
कार्या, यद्यप्ययमुपगतो वारियानं श्रुतोऽभूत् ।
मुम्बापुर्यां झटिति स समायास्यतीत्यस्ति सिद्धम्
वाङ्मात्रेऽस्मत्कृषकनिचये दिष्टमासीदनेन ॥ ५१ ॥

किन्तु व्याप्तं तदभवदहो यत्र सर्वा प्रवृत्तिः
संरुद्धाऽभूदखिलजनिका राजनैतिक्यथापि ।
तस्मिन् बालागसि जनकयो रक्षकस्याथवाऽभू-
द्दण्डो दिष्टः प्रतिविनिमितः सर्वथेञ्जीलवाचा ॥ ५२ ॥

अस्तीञ्जीले पितृगणकृतस्यैनसो वंशजाते
तार्तीयीके तदनु पुरुषेऽप्यस्ति दण्डप्रयोगः ।
प्रत्यावृत्तं तदिह पुरुषे वंशजातेऽपराद्धे
दण्डो दिष्टः पितरि भविता तस्य संरक्षके वा ॥ ५३ ॥

प्रायोऽस्माभिस्तदनुदिवसेष्वेव तद्वृत्तमाप्तं
यद्रोमण्ये जनरल इटैलीयमेषोऽभ्यवोचत ।
तज्ज्ञात्वा विस्मयभरमगाम् क्वैष गान्धिः क्वचान्त-
र्वीक्षा तस्याः पथि प्रकथनं तत्स्वभावाद्विरुद्धम् ॥५४ ॥

भूयो ध्यानादथ प्रवचने केऽपि शब्दाश्च वाक्या-
न्यस्मिन् प्राप्तान्यपरिचित पूर्वाणि तत्खण्डनात्प्राक् ।
अस्माभिस्तत्सुविदितमभूद्यादृशी सास्ति तादृ-
श्यन्तर्वीक्षा न खलु भवति क्वापि गान्धेरमुष्य॥५५ ॥

तर्केऽस्माकं यदपि कथितं तेन तत्सर्वमेव
त्रोटित्वा वा विरचितमिदं मोटयित्वैधयित्वा ।
पश्चाद् गान्धेः प्रबलमथितं खण्डनं चापि वाक्यं
नान्तर्वीक्षामिह पुनरदामेष रोमण्यदेशे ॥ ५६ ॥

स्पष्टं चैतद्वयमिदमविद्मैव कस्यापि धौर्त्यम्
किन्त्वाश्चर्यं ब्रिटिशदलकैः खण्डनं तन्न मेने ।
नो विश्वस्तं त्विह जनक्रियाकारिभिः प्रत्युतास्मिन्
मिथ्यात्वेन प्रकटितमभूत्किञ्चिदस्यावमानम् ॥ ५७ ॥

तनाघातं वयमुपगताः प्राभवच्चैषु रोषो
रोद्धुं कर्णाटकसमटनं यातुमैच्छं प्रयागम् ।
स्वस्मिन् प्रान्ते निजसहचरैः साकमेव स्थितः स्यां
स्वीये गेहाङ्गण इह यदा जायते वृत्तमीदृक् ॥ ५८ ॥

क्लिष्टान्वीक्षा भवति मम सा दूरवासः सुहृद्भ्यः
कार्यं कर्णाटकनियमितं पूरणीयं तु मन्ये ।
मुम्बापुर्यां पुनरुपगतो मित्रवृन्दानुरोधात्
गान्धिप्रत्यागमनमवधाय स्थितस्तावदत्र ॥ ५९ ॥

सप्ताहेनागमनमभवत्तस्य निर्णीतमत्र
स्थातुं तावन्मम समभवन्नैव यस्मात्प्रयागात् ।
प्राप्तं वृत्तं यदिह यमिताष्टण्डनाद्याः सखायः
प्रान्तीयं तैर्मिलनमिह चाऽऽयोजितं सप्तरात्रे ॥ ६० ॥

तन्निर्णीतं प्रथममिह तद् यातुमेव प्रयागं
वन्दीभावं यदि न गमितस्तर्ह्यहं सप्तरात्रात् ।
मार्गे वा तन्मिलनपरतो मुम्बयीमेष यायां
श्रीमद्गान्धिं मिलितुमथ मे रुग्णपत्नीं च द्रष्टुम् ॥ ६१ ॥

नूत्नादेशान् ध्रुवम कलयं तं निदेशं प्रयाग-
प्राप्तेः प्राग् वै रयलसदनेऽस्मिन् छिटंकीति नाम्नि ।
तस्यैवान्यां प्रतिमपि मुहुर्दातुमासीत्प्रयत्नो
मद्गेहेऽपि प्रयतनमिदं कर्तुमन्यः प्रयुक्तः ॥ ६२ ॥

आसीत्स्पष्टं न हि ब्रिटिशिनां शिष्टिरैच्छत्समेतं
तेनादेशेन च नगरपाल्यामहं दत्तदृष्टिः ।
नो गन्तव्यं क्वचन भवता सार्वजन्ये सभादौ
नैवाभाष्यं सदसि लिखितव्यो न लेखोऽथ पत्रे ॥ ६३ ॥

ईदृश्यन्या मयि खलु परे शेरवान्यादिमिश्रे-
ष्वासंल्लग्नास्तदलिखमिदं नास्ति युष्मास्वधीनम् ।
कार्याकार्यं स्वयमहमिहाऽऽचिन्त्य चैवाचरिष्ये
गान्धिं द्रष्टुं समितिमपि यास्याम्यहं मुम्बयीञ्च ॥६४॥

अभ्यायाता पुनरिह पुरो नूतनेयं समस्या
भावीटावापरिषदधिवेशोऽत्र वै सप्तरात्रे ।
तत्स्तम्भार्थं त्वहमुपगतो मुम्बयीतः प्रयागं
यस्माद्गान्ध्यागमनसमये सानभीष्टा समेषाम् ॥६५॥

संघर्षेऽपि ब्रिटिशप्रभुणोपेक्षणीयेयमासीत्-
किन्तु प्रश्नः परिषदि तदा प्रस्थितः शेरवानी ।
किन्त्वस्माकं परिषदि कृषीकर्मिणामस्ति चर्चा ?
सा चेदस्यामियमपि तदा स्तम्भनीयास्ति शिष्ट्या ॥६६॥

मुख्यं कार्यं खलु परिषदः कर्षकाणां समस्या
यस्याः प्रान्ते भवति सकलेऽप्यत्र चर्चा च चिन्ता ।
सायोज्येताप्यथ न कृषकास्तत्र ते चर्चिताः स्युः
कीदृङ् मौढ्यं तदिह भविता कीदृशः स्यात्प्रहासः॥६७॥

यच्चापि स्यादधिकृतिरियं नः प्रधानस्य नासीत्
तेन स्तब्धा भवतु परिषत् कारणाद्वै कुतश्चित् ।
शिष्टेः पत्रात्प्रथममपि नो रोधितुं तां विचारः
पत्रादस्मात्परमिह दशा काचिदन्योत्थिताभूत् ॥ ६८ ॥

अस्मास्वेके प्रकृतविषये साग्रहा एव नित्यं
तत्रादेशः किल स मनसे रोचते नास्य किंचित् ।
भूयोवादात्परमिदमिहानिश्चितं यत्क्षणेऽस्मिन्
हित्वा मानं स्वपरिषदियं स्तम्भनीया स्वयं स्यात्॥६९।

तन्निश्चेतुं प्रणिहितवती नो नियोद्धुं त्वनिच्छा
यद्यप्येतत्प्रचलितमभूच्छासनात्किन्तु गान्धेः।
अभ्यायानात्प्रथममसुकं बधितुं नो सकामा
न स्यादेषा स्थितिरिह यथा गान्धिरत्राशुरायात्॥ ७० ॥

स्तब्धायामप्यथ परिषदि प्रान्तसैन्यादिदृष्टिः
जातेटावाभिधजनपदे चागता तैगृंहीता।
तत्रायुक्तैः निजजनपदोत्पन्नवस्तुप्रदर्शी
सेनाक्राम्यत् तदुपरि तदा चाधिकारं गताभूत् ॥७१॥

गन्तुं मुम्बापुरि पुनरहं शेरवानी च सज्जौ
षड्विंशेऽह्नि प्रथमप्रहरे मासि देसम्बरेऽस्मिन्।
आहूतोऽभूदिह स समितौ शेरवानी विशेषात्
युक्तप्रान्तस्थितिविषयिणे सत्परामर्शकाय॥ ७२ ॥

अध्यादेशादहमथ च सोऽपि प्रयागान्न गन्तुं
दृग्वद्धौ स्वः करनियमनोपद्रवैर्यः प्रसृप्तः।
हा दुर्बोधं गमनमभवन्नेष्टमत्र प्रशिष्टेः
ग्रामेष्वासीन्न तु प्रगमनं दूरमेतत्प्रयागात्॥ ७३ ॥

दूरं यातं करनियमनान्दोलनं कर्षकाणां
नैवास्माभिः प्रगमयितुमप्यास्त शक्यं कथञ्चित्।
यद्यादेशः कृषकजनतासन्मुखीनत्वसिद्ध्यै
निष्क्रान्तः स्यात्तदिह गमनेनैव कार्यो निरोधः॥ ७४ ॥

अध्यादेशप्रसरणक्षणात्सामनीतिं श्रिताः स्मः
अन्यैः कैश्चित्क्वचन कुहचिल्लङ्घितोऽप्येष आसीत्।
अस्मत्संस्था कलहकरणाद्रक्षतीव स्वमेवं
मुम्बापुर्यां किमिह भवितेत्यत्र न ज्ञातमासीत्॥ ७५ ॥

एतैः सर्वैर्विधिभिरभवम्मुम्बयीं गन्तुकाम-
स्तावत्साद्यास्मदुपगमनाद् शिष्टिरादेशभङ्गम्।
अन्तश्चेतो मम पुनरिदं किञ्चिदन्यद् ब्रवीति
यर्ह्यारूढा रयलमिह तर्ह्यागतं वत्तपत्रम्॥ ७६ ॥

तस्माज्ज्ञातं किमपि नवलं लग्नमादेशनं तत्
सीमाप्रान्तेऽप्यथ नियमितावब्दुलश्चैव खानः ।
बाम्बेमेलं रयलमिदमागत्य मार्गेऽवरुद्धं
गंजे चेरादतसहकृते निग्रहार्थं तदा नौ ॥ ७७ ॥

अभ्यायाता ब्रिटिशपुरुषा नाववातार्यं यानं
चाध्यारोप्यान्यदितरपुरुषैः साकमानीतवन्तः ।
नैनीबन्दीगृहमिदमभून्मुष्टियुद्धाहमद्य
सोऽभूदाङ्ग्लः पुरुष इह नौ निग्रहीता जनश्च ॥ ७८ ॥

क्रिस्मिस्पर्वण्यहमिह मनस्यास्म खिन्नोऽथ तस्य
खेदादावामपि च परमं खेदमाप्तौ तदानीम् ।
तस्मिन्पर्वण्यतिशयमहस्तस्य भग्नोऽभवद्यत्
यत्तद्भंगे वयमुपगताः कारणत्वं तु कस्मात् ॥ ७९ ॥

नैनीकारागृहमिह वयं प्राप्तवन्तो वदन्तः
सर्वाह्लादं व्यपनय मनस्त्वं घटीमात्रमेकम् ।
कालं चैतं व्यपगमय रे वेदना-वेदनायाम्
इत्येवोक्तं हृदयवचनं शेक्सपीयर कवेस्तत् ॥ ८० ॥

पञ्चाम्बो जन्म लब्ध्वाऽध्ययनमुपगतो योऽत्र वै युक्तप्रान्तेऽ-
ध्याप्यानेकानि शास्त्राण्यथ जनिवसुधां वाचनाध्यापनाभ्याम् ।
सश्रद्धं पर्यचारीत्स कविरिह मुदा नेहरूकाव्यमेतत्
प्राणैषीदस्य सर्गोऽवसितिमुपगतो व्योमपाथोधिसंख्यः ॥

तर्केऽस्माकं यदपि कथितं तेन तत्सर्वमेव
त्रोटित्वा वा विरचितमिदं मोटयित्वैधयित्वा।
पश्चाद् गान्धेः प्रबलमयितं खण्डनं चापि वाक्यं
नान्तर्वीक्षामिह पुनरदामेष रोमण्यदेशे ॥ ५६ ॥

स्पष्टं चैतद्वयमिदमविद्मैव कस्यापि धौर्त्यम्
किन्त्वाश्चर्यं ब्रिटिशदलकैः खण्डनं तन्न मेने।
नो विश्वस्तं त्विह जनक्रियाकारिभिः प्रत्युतास्मिन्
मिथ्यात्वेन प्रकटितमभूत्किञ्चिदस्यावमानम् ॥ ५७ ॥

तनाघातं वयमुपगताः प्राभवच्चैषु रोषो
रोद्धुं कर्णाटकसमटनं यातुमैच्छं प्रयागम्।
स्वस्मिन् प्रान्ते निजसहचरैः साकमेव स्थितः स्यां
स्वीये गेहाङ्गण इह यदा जायते वृत्तमीदृक् ॥ ५८ ॥

क्लिष्टान्वीक्षा भवति मम सा दूरवासः सुहृद्भ्यः
कार्यं कर्णाटकनियमितं पूरणीयं तु मन्ये।
मुम्बापुर्यां पुनरुपगतो मित्रवृन्दानुरोधात्
गान्धिप्रत्यागमनमवधाय स्थितस्तावदत्र ॥ ५९ ॥

सप्ताहेनागमनमभवत्तस्य निर्णीतमत्र
स्थातुं तावन्मम समभवन्नैव यस्मात्प्रयागात्।
प्राप्तं वृत्तं यदिह यमिताष्टण्डनाद्याः सखायः
प्रान्तीयं तैर्मिलनमिह चाऽऽयोजितं सप्तरात्रे ॥ ६० ॥

तन्निर्णीतं प्रथममिह तद् यातुमेव प्रयागं
वन्दीभावं यदि न गमितस्तर्ह्यहं सप्तरात्रात्।
मार्गे वा तन्मिलनपरतो मुम्बयीमेष यायां
श्रीमद्गान्धिं मिलितुमथ मे रुग्णपत्नीं च द्रष्टुम्॥६१॥

नूत्नादेशान् ध्रुवम कलयं तं निदेशं प्रयाग-
प्राप्तेः प्राग् वै रयलसदनेऽस्मिन् छिटंकीति नाम्नि।
तस्यैवान्यां प्रतिमपि मुहुर्दातुमासीत्प्रयत्नो
मद्गेहेऽपि प्रयतनमिदं कर्तुमन्यः प्रयुक्तः ॥ ६२ ॥

आसीत्स्पष्टं न हि ब्रिटिशिनां शिष्टिरैच्छत्समेतं
तेनादेशेन च नगरपाल्यामहं दत्तदृष्टि: ।
नो गन्तव्यं क्वचन भवता सार्वजन्ये सभादौ
नैवाभाष्यं सदसि लिखितव्यो न लेखोऽथ पत्रे ।। ६३ ।।

ईदृश्यन्या मयि खलु परे शेरवान्यादिमित्रे-
ष्वासंल्लग्नास्तदलिखमिदं नास्ति युष्मास्वधीनम् ।
कार्याकार्यं स्वयमहमिहाऽऽचिन्त्य चैवाचरिष्ये
गान्धिं द्रष्टुं समितिमपि यास्याम्यहं मुम्बयीञ्च ।।६४।।

अभ्यायाता पुनरिह पुरो नूतनेयं समस्या
भावीटावापरिषदधिवेशोऽत्र वै सप्तरात्रे ।
तत्स्तम्भार्थं त्वहमुपगतो मुम्बयीत: प्रयागं
यस्माद्गान्ध्यागमनसमये सानभीष्टा समेषाम् ।।६५।।

संघर्षेऽपि ब्रिटिशप्रभुणोपेक्षणीयेयमासीत्-
किन्तु प्रश्न: परिषदि तदा प्रस्थित: शेरवानी ।
किन्त्वस्माकं परिषदि कृषीकर्मिणामस्ति चर्चा ?
सा चेदस्यामियमपि तदा स्तम्भनीयास्ति शिष्ट्या ।।६६।।

मुख्यं कार्यं खलु परिषद: कर्षकाणां समस्या
यस्या: प्रान्ते भवति सकलेऽप्यत्र चर्चा च चिन्ता ।
सायोज्येताप्यथ न कृषकास्तत्र ते चर्चिता: स्यु:
कीदृङ् मौढ्यं तदिह भविता कीदृश: स्यात्प्रहास:।।६७।।

यच्चापि स्यादधिकृतिरियं न: प्रधानस्य नासीत्
तेन स्तब्धा भवतु परिषत् कारणाद्वै कुतश्चित् ।
शिष्टे: पत्रात्प्रथममपि नो रोधितुं तां विचार:
पत्रादस्मात्परमिह दशा काचिदन्योत्थिताभूत् ।। ६८ ।।

अस्मास्वेके प्रकृतविषये साग्रहा एव नित्यं
तत्रादेश: किल स मनसे रोचते नास्य किंचित् ।
भूयोवादात्परमिदमिहानिश्चितं यत्क्षणेऽस्मिन्
हित्वा मानं स्वपरिषदियं स्तम्भनीया स्वयं स्यात्।।६९।

निग्रहाध्यादेशाधिकारहरणानि

मन्दाक्रान्ता

एकचत्वारिंशः सर्गः

अस्मद्रोधाद्द्विदिवसपरं गान्धिरायात्स्वदेशं
मुम्बापुर्यां नवलमखिलं वृत्तमध्यागमच्च ।
बङ्गादेशं स हि विदितवाँल्लन्दने दुःखितश्च
सीमाप्रान्तोत्तरजनपदादेशमस्यामवेदीत् ॥ १ ॥

सीमाप्रान्तोत्तरजनपदे तत्सहाया घनिष्ठा
आसन्प्राप्ता नियमनमिति क्षिप्त आसीदिहाक्षः ।
शान्तेराशा ध्रुवमपगता द्यूतमासीत्प्रवृत्तं
मार्गं शान्तेः पुनरपि विचिन्वन्नसावैच्छदेकम् ॥ २ ॥

वायसूरायः सपदि मयका स्याद्धि साक्षात्कृतोऽसौ
साक्षात्कारो भवति सुलभो वै विशिष्टानुबन्धैः ।
'सीमाप्रान्तोत्तरजनपदे वङ्गदेशे च लग्ना-
दध्यादेशादथ नियमनाद्यत्र नो चर्चितं स्यात्' ॥ ३ ॥

एतत्स्मृत्याऽलिखमहमिहास्ते न तत्पत्रमारात्
नैतज्ज्ञातं किमपरमवाशिष्यते तन्निमित्तम् ।
'कांग्रेसं सा ब्रिटिशप्रभुता नैव शक्नोति सोढुं
मूलादुन्मूलयितुमथ तन्निश्चितं तेन चित्ते' ॥ ४ ॥

एतज्ज्ञात्वा सविनयमवज्ञापथादन्यमार्गः
कांग्रेसस्य क्वनु स समभूत्तेन तत्कार्यलग्नाः ।
बन्दीभावात्प्रथममिह देशस्य मार्गं निदेष्टुं
वाञ्छन्ति स्मेति स सविनयो भङ्ग एवाश्रितोऽभूत् ॥५॥

वायसरायं पुनरपि स च द्रष्टुमाधात्प्रयत्नं
'साक्षात्कारं वितरतु भवान् त्यक्तसर्वानुबन्धः' ।
तारद्वारा मुहुरपि स तं प्रार्थयामास तत्र
गान्धेर्बन्दीकरणमभवत्तारपत्रोत्तरत्वे ॥ ६ ॥

कांग्रेसाध्यक्षपदधरणाच्छ्रीपटेलोऽपि बद्धः
कृत्स्ने देशे कठिनदमनं चाप्युपक्रान्तमासीत् ।
अन्यः कश्चित्क्वचन कलहं कांक्षमाणो न वास्या
त्तस्मै नद्धः सुदृढमभवत्सर्वकारश्चिरेण ॥ ७ ॥
कारागारे वयमिह समं छिन्नभिन्नं तु वृत्तं
वृत्ताकारीकृतमुपलभेमह्यहो वृत्तपत्रात् ।
नूत्ने वर्षे प्रचलति पुरा चाभियोगोऽस्मदीय-
स्तस्मादाप्ता अधिकमिलनं वन्दिनो वाह्यभूताः ॥ ८ ॥
वायस्रायैर्मिलनसमयो देय आसीन्न वेति
चर्चा सम्प्रत्यखिलदलगा वर्तते तेन किं स्यात् ?
'इर्विन् लार्डो यदि समभविष्यत्स वेलामदास्यत्'
साक्षात्कारे च सकृदुभयोः साधुकारोऽभविष्यत् ॥ ९ ॥
इत्याद्यानामपदशिरसां जल्पकैर्वृत्तपत्रै-
र्बाह्या दृष्टिः सपदि ध्रियते नान्तरिक्यत्र देशे ।
राष्ट्रीयत्वं किमु भरतभूवासिनां चाङ्गलानां
साम्राज्येच्छा क्वचिदपि मिथो मेलमाधातुमर्हे ॥१० ॥
तत्संघर्षः कथमिह भवेच्छान्त एकान्ततोऽत्र
व्यक्त्योर्मेलादथ तदुभयोरिच्छया यत्नतो वा ।
ऐतिह्ये किं क्वचन विषमव्यक्तिसम्मेलनेन
मन्दस्मित्या मधुरवचसा राष्ट्रयुद्धं शमेति ॥ ११ ॥
तस्माद् गान्धिर्नियमितदिशा गन्तुमासीदधीनो
राष्ट्रीयत्वं भरतभुविजं वीक्ष्य सिद्धान्तपूर्णम् ।
तांस्त्यक्त्वेदं किमिह कुरुतादात्महत्यां स्वराष्ट्र-
मध्यादेशानभि च विनतं स्यात्स्वमूलच्छिदश्च ॥१२ ॥
वायस्रायोऽप्यवश इतरामाश्रयत्तां दिशं या
राष्ट्रीयत्वाभिमुखमयतां भारतीयप्रजायाः ।
या च स्वार्थान् ब्रिटिशप्रभुतायाः सदा साधु रक्षेत्
वायस्रायो भवतु कतमोऽप्यत्र नार्थोऽस्ति तेन ॥ १३ ॥

लार्डोऽपीर्विन्निह तदकरिष्यद्ब्रिटिश्राजनीते-
रन्वंग् लार्डो यदकृत विलिंग्डन्नसावस्वतन्त्रः ।
साम्राज्यार्थं नियतमिह यत्तत्र कञ्चिद्विशेषं
कर्तुं नोभावधिकृतिजुषौ हन्त लालाटिकौ तौ ॥ १४ ॥

पश्चादिर्विन्नपि ब्रिटिशतन्त्रे सदस्यत्वमाप्तो
यद्यज्जातं भरतभुवि तत्तत्तदीयानुमत्या ।
हिन्दुस्थानं प्रचलति ब्रिटिश्राजनीतिप्रभावे
वायस्रायो न भवति कतमो निन्द्यवन्द्यस्वरूपः ॥ १५ ॥

निन्दास्तुत्योरनुचितमिमं मन्यमानः प्रयोगं
जानेऽहं यन्नहि जनतया ज्ञायते वस्तुतत्त्वम् ।
जानाना वा प्रमुख-मुखरान् प्रश्नजातानुपेक्ष्य
शाखापत्रादिकमधिकृतानेव तांश्चिन्तयामः ॥ १६ ॥

द्वात्रिंशेऽब्दे जनवरिदिनं तन्महत्त्वेन पूर्णम्,
यस्मिन्वार्तोपकथनमिदं यातमत्रावसानम् ।
तस्मिन् प्रातः प्रतिनियमितो गान्धिरेवं पटेलः
कांग्रेसाध्यक्षपदमहितो वल्लभाख्याप्रसिद्धः ॥ १७ ॥

वन्दीभूताविह न कतमोऽपि प्रयुक्तोऽभियोगः
वेदादेशैरधिकृतिरिह व्यापिकासीत्प्रवृत्ता ।
न्यायाधीशेष्वथ च पुरुषाधीक्षकेषु प्रशस्ता,
स्वातन्त्र्यं संहृतमिह च तन्नागरिक्यां प्रतीतम् ॥ १८ ॥

एतैरेतेऽधिकृतपुरुषा यं जनं यद्धनं वा
गृह्णीयुस्तत्समुचितमिह स्यादितीवास्त पुष्टम् ।
सर्वो देशस्तदधिकृतिभिः पारवश्यं गतोऽभूत्
किं गृह्णीयुः किमु परिहरेयुस्तदिच्छावशं तत् ॥ १९ ॥

युक्तप्रान्तात्यधिकनवशक्त्या विदेशानुसारम्
घस्रेऽस्मिन्नेव च स चलितोऽस्माकमत्राभियोगः ।
वन्दीभावं भजतु कठिनं शेरवानी ऋतूंस्त्रीन्
मुद्राणां सार्धकशतमयं चार्थदण्डं भूनक्तु ॥ २० ॥

इत्यादिष्टं विधिविधिबुधैर्मत्कृते वर्षयुग्मं
कारागारे वसतिसहितं पञ्चमुद्राशतञ्च ।
चेदर्थोऽयं नियतसमये न प्रदीयेत तर्हि
षण्मासार्था वसतिरधिका बन्दिगेहे कृता स्यात् ॥ २१ ॥

तुल्ये दोषे नयननिगडाऽऽदेशभङ्गात्मके नौ
निग्राह्यापि प्रकृतमभवद्दण्डयोरन्तरं नः ।
सोऽहं चैतन्नखिलमददां सूचनं मण्डलस्य
न्यायाधीशे निरगमदयं शेरवानी तु तूष्णीम् ॥ २२ ॥

मुम्बापुर्यां तदुपगमनं ख्यातमासीत्प्रयागे
तद्वृत्तान्तोऽप्यभवदुदितो वृत्तपत्रैर्ममापि ।
दण्डं श्रुत्वा नयविदमपृच्छत्तदा शेरवानी
मुस्लिम्भावात्तु न मयि मृदुर्भाव एष प्रयुक्तः ।। २३ ॥

तस्य प्रश्ने प्रकृतजनता साट्टहासं त्वहासीत्
न्यायाधीशः क्वचन विवशीभावगर्तेऽप्यपप्तत् ।
तस्मिन् घस्रे स्मरणविषये कृत्स्नदेशेऽपि नाना-
वृत्तान्यासन् सदनसविधेऽस्माकमासीत्प्रयागे ॥ २४ ॥

सैन्यैः साकं सुबहुपुरुषाणां स संघर्ष आसीत्
यष्टयाघातैः कतिचन जनास्ते मृताश्च क्षताश्च ।
कारागाराः सविनयविधाभञ्जकैः पूरिताश्च
बन्दीगेहाः क्वचन शिविरेष्वाहिता नूतनाश्च ॥ २५ ॥

नैनीकारागृहलघुभुवि स्तोकलोकाः समेयुः
प्राच्यं मित्रं मम समगमन्नर्मदायाः प्रसादः ।
आयातः पण्डितरणजितो मोहनश्चापि बन्धु-
र्बन्दी वेषे लघुसखिदले मित्रमेकं समागात् ॥ २६ ॥

बर्नार्डेलू स युवकसुहृच्चात्र लङ्कात आयात्
यो वै वैरिस्टरपदविभागागतः सोऽङ्ग्लदेशात् ।
मत्स्वस्रासौ प्रथमकथितो मास्म यात्रासु यायात्
किन्तूत्साहातिशयवशतोऽभ्यागतोऽसावपीह ॥ २७ ॥

तं चानैषीदिह शकटकं ब्लैकमर्येतिसंज्ञं
कारागारे वयमिह पुरा यत्र चास्म प्रविष्टाः।
कांग्रेसे नः प्रभवति परा कार्यसंसद् यदीयाः
प्रान्तीयाः स्थानिकसमितयोऽनेकशः सन्ति शाखाः ॥२८॥

ताश्चावैधा इति प्रघुषिताः कांगरेसानुयाता
अन्यान्येवं सकलघटनान्यप्यवैधान्यभूवन्।
संस्थाः सर्वाः कृषकयुवकैः कल्पिताश्छात्रवर्यैं
राष्ट्रीयाः शिक्षणपरिषदो विश्वविद्यालयीयाः ॥ २९ ॥

सूच्यश्चैषामिह सुवितताः प्रान्तभेदादसंख्या
न्यासन्नामानि च विलिखितान्यासु सूचीषु तानि।
आसन् पारेशतमिति न वाच्यं हि पारेसहस्रं
कांग्रेसीयं कमपि महिमानं पुरस्कुर्वतेस्म ॥ ३० ॥

मुम्बापुर्यामिह च कमला रोगिशय्याधिरूढा
सा नैवान्दोलनमिदमुपेतेति च व्याकुलासीत्।
मन्माता च स्वसृयुगलमप्यापतत्तत्र यासा-
मेकैकं वत्सरमभवदावेशनं बन्दिगेहे ॥ ३१ ॥

नूत्नायाताः किमपि किमपि प्रापयन्तिस्म वृत्तं
स्थानीयान्येव च कतिपयान्यत्र पत्राणि चास्मान्।
देशे यद्यद् भवति तदिहालोकयामः प्रक्लृप्त्या
पत्राण्याशङ्कितगुरुतरार्थादिदण्डान्यभूवन् ॥ ३२ ॥

केचित्प्रान्ता निगडितजनाख्यानमुद्रापनादि-
दोषादप्याश्रितविधिबशाद् वृत्तपत्राण्यगृह्णन्।
नैनीकारागृहमिति वयं संश्रिताः सर्वतोऽपि
विच्छिन्नाः किंत्विह बहुलमात्मप्रपञ्चेषु मिश्राः ॥३३॥

सूत्राकृत्तौ पठनप्रमुखे चान्यकार्ये विलग्नाः
कुर्मो वार्तामितरविषयेष्वप्यहो जातु जातु।
कारागाराद्बहिरिह च किं किं भवत्यत्र नामे-
त्येषा चिन्ता क्षणमपि मनो नो न मुञ्चत्युदग्रम् ॥३४॥

तस्माद्भिन्ना अपि किल वयं तत्र लग्ना: सदाऽऽस्म
कार्याशाभिर्मुहुरिह वयं जातु श्रान्ता भवाम: ।
रुष्यामो वा ववचन विकृतिं कार्यघाते प्रयाते
दौर्बल्ये वा क्वचिदसुभगत्वे भजामश्च खेदम् ।। ३५।।

रीत्या चाप्यद्भुतगतिकया सम्भवामस्तटस्था:
सर्वं दृश्यं शमसहितमीक्षामहेऽसक्तभावात् ।
कार्यं कुर्वन्ति हि परिगता: शक्तयोऽमूर्महत्य:
दैवीतन्त्रं जगति जनतां यत्पिनष्ट्येतदुग्रम् ।। ३६ ।।

तद्व्यक्तीनामिह गलितयो दुर्बलत्वान्यमूनि
किञ्चित्सत्वं नहि दधति वै किं भविष्यत्यमूमि: ।
मिथ्याकोलाहलकलहकैर्विक्रमाढ्यैश्च योगै:
किं वा क्रूरैर्दमनयतनै: निन्दितै: कातरत्वै: ।। ३७ ।।

का वा तेषां परिणतिरिह स्याद्वयं कुत्र याम:
गुप्तं चाक्ष्णोरिह सकलमप्यस्ति नस्तद्भविष्यम् ।
गुप्तत्वं तस्य च वरमिदं यावदस्माभिरेतत्
सम्बद्धं तावदिदमपि नो गुप्तवद् वर्तमानम् ।। ३८ ।।

जानीम: किन्त्विदमिह वयं नूनमस्त्येष पन्था:
संघर्षात्मा सहनगहनस्त्यागपूर्णोऽद्य वा श्व: ।
मैथ्यूआर्नाल्ड कविरचितं पद्यमत्र स्मृति मेऽ-
भ्यायातं तन्न खलु लिखितं स्यात्तदा मेऽनुताप: ।।३९।।

युद्धारम्भ: स खलु भविता श्व: पुनस्तत्र जेन्थस्-
धारा कृत्स्ना रुधिररजसा रञ्जिता स्यादहो सा ।
आयातारौ पुनरपि पुरो हेक्टराजेक्सवीरौ
हेलन्देवी क्वचिदुपरिगा द्रक्ष्यतीदं च दृश्यम् ।। ४० ।।

तर्हि स्यामावृतिपरिगता वा रणे द्योतमाना
आशानाशोभयपरिकरे दोलमाना: क्षणेषु ।
तर्हि ध्यातं सममिह हुतं जीवनाख्यं धनं तत्
किन्तु ज्ञातं न खलु भविता का गतिस्त्वात्मनो न: ।।४१।

यूनानस्याह्वियत परमा सुन्दरी तेन ट्राये
आक्रान्तं तद्दशशरदनेहोगतं युद्धमासीत् ।
तस्मिन् ट्रायप्रतिभटतया हेक्टरो युध्यतेस्म
यूनानस्य प्रतिभटतयाऽजेक्सवीरश्च धीरः ।। ४२ ।।

काव्ये नाम्नेवियड इति वै युद्धगाथात्मकेऽदः
ख्यातं वृत्तं किल सुकविना होमरेण प्रक्लृप्ते ।
मैथ्यू आर्नाल्डकविरचिते चाङ्ग्लभाषामयेऽर्थः
पद्ये प्रोक्तः स इह मयकाऽनूदितोऽयं समासात् ।।४३।।

अस्मिन्काले ऋषिकुलमपि प्रस्तुतं स्यात्पुरस्ता-
दित्यर्थान्दोलनमकुरुमास्मिन्वयं पञ्च मुख्याः ।
तेषामेकेन किल मयका कल्पितेऽनल्पकाव्ये
चत्वारिंशः सविधुगणनोऽस्त्येष सर्गः समाप्तः ।

ब्रिटिशशासकानामुत्पाताः

द्रुतविलम्बितम्

द्विचत्वारिंशः सर्गः

प्रथममासगणेऽक्षिगुणोन्मिते शरदि तावदभूदिदमद्भुतम् ।
ब्रिटिशशासकवर्गं इहाकरोन्निजमुदां तदुदारप्रदर्शनम् ॥ १ ॥
अगुरवो गुरवश्च समेऽपि तेऽभिदधतिस्म किलोच्चतरैः स्वरैः ।
वयमिह स्थिरशान्तिपराः पराः कलहकर्मसु काङ्ग्रसिकाः परम् ॥२ ॥
वयमिहेप्सिततज्जनतन्त्रका अधिकृतिं स्पृहयन्ति त एकलाम् ।
अयमहो ! समितेस्तु सभापतिर्द्विकगतैकतरः खलु कथ्यते ॥ ३ ॥
क्वचन धर्मकृतेस्तु कृते पदाधिकृतिभिः सहसा खलु विस्मृतम् ।
अधिनिदेशनमादमनं समाचरणपत्रकमुद्रणमुद्रणम् ॥ ४ ॥
अनभियोजितबन्दिविनिग्रहो द्रविणसम्पदधिग्रहणं तथा ।
प्रतिदिनं बहुलाद्भुतघट्टनासदृशतुच्छतमव्यवहारिता ॥ ५ ॥
पृथगितो भरतावनिर्वर्ति तद्ब्रिटिशशासनमप्यनुविस्मृतम् ।
ब्रिटिशशासनमन्त्रिपदे स्थिता अपि सुभाषणकर्मणि चोद्यताः ॥ ६ ॥
कथमिमे किल कांग्रसिकाः स्थिता अपि च बन्दिगृहेषु निजार्थकान् ।
प्रतिसमादधते च कथं वयं नियतवैतनिका जनकर्मसु ॥ ७ ॥
लघुतरा अपि ते नयवेदिनो ददति बन्दिगृहेष्ववरोधनम् ।
तदुपदेशवचोभिरुपाश्रिता ददति नो गलिता गुरुगालिकाः ॥ ८ ॥
महति मन्त्रिपदेऽपि प्रतिष्ठितः स खलु सैम्युअसोऽप्युदघोषयत् ।
भषति कांग्रसिकश्वगणे वयं निजगणेन समं प्रचलामहे ॥ ९ ॥
स खलु विस्मृतवान्यदमी समे समवरुद्धमुखाः इह वन्दिनः ।
बहिरिता अपि संयमिता मुखे कथमिमे भषितुं भवतः क्षमाः ॥ १० ॥
अखिलतोऽद्भुतमेतदभूत्तदा यदिह कर्णपुरे स उपद्रवः ।
मुसलिमेषु च हिन्दुषु योऽभवत्तदपि कांग्रसकर्तृतयोदितम् ॥ ११ ॥

अतिघृणास्पदमेतदभूत्स्वतः प्रगदितास्य घृणास्पदता मुहुः ।
इह प्रयोजककर्तृतयाऽऽस्त सा तदपि कांग्रसकर्तृतयोदितम् ॥ १२ ॥
कृतमुपद्रवकेऽत्र हि काङ्ग्रसानुगतिभिः किल गौरवशालि तत् ।
वलिरभूदिह कांग्रसिको महान् स हि गणेश्चरशङ्करनामकः ॥ १३ ॥
यदवसानशुचा व्यथितं पुरं सकलजातिजनं गलदश्रुकम् ।
इह किलाप्तसमाचरणै हितैस्तदुररीकृतमास्त हि प्रस्तुतम् ॥ १४ ॥
यदधिकृत्य कृता त्वनुसंहितिः समितिरस्फुटयद्विवृतिं पराम् ।
इयमधिग्रहणं प्रतिलम्भिताऽधिकृतिभिर्दमिताथ घनाशिता ॥ १५ ॥
ब्रिटिशवृत्तदलैरधिकारिभिः स्थितिरियं न मृषैव प्रचारिता ।
इममुपद्रवमात्तवती स्वयं सपदि काङ्ग्रसकार्यसभैव सा ॥ १६ ॥
न विषयेऽत्र परेष्वपि भूरिषु प्रकरणेषु जितं सभयैव नः ।
विजयते भुवि सत्यमितीदृशः समितिघोष इहाभवदत्र नः ॥ १७ ॥
क्वचिदसत्यमपीह चिरायुषा परिगतं भवतीत्यपि वास्तवम् ।
तदनवद्यमिदं कविपद्यकं स्मृतिगतं मयका समनूद्यते ॥ १८ ॥
इदमसत्यमिह प्रविणंक्ष्यति भुवि करिष्यति च क्षतविक्षतम् ।
भवति सत्यमिदं जयि चान्ततः सपदि पश्यतु तावदिदन्तु कः ॥ १९ ॥
इयमपस्मृतिरोगसमा मनोगतिरिहास्ति यतः सहजा क्षितौ ।
न च कदाचन कोऽपि प्रतीक्षते यदिह संयम-सत्यमविष्यते ॥ २० ॥
तदपि भाति यथा समयेऽत्र तैर्भृशमसत्यमुपाश्रितमास्त तत् ।
गहनतां समवेक्ष्य च तद्गतां मनसि विस्मयकातिभरोऽभवत् ॥ २१ ॥
इदमवेदयदेव यदत्र ये दधति शासनसूत्रमशेषकम् ।
स्वदमनं कियदेभिरुपाहितं गतदिनेषु मनःस्थितिगोपनैः ॥ २२ ॥
प्रकटिताद्य मनोगतिरीदृशां न रुषिताः किल कर्मणि वाचि ते ।
अपितु यद्भयमास्त तदागतं शिरसि वेति विचारणमात्रतः ॥ २३ ॥
इह भवन्ति स्वशक्तिषु निर्भरा बिजहतीह न ते किल साहसम् ।
इति च भीरुमनोगतिविप्लवे दधति तादृशरूपमिति द्वयम् ॥ २४ ॥
नियतमस्ति मिथो धरणीवियत्सदृशमन्तरमत्र किलैतयोः ।
इह च कांग्रसदिश्यतिमौनिता परमलाभवतीत्यपि वास्तवम् ॥ २५ ॥

परमियं न हि संयमसूचिका न खलु गौरवभागिह संयमः।
अपितु कांग्रसिका इह वन्दिनस्तदितरे च नितान्तभयान्विताः ॥ २६ ॥
इह समाचरणानि नियन्त्रणाभयनिरुद्धगतीन्यभवन्यतः।
इदमसंशयमत्र नियन्त्रितं यदि न काङ्ग्रसमप्यभविष्यत ॥ २७ ॥
तदपि नैकविधं प्रलपन्महामुखरमप्यपशब्दमदास्यत।
परममुष्य कृतेऽप्यभवद्गतिर्विधिविरुद्धसमाचरणाश्रयः ॥ २८ ॥
बहुषु वै नगरेषु तथाविधान्युपगतान्यभवन्हि प्रकाश्यताम्।
असमये समये प्रविकाशितैः स्वकथनं प्रथयन्ति पुरेदृशैः ॥ २९ ॥
इह यदर्धगुरुण्डजनैः समाचरणपत्रमनीयत मुद्रणम्।
यदधिकृत्य किलाङ्ग्लजनाः स्थितास्तदतिहर्षप्रदर्शनमाचरन् ॥ ३० ॥
बहुविधाः प्रथिताश्च विचारणा मनसि याश्चिरतो दमनं गताः।
स्वहृदयं प्रथयन्ति विमृश्य ते तदिह गुह्यत एव हि भारतैः ॥ ३१ ॥
उपगते विषये समये पुनः स गलितः सकलः किल संयमः।
वयमवाप्नुम चाङ्ग्लज-भारतोभयहृदामविचारप्रदर्शनम् ॥ ३२ ॥
भरतभूमितलेऽर्धगुरुण्डकैः प्रथितवृत्तदलान्यधुना क्षयम्।
उपगतानि शनैरवरोधितान्यतितरोच्चतरैरवशिष्यते ॥ ३३ ॥
इह समाचरणादिदृशापि तान्यतितरन्ति निजाकृतिधृष्टितः।
जगतिजासु विधासु तदग्रिमेष्ववगता किल लेखकयोग्यता ॥ ३४ ॥
यदपि तेऽत्यनुदारदृशां नृणामिह भवन्ति हि लेखगणाः समे।
परमिमे विषयं प्रविजानते निजमहो तमिमेऽप्यधिकुर्वते ॥ ३५ ॥
इदमसंशयमस्ति यदत्र तत्कृतसमाचरणानि वरिष्ठताम्।
दधति किन्तु पतन्ति गुरुत्वतः सपदि राजनयाधिकृतेष्वमी ॥ ३६ ॥
भवति विस्मय एव तदेककैरिह विचारशतैर्धृतपक्षकैः।
उपनते पुनरत्र प्रतिष्ठयानुगतवस्तुनि तैरपभाष्यते ॥ ३७ ॥
प्रकटयन्ति हि शासनसम्मतीस्तदधिकारप्रचारणतत्पराः।
परमिहास्ति परेषु न रोपणागुणवियोग इतीह न संशयः ॥ ३८ ॥
कतिपयानि तदर्धगुरुण्डकैः प्रचलितानि समाचरणान्यृते।
भरतभूमिभवानि तु तान्यमून्यतितरामधरस्तर आसते ॥ ३९ ॥

लघुभिरार्थिकसाधनकैरमून्यधिकमुन्नतिकृद्यतनं विना ।
निजदिनानुदिनान्वितजीवनं कठिनताविधयैव वहन्त्यहो ॥ ४० ॥
तदतिदुःखि च सम्प्रतिपादकाधिकरणं विपदः सहते चिरम् ।
भवति पत्रमिदं च महाकृति स्पृशति विज्ञपनं च जुगुप्सितम् ॥ ४१ ॥
अपि च राजनये जनजीवने भवति भावुकताभृतमेव तत् ।
भरतभूमिजनीतिरियं यतः परमभावुकतासु प्रसिद्ध्यति ॥ ४२ ॥
अपरकारणमाङ्गलभाषया लिखितलेखगणेष्विह भारताः ।
नहि तथा प्रभवन्ति विचारणाः प्रथयितुं बलतो हठतोऽथवा ॥ ४३ ॥
परमकारणमस्ति चिरादियं शिरसि सम्पतिता यदधीनता ।
हृदि यया ग्रथिता जडग्रन्थयो ददति नोऽवसरं न विमर्शितुम् ॥ ४४ ॥
हृदि भृतानपि भावभरान्वयं प्रथयितुं न मतिं प्रतियुंज्महे ।
अपितु भावुकतैव समग्रतो भवति तत्प्रथनेषु तदग्रतः ॥ ४५ ॥
भरतभूमिजनाधिकृतेष्विहाङ्गलगिरा प्रथितेषु बहिर्दृशा ।
सुभगतां च समाचरणान्विर्तिं न नु रुणद्धि च 'हिन्दु' वरिष्ठता ॥४६ ॥
तदधिगत्य सदा त्वविवाहितां स्मरति मे हृदयं जरतीं स्त्रियम् ।
चलति या नियते पथि, रोचते सपदि या हृदयाय किलौचिती ॥४७ ॥
यदि च तत्पुरतोऽक्षरमप्यनादरकरं किल केनचिदुच्यते ।
तदिदमत्र न तद्धृदि रोचते तदिदमस्ति हि 'हिन्दु' परिग्रहे ॥ ५८ ॥
इदमिहास्ति च मध्यमवर्गिणां ससुखमेति यदीयसुजीवनम् ।
न हि विदन्ति च ते प्रतिघातकान्यनुभवन्ति न ते प्रतिघर्षणम् ॥ ४९ ॥
इह च नम्रदलप्रविचालितान्यपरवृत्तदलान्यपि तादृशम् ।
अतिवहन्त्यविवाहितवृद्धया सममिदं सकलं निजजीवनम् ॥ ५० ॥
इति भजत्स्वपि तेषु किल स्तरं नहि विशन्ति तु 'हिन्दु' विशिष्टताः ।
विरसताऽलसता श्लथता च तान्यहह मुञ्चति नैव कदाचन ॥ ५१ ॥
परिकरं चिरतस्तु निबद्धवत्प्रथममाक्रमितुं किल शासनम् ।
भवतु चाप्यभिघातविधेदृशी ह्यभिहतं पतताविह दिग्भ्रमे ॥ ५२ ॥
विगतवत्सरमत्र सुदुर्दशां निरसितुं विहिता नवदेशनाः ।
भवति कांग्रसतो य उपक्रमस्तदुपरोधयति स्म च शासनम् ॥ ५३ ॥

इह तु शासनमस्ति पुरस्सरं निखिलभारतगैश्च प्रदेशगैः ।
नवनिदेशशतैरधिकारिणोऽधिकतरैरधिकारशतैर्वृताः ॥ ५४ ॥
समितयश्च सभाः सकला अपि प्रथममागमिता यदवैधताम् ।
सदनसम्पदि वाहनमृत्तरौ द्रविणकेऽधिकृतिर्विहिता च सा ॥ ५५ ॥
मिलितयात्रिषु सम्मिलनादिषु प्रणिहितः प्रतिबन्धपराक्रमः ।
अपि समाचरणेषु च मुद्रणेष्वपि नियन्त्रणमाहितमुत्कटम् ॥ ५६ ॥
विगतवत्सरतो विपरीततान खलु गान्धिरिहैच्छदृताग्रहम् ।
समितिसम्मतिरास्त तदेदृशी यदपि वेद्मि रणस्तु भविष्यति ॥ ५७ ॥
इह रणस्य कृते च समुद्यमः सपदि कार्य इति प्रणुदाम च ।
अधिनिदेशनजा च प्रदेशयोः प्रववृधे किल सा विमनस्कता ॥ ५८ ॥
इति जना अवधाय च भाविनं रणमकार्षुरमुष्य समुद्यमम् ।
इति तु मध्यमवर्गगता जनाः सुपठिता लिखिताः किल नाविदन् ॥ ५९॥
परमिमेऽपि रणं तमुपेक्षितुं न हि तदा प्रभवन्ति तु भाविनम् ।
भरतभूमिमुपेयुषि गान्धिके ध्रुवमयं कलहः शममेष्यति ॥ ६० ॥
इति विभाव्य शमाश्रयिणोऽभवन् न कलहं किल तेऽभ्यलषन्यतः ।
इति सदा प्रथमाक्रमणं कृतं ब्रिटिशशासनसज्जनतल्लजैः ॥ ६१ ॥
शमरुचि प्रतिवादि तु कांग्रसं सततमात्मसुगोपनमाचरत् ।
अधिनिदेशशतं च ऋणाग्रहाग्रहरणं जनयत्तदिहाभवत् ॥ ६२ ॥
घटनिकाः सहसैव समीक्ष्य ताः सुचकिता अभवन् खलनायकाः ।
परममुत्र च कांग्रसघोषणामनुगता जनता न यथा तथा ॥ ६३ ॥
न हि ऋताग्रहकारिनृणां क्वचित्समभवद् व्रतिनां क्षणमूलता ।
अथ यथार्थमियं प्रतियोगिता प्रविगताभ्य इहाभवदुन्नता ॥ ६४ ॥
बिगतया प्रतियोगितया महानगरसम्भ्रम आस्त निदर्शितः ।
सहनशक्तिरिहाऽऽस्त च दर्शिता क्वचन शान्तिरपीह न लङ्घिता ॥६५॥
प्रथमवीचिजवः स्फुरणस्य चाधिकतरोऽभवदित्यपि वास्तवम् ।
प्रमिलितास्तु विनैव रणेच्छयेत्यपि विभाति किलात्र ऋताग्रहे ॥६६ ॥
विगतवर्षरणे निजगौरवं किमपि तर्ह्यनुभूतमभूद् हृदा ।
समयतस्तदभूच्छिथिलं पुनः सपदि जागरितं तदभूदिह ॥ ६७ ॥

इह समग्रबलेन च शासनं प्रयुयुजेऽप्रतिमं स्वपराक्रमम् ।
प्रथममास्त च भूविधिवन्धितं न कृतवत् किल कांग्रसमुद्यमम् ॥ ६८ ॥
प्रथममाक्रमणं न कदाप्यदोऽवसरमाप विधातुमिति स्फुटम् ।
किमपि कर्तुमभूत्पर तन्त्रकतन्त्रकं तदिदमाहृतिमाप विसंज्ञताम् ॥६९॥
धनिकमान्यजनेषु च तत्सहायकतया कृतवत्सु सहायताम् ।
कतिपयेऽप्यभवन् भयविह्वला सधनमानविपत्पतिता यतः ॥ ७० ॥
इदमभूत्स्फुटमेव च लक्षितं यदिह यो मिलितस्तु भविष्यति ।
अतिकरिष्यति वात्र सहायतां, स्ववशतां स्वधनं च स हास्यति ॥७१ ॥
प्रभवति स्म न तत्पुनरुत्तरे जनपदे धनहीनजनाश्रयम् ।
अभवदत्र हि कांग्रसमण्डलं, प्रभवति स्म तु मोहमयीमुखे ॥ ७२ ॥
इदमभून्महतां वणिजां कृते सकलनाशकरं विपदावहम् ।
विधिविदां च चिकित्सितजीविनामपि सदास्त हि हानिकरं परम् ॥ ७३॥
इह हि भर्त्सनयापि किलेदृशा क्वचन लम्भितया कृतिरूपताम् ।
नगरगान् धनिकान् प्रतिबाधते स्म स हि पक्षविघातरुजा क्षणात् ॥७४॥
अवगतं मयका समये क्वचित् पुरुषभर्त्सनया 'चिरवन्दिता ।
तव च दण्डतया बहुलक्षकं धनमपि क्षयिकं भविते'त्ययम् ॥ ७५ ॥
भयमगात्स न सम्मिलितोऽभवत्क्वचन काङ्ग्रसकर्तृ-ऋताग्रहे ।
क्वचिददादनुदानमपि स्म नो त्यजति काङ्ग्रसनाम विदूरतः ॥ ७५ ॥
समभवत् सहजा इव भर्त्सना न वचनै रचनैरपि वस्तुतः ।
पुरुषवर्ग इहास्त हि शक्तिमान् स कुरुते स्म ऋतं निजभर्त्सनम् ॥ ७७ ॥
न खलु कश्चन काङ्ग्रसिको जनोऽस्त्यधिकृतः प्रतिवक्तुमिमां स्थितिम् ।
दमयितं शमयुक्तमृताग्रहं बलयुतोऽत्र नयन् स्म न युज्यते ॥ ७८ ॥
परमिहाग्रहिलैः करणीयतां श्रयति क्रान्तिकसाधनसङ्ग्रहैः ।
प्रतिविरोद्धुमथो सततोद्यतैश्च भवितव्यमहिंसकवर्त्मगैः ॥ ७९ ॥
न खलु कश्चन विश्रमकोष्ठके समुपविश्य हि खेलति सङ्गरम् ।
भवति हिंसक एष यदीह तत्सकलमत्र निजं प्रतिहन्ति सः ॥ ८० ॥
अत ऋताग्रहसङ्गरसम्मुखेऽत्र धनिको विरलः प्रतितिष्ठति ।
व्यवहृतौ चतुरेषु विमूढतां व्रजति स स्वजनेषु कृतघ्नताम् ॥ ८१ ॥

न खलु मुत्तरयो न च सम्पदो धनमहो न च कोषगतं क्वचित् ।
इति निराकुलधीष्विह सज्जनेष्ववधृतो भवति स्म ऋताग्रहः ॥ ८२ ॥

इति कुशासनमेषु नियन्त्रणार्थकविधीनपरान् समशिश्रियत् ।
भयमुपेत्य तु निर्ममनिर्दयाद्दमनतोऽनुगतां बहवोऽभजन् ॥ ८३ ॥

इह भविष्यति किन्नु भविष्यतीत्यधिगतं खलु यैर्न जडैर्जनैः ।
उभयतः प्रतिलाभमुपासितुं सपदि काङ्ग्रसमप्यवलम्बितम् ॥ ८४ ॥

अथ न शासनमीदृशभक्ततामसहतेदृशनिष्क्रियताजुषाम् ।
न खलु तच्छुभकामनया स्थितिं श्रयितुमप्यलमास्त कुशासनम् ॥ ८५ ॥

तदिह वाञ्छति सक्रियया तया प्रकटितां च जनस्य कृतज्ञताम् ।
इति स विप्लवकालिकफ्रेडरिको यदवदत्तदभूदिह वास्तवम् ॥ ८६ ॥

इयदहो न हि शासनमुद्यतं निपतितुं यदिदं प्रजयोद्धृतम् ।
मनसि शोभनभावमधिश्रितं स्थितिमिहामनुतां सहजस्थिराम् ॥ ८७ ॥

निजपुरातनसङ्गिषु चाप्युदारदलनेतृषु राष्ट्रियशासने ।
विगतवत्सर एव स लायडोऽवददहो ! कृकलाससमा हि ते ॥ ८८ ॥

विपरिवर्तितरङ्गधरा धरामधि विलोक्य भवन्ति यथा क्षणम् ।
अथ यथास्थिति चापि यथास्थलम् इति न नूनमिहावसरोऽभवत् ॥ ८९ ॥

कतिपये खलु भारतवन्धवो ह्यतिचमत्कृत-शासनवल्लभैः ।
नवनवैरुपरज्य सुरङ्गकैर्निजमिमे बहिरागमिनोऽभवन् ॥ ९० ॥

प्रणयभोजमभुञ्जत तत्स्तुतीः समपठंश्च गुणान्बहुशोऽगृणन् ।
प्रणयमादरमन्वगदर्शयन् विविधबन्धनभीतिमुचोऽभवन् ॥ ९१ ॥

अधिनिदेशशतादुपवर्तितात् वहुनिषेधनिरोधगणाच्च ते ।
न बहिरस्तमयात्परतो गतिप्रभृतिनैकनिदेशभयं गताः ॥ ९२ ॥

अकथयत्किल शासनमीदृशं खलु नियन्त्रणमस्ति विरोधिनाम् ।
न खलु राजनि भक्तिभृतां कृते इति न ते भुवि बिभ्यतु तादृशात् ॥९३॥

भयमिदं निगृहीतवदेव नः सुबहुशः सुहृदस्तमिमान् प्रति ।
प्रसरति स्म न वै तिलमात्रकं समभवन्निह ते समदृष्टयः ॥ ९४ ॥

कवितया ब्रजनारि-पतिव्रताविषयया किल क्लोकविक्लृप्तया ।
सहमता अभवन्निह ते ध्रुवं स खलु तत्र निरूपितवानिदम् ॥ ९५ ॥

मम भयं कथमस्तु विमुक्तिभागियमहं भयतोऽस्मि बलात्कृतेः ।
अवसरः क्व भवेद् धृदयेनै चेत्स्वयमहं प्रणयेन समर्पिता ॥ ९६ ॥
मनसि शासनमेतदकल्पयद् यदिह बन्दिगृहेष्वबलागणम् ।
भरितुमिच्छति काङ्ग्रसमित्यदो परिणतौ कलहे कलयज्जयम् ॥ ९७ ॥
कुत इदं मनसा धृतवत्तु तन्न खलु वेद्मि परं तदकल्पयत् ।
नु मनुते हृदि कांग्रसमास्विदं व्यवहरिष्यति वै मृदु शासनम् ॥ ९८ ॥
ननु करिष्यति तल्लघुदण्डकं इयमकारणिका किल धारणा ।
क इह वाञ्छति मानधनो जनो व्रजतु गेहजनो भुवि वन्दिताम् ॥९९ ॥
प्रकटतोऽभ्ययिताः किल कन्यकाः पितृनिदेशमृतेऽत्र ऋताग्रहे ।
पतिनिदेशमृते वनितास्तथा सुतनिदेशमृते च जरन्तिकाः ॥ १०० ॥
अपि निदेशमिमाः प्रविलङ्घ्य तं सममिलन् स्ववशित्विकसङ्गरे ।
क्वचन काचन तासु न संयुजामलभत स्वजनस्य न चेद्रुषम् ॥ १०१ ॥
तदपि शासनमेतदचिन्तयत् कठिनदण्डविधेर्विनिरोधनम् ।
सुबहुकालिकवन्दितया सुदुर्व्यवहृतेश्च बलेन च योषिताम् ॥ १०२ ॥
भगिनिकाद्वयनिग्रहतः परं त्वहमपश्यमिहाशु किशोरिकाः ।
कतिचनामिलिताः समचिन्तयन्किमधुना नु विधेयमिहास्ति नः॥१०३।
इह च पञ्चदशीषु च षोडशीष्वनुभवं नहि काचन संश्रिता ।
इति विमर्शमिमाः श्रयितुं हृदा धृतजवा भवने क्वचनाचिताः ।।१०४ ॥
विनिगृहीतमिदं च किशोरिकादलमनीयत सश्रमवन्दिताम् ।
प्रतिशरद्द्वयमित्युपदर्शितं कुघटना तु किलैकनिदर्शनम् ॥ १०५ ॥
प्रतिदिनं दिवसेषु च तेष्विमास्सुघटिता अभवन्निह भारते ।
कठिनता विविधा असहन्त ता विनिगृहीततया किल कन्यकाः ॥१०६॥
पुरुषवन्दिगणादपि यातनाः कटुतराः किल तासु निपातिताः ।
सहचरीभिरुपागत-मीरया कथितमत्र न विस्मियते मया ॥ १०७ ॥
क्वचन मोहमयीस्थितवन्दिनीजनगृहे मिसमेउलिवाख्यया ।
यदुपवर्णितमास्त सुसङ्गिनीसहितया व्यवहारविडम्बनम् ॥ १०८ ॥
ध्रुवमृताग्रहक्षेत्रमभूत्तदोत्तरपदे प्रमुखं त्विह ग्रामकाः ।
प्रतिनिधित्वबलात्कृषतामिह प्रयतते स्म सदैव च कांग्रसम् ॥ १०९ ॥

इति विमुक्तिमलं वितरीतुमाश्वसितवत्कृषकानिह शासनम् ।
मनुमहे न वयं तदलं ततोऽधिकतरामपि मुक्तिमिमे ददुः ॥ ११० ॥
परमियं न विमुक्तिरघुष्यत प्रथममेव तु नोऽत्र विनिग्रहात् ।
प्रथममेव हि घोषयतोऽधिकं ह्यभवदन्तरमत्र परिस्थितौ ॥ १११ ॥
अब सरे किल तत्र न तां वयं यदवमन्तुमलं हि भवाम यत् ।
परममुत्र किलावसरे पुरा न खलु वाञ्छति कांग्रसिकं यशः ॥ ११२ ॥
दमयितुं तदवाञ्छदिहैकतस्त्वपरतः कृषकेषु विमुक्तिकाम् ।
इति तु शासनमेकशरेण तद्द्वयमविध्यदधाच्च दमं शमम् ॥ ११३ ॥
परिणतिस्तु निवेदयते स्थितिं यदिह कांग्रसमुद्यतते यतः ।
प्रभवतिस्म यतश्च ऋताग्रहो मिलति मुक्तिरियं त्वधिका ततः ॥११४॥
यदपि मुक्तिरियं न किलाल्पिका तदपि साधयते स्म न संस्थितिम् ।
स्थितिमवश्यमसौ तु समादधात्कृषकवेगमियं शिथिलं व्यधात् ॥११५॥
कृशमियं च करोति पुराग्रहं प्रवितते कलहे शिथिलीकृते ।
जनपदे तु किलोत्तरके कृषीवलगणो विपदोऽसहताधिकाः ॥ ११६ ॥
कतिपये तु गता अवसन्नताभिह ऋताग्रहतः प्रथमं कृतात् ।
चरमतस्तु कृषीबललक्षकं करविमुक्तिमवाप्तवदीप्सिताम् ॥११७ ॥
इति ऋताग्रह एष विषोपभः प्रथमतोऽथ परं त्वमृतोपमः ।
विविधवैवशतोऽथ कृषीवलानयममोचयदित्यपि सत्यवाक् ॥ ११८ ॥
स च ऋताग्रहसङ्गर आदिमान् बलवतः कृषकान्वलिमाददात् ।
परमतस्तु कियत्समभावतः प्रतिददौ सुविधां च सुखानि च ॥ ११९ ॥
अथ दिसम्बरमास्यनुत्रिंशकेऽप्यधिनिदेशविशेषमघोषयत् ।
जनपदेऽत्र किलोत्तरके तदा विवरणेन सह ब्रिटिशासनम् ॥ १२० ॥
विवरणेऽत्र पुरातनकेषु चानृतमशेषमथार्धमवस्थितम् ।
प्रकरणार्थमिदं विनिवेशितं न तु क्रियात्मकताऽनुनिनीषया ॥ १२१ ॥
द्रदमभून्मुखहर्षप्रदर्शनावयवमेव न तूत्तरदित्सया ।
स्खलितखण्डनकावसरोऽप्ययं न च मनागुपलम्भित ईदृशः ॥ १२२ ॥
अनृतदूषणरोपणचेतसा ब्रिटिशशासनकेन मृषात्मना ।
इह कदर्थयितुं स हि शेरवान्यपि महान् विवृतौ विनिवेशितः ॥१२३ ॥

इदमसत्यमिह स्फुटलक्षितं विनिग्रहात्प्रथमं परिखण्डितम् ।
विवृतयो विविधाः स्खलितोत्तराणि च विचित्रतमान्यनृतान्यथ ।१२४।
कियदिदं परिजल्पति शासनं कियदिदं भयभीतमथाभवत् ।
इति ततो विवृतेः स्फुटमप्यभूदनृतवादपरायणताऽस्य च ॥ १२५ ॥
इह पठन्नधिदेशनमेककं प्रविततं किल वोरवनेन यत् ।
निजनृपत्वपदाद्यशइष्टकं बहिरपाकुरुत स्पिनदेशतः ॥ १२६ ॥
तदधिरोहति यावदिह स्मृतिं ब्रिटिशशासनकाधिनिदेशना ।
प्रकटनाय च कारणसन्ततिः स्मृतिमगाद्बलतो हठतश्च मे ॥ १२७ ॥
स खलु बोरवनो नृपतिर्निजे तदधिदेशनकेऽलिखदौचितीभ् ।
यदिदमत्र निदेशयितुं ममान्तिकमनेकनिदानमवस्थितम् ॥ १२८ ॥
निजप्रजासु निजं मम शासनं शमनयाववितुं करणीयता ।
अथ च तैरनुबद्धमनेकशो गहनतो गहनं किल कारणम् ॥ १२९ ॥
कथितकारणभिन्नतया परं समुचितं समपेक्षितमन्यदा ।
हृदि निजे मयका परिरक्षितं यदभव यशइष्टविवासने ॥ १३० ॥
ब्रिटिशशासनतोऽधिकदेशना निरगमन्नृतसम्भृतकारणैः ।
परमियन्त्यभवन् हृदयेस्थितानि किल वायसराय-सभासदाम्॥१३१॥
नियमितान्यपि तानि हृदन्तरे स्फुटतया परिलक्षितकान्यभुः ।
प्रकटितानि च यान्यधिवेशनेऽभ्युपदिशन्ति तु तानि प्रचारणाम् ॥१३२॥
इयमहो सकलापि कलात्मनो भरतभूमितले ब्रिटिशैस्तता ।
उपगतास्तु च सा परिपूर्णतामिति च तैः सततं प्रतियत्यते ॥ १३३ ॥
अवगतं कियता तदनेहसा जनपदेषु दलानि सहस्रशः ।
प्रविततान्यथ शासनशालिभिः प्रतिजनं परिचाययितुं प्रभुम् ॥ १३४ ॥
इह दलेषु गलद्वहुवार्तिकामितिरभूदतिविस्मयकारिणी ।
कृषकवृत्तिभृतां तु मितार्थताप्रजनितां क्षतिमेतदकारयत् ॥ १३५ ॥
इति तु कांग्रसमूर्धनि दूषणं समधिरोपितमेषु दलेष्वभूत् ।
तदथवा भुवि कांग्रसशक्तितां प्रदिशति स्म किलार्धनियन्त्रिकाम् ।१३६
परमिदं निपुणैर्विदितं तथा व्रजतु कांग्रससत्कृतिरान्तरान् ।
जनजनस्य मनस्ययमुद्भवेत् कृषकहानिकरोऽस्य किलाशयः ॥ १३७॥

इति सद्क्षसमस्तकथास्वहो अपि सतीषु किलोत्तरके पदे।
क्वचन मण्डलकेषु विशेषत: कृषकयोगमगात्स ऋताग्रहः ।। १३८ ।।
स खलु शस्यतमोऽभवदेव संमिलितमत्र करादिविमोक्षणम्।
इह च तैः खलु त्रिशमपेक्ष्य भागभजनं विहितं नियताऽधिकम् ।।१३९ ।।
इह विनोदनमप्यभवत्पुरा रुचिकरी हि कथा कथितात्र नः।
पुरुषवृन्दमगात्तु वरेलिकानुगतवाकुलियाभिधग्रामकम् ।। १४० ।।
करविलोपविरोधिनि कुर्कके पुरुषवृन्दमिदं तदगात्स्थलम्।
इह जनाः सुखिनश्च सजीवना अधिकृतानवदन् मृदु सादरम् ।१४१।
प्रविशताद् गृहमत्र भवान्यथेप्सितमितोऽभ्युचितं नयताद्धनम्।
पशुधनं पुरुषैः कुरकीकृतं जनपदस्थजनास्तु समार्चयन् ।। १४२ ।।
अतितरां त्वभवन्निह लज्जिता नतमुखाश्च गृहाद्बहिरागताः।
इयमिहास्ति लघुः सविशेषका नहि परत्र तु काचिदलोक्यत ।। १४३ ।।
सुपरिहासमयीयमुदारता मनुजभोग्यदया तमदण्डयत्।
सपदि वाकुलियाभिधग्रामकं नवलजीवनदर्शनकौतुकात् ।। १४४ ।।
इह च केषुचनाप्यनुमण्डलेष्ववनिरुद्धकरेषु त्रिमासतः।
अथ तदर्पणमूष्मदिनागमेऽभवदिह त्वभवन् बहुनिग्रहाः ।। १४५ ।।
सहजकार्यनयाद्विपरीतकं कृतमिदं जननिग्रहणं तदा।
नयवशेन तु नेतृषु वा विशिष्टपुरुषेषु विनिग्रह इष्यते ।। १४६ ।।
इह किलान्यजनांस्तु निपीडनं प्रगमयन्त्यपि भर्त्सनताडनैः।
विधिरयं खलु बन्दिगृहापनात्समुचितः पुरुषैः परिगण्यते ।। १४७ ।।
इदमहो जनताडनपीडनं स्वरुचिसंश्रयणात्सुकरं मतम्।
नगरतश्च सुदूरगते स्थले कृतमिदं न जनैरवधीयते ।। १४८ ।।
अपि च बन्दिजनस्य न संख्यया प्रतिदिनं निचयं वहमानया।
अमितयाऽवधिरुत्क्रमितो भवेदिति वरं भुवि ताडनपीडनम् ।। १४९ ।।
अधिकृतेर्हरणं कुरकीकृतिः पशुगृहादिनिलायनमप्यभूत्।
विकसितैः कृषकैरिह दृश्यते विपणनं स्वधनस्य मृदो यथा ।। १५० ।।
भरतभूमिगतेषु च सद्मसु स्वमधिकारमरोपयदाग्रहात्।
इह तदस्त्यपि नाम तदा स्वराजभवनं समभूद्धृतकांग्रसम् ।। १५१ ।।

अकृत तद्भवनेऽत्र चिकित्सनं तदपि चाधिकृतं सपरिच्छदम् ।
कतिपयैर्दिवसैस्तु चिकित्सनं समवरुद्धमभून्नितरामिदम् ॥ १५२ ॥
निकटगोपवने पुनरन्यथा क्रियत शासनिकैस्तदुपक्रमः ।
पुनरिदं च चिकित्सनकं स्वराजभवनान्तिककक्षगतं कृतम् ॥ १५३ ॥
तदपि वत्सरयुग्ममिहाचलत्समधिकं किमपीति निशम्यते ।
वसतिगेह इहाथ च नस्तदा प्रथितमास्त मुदां भवनाख्यया ॥ १५४ ॥
अधिग्रहीतुमिहेच्छति शासनं तदिति तत्र कथा चलिताभवत् ।
अहमिहायकरस्य महाधनं प्रवितरीतुमभूवमनुद्यतः ॥ १५५ ॥
अयमिहायकरः किल त्रिंशके पितुरभूदवितीर्ण ऋताग्रहे ।
अधिकृतैः सह तस्य विचारणाक्रियत दातुमथाप्युररीकृतः ॥ १५६ ॥
प्रथममंशमथास्य वितीर्णवानहमथैतदसङ्गतमामृशम् ।
कृषकवर्गमहं करदानतः प्रतिरुणध्मि ततः प्रददे कथम् ॥ १५७ ॥
इति ममैतदभादिह शासनं भवनमेतदहो कुकरिष्यति ।
स्वभवने कुकरीकरणं ममारुचत नैव किलानुचितं ह्यभात् ॥ १५८ ॥
अहह ! तद्भवनान्मम मातुरप्यनुभविष्यति नाम विवासनम् ।
सकलपुस्तकपत्रपशुप्रभृत्यखिलमेव बहिष्क्रियते च नः ॥ १५९ ॥
परकरैरुपयोगितरो ममाप्यथ पितुश्च परिच्छद एषकः ।
सहतिरस्कृति हन्त निरस्यतेऽपदिशि दिश्यपि हा बहिरस्यते ॥ १६० ॥
अवतरिष्यति हन्त स राष्ट्रियो ध्वज इतो मम बन्धुतमोऽस्ति यः ।
शिरसि रोक्ष्यति चाङ्गलयूथिको जयिक इत्यभिधो ब्रिटिशध्वजः ॥ १६१ ॥
अपरतो मम तद्भवनक्षतिः प्रियतया सुखदापि च भासते ।
स्वभवने कुकृते हि कृषीवलान्तिकगतोऽप्यभविष्यमिदंसमः ॥ १६२ ॥
क्षतिरियं मम तद्बलदा भवेत् क्षपितमस्ति हि तैः सकलं स्वकम् ।
अथ ऋताग्रहदृष्टिकृतो भवेदयमहो स महानपरिग्रहः ॥ १६३ ॥
अपरमेव तु शासननिश्चयं विदितवान्न मुदं मनसाऽदधाम् ।
न भवनेऽत्र करो निहितोऽमुना मम तु मातुरधादनुरोधकम् ॥ १६४ ॥
व्यमृशदेतदथो कुकरीकृतेऽत्र भवने बलमेति ऋताग्रहः ।
कतिपयैर्दिवसै रयलांशकान्मम करं प्रति चाधिगृहीतवत् ॥ १६५ ॥

मम मम स्वसुरप्यधिकृत्य तत्प्रथममेव तु मृत्तरियुग्मकम् ।
विपणयन्नु समग्रनिगारि तद् ब्रिटिशशासनकं क्व नु शाम्यति ।।१६६।
प्रथममासगतासु प्रवृत्तिषु व्यथित आसमहं पुनरेकथा ।
नगरपालिकया हि बहुस्थयाऽवतरितो ध्वज एष हि राष्ट्रियः ।।१६७।।
अपि च विश्वजनीनसुसंस्थया बहुलया भवनच्छदितो ध्वजः ।
विगमितोऽत्र विशेषनिवेशतो नगरपालिकया कलिकात्तया ।। १६८ ।।
इह हि काङ्ग्रसिका बहवोऽभवन् तदपि शासनपूरुषतेजसा ।
अभिभवं गतया त्ववतारितो न तु महत्त्वममुष्य हृदि स्मृतम् ।।१६९।।
अहह भर्त्सनयैव भयं गतैः समितिभञ्जनतो जननिग्रहात् ।
यदि निजार्थपरा समितिर्भवेत् भवति भीरुरवश्यमिति स्थितम्।।१७०।।
इह च भीरुजनो न निजां मतिं वहति प्रोन्नततां न च राष्ट्रियाम् ।
इति तया ध्वजगौरवभावनां स्वमनसः परिहृत्य तथा कृतम् ।। १७१ ।।
व्यथित आसमहं कथयानया ध्वज इहाभवदस्मदभीप्सितः ।
सकलकान्तविचारप्रतीकतामुपगतोऽवितुमास्त प्रतिश्रुतः ।। १७२ ।।
भरतभूमिपरात्परगौरवं तदवतार्य निजेन करेण हा ।
प्रतिश्रुतेर्दलनं नहि केवलं खरतरं खलु पापमभूदिदम् ।। १७३ ।।
अयमिहात्मदमोऽन्तरवर्तिनः किल ऋतस्य कृतं त्ववहेलनम् ।
तनुबलाच्च विभीय तदग्रतोऽनृतपथे क्रमणं समभून्नृणाम् ।। १७४ ।।
इह तथात्मदमो विहितश्च यैः स्वकुलगौरवमङ्कितमेव तैः ।
जनपदस्य निजस्य च मान्यता लघुतरत्वमथ प्रतिलम्भिता ।। १७५ ।।
क्वचिदकल्पयमेव न तत्कृते यदिह तेऽभिपतेयुरिहाग्निषु ।
प्रकलयेयुरथोज्ज्वलवीरतां न खलु सन्ति समे सदृशा भुवि ।। १७६ ।।
प्रथमपङ्क्तिगतो नहि कोऽपि चेत् न च गतोऽथ भवेदिह बन्दिताम् ।
विविधसङ्कटहानिसहो भवेद्यदि तदा न स याति सदोषताम् ।। १७७ ।।
प्रतिजनं नियतास्ति विधेयता, विनियतास्ति किलोत्तरदायिता ।
इति न कस्यचनापि क्षतिर्यथा स परमत्र वदेदसदर्थकम् ।। १७८ ।।
स्वगृहवेशन-कर्मविहीनताप्रभृतयोऽत्र भवन्त्यगुणाः परे ।
परमिहर्ततयाप्युररीकृतेऽप्यनुभजन्ति जनाः समुपेक्षणम् ।। १७९ ।।

तदियमस्ति नितान्तमनौचिती निजबिधेयविधानपराङ्मुखी ।
नगरपालिकयाऽथ सभासदैर्हितमिहावहितं नहि राष्ट्रियम् ॥ १७० ॥
तदवधातुमथाक्षमताक्षणे न तु विधेयमुपेक्ष्यमिदं भवेत् ।
अपि सभासदतैव विवर्ज्यतां वहति मुक्तपथे क्रमितुं सुखात् ॥ १८१ ॥
परमिमे हसितुं च विरोषितुं युगपदेकपदेप्यभिलाषुकाः ।
न च जहुः स्वसभासदतामपि न विदधुश्च तदीयविधेयकम् ॥ १८२ ॥
तदवदत्किल टामसमूरकः कुसुममासमवाप्य मधुव्रतः ।
त्यजति मञ्जुलगुञ्जनमीदृशं परिषदासनमाप्य मुनिव्रतम् ॥ १८३ ॥
अनय एष भवेन्नु तदीक्षणं यदिह संकटवर्त्मनि तैः कृतम् ।
अतितरां दमिता अमुनाऽभवन् यदतियातजगद्रणतो गतम् ॥ १८४ ॥
क्वचन वीरपुमान् सुमहानपि प्रतिपराजयमाप्य निराकृतः ।
अपि च द्वादशके टइटैनिकं सलिलयानममज्जत सागरे ॥ १८५ ॥
तदवलोक्य यशस्विभिरप्यहो न परिभावितकातरभावकैः ।
सलिलपोतजनेषु हि तैर्धनं बहु वितीर्य कृतं निजरक्षणम् ॥ १८६ ॥
ब्रुडत एव विहाय जनान्तरान् सपदि रक्षितुमात्मिकजीवनम् ।
यदि यतेत जनो ध्रुवमेव स प्रतिनिधित्वमहत्त्वमवेन्न तत् ॥ १८७ ॥
अथ च साम्प्रतिकी घटनाऽत्तलज्वलनतः किल कैसिलवास्तुनि ।
समभवत्तदिदं जनितत्रपं कथयितुं नहि कोऽपि समर्थकः ॥ १८८ ॥
विपदि तादृशि यत्र जनो मनोनियमनं च मतिं च जहात्ययम् ।
किमु करिष्यति तत्र ततो न वै कमपि दोषमिहाकलयेज्जने ॥ १८९ ॥
परममुष्य न जातुचिदाशयो यदवधानमपीह न दीयताम् ।
बिहितमत्र न साधु तदास्त नो धरतु राष्ट्रधुरं भुवि चात्र कः ॥ १९०॥
विपदि धैर्यमिहास्ति किलाधिकं कुसमयेऽन्यदपेक्ष्यमपेक्ष्य तत् ।
न तदधीरजनेध्रियतां भरो विपदि यो निपतत्यथ वेपते ॥ १९१ ॥
असफलत्वमिदं समयोदितं यदि वदेत्तदहो न किलोचितम् ।
असफलत्वसमर्थनमस्ति तत्किमु ततोऽप्यपराधतरं स्मृतम् ॥ १९२ ॥
समरशीलिषु शक्तिविशेषकेष्वधिकमुत्सहनं ध्रुवधीरताम् ।
श्रितमहो भवतीह किलाखिलं खरनिघर्षविघर्षमयं बलम् ॥ ॥१९३ ॥

रुधिररक्तिमशालिनि विग्रहेऽपि सुगमं भवतीह गुणद्वयम् ।
अगददत्र स मार्शलफोकको द्विगुणवान्विजयं लभते जनः ॥ १९४ ॥
परमहिंसकसङ्करयोद्धृषु त्वधिकमेतदपेक्षितमुच्यते ।
भुवि निजाचरणेन गुणद्वयं तदुपहन्ति स हन्ति महाफलम् ॥ १९५ ॥
व्यतिगतानि दिनानि, दिने दिने किमपि वृत्तमनुत्तममागतम् ।
अशुभमत्र शुभं चिरवन्दिनो वयमहो विरसैकलजीविनः ॥ १९६ ॥
उपगतं किल सप्तदिनं मधौ विविधसङ्कटनं भुवि राष्ट्रियम् ।
मम महाघटनात्र मता तु सा पुरुषरोधितताडितयात्रिका ॥ १९७ ॥
इह च मज्जननी समवैत्तदा यदुपवेशनमाहितमासनम् ।
इयमधिष्ठिततत्सुखदासना सकलयात्रिकसम्मुखतः स्थिता ॥ १९८ ॥
कतिपये सचिवा मम रक्षितुं हि जननीमिह चोद्यमिनोऽभवन् ।
पुरुषनिग्रहमाप्य पराग्गता कृतमथो जनताडनमत्र तैः ॥ १९९ ॥
पतितमप्यभवत्सुखदासनं पुरुषघातजवेन समत्प्रसु ।
शिरसि मातुरभूल्लगुडैः कृतं प्रहरणं त्वसकृत्, स्फुटितं शिरः ॥२०१ ॥
रुधिरधारसमाप्लुतविग्रहा मम प्रसूरगमत्तु विसंज्ञताम् ।
अपि च राजपथात्तदितस्ततो व्यवकृताः सकलाः सहयोगगिनः ॥२०१॥
समयतः पुरुषाधिकृतः पुमान् मम तु मातरमुद्गमयन् शुचा ।
समवरोप्य च मृत्तरिमात्मनो भवनमस्मदधिष्ठितमानयत् ॥ २०२ ॥
स परितः प्रसृतश्च प्रयागकेऽनृततरोऽयमुदन्त इहेदृशः ।
यदिह सा पुरुषप्रहृता प्रसूर्मम मृतेति जनाः कुपिता द्रुताः ॥ २०३ ॥
सममिलन् पुरुषेषु समाक्रमन्न शममप्यसुरक्षणमस्मरन् ।
पुरुषगोलिकयाऽगणितान्वयाः प्रतिहता बहवस्तु जनास्तदा ॥ २०४ ॥
कुघटनात्परमल्पदिनान्तरादिममुदन्तमहं त्वधियातवान् ।
किमपि सप्तदिनोद्गतपत्रकं कुघटनाविवृतिं स्म प्रकाशते ॥ २०५ ॥
अतिकृशां जरतीं निजमातरं रुधिरसंप्लुतकां पथि पातिताम् ।
कलयतः किल दुःखभरस्तदा स मयका नहि सोढुमशक्यत ॥ २०६ ॥
मनसि चिन्तयतः समयस्थितिं परिणतिं च सुसन्निहिते मयि ।
कथमशक्यत तावदहिंसया मयि चिराय चिरेण विनीतया ॥ २०७ ॥

इह विलोकयतो जननीदशां स मम द्वादशवार्षिक-शिक्षितः ।
खलु शमो न तदाऽऽस्त मयि स्थितः किमु भवेन्मयि रुष्यति राष्ट्रके।२०८।
भवतु यद्भवतीति विचारयन्नहमरुष्यमहो पुरुषान् प्रति ।
अथ शनैश्च शनैर्जननी ममाप्यभवदातुरतापथपारगा ॥ २०९ ॥
अपरमासि च वन्दिगृहेऽथ मां समवलोकयितुं यदुपागता ।
शिरसि पट्टिकयापि निबद्धया किमपि गौरवमात्मनि साऽदधात्।।२१०।।
प्रमुदिता यदि साऽन्यजनोपमं लगुडताडनमानमधिश्रिता ।
परमनातुरता न ऋताभवत् जरसि घातशतैरभिताडिता ॥ २११ ॥
तनुरभूद् बहिरेवमनातुराऽन्तरिकतस्त्वभवद्धतिजर्जरा ।
इयमिहैकशरत्परतो भयावहदशां जननीवपुषोऽकरोत् ॥ २१२ ॥

इहैकत्रिंशे यः सखिभिरपरैः पञ्चभिरिहा-
करोदान्दोलां तामृषिकुलमपीयादिह रणम् ।
द्विमासीं तत्साधीं स्थगितमभवन्नाविशदिदं
स एवेदं काव्यं रचयति मनः शान्तिकरणम् ॥

अमुष्मिन् मामक्याः प्रविततकथायाः सुरगिराऽ
नुवादे सत्काव्ये प्रणिगदितकांग्रेसचरिते ।
द्विचत्वारिंशोऽयं शममुपगतः शासनकृतां
विवृण्वन्नुत्पातानिह बहुविधांस्तान्ब्रिटिशिनाम् ।

बरेलीदेहरादूनवन्दिगृहयोः

शिखरिणी

त्रिचत्वारिंशः सर्गः

स नैनीकारायामवसमिह षाण्मासिकमने-
हसं प्रत्यानीतस्तदनु च बरेलीजनपदम्।
मम स्वास्थ्यं भ्रश्यत्समभवदहार्य्या ज्वररुजा
नितान्तं सासह्याऽभवदिह चतुर्मासवसतौ ॥ १ ॥

अतिग्रीष्मे चास्मात्पुनरपि परीवृत्तिरभवत्
सुशीतच्छायायामिह हिमवतो दूनवसतौ।
स्थितः कारागारे स्थिरवसति सार्धानिह चतु-
दशाश्वासान्मासानपरिचितवद् बाह्यजगतः ॥ २ ॥

उपेताद् द्रष्टुं माँ बहुविधजनाद् वृत्तदलतो
मितादध्येतुं यत्त्वधिगतिमवाप्तुं नवनवाम्।
उदन्तान् प्राप्यापि स्फुटघटनमेषां न गतवान्
द्विवर्षान्मुक्तोऽहं निजकृतिषु लग्नोऽस्मि स तदा ॥ ३ ॥

स्थिते राङ्नैतिक्याः अपि सुधरणे लग्नहृदयः
पुनर्मासान् पञ्च व्यगमयमहं साधिकदिनान्।
मुहुः कारागारे न्यविशमधुना यावदिह च
स्थितोऽन्तः पर्याप्तं समयमनये कंचन बहिः ॥ ४ ॥

अतो भिन्नोऽभूवं सकलघटनाभ्योऽस्मि परित-
स्त्विहान्तर्यज्जातं सविवृति न तज्ज्ञातुमलभे।
समस्मिन् सम्मेले सममिलत गान्धिर्जवनिका-
न्तराले किं जातं तदपि नहि मेऽस्ति स्फुटतरम् ॥ ५ ॥

अमुष्मिन् श्रीगान्धिं निशमयितुमाप्तो न समयं
कुतस्तत्सम्प्रष्टुं सखिषु सुलभः स्यादवसरः।
त्रयस्त्रिंशे वर्षे मम भवति संवित्सुमहती
यया स्वातन्त्र्यार्थं स्फुटसमरगाथां प्रकथये ॥ ६ ॥

परं रंगं जाने तदवतरणीमप्यहमिमां
प्रजाने तत्पात्राण्यपि च बहु जानेऽत्र घटनाम् ।
इह स्वल्पा अप्याकलयितुमहं प्राभवमिमा
नवाः प्राच्या वार्ता निजसहजबोधेन सहसा ॥ ७ ॥

इति स्वातन्त्र्यार्थं प्रसृतनवसङ्ग्रामविषयां
गतिं वा सामान्यां प्रगतिमपि शक्तः कलयितुम् ।
चतुर्मासानेहस्ययमचलदेवाग्रहरणः
सवेगं सोत्साहं तदनु स शनैरास्त शिथिलः ॥ ८ ॥

पुनर्मध्ये मध्येऽज्वलदिह रणाग्निः पुनरयं
पराकाष्ठा क्रान्तेरिह कमपि कालं विलसति ।
न सा स्थातुं शक्ता क्वचिदपि किलैकत्र सुचिरं
कदाचित्सत्तेजा भवति च कदाचिन्निपतति ॥ ९ ॥

पुरावेशात्सत्याग्रहसमर आगाच्छिथिलतां
तथाप्यस्यां स्थित्यामयमचलदेवात्र सुचिरम् ।
अवैधं कांग्रेसं धुषितमभवत्संघटनकं
तथाप्येतत्कार्यं स्म सफलतया तर्हि वहति ॥ १० ॥

समं स्वस्वप्रान्तान्तरितकृतिशीलैः सह दृढः
स्थितः सम्बन्धोऽस्य प्रहितनिजवृत्तस्य सततम् ।
स्वसूत्रैः सम्प्राप्ताखिलविवृति तज्जातु समदात्
स्वसूत्रेभ्यः साह्यं धनकृतमपीत्यस्ति विदितम् ॥ ११ ॥

अपि प्रान्तीयानि स्वसफलतया कार्यमवहन्
स्थितः कारागारे यदवधि तदान्यत्र किमभूत् ।
इतीदं नो जाने परमिह विमुक्तेः परमहं
समं युक्तप्रान्तश्रितप्रगतिवृत्तं समविदम् ॥ १२ ॥

स युक्तप्रान्ते कांग्रससमितिकार्यालय इहाऽऽ-
त्रयस्त्रिंशाद्वर्षान्नियमिततया कार्यमकरोत् ।
अयं तावत्कार्यं निरवहत यावत्स्थगितवान्
स काङ्ग्रेसाध्यक्षः प्रथममिह गान्धेरनुमतः ॥ १३ ॥

इहाब्दे सार्धेऽभूत्प्रहित उपदेशो जनपदे-
ष्वभून्मुद्राप्यैव प्रहितमपि पत्रं नियमतः।
अभूत्काले काले प्रतिजनपदं कार्यकलनं
स राष्ट्रीयः सेवादल इह निजांशं स्म लभते ॥ १४ ॥

इहानेकं कार्यं विहितमनिवार्येण विधिना
सुगुप्तेनैवात्राप्यथ च सचिवाः कांग्रसगताः।
स्वकार्यक्षेत्रेषु स्वकृतिभरमाध्याय विदधु-
र्निगृह्यन्ते यावत्तदनु च परे तत्पदमधुः ॥ १६ ॥

अपि द्वात्रिंशाब्दानुभवविदितं यद् भरतभू-
तते गुप्त्या वृत्तग्रहणविवृती कर्तुमखिले।
स्वजालं व्यातन्तुं प्रभवति तु नः सङ्कटनकं
विरोधे सत्यप्येतदुपनयति स्मातिफलितम् ॥ १६ ।

परं गुप्त्या कार्यं प्रतिवदति सत्याग्रहपथं
समेषां जागर्तौ परिणमति नैराश्यजनकम्।
स्फुटे दीर्घे चान्दोलनविसरणे चांशिकतयो-
पयुक्तं तद्व्याप्तिं नहि कलयताज्जात्विति भयम् ॥ १७ ॥

पतत्यस्मिन्नान्दोलनविसरणे वृद्धिमयते
भयं तत् श्रीगान्धिस्तदननुमतिं व्यानगिह सः।
करादानद्वन्द्वं कृषककरणीयं कतिपयै-
र्दिनैर्युक्तप्रान्ताद् बहिरपि गतं गुर्जरपदम् ॥ १८ ॥

तथा यातं कर्णाटकपदमिति प्रान्तयुगले
स्वयं भूस्वाम्येऽपि प्रतियमित आसीत्स कृषकैः।
ततो हानिर्भूयस्यभवदिह सत्याग्रहपथे
तथैषां सम्पन्ने ग्रहणमधिकारस्य हरणम् ॥ १९ ॥

तदल्पत्वार्थं काङ्ग्रसमयततात्पं च विफलं
परं युक्तप्रान्ते किमपि यतनं तेन न कृतम्।
समस्या ह्यत्रत्याभवदतिमहीयस्युभयतः
स्वयंस्वाम्याप्तानामिह हि कृषकाणामधिकता ॥ २० ॥

इह क्षेत्राण्यासन्नतिशयमहान्तीत्यथ समि-
च्च युक्तप्रान्तीयार्थिकपरिकराभावविकला ।
नियुद्धेऽस्मिन् येषां बहुलकृषकाणां क्षतिरभू-
न्न तेषां साहाय्यं किमपि च विधातुं समभवत् ॥ २१ ॥

अनन्तानां तेषां निचयनमपि स्यान्न सुकरं
समावस्थानां च ग्रहणपरिहाने न सुकरे ।
सहस्राणां केषाञ्चन यदि सहायत्वमपि त-
त्करोत्येतत् कांग्रेसकमवपतत्येव विपदि ॥ २२ ॥

बहूनां स्यात्कोपः सति च परितोषेऽपि कियता-
मितीदं कांग्रेसं नहि तदकरोत्कस्यचिदपि ।
इहारम्भे सर्वानपि वयमिदं तावदवदा-
म ते चास्मद्वाचोऽवदधति महत्त्वं च कृषकाः ॥ २३ ॥

विना दोषोद्घोषं कमपि न विरोधं विदधतः
सहन्तेस्मापत्तीरिति समवलोक्यास्मि चकितः ।
यथाशक्ति व्यक्तीः कतिचन सहायत्वमयितुं
कृतो यत्नस्तेषां गृहजनशिशून्ये निगडिताः ॥ २४ ॥

सदुःखे देशेऽस्मिन्निदमतिदरिद्रत्वमयते
यथैकस्मिन्मासेऽलमभवदिदं रूप्यकमपि ।
रणेऽस्मिन् कांग्रेस्यैर्तदपि तदवैधं स्म घुषितं
स्वभृत्यानां वृत्तिं सततमददात्स्तोकबहुलाम् ॥ २५ ॥

गतास्ते वन्दित्वं क्रमपरिगतं तत्परिजने
सुसाह्यं कांग्रेसं व्यतरदभवत्तद्व्ययधनम् ।
ततः पत्रं पत्रीमपि शतशतं मुद्रयितुम-
प्यभूद् यातायातं रचयितुमपि द्रव्यचयनम् ॥ २५ ॥

दरिद्राणां केषाञ्चन जनपदानामपि तदा
सहायत्वार्थं च द्रविणनिचयं कांग्रसमधात् ।
बलिष्ठं वै शक्तं दमयितुमिदं शासनमहो
घने सङ्ग्रामेऽस्मिन् व्ययबहुविधत्वं स्म सहते ॥ २६ ॥

स्थितं युक्तप्रान्ते व्ययभरमधात्कांग्रसमिदं
तु विंशत्या मासां शतशतत्रिषष्टेरनधिकम् ।
प्रयागे चाग्रे वा श्रवणपुरके लक्ष्मणपुरे
स्थिताः कांग्रेसस्य व्ययभरमधुस्ताः समितयः ॥ २८ ॥

अयं युक्तप्रान्तः समयसमयेऽग्रेसरतया
ऽकरोत्कार्यं किन्तु व्ययभरमधात्स्वल्पमधिकम् ।
अमुष्य द्रव्यस्य व्ययतुलनया शासनव्ययै-
र्भवेदेवाश्चर्यं सपदि विहितैराग्रहदमे ॥ २९ ॥

स्मराम्येवं किञ्चित् समितिभिरनेकाभिरितरे-
तरप्रान्तस्थाभिर्विधृत इह भूयान्व्ययभरः ।
विहारप्रान्तो निर्धनजनपदः सन्नपि रणे
स्वतन्त्रत्वस्यास्मिन् सुबहुसहयोगं विहितवान् ॥ ३० ॥

तदास्तां, कालोऽयं त्वशिथिलयदान्दोलनमिदं
तथाप्येतन्मन्दं प्रचलदपि वैशिष्ट्यमवहत् ।
दिनैस्तैर्गच्छद्भिः श्रमशिथिलसाधारणजनः
कियन्तञ्चित्कालं व्यरमत किलान्दोलनरणात् ॥ ३१ ॥

इदं राष्ट्रीयान्दोलनमभिहतं शासनकृतैः
कठोरैरातङ्कैरिव नियमनैः सार्वजनिकैः ।
इतश्च श्रीगान्धिर्हरिजनसमस्याभिमुखतां
जनानामाकल्प्य प्रशिथिलमकार्षीदनशनैः ॥ ३२ ॥

स्वतन्त्रत्वप्राप्त्यै समररभसो यद्यपि चल-
न्नभूत्किञ्चिच्चान्दोलनमपि त्रयस्त्रिंशपरिधौ ।
ततो रुद्धे सत्याग्रह-कलह-रूपे व्यवहृता-
वपीदं सम्प्राप्तं ध्रुवमवसितिं चिन्तनगतम् ॥ ३३ ॥

अभूच्छून्यं राष्ट्रं कठिनकठिनाभिर्दमनकृ-
त्क्रियाभिः क्लृप्ताभिर्भुवि ब्रिटिशशिष्टैरपसरैः ।
गतं धैर्यं राष्ट्रात्क्वचन च न सोत्साहकलिका
प्रभुर्व्यक्तिः सत्याग्रहमपि च कर्तुं न तु गणः ॥ ३४ ॥

परं सर्वः सत्याग्रहरुचिरिहासीत्कृतिमयो
बहिः किञ्चिद् दृष्टोऽन्तरथ नवरूपान्तरधरः।
वयं कारागारस्थितिषु न हि रोचेमहि यथा-
तथा नो खल्वेवं पततु महदान्दोलनमिति ॥ ३५ ॥

न चास्माकं कश्चिन्मनसि दधते शीघ्रफलिता
मिदं तावन्निश्चप्रचमभवदुत्थाय यदि चेत्।
जनाः सर्वेऽप्यान्दोलनकमकरिष्यन्नदमिताः
तदाश्चर्योत्पाद्यं विजयमगमिष्यन्नविकलम् ॥ ३६ ॥

न वै तादृग्दैवं वयमिह निजं विश्वसितुमा-
श्वसन्तोऽभूमेति क्रमितुमुदिता दीर्घसमरम्।
कदाचिद्यस्तीव्रो भवति च कदाचित्प्रशिथिलः
पतत्यन्तश्चैष क्वचन विषमे संशयपथे ॥ ३७ ॥

अनेन स्युर्लोकाः सततमनुशिष्टाः पुनरिमां
विचाराणां धारां निजहृदि निधास्यन्ति शनकैः।
इतीदृक्षे लक्ष्ये ध्रुवमुपगताः स्मः सफलताम्,
अभैषं द्वात्रिंशे झटिति मिलितात्कृत्रिमफलात् ॥ ३८ ॥

यतस्तस्मिन् कश्चित्सपदि पणवन्धोऽत्र निचितो-
ऽभविष्यत्तस्मिंश्च ब्रिटिशमधरिष्यन्निजजनान्।
अमीषां हस्ते चाखिलनियममाधास्यततराम्
इति द्वात्रिंशीयाऽभ्युदघटयदीक्षाऽत्र नयने ॥ ३९ ॥

भवेन्नः साफल्यं समयगतमेवाभिलषितम्,
जनानां सामर्थ्ये सति च मननीयः स समयः।
विचाराः स्पष्टाः स्युर्विजयविषयेऽप्यास्तिकसताम्
यथा साफल्यस्याखिलमुपनतं स्यात्फलमदः ॥ ४० ॥

न चेदेवं तत्स्यात्तदिह जनता योत्स्यति, बलिं
स्वसर्वस्वं दास्यत्यथ सफलताया अवसरे।
परे लोका एत्य प्रयतनफलं राष्ट्रविजयं
स्वनाम्नाऽऽख्यास्यन्ति प्रतिफलमवाप्स्यन्ति च ततः ॥ ४१ ॥

भयं भूयिष्ठं तद् ध्रुवमभवदित्यस्त्यवितथं
स्वयं कांग्रेसस्याप्यनियतमिवासीदुदयनम् ।
वयं कीदृक्शिष्टं पुनरिह समाजं च कतमं
प्रतिष्ठाप्यात्रत्यं सुखमयभविष्यं मनुमहे ॥ ४२ ॥

न सम्यग्भात्यस्मानिह कतिपये कांग्रसजनाः
प्रवृत्ते राज्येऽस्मिन्न बहुपरिवृत्ति प्रणिदधुः ।
इतो वैदेशिक्यं ब्रिटिशमुखमंशं निरसितुं
स्वदेश्यत्वांशस्य स्फुटतरनिवेशेऽस्ति विजयः ॥ ४३ ॥

प्रशिष्टेर्भक्तेभ्यो न खलु भयमासीन्मनसि नो
नतास्ते तां शक्तिं भरतभुवि या शासनमधात् ।
भयं त्वासीदेभ्यः प्रतिसहयुजां मध्यमपथे
प्रयातानां वृन्दाद् ब्रिटिशमतमार्गेऽनुसरताम् ॥ ४४ ॥

इमे काले काले विदधति समेता यदि मनाक्
क्वचिच्छिद्रान्वेषं स भवति वृथा मत्यरहितः ।
इदं सर्वोऽजानात् नियमपरिपोषव्रतधरैः
कथाचित्तैः सत्याग्रहसरणिरेषा न महिता ॥ ४५ ॥

इतोऽप्यग्रे श्रुत्वा ब्रिटिशदिशि तस्थुश्च बहुधा
सहन्ते स्मैवैते नगरजनस्वातन्त्र्यदमनम् ।
इमे भीता दूरान्मुनिवदनुपश्यन्ति तटगा
इवाशेषं सत्याग्रहदमनचक्रं प्रचलितम् ॥ ४६ ॥

न तन्नोऽस्मिन् सत्याग्रहरणविधौ, राजनयिके
समग्रे राष्ट्रायुष्यपि गतिविधौ सार्वजनिके ।
विरोधे त्वेतेषां विविधदमनानामपि मना-
गिहोक्तं केनापि क्वचन न किलेत्यस्ति विशदम् ॥ ४७ ॥

परं ये सामान्यादपि विविधवैवश्यनिसहाः
स्वतन्त्रत्वं वाञ्छन्त्यभिमुखमिमे संगरजुषः ।
बलात्कारस्याग्रे नमयितुमनङ्गीकृतवतां
शिरो, वै वीराणां विहितमभवद् वन्दिभवनम् ॥ ४८ ॥

विशिष्टास्ते शिष्टा दमनमुपयाता अतितरां
विरोधे शिष्टैस्ते न ननुनचकारं त्वभिदधुः ।
कदाचित्तैः किञ्चिन्मृदु विवरणं चेत्कृतमपि
तदा ते स्वं दोषं क्षमयितुमिवात्राभिदधति ॥ ४९ ॥

विवृत्या साकं ते कटु समरटन् कांग्रसपदे
तदीयानां चार्थे विदधति तु सत्याग्रहरणम् ।
इह प्रत्यग्देशे नगरजन-स्वातन्त्र्यविषये
मतं शक्तं जातं किल सकललोकस्य विशदम् ॥ ५० ॥

अतस्तत्र भ्रंशे विदधति विरोधं किल जनाः
इदानीं तद्वृत्तं त्वभवदितिवृत्तं किल ततः ।
तथाप्यत्रानेके स्वयमभिमुखं युद्धविमुखा
सभायां संघे वा कथनलिखने मुद्रणविधौ ॥ ५१ ॥

जनस्वातन्त्र्यस्य क्षणिकमपि भङ्गं न सहते
जनः पाश्चात्यश्चाचरति सततान्दोलनमपि ।
प्रशिष्ट्या तद्भङ्गो भवतु कुहचिन्नेति विषये
सहायत्वं नित्यं श्रयति न तथा भारतजनः ॥ ५२ ॥

इहत्या ब्रूयुस्ते लिवरलपदा मध्यमपथा
वयं पाश्चात्याश्चेत्युभयविधयो याम समताम् ।
परं नाम्नैवेते दधति समतां नैव कृतिभिः,
तथाप्येतैराशास्पदमदमनार्थं प्रयतितम् ॥ ५३ ॥

समानेऽप्येतेषु ब्रिटिशदमने न प्रयतितं
किलामीमिर्नानाविधगणितस्वातन्त्र्यमवितुम् ।
न चैतेषां वाल्टेयरवदिह कश्चित्कथितवान्
यदुक्तं तन्नेष्टं परमिदमविष्याम्यसुबलैः ॥ ५४ ॥

इति स्याद्वा तेषामिह न खलु दोषः स भवति
स्वतन्त्रत्वस्यैतैः क्वचन जनतन्त्रस्य च कृते ।
न नामात्र प्रोक्तं यदिह वयमेतद् द्वयमपि
प्ररक्षिष्यामो वः सततमिति नासीत्प्रतिश्रुतम् ॥ ५५ ॥

स्थितिस्तेषामग्रे पुनरियमुपेताऽत्र कथितः
किलैतादृक् शब्दो महति विषमे प्रेषयति तान् ।
भवेद्धिन्दुस्थाने दमनमिदमेषां प्रणयिनां
स्वतन्त्रत्वस्याद्धा प्रभवति तु मध्याध्वगनृणाम् ॥ ५६ ॥

इति प्रेक्षापेक्षा समुचिततरा भाति हि पुरा-
ऽभवद्धिन्दुस्थाने यदपि तदभूदार्तिजनकम् ।
परं तैस्तत्सर्वं परमसुखतो दृष्टमभवत्
कदाचिन्मैंचेस्टरभिवितृसंवाददगिरि ॥ ५७ ॥

भवेद्धिन्दुस्थाने किल दमनवैज्ञानिकविधा-
प्रयोगैः साफल्ये प्रकटितमभून्मोदमिलनम् ।
ब्रिटेनस्येदानीं प्रभुभिरिह नूत्नेप्सितविधि
कृतो राजद्रोहाधिकृतमुररीकर्तुमुदयः ॥ ५८ ॥

विशेषान्मध्यस्थैः श्रमिकदलगैश्चास्य विहितो
विरोधो वार्ताभिः सह च बहुभिः कोऽपि कलहः ।
अभूदस्याधारो यदयमिह वाचि स्ववशतां
निहन्तीत्याधत्तेऽधिकृतिमपि न्यायाधिपतिषु ॥ ५९ ॥

यथेमे वीक्षाया विदधतु निदेशान् प्रतिजनं
इतीमाष्टीकाश्चापठमभवमत्यार्द्रहृदयः ।
सहैवैतच्चित्रं मम नयनयोर्भारतभुवो-
प्युपेतं यत्रास्य स्ववशिमशतं यान्ति विधयः ॥ ६० ॥

ममाश्चर्यं येषां सपदि बलमाङ्ग्लेषु शलभो
रुणद्धयुष्ट्रो गीर्णो भरतभुवि तैरेव भवति ।
अमुष्मिन् वैशिष्टये ब्रिटिशजनगे विस्मयभरं
भजे येऽनुस्वार्थं विदधति नतं नैतिकमतम् ॥ ६१ ॥

गुणान् पश्यन्त्येते निजमतिषु साम्राज्यकृतिषु
मुसोलिन्याक्रान्तावथ हिटलरस्यापि समरे ।
इभे ताभ्यां रुष्यन्त्यभिदधति निन्दात्मकवचः
परं हिन्दुस्थाने स्ववशिमहृतिं प्रस्तुवति ते ॥ ६२ ॥

अमुष्मिन् कार्ये प्रस्तुवति च शतं नैतिकमता-
न्यहो नास्ति स्वार्थं किमपि किल कार्ये जनहिते ।
समन्तादत्राग्नौ ज्वलति किल शिष्टेः कटुतया
परीक्षा स्त्रीपुंसोभयजनगता तत्र चलति ॥ ६३ ॥

तदात्यन्तं दूरे चयनितजना लन्दनपुरे
विधानं नः शिष्टेः कलयितुमभूवन् सुमिलिताः ।
त्रयस्त्रिंशे तार्तीयकमिलनकाले समितयो
व्यधीयन्तैतासामभिमतसदस्यत्वगतये ॥ ६४ ॥

महासंसत्सभ्यः स्म यतनशतं तत्र दधते,
यथा प्रातिस्विक्यं सुखमपि लभेरन्नधिकृतेः ।
वहन्तां कर्तव्यं सकलजनसम्बद्धमपि ते
महान् सम्मर्दोऽत्रागमदिह महीयोव्ययबलात् ॥ ६५ ॥

ततः संयुक्ताया इह जनसभायाश्च समितिः
समेतास्यां कार्यं कृतमधिकृतैर्भारतजनैः ।
इदानीं साक्ष्यार्थादपि गतवतां शासनमदाद्
व्ययं तद्यात्रायाः स्वधननिधितोऽत्यन्तसदयम् ॥ ६६ ॥

पुनर्नैके लोका भरतवसुधासेवकतया
प्रयुक्ता पारेऽब्धि सकलजनकार्ये व्ययबलात् ।
अमीषां केषांचिद् व्ययमधिकमाप्तुं प्रयतनं
कृतं लोके ख्यातं किमिह जनसेवाविधिरयम् ॥ ६७ ॥

जनान्दोलाद्दूश्यं निमिषितवतां भीतमनसां
धृतस्वार्थानां वै जनप्रतिनिधीनां समुदयम् ।
विदेशे संप्राप्तं समितिगतमालोकितवतां
न किञ्चित्त्वाश्चर्यं भवतु जनसेवाव्रतभृताम् ॥ ६८ ॥

परं राष्ट्रीयत्वं यदिह हृदये तत्कलयतो
ऽभवद्भूयो दुःखं यदिह जननीभूमिरभितः ।
विपज्जाले मग्ना तदपि यदि कश्चित्स्वसुतनयः
करोत्येवं चेष्टामहह ! किमु वाच्यं बुधजनैः ॥ ६९ ॥

विवेकाख्या दृष्टिर्बहुजनमिदं दर्शयति यद्
तदप्यच्छं जातं प्रगतिरिपवो यत्पृथगिताः।
अमीभ्यो देशेऽस्मिन् नवप्रगतिशीलेभ्य इति यत्
तदास्माभिर्ध्यातं गलितमधुना तद्विमृशताम् ॥ ७० ॥

विवेकेनानेन स्फुटसहकृतं स्याद्धि जनतां
विनेतुं तां शिक्षां भरतभुवि वै राजनयिकीम्।
इदं च स्पष्टं स्यादिह निजवशत्वेन सकलाः
समस्याः सामाजिक्य इह च समाधातुमुचिताः ॥ ७१ ॥

शिरोभारं चेमं निरसितुमपि स्याम प्रभवः
प्रजानामित्येतत्फलमपरमप्यस्ति सुलभम्।
परं त्वेतद्दृष्ट्वा भवति चकितं चित्तमिह नोऽ
ऽस्त्यमीषां नो नित्यापितु नयिकबौद्धिक्यपि दृशिः ॥७२ ॥

पृथक्कर्तुं स्वात्मानमनुविहितं भारतभुवो
न किञ्चित्सूत्रं तानिह जनतया योजयति यत्।
न बुध्यन्ते ह्येते सपदि जनतां नापि जनता-
मनोभावानेतान् प्रणिदधति दुःखे च मरणे ॥ ७३ ॥

अमीषां ख्यातानां सहमतिषु सा वास्तविकता
नयज्ञानामेका विरलतरवस्तुन्युपगता।
अमुष्मिन्साम्राज्ये ब्रिटिशकरगे शक्तिरतुला
पराजेतुं शक्या न भवति तदिदं साधु नयत ॥ ७४ ॥

मुदा वा वैवश्यादिति न तु कदाचित्स्फुरति यद्
विना तत्सद्भावाद् विधिविरचनं दुःशकमिति।
व्यलेखि श्री जे. ए. स्पनदरबुधेनाद्यतनके-
तिहासः संक्षिप्तो, लिखितमफलत्वं सुसमितेः ॥ ७५ ॥

यथा वैधानिक्यं प्रयतितमभूत्सङ्कटवरं
परीहर्तुं ह्यायर्जनपदभुवां दृष्टिरभवत्।
नयज्ञः सन्नेता यदि विपदि सोऽन्विष्यति निजं
विधानं तर्ह्येष ज्वलति कुरुते कूपखननम् ॥ ७६ ॥

इहाग्निर्यो दीप्तो भरतभुवि तस्मात्स बलवान्
तदार्यदेशे यो दशमशरदि प्राज्वलदयम् ।
इहत्योऽग्निः काले क्वचन यदि निर्वाणमयते
तदाप्यङ्गारास्ते ज्वलितमहसा भायुरभितः ॥ ७७ ॥

न ते निर्वाप्याः स्युः स्ववशिमसङ्कल्पवदथो
स हिंसाभावोऽयं ब्रिटिशजनशिष्टावुपचितः ।
स आश्चर्यं सूते यदि सपदि हिंसात्मकपर-
म्परेयं प्राचीना भ्रमितमिह तैः सैनिकबलैः ॥ ७८ ॥

अमीषां रक्षार्थाः परमधिकृताः सैन्यविधिना
प्रशिष्टिं कुर्वन्ति क्रमविजितदेशेऽधिकरणात् ।
परं सेनाध्यक्षैरिह कटुतरा या स्म क्रियते
स्वकीयां वृत्तिं तां प्रशमसमये ते व्यगमयन् ॥ ७९ ॥

कृताः काण्डा वङ्गेष्वितरविषयेषूग्रचरितै-
रमीभिः सा हिंसोपचयमयिता शिष्टिहृदये ।
मिषात्तेषां सैषाधिकमकुरुतास्मिञ्जनवधं
ततः शिष्टेर्नीत्या विविधनियमैश्चाधिकृतयः ॥ ८० ॥

अदुर्हिन्दुस्थाने ब्रिटिशपुरुषेभ्योऽप्यधिकृती
यथाभूत्तर्ह्यस्मिन् किल पुरुषराज्यं हि परितः ।
इहासीन्नैतेषां विधिरपि निषेधोऽपि नियतो-
ऽधिकं वा स्तोकं वाऽखिलजनपदेष्वास्त दमनम् ॥ ८१ ॥

समेऽप्यस्मत्प्रान्ता दमनपवमानेऽत्र विषमे
न्यपप्तन् किन्त्वासीदिदमतिशयो वङ्गविषये ।
तथा सीमाप्रान्तेऽत्यधिकविपदोऽवार्यसहना
अभूवन्याभिः स प्रथितिमगमत्सैनिकपदम् ॥ ८२ ॥

[समस्यापूर्तिं चाकृषिम वयमेते ऋषिकुले-
कवीनां गोष्ठयन्तः 'शमयति तरङ्गं न दमनम्' ।
इति प्रायोऽन्यास्ताः 'परिपतति वीरेऽत्र समरे
न संशीतिः क्वापी, त्यतिसदृश वाच्याश्च बहुलाः ॥८३॥]

व्यवस्था चात्रत्या भवति पुनरर्धान्यविहिता-
द्वंसैन्येत्याख्या चाभवदिह महत्त्वं प्रथमतः।
नियुद्धादेर्दृष्टया पुनरिह तदान्दोलनमभू-
त्प्रसिद्धंयद्रक्तान्तरवसननाम्नात्र जगति ॥ ८४ ॥

यतो भीता शिष्टिर्व्यहिनुत शमस्थापनकृते
तथोत्पातिग्रामप्रशमनकृते सैन्यशकलान्।
पुनर्हिन्दुस्थानेऽप्यभवदथ साधारणविधि-
र्यथा यत्रैवेच्छत्यथ च हिनुते सैन्यमिह सा ॥ ८५ ॥

सवङ्गेष्वन्येषु श्रुतजनपदेषूग्रहृदयैः
कृता हत्याकाण्डा अपि समनुचिन्वन्नदयताम्।
गता हिंसावृत्तिस्तदुपचयमेषां कमपि सो-
द्गता शिष्टेर्नीत्याधिकृतपुरुषाणामधिकृतिः ॥ ८६ ॥

यया हिन्दुस्थाने नृपपुरुषराज्यं विरचितं
न यस्मिन्वै तेषां किल विधिनिषेधौ तु नियतौ।
समस्तप्रान्तेषु प्रमितममितं वात्र दमनं
व्यधात्सीमाप्रान्तेष्वधिकमथ बङ्गेष्वपि तथा ॥ ८७ ॥

तयोः सीमाप्रान्तः सततमभवत्सैनिकपदं,
प्रबन्धस्तस्याभूत्किल बहुतया सैन्यविहितः।
नियुद्धेक्षातोऽस्याधिकमहिमशालित्वमभवत्
इदानीमत्रान्दोलनमतिभयं तेष्वजनयत् ॥ ८८ ॥

इह स्थाप्या शान्तिः सपदि विषमग्रामसमता
प्रणेयेत्यादिश्य प्रहितवदिदं सैनिकदलान्।
तथा हिन्दुस्थाने विधिरयमभूद्ग्रामनिचयं
शतैर्दण्डैः प्राशाद्ब्रिटिशजनशिष्टिस्तु परितः ॥ ८९ ॥

कदाचिद् बङ्गादौ प्रतिनगरमेषाऽत्र पुरुषान्
प्रयुङ्क्ते दण्डत्वादधिकृतिमनेकामुपगतान्।
न तेषां रोद्धासीत् क्वचिदपि च कश्चिन्न नियत-
स्तदास्मिंस्ते नानाविधमतिशयं चक्रुरनये ॥ ९० ॥

वयं द्रष्टुं प्राप्ता ध्रुवमवसरांस्तत्र नियम-
व्यवस्थादेर्नाम्नाऽनियममनवस्थाञ्च विहिताम्।
तदा वङ्गे भूयो जनपदगता नैकघटना
अपश्यामैतेषु प्रतियुवककैशोरमनयम् ॥ ९१ ॥

यथा शत्रुः कुर्याद् ब्रिटिशप्रभुणा तत्र वसत-
स्तथा लोकान् प्रत्याचरितमभवद् हिन्दुषु परम्।
नरं वा नारीं द्वादशशरदवस्थामुपगतात्
समारभ्याऽऽपञ्चद्विदशशरदं यावदखिलः ॥ ९२ ॥

बहिर्गन्तुं नासीत् परिचयदलात्कश्चन विना
ऽधिकारी, तद्यूथान्यगुरिह च निर्वासनमथ।
दृशो बन्धं, तेषां नियमितमभूद्वेषरचनं
तथा शिक्षाकेन्द्राण्यपि नियमितानि ब्रिटिशिकैः ॥ ९३ ॥

यदैच्छच्चारोत्सीत्प्रचलदपि केन्द्रं किल तदा
द्विचक्र्यारोहोऽपि प्रतिविहित आसीत्क्वचिदपि।
प्रयातायातेषु प्रतिविदित आस्तां च पुरुषो-
ऽस्तमेते सूर्ये कोऽपि च न बहिरीयादिह गृहात् ॥ ९४ ॥

निशि प्राप्ते कार्ये विविधनियमान् ध्यायतु जन-
स्त्वितः स्वातन्त्र्यस्य प्रतिपदमभूद् बन्धनमिदम्।
भ्रमन्ति स्म प्रायो दिशि दिशि च सेना अवहिता
तदर्थाः सज्जन्ते सपदि पुरुषा ग्रामदमनाः ॥ ९५ ॥

महान्ति क्षेत्राणि प्रततवलयानि स्म परितः
महाग्रामेष्वासीत्कटुदृगिह जायापतिगणे।
स्थितिस्तेषामासीदनुचरवदेवाखिलनृणाम्
अनीत्वादेशं ते त्रिकटमिव नार्हा हि चलितुम् ॥ ९६ ॥

इदं वै निर्णेतुं न मम करणीयं तु भवति,
यदेतेषां क्लृप्तौ ब्रिटिशदृशि कासीद्विवशता।
अवैवश्ये शिष्टैः शिरसि किमु दोषो न पतति
यदेषा स्वातन्त्र्यं तदवमनुतेऽन्यायकरणी ॥ ९७ ॥

तथास्माकं हानिं जनयितुमियं दोषमकरोत्
अथासौ वैवश्ये रचयति तथा स्मेति कथिते।
इहान्त्या निर्णीतिर्भवति विदिता तस्य महतो
महाहर्म्यस्यैयं परमशिथिला साऽवतरणी॥ ९८॥

इयं हिंसावृत्तिर्ब्रिटिशप्रभुताया अनुगता-
ऽभवत्कारागारेष्वपि विविधवर्गे विभजनैः।
परीहासः सोऽयं किल तुदति तानुच्चतरया-
ऽभवन्येऽत्र श्रेण्या वसतिमुपनीता निगडने॥ ९९॥

इमां श्रेणीं केभ्यश्चिदिह च मितेभ्यो वितरता-
ऽमुना मान्या नार्यो मुदुप्रकृतयश्चापि बहवः।
स्थितावत्रैतस्यामनवरतगा यन्त्रगतिके-
तरेभ्यो वन्दिभ्योऽप्यतिकटुदशां सा व्यदधत॥ १००॥

इयं नीतिः शिष्टैः स्फुटमिह विभाति स्म यदियं
परेभ्यो वन्दिभ्यो व्यथयितुमना राजनयिकान्।
स्वकारागारेषु क्षिपति हि विभक्तेषु बहुधा
यथा लोका विद्युर्न विषमदशामेषु गमिताम्॥ १०१॥

निरीक्षाकृन्मुख्यो निजरहसि पत्रेऽदिशदिदं
यदत्रत्यः सत्याग्रहकृति किलोग्रं व्यवहरेत्।
त्रयस्त्रिंशे सत्याग्रहकृतिषु वै पञ्चशतकं
ह्यभूद्वेत्रैः सन्तर्दितमिति हि होरस्य विदितम्॥ १०२॥

न तत्रेदं स्पष्टं यदिह नियमोल्लङ्घनकरा
अपि न्याविष्टा वा किमुत सकला राजनयिकाः।
इदं वेत्रैः सन्ताडनमिति च साधारणमभूत्
इति ज्ञातं तत्तत्स्थलविदितवृत्तादनुदितम्॥ १०३॥

विरोधे वेत्राणां वयमुपवसामः स्म त्रिदिनम्,
तथास्मिन् दण्डे पाशविकव्यवहृत्यास्मि व्यथितः।
इदानीमप्येषा व्यथयति पुनश्चार्तिमदधे
परं किं कुर्वेऽत्रेत्यमनुत न सान्तर्मम मतिः॥ १०४॥

पुनश्चैषां रोधेऽनशनमिति नाभात्समुचितं
तथा वैवश्यं मेऽन्वभवमिह भूयोऽभिसहनात् ।
जडीभूतं तत्पाशविकव्यवहारं प्रति पुनः-
पुनर्जुष्टं दुष्टं व्यसनमुपयाति प्रकृतिताम् ॥ १०५ ॥

इहास्मल्लोकानां कठिनकठिनं कार्यमददुः
नियुक्ताः पेषण्यां क्वचन च तिलस्नेहकषणे ।
तदादावन्यस्मिन्नपि निजवयोभारमननम्
क्षमायाच्जापूर्वं सप्रतिश्रुति मुक्तेश्च वरणम् ॥ १०६ ॥

क्षमायाच्ला काराधिकृतिषु महद्गौरवकरम्,
सुपारुष्यं दण्डे नवयुवककौमारगणगम् ।
सहन्ते नान्यायं स्वतनुतपनं वाङ्नियमनं
असम्मानं चेते कथमपि सहन्ते न तरुणाः ॥ १०७ ॥

इहाभून्नारीणां वसतिरतिदुःखाय किल ता-
मनुध्यायन् दुःखात्यतिशयमसह्यं त्वनुभजे ।
सुमध्यश्रेणीकाः पुरुषप्रभुताके निजसुखं
समाजे संन्यस्याप्यधिकतरसन्तापमथिताः ॥ १०८ ॥

अमूषां स्वातन्त्र्यध्वनिरुभयमर्थं ध्वनयति
न सन्दिग्धं चैता स्ववशिमरणेऽस्मिन् दृढतया ।
न्यपप्तन्नस्पष्टे पुनरविदिते किन्तु विकटो-
त्कटे सोत्कण्ठं ता गृहपरवशिम्नोऽपि निसहाः ॥ १०९ ॥

पराधीना मुक्ति श्रयितुमतितीव्रव्रतधरा
अमूष्वल्पास्त्यक्त्वाखिलमपि गणं वन्दितुलया ।
इमे न्यूने वर्गे प्रणिविहितवन्तोऽधिकरणाः
प्रकोष्ठस्यासन्नेऽपि वसतिमलभे, तत्परिचितः ॥ ११० ॥

इमा वासं प्राप्ताः पतिततरनारीभिरभितः
समानेऽस्मिन् कोष्ठे सदृशगतयोऽन्याभिरभवन् ।
अभूद्भित्तिर्मध्ये परमिह समस्तं श्रुतिपथं
नयाम्युक्तास्तस्मिन् कृतवसतयो राजनयिकाः ॥ १११ ॥

अहो कारागारेऽधिकृतिमयिताः क्षुद्रमहिलाः
सदा गालीदानं विदधति तु ताभ्योऽत्र बहुशः।
अमूष्वासीदेका मम परिचिता स्वस्थमहिला
गृहे यस्याः पूर्वं कुहचिदुचितातिथ्यमभजम् ॥ ११२ ॥

तयापि श्रव्यास्ताः सततमभवन् हन्त कटुकाः
पदे चार्थे गालीरऽहमश्रृणुवं ताः सह रुषा।
इदं साक्षाद्ध्येयं व्यवहृतिरभूद्राजनयिकैः
समं कारागारेऽनुचितकटुकैः क्षुद्रवचनैः ॥ ११३ ॥

त्रयस्त्रिंशे सेयं त्वपसररुचीनामनुगता
ततोऽस्या हेतुर्वा परिणतिरभूच्छासनरुचिः।
सदा युक्तप्रान्तेऽपसरहृदयं बन्दिनि जने
मनुष्ये चाप्येकां व्यवहृतिमगादत्यनुचिताम् ॥ ११४ ॥

अमुष्या दृष्टेश्चोपगत इह दृष्टान्तनियमो
न यस्मिन् सन्देहावसरविसरोऽत्र प्रभवति।
कदाचिद्वै कश्चित्सुविदितरो बन्दिगृहके
निरीक्षावानायान्न स नियमभङ्गी सर इति ॥ ११५ ॥

अमुष्मै चोपाधिं वितरितवती शिष्टिरिह सा
स नोऽवादीत्पूर्वं क्वचन कृतवीक्षोऽहमलिखम्।
अयं काराध्यक्षो ध्रुवमवति शिष्टिं समुचितां
मनुष्यत्वं रक्षन्निति स विनयान्मामकथयत् ॥ ११६ ॥

मनुष्यत्वं रक्षन्निति न लिखतान्माभ्यवर, मे
विशेषं नो शिष्टिर्मयि हि शुभदृष्टिं तु विभृयात्।
परं नाहं स्वस्माद्विचलित इहाऽऽसं तु मननात्
न तेनास्य श्रेयःक्षतिरिह भविष्यत्यधिकृता ॥ ११७ ॥

इति ध्यात्वा लेखे तु किमपि परिवृत्तिं न कृतवान्
परीणामे तस्य क्वचन परिवृत्तिः समभवत्।
स्वगेहाद्दूरस्थे प्रणिहितमिमं बन्दिगृहके
मनुष्यत्वस्यायं कठिनतरदण्डोऽभ्युपगतः ॥ ११८ ॥

तदा काराध्यक्षाः कतिचन कठोरा रुधिरपा
अभूवन्न्यायं वाऽनयमपि न तेऽपेक्ष्य चलिताः।
उपाधींस्तेभ्योऽदात्किल ब्रिटिशशिष्टिः समुदयं,
चलत्येषा कारास्वनृतमतितोत्कोचपतिता ॥ ११६ ॥
विशुद्धः कोऽपि स्यात्तदुभयदुषाऽस्पृष्टहृदयो,
भवन्त्येते कारास्वनृतमनसोत्कोचपतिताः।
कठोरा ये शिष्टौ प्रखरमतयो वात्र विदिता
इति प्रायो जातो मम च सुहृदां चाप्यनुभवः ॥ १२० ॥
महासङ्घाग्योऽहं यदिह बहिरन्तश्च मिलितै-
र्जनैः कारागारे मयि सविनयं सुव्यवहृतम्।
यदप्यस्याः पात्रं नहि समभवं सुव्यवहृतेः
स्तथाप्येका वार्ताऽतुददिह सुहृद्वर्गमथ माम् ॥ १२१ ॥
मदीयाम्बा, पत्नी मम च कमला चापि दुहिते-
न्दिरा कारागारे मिलितुमगमन् श्रीरणजितम्।
विना दोषं तत्राकृत तदपमानं त्वपसरो-
ऽपसार्यैताः कारागृहभवनतो घातसहितम् ॥ १२२ ॥
इदं श्रुत्वा खिन्नोऽविदमिह नहि प्रान्तप्रभुता-
प्यमुष्मिन् वृत्ते सा वहति शुभवृत्तिं स्वहृदये।
गतो घोरं घातं त्ववितुमथ काराधिकृतिना-
प्यसम्मानादम्बा बहिरिह कृताऽऽयास्यति न सा ॥१२२ ॥
न चाहं द्रक्ष्यामि क्वचन कमपीहेति तदनु
स्थितः कारागारे कमपि मिलितुं नैच्छमवशः।
अवात्सं षण्मासाधिकसमयमेषोऽत्र महति
स्फुटं कारागारे क्षुभितहृदयो दूननगरे ॥ १२३ ॥

महाकाव्ये भव्ये त्वमरविधुनाऽऽकल्पिततनौ
त्रयश्चत्वारिंशोऽवसितिमयते सर्ग इह सः।
बरेलीदूनस्थे अधिवसति वै वन्दिसदनं
महानेतर्यस्मिन् किमभवदिति प्रोक्तकथया।

कारागारे मानसिकावारोहावरोहौ

वसन्ततिलका

चतुश्चत्वारिंशः सर्गः

गोविन्दवल्लभसखस्य ममाभवत्त-
त्स्थानान्तरं सपदि तद्ध्यधिदूनकारम्।
किञ्चित्प्रदर्शनमिहास्तु न चेति शिष्ट्या
नावां बरेलिनगराद्रयले विसृष्टौ ॥ १ ॥

पञ्चाशतोऽन्तरमतीत्य तु मीलकानां
स्थाने लघुन्यहिनुवात्र च वाष्पयाने।
रात्रौ च मृत्तरिमधिश्रितयोरनेक-
मासान् पृथङ्निवसतोरधिवन्दिगेहम् ॥ २ ॥

तेन प्रशीतमरुते व्रजतोरपूर्वः
कश्चित्प्रमोद उदभूदनिबन्धनोत्थः।
कारागृहादिह वरेलिगताद्विमुक्तेः
पूर्वं च कापि घटनाऽभवदत्र लघ्वी ॥ ३ ॥

या प्राभवन्मनसि मे समये तु तस्मि-
न्नद्यापि मत्स्मृतिपथे नवलेव भाति।
गौरो वरेलिपुरुषौधनिरीक्षको मां
रोहन्तमेव किल मृत्तरियानमाह ॥ ४ ॥

शर्मण्यवाचि भवतो रुचिरस्ति तस्मा-
त्तच्छिक्षणं प्रणयतीति मया निशम्य।
शर्मण्यमासिकसचित्रकपत्रकस्या-
नीता इमाः प्रतिलिपीरुररीकरोतु ॥ ५ ॥

इत्यूचिवान् मम करेऽर्पितवान् स बन्धं
संकोचतस्तमिममेष पुरा नदृष्टम्।
भूयो न दृष्टमतिशिष्टमबुद्धसंज्ञं
सौजन्यमस्य च कृपां च न विस्मरामि ॥ ६ ॥

स्वेच्छेरितस्य किल तस्य किलोपकार-
भारस्य चेतसि ममास्ति कृतज्ञभावः।
यस्य प्रभावमतुलं मनसा वहामि
सौजन्यजन्यमनिशं च सुखं भजामि ॥ ७ ॥

तत्रार्धरात्रकृतदीर्घतरप्रयाणेऽ-
ङ्ग्रेजान् स्वदेशजनितान्मनुजांश्च मत्वा।
तान् शासकानथ च शासितकान् प्रशिष्टे-
र्लोकांश्च लौकिकजनान् प्रभुतां प्रजाञ्च ॥ ८ ॥

आदेशपालनरतामनयोश्च सम्यक्
सम्बन्धमेष चिरमात्मनि चिन्तयानः।
तद्द्वन्द्वमध्यविदितां महतीं च घाटी-
मन्योन्यसंशयकरीमरुचिं मिथश्च ॥ ९ ॥

तत्संशयान्तदरुचेरपि चाधिकं त-
ज्ज्ञानेतरं तदितरेतरयोरपश्यम्।
अज्ञानतो ह्यसुकतो यदुभौ बिभीतः
सत्त्वे द्वयोश्च यदुभावतिसावधानौ ॥ १० ॥

अन्योन्यमप्यमनसं किल सङ्कुचन्तं
सौहार्दहीनमपि चानुभवत्यथान्यः।
नैकोऽपि चानुभवतीह किलावृतौ स्तः
सौजन्यमप्यथ च काचन शिष्टतापि ॥ ११ ॥

अङ्ग्रेजजातिरनुशास्ति हि देशमेनं
साहाय्यमाश्रयमसौ च ददाति नो वा।
किन्त्वत्र साधनमपेक्षितमस्ति यद्यत्
तत्सर्वमस्ति सुलभं त्वधिकं तथास्याः ॥ १२ ॥

तान्यान्त्यमी अवसराश्रयिणोऽथ सेवा-
न्वेषाश्च काकुचटुकारकलाप्रवीणाः।
हिन्दुस्थलस्य विषये च निदर्शनानी-
मान्येव सम्मतिमुदीरयितुं भवन्ति ॥ १३ ॥

हिन्दुस्थलीयजनता खलु चाङ्गरेजान्
ताञ्छासकत्वमधिकृत्य हि वर्तमानान् ।
वीक्षाञ्चकार विधया च तया किलैते
यन्त्रोपमा हृदयहीनतया श्वसन्ति ॥ २४ ॥

स्वार्थाश्च तेषु निहिता इह ते भवन्ति
रक्षार्थमुद्यमभृतामिह ये प्रसिद्धाः ।
सन्त्येव तेषु च समेऽपि मनोविकारा
व्यक्तेः स्वतो विचरतोऽधिकृतेश्च भेदः ॥ २५ ॥

स्वाभाविकी भवति हन्त स्वतः प्रवृत्तिः
स्यात्कृत्रिमा तु निपुणं निहिताधिकारात् ।
सैन्ये युवा हि भवति स्तभितोऽवधानी
मानुष्यकं परिहरन् स हि यन्त्रकल्पः ।
हन्त्येष तान् निजजनानपि येऽस्य हानिं
चक्रुर्न चक्रुरपि ये रणसम्मुखस्थाः ।
तस्याप्यहो पुरुषवर्गनिरीक्षकस्य
वृत्तं यदस्ति च तदस्ति मनुष्यजस्य ॥ २८ ॥

नैष्ठुर्यतः किमपि कर्तुमयं स्वचित्ते
सङ्कोचमञ्चति सदैव मनुष्यजातः ।
अन्यक्षणेऽधिकृतिमानयमेव यष्टे-
र्निर्दोषबालकगणेऽप्ययते प्रहारान् ॥ २९ ॥

न व्यक्तिरूपमिह पश्यति चात्मनीनं
सम्मर्दमेव च स पश्यति तत्स्वरूपम् ।
हन्त्येष सोयं लगुडकैरपि यष्टिभिश्च
गोलीभिरप्यथ च हस्तगतायुधैश्च ॥ ३० ॥

व्यक्तिर्यदैव परपक्षमिहानुपश्य-
त्योघस्वरूपमिह नश्यति तन्मनुष्यः ।
तत्रापि ते पुरुषका महिलाश्च तास्ते
बालाश्च सन्ति सुतरामिति विस्मरेत्सा ॥ ३१ ॥

एतेषु सन्ति किल ते पुरुषाः स्त्रियस्ताः
बालाश्च ते भवति येषु मनोविकारः ।
सद्द्वेषरागसदृशोऽनुभवन्ति ये च
दुःखं सुखं च समयेषु तटस्थताञ्च ॥ ३२ ॥

अङ्ग्रेज एक इह सम्मनुते यदत्र
हिन्दुस्थले सु बहवः किल सन्ति सन्तः ।
किन्त्वीदृशा इह भवन्त्यपवादरूपाः
सम्मर्द एव तु परो घृणितस्वरूपः ॥ ३३ ॥

एकोऽत्र भारतजनोऽप्युररीकरोति
तेऽङ्ग्रेजकाः प्रविरलाः स्तवनीयशीलाः ।
अन्येऽभिमानमलिनाः पशुतां दधाना
भूयांस एव भुवने किल सन्त्यभद्राः ॥ ३४ ॥

आश्चर्यमेतदिह सर्वजनः परस्य
जातिस्वभावविषये स्वमतिं दधाति ।
न त्वत्र तानधिकरोति दधाति येषां
संसर्गमेष, कथमस्तु यथार्थबोधः ॥ ३५ ॥

यान् किञ्चनापि स न वेत्ति च वेत्ति याश्च
किञ्चिन्न कल्पमिह तान् विवृणोति केन ।
सौभाग्यवानहमभूवमिहातिमात्रं
सौजन्यमेव मयि दर्शितवांश्च लोकः ॥ ३६ ॥

स स्यात्कदाचन कुतश्चन वाङ्ग्रेजो
वा स्यादसौ क्वचन कश्चन भारतीयः ।
तैर्वन्दिगेहपतिभिः पुरुषैश्च वीरै
र्यैर्निग्रहो मम कृतोऽप्यथ वन्दिनं माम् ॥ ३७ ॥

स्थानात्कुतश्चन परं स्थलमानयन्त
मां वन्दिभूतमपि तेऽनुगृहीतवन्तः ।
एतेन मानुषिकसद्व्यवहारकेण
मद्वन्दिजीवनमभूत्कटुताविहीनम् ॥ ३८ ॥

नाश्चर्यमेतदिह मां निजदेशजाता:
सद्बन्धवो निजकृपास्पदतामनैषन् ।
तद्विश्रुतं मम हि नाम जनप्रियत्वे
चैवानुरुध्य मयि ते विदधुः कृपां ताम् ॥ ३९ ॥

किन्त्वासमेष किल व्यक्तिविशेष एव
सम्मर्दगेषु खलु नाम न व्यक्तिरेका ।
ग्रन्थे ममाङ्ग्लविषयेऽधिगतास्ति शिक्षा
तत्र प्रजार्थकलिते किल केन्द्रके च ॥ ४० ॥

इत्यादिभिस्तु निकटं गमितोऽस्मि तेषां
यैस्ते स्वरूपसमसभ्यममन्वतेमम् ।
सत्स्वप्यहो मम च विश्वजनीनकर्म-
स्वाङ्ग्लप्रतीपगतिषु प्रिय एष तेषाम् ॥ ४१ ॥

सादृश्यमस्य मयि चाङ्गलवर्तनस्य
मित्रेषु चापि मनसा विचिनोमि यावत् ।
तावन्निजं प्रति भवच्छुभवर्तनेन
लज्जावमानवदहं किमपीक्षयामि ॥ ४२ ॥

सौविध्यमेतदखिलं मिलितं तथापि
कारागृहं भवति वासगृहं न जातु ।
वातावृतिस्तदनुगा बहुधाऽतिदुःखं
दत्वाऽभवन्मम कृतेऽप्यतिदुःसहैव ॥ ४३ ॥

वातावृतिर्भवति वन्दिगृहस्य हिंसो-
त्कोचानृतैरनुगता स्थितनीचता च ।
गालीर्ददाति चटुकाकु वदत्यथान्यः
सर्वो मृदुप्रकृतिकोऽत्र तपत्यजस्रम् ॥ ४४ ॥

लोकाः कदाचन लघीयसि कारणेऽपि
कारागृहेऽतिशयदुःखमिता भवन्ति ।
वृत्तेऽशुभे प्रकटिते गृहपत्र-वृत्त-
पत्रेषु रोषभरिताः सशुचो भवामः ॥ ४५ ॥

तस्माद् बहिस्तु निजकर्मरताः स्वदुःखं
विस्मृत्य नैकविध-मानस-रञ्जनैस्तैः ।
शारीरिकस्य किल मानसिकस्य साम्यं
कृत्वानुभूतिशतकस्य समा भवामः ॥ ४६ ॥

कारागृहेषु कुपितस्य च शोचतश्च
पन्थाः परो न भवतीह मनःसमाधेः ।
भाति स्म तत्र भरिताः किल काचकुप्यां
स्मो नात्र यद्भवति तत्प्रतिकर्तुमर्हाः ॥ ४७ ॥

स्वां सम्मतिं स्फुटयितुं प्रभवाम एता-
मेकाङ्गिनीं त्रुटितसम्मृडितामिवात्र ।
रोगास्तु नूनमिह दुःखतरा भवन्ति
प्रश्नं करोति कुशलस्य न तत्र कश्चित् ॥ ४८ ॥

अत्रास्मि वन्दिगृहजीवनकालिकीषु
चर्यास्वहर्निशगतासु धृतस्वभावः ।
शारीरिकेण किल मानसिकेन तेन
व्यायामकेन कृतवान्निजमत्र पुष्टम् ॥ ४९ ॥

व्यायाम-कर्मयुगलस्य वहिस्तु मूल्यं
यत्स्यात्तदस्तु तदिहास्ति सदानिवार्यम् ।
तस्माद्विनात्र नहि कश्चन शक्तिमान् स्यात्
स्वास्थ्यं सुरक्षितुमिति प्रवदामि सत्यम् ॥ ५० ॥

कार्यक्रमो नियमितो मयका स्वकीयो
दाढ्र्येन चाग्रहकृतेन च तं वहामि ।
दृष्टान्ततः प्रतिदिनं मम श्मश्रुकूर्चं
सम्मुण्डयामि निजरेजरयन्त्रकेण ॥ ५१ ॥

क्षुद्रोऽप्ययं निगदितो विषयो मयाऽत्र
सामान्यतो हि पुरुषा इममुत्सृजन्ति ।
नैकत्र चान्यनियमे शिथिला भवन्ति
शैथिल्यमेव जनयेच्छिथिलत्वमेकम् ॥ ५२ ॥

कृत्स्नं दिनं कठिनकर्मसु तत्परोऽहं
श्रान्तो भृशं निशि भजामि सुखेन निद्राम् ।
इत्थं दिनाद्दिनमथापि च सप्तरात्रा-
त्तत्सप्तरात्रमिह मासपदाच्च मासः ॥ ६३ ॥

यातो व्ययं क्वचन भाति किलैष मासः
संश्लिष्ट एव सुदृढं यदुपैति नान्तम् ।
जातूद्विजे प्रतिजनं प्रतिवस्तु चाहं
क्षोभञ्च रोषमिह वन्दिगृहे भजामि ॥ ५४ ॥

स्यान्मित्रमेष किमु वास्त्वधिकारभाग्वा
वाह्यो जनोऽपि समयेऽत्र समागतो यः ।
कर्मेदमेभिरिह किं न कृतं, कृतं वे-
त्यत्युद्विजे नियतकर्मरतः कदाचित् ॥ ५५ ॥

दुःशासनाद् ब्रिटिशतस्तु सदोद्विजेऽहं
किन्त्वीदृशेष्ववसरेषु जनात्परस्मात् ।
सर्वाधिकं तु दिवसेषु निजात्मनोऽपि
तेषूद्विजे क्षुभित एव भवामि भूयः ॥ ५६ ॥

कारागृहेषु किल वन्दिवदेष जीवन्
क्रुध्यामि मन्दतरकारणतोऽपि भूयः ।
सौभाग्यमेतदभवन्मम चित्तमेव-
मास्थाद् बहून्हि दिवसान्न तथानवस्थम् ॥ ५७ ॥

कारागृहे मिलनवासर उल्लसन्तं
सर्वं व्यधत्त चिरतो विहित-प्रतीक्षम् ।
अत्युत्सुका अगणयाम दिनानि तानि
चेल्लासतः परमिह ग्लपयन्ति यानि ॥ ५८ ॥

एकाकिता हृदयमावृणुते च शून्य-
भावः प्रभावमसमं हृदि चादधाति ।
चेत्तत्समागमनमत्र वृथा प्रक्लृप्तं
पश्चात्तपामि स तदोद्विजनात्स्वकीयात् ॥ ५९ ॥

तस्मिंश्च मेलसमयेऽधिकृता भवन्ति
पार्श्वस्थिता द्विरिह वा त्रिरभूच्चरोऽपि-
कश्चित्सपत्रकलमः पिशुनोऽपि योऽसा-
वस्मत्कथोपकथनान्यलिखद् बरेल्याम् ॥ ६० ॥

एतेन मद्धृदि महान् भवति स्म रोषो-
मेलश्च तत्समयजो नितरां निरर्थः।
पूर्वं प्रयागगतवन्दिगृहे प्रशिष्टया
मेलक्षणेषु जननीपरिवारयोर्मे ॥ ६१ ॥

याऽकार्यथावमननास्मि तयातिखिन्न-
स्त्यक्तं ततःप्रभृति तन्मिलनं मयासीत्।
मासांश्च सप्त मिलितोऽस्मि न केनचिच्चे
त्येषोऽभवन्मम कृते समयो न भव्यः ॥ ६२ ॥

पश्चाच्च यन्मिलनमेतदवश्यकार्य-
मित्यास्त निश्चितमतः फलरूपतो मे।
अभ्यागतान् मिलितुमत्र परं प्रमोदं
प्राप्तोऽत्यघूर्णयमहं स्वजनावलोकैः ॥ ६३ ॥

अत्रागता च भगिनी शिशुभिः समेता
आसीदमीषु स मदंसतटाधिरोही।
अत्राप्यसौ तदधिरोढुमधात्प्रयत्नं
तस्मिन्क्षणे त्रुटित आस्त स भावसेतुः ॥ ६४ ॥

तन्मानवीयतनुसङ्गमनोरथान्ते
सा गृह्यजीवनसुखस्पृशता तदा माम्।
उद्वेलयत्यतितरां स्म न यत्र शक्तः
सम्भालनेऽभवमहं स्वमनोजवस्य ॥ ६५ ॥

घस्रेषु तेषु मिलनप्रतिबन्धितेषु
गेहाच्च वन्दिगृहतश्च तदा परस्मात्।
यान्यागतानि किल पञ्चदशे दिने मां
पत्राणि तानि बहुमूल्यमयान्यभूवन् ॥ ६६ ॥

कारागृहे किल परत्र गते भगिन्या-
वन्ये च पत्रमलिखन् विहितप्रतीक्षम् ।
अत्युत्सुकेन मनसा नियते दिनाङ्के
पत्राद्यनागमनतोऽनुभवामि चिन्ताम् ॥ ६७ ॥

अभ्यागते तु पुनरत्र कुतोऽपि पत्रे
तन्मोचने मनसि भीतिमिवान्वभूवम् ।
पत्रैरमीभिरिह खेलनमारभेऽहं
कश्चिद्यथा सुखदवस्तुनि राrमीति ॥ ६८ ॥

भीतिश्च चेतसि तदाप्यनुवर्तते मां
मा भूदमुत्र कतरं भयदायि वृत्तम् ।
कारागृहस्य स्थिरशान्तिमये च काले
बाधामुपानयति पत्रगतागतं तत् ॥ ६९ ॥

उद्बोध्य भावशतमेतदिह प्रसूते
स्मोद्वेगचापलमथात्र दिनद्वयञ्च ।
चेतः परिभ्रमति नूनमितस्ततोऽस्त-
व्यस्तीभवन्न दिनकर्म विधातुमर्हम् ॥ ७० ॥

नेनीवरेलिगतवन्दिगृहेषु नैके
मत्सङ्गिनः समवसन् परमत्र दूने ।
दूनं मनः, प्रथमतोऽत्र वयं त्रयोऽहं
गोविन्दवल्लभ इहास्त विनोदसिंहः ॥ ७१ ॥

पन्तस्त्वमुच्यत ततः किल मासयुग्मात्
षाण्मासिकोऽन्तमगमत्सहि तस्य दण्डः ।
सङ्गिद्वयं तदनु चान्वमिलत्तदेते
त्रिंशे समेऽपि विगता, अहमासमेकः ॥ ७२ ॥

प्रायोऽष्टमाससमयेऽहमगस्तमास-
स्यान्ताद्विमुक्त्यधिगमादधिदूनकारम् ।
एकोऽवसं निपुणमालपमत्र किञ्चि-
त्कारास्थसेवकजनादितरेण नाहम् ॥ ७३ ॥

न न्यायतो मम स एकलवन्दिभावः
किन्त्वास्त तेन सदृशो मम दैवयोगात्।
तस्मादिमानि विमनस्कतया युतानि
घस्राण्ययुर्विरतिमन्ति च नीरसानि ॥ ७४ ॥

सौभाग्यतोऽत्र मिलनं पुनरारभेऽहं
तेनाभवच्च शिथिला विमनस्कता मे।
मन्येऽभवन्मयि विशेषकृपा ह्यरक्षं
बाह्यानि नूत्नकुसुमानि च चित्रकाणि ॥ ७५ ॥

एतेन चेतसि ममास्त नितान्ततोषः
सामान्यतोऽस्ति स हि तत्र सुमादिलाभः।
वेलासु कासुचिदिमानि यथा दुरापा-
ण्येवाभवन्न मम कक्षमलङ्कृतं स्यात् ॥ ७६ ॥

तच्च स्मरामि मम पार्श्वगते प्रकोष्ठे
मत्संगिना मुकुरकङ्कतिकादिसज्जा।
आसीत्कृता, तदवलोक्य च वन्दिगेहा-
ध्यक्षेण तत्र विषमो विहितो विरोधः ॥ ७७ ॥

प्रोक्तः स तेन न भवान्निजकोष्ठकस्य
सज्जां विलासमयतां च विधातुमर्हः।
कासीद्विलासमयता वत दन्तकूर्ची,
कुप्यौ च तैलमषिके अथ कङ्कतिः सा ॥ ७८ ॥

कारागृहेऽवगतमत्र च वस्तुमूल्यं
बुध्यामहेस्म लघुकानि बहिस्तु यानि।
अत्राभवत्परिमितश्च परिच्छदो न-
स्तद्वर्धनं च परिवर्तनकं न शक्यम् ॥ ७९ ॥

संरक्षितं समवधानपुरस्सरं चा-
ऽभूत्क्वापि नेदृगथ किञ्चन सञ्चितं च।
यद्वन्दिगेहबहिरस्तमवस्करेऽभू-
दित्थं न सम्पदभिधानमभूद्धि किञ्चित् ॥ ८० ॥

तत्रापि सम्पदवधानममुञ्चदस्मान्,
व्यग्रं ह्यभून्मृदुलवस्तुकृते शरीरम्।
भोक्तुं सुखं सुखमये पुनरत्र पर्या-
वर्ते सुहृद्भिरथ रञ्जयितुञ्च चित्तम्॥ ८१॥

सङ्क्रीडितुं च शिशुभिः प्रबलाभवन्मे
वाञ्छा कदाचिदवलोक्य च वृत्तपत्रे-
चित्रे किमप्यनुभवास्पदमस्मरं त-
त्तद्यौवनञ्च भवति स्म न यत्र चिन्ता॥ ८२॥

अस्मिन् गृहस्मरणरोगजवोऽपि चित्तं
व्यग्रीकरोति च दिनं व्यतियाति खेदे।
कृन्तामि सूत्रमिह नित्यमहं च किञ्चित्
कायेन कार्यमददान्मनसोऽवकाशम्॥ ८३॥

मुख्यं हि कार्यमिह वाचनलेखनं मे
यद्यत्पुनः पिपठिषामि न तत्तदाप्यभम्।
प्रायो निषिद्धमभवत्किल गोपनीयम्
गुप्तिप्रदा हि बहुधा न भवन्ति योग्याः॥ ८४॥

गोप्यं किलापिपठिषं नवपुस्तकं तद्
यत्पश्चिमस्य पतनं प्रथितं किलासीत्।
गुप्तीकृतं त्विदमभूत्किल तस्य नाम
भीतिप्रदं न नृपतिग्रहवाचि चासीत्॥ ८५॥

किन्त्वेष युज्यत इहात्र न रोषलेशः
प्राप्नोमि सर्वविधपुस्तकमत्र नित्यम्।
अत्रापि नूनमभवन्मयि सानुकम्पा,
मत्संगिनो हि विषयेऽत्र भजन्ति कष्टय्॥ ८६॥

संसूचितोऽस्मि लभते नहि कोऽपि वारा-
णस्यान्तु शासनविमुद्रितश्वेतपत्रम्।
यस्मिन् भवन्ति सरकारविधानकक्षा-
स्तस्मिन्हि राजनयिकी प्रथितास्ति वार्ता॥ ८७॥

ते धार्मिकाणि च कलात्मकपुस्तकानि
दातुं तु संस्तुवति वै ब्रिटिशानुशिष्टाः ।
आश्चर्यमेव यदमुष्य प्रियोऽस्ति धर्मः
संवर्धयत्यपि किलैष हि सम्प्रदायान् ॥ ८८ ॥

यस्मिंस्तु भारतपदेऽपहृता भवेत्सा
सामान्यनागरिकताप्तस्वतन्त्रतापि ।
तस्मिंस्तु वन्द्यधिकृतेः परिचर्चयापि
भाव्यं किलानुचितयेति मम प्रतीतिः ॥ ८९ ॥

प्रश्नस्तथाप्ययमिहास्त्यवधानयोग्यः
न्यायालयो यदि ददाति स वन्दिभावम्
तात्पर्यमस्य न वपुर्नियतं मनोऽपि
स्युर्वन्दिनामिह वपूंषि नियन्त्रितानि ॥ ९० ॥

इत्येव तावदिह वन्दिगृहाधिकार-
स्तेषां मनोनियमनेऽप्ययमस्तु कस्मात् ?
अत्रत्यवन्दिसदनस्य किल व्यवस्था
येषां करेऽस्ति विषयाद्विभियुः स्तुतास्ते ॥ ९१ ॥

ज्ञातुं च कर्तुमिह नूत्नविचारजातं
शक्तेः सुसीमिततया प्रभवन्ति नैते ।
गुप्तेः क्रमोऽस्ति दुरितं भुवि पक्षपात-
पूर्णं ह्यसभ्यमपि नूनमिह स्वरूपात् ॥ ९२ ॥

किन्त्वत्र वञ्चयति नूतनवाङ्मयान्ना-
नेकत्र पत्रनिचयादथ पत्रिकाभ्यः ।
सूची महत्यहह वर्जितपुस्तकाना-
मास्ते च सा प्रतिदिनं परिवर्धमाना ॥ ९३ ॥

आभातिरिक्तमपि किञ्चन गोपनं तत्
स्याद् वन्दिभिः सुसहनीयमिति प्रतीतम् ।
इत्थं ततो बहुतमानि सुपुस्तकानि
च्छिन्नानि यानि बहिरेत्य स वाचयेत ॥ ९४ ॥

प्रश्नः पुरायमुदितो यदमेरिकाया
न्यूयार्कनाम्नि नगरे सिंगसिंप्रसङ्गे।
तत्साम्यवादिषु समाचरपत्रकेषु
रुद्धेषु, तत्र किल शासकवर्ग एकः ॥ ९५ ॥

तान् साम्यवादनिरतान्विरुणद्धि तीव्रं
किन्त्वत्र वन्दिगृहशासकवर्ग आरात् !
प्रासीददेव किल वन्दिजनो निजेष्टं
स्वं पत्रपुस्तकमलं पठितुं क्षमः स्यात् ॥ ९६ ॥

स्यात्साम्यवाद्यपि तदापि न तन्निषेधः,
तत्रत्यवन्दिगृहपो न्यरुणत्तरस्वि।
दुर्व्यङ्ग्यचित्रमिह केवलमेकमात्रं
अस्मद्विनिग्रहगृहेषु किलैष प्रश्नः ॥ ९७ ॥

एकत्र सीमनि नितान्तमसभ्य एष
यत्रास्ति वन्दिषु न पुस्तकपत्रयोगः।
लेखादिसाधनमपीह न दीयतेऽस्मै
प्रश्नो न गुप्तिपरमोऽस्ति तु तन्निषेधे ॥ ९८ ॥

एवर्गगेषु नियमात्प्रथमां श्रितेषु
श्रेणीं च लेखनपरिच्छददानमिष्टम्।
एष्वप्यहो न सकलेष्वनुवासरं स्या-
त्तद्वृत्तपत्रमपि दत्तमिति व्यवस्था ॥ ९९ ॥

यद्दैनिकं तदपि शासनसम्मतं स्या-
त्तद्येव दीयत इति प्रथितोऽस्ति कल्पः।
बी. सी. गतेषु नहि वन्दिषु लेखवस्तू-
न्यावश्यकानि न भवन्त्यपि नैतिकेषु ॥ १०० ॥

बीवर्गिकेष्वपि कदाचन लेखवस्तु-
दानं क्रियेत, न स नित्यनिदेश उक्तः।
वन्द्यन्तरात्प्रथमश्रेणिकवन्दिनोऽत्र
कश्चित्सहस्रगणितादिति सोऽप्युपेक्ष्यः ॥ १०१ ॥

देशान्तरेषु खलु सभ्यतया श्रितेषु
सामान्यवन्दिजनलेखनपाठनादौ ।
यावान् स्थितो भवति कोऽपि किलाधिकार-
स्तावान् न भारतभुवः प्रथमावलीके ॥ १०२ ॥

अन्ये शते नवनवत्यधिकानि तानि
द्विस्त्राणि नाम मिलितानि भवन्ति तावत् ।
किन्तु स्थितिर्भवति तत्र किलेदृशी यत्
सौविध्यलाभमिममत्र न ते लभन्ते ॥ १०३ ॥

लेखोऽथवा पठितपुस्तकसारमात्र-
लेखद्वयाय भवतीह मतो विनोदः ।
नो वन्दिभिः स करणीय इति प्रगत्या
रोधोऽद्भुतोऽत्र विहितोऽस्ति हि मानसिक्याः ॥१०४ ॥

कञ्चिच्च वन्दिनमिह प्रतिसंश्चिकीर्षुः
शिष्टिर्यतेत यदि नागरिकं विधातुम् ।
तर्ह्यस्य चेतसि धृतावग्रहतस्तमन्य-
दिश्यानयेत्पठितसंलिखितं च कार्ये ॥ १०५ ॥

हिन्दुस्थले स्फुरितमेव न कस्यचित्तद्
युक्तप्रदेशविषयेऽस्य न भावलेशः ।
कारागृहेषु युवकांश्च कुमारकांश्चा-
ध्याप्योपकर्तुमकृताधिकृतिः प्रयत्नम् ॥ १०६ ॥

यत्नो वृथैष किल येऽधिकृताश्च तस्मिन्
कार्ये न सन्ति निपुणा इह ते न योग्याः ।
यच्चोच्यते न पठनादिकमेतदेभ्यो
वन्दिभ्य ईषदपि रोचत इत्यसत्यम् ॥ १०७ ॥

दृष्टा मया हि सविधे समुपागतेषु
वन्दिष्वियं पठनलेखनयो रुचिः सा ।
येऽस्मानुपेतुमभवन्नलमत्र तान् वा
अध्यापयाम, कृतवन्त इमे श्रमं च ॥ १०८ ॥

जात्वेष जागरित एव च मध्यरात्रे
यत्तैलदीपमृदुकान्तिषु कंचिदत्र ।
संलग्नमध्ययनकर्मणि वीक्ष्य नून-
माश्चर्यमन्तरभजं रुचिदर्शनेन ।। १०९ ।।

स्वस्मिन्हि पुस्तकचये निरतोऽहमासं
जात्वेकमेष्वपठमन्यदथान्यदाऽहम् ।
प्रायोऽयमेषु विषयेषु पठाम्युपन्या-
साधीतिरत्र शिथिलीकुरुते स्म चेतः ।। ११० ।।

नाहं बहून् पठितवान् किल तानिहस्थः
पाठाद्विरज्य बहुधात्र लिखामि किञ्चित् ।
वर्षद्वये निजनियन्त्रणके तु पत्र-
मालामलेखिषमहं मुहुरिन्दिरायै ।। १११ ।।

मालेयमात्मवशगं मम चित्तमत्रै-
काग्र्यं विधातुमुचितं सहयोगमादात् ।
प्रायः पुराणजगति स्थितवानिदानी-
माधृत्य यल्लिखितवानिह पुत्रिकार्थम् ।। ११२ ।।

व्यस्मार्षमेव यदहं निवसामि कारा-
गारेऽथ पुस्तकमिहाद्रियते स्म चेतः—
यात्राप्रधानमिह चापि पुराणयात्रा-
वृत्तानि तानि प्रथितानि ह्युएन्तसाङ्गात् ।। ११३ ।।

तस्मात्तदिब्नबतुतादथ चापि मार्को-
पोलात्तथेतरसुलेखकस्वेनहेड्नात् ।
उद्भूय यानि हि सुमेरुवनस्य वृत्तं
यानि त्रिविष्टपपदेऽस्य रहस्यमाहुः ।। ११४ ।।

तच्चित्रपुस्तकगणे च हिमप्रपाता-
स्ते पर्वता अथ मरुस्थलकानि यस्मिन् ।
चित्रस्थितानि मम तानि हि भान्ति भूयः
कारागृहे स्थलसमुद्रदिदृक्षुरासम् ।। ११५ ।।

माउन्टव्लेंक-हिमवद्गिरि-आल्टसानां
सच्चित्रशालि मम पुस्तकवृन्दमस्ति ।
पश्यामि तत्र बहुधा निजकोष्ठकस्थ
ऊष्मातिरेकसमयेषु हिमप्रपातान् ॥ ११६ ॥

उत्साहवान् प्रसभमैटलसं विलोक्य
प्रत्नं स्मरामि बहुवृत्तमहं हि तत्र ।
तानि स्थलानि समगामिह यानि, यानि
चेच्छामि गन्तुमविलोकितपूर्वकाणि ॥ ११७ ॥

तद्दृष्टपूर्वमपि सर्वमहं कदाचिद्
भूयोऽपि द्रष्टुमधिकोत्सुकतां वहामि ।
चिह्नानि यानि पुनरैटलसे कृतानि
तत्तन्महानगरभूमितले त्विमानि ॥ ११८ ॥

मामाह्वयन्ति हृदये किल तानि द्रष्टु-
मिच्छा भवत्यपि गिरींश्च समुद्रकं च ।
नीलं निरीक्ष्य किल रंगमिहाधिरोढुं
शैलांश्च तर्तुमथ सागरमुत्सुकोऽस्मि ॥ ११९ ॥

सौन्दर्यमत्र जगतोऽप्यवलोकयेयं
संघर्षसंशयवतीं च मनुष्यजातिम् ।
कर्तुञ्च तत्स्वयमपि स्फुटमुत्सुकांश्च
व्यग्रांश्च नः प्रकुरुते न जहाति बन्धः ॥ १२० ॥

दुःखात्तदैटलसमाशु विनिक्षिपामो
भित्तीश्च ताः परिचिता अवलोकयामः ।
अस्मान्हि यास्तु परितः परिवृत्य लग्नाः
कार्यक्रमेऽत्र विरसे प्रतियोजयन्ति ॥ १२१ ॥

यो निर्ममे शतशतानि तु पद्यकानि
राधासुधानिधिगतत्रिदशादिपद्ये ।
तत्कल्पितेऽत्र चरिते ऽद्य गतश्चतुश्च-
त्वारिंशकोऽप्यवसितिं किल सर्ग एषः ॥

बन्दिगृहे जीवजन्तवः

उपजातिः

पञ्चचत्वारिंशः सर्गः

यद्देहरादूनगते लघिष्ठके कारागृहस्थेऽत्र निजप्रकोष्ठके।
मासानवात्सं त्वधिकांश्चतुर्दशाभात्स्मि तन्मेऽपि तदङ्गरूपता ।।१।।
प्रत्यंशतस्तस्य गतः परीचयं श्वेताभिराभिः किल भित्तिभिस्तथा।
निम्नोन्नतेनापि च कुट्टिमेन चाधारकाष्ठेन घुणाक्षराङ्किना ।।२।।
बाह्याङ्गणोद्भूततृणावगुच्छकाः पाषाणखण्डा ऋजुवक्रविग्रहाः।
मित्राणि मे भान्ति पुरातनान्यमी ह्यासं किलास्मिन्नहमेकलश्चिरम्।।३।।
नैतत्किलास्मिंस्ततबर्हकोषका भूयांस आसन्नथ पल्लिकाबिलाः।
ते त्वातपे तेपुरितस्ततो भ्रमैः सायं निजाहारगवेषणाधिया ।। ४ ।।
भावा विचारा यदि भौतिकेष्वपि स्वाङ्कांस्त्यजन्तीति मृषा न कथ्यते।
तर्ह्यस्य कोष्ठस्य समीरणांशकास्तैः सम्भृतास्तत्प्रतिवस्तु सम्भृतम् ।।५।।
कारागृहेऽन्यत्र वरिष्ठकोष्ठकं प्राप्तं परं दूनगतेऽतिलाभदम्।
लाभस्त्वयं मे बहुमूल्यवानभूत् द्वाराद्बहिस्तत्र शतं पदान्यगाम् ।।६।।
कारागृहं स्तोकपदे किलाभवत् तद्भित्तिबाह्ये च विनिग्रहस्थलम्।
तत्किन्तु भित्तिष्वपरासु संस्थितम् तन्मध्यभागे लघुकेऽपरिभ्रमात् ।।७।।
द्वाराद्बहिः पादशतावकाशके क्षेत्रे परिभ्राम्यति बन्दिवर्गकः।
तन्नागताः पर्वतमालिका अपि क्षेत्राणि राजाध्वनि दृश्यकान्यपि ।।८।।
आलोकितुं चावसरं लभामहे सर्वेऽपि तत्र प्रथमैकवर्गगाः।
यूरोपियन्निग्रहगेहमप्यभूदत्रावृतो वन्दिगृहाद्बहिः स्थितम ।।९।।
तस्याभितो भित्तिरभून्न काचन द्रष्टुं ततः शक्यमभूद्बहिः स्थितम्।
तत्पर्वतश्रेणिमुखं हि दृश्यकं यूरोपजानामिदमस्ति बन्धनम् ।।१०।।
वन्द्येव कश्चित्स्थिरघोरभित्तिके कारागृहे दीर्घमनेहसं वसन्।
भ्रान्त्वा बहिर्दृश्यमिदं च दृष्टवान् सौख्यस्य मूल्यं मनसाऽवधारयन् ।।११।।

इत्थं बहिर्भ्रान्तिमतीव रोचये वर्षासु चैवाहमिदं तु नात्यजम् ।
धाराप्रहारेष्वपि तन्न मुक्तवानाजानुपानीयपणेऽपि संचरन् ॥१२॥
सर्वत्र बाह्यभ्रमणं मयादृतं दूने त्वभूद्धन्त हिमालयः पुरः ।
तद्दर्शनं चित्तहरं सुखप्रदं कारागृहग्लानिनिवारणं परम् ॥१३॥
सौभाग्यमेतत्परमं ममाभवद्यद्दीर्घकालं मिलनं तदत्यजम् ।
प्रत्यक्षतः कांश्चन मासकान्मया दृश्या इमेऽदर्शिषतात्र पर्वताः ॥१४॥
कोष्ठान्निजात्तावदहं नगाधिपं न द्रष्टुमासं प्रभुरेनमद्भुतम् ।
ध्यातुं समर्थोऽथ मनोहरानिमान् दृष्ट्वा समत्वेन तमेनमस्मरम् ॥१५॥
पार्श्वस्थितो मे प्रतिभाति तद्ध्वंसावन्तर्धिनिष्ठत्वमवर्धतानिशम् ।
उड्डीय याता विहगाः किलोच्चकैः पाथोदखण्डा गगने लयं गताः ॥१६॥
एकाकिनं पर्वतशृङ्गकाणि मां पश्यन्ति शान्तानि च तान्यहं सदा ।
ली ताइपी-वत् कवितामिमां स्मरन् शक्तो न वक्तुं स्थगितोऽस्मि नाप्यतः१७।
आसीदसाधारणदृश्यमन्तिके साधारणत्वेन कथं ध्रियेत तत् ।
सामान्यतः पश्यत आस्त मे सुखं तस्यापि तत्स्यादिति भासते स्म मे॥१८॥
स्थैर्यञ्च दाढर्यं गिरिराजसंस्थितं ज्ञानानुभूत्या सह पश्यति स्म माम् ।
तुच्छस्य मे मानसिकावरोहणारोहौ हसत्येष ददाति मे शमम् ॥१९॥
वासन्तिकोऽसावृतुरत्र दूनगोऽन्त्यन्तं हि शोभास्पदमन्वभूयत ।
नीचैः स्थलेभ्योऽत्र चिराय तिष्ठति, प्रोच्चैर्निवासो हि भवत्यतिप्रियः ॥२०॥
वाताः प्रपत्राण्यहरन्त शैशिरा वृक्षा अभूवन्निव नग्नविग्रहाः ।
कारागृहद्वारपुरःस्थलेऽभवन्नश्वत्थवृक्षाः श्रुतिसंख्यया स्थिताः ॥२१॥
तैरप्यहो पत्रगणो व्यसृज्यताराससर्वशस्तेऽपि विपत्रकाः स्थिताः ।
औदास्यमेषां स ऋतुर्वसन्तकः सञ्जीवनैर्वायुभिराह सर्वदा ॥२२॥
तेषां समग्राणि किलाङ्कुरकानि सम्प्रीणयन्प्राणितवानुदारहृत् ।
अश्वत्थमुख्येषु तरुष्वथो शनैः स्पन्दोऽतिमन्दोऽसरदेकसुन्दरः ॥२३॥
अभ्यागतस्तान् सरसो रहस्यवान् नेपथ्यपृष्ठेऽभवदुद्यमो रहः ।
तत्रैकदाऽहं तरुवृन्दकेऽखिलेऽप्युद्ग्रीवमालोकयमङ्कुरादिकम् ॥२४॥
स्वप्राणने कारणमन्वगन्विषं दृष्ट्वा तदाश्चर्यमहं परं गतः ।
दृश्यं तदुल्लासमयं मुदास्पदं यत्रोदितास्तेषु नवीनपल्लवाः ॥२५॥

ते सूर्यरश्मिष्वनुभान्ति मारुतैः क्रीडन्ति बालोचितखेलविस्तरान् ।
अप्यङ्कुरात्पल्लवमासमग्रकं रूपान्तरं प्राप्तमिदं किलाद्भुतम् ॥२६॥
पूर्वं मया नूत्नरसालपल्लवा आरक्तगोधूमसमानरङ्गकाः ।
नालोकिता आसत शारदा यथा काश्मीरशैलेषु भजन्ति रङ्गकम् ॥२७॥
छाया हि सा तूर्णमिह स्वरङ्गकं त्यक्त्वा हरिद्वर्णमुपाश्नुते शुभम् ।
वर्षा सदा स्वागतमत्र विन्दति ग्रीष्मस्य सोष्माणमपस्यतीह यत् ॥२८॥
भव्यस्य चान्त्योऽपि भवत्यथावधिः यावत्तदप्यन्तरुपैति कष्टदम् ।
तद्देहरादूनमहं सुराधिपक्रीडाभुवं नूनमकल्पयं सदा ॥२९॥
आरभ्य वृष्टिः किल पञ्चत्रिंशता धस्रैः किलासाररुचिं न मुञ्चति ।
पञ्चाशदिञ्चानभिवृष्य सा भुवस्तापं निरस्याश्रयतेऽत्र विश्रमम् ॥३०॥
तस्मिंश्च संकीर्णतमे प्रकोष्ठके वातायनेभ्यः प्रविशन्त्यपां कणाः ।
तेभ्यः किलात्मानमिहाभिरक्षता संकुच्यते किन्तु विमुच्यते सुखात् ॥३१॥
आनन्द उल्लासमुपैति चागते भूयोऽपि चेतोरमणे शरदृतौ ।
दत्ते प्रमोदं शिशिरर्तुरागतो वृष्टिं विना विद्युदुपद्रवं विना ॥३२॥
को नाम शैत्यं सहतां सवृष्टिकम्, सर्वोऽपि वाञ्छत्यभिरक्षितं स्थलम् ।
आराममाप्तुं भृशमुत्सुकं भवत्यस्मिन्हि शैत्ये प्रतिजीवमानसम् ॥३३॥
उत्पात उत्तिष्ठति हैमने हिमे स्थूलाः पतन्त्यत्र हिमोपलाः पुनः ।
टीनच्छदौ ते निपतन्ति घोषणां कुर्वन्ति गर्जन्ति यथा शतघ्निकाः ॥३४॥
एकं दिनं साधुतया स्मराम्यहं द्वात्रिंशवर्षस्य दिसम्बरे महत् ।
विद्युज्जवेनाद्युतदत्यरौत्तथा कृत्स्ने दिनेऽवर्षदिहाम्बु चाम्बुदः ॥ ३५ ॥
शैत्यं महाघोरमपप्तदत्र तद् मा पृच्छयतां तन्न हि वक्तुमस्म्यलम् ।
शारीरिकं कष्टमिहेदृशं यथा सोढं तथाऽभून्नहि वन्दिजीवने ॥३६॥
सायं विकीर्णाः सहसा किलाम्बुदा दृष्टो मया पर्वतशृङ्खलास्वभूत् ।
व्याप्तो हिमः पर्वतिकासु सर्वतस्तत्कष्टमासीन्मम निर्गतं क्वचित् ॥३७॥
अन्यद्दिनं चास्त महद्दिनं परं भव्यं शुभं स्वच्छमथो हिमावृतम् ।
दृष्टिं गताः सुन्दरशैलशृङ्खला मनो हरन्ति स्म बलाद्विलोकिताः ॥३८॥
साधारणाद् दैनिककर्मतोऽरुधत्कालस्तदा ध्यानमयाद्विशेषतः ।
द्रष्टुं किल प्राकृतिकीं मनोरमां लीलामिमां कस्यचनापि मञ्जुलाम् ॥३९॥

जीवाश्च ये कीटपतङ्गकास्तदाऽत्राऽऽयन् समक्षं समलक्षयाम तान् ।
ध्याने विशिष्टेऽभ्युदिते व्यलोकयं मत्कोष्ठके चापि तदङ्गणे बहिः ॥४०॥
नानाविधाः सन्ति हि जीवजन्तवोऽवोचं मनस्यस्मि निजैकलत्वतः ।
रुध्यन्परत्राङ्गणमेतदीक्ष्यतां रिक्तं च शून्यं किल दृश्यते स्म यत् ॥४१॥
तत्राद्य वै जीवनमुल्लसत्यदो नानाविधास्तत्र सरीसृपा इमे ।
भूरिङ्गिणो व्योमतलोड्डयास्तथा निर्वाहयन्त्यात्मनि चात्मजीवनम् ॥४२॥
कार्ये मदीये जनयन्ति नत्विमे बाधां तदेषां जनयान्यहं कुतः ।
युद्धं तथाप्यस्ति प्रवृत्तमत्र मे तैर्मत्कुणैर्मच्छरमक्षिकादिभिः ॥४३॥
सोढास्त्यमीषां ततवर्हरूपिणां मत्कोष्ठके सन्ति सहस्रशो हि ते ।
तैरेकदा मे प्रतिघात उत्थितोऽज्ञानात्ततः कोऽप्यदशद्यदेषु माम् ॥४४॥
रोषादहं निर्गमयन्निमान् बहिर्यत्नानकार्षं, मम सम्मुखे स्थिताः ।
गेहान्स्वकीयान् कतिचिद्दिनस्थितीन् संरक्षितुं तेऽप्यदधुः पराक्रमम् ॥४५॥
कोषेषु तेषां स्थितमण्डकोच्चयं संरक्षितुं ते दृढतापुरस्सरम् ।
साम्मुख्यमेवाकृषतान्ततो मया रोषः स्वकीयः शमितो विचारतः ॥४६॥
मह्यं कुचेष्टन्त इमे न चेन्मनाङ् नैतान् पुरातः प्रविचालयाम्यहम् ।
सौख्येन चैतानिह वासयाम्यतो वर्षं न्यबात्सं सह तैः प्रकोष्ठके ॥४७॥
भूयो न तैराक्रमणं कृतं मयि प्रायस्तदान्योन्यसमादरे स्थितौ ।
सोढवं स्थिता मे ततवर्हमण्डली चाधः स्थितोऽहं समवेक्ष्य तद्बलम् ॥४८॥
मह्यं त्वरोचन्त न तैलपायिनस्तानप्यहं सोढुमभूवमुद्धशः ।
सान्ध्येऽधिकारे बहिरेत्य मौनिनोऽलीयन्त नीलिम्नि नभस्तलस्य ते ॥४९॥
ते भान्त्यभव्या इव मे घृणास्पदा भीतिं च काञ्चिज्जनयन्ति चेष्टितैः ।
इञ्चान्तरेणोड्डयते मुखस्य तेष्वेकः स्वपक्षैः स्पृशतीव मेऽक्षिणी ॥ ५० ॥
मामाक्रमेतैष न नाम कर्हिचिद्भीत्याकुलत्वं जनयत्ययं सदा ।
पश्यामि कालेन पिपीलिका अहं कीटान्तरांश्चापि घुणांश्च पल्लिकाः॥५१॥
सायं स्ववध्यं परिगृह्य मूकवत्पुच्छं परीहासवशादकम्पयन् ।
पल्यस्ततान् बहंगणान्न भुञ्जते वक्त्रे गृहीत्वा तु न तानमूमुचन् ॥ ५२ ॥
ता बोधपूर्वं ततदंशतो निजं रक्षन्ति वा तत्क्षणदैवयोगात् ।
एतन्न जानेपरमत्र दुर्मुखाद्दूरे स्थितिं ता प्रतिनिर्दिशन्ति नः ॥ ५३ ॥

पार्श्वे च वृक्षे सति तत्र यूथशोऽभ्राम्यन्ननेका गिलहर्य आशुगाः ।
धृष्टाश्च निःशङ्कतरा उपागमन् अप्यारुहंश्चात्र पदे च जानुनी ॥ ५४ ॥
कारागृहे लक्ष्मणपुर्यहं चिरायैकासनस्थोऽपठमेकमानसः ।
जात्वत्र काचिद्गिलहर्यरोहदभ्यागत्य पादावथ जानुनी क्रमात् ॥ ५५ ॥
आलोकयत्सर्वदिगन्तमेकला भूयो मदीयाक्षिदिशं व्यलोकयत् ।
मां वृक्षमेष त्ववधार्य वस्तु वा किञ्चित्क्षणान्नास्मि तदित्यधारयत् ॥५६॥
सा विस्मिता सङ्कुचिता पलायत प्रायोऽपतंस्तत्तनयास्तरोरधः ।
तत्पृष्ठतोऽभ्येति जनन्यमूनियं श्रेणीकृतानानयते च रक्षति ॥ ५७ ॥
भ्रष्टा भवन्ति क्वचनापि ते पुनः कश्चित्सखाऽन्विष्य ररक्ष तान्नयन् ।
स्तोकास्तु तोका कथमाशयाम तान् इत्येष प्रश्नः समुदेत्यतः पुरः ॥ ५८ ॥
प्रश्नः स युक्त्याऽत्र समाहितोऽभवत् स्रोतस्विलेखन्यवपूरणानने ।
कार्पासमल्पं प्रतियोज्य कल्पितं तत्पानकुप्पोसदृशं त्वमत्रकम् ॥ ५९ ॥
पारावता वन्दिगृहेषु ते मयाल्मोडां विना सर्वत एव सेविताः ।
उड्डीय ते व्योम सहस्रशोऽवृणत् कारागृहस्था व्यदधुश्च तद्वधम् ॥ ६० ॥
तैश्च क्षुधं स्वां विनिवारयन्ति ते मेना अपीमा अभवन् समन्ततः ।
तद्युग्ममेकं मम देहरास्थिते कारागृहे कोष्ठकपाटमस्तके ॥ ६१ ॥
नीडं विनिर्माय किलावसत्तयोर्गोधूमशाल्यादिकणानदामहम् ।
जातौ च तौ मे गृहपक्षियुग्मकं यद्या चते स्मान्नकणान् विलम्बतः ॥ ६२ ॥
चीङ्कारमेवेङ्गितमस्य मन्यते चेतो मदीयं तमधीरतोदितम् ।
आसीदघोरं कणदानकर्मणि प्रापं प्रमोदातिशयं च नर्मणि ॥ ६३ ॥
नैनीस्थकारासदने शुकी शुका आसन् रटन्तः परितः सहस्रशः ।
केचित्तु मत्कोष्ठकभित्तिभेदगाः कुर्वन्ति लीलाः प्रणयानुरूपिणीः ॥ ६४ ॥
ता दर्शकं हन्त विमोहयन्त्यहो युद्धं च यूनोः शुकयोः शुकीकृते ।
शान्त्या शुकी युद्धफलं प्रतीक्षते जेतुः पुरस्तात्प्रणयप्रवृत्तये ॥ ६५ ॥
तद्देहरादूनगवन्दिमन्दिरे नानाविधाश्चाप्यभवन्विहङ्गमाः ।
तच्चिञ्चिकारैश्चहकारटेङ्कृतैस्तत्राद्भुतो गीतसमागमोऽभवत् ॥ ६६ ॥
पुंस्कोकिलो रौति पिकीगणस्तथा संवेदनासूचककैश्च कूजनैः ।
कृत्स्नं वनं पूरयति प्रतिस्वनैः वृष्टेः पुरः स्वातिपिपासु-चातकः ॥ ६७ ॥

तस्य स्वरं हन्त पियूपियूमयं श्रुत्वा जनो विस्मयमेति कञ्चन ।
नक्तन्दिवं तद्रटनं घनातपद्वन्द्वोद्भवं शाम्यति नो निरन्तरम् ॥ ६८ ॥
एतेषु कांश्चिन्न विलोकितुं क्षमास्तद्ध्वानमेवाश्रृणुमात्र तत्तरौ ।
कौञ्चाश्च गृध्रा गगने प्रडीनकं संडीनकं चारचयन्ति वेगतः ॥६९॥
तानुड्डयानानपि वीक्षितुं वयं शक्ता निडीने निपतन्त्यधस्तलात् ।
उड्डीनके वायुजवात्तथोच्चकैरुत्पत्य यान्तो नभ आवृणन्ति ते ॥७०॥
ते सारसा अप्युपरि, भ्रमन्ति नः कारागृहे चाथ बरेलिपूःस्थिते ।
आवास आसीद् बहुमर्कटावलेर्यत्कूर्दनाद्यैः प्रतियामि कौतुकम् ॥७१॥
काण्डं तदेकं मनसि प्रभावकृत्तोकः कपेः कोऽपि तदन्तरेऽविशत् ।
प्राकारमूर्धावधि नोच्छलन्नयं कारागृहस्थैर्गमितो विनिग्रहम् ॥७२॥
कण्ठे निबद्धो लघुरज्जुबन्धने भित्तेः परस्तात्पितृमातृदृग्गतः ।
क्रोधादुभौ रक्तमुखावजायतामेकस्तयोर्भित्तितटादवारुहत् ॥७३॥
साक्षादकूर्दच्च स तोकपार्श्वतो वीरोचितं कर्म कृतं हि तेन तत् ।
कारागृहस्था लगुडादिहस्तकास्तान् भ्रामयन्तः परितस्तदाभवन् ॥७४॥
जैत्रं भवेत्साहसमित्यभूदृतं सम्मर्दं एषः परितः पलायितः ।
नीत्वा गतो मर्कटतोकमाश्वसौ ता यष्टिका वा लगुडा बृथाभवन् ॥७५॥
प्रायश्च जीवा अथ जन्तवोऽप्यमी दृष्टा भवन्त्येव विषेण संयुताः ।
येभ्यः सदा दूरमवस्थिता वयं काङ्क्षामहे क्वापि न तत्समीपताम् ॥७६॥
कोष्ठेष्वमी यान्ति कदापि वृश्चिका विद्युद्विशेषेण यदत्र गर्जति ।
दष्टो न केनापि कदाप्यहो ! अहं प्रायोऽद्भुते वस्तुनि ते मयामिलन् ॥७७॥
मद्विष्टरे वा मम पुस्तकेऽथ वा प्रोत्थापितेऽसौ समदृश्यताग्रतः ।
कश्चित्तु कृष्णः सविषश्च वृश्चिको कुप्यां मयाऽरक्ष्यत सप्तवासरान् ॥७८॥
तत्राशयं तं किल मक्षिका अहं सूत्रेण बद्ध्वा पुनरेष लम्बितः ।
किन्त्वेष केनापि गुणेन निर्गतो नाहं पुनर्द्रष्टुमिमं समुत्सुकः ॥७९॥
स्वं कोष्ठकं साधु समस्करं ततश्चान्वेषयं तं न तु लब्धवानिमम् ।
त्रिर्वा चतुर्वाऽत्र भुजङ्गमा अपि प्राप्ताः समीपेऽपि प्रकोष्ठकस्य ते ॥८०॥
एकस्य वृत्तं किल वृत्तपत्रकेऽप्यायात्प्रकाशं किल दूरगाम्यभूत् ।
सत्यं न तन्मे प्रतिभाति साधुवत तज्जीवनं वै भुवि रूक्षनीरसम् ॥८१॥

तन्नीरसत्वं यदि भज्यते कुतस्तद्भाति नूनं हृदयेषु वन्दिनाम् ।
सर्पान्न मन्ये भुवि साधु खल्वहं किन्त्वन्यवन्नास्मि बिभेमि वै ततः ।।८२।।
तद्दंशभीतिस्तु ममापि जायते पश्यामि चेत्तं स्वमवामि तत्ततः ।
तद्दर्शनेनारुचिरस्ति मानसे तस्माच्च भीतो न पलायितोऽभवम् ।।८३।।
तावद्भयं नास्ति घृणास्ति यावती कारागृहे नूनमलीपुरस्थिते ।
तत्रार्धरात्रे सहसास्म्यजागरम् पादेऽस्ति रिङ्गत्किमपीति संविदन् ।।८४।।
विद्युत्प्रदीपं समदीपयं यदाऽपश्य पदे कर्णखजूरमागतम् ।
वेगादकस्माच्छयनात्किलोत्पतन् भित्तेर्विघातादवितोऽभवं तदा ।।८५।।
रूसप्रसिद्धेन हि जीवशास्त्रिणा श्रीपेवलापेन निवेदितास्तु ताः ।
ज्ञातं स्वयं स्फूर्तक्रिया-पदोदिताः सन्तीदृशस्तावदिह क्रिया इति ।।८६।।
यो देहरादूनगवन्दिमन्दिरे जन्तुर्ममाभूत्स नवोऽप्रतीतवत् ।
द्वारे स्थितो वन्दिगृहाधिकारिणा संभाषभाणं स्थगयन्निवागतः ।।८७।।
कश्चिज्जनो हस्तधृतैकजन्तुकोऽभ्यामन्त्रितोऽसौ समुपागतः प्रभुम् ।
दृष्टो मया जन्तुरयं तु गोधिकानक्रान्तरालाकृतिको द्विपादकः ।।८८।।
पञ्चाङ्गुलीकः स च शल्कभृत्त्वचाऽभद्रः कुगात्रः क्षणजीवनो यथा ।
रीत्या कयाप्येष च कुण्डलाकृतिः प्रोतः स वंशे पुरुषेण नेष्यता ।।८९।।
वो' नामकोऽसाविति तेन भाषितं श्रुत्वाऽभ्यपृच्छन् स-'किमस्य धास्यति ।'
प्रत्याह-'शाकं किल पक्ष्यते मये' त्यासीत्स वन्यः पुरुषो हि कश्चन ।।९०।।
पश्चान्मयाधीतमभूदिहाऽऽतपच्छाया स्थितं जङ्गलमित्युपश्रुतम् ।
तत्पुस्तकं किञ्चन चेंपियन्कृतं, ज्ञातातु पेंगोलिन' इत्यदोऽभिधा ।।९१।।
कारागृहे वन्दिजनस्य भावना दीर्घापराधस्य विशेषतस्तु ताः ।
भोज्यं न किञ्चिद्यदिहोपभुञ्जते तास्तर्पयन्तीह तु जन्तुपालनैः ।।९२।।
सामान्यतो वन्दिजनो न जीवनं कश्चित्समर्थो भवतीह रक्षितुम् ।
सङ्ख्याभृतस्ते तु ततः स्वतन्त्रतां याता न तान् कर्मकराः प्रशासति ।।९३।।
प्रायोऽभिरक्षन्ति गिलाहरोरिमे साश्चर्यमाकर्ण्यमिदं भवेत्पुनः ।
रक्षन्ति ते वा नकुलानपि स्वयं शुनोऽधिकारं प्रविशन्ति न त्विमे ।।९४।।
मार्जारमुत्साहयति प्रवेशने कारागृहस्थोऽधिकृतो हि पूरुषः ।
एकात्र पूसी मम सख्यभावनामुद्बोधयन्ती विशति स्म सर्वदा ।।९५।।

सा पालितासीदधिकारिणः, परीवृत्तावयं तामनयत्सहात्मना ।
तस्यां गतायां कियतोऽत्र वासरान्विश्लेषदुःखं मनसा मया धृतम् ॥९६॥

श्वानो न कारागृहमाविशन्त्यमी, तैर्देहरादूनगवन्दिमन्दिरे ।
संयोगतोऽजायत मे परीचितिः काराधिकारी शुनिकामनाययत् ॥९७॥

जाते तु तस्यापि किल स्थलान्तरे तामेष वै वन्दिगृहे व्यसर्जयत् ।
सेतस्ततो भ्राम्यति, सेतुनालिकास्वावासमादृत्य दिनान्ययापयत् ॥९८॥

काराधिकारी परिवार एव तां प्रादात्कदाचित्करपट्टिकांशकान् ।
प्रायः क्षुधैव म्रियते स्म सा वहिः कारागृहान्निग्रहणे वसाम्यहम् ॥९९॥

सा भोजनार्थं समुपागताथ मामस्यै किलादामहमेकरोटिकाम् ।
सासूत पिल्लानिह नालिकामुखे नीतेषु चान्येषु त्रयोऽवशेषिताः ॥१००॥

तानप्यहं तत्र किलान्नदानतोऽभ्यापीपलं कापि च तेषु पिल्लिका ।
रुग्णाभवत्सोद्विजते स्म पीडया तां पश्यतो मे महती रुजाभवत् ॥१०१॥

चिन्तासखस्तामिह पर्यचारयं रात्रौ दशद्वादशवादनोत्थितः ।
सम्भालयंस्तामचिकित्सयं यथा रोगाद्विमुक्ता मम मोदमातनोत् ॥१०२॥

भूमिस्थलाद्वारिणि जीवजन्तुभिः साकं ममाभूदधिका परोचितिः ।
रक्षा शुनां मे व्यसनं किलाभवत् गेहे किलैतान् बहुलानपीपलम् ॥१०३॥

कार्यान्तरव्यग्रतया तु तानहं सम्यङ् न सम्भालयितुं क्षमोऽभवम् ।
कारागृहे तत्सहयोगहेतवे त्वासं कृतज्ञो मनसा निरन्तरम् ॥१०४॥

नो भारतीयाः स्वगृहेषु पालनं यत्कुर्वते जीवगणस्य साम्प्रतम् ।
जीवानुकम्पा-समयानुयायिनोऽप्येतेऽवहेलामिव तासु कुर्वते ॥१०५॥

गां प्रत्यपीमे प्रियपूज्यभावनासम्प्रेरिताऽनेकरणोद्यमा अपि ।
नो वर्तयन्तीह दयां यथार्थतः पूजां दयां चैकगतां न मन्वते ॥१०६॥

भिन्नेषु देशेषु निवासिभिः कृता भिन्ना प्रभिन्नाः पशुपक्षिणः प्रियाः ।
माहात्म्यचारित्र्ययुगप्रतीकवत्तैस्ते महत्त्वं गमिताः समन्ततः ॥१०७॥

श्येनः किलामेरिकया वृतोऽभवत्सिंहो वृलश्चाङ्गलदेशवासिभिः ।
फ्रांसेन युद्धोद्यतकुक्कुटो वृतो प्रत्नेन रूसेन च ऋक्षराडयम् ॥१०८॥

प्रश्नोऽयमास्ते पशुपक्षिणस्त्वमी तद्राष्ट्रचारित्र्यमितो नयन्त्विह ।
आक्रामकास्तेष्वधिकारणोत्सुका हिंस्राः स्वभावात्पशुपक्षिणः स्थिताः ।१०९।

नाश्चर्यमत्रास्ति किल प्रतीकतां नीता इमे जीवनसर्जनाय यैः ।
ते बोधपूर्वं प्रकृतिं निजां तथा निर्मान्ति चाक्रामकतां श्रयन्त्यमी ।।११०।।

ते भर्त्सयन्तीह परान्, परेष्वमी वुक्कन्ति गर्जन्ति च घातयन्त्यमून् ।
नाश्चर्यमेते किल हिन्दवो दयावन्तः किलाहिंसकगोप्रतीककाः ।।१११।।

ऋग्वेद सायणभाष्यभूमिकया सहादिममण्डले
भाष्यं किलानूद्यात्र यो ब्राह्मणसमाजेऽमुद्रयत् ।
तत्कृते श्रीनेहरूचरिताख्यकाव्ये पञ्चच-
त्वारिंशसर्गो वन्दिगेहे जीवजन्तुमयो गतः ।

सङ्घर्षः

शार्दूलविक्रीडितम्

षट्चत्वारिंशः सर्गः

सङ्घर्षो बहिराचलच्च पुरुषा नार्यश्च वीरा इदं
जानन्तोऽपि हि वर्तमानसमये चासन्नभाविन्यपि ।
साफल्यं नहि भाग्यलेखलिखितं तेषाञ्च भालस्थले-
ऽप्यस्तीति प्रबलं सुसज्जितमिदं दुःशासनं रुन्धते ।।१।।

तीव्रं चापि निरन्तरं च दमनं यद् भारते वर्धते,-
ऽत्राधारं परिदर्शयत्यविरतं तच्चाङ्ग्लराज्यस्य नः ।
नास्ते तत्र छलं प्रवञ्चनमिदं सन्तोषदं चास्ति नः
शस्त्राणि प्रफलन्ति योद्धृवचनं तन्नायथार्थं स्मृतम् ।।२।।

शस्त्रैः साध्यमशेषमत्र न तु तैराधार्यते शासनं,
इत्यामृश्यत शासनस्य दमनं सोढुं कठोरोत्तमम् ।
तस्मादेव हि विक्रयोऽस्त्यनुचितः स्वस्यात्मनश्चात्मिको
युक्तो न व्यभिचार एष इति तच्छिष्टौ स्थितिः स्वीकृता ।।३।।

कारागारगतं वपुर्हि विवशं किन्त्वत्र जानीमहे
स्थित्वा तत्र वयं स्वकार्यकरणैः सेवामिमां कुर्महे ।
बाह्यस्थांश्च बहूनपेक्ष्य महतीं सेवां विदध्मो वयं
तत्किं दुर्बलतावशाद्विजहिमो भव्यं भविष्यं भुवः ।।४।।

स्वप्राणानभिरक्षितुं सुगमनानद्यैव वा श्वोऽथवा,
शक्तेरस्ति सहिष्णुतादिकभुवः सीमेति सत्यं पुनः ।
केचिन्नोऽक्रियतां गतास्तनुदृशा केचिन्मृताः कर्मतो
वा केचित्पृथगास्थिता अथ कृतघ्नत्वं परे संश्रिताः ।।५।।

बाधास्वासु सतीषु चापि सकलं कार्यं किलाग्रेऽसरत्
आदर्शे स्फुटतां दधत्यथ यथावत्संस्थिते साहसे ।
शक्यो नास्ति पराजयोऽसफलता सिद्धान्तसंवर्जनम्,
अस्वीकार इहाधिकारविभवस्यान्यायपादानतिः ।।६।।

स्वेनैवात्मनि चाहिता व्रणगणाः शत्रुप्रयुक्ताद् व्रणाद्
दुःसाध्या हि भवन्ति, तेन न जनैः स्वात्मा क्वचिद्धन्यताम् ।
दौर्बल्येषु निजेषु जातु जगति भ्रान्ते मनो ग्लायते
साफल्यं कियदर्जितं त्विह मनागात्माभिमानोऽभवत् ॥७॥

यच्चाप्यस्मदुपाश्रितैरिह जनैर्वीरत्वपूर्णः क्रमः
कश्चित्प्रस्तुत इत्यमुत्र च वयं सैन्येऽभवामोद्यताः ।
इत्येतेन हि चारुणा स्वमननेनात्मा स्वयं हृष्यति
स्वानन्दं किल विन्दतीह च मनो लाभोऽयमत्रोत्तमः ॥८॥

आज्ञाभङ्गप्रसङ्गके सविनयं सञ्चालयत्स्वब्दके-
षूद्योगो विहितोऽधिवेशनसमारोहाय कांग्रेसिकैः ।
दिल्ल्यामेकतरः परश्च कलिकातायां स यातो वृथे-
ति स्पष्टं यदवैधमण्डलमिहाध्यावेश्यते नो शमात् ॥९॥

उद्योगस्त्वधिवेशनस्य पुरुषैः सङ्घर्ष आसीदयं,
तैरेव द्वयमेतदुत्खनितमासीद्यष्टिभिर्दण्डकैः ।
व्याकीर्णञ्च बलादभूत्सुबहवस्तैर्निग्रहं लम्भिता
आसीत्तद्द्वययोजनस्य हि गुणोऽनन्तप्रजासङ्गमः ॥१०॥

तत्रावैधयुगेऽभवत्प्रतिनिधिर्नूनं प्रजा भूयसी
प्रान्तेभ्यः सकलेभ्य एव गणनातीता समभ्यागता ।
ज्ञात्वा हर्षविशेषमेष च भजे युक्तादिह प्रान्ततो
लोकैर्मुख्यतया प्रयुक्तमभवत् किञ्चित्समायोजनम् ॥११॥

मन्माताप्यकरोदिहाग्रहभरं यातुं त्रयस्त्रिशके
मार्चे मासि किलाधिवेशनमहेऽस्मिन्कालिकाताभवे ।
यान्ती तत्र च सा न्यगृह्यत पथि श्रीमालवीयादिभिः
साकं नेतृभिरध्यवास्यत किलाऽऽसन्सोलकारागृहे ॥१२॥

उत्साहः स च तच्च जीवनबलं दृष्ट्वाऽस्मये विस्मया-
दासीत्सा ह्यबला च रोगशिथिला भीता न कारागृहात् ।
सा तस्मादपि घोरसंकटमयादाग्नेयपारीक्षणा-
त्कष्टान्निःसृतिमाप, पुत्रसहिते तस्याः सुते अप्युभे ॥१३॥

भूयो वन्दिगृहे हि तत्प्रियजना अन्येऽपि संवेशिताः
दीर्घं कालमिह स्थिताः सुखधिया शून्याद् गृहाद् भीतिदात् ।
युद्धं नश्च शिथिल्यभूद्गतिजवोऽसौ मन्द्यमूच्चास्य वै
तर्ह्युत्साहमनोजवा अपि गता नैयून्यमेव क्रमात् ॥१४॥

अन्तश्चान्तरिहाभवत्समयतो दीर्घात्किलोत्तेजना
यद्देशान्तरमप्यगुर्मम जवात्ते ते विचाराः क्रमात् ।
तत्कारागृहवासिनात्र मयका मन्दार्धताग्रासतां
यातस्यास्य दशां निरीक्ष्य जगतोऽधीतं तदा कारणम् ॥१५॥

विश्वस्यास्य च पुस्तकान्युपगतान्यासंश्च यावन्त्यपि
प्रायस्तान्यधियातवानथ यदध्यैषं तदाकर्षितः ।
सन्नालोकयमत्र भारतभुवः स्वीयाः समस्यास्तथा
संघर्षानधिकृत्य शक्तिमहतो वै विश्वनाट्यस्य तान् ॥१६॥

तासामार्थिकराजनैतिकतया लोके प्रसिद्धात्मनां
शक्तीनां समरस्य तस्य च चिरं चिन्तामकार्षं हृदि ।
योऽसावद्य समस्तराष्ट्रविषयेष्वन्योन्यमारभ्यते
तस्यांशोऽयमभूच्च मे सहमतिर्वै साम्यवादेऽधिका ॥१७॥

आकृष्टिश्च समाजवादसहितेऽभूत्साम्यवादेऽधिका
कालाद्दीर्घतराच्च रूसविषयो मह्यं किलारोचत ।
रूसस्यास्य बहूनि चापि चरितान्यासन्न मे रोचना-
न्यन्यस्याभिमतं न चेदभिमतं तद्गम्यमेतद्यथा ॥१८॥

सर्वेषामपि सैनिकी कृतिरथो नैजव्यवस्थासु च
स्थाप्यासु त्वनपेक्षितं निजबलं यद्योज्यते तत्तथा ।
किन्त्वन्यत्र जगत्यपीदमखिलं साम्राज्यवादात्मके-
ऽदोऽनावश्यकशक्तियोगविहितं तद्दण्डनं दृश्यते ॥१९॥

सा सङ्ग्राहिसमाजसम्पदिह नः शक्तिप्रयोगाश्रिते-
त्यासीन्मेऽनुभवः किलाधिकतरो नैनं विना सा स्थिरा ।
यावत्क्षुन्मरणाद्भयं च जनतामाधिक्यतो भापये-
त्स्तोकानां च समीहया प्रचलितुं बाध्यां न कुर्यादिदम् ॥२०॥

तावद्धि क्रमवर्धमानधनवत्सम्मानवत्स्तोकव-
ल्लोकादागतराजनैतिकमिदं स्वातन्त्र्यमास्ते वृथा।
साम्राज्येऽपि बलप्रयोग उचितश्चेत्साम्यवादेऽप्यसौ
वर्तेतात्र न तावदस्ति जगतः क्षेमं न योगोऽपि सः ॥२१॥

साम्राज्याङ्गमिदं बलं कथमपि त्यक्तुं न शक्यं भवेत्
साम्ये तद्यदि लक्ष्यसाधनतया तावत्समालम्ब्यते।
शान्तौ वा सहयोगके स्थिरपदं स्वातन्त्र्यमाराध्यते
तर्ह्यस्मिन् स बलप्रयोगनियमस्त्यक्तुं सुशक्यो भवेत् ॥२२॥

रूसेनात्र च यानि कान्यपि कृतान्यागांसि तान्यासतां
सोऽयं ह्यद्य विपत्सु हन्त विजयं प्राप्तोऽस्ति घोरास्वपि।
सोऽस्या नूतनकल्पनस्थितिदिशि न्यस्यत्सुदीर्घं क्रमं
भूयोऽग्रेसृतवानिहास्ति भुवने मन्दार्घतामन्दिते ॥२३॥

देशास्ते सकला अपि प्रतिपदं प्रत्यग्गतिं संश्रिता
रूसः सोवियतस्तु नूतनजगन्निर्माणकार्ये रतः।
दृष्ट्वा लेनिनपादचिह्नमयतो दृष्टिर्भविष्ये स्थिता,
किं भावीति विचारतः सफलतामाराधयत्सर्वतः ॥२४॥

संसारस्य परे समे जनपदास्ते भूतकालाहृताः
शून्यत्वं गमिता अतीतयुगसंस्मृत्याः स्वचिह्नान्यमी।
पातुं शक्तिमयुञ्जतेति पठनान्मय्युत्थिता या मति-
स्तस्यां सोवियतानुशासनगता मध्यैशियाप्रोन्नतिः ॥२५॥

प्रादेशिक्युपकीर्तिताऽभवदिति स्वां सम्मतिं सर्वथा
रूसस्यैव सुपक्षतो बलयितां कार्त्स्न्येन पश्याम्यहम्।
संसारेऽन्धतमोवृते च विकले रूसस्य सत्ता तथा
तस्योदाहरणं प्रकाशभरितं सोत्साहमेवाभ्यभात् ॥२६॥

यद्यप्यस्ति महत्त्वमत्र भुवनेऽस्मिन् साम्यवादानुगं
राज्यं स्थापयितुं प्रयोगविषये रूसस्य यत्नेष्वपि।
साफल्यस्य तथा स्फुटा सकलता या चापि भूयोऽस्ति तत्-
प्रामाण्यं न तदस्ति साम्यसमयेऽसत्त्वस्य सत्त्वस्य वा ॥२७॥

अन्ताराष्ट्रियकारणैरथ च तैस्तद्राष्ट्रियैरेव ते
गुर्वीश्चापि गरीयसीरपि त्रुटीः कुर्वन्तु बाल्शेविकाः ।
तेनैते च भवन्तु तेष्वसफलाः किन्त्वेष सिद्धान्तको
युक्तः संभवतीह किन्त्वनुकृतिः स्यान्मूर्खतैवैकतः ॥२८॥

यस्मात्तद्विनियोग एष भविता प्रत्येकदेशस्थिती-
रेवान्वीक्ष्य तदैतिहासिकविकासावस्थितौ निर्भरः ।
हिन्दुस्थानमथान्यदेश इह तैर्बाल्शेविकैर्वैवशात्
क्लृप्तेभ्यः स्खलितेभ्य एत्य विनयं साफल्यलाभं व्रजेत् ॥२९॥

स्यात्तैर्युक्ततरः सुतीव्रगतिभिर्गन्तुं प्रयत्नः कृतः
तेषां सर्वत एव शत्रुनिवहा आसन्यतः सङ्गताः ।
बाह्यादाक्रमणादपीह च भयं तेषामभूत्तत्क्षणं
किञ्चिन्मन्दगतौ तता न विपदो ग्रामेष्ववर्त्स्यन्त ताः ॥ ३० ॥

किन्तु प्रश्न इहोद्भवत्ययमपि स्यान्मन्दवेगात्परी-
वृत्तौ तत्परिणाम एष सुलभः किं मौलिकः सम्भवेत् ।
कस्मिंश्चिद्विषमे कदापि समये यत्राधृताप्याकृतिः
संस्कार्यास्तु सुधारवादबलतश्चासम्भवा संस्कृतिः ॥ ३१ ॥

पूर्वं तावदिह क्रमं परिसरेद्येन व्यवस्था भवेत्
सोद्देश्यं परिपूर्णतामुपनयेत्पश्चाद्भवेद् बाधिका ।
सम्बन्धं न तया भविष्यदरिणा कञ्चित्क्वचिच्छेषये-
दित्थं तत्प्रतिपत्तियुक्तिकुशलः स्याद्राष्ट्रनिर्मापकः ॥३२॥

हिन्दुस्थानगभूमियन्त्रसदनप्रश्नास्तथा चापरा-
स्तास्ता दीर्घसमस्यकाः किल समाधेयाः कया चिन्तया ।
क्रान्त्युत्पादकयोजनाबलितया शक्त्येष्टया केवलम्
लायड्जार्ज इह स्वसंस्मरणके युद्धस्य यत्प्रोक्तवान् ॥३३॥

खातं किञ्चन कूर्दनद्वयसमुल्लङ्घ्यं समुल्लङ्घयेत्
इत्यस्मान्न परं भवेत्स्खलितकं बुद्धेश्च कायस्य च ।
रूसं चेद्विजहाम मार्क्सवचसः सिद्धान्ततत्त्वागमा-
भ्यामाभ्यां ममचेतसोऽत्र बहुलाः कोणाः समुद्द्योतिताः ॥३४॥

नूत्नोऽर्थश्च ममेतिहासमननात्कश्चित्प्रतीतिं गतः
शैल्या तत्र च मार्क्सवादकृतया भूयान् प्रकाशोऽपतत् ।
एकस्मादपरं च दृश्यमुपयत्तन्नाटकं मेऽभवद्
यत्रोद्देश्यव्यवस्थिके हि घटनाचक्रस्य मूले स्थिते ॥३५॥

तस्यात्तावदिहांशतोऽप्यविदितं, तत्राभवंश्चापदो
भूते चापि च वर्तमानसमयेऽत्राशा भविष्यं प्रति ।
आशास्वासु कियन्ति सन्तु च भयान्येतानि पार्याणि नो-
ऽस्मिंस्तन्मौलिकरूपतो नहि मतं रूढं किमप्यस्ति यत् ॥३६॥

वैज्ञानिक्यपि दृष्टिरत्र निहितास्ते मार्क्सवादे यत-
स्तस्मान्मत्प्रियतां गतोऽत्र च मतं रूढं प्रविष्टं कियत् ।
रूसे चेतरदेशवर्तिनि मतं यत्साम्यवादेऽविशत्
तन्मिथ्यामतवादिनां प्रति भवेत् संभूतमाक्रामकम् ॥३७॥

तन्मे निन्दितुमेव योग्यमवभात्यस्त्येष रूसे क्रम-
स्तस्मिन् सत्परिवर्तनस्य महतः सम्भावना चास्त्यसौ ।
दीर्घाणां विपदां तथासफलतानां तद्विरोधित्वत-
स्तर्ह्येषा परिवृत्तिरत्र सहसा सम्भावनीया भवेत् ॥३८॥

विश्वव्यापिनि सङ्कटे पुनरहो मन्दार्धतायामपी-
दं विश्लेषणमत्र मे समुचितं भाति स्म मार्क्सोक्तितः ।
सिद्धान्ता इतरे व्यवस्थितियुताः स्वार्थानुमाने रताः
स्तत्रैतेन हि मार्क्सवादमननेनादर्शितं कारणम् ॥३९॥

तेनैवाद्य समाहितिः समुचितास्ते प्रस्तुता वास्तवी,
विश्वासश्च यथा यथाऽयमुदितश्चोत्साह आसम्भृतः ।
मय्येषोऽपि तथा तथा, सविनये भङ्गे त्वसाफल्यतः
प्रोद्भूता च तटस्थता तनुरभूद् भूयश्च कालक्रमात् ॥४०॥

किं विश्वं न जवेन याति मनसा लक्ष्यं सुनिर्धारितं,
सन्त्येवाद्य महारणस्य विपदां भारस्य सम्भावनाः ।
प्रत्येकत्र दशाक्षणे वयममी चाग्रेसराः स्मः स्फुटं
नैकत्रापतिता भवाम गलिताः स्मस्तूत्थिता जाग्रतः ॥४१॥

दीर्घेऽस्मिन् प्रतिभाति राष्ट्रियरणः प्रस्थानमार्गे ममा-
रामस्थानसमोऽस्ति तत्र दमनं कष्टं च नः साध्विदम् ।
आगामिष्विह सङ्गरेषु वयमासज्यैवमद्योद्यता-
स्तेषां चापि विचारणाय विवशाः स्मो यैर्जगद् विद्रुतम् ॥४२॥

भीरूणामथ निर्गमेन च कृशानां स्मो वयं वै दृढा
युक्ताश्चाप्यनुशासनेन सघना भूयो भवामोऽधिकम् ।
कालोऽप्यस्त्यनुकूल एष च जगज्जातं च पक्षन्धरं
इत्याद्यध्ययनं च तस्य मननं भूयोऽथ भूयः कृतम् ॥४३॥

रूसे शार्मणिके तथाङ्ग्लविषये चामेरिकायामपि
फ्रांसे वा जयपत्तने भवति किं मध्येशियायामपि ।
चीने चेति मया स्वधीतमथ तां सामूहिकीं चेतना-
मध्येतुं कृतवान् प्रयत्नमधिकं ज्ञातुं च तात्पर्यकम् ॥४४॥

आपत्तीः प्रतितर्तुमत्र सकला देशाः प्रयत्नांस्तु कान्
संभूयादृतवन्त एकलतया प्रत्येकमेषां च कान् ।
इत्येतन्मनसा मयानुपठितं तत्रार्थिकीनैंतिकी-
श्चैवात्मस्खलना निवारयितुमत्राधारयन् किं पुनः ॥ ४५॥

निःशस्त्रीकरणादिका अपि च तैः सर्वाः समस्याः कथं
तैर्व्यस्तैश्च समस्तकैरिह समाधानं कथं लम्भिताः ।
अन्ताराष्ट्रियसंसदो मुहुरिहासाफल्यमालोक्य चा-
स्माकं भारतगां सुदुर्घटतरां तां साम्प्रदायीं स्थितिम् ॥४६॥

सद्भावे सति वै परस्परमहो नैषा समस्या समा-
धानं प्राप्तवती च सत्यपि विभौ विश्वासभावे हृदि ।
यद्येनां न समादधेमहि तदाऽऽपत्तिर्जगद्व्यापिनी
मूर्धस्वानुपतिष्यतीह न पुनर्यूरोप आप्ता फलम् ॥४७॥

नात्रैषा यदमेरिकापि विफला जाता परन्तु द्वये
ऽप्यस्याः साधु समाहितेरनुगमोऽभूद् दुर्भंगो दुर्गमः ।
सम्बद्धाश्च जनाः सदा शुभपथप्रस्थानतो विभ्यत-
स्तं नैवाश्रितवन्त इत्यहमिह स्यां वा कृतार्थः कथम् ॥४८॥

संघर्षं च विपत्तिमस्य जगतः सञ्चिन्तयन्व्यस्मरं
सीम्न्येकत्र तु राष्ट्रियामपि निजां वैयक्तिकीमापदम् ।
ज्ञात्वानन्दमविन्दमेष जगतः क्रान्त्याकरेऽस्मिन्युगे
जीवन्नस्मि किलात्र कोणनिहितो युज्येय सत्क्रान्तिषु ॥४७॥

विश्वस्मिन्निह जातु मामुदसयत्संघर्षहिंसावृतं
तद्वातावरणं ततोऽपि विषमं दृश्यं त्वदुःखाकरोत् ।
स्त्रीपुंसाविह तावधीतलिखितावप्यापतन्मानवा-
च्छङ्काकिङ्करतां श्रितावविरतं रुन्धः स्म नो सङ्कटम् ॥५०॥

मस्तिष्कं तु तयोर्न कष्टसहनं नो निःस्वतां मानुषीं
वृत्तिं वा विरुणद्धि चासु दमने वातावृतेऽस्मिन्नपि ।
सात्यन्तं मुखरास्ति हन्त लघुता वाऽखण्डमेकस्थितं
पुष्यत्यत्र फलत्यपीह सुजनाश्चाऽद्यासते मूकताम् ॥५१॥

आघातं च महान्तमन्तरभजं सातङ्कवादैर्निजै-
र्लोकैः साकमुपस्थितं हिटलरस्यालोकमानो जयम् ।
चेतोऽसान्त्वयमेष हन्त क्षणिकः संभाव्यते तज्जयो
दृष्ट्वा तं च मनस्यभूदिह वृथाऽऽस्ते मानवीयः श्रमः ॥५२॥

अन्धान्धत्वमुपेत्य यन्त्रनिवहे सङ्कुच्छमाने मनाक्
चक्रस्यैकलदन्ततोऽतिलघुतः सम्भाव्यते किं फलम् ।
तत्त्वज्ञानमिदं मयास्त्यधिगतं यत्साम्यवादान्वयात्
तत्रास्मिन् समये दलं मम शमं चाशामुदाजीवयत् ॥५३॥

हिन्दुस्थानधरातले कथमसौ स्यात्संप्रयोज्यस्ततो
नाद्याप्यत्र समाहितोऽस्ति नयिकस्वातन्त्र्यगः प्रश्नकः ।
मस्तिष्केषु च राष्ट्रवाद इह नोऽसौ सन्निविष्टो हठात्
किं तेनैव समं वयं विनिपतेमार्थे स्वतन्त्रेष्वपि ॥५४॥

तद्द्वन्द्वं क्रमशोऽथवा निजकरे गृह्णीमहेऽत्रान्तरं
तन्मध्ये किमतोऽपि नाम समयस्यास्तां न तच्चिन्त्यते ।
संसारस्य दशाऽथ भारतसमाचारांस्तु सामजिकी-
मस्माकं पुर आनयेन्नहि पृथक् सा राजनैतिक्यतः ॥५५॥

हिन्दुस्थानधरातले ब्रिटिशधीः सूतेस्म सामाजिकीं
वृत्तिं या विरुणद्धि नः स्ववशतां तां राजनैतिक्याह्वयाम् ।
तच्चासीदनिवार्यमत्र वहुधा वर्गान् समूहानहं
स्पष्टं दर्शनगोचरानरुरुचं नोत्थापितान् बाधितुम् ॥५६॥

किन्त्वत्रेदमचिन्तयं किमितरेऽप्येतद्वरं मन्वते
स्पष्टं केऽपि च नस्तथा न्वमिनुवन्, ते सन्ति मुष्ट्या मिताः ।
हन्तात्र क्वचनाऽऽमहानगरतः स्तोकस्य तस्यावधौ
राष्ट्रीयाग्रहवैरिणः कतिपये मुम्बापुरादौ स्थिताः ॥५८॥

ते चान्दोलनमस्मदीयमिदमालोच्य स्वपक्षेऽवदन्
वैशिष्ट्यादिह मुम्वयोमधिवसन्तः कालिकातां तथा ।
आसन् संघटिताश्च केऽपि श्रमिकास्तेतत्समाजं श्रिताः
किन्त्वेते न दृढा न संहततरा मन्दार्थतापीडिताः ॥५८॥

साम्येनाथ समाजवादमननास्पष्टरूपेण च
व्याप्तान्यासत तेष्वधीतलिखितेष्वध्यक्षमुख्येष्वपि ।
कांग्रेसस्य नवौ नवीनवयसौ स्त्रीपुंसकौ यौ पुरा-
मार्लेब्राइसकीथमैजिनिमतान्यालोचयामासतुः ॥५९॥

तावध्यापठतोऽद्य रूसविषयेऽस्मिन् साम्यवादे यदा
साहित्यं समुपाश्रितौ तदधिकं ध्यानेन मानेन च ।
षड्यन्त्रं मयराष्ट्रगं च जनताध्यानं समाकर्षयत्
नूत्नेष्वेषु विचारवस्तुषु च तद्व्यावर्तने साह्यकृत् ॥६०॥

विश्वव्यापकसङ्कटावसरतोऽप्यस्यां दिशि ध्यानजं
वैवश्यं ह्युदपादयत्प्रतिपदं संस्थासु शङ्कामपि ।
जिज्ञासां विजिगीषुतां वितनुते या भावना साऽधुना
सन्दृष्टा भवतीति काचन मनोदिक् स्पष्टमालक्ष्यते ॥६१॥

किन्त्वास्ते लघुदोलनं न खलु यत्स्वस्मिन्न धत्ते दृढं
विश्वासं कतिजिज्जना विदधते नास्तिक्यमार्गभ्रमम् ।
आदर्शोऽस्ति न किन्तु निश्चिततरस्तेषां स्फुटः कश्चन
सामान्यादिह राष्ट्रियत्वमधुना यावद्विचाराश्रयः ॥६२॥

स्पष्टं चेदमवेदिषं यदवधि प्राप्येत नैवांशतः
स्वातन्त्र्यं नृपनैतिकं तदवधि स्याद्राष्ट्रिया भावना ।
तस्मात्काङ्ग्रसमेतदस्ति सबला संस्था सदाग्रेसरा
गान्धेर्नेतृतया त्रयोदशसमा या संश्रिता जागरम् ॥६३॥

अस्पष्टेऽपि च मध्यवर्गवितते चादर्शके सत्यपि
क्रान्तिप्रेरकमेव कर्म कृतवत्येकं सुकीर्तिप्रदम् ।
अद्यत्वेऽप्युपयोगिता न विहता साऽन्या सदाऽस्या भवेत्
यावद्राष्टियराष्ट्रवादिनि पदे सामाजिकी प्रेरणा ॥६४॥

कार्यादर्शसमन्वितोभयविधा नूनं भविष्यस्य नः
सा काचित्प्रगतिर्भविष्यति पुनः कांग्रेसतो नान्यथा ।
इत्थं काङ्ग्रसमोचनं हि विरहो राष्ट्रीयसच्छक्तितः
शस्त्रस्य स्वकरस्थितस्य कदनं साहस्यशक्तिक्षयः ॥६५॥

किन्त्वेतत्किमु वर्तमानसमयस्थां स्वस्थितिं रक्षय-
ज्जात्वङ्गीकुरुते पुरा स्थितिमिमां सामाजिकीं मौलिकीम् ।
चेत्तत्सम्मुखतो भवेद्विनिहितः प्रश्नस्तदा तत्परी-
णामो हन्त भविष्यतीह किल तद् द्वेधा त्रिधा खण्डितम् ॥६६॥

तस्माच्चात्र पृथग्भविष्यति महान् भागोऽस्य संसत्सदाम्
इत्थं रूपतयापि तद्विभजनं नावाञ्छनीयं भवेत् ।
नाप्येतद्भविताऽशुभं यदि समा स्पष्टा समस्या भवेत्
कांग्रेसस्य दलं च किंचन नयेत्सामाजिकं स्वक्रमम् ॥६७॥

किन्त्वस्मिन् समये तु कांग्रसपदस्यार्थोऽस्ति गान्धिः स्वयं
आश्चर्यास्पदतद्विचारसरणीदृष्ट्या सदाग्रेसरः ।
सोऽयं किंनु चिकीर्षयिष्यति ? महान्, पश्चाद्गतोऽसावभूत्
किन्त्वेष व्यवहारतोऽस्ति समयेऽस्मन्नायकः क्रान्तिकृत् ॥६८॥

व्यक्तिः सास्ति विलक्षणा न खलु सा सामान्यमानैर्मिता
तस्यां तार्किकसद्विधाननियमः सम्भाव्यते न क्वचित् ।
साक्षात्क्रान्तिकरी ह्यसौ हृदयतः स्वातन्त्र्यलाभप्रति-
श्रुत्या चास्ति निबन्धितापि सकलं कार्यं करिष्यत्यसौ ॥६९॥

कुर्वन् कार्यमिदञ्च सोऽत्र जनता-कार्योग्रशक्ति परा-
मुद्बोध्य स्वयमप्यमूं क्रमगतां सामाजिकीं ध्यास्यति ।
ध्येयं चेदमवाप्तुमेष समये नाग्रेसरिष्यत्यहो !
इत्याशार्धमपीह चेतति मम प्रोद्भूय नो शाम्यति ॥७०॥

हिन्दुस्थानवहिश्चरा दृढतरास्ते साम्यवादानुगाः
बीताब्देषु किलाक्रमन् कृतभयं गान्धौ च कांग्रेसके ।
ते कांग्रेसिकनायकेषु निरता दुर्भावनारोपणे-
स्युः कांग्रेसिविचारकेषु बहुशः सैद्धान्तिकालोचकाः ॥ ७१ ॥

तत्स्पष्टञ्च सुयोग्यतास्पदमभूत् पश्चाद्भवाभिश्च तत्
सिद्धं तद्घटनाभिरप्यभवदंशात्सत्यमेवाधिकम् ।
हिन्दुस्थानगतस्य राजनयिकस्यास्थासु विश्लेषणा-
न्येतैः साम्यसमर्थकैरिह कृतान्यासन् यथार्थानि च ॥ ७२ ॥

किन्त्वेतेऽत्र विहाय तान् विवरणं कुर्वन्ति यस्मिन्क्षणे
कांग्रेसस्य महत्त्वमत्र विमृशन्तो भ्रान्तिमायान्ति मे ।
तत्संख्यापि च तत्प्रभावसहिता न्यूनास्ति यद् भारते
तस्याः कारणमेतदेकमिह यन्निन्दन्ति बन्द्यानि ते ॥७३॥

तां वैज्ञानिकबोधविस्मृतिमिमे त्यक्त्वा जनानां गतौ
तद्विश्वासविवृद्धिमप्यहह ते गालीप्रदाने रताः ।
तस्यासीत् परिणाम एष विषमो याताः क्षतिं ते पराम्
एषां च श्रमिकाधिवासविषये कार्याणि कर्तुं रुचिः ॥७४॥

संस्रष्टुं श्रमिकान्हि केवलमिमे द्विश्रा हि घोषा अलम्,
नैतेऽलं मतिमत्सु जात्विति न तैरद्यापि चित्ते धृतम् ।
हिन्दुस्थानपदेऽद्य मध्यमदले चाधीतवर्गो मनाक्
क्रान्तिं कर्तुमलं दलादितरतोऽस्तीत्यस्ति सत्यं स्थिरम् ॥७५॥

एतैः साम्यसमर्थकैरनुदिता अप्यत्र संशिक्षिताः
केचिन्नाम जना इमाननुगताः खातं तु मध्ये स्थितम् ।
तेषां साम्यसमर्थिनामनुमताः कांग्रेससन्नायकाः
कांक्षन्ते जनताप्रभावपतनं ते शासने केवलम् ॥७६॥

एतेषां धनसंचयप्रणयिनां भूस्वामिनां वा हिते
ता औद्योगिकवाणिजिक्यसुविधाः प्राप्तुं च वाञ्छन्ति ते ।
मन्यन्ते पुनरप्यमी प्रयतते कांग्रेसमेतत्परम्-
उद्बुद्धोऽस्तु किलार्थिकः प्रतिजनेऽसन्तोष एष ध्रुवम् ॥७७॥

एतेषां धनसंचयप्रणयिनामादेशतः काङ्ग्रसम्
पूर्वं विश्वजनीनमाचलयति प्रायस्तदान्दोलनम् ।
तस्मिन्व्यापकतां चैव भयङ्करगतिं त्यजन्मोहनः
क्षुद्रे सत्यपि कारणे स्थगयति प्रोद्योगमग्रे गतिम् ॥७८॥

ते कांग्रेसिकनायका न मनसा वाञ्छन्ति देशाद्बहि-
ष्कर्तुं चाङ्गलशासनं क्षुधिततद्वासिप्रजाशोषणे ।
अत्यावश्यकयन्त्रणाय महतीमावश्यकीं तत्स्थितिं
मन्यन्ते नहि मध्यवर्गिकजनास्तत्र स्वशक्तिं क्षमाम् ॥७९॥

अत्याश्चर्यमिदं यदत्र दधते विश्वासमप्यात्मनो-
ऽस्मद्विश्लेषणकेऽतिविस्मयकरे तेनात्र ते निष्फलाः ।
तेषाञ्च स्खलितं किलेदमिह यद्राष्ट्रीयमान्दोलनं
यूरोपश्रमिकोचितेन लघुना मानेन संमिन्वते ॥८०॥

अभ्यस्तास्तदिदं विलोकितुमिमे विश्वासघातं पुनः-
कुर्वन्ति श्रमिकाग्रणीभिरथ चामीषामिहान्दोलनैः ।
दृष्टान्तं तमिमं च भारतभुवोऽप्यान्दोलने युञ्जते
स्पष्टं न श्रमिकाग्रहोपममिदं राष्ट्रीयमान्दोलनम् ॥८१॥

नाम्नोद्देश्यममुष्य चास्ति विदितं यन्मध्यवर्गप्रजा-
क्रान्त्यान्दोलनमेतदस्ति न पुनः सामाजिकी शोधना ।
स्वातन्त्र्यं खलु राजनैतिकमिदं प्राप्तुं प्रवृत्तं यतो-
ध्येयं दूरगमं न वस्तु नवलं तस्यास्ति राष्टीयता ॥८२॥

किन्त्वान्दोलनमौलिकाश्रयमिमं मन्वानलोकोऽप्यदो
वक्तुं शक्तमिहास्ति नैव, यदिदं भूमिप्रणालीमिमाम् ।
यद्वा सञ्चयवादनीतिमिह नोन्मूल्य स्थितिं वाञ्छति,
नो विश्वासवधोऽयमस्ति न तथा कर्तुं हि तेनोदितम् ॥८३॥

कांग्रेसे कतिचिज्जनाः प्रतिदिनं संवर्धमाना ध्रुवं
सन्त्येवाभिलषन्ति येऽभिभवितुं भूमिप्रणाल्यादिकम् ।
पर्यावर्तयितुं च सञ्चयलसद्वादव्यवस्थामपी-
च्छन्त्येते न तु कांगरेसमुखतस्तद्वक्तुमर्हन्ति ते ।।८४।।

हिन्दुस्थानगताश्च सञ्चयलसद्वादानुगा वर्गका,
आङ्ग्लीयस्य विदेशजस्य च बहिष्कारेषु वै वस्तुनः ।
स्वीकारे निजदेशजस्य च महानान्दोलनादर्जितो
राष्ट्रीयो घनराशिरेभिरिति तत् स्पष्टं च सत्यं वचः ।।८५।।

किन्त्वावश्यकमेतदास्त निखिलं राष्ट्रीयमान्दोलनं
प्रोद्योगान् व्यवसायिकप्रकृतितः प्रोत्साहयेद्वर्धयेत् ।
अन्येषाञ्च वहिष्कृतिं प्रकुरुतान्मुम्बापुरीवासिभि-
स्तैरेतैर्मिलमालिकैः सविनये भङ्गे बहिष्कर्तृभिः ।। ८६ ।।

आङ्ग्लीयैरिह वस्तुतोऽत्यनुचितः सन्धिः कृतोऽभूत्पुरा
लङ्काशायरदेशतस्तदिदमासीदेव दुःसाहसम् ।
कांग्रेसस्य दृशा च राष्ट्रबिषये विश्वासघातो महान्
तस्येदं किमु नाम दत्तमभवद्विश्वासघातस्य च ।।८७।।

मुम्बापूर्मिलमालिकप्रतिनिधीनामत्र धारासभा-
मध्ये कांग्रससोष्मवर्गयुगले निन्दावचोभिश्च तत् ।
सत्सत्यापितमेव यत्र समये कारागृहं स्मो गता-
स्तेषां च प्रतिवादमप्यलमभूमास्मिन्न कर्तुं वयम् ।।८८।।

वीताब्देषू कियत्सु सञ्चयलसद्वादानुगानां दला-
न्यस्मिन् भारतवर्षभूमिविषये यां यामकार्षुः क्रियाम् ।
सा सा काङ्ग्रसदृष्टराष्ट्रियदृशा चासीत्कलङ्कात्मिका
ओटावागतसन्धितः कतिपये जाताश्च लाभान्विताः ।।८९।।

हिन्दुस्थानगतोद्यमादिकदृशा तज्जातमास्तेऽशुभम्
तेऽत्यन्तं ब्रिटिशप्रदत्तधनतः प्राप्ताः पराधीनताम् ।
सन्धिः सोऽपि नितान्तहानिमकरोद्युद्धे प्रवृत्ते ह्यसौ
निर्णीतोऽत्र सहस्रकेषु विगतेष्वेवाद्य कारागृहम् ।।९०।।

प्रत्येकोपनिवेशमत्र च पणान् क्रूरानिदं शासनं
यत्स्वीकारयते स्म तैस्तु सकलो देशोऽभवल्लुण्ठितः ।
वीताब्देषु महाहवैः कतिपयैर्या हानिरत्राहिता
तां कृत्वापि कृतघ्नकैः सरजतैः स्वर्णैः कृता वाणिजी ॥९१॥

भूमन्तः कृषिमन्त एव च महान्तस्ते विरोधे स्थिता
भङ्गेऽन्तर्विनयान्विते स्फुटतया घुष्टश्च पक्षो निजः ।
साहाय्येन च तेन शासनमिदं प्रान्तेष्वकार्षीद् दमं
अध्यादेशमुखानयं स्वनियमान् निर्माय चायोजयत् ॥९२॥

युक्तप्रान्तविधानसंसदि मतिर्दत्ता च भूस्वामिना
भङ्गेऽस्मिन्विनयान्विते च निगृहीतानां निरोधे सताम् ।
युक्ता नैव विचारणा जनतया चैवागृहीतो महान्
गान्धिस्तीव्रतमस्तृतीयदशमे चान्दोलने क्रान्तवान् ॥९३॥

अत्रासीज्जनतास्वसौ कलकलोऽवश्यं परं तद्दमं
गान्धिः स्वान्तरवर्धयच्च सकलं कांग्रेसमात्मन्यपात् ।
मार्गे तत्सहयोगभेदिनि समानैषीत्तदाग्रे सदौ-
रोधं यद्यकरिष्यदत्र स तदा नाभास्यदाक्रामकः ॥९४॥

दौर्भाग्यं महदेतदस्ति विदितं मौढ्यादिहालोच्यते
तच्च ध्यानमितस्ततो विकिरति प्रश्नं च निर्मुञ्चति ।
गान्धेर्विश्वसनीयताऽऽक्रमणतः स्वार्थो भवत्याहतो
हिन्दुस्थानजनस्य सोऽस्ति हि महान् सत्यं स्वयं मूर्तिमत् ॥९५॥

यो जानाति च तं स सत्यविषये चात्मातुरं सर्वदा
तं जानाति न वेद सत्यमयतां यश्चास्य नोऽवेदतः ।
हिन्दुस्थानगतेषु यन्त्रनिलयेष्वेषां किलास्तेऽन्वयः
लोकैस्तैः श्रमजीविभिः समभिहृत्यायं पुरेष्वर्थिषु ॥९६॥

ग्रामे ग्राम्यजनैः सहास्ति न पुनस्तेषां क्वचित्त्वन्वयो
ह्यास्ते तच्छ्रमजीविनामयि मुहुः किञ्चिन्महत्त्वं भुवि ।
एतच्चापि महत्त्वमत्र बहुशो वृद्धं भविष्ये भवेत्
कक्षा स्यादवरैव कर्षकजनापेक्षा श्रमाजीविनाम् ॥९७॥

अलिखमिह च तारे—प्राप्तवानस्मि तारं
सह च परिमितं तं त्वत्समाचारसारम् ।
तदुभयपरिलाभा'त्सन्धिरस्त्यत्र जात—'
इति तदवयतो मे शान्तिरासीन्मुदा च ॥ २८ ॥

प्रथममनशनाद्वो मानसक्लेशमागाम्
द्विविधमतिरभूदाशङ्कयाऽऽजीवनेन ।
शममधिगतवांश्चास्ते बलेर्दानमल्पं
यदपि दलितजातेः कल्प्यते क्षेममार्गे ॥ २९ ॥

निकष इह लघिष्ठानां स्वतन्त्रत्वतः स्यात्
भरतभुविगतानां नः स्वतन्त्रत्वकस्य ।
भयमिदमिह मेऽभूदेकमात्रं न लक्ष्यं
स्थगयतु पुनरन्या काचिदीदृक्समस्या ॥ ३० ॥

अनलमभवमेषो धार्मिकेक्षाविधेये
क्वचिदपि च विशेषान्निर्णये,ऽभूद्भयञ्च ।
भवदितरजनो मालम्बतां त्वत्प्रणालीं
परमिह मतिदानं कौतुकाढ्येन युक्तम् ॥ ३१ ॥

प्रणयपरिचयाभ्यां प्रेम मेऽङ्गीकुरुध्वम्
इति सविनयमात्माऽस्मायभूदर्पितस्ते ।
अथ समयसमेताः पुण्यके भिन्नभिन्नाः
सममतिमभि पत्रे हस्तलेखानकुर्वन् ॥ ३२ ॥

झटिति ब्रिटिशशिष्टेश्च प्रधानः स मन्त्री
स्वकर लिखितिदानात्तञ्च मञ्जूर्यकार्षीत् ।
इति विनिमित आसीन्निर्णयो भूतपूर्व-
स्तदनशनमभाङ्क्षीद्गान्धिरान्दोलनात्मा ॥ ३३ ॥

मम नहि रुचितास्ते सन्धयस्ते पणाश्च
परमिह लघुसन्धौ किं किमासीत्प्रविष्टम् ।
इति किमपि न चित्ते चिन्तयन्नस्मि हर्षा
त्परमशमसमेतः स्वागतं व्याहरं तत् ॥ ३४ ॥

अवसितिमुपयातोत्तेजनासीत्तदा या
वयमिह निजकार्ये वन्दिगेहे प्रवृत्ताः ।
हरिजनविहितस्यान्दोलनस्याथ गान्धे-
रपि सहजप्रवृत्तेर्वं त्तमाप्तं मयाऽऽसीत् ॥ ३५ ॥

परमिह न मनो मे मुह्यते स्म प्रवृत्त्या
ह्यशुचिशुचिविभेदे मृज्यमानेऽपि तस्मिन् ।
अपि च दलितजातेरुत्थितेराग्रहेऽस्मि-
न्नभवदिह नितान्तं वृत्तिरान्दोलनस्य ॥ ३६ ॥

न खलु सममनस्कत्वात् समग्रेऽपि देशे
स्ववशिमगतिजोशस्याभितो विस्तराच्च ।
इदमतिवरणीयं वस्तु चासीत्परं त-
द्विशदमभवदेतं भङ्गमाहन्ति यावत् ॥ ३७ ॥

तदितरविषयेषु ध्यानमाधाच्च देशौ
हरिजनहितकार्ये सन्ति कांग्रेसिकास्ते ।
लघुभयकृति कार्ये सज्जतायां मिषाणि
प्रणिदधति यथा स्याद्वन्दिगेहाद्विमोक्षः ॥ ३८ ॥

भवतु न सहनीयो यष्टिघातश्च येन
न च भवतु भयं तत्सम्पदां निग्रहाच्च ।
सहजमिदमिहासीन्नापि युक्तेयमासी-
द्दशशतजनमध्ये सर्वतस्तादृगाशा ॥ ३९ ॥

यदिह भवतु सज्जः सर्व एवात्र कष्टं
महदनुभवितुं तं भङ्गमालोकितुञ्च ।
इति पतनमिदं स्वान्दोलनस्यास्य दृष्ट्वा
भवति हृदयपीडा काप्यसह्या चिराय ॥ ४० ॥

स तु सविनयभङ्गस्तत्क्षणेऽपि प्रवृत्तः
समयसमियशेषेऽत्र त्रयस्त्रिंशवर्षे ।
क्वचन च कलिकाता कांगरेसादिकाले
महदिह भवतिस्म प्रायशस्तत्प्रदृष्टम् ॥ ४१ ॥

वसति यरवदाया वन्दिगेहे च गान्धी
हरिजनहितकार्यान्दोलनप्रेरणादि।
अधिगमयितुमासीत्तत्र सौविध्यजातं
मिलितुमिह हि गान्धि कार्यकर्त्रुच्चयस्य ॥ ४२ ॥

यदपि भवतु तेषां वन्दिगेहे निवासा-
न्मनसि किमपि कष्टासह्यता सा श्लथाभूत्।
इति बहुभिरमीभिर्वस्तुभिर्मुह्यमाने
मनसि महदिवाहं तत्र नैराश्यमाच्छंम् ॥ ४३ ॥

कियति च समयान्ते गान्धिरेवाधिविश-
त्यहमितसमयाय क्रान्तवांश्चोपवासम्।
प्रथममिदमश्रृण्वं मानसाघातपूर्वं
'मम हि भविकमासीत्तादृशं नान्यथेति ॥ ४४ ॥

मनसि मननपूर्वं स्वीकृतं तन्मयात्र
स्वहृदयमवलम्बं चापयित्वा समाधेः।
म ा मनसि किलासीत्क्षोभ एतेषु पुंसु
तमिह विहितकल्पं त्यक्तुमाहुस्तमेनम् ॥ ४५ ॥

बहिरयमुपवासो मन्मतेरास्त तावत्
यदि नियमनतः प्रागेष पृष्टोऽभविष्यम्।
ध्रुवमिह स विरोधे सम्मतिं स्वामदास्यम्,
प्रतिश्रुतिमहिमानं वेद्मि सम्यग्घि गान्धेः ॥ ४६ ॥

इदमनुचितमेवाहञ्च मन्येऽत्र कश्चि-
त्प्रतिश्रुतिमिदमीयां त्याजयेत्स्वप्रभावात्।
इति परमपि खिन्नः सोढवान् खेदमेनं
कतिपयदिवसेभ्यः प्रेषितं तेन पत्रम् ॥ ४७ ॥

इदमभवदमुष्य स्वप्रणाल्या प्रणीतं
यदिह निमिषतो मे दोलितं चित्तमासीत्।
पुनरिह स च भक्तोऽवाञ्छदस्योत्तरं यत्
तदिदमधरदिष्टं तारपत्रं प्रदिष्टम् ॥ ४८ ॥

अधिगतमिह पत्रं यत्र नावैमि किञ्चित्
किमिह कथयितुं स्यां तत्र शक्तः कदाचित् ।
अनुभवति मनो मां चित्रदेशे भ्रमन्तं
भवति मम भवान्वै यत्र सन्दीपयूपः ॥ ४९ ॥

तमसि सरणिमन्वेष्टुं स्वकीयां यतेऽहं
परमधिगतघातोऽहं पतामीह मोहात् ।
परिणतिरिह या स्यात्किन्त्विमे मे विचारा
अथ च पृथुल एष स्नेह आस्ते विशेषात् ॥ ५० ॥

निजदिशि रुचितं मे नाभवत्तस्य कार्यं
परदिशि न हि घातं दातुमस्मै च कांक्षे ।
इति पतित इवास्मिन् घोरसंङ्घर्षजाले-
ऽन्वभवमहमिहास्मै चैषयं प्रीतिपत्रम् ॥ ५१ ॥

पुनरनलपरीक्षापारणे निश्चितं तं
प्रमदयितुमनाः स्यामेष शक्त्या स्वयाहम् ।
इति समुचितमासीद्यत्र संभाव्यते त-
न्मरणमपि न कार्ये तत्र कार्यावहेला ॥ ५२ ॥

लघुलघुघटनानां स्याद्धि चित्ते प्रभावः
स हि बलमिह हार्दं जीवितुं स्यात्प्रयुञ्जन् ।
अथ मनसि ममाभूदैवतस्तस्य मृत्यो-
रपि विषमविपन्मे स्याद्विषह्या दृढस्य ॥ ५३ ॥

इति प्रहितमभूत्तं प्रत्यदस्तारपत्रम्-
'महति तपसि चास्मिन् लग्न एवाधुना त्वम् ।
तदिह समभिनन्दन् स्नेहमेवार्पयामि
स्फुटमिदमवभाति स्याद्धि यत्तच्छुभं स्यात् ॥ ५४ ॥

परिणतिरिह या स्यात्सर्वथा तज्जयोऽस्ति
सकुशलमुपवासस्तस्य पूर्णत्वमायात् ।
प्रथमदिवस एवामुच्यतासौ निबन्धा-
त्स च सविनयभङ्गं रुद्धवान् सार्धमासम् ॥ ५५ ॥

अथ च तदुपवासस्यास्य मध्येऽत्र देशे
पुनरपि सहसैको भावनाज्वार आयात् ।
अधिकमधिकमन्ता राजनीतेः कृते किं
सरणिरियमुपास्यास्तीति चिन्तामकार्षम् ॥ ५६ ॥

मम समलगदास्ते कश्चिदुद्धारवादः
पुनरयमिति नात्र स्पष्टचिन्ताप्रसारः ।
सकलमपि च राष्ट्रं श्रद्धयाऽऽसीन्महात्म-
न्युपहितनिजदृष्टि प्राश्रयच्चाखिलाशाः ॥ ५७ ॥

'सृजतु सृजतु गान्धिस्तांश्चमत्कारसारान्
विसृजतु पुनरेनां राष्ट्रमस्पृश्यताधिम् ।
भजतु भजतु देशोऽयं स्वराज्यं च भव्यम्
स्वयमिह न वयं तं नाम कुर्याम यत्नम् ॥ ५८ ॥

न च वितरति गान्धिस्तं विचाराय वेगं
बलमिह शुचितायामात्मदाने दधाति ।
अतिगतमिह गान्धौ धारयेऽत्यन्तसवित्तं
पुनरपि मनसाऽस्मात्प्लायमानोऽस्मि दूरम् ॥ ५९ ॥

नृपनयिकसुयत्नेष्वात्मनः प्रेरणा स्वां-
स्खलितलवविहीनामेष चाग्रे करोति ।
इह सहजगुणोऽस्ति श्रेयसे प्रेयसे च
प्रयतनकरणात्मा कोऽपि लोके प्रसिद्धः ॥ ६० ॥

किमिह किमपि राष्ट्रं सज्जितुं श्रद्धयैव
प्ररचित इह पन्थाः, किन्तु किं स्यात्तदन्ते ।
न मम मतिमुपेतं वर्तमानव्यवस्थां
कथमिव स किलाङ्गीकृत्य सन्तिष्ठतेऽत्र ॥ ६१ ॥

उपरिदिशि बिभात्यङ्गीकृतिः सर्वथास्याः
प्रणिहितमिह मूलं यस्य संघर्षहिंसे ।
सजवमचलदेवाऽत्रापि संघर्ष एष
प्रतिभटयुगनिष्ठा चक्रिका मां पिनष्टि ॥ ६२ ॥

विदितमपि मयेदं वन्दिगेहावृतेर्वै
बहिरुपगतमात्रेऽथो ममाग्रे भविष्ये।
विपदतिविपरीतोपस्थिता स्यात्कठोरा
प्रतिगतमिह वर्ते ह्येकतोऽनाश्रयोऽहम् ॥ ६३ ॥

प्रविततमिह यस्मिन्प्रेम तद्भारतं मे
श्रमभर इह यस्मै चादृतो जाग्रतैव।
स च मम परकीयो भाति कर्तव्यमोहं
जनयति च नितान्तं देश एषोऽस्मदीयः ॥ ६४ ॥

मम किमिदमिहागो यन्मया भावनाया
निजजनपदगानां तद्विचारप्रणाल्याः।
अपि न निजमतेनैक्यं विधातुं समर्थो
ऽभवमपि व्यवधानं स्वान्तरंगाद्गतोऽहम् ॥ ६५ ॥

इह समुदयताम्तः कापि भित्तिः सुहृद्भ्यः
समतिक्रमितुमेनां प्राभवं, दुःखमापम्।
निजहृदयमिहाहं मर्दयित्वा स्थितोऽस्मि
सकलमपि जगद्यत्प्रावृणोत्तत्पुराणम् ॥ ६६ ॥

जगदपि च पुराणं तद्विचाराः पुराणाः
लषितमपि पुराणं सन्ति चाशाः पुराण्यः।
इति सकलपुराणैरावृताद् भारतीया-
ज्जगदभिनवमासीदद्य यावद्द्वीयः ॥ ६७ ॥

उभयभुवनमध्ये भ्राम्यतो नाश्रयाशा
मरणमुपगते का शक्तिरुत्थातुमत्र।
इह सकलगुणेभ्यो धार्मिकत्वं प्रधानं
समधिगतमथास्ते भारतेऽस्मत्प्रदेशे ॥ ६८ ॥

निजनिजमतमस्मिन् हिन्दुमुस्लिमसिखाद्या
इतरजनवदेवात्राभिमन्यन्त आद्यम्।
तदृतमिति च सिद्धं कर्तुमन्योन्यमूर्ध-
स्फुटनमवधिकृत्यैते च कुर्वन्ति यत्नम् ॥ ६९ ॥

भरतभुवि तथान्यत्रापि देशे मतानां
निजनवनवरूपैः संस्थितानाममीषाम् ।
प्रकटविकटदृश्यं मामकार्षीद् भयार्तं
सुबहु सुबहु निन्दामस्म्यकार्षं च तेषाम् ॥ ७० ॥

अलषमिह च तेषां मुलमुन्मूलितं स्यात्
सततमिदमभान्मेऽस्त्यन्धविश्वास एषः ।
अथ प्रगतिविरोधो मुग्धसिद्धान्तलेशो
मतदृढतरतेयं नेत्रहीना च श्रद्धा ॥ ७२ ॥

अनयनयकृता वा शोषणस्यैव नीति-
र्विदित इह च धर्मः स्वार्थसंरक्षणं तत् ।
मुहुरिदमपि जाने वर्तनेऽन्योऽपि धर्मो
य इह सकलपुंसां पूरयत्यन्तराशाः ॥ ७२ ॥

यदि न समभविष्यद्धीदृशोऽसौ तदायं
कथमिव महती सा व्यक्तिरामंस्यतेमम् ।
अगणित-परमार्तात्मान एते सुखं वा
शममधिगतवन्तो वर्तमाने च भूते ॥ ७३ ॥

किमु स शम इहाभूदन्धविश्वासमात्रे
शरणवितरणं वा संशयाच्छादनं वा ।
किमु विततसमुद्रोद्वेल्लनोत्पातवाता-
दवितुमिव तटस्यालम्बनेनोपमेयः ॥ ७४ ॥

अधिकतरमिदं वा साभवद्वस्तु चैकं
बहुषु विषमजातेषूत्तरं किञ्चिदासीत् ।
प्रथममिह नतानां यत्स्वरूपं किलासी-
दधिकतरमिदानीं सङ्गतस्त्वेष धर्मः ॥ ७५ ॥

विवररचित एको दुन्दुभिः शून्यकल्पो
न मिलति हि यदन्तर्नापि तथ्यं न तत्त्वम् ।
कथयति किल पीन्के चेष्टरो धर्ममन्यम्
दृषदुपचितभूगर्भस्थदेहेन तुल्यम् ॥ ७६ ॥

भवति बहिरिदं तद्वन्न किन्त्वन्तरस्या-
वयवसदृशमप्येकं न तद्दृश्यते तु ।
विदितमिह समस्तं जीवनाख्यं तु तत्त्वम्,
अपितु किमपि भिन्नं पूर्णमासीत्तदन्तः ।। ७७ ।।

यदि क्वचिदपि धर्मे किञ्चिदासीन्महत्त्वं
तदुपरि समरोपि क्षुद्रवस्तुप्रलेपः ।
विकृतिरियमिहागाद्यैव पौरस्त्यधर्मे
प्रतिगतिरिह दृष्टा सैव पाश्चात्यधर्मे ।। ७८ ।।

स्फुटमिदमखिलं चाङ्ग्लप्रदेशीयचर्चे
क्वचिदपि न मते यो वर्तते ज्ञातपूर्वः ।
कियदवधि समस्ते संगते चापि धर्मे
समधिकतरमेतच्चाङ्ग्लदेशीयचर्चे ।। ७६ ।।

स हि बहु समयेनास्ते प्रशिष्टैर्विभागो-
नृपनयिकविशेषैर्भाति तस्या न भिन्नः ।
तदनुगतजनानां भूयसां श्लाघनीयं
भवति चरितमुच्चं शीलसद्भावपूर्णम् ।। ८० ।।

परमिह महनीयं लेखनीयं किलैतद्
यदयमखिललक्ष्यं साधयन्नस्ति शिष्टैः ।
द्रविणनिचयवादश्चापि सामाज्यवादः
स्वमतवसनवेषैर्नैतिकं रूपमाधात् ।। ८१ ।।

अयमिह ब्रिटिशानां लुण्ठनाख्यां च नीतिं
दृढयति भुवि यावच्चैशियाफ्रीकयोश्च ।
अपि च मतिरियं तेष्वाहिता साकमीर्ष्या
वयमुचितमकार्ष्माद्यापि कुर्मस्तदेव ।। ८२ ।।

इति महिममयीयं साधुकार्याभिमाना-
न्वितमतिरुपक्लृप्तानेन चर्चेन तेषु ।
स्वयमियमुदिता वा तेषु तन्नास्मि जाने
परमितरजनास्तान् धूर्तनाम्ना स्मरन्ति ।। ८३ ।।

अयमिव नहि भाग्यं प्राप्तवन्तो हि देशा
अभिदधति युरोपामेरिकाद्याः समेऽपि ।
ब्रिटिशजनपदस्थाः सन्ति मायाविनोऽमी
प्रथितमिह च नामाङ्गलास्तु विश्वासघाताः ॥ ८४ ॥

परमयमपवादस्तेषु चेर्ष्याप्रवृत्तः
न च तदितरदेशो दोषदर्शी प्रतीतः ।
स्वयमपि हि स दोषान्नेदृशान् त्यक्तवान् स्यात्
न भवति हि भुवि शक्तो मायिको दीर्घकालम् ॥ ८५ ॥

ब्रिटिशजनमनःसु स्वार्थसंभावनाया-
मुचितमनुचितं वा नैव संचिन्तनीयम् ।
इति मतिमजनिष्टैषां विशेषः स धर्मे
ह्यनयनयविचारे तन्मतिं कुण्ठयित्वा ॥ ८६ ॥

अपि तदितरराष्ट्रैर्जातिभिश्चात्र लोके
तदतिशयितमत्राकारि कार्यं तु दुष्टम् ।
ब्रिटिशजनवदेते स्वार्थसिद्ध्यै कृतं तत्
समुचितमिति मन्तुं नैव बुद्धिं श्रयन्ते ॥ ८७ ॥

सुकरमिह तिलाभं पर्वतीकृत्य द्रष्टुं
परजनगतदोषं तत्प्रतीपं स्वकीयम्
गिरिसदृशमपीह द्रष्टुमागस्तिलाभं
ब्रिटिशजन इहास्ते सर्वतोऽपि प्रवीणः ॥ ८८ ॥

प्रतिगतमतमायस्यन्नवत्वानुकूल्ये
तदुभयभवनोत्थं लाभमाप्तुं तथैच्छत् ।
इह भुवनदृशा तत्पूर्णसाफल्यमाप्नोत्
परभुवनदृशा तत्तूभयभ्रष्टमासीत् ॥ ८९ ॥

अयमिह विशदोऽर्थो धर्मदृष्ट्याऽथ नूत्न-
सुघटिततररूपेणोभयभ्रष्ट आसीत् ।
अधिगृहमपि नाभून्नाधिघट्टं तथायं
रजकसदनसंस्थश्वेव दूनो वराकः ॥ ९० ॥

अथ तदवसरतोऽदो भावुकत्वं समायात्
समभवदयमत्राद्धा वाणिकत्वेन तुल्यः ।
परिणतिरियमासीद्रोमने कैथलिक्ये
स हि दृढमभजत्स्वं पूर्वरूपं चिराय ॥ ९२ ॥

यदवधि निजरूपं स्थास्यतीदं पृथिव्याम्
तदवधि स विवृद्धो पुष्पितः स्यात्फलाढ्यः ।
स निजपरिमितेऽर्थे पश्चिमे जीवमानो
विलसति किल धर्मो कैथलिक्यः किलेति ॥ ९३ ॥

क्वचन च मम पार्श्वे वन्दिगेहस्थितस्या-
ह्निुत नुतसखा मे वाङ्मयं कैथलिक्यम् ।
रुचिसहितमिदं चापीपठं, ज्ञातवांश्च
प्रभवति मनसोऽयं द्वन्द्वसन्देहनाशे ॥ ९४ ॥

अयमपि भुवि हिन्दूधर्मं इस्लामधर्मो
वितरति च समाश्वासं यथा जीवनेऽस्मिन् ।
इति स विगतकाले प्राप्तदुःखस्य शान्तिं
व्रजति परमसौख्ये भाविकाले तथाशाम् ॥ ९४ ॥

परमहमिह तादृग्रक्षणेच्छां न कुर्याम्
विनतमिह समुद्रं कामये हन्त तर्तुम् ।
पथि वरयतु वात्याचक्रमुत्पातघातः
पततु शिरसि वाहं लक्ष्यमाप्तुं यतिष्ये ॥ ९५ ॥

स्पृहयति न मनो मे मृत्युपश्चाद्भवाय
मम मतिमुपहन्ति त्वस्य लोकस्य प्रश्नः ।
सरणिरिह तु चैनी रोचते सैव मह्यं
प्रसरति भुवि मूले नैतिकी नास्तिकापि ॥ ९६ ॥

व्यवहृतिविधिरस्याः किन्तु नो भाति मह्यम्
श्वसितिसमुचितैवाभाति सा पद्धतिर्मे ।
मम रुचितमिहेदं जीवनज्ञानमेकं
न तु परिहरणं तस्योररीकारमात्रम् ॥ ९७ ॥

तदनुगतिरुपास्या प्रोन्नतिश्चास्य साध्या
अनुसरति न लोकं धार्मिकी दृष्टिरेनम् ।
मम रिपुरिव सेयं सद्विचारस्य भाति
स्थिरतरमतसिद्धान्तानुगं भावुकत्वम् ॥ ९८ ॥

विलसति किल धर्मोऽस्माद्धि दूरे दवीय-
स्यपि कलयति चेतो यन्ममाध्यात्मिकत्वम् ।
स हि मिलतु कदाचिद्वास्तवं वस्तु नास्मि-
न्निति मिषति न मार्गे वास्तविक्याः स्थितेश्च ॥९९॥

न स परमतचिन्तां सोढुमास्ते समर्थोऽ-
नुचितमपि च लाभं स्वार्थिनामेष धत्ते ।
परिहरति न चाहंन्तां सुसंकीर्ण एषः
प्रखरमतिकृतोऽयं स्वार्थसिद्ध्यै प्रयत्नः ॥ १०० ॥

नहि कथयितुमिष्टं धर्मभीरुर्न कश्चिद्
भुवि भवति किलाध्यात्मैकबुद्धिर्महात्मा ।
परमिदमिह वक्तुं वाञ्छितं नैतिकत्वे
जगदिदमुपनेतुं सत्यमाध्यात्मिकत्वम् ॥ १०१ ॥

नहि भवति सहायः क्वापि धर्मोऽयमीदृक्
परजगति कृतं स्यान्नाम साह्यं कदाचित् ।
इह जगति परीक्ष्यो मानदण्डेन धर्मः
परजगति परीक्षामानदण्डैर्न मेयः ॥ १०२ ॥

भवति खलु स धर्मो व्यक्तिगैः शोधकार्यैः
सुविदित इह तत्त्वं वेश्वरं मार्गयद्भिः ।
न स भवति समाजस्योपयोगी च तावद्
भवति खलु स व्यक्तेरेव मुक्तौ समर्थः ॥ १०३ ॥

अहह, प्रयतमानोऽहंकृतेरेष मुक्तिं
भवति दुरपसार्याहंकृतेरेव बाधा ।
अनुसरति समाजावश्यकत्वं न चायम्
प्रवरपुरुषगामी नैतिको मानदण्डः ॥ १०४ ॥

स हि विधृत इहास्ते पापपङ्केऽतिगूढान्
जितकमलदलानाध्यात्मिकान् सिद्धवादान्।
सुघटित इह धर्मः स्थापितस्वार्थं एवे-
त्ययमिह परिवृत्तिं चाग्रयानं रुणद्धि ॥ १०५ ॥

इदमिह विदितं यत्प्रत्नमेष्वीसवीयं
मतमपि न सहायोऽभूद् गुलामाभिधानाम् ।
पथि परिचरतां सामाजिकत्वप्रधाने
इति क्वचन युरोपे क्रीतदासत्वमीयुः ॥ १०६ ॥

अभिमतमसुकस्यासीच्चशताब्दीद्वयात्प्राक्
विशपलिखितपत्राज्ज्ञातुमर्हं तदेतत् ।
अलिखदिह स ईसा धर्म-ग्रन्थाभिमानां-
स्तनुमपि परिवृत्तिं नैति कर्तव्यमार्गे ॥ १०७ ॥

यदि च स कृतिमार्गो नागरिक्या श्रिया वा-
ऽन्वयततिजनितः स्याद् व्यक्त्यवस्थैकयुक्तः ।
वितरति च स मुक्तिं पापपापिष्ठबन्धात्
स्मरकुमतिकुदाज्ञाबन्धनान्मानुषाणाम् ॥ १०८ ॥

अपि च बहिरवस्थां तस्य दीक्षाप्रदाने-
ऽनुचरपतिसरूपाम् ईसवीयत्वधाने ।
जनयति परिवृत्तिं कामपीत्यस्ति सत्यं
सुघटितमतमद्य स्पष्टमुद्घोषयेत्किम् ॥ ११० ॥

परमिह श्रियमस्या वर्तमानस्थितिं च
प्रतिरुचिरिदमीया स्याद्विशेषेण सैव ।
इदमपि विदितं नः शब्द एषोऽर्थबोधे
भवति न परिपूर्णं साधनं सर्वथैव ॥ ११० ॥

इह खलु बहवोऽर्था एकशब्दस्य क्लृप्ताः
क्वचन गिरि हि धर्मः शब्द एतादृशो वा ।
जगति वदति भिन्नानर्थकान् भिन्नलोकै-
र्न खलु तदितरः स्यात् शब्द एतावदर्थः ॥ १११ ॥

मजह्व इति शब्दे वाचिते वा श्रुते वा
　　द्विपुरुषमनसोः स्यान्नैकभावस्य क्लृप्तिः ।
इह विविधविचारे नैकधा कल्पनायां
　　सुबहुसुबहुभावा वा विचाराः स्थिताः स्युः ॥ ११२ ॥

भयमपि च दयापि स्याद् घृणा चापि भक्ति-
　　रनयनयविशेषाः कर्मकाण्डं तपांसि ।
निजसरणिषु श्रद्धा रीतयो नीतयश्च
　　इति सकलमिह स्यात्संगतं धर्मग्रन्थैः ॥ ११३ ॥

इतरदपि च भोजाभोजने त्यागरागा
　　वनुनय-विनयौ चापीतिहासादयश्च ।
परिणयविधिमुख्या हर्षशोकौ परेह-
　　द्विभुवनपरिचर्चा सन्धयो विग्रहाश्च ॥ ११४ ॥

प्रतिजनसमुदायं सम्प्रदायेतिनाम्ना
　　प्रथितमिदमनेकाकारमाख्यायते तत् ।
इति बहुविधक्लृप्त्याऽर्थावगत्या च बुद्धि-
　　र्भ्रमति हलचलं चैवाश्नुते भावुकत्वम् ॥ ११५ ॥

न खलु तटगतः सन् स्यादलं तद्विवेक्तुं
　　तदनधिगमनीयार्थं त्यजेद्धर्मशब्दम् ।
जनयति स विवादं तर्कमप्यप्रतिष्ठं
　　इति व्यवहरणीयस्तत्र शब्दोऽन्य एव ॥ ११६ ॥

अभिदधति हि शब्दा ईशविज्ञानमुख्याः
　　परिमितमिव सत्यं स्पष्टमर्थं समन्तात् ।
विशदयति हि लोकाचार आचारशास्त्रं
　　तदुदितमिह नीतेः शास्त्रमध्यात्म शास्त्रम् ॥ ११७ ॥

न हि नियमितमेभिस्तादृशं भावुकत्वम्
　　अपि दुरधिगमार्थैर्यादृशं धर्मशब्दे ।
इति परिमितमर्थं ज्ञापयन्तः किलामी
　　इह परमुपयुक्ता धर्मशब्दस्थले स्युः ॥ ११८ ॥

परमहमिह हानेः कारकं धर्मशब्दं
तमभिधददपीह प्रायुनज्म्येनमेव ।
कथयत विबुधाः 'को नाम धर्मः ?' स एष
स भवति किल व्यक्तेरुन्नतिस्त्वन्तरङ्गा ॥ ११९ ॥

जगति भवति येयं संस्तुता शोभनत्वात्
तदधिगतिपरायाश्चेतनाया विकासः ।
क्वचन दिशि किलैषास्त्युन्नतिः संस्तुतेति
स्वयमुदयति प्रश्नः का नु सा दिक् प्रमेया ॥ १२० ॥

अयमपि च विवादं कञ्चिदायोजयेत्तं
तदिह समधिगच्छाम्येष धर्मस्वरूपम् ।
नुदति स परिवृत्तिं काञ्चिदत्रान्तरङ्गां
जनयति किल चैतच्चेतनाया विकासम् ॥ १२१ ॥

सति च चिति विकासे स्यात्परीवृत्तिरन्या
बहिरपि किल यास्तेऽङ्गं विकासस्य तस्याः ।
स च भवितुमशक्यः संशयो ह्यान्तरिक्यां
प्रभवति खलु बाह्यैषा परीवृत्तिरत्र ॥ १२२ ॥

इदमपि च सहैव स्पष्टमास्तेऽत्र बाह्या
स्थितिरपि परिधत्ते सान्तरिक्यां प्रभावम् ।
इति तदुभयमन्योन्यत्र [तैस्तैः प्रभावैः
सह रचयति काञ्चित्प्रक्रियामात्मक्लृप्ताम् ॥१२३॥

विदितमिह च नः पाश्चात्यदेशेषु सम्प्र-
त्यनु चरति स बाह्यः कोऽपि भूयान् विकासः ।
वयमिह किल बाह्ये स्मो विकासे च मन्दा
इति न परिणतो नः स्याद्विकासोऽन्तरङ्गः ॥ १२४ ॥

न च चरम-विदेशा अन्तरङ्गेऽत्र मन्दा
उभयविधभ्रमोऽयं येन तुष्याम चित्ते ।
अविकसितमपि स्वं हीनभावाद्विमोच्य
प्रमुदमनुभवामः सा न सर्वस्य सत्या ॥ १२५ ॥

कतिपय इह सन्तः सन्ति येष्वन्तरङ्गो
विलसति स विकासो व्यक्तिगाभिः क्रियाभिः।
अपि चरमविदेशे चापि देशेऽस्मदीये
इति भवति स धर्मो व्यक्तिगो नो समाजे ॥ १२६ ॥

इह भवति समाजे वापि राष्ट्रे विकासो
बहिरुपकरणैस्तैर्यन्त्रशालाप्रयोगैः ।
इह भुवि द्रविणानां सत्यभावे विमूर्छन्
परिवृत इह नानाबन्धनैश्चाप्यभावैः ॥ १२७ ॥

क्वचिदपि विरलः स्यात्कोऽपि सच्चेतनावान्
पददलितदलानां शोषितानां च मध्ये।
क्वचिदपि मनुजानां नो विकासोऽन्तरङ्गः
प्रगतिरिह न भूयान्नो बहिर्नापि चान्तः ॥ १२८ ॥

नृपनयिकदृशा यद्राष्ट्रमप्यर्थदृष्टया
परवशमिह बन्धेष्वाहिते शोषितं स्यात्।
स्थितिविवशमिदं यन्नो विकासं तु बाह्यं,
श्रयितुमिह न शक्तं नान्तरङ्गं तु जातु ॥ १२९ ॥

इति भृशमनिवार्या सान्तरिक्यै प्रगत्यै
स्थितिरनुगमिता स्याद् बाह्यस्वाधीनता च ।
इदमुभयमिहाप्तुं चान्तरिक्यां च बाधां
निरसितुमनिवार्यं साधनं साध्यलक्ष्ये ॥ १३० ॥

इति समधिगतोऽहं वक्ति गान्धिर्यदायं
भजति भुवि महत्त्वं साध्यतः साधनं वै।
स हि तदिदमभिप्रैतीत्यहं वेद्मि, किन्तु
प्रयतनविफलत्वं साधने साध्यलक्ष्ये ॥ १३१ ॥

असति तु फलमेतत्तस्य यत्नस्य भावि
प्रयतनमुभयस्मात्साधनात्साध्यतश्च ।
क्वचिदलिखदयं चास्मिन्न जीवेज्जनोऽयं
त्यजति यदि स धर्मं कोऽपि कस्यापि हेतोः ॥ १३२ ॥

इह च कतिपये ते सन्ति ये बन्दिवर्गा-
नभिदधति वयं नो धर्मसम्बन्धिनः स्मः ।
इदमिह विनसोऽपि श्वासवद्धासहेतुः,
कथयति पुनरेष श्रीलगान्धिर्निजास्थाम् ।। १३३ ।।

मयि निवसति यास्था सत्यमार्गेऽत्र सेवा-
नयदिह नृपनीतिक्षेत्रमित्यस्ति सत्यम् ।
अहमिह कथयामि त्यक्तसंकोचभावः
सविनयमिह धर्मो राजनीत्यान्वितोऽस्ति ।। १३४ ।।

अभिदधति जना ये धर्मनीत्योः पृथक्त्वम्,
न खलु विदुरिमेऽर्थं धर्मशब्दस्य सम्यक् ।
यदि च पुनरिमे मे ब्रूयुरेते लषन्ते
निरसितुमिह धर्मं जीवनाद्राजनीतेः ।। १३५ ।।

ध्रुवमिह मम बोधाद्भिन्नमेवास्य बोधं
दधति मनसि नित्यं सत्यमेतत्तदा स्यात् ।
इति विशदमिदं यद् धर्मशब्दस्य गान्धि-
स्त्वितरविवृतिकर्तृभ्यः पृथग्भाषतेऽर्थम् १३६ ।।

स च तदभिमतोऽर्थश्चारुचारित्र्यरूपः
स्वमनुगतमतीनां नैतिकत्वं प्रयुङ्क्ते ।
इति विषयमतीनां वा पृथग्भावनाना-
मगणितगतिरर्थो धर्मशब्दस्य सिद्धः ।। १३७ ।।

सति च भुवि तदर्थे भिद्यमाने सदेत्थं
दुरवगमतमं तद् धर्मरूपं विभाति ।
इह नवपरिभाषास्त्याघुनिक्यस्ति यस्यां
न खलु सहमतः स्याद्धर्मभीरुः कदाचित् ।। १३८ ।।

प्रवदति मतिमान् श्रीजॉनडेवी यदास्ते
शकलशकलशो यज्जीवनं बोद्धुमर्हम् ।
प्रतिपदपरिवृत्तान्यत्र दृश्यानि बोद्धुं
वितरति शुभदृष्टिं यः स धर्मोऽवधेयः ।। १३९ ।।

पुनरिह च प्रवृत्तिर्या स्वहानेः क्षणेऽपि
बहुविध उपरोधे वर्तमानेऽपि लक्ष्यम् ।
किमपि समधिगन्तुं चाल्यते यत्र पृष्ठे
भवति पुनरयं विश्वास एषोऽत्र युक्तः ॥ १४० ॥

इयमिह विदिता स्याद्धर्मनाम्ना तदस्मि-
न्न हि भवति विपत्तिः कस्यचित्क्वापि धर्मे ।
कथयति किल रोम्यारोलनामापि धर्मं
मजहबहठशीलान् भापयिष्यत्ययं तान् ॥ १४१ ॥

लिखति परमहंसस्यैष जीवच्चरित्रे-
बहव इह जनास्ते सन्ति ये दूरमन्याः ।
क्वचन किमपि धर्माङ्गं न ये विश्वसन्ति
परमतिमतिजन्या चेतना व्यश्नुते तान् ॥ १४२ ॥

इह च चितिमिमां ते साम्यवादादिनाम्ना-
प्यभिदधति-विचारस्यास्ति किं नाम लक्ष्यम् ?
अपि तु कतमकोटिं लम्बतेऽसौ विचारः ?
इति वयमवधार्यैतद् विनिश्चेतुमर्हाः ॥ १४३ ॥

किमयमिह नु सूते—धर्ममेनं नवेति
प्रतिविपदि सहिष्णुश्चैकनिष्ठो विचारः ।
प्रतिपदबलिदानायोद्यतः सत्यशोधं
प्रति भयरहितः सन्नो नयत्येष धर्मः ॥ १४४ ॥

भवति हि निहितो विश्वास एषो हि धर्मे
यदिह मनुजयत्नध्येयआस्ते समाजः ।
स च मनुजसमाजाऽऽजीवनादप्युदग्रः
प्रकृतिबलवदेतन्नास्तिकत्वं स धर्मः ॥ १४५ ॥

तदपि सकलभावाच्चेद्यथार्थं श्रयेत
न च बलरहितं तत्किन्तु शक्तिप्रतीकम् ।
सदिह तदपि योद्धुं तूद्यतं स्याद्रणेऽस्मिन्
चलति महति सैन्ये धार्मिकस्यानुयाति ।। १४६ ।।

धृत्यादिकांस्तान् मनुमान्यधर्मान्
वेदानुगान् योऽदिशदत्र मन्त्रैः ।
तत्कल्पितेऽस्मिश्चरितात्मकाव्ये
को धर्म इत्येष गतोऽस्ति सर्गः ।।

सप्तचत्वारिंश संख्यो धर्मदृष्टि तु नेहरोः ।
प्रकाशयति सर्गोऽयं विशदां चिरचिन्तनात् ।।

ब्रिटिश शिष्टेर्द्विमुखी नीतिः

भुजङ्गप्रयातम्

अष्टचत्वारिंशः सर्गः

पुरा यर्वदाबन्दिगेहात्ततोऽस्माद्
बहिर्गान्धिनेतृत्वमालम्ब्य किञ्चित् ।
प्रवृत्तं किलान्दोलनं तस्य गान्धे-
र्हरेर्वा जनानां स्वदेशेऽन्त्यजानाम् ॥ १ ॥

अमीषामभून्मन्दिरेषु प्रवेशे
प्रतीबन्ध एकः कुतश्चित्प्रवृत्तः ।
तदेवाद्य दूरे विधातुं विशालं
तदान्दोलनं प्रोत्थितं किञ्चिदासीत् ॥ २ ॥

तदुद्देश्यकं चैकमिच्छाप्रपत्रं
महत्यां च धारासभायां प्रदिष्टम् ।
किमप्यद्भुतं दृश्यमादृश्यतैकं
स कांग्रेसनेता महानत्र दिल्ल्याम् ॥ ३ ॥

सभासद्गृहेऽन्यद्गृहे चापि गत्वा
विलं मन्दिरेषु प्रवेशाय दिष्टम् ।
भवेत्स्वीकृतं नूनमित्याग्रहीतुं
मतं लक्ष्यपक्षे च दातुं प्रयेते ॥ ४ ॥

स्वयं गान्धिरथ्येनमालम्ब्य किञ्चि-
त्स्वविज्ञापनं तेषु संप्रैषयत्सः ।
अयं नम्रभङ्गोऽपि चासीत्प्रवृत्तो
जना वन्दिगेहेष्वविन्दंश्च वासम् ॥ ५ ॥

बहिष्कार आसीच्च धारासभायाः
कृतस्तत्र कांग्रेससभ्या निरीगुः ।
स्थितास्तत्र ये तत्स्थले वा नियुक्ता
व्यरुन्धंश्च कांग्रेसमेते यशोऽर्थम् ॥ ६ ॥

निदेशा असाधारणाधारयुक्ता
गताः स्थायिदान्त्यर्थवैधानिकत्वम् ।
अमुष्मिन् महाकर्मसम्पादने तै-
र्नवीनावशिष्टैः कृतं शिष्टिसाह्यम् ॥ ७ ॥

अमीभिः स ओटावसन्धिश्च जीर्णः
प्रयुक्ताः प्रभूणाञ्च भोजा बहुत्र ।
प्रशंसाः पराश्चाप्यभूवन् प्रशिष्टे-
र्द्विमुख्याश्च नीतेर्लयः प्रार्थितस्तैः ॥ ८ ॥

परिस्थित्यधीनेन यद् गान्धिना सा
स्वविज्ञप्तिरासीत् प्रकाशं प्रणीता ।
इमामीक्षमाणोऽहमासं च नूनं
महीयस्तदाश्चर्यमालोक्य शून्यः ॥ ९ ॥

तथा राजगोपालकाचार्ययत्नै-
र्गतो विस्मयं स ह्यभून्नः प्रधानः ।
अमीभिश्च कार्यैः स नो नम्रभङ्गः
पराघातमायादनेनाऽऽहतोऽहम् ॥ १० ॥

दृशा मे तदासीत्तु गान्धेस्तदन्य-
स्य चाप्यत्र नेतुः किलानैतिकत्वम् ।
समाश्वासघातोऽभवद् बन्दिगेहे
स्वगेहे गतानां च विश्वासघातः ॥ ११ ॥

परं सा दृगासीदिहान्येति जाने
तदा मन्दिरेषु प्रवेशेन साकम् ।
रुचिः शासनस्याक्षिणी उन्निमील-
न्त्यभूत्तत्प्रजासाध्वसम्बाधयन्ती ॥ १२ ॥

सदोपेक्षयन्ती प्रपञ्चं तदीयं
समुत्साहयन्ती विरोधे सपक्षान् ।
विरोधं प्रकाश्य स्वकीयं च तस्मिन्
तदिच्छाप्रपञ्चं निरास्थं निरास्यत् ॥ १३ ॥

सुधारेषु सर्वेषु सामाजिकेषु
तदीया रुचिः प्रायशोऽशेन सासीत् ।
न धर्मे करक्षेपमेते प्रकुर्मो
वयं जात्विति प्रोन्नतिं तद्व्यरौत्सीत् ॥ १४ ॥

न चैतत्प्रकाश्यं तदेतेन सामा-
जिकान्नस्तु दोषान् समालोचयद्वा ।
परान् वा समालोचनार्यैरयेद्वा
न विश्वासमाप्नोत्स ताटस्थ्यतो वा ॥ १५ ॥

अकस्माच्च तच्छारदाबालकोद्वा-
हसंरोधकाख्यं बिलञ्चास्त सिद्धम् ।
परं तद्विधानात्परं ज्ञातमासी-
न्न तत्पालने शासनं दाढर्यमाधात् ॥ १६ ॥

इदं शासनं तादृशानां विलानां
जनैः पालने कीदृशीं पात्यनिच्छाम् ।
इति स्पष्टमासीन्न चेदन्यथा तद्
दिशायां निदेशं नवीनं स कुर्यात् ॥ १७ ॥

अपूर्वापराधानिहाविष्करोतु
तथान्यस्य दोषेऽन्यमादण्डयेच्च ।
निदेशस्य भङ्गे सहस्रं जनानां
च तद्वन्दिगेहेषु सम्प्रेषयेच्च ॥ १८ ॥

तदेवास्य वै शारदाऐक्टनाम्नो
विलस्यानुपाल्यासु सङ्कोचमाधात् ।
ततस्तस्य जातः परीणाम एषो
ऽत्र दोषं निरोद्धुं यमेतत्प्रवृत्तम् ॥ १९ ॥

स दोषो नितान्तं जगामात्र वृद्धि
स षण्मासतीमाऽभवल्लाभदायी ।
स सीमा मतेर्मान्द्यतः स्थापितोऽभू-
न्निरागा अपीहाकरोद् घोरमागः ॥ २० ॥

ततः स्पष्टमासीद् विधानस्य तस्य
प्रहासास्पदत्वं तथाञ्जोविभङ्गः ।
न चाप्यत्र सीमन्यदा शासनं त
द्विधानोल्लङ्घयित्रादिदण्डेऽक्षमं स्यात् ॥ २१ ॥

प्रचारस्य चाप्यस्य तच्छासनेन
न कश्चित्प्रयत्नः कदाचित्कृतोऽभूत् ।
बहुत्वेन च ग्रामवासी जनस्तु
न विज्ञातवान् किं विधानं कृतं तत् ॥ २२ ॥

अशृण्वन्हि ते हिन्दुमुस्लिमगणोत्थ-
प्रचारप्रवीणादिदं छिन्नभिन्नम् ।
न सोऽप्यस्य जानाति तत्त्वं स्म यस्मा-
त्किमस्मिन् बिले निश्चितं किञ्च नेति ॥ २३ ॥

स्फुटं भारते यत्समाजोत्थदोषान्
प्रति ज्ञापितं नः सहिष्णुत्वमेवम् ।
असाधारणी सा प्रवृत्तिः समाज-
हिते दर्शिता ब्रैटिशी शासनेन ॥ २४ ॥

इहैतांश्च दोषान् प्रति स्यादमीषां
क्वचित्पक्षपातः कदाचित् क्वचिच्च ।
इतीदं न मान्यं किलेदं न दोषा-
न्निराकर्तुमावश्यकं मन्यते नः ॥ २५ ॥

इमे हन्त देशेऽत्र धर्तुं प्रभुत्वं
तथा कर्तुमस्यातिसंशोषणं तत् ।
न बाधामुपस्थापयन्तीह काञ्चि-
त्ततोऽमी अपेक्ष्या न तु त्याजनीयाः ॥ २६ ॥

सुधारप्रयोगैः पुनः सम्प्रदाया
न रुष्येयुरित्यस्त्यपेक्ष्यं तु शिष्टैः ।
भवेद् राजनीतिस्थलेष्वस्य रोष-
प्रकर्षाभिमुख्यं तथाऽऽपद्विवृद्धिः ॥ २७ ॥

न तां शासनं वाञ्छतीदं स्वमूर्ध्नां
तु वोढुं समाजोद्धराणांशिरस्सु ।
इदं दर्शयामास चाङ्ग्रेजवर्गे
स्थितिं वर्तमानां समाजं प्रतीमाम् ॥ २८ ॥

इमेंऽग्रेजवर्गा समाजस्य दोषान्
मृषाधारदानेन संवर्धयन्ते ।
इहत्यान् प्रतीगामिनो नूनमेते-
ऽन्तरङ्गीभवन्तो भजन्ते स्म मौनम् ॥ २९ ॥

यथा शासनं प्रत्यमीषां विरोधो
विवृद्धो भवत्यत्र लोके प्रचण्डः ।
तथामी स्वरक्षार्थमन्वेषयन्ते
स्वसार्थानपूर्वान्न पूर्वान् मनुष्यान् ॥ ३० ॥

इहाङ्ग्रेजशिष्टेर्बलिष्ठाः सपक्षाः
समे सम्प्रदायप्रतिष्ठा भवन्ति ।
तथा ये न जागर्तिमेतां सहन्ते
प्रतीगामिनस्तेऽत्र तामाश्रयन्ते ॥ ३१ ॥

त इस्लामिकाः सम्प्रदायावलम्बाः
प्रतीगामिनः सन्ति लोके प्रसिद्धाः ।
समत्वं च तेषामियं हिन्दुपूर्वा
महासंसद्वास्ते क्रमात् साधयन्ती ॥ ३२ ॥

अमीषां च पश्चात्प्रधावज्जनानां
वरिष्ठाः सनातन्यधर्मावलम्बाः ।
इहास्ते जविष्ठा च सा रूढिवाद-
प्रष्ठितठा गरिष्ठा च सा राजभक्तिः ॥ ३३ ॥

इति ब्रैटिशी शिष्टिरासीनभावा-
दुदासीनभावाच्च तच्छारदैक्टम् ।
जनानां प्रियत्वं तथावश्यपाल्यं
विधातुं न काञ्चित्करोति स्म चेष्टाम् ॥ ३४ ॥

तदा कांग्रसं वान्यसंस्था प्रशिष्टे-
वंहिष्ठाः प्रचारे न लग्नाः कथं ताः।
इति प्रश्न आकारि चाङ्ग्रेज़वर्गैः
समालोचकैरन्यदेश्यैश्च भूयः ॥ ३५ ॥

विदुस्तेऽत्र कांग्रेसमेतद् दशाब्दैः
सपञ्चै रणं साधयद् शासनेन।
समस्तं किल व्यस्तमास्तेऽत्र राष्ट्-
स्वतन्त्रत्वलाभाय मोक्षाय शिष्टैः ॥ ३६ ॥

अतोऽन्यासु संस्थासु शक्तेरभावा-
त्प्रजावर्गमध्ये प्रवेशाद्यभावात्।
प्रचारादि कर्तु न सोत्साहतासी
दतोऽयं प्रचारः प्रशिष्टैः प्रतीष्टः ॥ ३७ ॥

प्रचारे समर्थाः सदादर्शभूता-
श्चरित्रोत्तमा लोककान्ताश्च सर्वे।
समायातवन्तश्च कांग्रेसमध्ये,
परे केऽपि कारागृहान्तर्निरुद्धा ॥ ३८ ॥

पराश्चात्र संस्थाः स्वनिर्वाचितैस्तैः
सदस्यैरिहाङ्गीकृतैर्नाममात्रैः।
कृतार्थत्वमायान्ति, सभ्या इवैताः
स्त्रियो वाखिलं कर्म सञ्चालयन्ति ॥ ३९ ॥

न तास्वस्ति तीव्रप्रचारार्थवृत्तिः
पुनस्ता निदेशैर्विधानैश्च दम्याः।
प्रवृत्तीरिमाः सर्वजनीनरूपा-
स्तु दृष्ट्वैव निष्प्राणतामापुरेताः ॥ ४० ॥

विमर्द्या हि सेनाविधानैः प्रवृत्तिः
समाक्रान्तिकारिण्यहो निष्ठुरत्वात्।
तया साकमेतच्च तद्भावुकत्वं
नयत्येव निर्जीवतां सभ्यवृत्तिम ॥ ४१ ॥

न काङ्ग्रेसमन्याश्च संस्थाः समाजे
सुधारं विधातुं कथं न क्षमन्ते ।
अमुष्यास्ति हेतुः किलान्योऽपि यत्स्मो
वयं राष्ट्रियत्वेन रोगेण रुग्णाः ॥ ४२ ॥

समस्तावधानेन तस्यैव सर्वे
चिकित्साविधावेकचित्ता भवामः ।
न यावच्च तद् राजनीतेर्दृशा नः
स्ववश्यत्वमेयान्न तावच्चलामः ॥ ४३ ॥

यथोक्तं हि बर्नार्डशालेखकेना-
स्ति राष्ट्रं पराभूतमत्र व्रणाभम् ।
न तत्किञ्चिदन्यद्भुवि ध्यातुमर्हं
न यावत्स्वतन्त्रत्वमीयाज्जयेन ॥ ४४ ॥

इतीहास्ति नो वस्तुतो राष्ट्रियान्दो-
लनादन्यदिष्टं न शापो वरो वा ।
स लोकेऽस्ति स्वाभाविकीनां क्रियाणां
दमेनातिदुःखात्मकं साधनं यत् ॥ ४५ ॥

पराभूतराष्ट्राणि लोकाभिमाने
भवन्तीह पश्चात्पदानीति सत्यम् ।
यतस्तानि राष्ट्रस्वतन्त्रत्वलब्ध्यै
न राष्ट्रीयमान्दोलनं संत्यजन्ति ॥ ४६ ॥

इह प्राक्तनीतोऽनुभूतिः प्रमाणं
यदेषां मितिर्भूयसी मानकानाम् ।
करेषु प्रदायापि कांश्चिद्विभागान्
न सामाजिकीमुन्नतिं कर्तुमर्हा ॥ ४७ ॥

अकर्मण्यता शासनस्यातिगूढा
सदारूढिवादेरितानाश्रयेत ।
गतात्पूरुषस्रोतसः शासनेना-
मुना नूत्नकार्येषु छिन्नास्ति शक्तिः ॥ ४८ ॥

समस्ताधिकारीव पित्रोः समान-
स्तदादेशयत्यत्र यत्तद्विधातुम् सु।
प्रशिष्टेर्विभिन्नेन केनापि किञ्चित्
व्यवस्थापितं कर्म नेदं सहेत ॥ ४६ ॥

सदा तत्र गुप्तं च तात्पर्यमेषा
मिहाशङ्कमानाश्च भीता भवन्ति।
जनान्दोलनानां च सङ्घट्टकैस्तैः
कृतं कर्म सर्वं किल ध्यानपूर्वम् ॥ ५० ॥

तथापीह संघर्षमध्येऽपतंस्ते
प्रशिष्टे-र्जनानां मनःशङ्कितानाम्।
ममायञ्च विश्वास आस्ते कदाचि-
त्कृतान्दोलनं साबुनस्यापि योगे ॥ ५१ ॥

पतेदेव संघर्षकेऽत्र प्रशिष्टे
हि कांग्रेसमेतत्सदा शङ्कितायाः।
यदीदं समाजस्य सूद्धारणं तत्
प्रशिष्टिः स्वहस्ते प्रकुर्यात्तदाऽस्याः ॥ ५२ ॥

जनानां मतस्यानुकूलत्वक्लृप्तेः
प्रयत्नः कृतार्थीभवेत्स्वस्वभावात्।
विदेश्याधिकारिष्ववश्यं तु शङ्का-
विधानं न तेष्वात्मपक्षोपधानम् ॥ ५३ ॥

अतश्चेद्विदेश्यं निरस्येत तत्त्वं
ततश्चार्थिकीक्षापरीवृत्तिरादौ।
क्रियेतात्र सोत्साहसत्कर्म शिष्ट्या-
तदाऽपातत्तस्तान् सुधारान् प्रकुर्यात् ॥ ५४ ॥

परं वन्दिगेहे न नो मानसे ते
सुधाराः समाजस्य वा शारदेक्टम्।
हरेर्वा जनानां तदान्दोलनं च
निविष्टं तदासोद्विचारात्मनापि ॥ ५५ ॥

इहास्माकमान्दोलने नम्रभङ्गे
हरेस्तज्जनानां तदान्दोलने च ।
प्रविष्टं किलासीन्मनो मेऽतिखिन्नं
तु षाण्मासिकान्नम्रभङ्गस्य भङ्गात् ॥ ५६ ॥

इहाग्रे भवेत्किं किमित्येव द्रष्टुं
तदौत्सुक्यमुद्भूतमासीन्मनस्सु ।
स षाण्मासिकश्चान्तरायः प्रहारं
किलाकारयत्त्वन्तिमं नम्रभङ्गे ॥ ५७ ॥

न राष्ट्रीययुद्धेऽक्षिमीलाख्यकेलिः
प्रविक्रीड्यते नापि चेच्छाप्रवृत्तिः ।
पुरैवात्र नेतृत्वमध्ये कृशत्वं
प्रभावप्रशून्यत्वमासीदुपेतम् ॥ ५८ ॥

इह स्तोककस्तोकसम्मेलनैस्तै
रनेकप्रकारापवादप्रवाहैः ।
क्रियाणां क्रमस्योपधानान्महीयो-
जनाध्यक्षभावाच्च कांग्रेसमास्ते ॥ ५९ ॥

न तादृक्षमध्यक्षमत्र प्रकर्तुं
हि सेनापतिं शक्यमासीत्तदानीम् ।
क्रियन्ते स्म तेषां कृतेऽपीङ्गितानि
यथा श्रान्तिमेता इमे सम्प्रतीति ॥ ६० ॥

विनिर्गन्तुमिच्छन्ति चास्मात्कठोरा-
त्प्रयत्नादिति प्रस्तुतं चाप्यभूच्च ।
इहस्थैर्यतो निश्चयात्मवर्गे
ष्वसन्तोषलेशोऽपि सञ्चार्यते स्म ॥ ६१ ॥

परं संगतत्वेन नासीत्प्रकाश्यं
समस्तं हि कांग्रेसमासीदवैधम् ।
ततो गान्धिरेकाधिविंशत्यहोभि-
र्व्रतं धारयन्नत्र मुक्तः स बन्धात् ॥ ६२ ॥

स षाण्मासिकं नभ्रमङ्गोऽवकाशं
गतश्चेति कार्याण्यभूवन् बहूनि ।
समाप्तं वृतं स्वास्थ्यमाप्तश्च गान्धिः
शनैर्जूनमध्ये समाप्तोऽवकाशः ॥ ६३ ॥

परं शासनेन स्वकीयात्र दान्ति-
र्न शैथिल्यमल्पं किमप्यास्त नीता ।
तदा त्वण्डमानेषु ते राजनीते-
र्धिया वन्दिनो यत्प्रतीरोधमास्थन् ॥ ६४ ॥

(इमे बङ्गदेशे किल क्रान्तिकारि-
हिंसापराधादिनाऽऽदण्डिता ये) ।
अमीभिर्हि वन्दिष्वयुक्तप्रवृत्ते-
र्विरोधे प्रतीरोध एषादृतोऽभूत् ।
अमीष्वेकवन्दी क्षुधा मृत्युमाप्तो-
ऽथवा द्वौ किलान्येऽधिशिश्युश्व मृत्युम् ॥ ६५ ॥

इहाप्यण्डमाने भवद्वृत्तमास्थाय
यो भाषते स्मैष निगृं ह्यतेस्म ।
तदा दण्ड्यते स्मेति वन्दी सहेतात्र
कष्टं न तत्सूचयेदित्यवोचन् ॥ ६६ ॥

विरोधप्रकाशाय चोपायमन्यं
न वीक्ष्य क्षुधातृट्प्रतीरोधमेतम् ।
समादृत्य चाग्नौ परीक्षां ददाना
म्रियन्ते म्रियन्तां न तच्छिष्टिचिन्ता ॥ ६७ ॥

कियन्मासपश्चात्सिताम्बर्यमासे
यदा वन्दिगेहाद्वहिश्चाहमासम् ।
तदा याचिकैका प्रकाशं गताभू-
दिह त्वण्डमानस्य वन्दिष्वमीषु ॥ ६८ ॥

मनुष्योचितस्याधिकं वर्तनं त-
त्परीवर्तनं भारते वन्दिगेहे ।
समभ्यर्थितं तत्र हस्ताक्षराणि
रवीन्द्रैण्डरूजादिभिश्चार्पितानि ॥ ६९ ॥

अमीष्वासतानेकलोका न येषा-
मिहासीत्तु कांग्रेससम्बन्धलेशः ।
अमुष्यां च रोषं महान्तं प्रकाश्या-
लुलोचत्स गेहे सदस्योऽर्थिनस्तान् ॥ ७० ॥

न बन्दिष्वमीषां च संवेदनां सा
प्रशिष्टिस्तु सेहेऽनया बङ्गदेशे ।
कृतो नूत्न आदेश एषो यथा
वन्दिसंवेदनाऽऽस्तेऽपराधो न सह्यः ॥ ७१ ॥

ततो, नम्रभङ्गस्य सप्ताहषट्कं
पुनारोधनं तर्ह्यभूत्पूर्वमस्य ।
ततः प्राग्वयं ज्ञातवन्तो यथास्ते
स गान्धिः करिष्यन्सभां पुण्यपुर्याम् ॥ ७२ ॥

शतान्यत्र द्वित्राणि सम्मेलितानि
जनानां स गान्धिस्तदाघोषयद्यत् ।
भवेन्नम्रभङ्गस्य भङ्गोऽधुनास्य
परं व्यक्तिशस्तत्र सर्वे स्वतन्त्राः ॥ ७३ ॥

ततः सर्वरूपा च गुप्ता प्रवृत्ति-
र्निरुद्धा न तत्स्फूर्तिदं किञ्चिदासीत् ।
परं तत्स्वरूपं निरूप्यात्र रोधे
ममाभून्न रोषो न काचिद्विपत्तिः ॥ ७४ ॥

स सामूहिकस्यास्य भङ्गस्य भङ्गो-
ऽद्यतन्याः स्थितेः स्वीकृतिः केवलासीत् ।
स काङ्ग्रेसकार्यक्रमे निश्चयोऽभू-
द्यतो नम्रभङ्गश्चिरादास्त भग्नः ॥ ७५ ॥

पुनर्गुप्तकार्याविरोधोऽपि तत्र
स्वकार्यप्रवृत्तेरभूद् व्याजमात्रम् ।
प्रवृत्तेरभावेन चान्दोलनेऽस्मि
श्च निःसाहसत्वं सदोत्पद्यते स्म ।। ७६ ।।

निदेशान् हि तस्योपदेशान् प्रहातुं
च सम्पर्कजातं जनै रक्षितुं च ।
तदावश्यकं तावदासीन्न नम्रः
स भङ्गः कदाप्यास्त गोप्यो न गुप्तः ।। ७७ ।।

यदाश्चर्यमाधाच्च दुःखं ममादा-
त्तदास्मिन्न चर्चाऽभवत्पुण्यपुर्याम् ।
स्थितेरद्यतन्याश्च लक्ष्यस्य काचित्
द्विवर्षात्समेतेषु कांग्रेसिकेषु ।। ७८ ।।

अभूद् भीषणं युद्धमेतत्स्वतन्त्र-
स्वसिद्ध्यै कठोरो दमश्चात्र काले ।
न चास्मिन् स्वदेशे बहिर्विश्वविश्वे-
ऽप्यभूवन्ननेकानि वृत्तानि चात्र ।। ७९ ।।

अमीष्वस्ति स श्वेतपत्रप्रकाशो-
ऽभवद्यत्र वैधानिकी योजना सा ।
सुधारानुबद्धा, वयं यत्र वैव-
श्यतो मौनमास्थाय वर्तेमहि स्म ।। ८० ।।

परत्राभवद्वस्तुतः प्रश्नजातं
तिरोधातुमद्यापि मिथ्याप्रचारम् ।
न शिष्टैः स पक्षैरुदायैष्यदन्यै-
रपीहोक्तमत्याजि देश्यैस्तु लक्ष्यम् ।। ८१ ।।

मतेऽस्मिन् मदीये किलास्माभिरात्मी-
यलक्ष्ये तु नीतेः प्रभावो निपात्यः ।
पुनः स्फोटनीयश्च सामाजिकेना-
पि लक्ष्येणसोऽयन्त्व संयोजनीयः ।। ८२ ।।

विहायेदमासीद्विवादः किलायं
यथा नम्रभङ्गोस्ति कोऽसौ विशिष्टः ।
स सामूहिको वास्तु वैयक्तिको वे
ति तत्रास्तु गुप्तत्वमेतन्न वेति ॥ ८३ ॥

बिचित्रा च चर्चाऽभवच्छासनेना-
पि सन्धेः स्मराम्येष यावत्स गान्धिः ।
अहासीत्तदा तारपत्रं दिदृक्षु-
स्ततो नास्ति वेलेति तस्योत्तरं च ॥ ८४ ॥

पुनः पत्रमेकं स सम्मानयुक्तं
हि सन्धि विधातुं त्वहासीदमुष्य ।
परं भाविकं सन्धिमैच्छञ्जना यं
स कुत्रास्त राष्ट्रं यदा मर्द्यते स्म ॥ ८५ ॥

प्रशिष्टेर्जयं साधयन्तः क्षुधा चा-
ण्डमाने जनाः प्राणदाने रतास्ते ।
तदाज्ञासिषं स्यात्परीणाम एत-
स्य यः कोऽपि, गान्धेरियं रीतिरास्ते ॥ ८६ ॥

स सन्धेः प्रसङ्गं सदा प्रत्युपस्था
पयत्येव सर्वस्य शान्तः प्रकृत्या ।
प्रभावेण पूर्णेन साकं प्रजानां
दमः संचलन्नास्त सर्वत्र वृत्तौ ॥ ८७ ॥

प्रदान्तैर्विधानानि नानाविधानि
प्रयुक्तानि चासन्पुनः शासनेन ।
त्रयस्त्रिशवर्षे सभां पूरुषास्ते
पितुर्मे किल श्राद्धकाले त्वरौत्सुः ॥ ८८ ॥

न सासीद्धि कांग्रेससम्बन्धिनी प्राक्
स सप्रूश्च तस्याः सभाध्यक्ष आसीत् ।
भविष्ये च तस्योपहारावभासः
प्रदत्तोऽभवत्तत्र वै श्वेतपत्रे ॥ ८९ ॥

इदं पत्रमासीत्किलाभूतपूर्वं
पठित्वा यदत्रातिविस्मेरचित्तः ।
समास्थेयमासीदिदं चानुसृत्य
कृतं भारतं स्यान्महद्राज्यमेकम् ।। ६० ।।

अमुष्मिंश्च सद्राज्यसङ्घे तदेश्या-
स्थदेश्यानिराज्यप्रतीकानि भागम् ।
ग्रहीष्यन्ति राज्येषु साक्षान्न बाह्यो
भवेद्धस्तनिक्षेप एकोऽपि सह्यः ।। ६१ ।।

अमीष्वेकतन्त्रीयसत्ता सदा स्या
च्च साम्राज्यशृङ्गा ऋणैः शृङ्खलाश्च ।
स्वदेशं सदा लन्दनेनैव साकं
निबध्यानुशिष्यासुरस्यार्थिकीं च ।। ६२ ।।

व्यवस्था च मुद्रामयी यन्त्रितेन
व्यङ्क्केन चैवाङ्ग्लव्यङ्काश्रिता स्यात् ।
निजस्वार्थसिद्धया अभेद्याश्च भित्ती-
रिमाः शासनं स्थापयामास पत्रे ।। ६३ ।।

नवस्वार्थनिर्माणमप्यादृतं स्यात्
तदर्थञ्च नो राष्ट्रियायः समग्रः ।
विनिक्षेपवत्तत्र संरक्षितः स्यात्
स्वशिष्टैश्च योग्यान् विधातुं किलास्मान् ।। ६४ ।।

समुच्चेषु साम्राज्यशिष्टैः पदेषु
नियोक्ष्यन्ति यानीह भूयो लषामः ।
परं तेषु नास्माकमायन्त्रणं स्या-
न्नहि स्प्रष्टुमेतानि शक्ष्याम एते ।। ६५ ।।

मिलेत्प्रान्त-स्वाधीनता सा परं नो
व्यवस्थापयन् स्याद्दयालुः प्रभुर्नः ।
प्रशास्ता स कश्चित्किल स्यात् स्वतन्त्र-
प्रणालीधरोऽस्मासु निर्देशकः स्यात् ।। ६६ ।।

स कर्तुं न कर्तुं ततोऽन्यच्च कर्तुं
प्रभुर्निग्रहानुग्रहौ कर्तुमीशः।
अहो सत्यमित्थं स्वसामन्तशिष्टैः
पुरेदृङ् न मेधा प्रकाशीकृताभूत् ॥ ९७ ॥

मुसोलिन्यथो हिट्लरोऽप्यद्य तादृ-
ग्जनोवेतरस्तत्प्रशस्तिं प्रकुर्यात्।
पद चापि तद्वायसाऽऽरायसंज्ञं
स्पृहादृष्टिदृष्टं भवेद्भारतेऽस्मिन् ॥ ९८ ॥

विधायेदृशं ते विधानं च यस्मिन्
निबद्धं किलास्याभवत्पाणिपादम्।
विशेषोत्तरादायितारक्षणादि-
स्वरूपाभिराबद्ध्यते शृङ्खलाभिः ॥ ९९ ॥

अमूभिः किलेदं पुनर्मन्दभाग्यं
च राष्ट्रं तथा वन्दिभूतं यथा स्यात्।
अनिस्पन्दनं श्रीनवआइलेनो-
वतमासीदमुष्यामथ योजनायाम् ॥ १०० ॥

समग्रां स्वमेधां प्रयुज्याभ्यरक्ष
न्निमे हन्त संरक्षणं तत्समग्रम्।
मनुष्यस्य बुद्धौ हि येषां प्रक्लृप्ति-
र्जगत्यत्र सम्भाव्यते बुद्धिमद्भिः ॥ १०१ ॥

ततः स्मोऽत्र विज्ञापिता योजनायां
किलास्यां महान् द्रव्यराशिः प्रदेयः।
पुरा कोटिकोटिस्ततो वर्षवर्षेऽपि
कश्चित्स राशिः प्रदातव्य एव ॥ १०२ ॥

स्वराज्योपहारो महाराशिदानं
बिना प्राप्त एषो भवेद्वा कथं नः।
वयं तु भ्रमेऽस्मिन्निमग्नास्तदानीं
यथा भारतो वर्तते दीनदेशः ॥ १०३ ॥

तथाप्यत्र भारो महान् रोपितोऽस्ति
तदल्पीकृतो नः स्वराज्यं तदिष्टम् ।
स्वतन्त्रत्वलाभाय च प्रेरणैनां
प्रजामुद्यतां तावदात्तामकार्षीत् ॥ १०४ ॥

इदानीमिदं ज्ञातमेषोऽपि भारो
गरीयान् गरिष्ठश्च भावी क्रमेण ।
समस्यासमाधानमस्तं दुरस्तं
प्रदत्तं हि शालीनभावेन गौरैः ॥ १०५ ॥

वयं चानुशिष्टा यथा शिष्टिमन्तः
क्लिलैते कियन्तोऽस्त्युदाराश्च सन्तः ।
न साम्राज्यवादी क्वचित्कोऽपि पूर्वं
प्रजाभ्यः प्रसन्नोऽधिकारान् स्म दत्ते ॥ १०६ ॥

न कोऽपीयतोऽदात्प्रजाभ्योऽवकाशा-
नमीषां प्रदाने किलाङ्ग्लप्रदेशे ।
उदारानुदारेषु भूयान्विवादः
समुत्थापितोऽभूत्परीणामभीत्या ॥ १०७ ॥

त्रिवर्षावधि त्वाङ्ग्लदेशे च हिन्दु-
स्थले वारवारागमान्निर्गमाच्च ।
त्रिधा गोलपीठीयमहासभाना-
मगण्यासु संसत्सु विमर्शनानाम् ॥ १०८ ॥

अयं परीणाम उदुस्थितोऽभूत्
परं न यात्रा अधुनापि सन्नाः ।
ब्रिटिश्समायुक्तनिकायसंस
त्तदा श्वेतपत्रे स्थिता निर्णयाय ॥ १०९ ॥

तदग्रेसराः साक्षिणो भारतीया
अभूवन् पुनर्लन्दनेऽनेकगोष्ठ्यः ।
अमूषां सदस्यत्वमासीज्जनानां
पराक्रान्तिशीलाद्विशालप्रधीनाम् ॥ ११० ॥

इहाङ्ग्लप्रदेशे गतौ तत्र साम्राज्य-
ह्यधेव वै लन्दने संस्थितौ च।
व्ययप्राप्तियत्नेऽन्तरन्तःप्रकृष्टे
श्च कृष्टेः प्रकाशा पराक्रान्तिरेषाम् ॥ १११ ॥

इहाद्या द्वितीयाऽप्यथ श्वेतपत्रे
निराशाभिपूर्णाभिरायुक्तिभिश्च ।
न शैथिल्यलाभस्तृतीया स्ववक्तृत्व-
मुग्धा नु राध्या च साध्या च शक्तिः ॥ ११२ ॥

तथा श्वेतपत्रस्थयुक्तीः परीव
र्तितुं यत्नजातं, चतुर्थी च यात्रा।
समुद्रेण वा स्याद्‌गगनेन वा स्या-
द्यानेन तत्संकटभोजयित्री ॥ ११३ ॥

पराक्रान्तिरेषां पुनः पञ्चमीयं
यत्लन्दने वासकष्टानि सोढ्वा।
अमीभिः किलातिक्रमो भीतिहेतू-
नुपाश्रित्य निर्यच्छतां संकटानाम् ॥ ११४ ॥

विदन्त्येव चामी प्रयत्नोऽयमास्ते
ह्यकिञ्चित्करो नः परीवृत्तिलक्ष्यः।
न ते साहसत्यागिनो हन्त जाता
वदिष्याम एव स्ववार्तामहार्याम् ॥ ११५ ॥

इति ध्यानवन्तश्च ते विश्वसन्तो-
ऽभवंस्तेऽथ तेष्वेक आसीज्जनोऽसौ।
प्रतीयोगिनामेष चैकान्ततोऽपि
स्थितस्तत्र सर्वेषु निर्यातवत्सु ॥ ११६ ॥

स किं किं परीवर्तनं वाञ्छतीति
प्रभावं प्रपात्यैव यास्यामि देशम्।
इति प्रायमुद्देश्यमाधाय चित्ते
स संस्तावतो वीक्षते लन्दनस्य ॥ ११७ ॥

स भोजेषु तेष्वास्थितस्तेषु तेषु
स्वदेशागमान्ते स आह स्म चान्यान् ।
महाराष्ट्रियाणां प्रसिद्धिं प्रयातं
दृढत्वं च कार्यञ्च नाहं त्यजामि ॥ ११८ ॥

स्ववार्तामिहान्ते समग्रां च वक्तुं
स्थितो लन्दने स्थाणुवत्सर्वथास्मि ।
स्मराम्येष यत्तात आह स्म भूयो
प्रतीयोगिमित्रेषु मे नास्ति हास्यम् ॥ ११९ ॥

स्वकीयासु वार्तासु चोक्तासु तस्य
प्रतीगामिमित्रैः परीहासिनीषु ।
न तेभ्यो मनागप्यहो रोचमाना-
स्वभून्नैकधा युद्धकल्पो विवादः ॥ १२० ॥

ततो बोधनीया भवन्ति स्म तेऽथा
पि सन्तोषणीया भवन्ति स्म भूयः ।
स चायं प्रयत्नः श्रमैः साधनीयो-
ऽभवत्तत्पितुः श्रान्तये क्लान्तये च ॥ १२१ ॥

मया चिन्तितं यन्महाराष्ट्रियेषु
स्थिता योद्धमेषा दृढा भावनास्ति ।
न या भूतकाले परं वर्तमाने-
पि या व्यज्यमानास्ति राष्ट्रीययुद्धे ॥ १२२ ॥

तदाहं महान्तं च निर्भीकमेकं
तमस्मार्षमार्यं तु गङ्गाधराख्यम् ।
भजेत्खण्डखण्डत्वमत्रैष नाम
प्रणामं न कुर्यात्परस्मै परं सः ॥ १२३ ॥

उदारा इदं श्वेतपत्रं कदाचि
न्न रोचन्त एवं दमं जायमानम् ।
कदाचिद्विरोधं त्वकार्षुः किलास्या-
वदंश्चेह काङ्ग्रेसनिन्दां विदध्मः ॥ १२४ ॥

प्रसङ्गे प्रसङ्गे प्रशिष्टिं प्रबोधै-
रिमे बोधयन्ति स्म यन्मुच्यतां तैः ।
अयं नेतृवर्यस्तु कांग्रेसकस्या-
भवन्यस्य विज्ञास्तमेवोद्दिशन्ति ॥ १२५ ॥

उदारस्य चात्र प्रतीयोगिनोऽप्या
स्त तर्को यथा नास्ति शान्त्यै प्रभीतिः ।
अतो मुच्यतामेष चेदत्र भूयो
भवेद्दोषभाक्तं निगृह्णातु शिष्टिः ॥ १२६ ॥

तदा तद्विनिग्राहणं युक्तियुक्तं
भविष्यत्यपीतश्च तस्मै वदन्ति ।
स्वदेशे यथात्वाङ्ग्लदेशेऽपि तेऽमी
अनेनैव तर्केण मोक्षाय यत्नम् ॥ १२७ ॥

स्म कुर्वन्ति कासाञ्चन व्यक्तिकानां
कतीनांचिदेषां च संसज्जनानाम् ।
यदा वन्दिगेहे वयं स्मो निबद्धा-
स्तदास्मासु ये प्रेरणां तामकार्षुः ॥ १२८ ॥

इमान्प्रत्यमी स्मः कृतज्ञा विना त-
त्कृतज्ञत्वमेते न वर्तामहे यत् ।
कदाचित्तु चित्तेऽभवन्नाम नामी
यतेरंस्तदा साधु तत्स्यात्कृते नः ॥ १२९ ॥

न शङ्कास्त तद्भावनायां तु काचित्
परं व्यक्तमासीदिमेऽङ्ग्रेजपक्षाः ।
तदीयां विचारैकधारां वहन्ती-
त्यमीषां च नो मध्यतः खातमस्ति ॥ १३० ॥

भवत्यत्र यत्तन्न रोचन्त एते
ह्युदारास्ततो दुःखमेते भजन्ते ।
परं किं नु कर्तुं समर्था इमे स्यु-
र्नं शिष्टेर्विरोधे क्रमेयुः पदं ते ॥ १३१ ॥

तथा कल्पनामप्यमी नैव कुर्युः
पृथग्रक्षितुं चात्मवर्गं ततोऽमी ।
प्रजाभ्यस्तथास्मद्विदूरे प्रयातुं
समायान्तु वैवश्यमेकं क्रमेण ॥ १३२ ॥

अमी नम्रभावात् तथागुश्च पश्चात्
यथा तद्विचारेषु शिष्टैर्विचाराः ।
मिलित्वाऽपृथग्भावमेकं विबभ्रु-
र्यथादुष्करोऽभूत्तयोः सद्विवेकः ॥ १३३ ॥

मिताः संख्यया ते प्रजासु प्रभावा-
द्यभावाच्च स्वातन्त्र्ययुद्धेऽतिगौणाः ।
वियोगेन वा योगदानेन कंचि-
त्परीणामभेदं न चक्रुर्वराकाः ॥ १३४ ॥

परं तेषु केचित्प्रसिद्धाः प्रतिष्ठा-
जुषश्चाप्यभूवन् महान्तो महान्तः ।
दधानास्तु वैयक्तिकीं तां महत्ता-
मिमे चाप्युदाराः प्रतीगामिनश्च ॥ १३५ ॥

नयं शासनस्यापि यूथात्मनाऽमी
अपुष्णन्महासङ्कटेऽदुश्च साह्यम् ।
न चालोचनाभूदमीषां समर्था
ततः प्राप्तकालं ददुर्मानमस्मै ॥ १३६ ॥

अमीषामुदारार्चितानां च दृष्ट्वा
दमस्यानयस्यापि चोत्साहनेन ।
प्रशिष्टिस्तदात्वे यदाऽनीतिदान्त्यो
र्नसौचित्यसम्पादनेऽभूदशक्ता ॥ १३७ ॥

उदारा इमे तत्प्रतीगामिन
स्तर्हि तस्यै बलं नैतिकं दत्तवन्तः ।
उदारां वदन्तिस्म यच्छ्वेतपत्रं
तु दुष्टं प्रदुष्टं परं किन्नु कुर्मः ॥ १३८ ॥

त्रयस्त्रिंशवर्षे किलोदारसंघे-
स्त स वर्षोत्सवः सातिरेकश्च जातः।
इह श्रीनिवासः स शास्त्री किलैषा-
मभून्मुख्यनेता स चाबूबुधत्तान् ॥ १३९ ॥

स वैधानिकीं तां परीवृत्तिमत्य-
न्तसन्तोषबाह्यामपीहानुवर्ती।
निरूप्याह-नायं हि कालोऽस्ति यस्मि-
न्वयं स्याम कुत्रापि सौख्यस्थितास्तु ॥ १४० ॥

समक्षं च सर्वं भवत्तत्र दर्शं च
दर्शं च तूष्णीं भवामो वयन्तु।
स्फुटं तद्विचारे समेतं किलैत-
दवाप्यात्र कालः परिग्राह्यएव ॥ १४१ ॥

तदेवं स्वकार्यं समाधेयमेत-
न्नचेद्योग्यमस्मै तदा कार्यमन्यत्।
न तच्चापि चैत्तेन साध्यं परन्तु
व्रतं मौनभावस्य सन्धार्यमेव ॥ १४२ ॥

मतिश्चानुभूतिश्च नम्रत्वमन्यं
स्ववक्तव्यमन्यं विधातुं च शक्तिः।
परस्मिन्विना वाक्यमेव प्रभावं
निधातं च सामर्थ्यमस्तीह यस्य ॥ १४३ ॥

क्रियादक्षता स्यादिमे चेद्गुणाः स्यु
स्तदा तत्प्रकाशाय योग्यः प्रसङ्गः।
इह प्रार्थनायां तु भावैर्भृताया-
मलेखीत्किल स्टेट्समैनं मतिं स्वाम् ॥ १४४ ॥

यदेते परं सुन्दराः सन्ति शब्दाः
स शास्त्री सदा भावपूर्णं प्रवक्ति।
प्रवक्तेव चार्यं परं सुन्दरांस्तां
श्चशब्दानलङ्कारपूर्णान् प्रयुङ्क्ते ॥ १४५ ॥

परं सोऽयमुत्साहवाहे वहन् सन्
वयत्यत्र जालं मनोमोहकं तैः ।
अमीभिस्तदिष्टोऽपरेषां कृते किं
कृते स्वस्य वै धूमिलो जायतेऽर्थः ॥ १४६ ॥

त्रयस्त्रिंशवर्षे स वै कालिकाता-
पुरे प्रस्तुते नम्रभङ्गेऽब्रवीत्तत् ।
अमुष्मिन्विचारः कृतः सार्थकःस्या
द्धि सिद्धान्तलक्ष्ये समक्षे भवेताम् ॥ १४७ ॥

तथाप्यत्र वस्तुद्वयं दृष्टिमीयात्
तदाद्यं 'किमप्यस्तु तन्नाम वस्तु' ।
प्रशिष्टयावमानः कृतः स्यात्कियान्नो,
दमः शोषणं वा भवेन्नः कियच्च ॥ १४८ ॥

तदस्माभिरस्मिंस्तु काले विषह्यं
न मर्यादरेखाङ्कितुं शक्यतेऽत्र ।
न यस्या बहिर्निर्गताः स्याम जातु
कृमिस्तुच्छ एकोऽस्तु साम्मुख्यकर्ता ॥ १४९ ॥

परं शास्त्रिसाम्मत्यतश्चेच्चलामो
न वै भारतीयस्तथा कर्तुमर्हेत् ।
इहान्यश्च पन्था न वै विद्यते नः
'इतीहास्ति शास्त्रिप्रदिष्टोपदेशः ॥ १५० ॥

इदं चास्य तात्पर्यमास्तेऽत्र यावान्
स सम्बन्ध आस्तेऽस्य तावत्तदीयः ।
प्रशिष्टेस्तु निर्णीतिरत्यादरेण
प्रणम्या च मञ्जूररीकारणीया ॥ १५१ ॥

इदं नश्च भाग्येऽङ्कितं तन्निजेच्छा-
स्वनिच्छासु भावीति नस्तत्समक्षे ।
शिरो नामितं स्यादिदं वस्तु ध्येयं,
स नेदं परिस्थित्यधीनः स्म वक्ति ॥ १५२ ॥

न निर्णीतमर्थं च कञ्चिच्छ्रुतोऽसौ
स्वसाम्मत्यमात्रं व्यनक्ति स्म शब्दैः ।
इदानीञ्च वैधानिकीयं परीवृ-
त्तिरासीदहो कल्प्यमाना प्रशिष्टया ॥ १५३ ॥

समे जानते स्मेयमत्यन्तदुष्टा
भविष्यत्यथेतीह तेषां प्रकृत्या ।
स चेदब्रवीदस्ति तच्छ्वेतपत्रं
प्रदुष्टं समाच्छन्नमास्ते तु तर्कैः ॥ १५४ ॥

परं चेदिदं स्याद्विधानस्वरूपं
तदा तत्क्रियायां समानेयमास्ते ।
इतोयान्ममास्ते स्वपक्षस्तदासी
दियं तस्य सा सम्मतिः प्राप्तकाला ॥ १५५ ॥

परं शास्त्रिवर्योऽग्रगोऽत्यन्तमासी-
त्स वक्ति स्म दुष्टा परीवृत्तिरास्ताम् ।
असन्तोषकारिण्यथो सातिमात्रं
तथाप्यस्ति मे सम्मतिस्तावदेषा ॥ १५६ ॥

अभूद्राष्ट्रदृष्टया च यत्सर्वतोऽपि
महत्त्वानुगं वस्तु तस्मिन्निदं च ।
प्रशिष्ट्यै परं रिक्तपत्रं धनार्थं
प्रदातुं किलोद्युक्त एवायमासीत् ॥ १५७ ॥

इदं दुर्गमं मे यथा कापि व्यक्तिः
समित्कापि किञ्चिद्दलं वा न यावत् ।
कमप्यत्र सिद्धान्तमेकान्ततो वा
श्रयेन्नैतिकत्वं न चादर्शमेकम् ॥ १५८ ॥

पुना राजनीतेर्विना रिक्तचेता
भवेच्छासकानां निदेशेष्वधीनः ।
न तद्ध्येयमास्ते न तन्नीतिरास्ते
स तावद्भविष्याय किं वक्तुमर्हेत् ॥ १५९ ॥

द्वितीये च वस्तुन्यथोक्तं मनो मे
तदास्ते विशुद्धं परं मुक्तिदाक्ष्यम् ।
नवानां सुधारान्वयानां विधानी-
कृतेरस्य हर्म्यस्य वै दीर्घसृष्टौ ॥ १६० ॥

इदं श्वेतपत्रं तु सोपानमात्रं
यदावश्यकं शिष्टिदृष्टया तदासीत् ।
परं त्वन्यसोपाननिर्माणमासी-
त्प्रशिष्टं निजं लक्ष्यमाप्तुं यथार्थम् ॥ १६१ ॥

इहारोहकालेषु चोच्चैरथोच्चैः
शुभां वाशुभां वा परीवृत्तिमन्याम् ।
अनेकात्मिकां कर्तुमावश्यकं स्या
च्च तस्याः किलाधार एव स्फुटोऽभूत् ॥ १६२ ॥

ब्रिटिशशासने संसदि त्वस्य भिन्ना
विभिन्नाश्च स्वार्थाः कियन्तं प्रभावम् ।
विनिक्षेप्तुमासन्समर्थास्तथास्मि
श्च रज्ज्वाविकर्षे भवेत्कल्पनेयम् ॥ १६३ ॥

भवेच्छासनं भारतीयानुदारान्
स्वपक्षे विधातुं कदाचिद्धृतेच्छम् ।
इमा योजनाश्चेदमत्रात्युदारा
विदध्यात्सुधारेषु न न्यूनतां तत् ॥ १६४ ॥

नवीनान् सुधारांस्तदङ्गीकृतौ वा-
प्यनङ्गीकृतौ वा क्रियान्वायने नः ।
क्रियानन्वये वाऽपि प्रश्नोत्थितेः प्राक्
स शास्त्री बलेनाकरोद् घोषणां ताम् ॥ १६५ ॥

यथा शासनं बोधितं स्पष्टमेषां
न वै भारतीयात्युदारात्मनां तत् ।
न कुर्यादपेक्षामिदानीं स्वपक्षे
समावेशनस्यास्ति न प्रश्नशेषः ॥ १६६ ॥

प्रतीघातदानैर्बहिष्कारितास्ते
न सार्थं प्रशिष्टेर्जहत्यञ्जसा यत्।
इतीहैव वस्तुन्यथो मृश्यमाने
नितान्तं किलोदारदृष्ट्यैव नूनम् ॥ १६७ ॥

अथाज्ञासिषं शास्त्रिणा कालिकाता-
कृते भाषणे भद्रके युक्तिदाक्ष्ये।
प्रकाशं गते चाप्युदारस्य पक्षस्य
नूनं हितानामभूद्धानिकृत्तत् ॥ १६८ ॥

मया शास्त्रिणः प्राक्तने भाषणे
यन्न तावद्व्यलोक्यस्ति तत्कारणं हि-
सुवक्तव्यकोदारसङ्घीयवर्षोत्स
वस्यापि किञ्चिन्महत्त्वं तदासीत् ॥ १६९ ॥

उताहं किलोदारनेतृत्वचित्त-
प्रवृत्तिं च वृत्तिं विवित्सुस्तदासम्।
सुयोग्या इमे चादरार्हाश्च सन्तः
कथं नाम कार्यं तथा ते श्रयन्ते ॥ १७० ॥

हृदाहं च सद्भावमेतान् प्रतीत्थं
वहन्नस्मि शीलं न तेषामबोधम्।
परस्यापि तद्भाषणस्य प्रभावो
मयि प्रापतद्यत्पठामि स्म वन्दी ॥ १७१ ॥

अमुष्यापि मय्यापतन्नैव साधुः
परीणाम इत्यस्म्यशङ्कं वदामि।
त्रयस्त्रिंशवर्षे स वै जूनमासे
तदाभाषतात्रैव पुण्यप्रदेशे ॥ १७२ ॥

स तत्रेदमप्याञ्जयद्वै प्रकेतं
निरस्येत चेद् भारतादाङ्ग्लमोजः।
तदा भीतिरास्ते दलं किञ्चिदन्य-
त्प्रति स्याद् घृणाभावतो दूरगामि ॥ १७३ ॥

तदेनच्च सन्तापयेत्पीडयेच्चा-
नयै राजनीतिः क्षमां नैव धत्ते।
प्रतीपं त्वितो ब्रैटिशे शासनेऽस्मिन्
सहिष्णुत्वरूपो विशेषः स्थितोऽस्ति ॥ १७४ ॥

अतो भारतस्यास्य यावद्भविष्यं
ब्रिटेनेन साकं भविष्यत्यपूर्वम्।
तथा तावदेवात्र तिष्ठेत्सहिष्णु-
त्वमित्यस्ति सम्भावना सर्वथेति ॥ १७५ ॥

वसन्वन्दिगेहे किल स्टेट्समैना
ह्यदापं तु तद्भाषणं तत्प्रमाणम्।
इदं स्टेट्समेंनाख्यपत्रं ततोऽग्रे-
ऽलिखत्सुन्दरो वर्ततेऽसौ विचारः ॥ ११६ ॥

वयं द्राक्तरस्याथ मुंजेतिनाम्नो
ऽपि बक्तव्यमालास्विमं व्यञ्जयेम।
प्रवक्तिस्म शास्त्री च यद्रूसशर्मण्य-
मुख्येषु देशेष्वपीत्थं दमोऽस्ति ॥ १७७ ॥

स्वतश्चास्य भावस्य तत्राप्यमानुष्य-
जाङ्गल्यभावेन या दान्तिरस्ति।
यदाऽपाठि तद्भाषणं ध्यानमागा
त्तदा भारतस्यास्य सम्बन्ध एतैः ॥ १७८ ॥

ब्रिटेनस्य कस्यापि तीव्रानुदारा
नवैशास्त्रिणोऽन्यस्य नीतेर्विचाराः।
कियत्साम्यमृच्छन्ति भेदोऽस्ति वृत्तौ
परं मूलतः सा विचारैकधारा ॥ १७९ ॥

स वै विंग्स्टनश्चर्चितोऽपि स्वविश्वास-
माधृत्यचेदृग्गिरा भाषते स्म।
तथाप्येष शास्त्री किलोदारवर्गे-
ऽस्त्युदग्रः किलाग्रेसरो नेतृवर्गे ॥ १८० ॥

न तस्येतिवृत्ताद्यधीतिर्न विश्वस्य
प्रश्नेषु तत्सम्मतिं चैष वेद ।
न मन्येऽत्र सम्यक् विशेषाद्ब्रिटेन-
स्वदेशान्वयेऽहं तदीयां विविक्तिम् ॥ १८१ ॥

तदीयामहं सम्मतिं जातु मन्तुं
न शक्तोऽस्मि, वैदेशिकोऽप्यन्यलोकः ।
न चाङ्गजभिन्नो भवेत्कोऽपि तेनात्र
नूनं समानो विचारे कदाचित् ॥ १८२ ॥

तथोच्चैर्विचाराः किलाङ्ग्रेजमुख्या
अमुष्यानुकूला विचारेषु न स्युः ।
स नूनं किलाङ्ग्रेजलोकोपनेत्रैः
सरागैर्जगद्वीक्षितुं पण्डितोऽस्ति ॥ १८३ ॥

तथाप्यस्ति तद्ध्यानयोग्यं यदष्टा-
दशासन्नमासैरसाधारणी या ।
स्वदेशेऽनिशं घट्टिता या च तद्भा-
षणेऽस्मिन् स कस्याश्चिदप्यत्र नार्हत् ॥ १८४ ॥

स रूसस्य शर्मण्यदेशस्य चापी-
टलोदेशकस्यापि नाम त्ववोचत् ।
परं स स्वदेशे भवन्तं भयाढ्यं
दमं च स्वतन्त्रत्वचौर्यं तु नोचे ॥ १८५ ॥

स दृक्पातमप्यत्र नैवाकरोद्यत्-
ततोऽहं तु मन्ये न तेन श्रुतं स्यात् ।
अहो वंगदेशे च सीमान्त प्रान्ते-
यदत्रा भवत्तन्न तेन श्रुतं स्यात् ॥ १८६ ॥

यदाधृत्य राजेन्द्रबाबूरिदानीं
स्वकांग्रेसकाध्यक्षभावाद् बभाषे ।
बलात्कार एवाभवद् बङ्गभूमौ
कृता गुप्तिनेपथ्यपृष्ठस्य गुप्तिः ॥ १८७ ॥

परं तस्य किं शास्त्रिणो मातृभूमेः
परं दुःखमप्यास्त तद्विस्मृतं किम्।
स किं पौरुषं राज्यमाकीर्णमेत-
त्तथा सैन्यवैधानिकीं विस्मृतोऽभूत् ॥ १८८ ॥

बलिष्ठप्रतिद्वन्द्विसाम्मुख्यमेत-
त्स्वतन्त्रत्वयुद्धे वयं युध्यमानाः।
परिस्थित्युपादेशना-क्षुत्प्रतीघात-
कारागृहान्तःस्थकष्टानि तानि ॥ १८९ ॥

यथा वा सहिष्णुत्वशक्त्या स्वतन्त्र-
त्ववृत्त्या ब्रिटेनप्रशंसामकार्षीत्।
स्वदेशेऽत्र तस्या विदेश्यैः कृतोऽयं
दमः किं न तस्य स्मृतिं स्पृष्टवान् सः ॥ १९० ॥

स कांग्रेसतः सम्मतोऽभून्नवेति
न चिन्तास्ति-विद्वान् समीक्षाधिकारी।
स कांग्रेसनीतेः समालोचनां वाऽथ
निन्दां प्रकुर्यादिति त्वस्ति सह्यम् ॥ १९१ ॥

परं भारतीयत्वसम्बन्धतोऽसौ स्व-
तन्त्रत्वप्रीतेः पुनर्भाविकत्वात्।
स्वदेशोदितानां बलीदानकल्प
महात्यागिनां नारिनरोच्चयानाम् ॥ १९२ ॥

कृते प्रायशस्तस्य कीदृग्विचारो
यदा शासका भारतस्योरसीमे।
स्वखड्गप्रहारं प्रकुर्वन्त आसन्
तदा किं नु शास्त्री समायात्स दुःखम् ॥ १९३ ॥

जनानां च लक्षं दयात्यागपूर्णं
च साम्राज्यमेतन्न तन्नन्तुमैच्छत्।
निजात्माभिमन्थाच्च देहाभिमन्थं
कुटुम्बाभिमन्थं स्थितं तं विषोढुम् ॥ १९४ ॥

प्रियस्यात्मनश्चापि लोकस्य कष्टं
च सोढुं सदैवोद्यतं स्यात्।
न किं तन्महत्त्वं विदन्तिस्म चैते
वसन्तोऽत्र कारागृहे ये हसन्ति ॥ १९५ ॥

त्यजन्त्यन्तरङ्गे स्थितं साहसं ये
स्मयन्ते हसन्ति स्मितं चाश्रुपूर्णम्।
स हासश्च येषामभूद्रोदनं हा!
स तान्प्रत्यधात्कान्नु संवेदनाञ्च ॥ १९६ ॥

उदारः प्रवीरश्च गौराङ्ग एकः
प्रवक्ति स्म चित्ते पतन्तं प्रभावम्।
स च त्रिशवर्षस्य वृत्तं व्यनक्ति
स्म तद्दृश्यमासीत्समस्तोऽपि देशः ॥ १९७ ॥

पराधीनताबन्धनान्यत्यतिष्ठ-
न्मस्तिष्कतः स्वप्रतिष्ठासमेतः।
परं निर्भयो निश्चयं स्वं विवृण्वन्
समुत्तिष्ठते वेरियन्नेल्विनोऽसौ ॥ १९८ ॥

पुनर्वक्ति-सत्याग्रहे सङ्गरेऽस्मिन्
स्वयंसेवकैः काङ्ग्रेसानुगैस्तैः।
किलाश्चर्यकारिण्युपादर्शितासी-
च्च काचित्तदा सानुशिष्टिः प्रशस्या ॥ १९९ ॥

तदीयां प्रशस्ति क्वचित्प्रान्तवर्ती
स राज्याधिपालोऽप्यन्वकार्षीन्मुखेन।
परं श्रीनिवासो न कस्यापि चर्चा-
मकार्षीत्प्रशंसन्प्रशिष्टिं विदेश्याम् ॥ २०० ॥

अयं श्रीनिवासश्च शास्त्री सुयोग्यः
परं भावुकश्चास्ति मान्यश्च देशे।
असम्भाव्यमेतच्च मे भाति युद्धे
न तस्यापि तादृग्विचारा भवेयुः ॥ २०१ ॥

न तस्यापि च स्यात्स्वदेश्यैः समाना-
नुभूतिश्च संवेदना चान्तरङ्गे।
ततश्चेयमाशापि कर्तुं सुशक्या
निजां वक्तृतां सोऽर्पयेज्जन्मभूम्यै ॥ २०२ ॥

तथा शिष्टिमुद्बोधयेदत्र देशे
तथा नागरिक्या निजाधीनतायाः।
प्रसारो विधेयः, प्रवृत्तिः पुनः सार्वजन्या
विरोधस्य निन्दा विधेया ॥ २०३ ॥

स शास्त्री च तन्मित्रभूताः परेऽपि
प्रयान्तु प्रदान्तान् प्रशिष्ट्याथ प्रान्तान्।
सवङ्गानिमांश्चापि सीमान्तप्रान्ता
दिकांस्तान् स्वयं वै निरोद्धुं दमं तम् ॥ २०४ ॥

न कांग्रेसकार्येषु साह्यं प्रदातुं
परं साधिकारानिमान् सम्प्रबोद्धुम्।
तदीयातिचारान्प्रकाश्याज्ञतां चा
पि रोद्धुं किलैते प्रयत्नं विदध्युः ॥ २०५ ॥

परेष्वत्र देशेषु स्वाधीनतायाः
कृते नागरिक्याश्च कुर्वन्ति कार्यम्।
अयं तन्न कृत्वा यदा शिष्टिरेषा
नृणाञ्चापि नारीजनानां प्रमाथम् ॥ २०६ ॥

प्रकुर्वंत्यहो नैति कञ्चिद्विरामं
यदा दैनिकीं हन्ति तत्स्वावशींञ्च।
न शिष्टेरिमां दुष्प्रवृत्तिं निरुन्धं
स्तदा तत्प्रशंसां करोतीति चित्रम् ॥ २०७ ॥

अकृत्वा निरीक्षां तदा घट्टनाना
मसंशोध्य वृत्तं तथा वर्तमानम्।
ददाति प्रमाणप्रपत्रं तथास्यै
सहिष्णुत्वस्वातन्त्र्ययोरप्रसङ्गम् ॥ २०८ ॥

न शिष्टेस्तु शिष्टाविदानीं गुणौ तौ
प्रजास्वत्र दन्दम्यमाणासु दृष्टौ।
स शास्त्री प्रशिष्टयै ददाति स्म नैजं
पुरा नैतिकं संश्रयं नैतदर्हम् ॥ २०९ ॥

ततो देशदान्तेश्च कार्यक्रमस्या-
नुमोदेन प्रोत्साहयंस्तामवादीत्।
अहं वेद्मि तत्तस्य नाभीष्टमासीत्
न तस्यावधानं गतं तत्फले च ॥ २१० ॥

परं यः प्रभावोऽभवद्भाषणस्य
स नूनं स एवास्ति यस्य प्रकाशः।
इदं तेन कस्मै फलायोपक्लृप्तं
कृतं कार्यमीदृक्कथं चेति प्रश्नः ॥ २११ ॥

अमुष्योत्तरं साधु नो मेऽन्यदाभात्-
अमी चाप्युदाराः स्वमत्र स्वदेशात्।
समस्तादिदानीन्तनाच्चिन्तनाच्च
नितान्तं विदूरे परानीतवन्तः ॥ २१२ ॥

पुराणप्रणालीप्रणीतानि यानि
प्रपठयन्त एतैः सदा पुस्तकानि।
अमीभिस्तदीयान्निजाद् दृष्टि-कोणा
दियं भारतीया प्रजा प्रासिता च ॥ २१३ ॥

अमीषां विशेषेण नूनं स्वकीयेषु
नूनं प्रसक्तुं प्रभूतः स्वभावः।
वयं वन्दिगेहान्गतास्तत्र देहान्
प्रकोष्ठेषु संयम्य निक्षिप्तवन्तः ॥ २१४ ॥

परं बुद्धयोऽस्माकमासन् स्वतन्त्रा
न नः साहसं चापि शैथिल्यमाप्नोत्।
अमीभिस्तु शैल्या स्वया वन्दिगेही-
कृतं तत् स्वकीयं हि मस्तिष्कमग्र्यम् ॥ २१५ ॥

इहैतेऽन्तरेवास्य चक्रभ्रमं
बम्भ्रमन्ते न तस्याद्बहिर्निःसरन्ति ।
पुरा वर्तमानानि वृत्तानि ये
चा रटन्नद्य तेषां परीवर्तनेन ॥ २१६ ॥

यथास्मिन् परीवृत्तिशीते हि लोके
भवत्येव तेषां तदाऽसन्निधित्वात् ।
शरीरञ्च मस्तिष्कमासीदकर्म-
ण्यमादर्शलोपादपायाच्च नीतेः ॥ २१७ ॥

मनुष्येण वाग्राय सर्तव्यमस्मि-
न्नथो पृष्ठतस्तेन यातव्यमत्र ।
अमुष्मिन्सदासारिसंसारमध्ये
क्वचिन्नैकतोऽवस्थितिः स्यात्स्थिरा नः ॥ २१८ ॥

परीवर्तनात्प्रागतेर्वा भयेना
प्युदाराः स्वपार्श्वेषु दृष्ट्वा निपातान् ।
भयार्ता अभूवन्निमे पाणिपादे च
दौर्बल्यतो वर्धितुं नाध्यभूताम् ॥ २१९ ॥

अतो वीचिवल्लीष्वितो वा ततो वा
निमग्ना कुशं काशमालम्बमानाः ।
तदालम्ब्य पारं च यातुं प्रयत्नान्
व्यधुर्हेमलेटाः स्वनीतेरिवासन् ॥ २२० ॥

विचारेषु वैविध्यतश्चिन्तयार्ता
श्च पाण्डुत्वमापू रुजार्ता अभूवन् ।
सदा संशयाच्चापि संकोचतश्चापि
तेऽनिश्चयेनैव ग्रस्ता इवासन् ॥ २२१ ॥

'न हीर्ष्यारतास्तेऽद्य मेलानुवेला
सदा लग्न आसं तु संस्कर्तुमेषः ।
ह्युदारः स सर्वेण्ट आफेण्डियाख्य-
समाचारपत्रे विशेषोऽत्र दोषः ॥ २२२ ॥

विनम्रस्य भङ्गस्य पश्चाद्दिनेषु
प्रकांग्रेसिकेष्वारुरूपन्यथैते ।
पुरा वन्दिगेहप्रवेशाभिलाषाः
प्रवेशात्परं चाशु निर्गन्तुकामाः ॥ २२३ ॥

पुनः क्षुभ्यता तेन चोक्तं तदाभूत्
इयं चास्ति कांग्रेसनीतिः किलैका ।
स्फुटं तर्ह्युदाराध्वना प्रस्थितानां
ब्रिटिशमन्त्रिसेवार्थमाङ्ग्लप्रयाणम् ॥ २२४ ॥

अथो वाङ्ग्लशिष्टेरधीकारिवर्गे
परीवर्तनस्य प्रतीक्षाऽर्थना च ।
इति स्पष्टनीतिस्तदैषा यथार्था
ऽथ काग्रेसनीतिस्तदा सैव चासीत् ॥ २२५ ॥

महाऽऽदेशभङ्गोऽथ दान्तिप्रदानां
विधीनां विभङ्गेन हिंसां विनात्र ।
ततो दण्डरूपेण कारागृहेषु
प्रवेशश्चिरं युद्धतः श्रान्तभावात् ॥ २२६ ॥

तदा राष्ट्रमेतत्सभा राष्ट्रियैषा
च कांग्रेसमैच्छत्ततो मध्यमोक्षम् ।
प्रशासेन केचिन्न वै दान्तिमध्ये
विनिक्षेप्तुमासन् कथञ्चित्तु शक्याः ॥ २२७ ॥

परं नः समक्षेऽभवद् व्यावहारि-
क्युपेता दृगेका परा नैतिकी सा ।
ततस्तेन पत्रेण मिथ्यैष दोषा-
धिरोपः कृतोऽभूत्तु काङ्ग्रेसिकेषु ॥ २२८ ॥

बलस्य प्रयोगैः समक्षं समेषां
विनिर्धार्यते स्मार्थराशिव्ययेन ।
अतः शासनस्याप्यसौ दुःखहेतु
स्तथा भीतिहेतुः कृशानौ परीक्षा ॥ २२९ ॥

तदेतच्च वेत्ति स्म सम्यग्यदन्ते-
ऽमुनाऽऽधारभित्तिः कृशत्वं प्रयाति ।
अनेन प्रभुत्वस्य तस्य स्वरूपं
जनानां समक्षे सदा व्यज्यते स्म ॥ २३० ॥

इतः साधु मन्यन्त एते किलायः
प्रणीतः स्वपञ्चाङ्गुलैः कोमलेन ।
सुकौशेयकेनावृतैर्भारतीयै-
र्निगृह्येत ग्रीवा समग्रौजसेयम् ॥ २३१ ॥

प्रशिष्टेः किलेच्छां प्रतीमे न नन्तुं
यदिच्छन्ति तत्सम्मुखीनत्वतुल्यम् ।
न रोषास्पदं हानिकृच्चान्यदास्ते
प्रशिष्टेः कृते दम्यलोकस्य यत्स्यात् ॥ २३२ ॥

अतो दान्तिकृच्चासनस्यावहेला
विनम्रश्च भङ्गो महत्त्वं बिभर्ति ।
प्रजाशक्तिरेतेन संवर्धते सा
प्रशिष्टेस्तथाधारभित्तेश्च भ्रंशः ॥ २३३ ॥

दृगेषा ततो नैतिकी सा महत्त्वं
बिभर्तीह थोरोऽलिखत्तत्प्रसिद्धम् ।
अनेहस्यमुष्मिन् यदा बन्दिगेहे
स्त्रियः पूरुषाश्चानयाद्वेश्यमानाः ॥ २३४ ॥

तदान्यायिनोरस्ति स्त्रीपुंसयो-
रप्यहो वन्दिगेहेषु योग्यो निवासः ।
इयं सम्मती रोचतां नाप्युदाराय
चाप्यन्यलोकाय लोके कदाचित् ॥ २३५ ॥

परं नस्त्वनेके प्रतीयन्ति य-
द्वर्तमानस्थितौ नम्रभङ्गं विनापि ।
अनेकेऽस्मदीयाः सखायोऽत्र कारा-
गृहेष्वेव निक्षिप्य रक्ष्या भवन्ति ॥ २३६ ॥

यदा शिष्टितन्त्रं स्वकैर्दान्तियन्त्रै
दमं चाऽपमानं च नित्यं करोति।
तथा शोषणे चास्मदीयस्य लोकस्य
साहाय्यमभ्याचरत्याग्रहेण ॥ २३७ ॥

तदा नैतिकं जीवनं नैव सम्भा-
व्यतेस्म स्वदेशे च सन्दिग्धकलाः।
वयं दृष्टिपात्राणि नैवानुगम्याः
किलायात निर्यात काले निरीक्ष्याः ॥ २३८ ॥

यदुक्तांश्च शब्दांल्लिखन्तीह शिष्टे-
र्जनास्ते न राजद्रुहां वाक्समाः स्युः।
तदुद्घाटयते पठ्यते चापि पत्रं
मया प्रेषितं मह्यमभ्यागतं वा ॥ २३९ ॥

सदा शिष्टिनिर्देशतो बन्धनं वा
विनिग्राहणं वापि सम्भाव्यते मे।
इति द्वौ तु मार्गौ ममाग्रे स्त एतौ—
नमामि प्रशिष्टिं, विगृह्णामि चैनाम् ॥ २४० ॥

तयोराद्यमार्गे भवेदात्मपात-
स्तथोपेक्षितं सत्यमास्तां हृदिस्थम्।
न मन्ये शुभानीह यानि प्रयोज्या
न्यहो तत्कृते नैतिको दुष्प्रयोगः ॥ २४१ ॥

विगृह्णन्निहास्म्येव तां शिष्टिमुग्रां
भवेद्यः परीणाम एषोऽस्तु सह्यः।
न कश्चिद्विपत्सन्निधिं वाञ्छतीहा-
कारागृहे कोऽपि नो वासमिच्छेत् ॥ २४२ ॥

परं पूर्वमार्गान्ममाध्वा द्वितीयो
विशेषाद्यतो रोचते तेन सोऽहम्।
सदा वन्दिगेहे निवासाय नद्धो-
ऽवतिष्ठेऽत्र बर्नार्डशोवितः प्रसिद्धा ॥ २४३ ॥

समन्तादिदं दुःखदं यद्यदेवात्र
निन्द्यं तदेवोपयुञ्जन्ति नीचाः ।
परेभ्यस्ततो भिन्नमास्ते च यत्त-
त्तु दुर्भाग्यमास्तेऽथवा मृत्युरेव ॥ २४४ ॥

इदं चापि दुर्भाग्यमास्ते विपत्तिः,
पराधीनता वा जगन्निर्मितिर्वा ।
ततो वन्दिगेहात्परं नैव कांक्षे
स निन्द्योऽपि हेतोर्विशेषाद्धि वन्द्यः ॥ २४५ ॥

श्रीनेहरूकाव्ये मनोज्ञे मामकीनकथानुवादे
बालकविनाऽऽमीरचन्द्रेणाऽऽरचितरुचिराखिलाङ्गे ।
वैश्वदेवीवृत्तकल्पितपद्यरचनेनानवद्यो
ऽष्टाधिचत्वारिंशसर्गो द्विमुखनीतिमयो गतोऽयम् ।

दीर्घकारावासावसानम्

शालिनी

ऊनपञ्चाशः सर्गः

मुक्तेर्वेला सन्निधत्ते स्म मां सा साधारण्यात्सच्चरित्रावकाशः ।
यावल्लभ्यः सोऽपि लब्धस्तदासीत् वर्षद्वन्द्वे सार्धमासत्रयस्य ।।१।।
चेतःशान्तौ वन्दिगेहे निवासाच्चेतोजाड्ये सोऽवकाशोऽस्ति विघ्नः ।
किं कर्तव्यं चागतेनात्र बाह्यक्षेत्रे चेति प्रश्न आसीत्कठोरः ।।२।।
संकोचेनास्योत्तरे कोऽपि हर्षः प्रक्षीणो मे यः क्षणायैव जातः ।
दीर्घात्कालाद् दान्तया कर्मशीलवृत्त्योन्मग्नोऽऽस्म्युत्सुकोऽस्मान्निरीतुम् ३
वर्षस्यान्तर्दुःखदं व्याकुलत्वाधानं चैकं वृत्तमभ्यागतं माम् ।
जे. एम्. सेनो मृत्युनाकस्मिकेनाच्छिन्नो हस्तान्नैकवर्षैकसार्थः ।।४।।
कैम्ब्रिज्स्कूलेऽधीतिकालात्स मित्रं तत्रैवाभूत् तेन मे दृष्टियोगः ।
प्राप्ते मय्यत्र प्रवेशं स धीमान् प्राप्तोपाधिर्निर्गतोऽभूदितश्च ।। ५ ।।
दृग्बन्धेऽभूत्सेनगुप्तस्य मृत्युर्द्वात्रिंशेऽब्दे यर्हि यूरोपतोऽसौ ।
प्रत्यायातो भारते तर्हि मुम्बापुर्यां पोते राजवन्दित्वमेतः ।।६।।
तस्मात्कालात्स स्थितो दृष्टिबन्धे स्वास्थ्यं चाभूद् दुःस्थितं तस्य तावत् ।
शिष्टिस्तस्मै भूरिसौविध्यमाधात् व्याधेर्वेगं रोद्धमेषा न शक्ता ।।७।।
तस्यान्त्येष्टौ कालिकातानगर्यां तत्सम्माने भूरि सन्दर्शनानि ।
आयोज्यन्ताभासतैवं च कश्चिदात्मा कष्टान्मुक्तिमाप्तश्चिरत्नात् ।।८।।
प्रावात्सीच्छ्रीसेनगुप्तस्तदेत्थंमन्यो वन्दी श्रीसुभाषस्तदानीम् ।
स्वास्थ्यं तस्याप्यास्त नष्टं तु वर्षैर्दृग्बन्धेऽस्मिन् स्थापितस्य प्रशिष्ट्या ९
अन्ते शिष्टिस्तं चिकित्साप्रलिप्सुं यूरोपायान्वादिशत्तर्हि यातुम् ।
तत्रैवासीद्रोगशय्याधिरूढो यूरोपेऽस्मिन् विट्ठलः श्रीपटेलः ।।१०।।
अन्ये नैके वन्दितायां बहिश्च भूयश्चेष्टा वेष्टिताः स्वास्थ्यनाशात् ।
श्रान्ताः क्लान्ता दुर्बलाः क्षीणकाया आसंश्चान्ये मृत्युना संगृहीताः ।।११।।

भूयो लोका बाह्यदृष्ट्या न खिन्नाः कारागारे बन्दिवद् वर्तमानाः ।
मस्तिष्कस्याप्यावृता रोषवेगैर्नम्यं वाप्यव्यवस्थामवापुः ।। १२ ।।
मृत्युः सोऽयं सेनगुप्तस्य साक्षात् कृत्स्नं देशं मौनकष्टेऽक्षिपत्तम् ।
जातश्चासं वै निराशोऽत्युदासः कस्मै सर्वं प्राप्तमासीत्किमर्थम् ।।१३।।
स्वास्थ्ये चाहं भाग्यवानस्मि नूनं कांग्रेसीयान् कार्यभारान् वहामि ।
तैश्च श्रान्तोऽप्यस्म्ययुक्तासुवृत्तिः सन्नप्यासं स्वास्थ्यदृष्ट्या वरोऽहम्१४
मद्ध्यानेनास्यास्ति हेतुः किलाहं हृष्टः पुष्टो जन्मनैवाभवं यत् ।
अन्यच्चाहं देहमालोकयामि रोगात्कार्श्याद्बाल्यतोऽहं जुगुप्से ।।१४।।
व्यायामैः सामान्यभोजैश्च शुद्धैर्वा तैर्जुष्टैर्मत्स्वभावस्तथाभूत् ।
कार्श्यस्थौल्याभ्यामभूवं स मुक्तो हिन्दुस्थाने भोजदोषेण रोगाः ।।१५।।
मध्ये वर्गे ते विशेषाद्भवन्तीत्यास्ते स्वीया मेऽनुभूतिः प्रतीतिः ।
पक्वान्नानि प्रास्तमात्राणि भुक्त्वा रोगानर्जन्त्येव तेऽपव्ययेन ।।१६।।
स्नेहोद्रेकान्मातरो बालकेभ्यो मिष्टान्नं वा प्रेष्ठवस्तूनि दत्त्वा ।
मात्राधिक्याऽऽभोजनस्याग्रहेणाभ्यासं तेषां दूषयन्त्यायुरन्तम् ।।१७।।
मूलं तेनाजीर्णताया विरोप्यास्वास्थ्यं तेषां कल्पयन्त्यल्पमायुः ।
किञ्चैतेषां भूरिवस्त्राणि देहेष्वाधाप्यैता घ्नन्ति तत्स्वास्थ्यमेवम् ।। १८।।
हिन्दुस्थाने भुञ्जते तेऽङ्गरेजा मात्रामुल्लङ्घ्येह पक्वान्नभिन्नम् ।
स्यात्संस्कारस्तैः कृतः पूर्वपुम्भ्यो ये तेऽत्युष्णं भुञ्जतेऽथो गरिष्ठम् ।।१९।।
स्वादाधीनान् भोजनस्य प्रयोगान् कुर्वाणानां दिश्यकार्षं न ध्यानम् ।
पक्वान्नेभ्योऽत्रातिमात्राशनाच्चैवात्मानं स्वं रक्षयन्नस्म्यभूवम् ।।२०।।
काश्मीराणां विप्रवंशोद्भवानां कौटुम्बानां मांसभोजे प्रवृत्तिः ।
अस्माकं चाप्यन्वगात्सा कुटुम्बं बाल्ये मांसं भुक्तवान्नातिरुच्या ।।२१।।
विंशे वर्षे मांसमत्याक्षमेषः शाकाहारी चाभवं युध्यमानः ।
षड्वर्षान्तेऽगान्तु यूरोपदेशं मांसं तत्राश्नां पुनर्न स्वदेशे ।।२२।।
अत्रायातः प्रायशः शाकभोजी मांसाहारो मेऽनुकूलोऽस्ति सम्यक् ।
तस्मिञ्जाता चारुचिश्चारु नाभात् तस्याहारे मानसं स्यात्कठोरम् ।२३।
द्वात्रिंशेऽब्दे रोगकाले स्वकीये यर्ह्यक्राम्यन्मां स नित्यं ज्वरांशः ।
क्षुभ्यामि स्म स्वास्थ्यगर्वस्तदानीमाघातं हि प्राप्तवांश्चाऽत्र चित्ते ।२४।।

शक्तिस्फूर्ती स्तोऽनिशं मय्यसीमे स्वस्या अस्या धारणाया विरुद्धम् ।
मन्दं मन्दं स्वास्थ्यमेतन्मदीयम् शोचामिस्म क्षीयमाणं क्रमेण ।।२५।।
ग्लायामि म्लायामि चाऽनेन भीतो मन्ये नाहं मृत्युतो भीतिमाच्छेम् ।
आसीदावश्यातिरिक्तं भयं चारोग्यप्राप्तौ किंतु साफल्यमापम् ।।२६।।
देहे प्राप्तः पूर्ववच्चाधिकारं शैत्ये भूयश्चातपासेवनेन ।
स्वस्थम्मन्ये स्वस्थमानी तथाऽऽसं कोटैः शालैश्चावृते मित्रवर्गे ।।२७।।
कारागारेऽप्यातपं सेवमानो ग्रीष्मानन्दं प्राप्तवान् मुक्तगात्रः ।
एतच्छैत्ये भारतेऽप्युत्तरेऽस्मिन् संभाव्यं स्यान्नातितेजस्वि घर्मम् ।।२८।।
स्वव्यायामेष्वेष शीर्षासनेऽहं प्राप्तानन्दस्तद्वरं मन्यमानः ।
काये चित्ते चानुकूलं प्रभावं दृष्ट्वा तस्मै सस्पृहः सर्वदाऽऽसम् ।।२९।।
स्वास्थ्यं प्रीणाति स्म तन्मे विनोदपूर्णत्वेनाधाय तत्सक्षमत्वम् ।
येनाजीवञ्जीवनस्यातिचित्रेऽवस्थानेऽहं हृष्टपुष्टः प्रसन्नः ।।३०।।
कारागारे जीवने सन्त्युदासीनत्वस्यैते ये क्षणास्तेऽनिवार्याः ।
तन्नैराश्ये स्वस्थताऽस्वस्थतायाञ्चैषा साह्यं मेऽददात्स्वानुभूतिः ।।३१।
कारागारे वा वहिर्वर्तमानावस्थास्वात्मानं सदैवानुरूपम् ।
चेष्टास्तिस्त्रःकर्तु मासन् सहाया व्यायामश्च स्वस्थता चाभिमानः ।३२।
हृद्घाता मे नैकदा चानुभूता यैरेषोऽहं व्याकुलोऽत्यन्तमासम् ।
किन्त्वाश्चर्यं यत्किलाशाधिकेन शीघ्रत्वेनाहं सदा स्वस्थ आसम् ।।३३।।
मन्ये मूलस्याप्यथो संयतस्य, नैजस्वास्थ्यस्य प्रमाणं ममेदम् ।
प्राप्तः कष्टं नो शिरोवेदनायास्तन्नौन्निद्र्यं जातु मां बाधतेस्म ।।३४।।
सम्यक्त्वस्यास्या रुजो नेत्ररोगात् चैवाभूवं रक्षितो यद्विशेषात् ।
कारागारे मन्दमन्दे प्रकाशेऽप्याधीयानोऽहं लिखंश्चाप्यवर्ते ।।३५।।
वीते वर्षे द्राक्तरः कोऽपि दृष्टः शक्तावाश्चर्यं ममास्यामकार्षीत् ।
यद्यप्यष्टाब्दात्पुरासावगादीद्धार्यं स्यान्मे तूपनेत्रं द्विवर्षात् ।।३६।।
तस्यैषा सा भाविदृष्टिर्भविष्यद्वाणी वा सा सर्वथाभूदसत्या ।
अद्याप्येषोऽहं विनैवोपनेत्रं कार्यं सर्वं चाक्षुषं निर्वहामि ।।३७।।
यद्यप्येतैः संयमी स्वस्थ इत्यादीनां कीर्तिं प्राप्तुमर्हामि लोके ।
किन्त्वेषा मे वर्तते वै विवक्षा तस्या विभ्यद्वर्तते मानसं मे ।।३८।।

ये गम्भीरीभूय तिष्ठन्ति नित्यं येषामास्ये चैकमुद्रैव दृश्या ।
तस्यां कश्चिद् दृश्यते नो विकारो हर्षे शोके वा परीवृत्तिरूपः ।।३९।।

कारागारान्मुक्तिरासीत्प्रतीक्ष्या नम्रो भङ्गो व्यक्तिगोऽसौ प्रवृत्तः ।
गान्धिः पूर्वं प्रस्तुवीत प्रतीकमित्याधारः कल्पितोऽभूत्क्रमस्य ।।४०।।

शिष्ट्यै दत्त्वा सूचनामेष गान्धिराद्येऽगस्ते गौर्जरेषु प्रचारम् ।
कर्तुं यातः कृष्टिकारिष्वमीषु प्रारभ्योऽयं नम्रभङ्गः पुरेति ।।४१।।

तत्कालं तन्निग्रहोऽकारि शिष्ट्या वर्षस्यैकस्यैष बन्दीकृतोऽभूत् ।
भूयश्चायं यर्वदाबन्दिगेहे स्वीये कोष्ठे प्रेषितोऽभूत्तदानीम् ।।४२।।

हर्षोऽभून्मे यत्स कारां प्रविष्टः किन्तूद्भूता नूतनैका समस्या ।
कारागाराद्गान्धिरैच्छत्तदेव सौविध्यं यत्प्राप्तपूर्वं किलासीत् ।।४३।।

तत्प्राप्यैषोपक्रमं हारिजन्यकार्यस्यात्राधातुमैच्छत्पुनश्च ।
शिष्टिस्तस्मै तन्न दातुं तदैच्छत् गान्धिर्भूयश्चोपवासेऽवतीर्णः ।।४४।।

अस्मै यत्नायास्ति लक्ष्यं लघीयः खल्वेतच्च प्रत्यभान्नस्तदानीम् ।
तन्निर्णीतेर्मर्म वेत्तुं समर्थो नैवाभूवं स्यात्स युक्तोऽस्य तर्कः ।। ४५ ।।

किञ्चित्कर्तुं चासमर्था वयं तत् सर्वं पश्यन्तः स्थिता विस्मिताश्च ।
सप्ताहान्ते चोपवासस्य तस्य स्वास्थ्यं वेगात्क्षीयमाणं तदाभात् ।।४६।।

रुग्णागारे प्रेषितोऽभूत्स बन्दी सौविध्यं दातुं न शिष्टिर्नताऽभूत् ।
त्यक्ताऽभूच्छ्रीगान्धिना जीवनाशा यास्मिम् पूर्वेषूपवासेस्वतिष्ठत् ।४७।

स्वास्थ्यं स्वीयं क्षीयमाणं च सोढ्वा नेदिष्ठोऽभूज्जीवनान्तस्य गान्धि :।
पार्श्वस्थेभ्यः स प्रयाणानुमत्यं प्राप्याकार्षीद्वस्तुदानव्यवस्थाम् ।।४३।।

तेषां किञ्चित्सेविकाभ्यः प्रदत्तं शिष्टिर्नैच्छन्मृत्युदोषं तु वोढुम् ।
तस्मात्तस्मिन्नेव सायं स मुक्तो भूयश्चायं मुक्तिमाप्नोत्तदानीम्।।४९।।

एको घस्रश्चेद् व्यतीतोऽभविष्यत् नूनं गान्धिस्तर्ह्यतीतोऽभविष्यत् ।
गान्धिप्राणत्राणकार्यं तदानीं श्री सी.एफ्.एण्ड्रूजएष त्वकार्षीत् ।।५०।।

तं श्रीगान्धिर्भारतेऽभ्येतुमुत्कं यद्यप्यासीत्साग्रहं वै निषेधन् ।
किन्त्वीदृक्षे भीतिदायिप्रसङ्गेऽसावुल्लङ्घ्यादेशमत्रागतोऽभूत् ।।५१।।

अस्मिन् काले देहरादूनकारागारे पर्यावर्तितोऽभूवमेषः ।
अन्येष्वेषु न्युष्य सार्धैकवर्षात् नैनीकारागारमायां पुनश्च ॥५२॥

तस्मिन्नेवानेहसि स्वीयमातृ रोगाक्रान्ति रोगिसद्मागतिञ्च ।
श्रुत्वा मुक्तो वन्दिगेहादभूवम् मातुर्गम्भीरां स्थितिं ज्ञातवद्भिः ॥५३॥

सामान्येन द्वादशाहानि नीत्वा मुक्तिं प्राप्स्यं दण्डकालव्ययेन ।
प्रान्तीयासौ शिष्टिरेवं ममात्रानुग्राह्यत्वं स्थापयित्वाऽजयन्माम् ॥५४॥

संस्कृतविमर्शाङ्केषु केचिद्यस्य साहित्यिकनिबन्धा
मुद्रिता रत्नाकरेऽभूवंश्च नानाशीर्षकास्ते ।
तेन कविना क्लृप्तनेहरु चरितकाव्ये लम्भितोऽन्तं
सर्गं एष किलोनपञ्चाशो महादण्डावसानः ॥

श्रीगान्धिमिलनम्

वैश्वदेवी

पञ्चाशः सर्गः

कारागाराद्वै मुक्तिमाप्तः स्वमातू रुग्णावस्थाया वेदनाद्वेदनार्तः।
शीघ्रं यातोऽहं लक्ष्मणाख्यानपुर्यां तच्छय्योपान्ते कञ्चिदाश्वासमापम्॥१॥
मातुः पार्श्वेऽहं वासरान् कांश्चिदेवातिष्ठं, चित्ते चाचिन्तयं दीर्घकालात्।
कारागाराद्यन्निर्गतो बाह्यमायां तेनाराद्दूरात् सर्वमायाति नूत्नम् ॥२॥
अज्ञाताभासे भिन्नवद् वर्तमानो तस्मिन्नुद्देशे चान्वभूवं यदत्र।
तेनाघातो मे हृद्यभूदद्य चापि प्रायः सोऽयं मे पूर्वमप्यस्ति सोढः ॥३॥
कारागारावासान्तरे विश्वमेतत् स्वाभाविक्यापि प्रस्थितं स्वैरगत्या।
भूयोऽग्रे यातं तत्परीवर्त्तमानं बाला वाचाला वर्धमानाः स्वरूपात् ॥४॥
उत्पत्तीनां वोद्वाह-संयोजनानां मृत्यूनां चैवानेकशः कारणेभ्यः।
क्वापि प्रेमेदं क्वापि चेयं जुगुप्सा कर्माणि क्रीडा क्वापि दुःखं सुखं वा ॥५॥
सर्वं चैवेदं वर्तमानं तदासीत्किञ्चिन्नूत्नं वा किञ्चिदासीत्पुरावत्।
सर्वैस्तै र्भावैः संचरद्भिर्जनस्य चित्ते काचित्सा जन्यते जीवितेच्छा ॥६।
वार्तालापार्थे चाद्य नूत्ना विशेषा यद्यत्पश्यामि स्माथ वा यच्छृणोमि।
तस्मिन् सर्वस्मिन् मे किलाश्चर्यमासीत् मुक्त्वा मां खाते जीवनस्यैत्सी पोतः६
नायं भावो मे हर्षकारी किलाभूत् प्राभूवं नैतां संस्थितिं प्रत्यनूकः।
कर्तुं त्वेवं न प्रेरणा कापि जाता कारागारात्तां प्राप्तवानस्मि वेलाम् ॥७॥
इत्येतस्यां किं न भ्रमेयं बहिश्चेत्येष प्रश्नो मे मानसे प्रोद्गतोऽभूत्।
शीघ्रं भूयोऽहं वन्दिभावं श्रयिष्ये तस्मादस्मान्मे स्थानतः प्रस्थितिः स्यात् ।८।
हिन्दुस्थानं नः शान्तमासीदिदानीं दान्तं शिष्ट्यैतद् राजनैतिक्यदृष्ट्या।
सर्वा सा सर्वाधारभूता प्रवृत्तिर्ब्रैटिश्या शिष्टया यन्त्रितासीत्समन्तात् ॥९॥
नीयन्ते स्मास्मिन् निग्रहं जातु लोकाः तूष्णीम्भावोऽयं भारतेऽधान्महत्त्वम्।
सोऽयं हि श्रान्तेर्दम्यमानस्य जाता यत्रैतद्वाचं दान्तिकृन्नो शृणोति ॥१०॥

कृत्स्नोऽसौ देशो राज्यमादर्शभूतं पारुष्याधिक्यात्पूरुषाणां किलासीत् ।
तत्पारुष्यं वा पौरुषं वात्र राज्ये सर्वव्याप्ति स्वां सर्वकर्मस्वथानक् ॥११॥
प्रत्यक्षत्वेनादृश्यते कार्यजातं यत्तच्छिष्टोच्छां नानुवर्तेत किञ्चित् ।
कृत्स्नेऽस्मिन्देशे गुप्तचाराश्च भूत्वा भूयः सङ्ख्याका व्याप्नुवन्तिस्म सर्वम् ॥
सामान्येनाभूत्सर्वतः कापि शङ्काऽऽतङ्को वा कश्चित्साहसाभावजन्यः ।
किंचिद्वा कार्यं राजनैतिक्यमत्र ग्रामे प्राधान्याद्दृश्यते स्म क्षणेन ॥१३॥
तास्ताः प्रान्तीयाः शिष्टयः पालिकाश्च स्थानीयांस्तांश्चानुसन्धाय लोकान् ।
तान् कांग्रेसीयान् निर्गमय्यैव शेमुर्नम्रे भङ्गे ये वन्दिगेहे प्रविष्टाः ॥१४॥
नासन्योग्यास्ते पालिकापाठशालास्वेतासु च्छात्राध्यापने वान्यकार्ये ।
ओजः संपातः पालिकाद्यासु भूयो जातश्चैतासां भर्त्सनाश्चाक्रियन्त ॥१५॥
कांग्रेसीयाश्चेन्नाशु निष्कारिताः स्युः शिष्टेः साह्यं न प्राप्तमेतत्तदा स्यात् ।
अस्याः शक्तेश्च प्राकटी कालिकाताकार्यप्रेषण्योदाहृतौ दृश्यते स्म ॥१६॥
मन्ये शिष्ट्यान्ते कल्पितं तद्विधानं कार्यप्रेषण्या योजनीया न ते स्युः ।
दण्डः काराया राजनैतिक्यहेतोर्यैर्यैर्भुक्तः स्यात्कुत्रचिद्वा कदाचित् ॥१७॥
शर्मण्ये नाजीयातिचारैः प्रभावोऽस्मद्देशे ब्रैटिश्याधिकारिष्वकारि ।
हिन्दुस्थाने तैर्यत्कृतं तत्समग्रौचित्याख्यानस्योपस्थितं कारणं यत् ॥१८॥
"तैः सौजन्यस्याभिमानेन साकमस्माकं सन्दर्श्यं किलेतत्तदासीत् ।
नाजीयानां चेच्छासनं भारते स्यात् युष्माकं वृत्तं तर्हि दौर्गत्ययुक् स्यात् ।१९
एतन्निर्णेतुं नाहमस्म्यत्र शक्तो वीते पञ्चाब्दे किं किमत्रास्ति जातम् ।
तद्वृत्तान्तानां नास्ति मे सङ्ग्रहोऽत्र नो नाजीयानामस्ति चाप्यत्र वृत्तम् २०
हिन्दुस्थाने च ब्रैटिशो शिष्टिरेषा नोतावस्थां वै विश्वसित्यस्ति सत्यम् ।
वामे हस्ते यत्पुण्यकर्मास्ति दक्षो हस्तस्तन्नास्मिन् वेत्तु लोके किलेति ॥२१॥
अस्माद्धेतोर्निष्पक्षशोधस्य नित्यं ब्रैटिश्या शिष्टया स्वीकृतिर्न प्रदत्ता ।
यद्यप्येतादृक्शोधकार्यं सदैव शिष्टेः पक्षं स्यात्पुष्यदित्यस्ति सत्यम् ॥२२॥
मन्ये चाङ्ग्रेजास्ते जुगुप्सन्ति नाजीवादत्याचारादथो बर्बरत्वात् ।
गर्वेणात्मानं वर्बरं मन्यमानास्ते नाजीवादा नौपमेयाः समं तैः ॥२३॥
एते किञ्चिच्चेद् बार्बरं कर्म कुर्युःपश्चात्ते लज्जामप्यमुष्माद् भजन्ते ।
शर्मण्यान् वाङ्ग्रेजांस्तथा भारतीया नध्यास्ते सभ्यत्वस्य वृत्तिः सुसूक्ष्मा।२४।

रूढे रोषे त्वेषा भज्यते चैतदन्तर्व्यक्तं रूपं नस्तद्भवत्यत्र गोप्यम् ।
घोरैर्युद्धैस्तन्मानवत्वं पशुत्वे पर्यस्तं शर्मण्यैश्च सन्धौ कृतेऽपि ।।२५।।
अस्माभिर्दृष्टं यत्स शर्मण्यदेशो घोराक्रान्त्या पर्यावृतो क्षुत्तृषार्तैः ।
हन्तव्योऽभूद्वासीद्धतो दृष्टमेतत् तत्राङ्ग्रेजः कोऽप्यन्बलेखीदिदं यत्—।।२६।।
'सोऽभूदेकः सर्वातिशायी निरर्थश्चात्याचारो घोरः पशुत्वप्रयुक्तः ।
स्यात्किञ्चिद् द्रष्टुं कस्यचिज्जातु तादृक् कर्तुं हेतोः कस्माच्चिदुद्यत्कदाचित् ।।
सप्ताष्टापञ्चाशे च जातानि वृत्तान्यद्याप्येतद्राष्ट्रं न विस्मर्तुमर्हं स्यात् ।
स्वार्थेषु भ्रश्यत्सूज्झिता सभ्यता स्यात् ध्वस्तं सौजन्यं चानृतं स्यात्प्रचार्यम् ।।
बार्वर्ये दान्तिः सा भवत्यत्र सर्वा विज्ञानोत्था शिष्टिर्विधानव्यवस्था ।
नायं व्यक्तेर्जातेः पुनर्दोष इत्युच्चैर्नीचैर्वा: तादृक्सर्वस्थितो तत्करोति।।२९।।
हिन्दुस्थानेऽधीने विदेशस्य देशे शिष्टेः शक्तेरग्रे भवत्याह्वानम् ।
काले काले चैतत्स्फुटं स्याच्च तीव्रं शिष्टौ सेनादोषा गुणाश्चापि ते स्युः३०।
वीताब्दानां मध्ये पुनर्दृश्यमानान्यासन्दृश्यान्येषां गुणानां दुषाञ्च ।
अस्माकं ह्याह्वानं कृतार्थं च तीव्रं किन्त्वस्मिन् देशे तत्सदा नो विभाति।३१।।
साम्राज्यस्यास्य स्थापनायाः फलं तत् पक्षद्वन्द्वे पातो भवेद्भीषणीयः ।
दृश्यः स्पष्टं पक्षश्च सोऽन्यस्य सूक्ष्मस्यत्काले व्यक्तः तृतीयोऽपिपक्षः ।।३२।।
दौर्भाग्याद् द्वन्द्वं तदेतत्प्रसह्यम्, कारागारेऽत्युच्चाधिकारिप्रवाचः ।
संसत्स्वेषां प्रश्नोत्तरादीन्यश्रृण्वं शिष्टेः स्पष्टीकारं पठाम्येषयावत् ।। ३३ ।।
वीताब्दत्रय्यां दृष्टमासीत्तदेतद्व्यक्तीभूत स्तूर्ष्णी परीवर्त एषः ।
तेष्वासीद्दृद्धं भीतिभर्त्साविधानं स्वामीव स्म ब्रूते स्वदासान्यथा नः ।।३४।।
अत्र ध्येयः कश्चिन्निदर्शोऽस्ति बङ्गेष्वायुक्तस्य प्रोक्तौ दुरुक्तः स घोषः ।
यद्भावोऽभूदेते करिष्याम इच्छां यां यां सा व्यक्ता स्यात्कृतौ सर्वदा नः ।।३५।।

'पराजितानां नाशोऽस्तु जयिनः स्याम सर्वदा ।
स्वेच्छया सर्वकार्याणि वयं कुर्वीमहीति च ।।३६।।

एतादृक्षान्घोषानमी कुर्वते स्म प्रायः शिष्टेर्लोकाः क्वचिच्चेतरेऽपि ।
यूरोपीया बङ्गे विशेषादशिष्टेः शिष्टेर्लोकेभ्योऽग्रे प्रवृद्धा वदन्ति ।।३७।।
तैर्व्याख्याने कार्ये मनोवृत्तिरेषा नास्तिक्यात्मा व्यक्ता दुराग्राहयुक्ता ।
तेभ्यः पूर्णा चैकोपमा पाशविक्या वृत्तेरास्ते नग्नाऽपराधिप्रतीपा ।।३८।।

तेषां शूलारोपो जगत्साक्ष्यभूतः सिन्धौ वर्धन्ते स्मापराधा यतोऽमी ।
आतङ्कं सर्वेष्वावरीतुं कृतं तत् तद्‌दृश्यं द्रष्टुं तैः कृता सौविधी च ।।३६।।
तच्चेदं द्रष्टुं ते गतास्तत्र नैके त्विथं शास्यै स्तेषां न संवेदनास्ति ।
कारागारान्मुक्तोऽहमध्यैषि राष्ट्रे देशावस्थामर्थान्नयाच्च प्रजाताम् ।।४०।।
तां दृष्ट्वा नोत्साहो मनागास्त चित्ते मित्राण्यासन्ये वन्दिगेहैष्वनेके ।
नव्या निग्राह्यास्ते भवन्तिस्म भूयो नूत्नाध्यादेशास्ते क्रियामन्वितास्तैः।४१।।
प्रत्यक्षो नाध्यक्षो लिखेदेष कस्मै गुप्तानां चाराणामयं नूनमधीक्षः ।
गुप्तेनैवाकार्षीत्स रूपेण कार्यं यस्याऽऽस्तित्वं कार्यं च न स्वीकृतं स्यात्।।४३।।
मन्मित्रं तन्नाम्नाऽलिखत्पत्रमेकं संकेतस्थाने सोऽलिखत्स्वं तथैतत् ।
तत्पत्रं स्वस्थानं गतं तेन पत्रे संस्कारं चैवाधात् रफी किद्वई सः ।।४४।।
नाहं कारागारे पुनर्गन्तुकामश्चित्तं पूर्णं तेनेदमासीच्च तृप्तम् ।
पूर्वं मातू रोगश्चिकित्स्योऽयमासीत् स्वास्थ्यं सा मन्दं मन्दमंप्नोतियावत् ।
स्वास्थ्यप्राप्तेर्मन्दत्वमेतत्त्वियद्यत् सा वर्षेणैकेना व्यमुञ्चत्स्वशय्याम् ।
उत्कश्चासं श्रीगान्धिमालोकितुं तं पुण्येऽमुञ्चद् यः स्वोपवासात्कृशत्वम् ।।
वर्षद्वन्द्वान्नापश्यमेनं महान्तं स्वप्रान्तस्यानेकान् सखीन्द्रष्टुंकामः ।
एतैः साकं तां राजनीतिं स्वदेश्यां संसारस्याप्येतां स्थितिं चर्चयेयम् ।।४७।।
मन्मस्तिष्कस्थांस्तान् विचारानमीषामग्रे न्यस्येयं कर्तुमेषां विमर्शम् ।
मन्वानोऽभूवं यद्विपत्तिं प्रतीदं विश्वं यावद्धावत्प्रयातीह वेगात् ।।४८।।
आर्थिक्येषाऽऽपद्राजनैतिक्यथैषा दूरे कार्या स्यात्केन यत्नेन शीघ्रम् ।
राष्ट्रीये वै कार्यक्रमे चिन्त्यमाने तत्प्रश्नध्यानं रक्षणीयं सदा नः ।।५०।।
इत्थं गूढानां चापि कार्यान्वियानां काचिच्चिन्ताऽऽसीत्सर्वथा सारणीया ।
नाद्यावध्याध्यातं किलैषां कृते यत् ताते याते स्वर्गं न तत्कार्यमैक्षि ।।५१।।
न्यूनत्वं नीतोऽस्माभिरात्मव्ययथोऽभूदास्माकीनायाः सोऽधिकोऽद्यापि शक्तेः।
किन्त्वस्मिन् गेहे स्थितैर्नैष हेयो न्यस्ता नैवासीन्मृत्तरिश्चापि गेहे ।।५२।।
तस्या अप्येते न व्ययस्यातिभारं वोढुं शक्ताः स्मः सा च हार्यास्ति शिष्टैः ।
एतैः कष्टैरर्थोद्भवैः साकमार्थं साहाय्यं प्राप्तुं पार्श्वमायाति पत्रम् ।।५३।।
तेन ध्यानं मे तद्दिशं यात्यथो मां मिथ्या मन्यन्ते दाक्षिणात्या धनिष्ठम् ।
मन्मुक्त्यन्तेऽभून्मत्स्वसुः कृष्णनाम्न्याः वाग्दानं तद्ध्यानादहं चिन्तयार्तः ५४

आस्तामुद्वाहः शीघ्रमेवेति शोचन् मा मे भूयो भूद् वन्दिगेहे प्रवेशः ।
कृष्णैकं वर्षं वन्दिभावं प्रपन्ना मासेभ्यः पूर्वं बन्दिगेहाद्विमुक्ता ।।५५।।
मातूरोगाद्वै मुक्तिमापद्य शीघ्रं श्रीगान्धेः पार्श्वं पुण्यमभ्यागतोऽहम् ।
अत्रैनं दृष्ट्वा तीव्रगत्या श्रयन्तं स्वास्थ्यं तत्कार्श्यं नाभवच्चिन्तनीयम्।५६।
दीर्घा दीर्घास्तास्तेन वार्ता अभूवन् स्पष्टं चैतद्यज्जीवने राजनीतौ ।
गान्धेर्दृष्टेर्मे भिद्यते चार्थशास्त्रे दृष्टिर्नैकस्मिन् सर्वकार्येषु भूयः ।।५७।।
आसं किन्त्वेषोऽहं कृतज्ञः किलास्य यो मे सान्निध्यं स्वीकरोतिस्म भूयः ।
औदार्येणासौ दृष्टिकोणं मदीयं स्वीकर्तुं सज्जोऽभूद्यथासम्भवं हि ।।५८।।
पत्रालापे नो यः प्रकाशं गतोऽभूत् मन्मस्तिष्कस्थ व्यापकाः केऽपि प्रश्नाः ।
प्राप्ताः पर्याप्तं वै विमर्शं तदासन् भाषा यद्यप्यासीत्स्फुटा नातिमात्रम् ।।
साक्षाद्दृश्योऽभूद्दृष्टिकोणस्य भेदः हर्षश्चाभून्मे घोषणातस्तु गान्धेः ।
दूरे कर्तव्याः स्थापितस्वार्थवन्तो भावव्यावृत्या नो बलस्य प्रयोगैः ।।६०।।
मन्ये चैवाहं हृत्परीवृत्तिरीतिर्गान्धेर्नम्रास्ते सद्विचारान्विता च ।
शक्तेश्चायोगः सद्विचारान्वितायास्तस्याभीष्टोऽस्तीत्यस्ति भूयान्न भेदः ६१।
तस्मिन्काले मे पूर्ववद् धारणासीत् सिद्धान्तेऽस्पष्टेऽयं विचारं न कुर्यात् ।
काण्डानां तर्कोत्थं परीणाममेषः पश्यन्नाभूलं तां परीवृत्तिमिच्छेत् ।।६२।।
नूनं व्यक्तिः सास्ते विचित्रैव काचिद् गान्धिः साधुर्वै मध्यकालीन एकः ।
कैथोलिक्शैलीकोऽस्ति सोऽयं किलेति श्रीवेर्या एल्विन् भाषते सत्यमेतत् ६३
किन्त्वेतेनायं व्यावहारिक्यनेताऽप्यास्ते हिन्दुस्थाने कृषीकर्मिविज्ञः ।
आपत्कालेऽसौ कां दिशं संश्रयेतेत्यास्ते नो वक्तुं शक्यमत्रेति सत्यम् ।।६४।।
किन्त्वेषा दिक् स्याद्यापि कापीह लोके तस्याः संश्रित्या स्यात्परीणाम एकः ।
अस्मद्दृष्ट्या सौ यातु मार्गेऽप्रशस्ते किन्तु प्रस्थानात्सोऽस्य सिध्येत साधुः ।।
साकं चैतेनासीत्सदा कर्मशोभाऽपेक्षायां भिन्नोऽध्वाश्रितः स्याज्जनेन ।
तस्यां वेलायां चिन्तितं तावदासीत् तावन्नाद्यैषः प्रश्न उत्थापनीयः ।।६६।।
राष्ट्रीये युद्धे स्मोऽन्तरेवातिभीष्मे नम्रो भङ्गोऽयं काङ्ग्रेसस्य कार्यम् ।
तस्यापि व्यक्त्यन्तः कृते कोऽपि सीमा कार्यं तत्स्वीयं प्रस्तुतं सेवनीयम् ।।६७।।
लोकानां मध्ये च प्रचार्या विचारा जाग्रत्काङ्ग्रेस्या बोधनीया विशेषात् ।
आधारस्तेषां स्यात्समाजैकवादो नीतेरुद्घोषोश्चास्तु काले स बुद्धः ।।६८।।

पर्याप्तं स्वं पादक्रमं वर्धयेमेत्युद्देश्यार्थं सज्जास्तदा स्याम सर्वे ।
कांग्रेसं चावैध: किलास्तेऽत्र संघ: ब्रैटिश्या: शिष्टेर्मर्दितुं तं प्रयत्न: ।।६९।।
साम्मुख्यं नास्या: स्यादथै वृथेति सर्वैरस्माभिर्यत्न आस्थेय एक: ।
गान्धेरग्रे याऽऽसीत्समस्या स्वबद्धा तेनेदानीं कार्यं किमित्यास्त प्रश्न: ।।७०।।
कारागारं चेदेष यातस्तदास्मितत्कार्ये सौविध्यं पुन: प्रार्थनीयम् ।
शिष्टिश्चैतद्दातुं नो मुहुर्युक्तिमीयात् श्रीगान्धिर्भूयश्चोपवासं श्रयेत ।।७१।।
तर्तिक सर्वस्यावृत्तिरेषा क्रमस्यास्यादर्या स्यान्मार्जारमूषावदेव: ।
नोतेरग्रेऽसौ नन्तुमासीन्न चोत्क: स स्म ब्रूते सौविध्यहेतोर्हि भूय: ।।७२।।
अस्यार्थोऽभूदाजीवनं तद्व्रतं स्यात् मार्गस्तस्यान्योऽभून्न भूयात्स बन्दि: ।
तत्कालं कार्यं हारिजन्यं च कुर्यात् साकं कांग्रेसेऽप्यस्य निर्देशनं स्यात् ।।७३।।
तार्तीयीकोऽध्वा तेन सन्दर्शितो मे कञ्चित्कालं संन्यस्य तत्काङ्ग्रेसम् ।
तच्चन्यस्येताद्योदितानां नवानां यूनां हस्ते ते चालयन्त्वेतदेवम् ।। ७४ ।।
आद्यो मार्गो नो कस्यचित्सम्मतोऽभूत् यत्र श्रीगान्धेर्निश्चितो जीवनान्त: ।
कांग्रेसे चावैधे तृतीयोऽपि नेष्ट: नम्रो भङ्गो वा युद्धमेतच्च रोध्यम् ।।७५।।
वैध्यां वृत्तौ प्रत्यागतं स्यादिदं च वैधं वा सत्तत् सर्वत: स्यात्पृथक् च ।
तादृक्काङ्ग्रेसं मर्दितं शासनेनात्यर्थं चास्मिन् किञ्चिद्दलं न प्रभु स्यात् ।७६।
तस्मात्त्यक्त्वाऽन्यं मार्गमेता द्वितीयं यद्यप्येषोऽभूद् भूयसां नोऽनभीष्ट: ।
अज्ञासिष्मास्मिन् नम्रभङ्गो हत: स्यात् नेतुर्निर्याणे को नु नेय: सृत: स्यात्७७
नान्य: पन्था: न: शिष्यते स्मेति मत्वा सर्वप्रश्नेभ्यो निर्गमाय श्रितोऽध्वा ।
श्रीगान्धिश्चाकार्षीदिमां घोषणां न:, साम्मत्यं नो प्राप्तं ह्युपायेन तेन ।७८।।
नायं कालो भङ्गं विहातुं यतोऽभूत्कार्यं किञ्चिच्चावश्यमान्दोलनं च ।
यत्किञ्चिच्च स्याद्ध्यानमायातु लोके सिद्धान्तानां सामाजिकानां किलेति ।
संसारस्यावस्थां विदन्त्वत्र लोका इत्यप्यासीदिष्टं ममातीव तर्हि ।
प्रत्यागच्छन्वै मोहमय्यामवात्सं सौभाग्यादासीदत्र सङ्गीतमूर्ति: ।।८०।।
श्रीमान् विख्यात: सोदय: शङ्करोऽयं नृत्यं तस्याहं तत्र चैवान्वपश्यम् ।
भूयानानन्दोऽलम्भि चातर्कितोऽयं वीताब्देभ्यो दूरे मनोरञ्जनेभ्य: ।।८१।।
संगीतान्नाटयाच्चित्रनाटयान्नभोवागादिभ्योऽहं मुक्तोऽस्मि कालात्प्रभूतात् ।
स्वच्छन्दोऽपि व्यस्तोऽस्मि कार्यान्तरेष्वद्यावध्येकं दृष्टं मया चित्रनाटयम् ८२

नामान्येवाहं चाभिनेत्रुत्तमानां जाने श्रुत्वा मे नाटचदृष्टेरभावः ।
जातः खेदायैवात्र तावद्विदेशे नूत्नानां नाटचानां गणं वा पठामि ।।८३।।
कारागाराद् बाह्येऽपि खेलावलोकप्रासङ्गो नासीन्मे भारतस्योत्तरांशे ।
कष्टादेतान् प्राप्तुं क्षमो, वेद्मि नाट्ये वङ्गैर्महाराष्टैः कृतं गौर्जरैश्च ।८४।।
हिन्दुस्थानीयैरङ्गमञ्चैरभद्रैः क्लृप्ता काचिन्नाभ्युन्नतिर्निष्कलैस्तु ।
अद्यत्वेऽहं तन्नैव जानामि, श्रुत्वा जाने हिन्दुस्थानीयनाट्येऽकलत्वम् ।।८५।।
तत्र प्रायः सङ्गीतमुख्या प्रवृत्तिर्गाथांशश्चैतेषां पुराणेतिहासात् ।
मन्ये तेष्वेतत्सर्वमेवास्ति क्लृप्तं यद्यत्सत्कार्यं तद्गतैर्नागरिक्यैः ।।८६ ।
अस्मिन् कुत्स्ये दुःखे प्रदृश्येऽत्र दृश्ये तत्तद्देशेष्वास्ते कलायां तु भेदः ।
नृत्ये ग्राम्ये नाट्ये तथा लोकगीते हिन्दुस्थानेऽस्मिन् तद्वरं वर्तमानात् ।।८७।।
बङ्गे गौर्जर्ये दाक्षिणात्येऽपि जातु स्यादानन्दोऽप्याश्चर्यमेतत्समीक्ष्य ।
ग्रामीणेष्वष्यास्ते कलाकौशलं तन्मूलादेवाज्ञानाभिमानादिहीनम् ।।८८।।
वृत्तं नास्त्येतन्मध्यवर्गस्य किन्तु मन्ये मूलात्तच्छिन्नवद् वर्ततेऽद्य ।
तत्पार्श्वे सौन्दर्यं कला वावशिष्टा पारम्पर्यं तद्विस्मृतं तेन मोहात् ।।८९।।
ते शर्मण्ये वाऽप्यास्ट्रियायां प्रक्लृप्तैर्बीभत्सैरौद्रैस्तै मूल्यैश्च चित्रैः ।
मन्यन्तेऽद्यत्वे काञ्चिदात्मप्रतिष्ठां रक्षन्त्येते चित्रं रवेर्वर्मणो वा ।।९०।।
संगीते वाद्यं हारिमौनं किलैषा माशासेऽहं तत्स्यात्स्वराज्ये निषिद्धम् ।
दुःखं चाभद्रं सत्कलाद्यावमानो गेहे सम्पन्नानां पुरे लक्ष्मणादौ ।।९१।।
तेषां पार्श्वे द्रव्यं च तद्दर्शनेच्छा चैवासाते ते दर्शयन्त्यात्मनस्तत् ।
गच्छन्त्येतान्ये ते तदिच्छाभिपूर्तेर्वैवश्यात् खिन्नाः साक्षिणः सम्भवन्ति।।९२।।
सम्प्रत्येवैषा जायतैका कलानां जागर्तिर्नेतृत्वे कुले ठाकुराणाम् ।
प्रातिभ्योद्रेकात्तत्प्रभावोऽखिलेऽस्मिन् कृत्स्ने देशे दृश्योऽस्ति दम्येऽपि शिष्टया
तेषां नानाबाधाबन्धनान्यद्य सन्ति प्रायश्चातङ्काश्चाभितस्तान् हरन्ति ।
एतादृश्यां वातावृतौ का कलायाः पूर्णनात्मा व्यक्तः स्वरूपेण लोके ।।९४।।
मुम्बापुर्यां मित्रैर्निजैर्मेलितोऽहं येषां सद्यः केचिद्विमुक्ता इदानीम् ।
तस्यां संख्यासीद् भूयसी वै समाजवादानां लोकानां न कांग्रेसिकानाम् ।९५।
ते कांग्रेसोच्चैर्वर्गवृत्तासु वार्तास्वत्यर्थं रोषे वर्तमानास्त्वभूवन् ।
दृष्टिं गान्धेराध्यात्मिकीं राजनीतौ संविष्टां वेदान्ते समालोचयन्ति ।।९६।।

भूयस्या साम्मत्यं ममाप्येतयासीत् किन्त्वासीत्स्पष्टा सम्मतिस्तत्र चेयम् ।
तत्कालावस्थायां हि नान्यस्तु पन्था आत्मीयं कार्यं नोऽनिवार्यं तदासीत् ।९७।।
भङ्गं प्रत्यानेतुं कृतेऽपि प्रयत्ने किञ्चित्सौविध्यं सिद्ध्यतिस्मैव नेदम् ।
शिष्टेराक्रान्तिः सा च नो रुध्यते स्म तस्यां रुद्धायां मान्यमासीन्मतं नः ।९८।
अस्याभिप्रायो यत्स तादृग्दशायां सर्वस्मिन् कालेऽवैधवद्घोषितः स्यात् ।
नम्रे भङ्गे रुद्धेऽपि चास्मिन्निदानीं प्रत्यावर्त्यं नान्दोलनं तत्कथञ्चित् ।९९।
नम्रे भङ्गेऽस्मिन्वर्तमानेऽपि भेदः कश्चिन्नापप्तद् वस्तुतोऽस्मत्कृतित्वे ।
सत्यं माहात्म्यं नैतिके नो विरोधे युद्धस्यान्तर्नूत्नानुचिन्ताप्रचारः ।।१००।।
तत्कालापेक्षायाः साध्वभूत्सौख्यसाध्यः संरुद्धे स्यात्तस्मिन्साहसक्षीणता हि ।
युद्धादन्यः पन्था अयं तावदासीत् ब्रैटिश्या शक्त्या साम्मनस्याय यत्नः १०१
तस्मै सा वृत्तिश्चेतसो धारणीया संसत्स्वेषा चैव प्रवृत्तिश्च वैधी ।
सासीदेकावस्था कठोरा, परन्तु स्वान्वेष्टव्यो नान्यो हि पन्थास्तदानीम् १०२
मित्राणां सङ्घर्षं पुनर्वेद्मि हार्दं साक्षात्तत्साम्मुख्यं करोति स्म हि प्राक् ।
किन्त्वन्यत्राप्तं भारते चापि लोकाः सामाजिक्या व्याजान्न ते कर्तुमैच्छन् ।
एतेन क्षोभो मे ऽलमेते स्वयं नो-किञ्चित्कर्तुं वाणांस्ते परेष्वाक्षिपन्ति ।
यः सर्वेकष्टं सोढमाधाय भारं तानेवैते ब्रूयुः प्रतीगामिनाम्ना ।।१०४।।
कुर्युश्चैवैतेषां समालोचनाञ्च त्वारामासन्धामासमाना इमे च ।
श्रीमद्गान्धौ वाग्वज्रमापातयन्ति सम्राजं भाषन्ते प्रतीगामिनां तम् ।।१०५।
तत्रैतादृश्यो युक्तयस्तैः प्रयुक्तास्तार्किक्या दृष्ट्या यत्र कश्चिन्न दोषः ।
साध्वी वार्ता त्वेषा प्रतीगामिनाम्नी व्यक्तिः सेयं हिन्दुस्थलं साधु वेत्ति १०६
तच्चावैत्येषो, भारतो मूर्तिमान् सन्, प्रायेणात्रत्यः कर्षकश्चाप्यवैति ।
सोऽयं हिन्दुस्थानं तथैवैरयच्च कश्चित्क्रान्तेः कर्ताऽशिवं नैजयद्यत् ।।१०७।।
गान्धेः सद्यो जातः स वै हारिजन्यः कार्यारम्भो मन्दं च मन्दं चलन्सः ।
हिन्दूदार्ढ्यस्यायं किलास्पन्द्यमूलं तन्मार्ग्यांस्तानुत्थापयामास रोद्धुम् ।।१०८।
गान्धिं चैते शत्रुं त्वमन्यन्त घोरं पूर्णेनैव प्रत्यादरेणोपयन्ति ।
पौल्यीं चैवात्मीयां श्रयाणश्च शक्तिं त्यक्त्वाऽऽसक्तिर्द्वयानेष तूर्णम् ।।१०९।।
स्वाभाविक्या शक्त्या तयोद्बोधयित्र्या सर्वं वारां वीचीभिराप्लाव्यतेऽदः ।
लक्षं लक्षं लोकान् प्रभावाभिभूतान् धत्ते क्रान्तेः कर्तॄन् प्रतीगामिनश्च ।११०।

हिन्दुस्थानस्यायं परीवृत्तवान् स्वं रूपं तद्वास्तव्येषूर्ध्वमात्माभिमानम् ।
अभ्युत्याप्याशेषं चरित्रात्मतेजःपूर्णं नित्यं भीतेषु बद्धाञ्जलीषु ॥११२॥

तेन श्रीमत्सु प्रेरिता चेतना सा, सा शक्तिश्चैवेषिता सर्वसाहा ।
विश्वस्यैषा क्लृप्ता समस्या स्वदेश्या दूरे रक्षित्वा भारतीयां स्वनीतिम्।११२

हिंसास्पर्शैर्मुक्तः स चासाह्ययोगः सोऽयं नम्रो भङ्गः परीणामयुक्तः ।
आध्यात्मिक्या दृष्टया पुनर्भारतीया न्यङ्गान्येतान्युक्तानि यद्राजनीतेः ११३।

सत्यञ्चैतद्धिन्दुस्थले विश्वविश्वे तस्या द्वैतीयीको वरोऽयं सशक्तः ।
हिन्दुस्थानस्यास्यस्थितेर्मुख्यरूपाद्युक्त्याभूदेकः सोऽतिमात्रोपयुक्तः ॥११४॥

मन्ये युक्तं चेदं समुत्साहनीयोऽस्माभिः सत्यालोचनावादवादः ।
यावन्तः स्वीयानां समस्याबलीनां कर्तुं शक्या यत्नास्तु ते सर्वजनीनाः ।११५॥

दौर्भाग्या गान्धेरत्र सर्वोपरित्वम् बाधा काचिज्जाता वयं तन्निर्भराः स्मः ।
सर्वा निर्णीतिश्चास्य हस्तेऽर्पिताऽऽस्ते दूष्यैवैषा वृत्तिश्च प्रवृत्तिश्च राष्ट्रे ११६

राष्ट्रस्योद्देश्यानां तथा साधनानां बुद्धया स्वीकारेऽग्रे गतिः संभवा स्यात् ।
तेषामाधारेणानुशिष्टिश्च योगे नान्धान्वाये संस्थापितेऽग्रे गतिः स्यात् ।११७

काचिद्व्यक्तिः स्यात्सा कियत्यत्र मान्या दूरे न स्थातव्यं बै तयाऽऽलोचनायाः
किन्त्वेषा नासूत क्वचिन्निष्क्रियत्वम् तस्मिन्नापन्ने स्यात्क्वचिद्दोषलेशः ११८

एतादृश्यश्चालोचनास्ताजनानां निन्दायाः पात्राण्येव कुर्युः समाजे ।
पश्यन्त्येते कार्यं परीक्षन्त आर्च्यं निन्दाशंसे नेत्रे न खल्वाश्रिते तैः ॥११९॥

साध्ये भाविस्वप्ने भवद्दुष्करस्य त्यागो न स्तुत्यः स्यादितीयं परीक्षा ।
स्यात्सोविध्यालम्बः स तत्कालमन्दः सिद्धान्तत्वेनास्मिञ्जगत्यस्त्वपार्थः १२०

हिन्दुस्थानीयैस्तैः समाजैकवादे तैः साहित्यादौद्योगिकात्साम्यवादे ।
उत्पाद्यन्ते स्वीया विचारा द्रुतत्वात् तैरास्थेयं मुम्बापुरे कालिकायाम् ॥

क्षेत्राण्येतान्याभिः श्रमाजीवितार्थान्यास्यन्ते यन्त्रागारपूर्णानि तानि ।
शेषे हिन्दुस्थाने कृषीजीविनोऽमी वर्तन्ते यैरास्तेऽन्वितैषा समस्या ॥१२२॥

राष्ट्रीयत्वं ह्यास्तेऽत्र मुख्या समस्या सा चान्या ग्रामीणव्यवस्था विशेषात् ।
यन्त्रागाराधारैः श्रमाजीविभिस्तु हिन्दुस्थानीया नान्वितास्ते समस्या ।१२३।

यूरोपीयः सोऽयं समाजैकवादः सम्बद्धो नैवास्ते भारतीयेन तेन ।
रूसे घोरादस्मात्तु युद्धाद्दशा प्रागेषाभूद्या हिन्दुस्थले तत्समाना ॥१२४॥
तत्राभूवस्तावन्न साधारणास्ता वार्तास्तादृश्यश्चापि भाव्याः परत्र ।
इत्याशा मूर्खत्वं तथाप्येष जाने तत्त्वज्ञानं पथ्यं भवेत्साम्यवादे ॥१२५॥
देशे देशे विश्लेषणेनास्य नूनं वस्तुस्थित्या बोधो भवेन्नः सुसाध्यः ।
पन्था विज्ञातः स्याच्च लक्ष्याभियाने तेनान्यायत्तस्यास्य सर्वत्र योगः ॥१२६॥
वस्तुस्थित्या बोधे ह्यवस्थाविवेके चक्षुः स्फारेणैवास्तु नः साम्यवादः ।
यद्वा तद्वापि स्यादहो जीवने नो नूनं दुःसाध्यास्ते कापि घोरा समस्या ।१२७।
सङ्घर्षैस्तत्रत्यैर्विरोधैरिहत्यैर्नैराश्यं यात्यद्धा नरो जातु लोके ।
नास्त्यत्राश्चर्यं यज्जनेष्वैकमत्यं न स्थेयात्तेषां स्यात्परीणामभेदः ॥१२८॥
यैः स्वं दौर्बल्यं वाक्यसिद्धान्तजालेऽत्युच्चेऽत्युच्चे गोपाय्यतेऽस्मिन् विशाले ।
आत्मानं सन्देहास्पदैर्वर्तनैर्यैः कारागाराद्रक्षत्यथालोचयन्नः ॥१२९॥
स्वस्मिन्कार्ये हानिः प्रवेशस्य लोकचित्ते काञ्चित्सम्भावनामादधाति ।
मुम्बापुर्यास्ते सा महत्येव यस्यां नानादेश्याः नानाविधाः सन्ति लोकाः १३०।
तत्राप्येको मुख्यो नागरो राजनीतेर्दृष्ट्या सामाजिक्या च धर्मार्थवत्या ।
मर्मोपेतं सर्वग्रहे व्यानगेष श्रान्तानां दक्षत्वं समाजैकवादी ॥१३१॥
राजन्यायां नीतौ स्थितो लोकतन्त्रे हिन्दूसंसच्चैनं परं मन्यते स्म ।
प्रत्नाः सर्वा रीतीः सदा रक्षितुं स प्रत्याजानाद् धर्म्याश्च सामाजिकीश्च १३२
संसच्चैषा तेषां न चर्चां प्रकुर्यादित्येतादृग्यत्नो मया धास्यते च ।
सोऽयं नेता निर्वाचने प्रातिनिध्यं धृत्वा प्राचीनत्वार्चकानामयासीत् ॥१३३॥
एतादृश्या नानाप्रवृत्त्या न श्रान्तः शक्तिं कांग्रेसालोचने स व्यतानीत् ।
श्रीगान्धिं चावादीत्स प्रत्यागमीति साह्याच्चान्येषां नव्यकांग्रेसमैच्छत् ॥१३४
देशे संस्थाप्या लोकतन्त्रीयगोष्ठी संपृक्ता नासील्लोकतन्त्रेण किञ्चित् ।
कांग्रेसे दोषारोपमेषा प्रकुर्यात् कांग्रेसं च स्याल्लोकतन्त्रीयमेतत् ॥१३५॥
अन्यत्रापि क्षेत्रेजिगीषुः कदाचित् श्रान्त्याजीवानां प्रातिनिध्यं बभार ।
जेनेवाश्रान्त्याजीवसम्मेलनेऽपि प्रास्तावीदात्मानं जनानां प्रवृत्त्यै ॥१३६॥
एषां चित्तेऽसौ जागृयात्सद्विचारः, सोऽयं हिन्दुत्वस्य प्रधानः प्रतीकः ।
हिन्दुस्ताने राष्ट्रप्रशिष्टौ प्रधानमन्त्रित्वाभ्यर्हां योग्यतामाप्तुकामः ॥१३७॥

एतावद्भिन्नानां च कार्यक्रमाणां प्रायः सा स्यादल्पैव लोकाऽनुभूतिः ।
आसन् कांग्रेसालोचकानामनेके तैर्भिन्ने क्षेत्रे यैः प्रयोगः कृतोभूत् ॥१३८॥

ये सर्वत्र स्वं वेशयन्ति पादं भिन्ने भिन्ने क्षेत्रे प्रयुंजत्यथैवम् ।
एतेष्वासन् नैके समाजैकवादास्तेषां सम्बन्धात्स प्रयातोऽपवादम् ॥१३९॥

कैशोरे येन स सकृदेवाक्षिलक्षीकृतोऽभू-
द्धस्ते हस्तं दधदिह महान् बालकानां क्रमेण ।
तेनाक्लृप्ते नवलचरितात्मन्यहो चारुकाव्ये
पञ्चाशोऽयं कलयति विरामं सुखार्थाय सर्गः ॥

उदाराणां दृष्टिकोणः

मृगेन्द्रमुखम्

एकपञ्चाशः सर्गः

मिलितुमहं गतवान् स पुण्यपुर्यां पितरमिमं किल राष्ट्रकस्य गान्धिम् ।
क्वचन च भारतसेवकैकसंघभवनमगां सहितस्तु तेन सायम् ॥१॥
समितिसदस्यगणोऽथ राजनीतेर्विषयगतान् विशयानपृच्छदेनम् ।
स च सहजानि तदुत्तराण्यदत्त परमिह मार्मिकप्रश्न एव नासीत् ॥२॥
इह समये न स श्रीनिवासशास्त्री न हृदयनाथक कुञ्जरुः समागात् ।
इतरसदस्यगणादिमौ बहुज्ञावपरविशिष्टसभासदः समायन् ॥३॥
वयमिह ये समुपस्थितास्तदानीं तदखिलमाकलयाम विस्मयेन ।
लघुघटनासु नितान्तमासु प्रश्नाः अधिदृढवायसरायगान्धिवार्ताम ॥४॥
विनयनिवेदनमत्र गान्धिक्लृप्तं अनुसृतवायसरायतन्निकारम् ।
इति विषये त्वभवंस्तदा यदाऽमी स्ववशिमसङ्गरमारभन्त देश्याः ॥५॥
शतमिह जातमवैधमास्त संस्थाः विविधसमस्यमभूज्जगत्क्षणेऽस्मिन् ।
इह समयेऽप्ययमेव प्रच्छनीयः किल विषयः समभादुदारकाणाम् ॥६॥
इह कृषका विषमात्प्रयान्ति कालाच्चलति मितार्घविशेष उद्यमेषु ।
धृतविभुभावमकर्मता समन्तात् प्रसरति यत्र स तत्र प्रश्न आसीत् ॥७॥
अथ घटना भयदाश्च भारतस्याद्यवयवकेषु समासु दिक्षु जाताः ।
दमनमिह प्रति वर्तते बिचार-प्रकटनसाधनलेखभाषणेषु ॥८॥
प्रखरतया घटनाक्रमश्च बङ्गे घटिततयोद्धियतेऽथ सीमप्रान्ते ।
इतरविधा अपि राष्ट्रियाः समस्या अवदधतान्तरराष्ट्रियाश्च बह्वीः ॥९॥
परमिह तुच्छतमासु तासु प्रश्नो मिलति स वायसरायमेष भूयः ।
परिणतिरस्य भविष्यतीह कीदृक् इयदवधौ परिसीमितः किलासीत् ॥१०॥
बहुजवतोऽन्वभवं यथास्मि कस्मिंश्चिदपि मठे किल धार्मिकेऽहमायाम् ।
यदधिवसन् सुचिरान्न बाह्यलोके कमपि ररक्ष निजान्वयं तु साक्षात् ॥११॥

पुनरपि मे सुहृदः क्रियापहास्ते नृपनयिका अभवन्नमीभिरेका।
समजनसेवन-त्यागसूचिरात्ता कतिपयमित्रयुतैरुदारसंज्ञैः ॥१२॥
सततमुदारगणस्य मेरुदण्डा ध्रुवमभवन्नितरे विचारमूढाः।
अविशदवाच इहाभवन्विचित्रा नृपनयिके हलने जिघृक्षवोंऽशम् ॥१३॥
कतिपयसभ्यजना विशेषतोऽमी समरचना मदराशिमोहमय्योः।
नृपपुरुषेषु च तेषु नैव भेदो दृशमयते स्म पुराप्रतीत्यभावात् ॥१४॥
इह परिपृच्छति यादृशं हि देशस्तदवधि तस्य नयज्ञता प्रतीता।
असफलतां प्रतिहेतुरस्य चायं न स कृतवान्हि निजं प्रतीह प्रश्नम् ॥१५॥
यदवधि संसदि सभ्यताविभागे स्वसमयशक्तिमतीर्विकारयामः।
यदवधि कल्पितसम्प्रदायनीतौ समितिशते कलयाम चात्र वादम् ॥१६॥
तदवधि तत्परतोऽनिवार्यप्रश्नो भवति न कोऽपि समाहितः स्वकाले।
तदवधि पश्चिमगाऽत्र राजनीतेः स्थितिरपि याति बहिः प्रकाशमेषा ॥१७॥
इदमिह गान्धिमपृच्छदत्र तस्मिन्नहनि स भारतसेवकैकसंघः।
तदपि तदीयमनोदशावभासः समभवदित्यवसीयते तथेयम् ॥१८॥
विदितमिदं भवति यन्न तेषां नृपनयिकाः समया न चार्थिकाश्च।
नहि विशदा दृगिहास्ति राजनीतिर्धनपतिसद्मसभागृहैकवस्तु ॥१९॥
भवति बुभुत्सितमेतदीयमेतत् यदधिकृतः प्रकटिष्यतीह भिन्नः।
किमिह च सौषकरिष्यतीह तेषां परगृहवृत्तविवेकि शौर्यमासीत् ॥२०॥
लिबरलपार्टिरितीह चाप्युदारपरिषदिति स्फुरदत्र वाचि नास्ते।
प्रकटयतीत्यथार्थिकीं तु नीतिं निजवशिमानमथापि व्यक्तिनिष्ठा ॥२१॥
नगरजनस्ववशित्ववर्तिनं तम् मुकुरसमं विमलं च वादमेतम्।
जनपदभेदकृतार्थभेददृष्ट्याङ्ग्लविषयेऽस्ति निरूपितस्तदर्थः ॥२२॥
निपुणमुदारकसंसदाविशुद्धा तदिह पुरा भवदार्थिकी हि रीतिः।
विपणनगं च वशित्वमाप्तुमेषां परिषदुदारविचारकैः प्रक्लृप्ता ॥२३॥
नृपतिगताधिकृतिर्यथेच्छमस्यां करनियमाच्च विमुक्तिदानतश्च।
नृपनयिक स्ववशित्व काङ्क्षिता वा जनयति तां नवलां बलिष्ठ नीतिम् ॥२४॥
परमिह भारतगाम्युदारवादे न किमपि तादृशमस्ति मुख्यमूलम्।
विपणनकर्मणि मुक्तिभाजि येषां क्वचन कदापि न कापि चास्ति नीतिः ॥२५॥

इह हि समैरपि काङ्क्ष्यते सुरक्षा विदितमिदं भुवि वर्तमानवृत्तैः ।
नगरजनस्ववशित्वमप्यमीषां दृशि न महत्त्वविशेषमादधाति ।।२६।।
शकलितमाण्डलिकत्वमेकतन्त्रं त्वनुसरतामिह राज्यसंज्ञकानाम् ।
गहनतमश्च पुनः स कोऽपि गन्धो विशदयतीह समर्थनं तदेषाम् ।।२७।।
इदमखिलं प्रतिपादयन्त्युदाराः भरतभुवस्तु युरोपतो विभिन्नाः ।
भरतभुवस्तदुदारवाद एष क्वचिदपि तत्परमार्थतोऽस्ति नायम् ।।२८।।
भवति च तत्परमार्थतः किमित्थं भरतभुवश्च भवन्त्यमी च के ते ।
इति कथनं कठिनं किलास्ति लोके नहि सुदृढोऽस्ति विचारसंश्रयोऽस्मिन् २९।
सति गणनाल्पतयापि दुर्बलत्वे प्रतिविदिताश्च पृथक्पृथङ् मिथोऽपि ।
अपि दृढतां प्रथयन्त्यमी निषेधे प्रतिपदमेषु विलोक्यते प्रमादः ।।३०।।
प्रयतनमादृतमेव तत्प्रमादात्तमवितुमाग्रहतः सदैव चैभिः ।
मनसि समाध्रियते नितान्तमाशा वयमिह सत्यमवाप्नुमः पुरैवम् ।।३१।।
अवितथमत्र परावधिद्वयान्तः प्रतिपदनिन्दनमेव धर्म एषाम् ।
भवति परावधिरेव निन्द्य एषां स्वमुपविदन्ति सुसन्तमेकनिष्ठम् ।।३२।।
इति विधिनाऽत्र विचारकष्टतः स्वं विरचनप्रस्तुतिदुःखतोऽप्यवन्ति ।
यदपि वदन्ति तदस्फुटं युरोपे न स फलितो धनसंचयप्रवादः ।।३३।।
अपितु स सङ्कटमाप्तवानिहास्ते परदिशि चस्ति खरः समाजवादः ।
प्रहरति हि स्वहितं समाहितं तन्मिलति पुरास्य समाधिना भविष्ये ।।३४।।
तदवनमेव ततो विधेयमेतैर्यदि धरणी चिपिटेति वास्ति गोला ।
इति कुरुते प्रविमर्शमाशु निन्दन्त्यभिदधते चतुरस्रलम्बगोलाम् ।।३५।।
लघु लघु वस्तुषु चोद्विजन्ति कृत्वा कलकलमाशु व्रजन्ति ते मुनित्वम् ।
अविदितमाविदितं च ते स्पृशन्ति ह्यनुसदुपायमवश्यमाश्रयन्ति ।।३६।।
विजयपराजययोर्न कोऽपि लाभो भवति च नान्वयमेति कश्चनान्तः ।
समितिरियं सविशेषनमूभाषा पुनरिह दृष्टिरियं च माडरेटी ।। ३७ ।।
न मनुमहे वयमप्युदारनाम्ना मृदुलमहस्विन एव ते भवन्ति ।
मृदुलमहस्वि मनोऽस्तु वन्दनीयं परमिदमस्ति न तावता गुणाढ्यम् ।।३८।।
गतमहतां मृदुवृत्तिदेशितं तद् भरतभुवीह न जात्वभून्महस्वि ।
मुखमिदमस्ति गुरुत्वधीरताढयं वचसि च लेखनके महोविहीनम् ।।३९।।

प्रियमिह नास्ति विनोदनं तदेकं ध्रुवमिह योऽस्त्वपवाद एव कश्चित् ।
भवति च तेजबहादुरः स सप्रू नंहि विरसो न विनोदहीन एषः ।।४०।।
स्वविषयके स विनोदमेति भागी रसमिह स स्वदते स्मिताभिभाषी ।
मिलितमुदारदलं तु मध्यवर्ग्यं स्वयमिह लीडरपत्रमस्ति मानम् ।।४१।।
प्रमुखमिदं यदुदारपत्रमास्ते गतशरदि स्वयमेव लेखमेतम् ।
प्रकटयतिस्म तदा तदात्मवृत्ति प्रथमतमे निजलेखमुद्रणे तत् ।।४२।।
इह महतैव जनेन तद्विवर्ते भुवि विनिपातितमस्ति दुःखगर्ते ।
इति भुवि मध्यमतास्ति सा प्रशस्या विशदमनोहररीतिराश्रितेयम् ।।४३।।
स्वयमिह तेन निजं ध्वजं विरोप्य स्फुटमिह मध्यमता स्तुता प्रशस्ता ।
इह मृदुताभयवञ्चनं त्वकस्माद् विनिमयतश्च निवर्तनस्पृहा सा ।।४४।।
जरसि गताः सुहृदोऽनिवारणीयास्तरुणिमनीह तरन्ति नैव शोभाम् ।
परमयमस्ति पुराण एव वृद्धः सहजतया सविशेष आविवेश ।।४५।।
क्वचन च तच्छिशवः कृशाः प्रजाताः मृदुलतमा अमहस्विनोऽतिवृद्धाः ।
सहि परिवर्तनशक्तिविप्रलब्धमृदुलदृशो भयमाभजन्ति तस्मात् ।।४६।।
इह च पुराणजगत्प्रयाति शान्ति यदि मतमस्य प्रदीयतेऽप्युदारैः ।
इह क्रियतां निजकर्म बुद्धिमत्त्वादिति न ततोऽन्तरमेति किञ्चनापि ।।४७।।
न खलु स रोद्धुमिहार्हति प्रवाहं न च मरुदुच्छ्वसनं न भूमिकायाम् ।
क्वचनहितोपदेश एषः स इव श्रिताभ्यु भवेदुपेक्षणीयः ।।४८।।
न किल पुराणतमास्तु धारणास्ता इह सुफलन्ति न वै विचारबाहाः ।
किमपि च कर्तुमिहास्ति नैव शक्तिस्तदियमुदारपरम्परास्ति खिन्ना ।।४९।।
क्वचन युरोपपरम्पराप्रसङ्गे कथितमभूदिह शुक्लशीर्षकेण ।
'इयमखिलापि परम्पराऽपतद्वै चिरधृतपूर्वविचारधारणायाम् ।।५०।।
अतिपरुषं किल जीवनं व्यतीयाद् बहुलपरिस्थितिकासु तासु भूयः ।
अधियदभूदिह जीवनस्य सृष्टिः प्रथमतयापि तदीयपूरुषाणाम् ।।५१।।
विगतपरिस्थितयोऽथ तद्भविष्ये निजबलतः किल तावतैव तासाम् ।
अभिनवसन्ततिवर्गश्रृङ्खलानां विरचयिता किल जीवनं समानाम् ।।५२।।
वयमिह मानवजातिकेतिहासप्रथमयुगेऽप्यवसाम-धारणेयम् ।
यदधि मृषा भवति प्रकामभावान्मृदुरियमस्ति हि शुक्लशीर्षमूला ।।५३।।

यद्वियमभूदहतैव धारणा नः श्रयति युरोपपरम्परापि रूढिम् ।
श्रयति हि नोऽपि परम्पराधिकैतां परमिह तां परिरक्षितास्म केन ॥५४॥

भुवि परिवर्तनकारि तद्युगं स्यात् तत इतिहास इमां न जातु पश्येत् ।
अपि विवशा वयमेतदीक्षमाणा निजपरियोजनवैफलीं मृशामः ॥५५॥

परशिरसि प्रविधारयाम दोषम् तदिदमयुक्तमिति स्म वक्ति ह्यूई:—
निजपरियोजनमात्मबुद्धिदोषाद् विफलितमेष न पश्यतीह मूढः ॥५६॥

अपितु परेण हि केनचिज्जनेन स्वयमवधाय कृतास्ति कर्मबाधा ।
असफल एष ततोऽभवत्प्रयत्नो निजगुणदर्शनमोह एष तस्य ॥५७॥

विनशनकारणमस्ति नो भ्रमोऽयं त्विह मनुजो मनुते परस्य दोषम् ।
इति भयदभ्रमबध्यतां गताः स्मो वयमिह सर्व इति प्रबोधनीयम् ॥५८॥

क्वचिदहमेतदचिन्तयं न गान्धिः स्वयमपि मुक्त इहास्ति भ्रान्तिदोषात् ।
परमिह कर्म करोत्यसौ वयं च किमपि किमप्यनुकुर्म एव तञ्च ॥५९॥

अपि च यतेमहि जीवनस्य सङ्क्रेऽप्यनुभवतस्त्रुटितोऽभ्रम प्रतीमः ।
क्वचिदथ च स्खलिता अपि स्वमार्गे प्रतिपदमग्रगतिं च तां श्रयामः ॥६०॥

परमिह दुःखमुदारवादसक्ता अनुदधतेऽधिकमेव सर्वतोऽस्मात् ।
किमपि हि कर्म न ते प्रमादभीतेः प्रविदधते स्खलनाभयान्न यान्ति ॥६१॥

न जनतया सह हार्दिकं च बन्धं रचयितुमन्तिकगा भवन्ति तस्याः ।
स्वमतिविमर्शविचारणप्रकोष्ठे कलितविमोहसमाश्रयाः स्वपन्ति ॥६२॥

प्रथममिहार्थदृशैष वर्षपूर्वं लिबरलवर्गमबोधयत्स शास्त्री ।
मुनिभिरिहैभिरहोपदार्थदृग्भिर्न हि सहनीयमिहोपजायमानम् ॥६३॥

तदवसरे प्रतिबोधमेतदासीत्ऋतममृतं तदिदं प्रतिश्रुतं स्यात् ।
परमिह किं कुरुते प्रशिष्टिरित्यामननकृते विधिबोध आदृतोऽभूत् ॥६४॥

विधिविषयो जनताकरे न सोऽभूत् तमिह सभा समितिश्च निर्मिमीते ।
लिबरलदुर्भगतेयमेवमासीत् प्रगतिपथेऽपि ततेऽक्रमन्त किञ्चित् ॥६५॥

प्रतिघटनं प्रतिरोधहीनमासीदबिभयुरात्मजनेभ्य एव चैते ।
परिहरणीय इहाभवत्प्रशिष्टचान्वय उत ते जनताऽन्वयं त्यजन्ति ॥६६॥

पुनरिह विस्मय एव कीदृशः स्यात् यदि निजदेशपदेऽभवन्नपूर्वाः ।
जगदिदमग्रगतं विहाय चैतान् समरगता जनताऽस्ति चात्रसंस्था ॥६७॥

न च भुवि कश्चन संशयोऽधुनासीदिह कमिमे पुनराश्रयन्त पक्षम् ।
यदपि विपक्षदिशं गताः किलास्मान् हितमुपदिश्य वदन्ति नैतिकत्वम् ।६८।
समितिषु गोलकपीठसंसदीमे निजसहयोगमदुस्तदा प्रशिष्ट्यै ।
निजहितमेव महत्त्वपूर्णमासीत् पुनरतिनैतिकताप्रकाशकञ्च ।।६९।।
यदि सहयोगमिमे न तर्ह्यदास्यन् महदिदमन्तरमापतिष्यदत्र ।
इदमवधेयमिहास्ति यत्सभायां ब्रिटिशनिजश्रमिकाः पृथक् स्थितास्ते ।७०।।
परमिह नासहताऽत्युदारताया नहि पृथगासत कैश्चिदर्थितास्ते ।
ब्रिटिशजनेऽपि तत्र नोपगन्तुं तदपि गता अभवन्नमी उदाराः ।।७१।।
वयमिह वै मृदवः खराः स्वलक्ष्याविचलतया किल सर्वदैव सर्वे ।
परमिदमन्तरमस्ति तत्र मात्राकृतमिति तेन वयं किलानुदाराः ।।७२।।
यदि विषमे विषयेऽस्मदीयचिन्ता जनयति तर्ह्यनुरूपभावनान्ताम् ।
क्वचन पराः क्वचनावरा भवामस्तदितरथा मृदवः सहिष्णवश्च ।।७३।।
पुनरिह दार्शनिकीं च सौम्यतां वा क्वचन यथार्थमुदास्यताप्रभावम् ।
अहमिह कांश्चन तान्मृदून्प्रदिष्टान् विरलतरांल्लिवरल्जनानपश्यम् ।।७४।।
यदि पुरतः कलयन्ति देशतोऽमी निजहितहेतुमुदस्यमानमत्र ।
किल मृदवोऽपि भवन्ति तीव्रमुग्रा अतिरुषिताः परुषाक्षरं ब्रुवाणाः ।।७५।।
मम सुहृदः किल तेऽद्य नासमानाः प्रतिनिधितामुपधारयन्ति काञ्चित् ।
सुबहुदिनानि प्रतीक्षितुं स्वराज्यं सुसहममीषु न ते तु तत् सहन्ते ।।७६।।
यदिह समाजगमूलगामि किञ्चिन्नहि परिवर्तनमाप्यते तदानीम् ।
क्वचन भवेत्क्रिमपीदृशं ततस्ते सपदि भवन्ति यथार्थतोऽत्युदाराः ।।७७।।
इह मृदुता परिसीमितास्ति तेषाम् निमित्तकृते, प्रतिवन्धिता किलाशा ।
यदि दृढमादरमत्र दर्शयामो यदि च वहाम पथाप्यनन्यगेन ।।७८।।
इदमपि चेच्चलतीह तच्चरित्रं शुभमिति तत्र पुरस्कृतो कदापि ।
श्रुतमपि मेऽस्त्विति चाशया महत्या ब्रिटिशदृशा परिद्रष्टुमेव बाध्याः।।७९।।
अपि शितपुस्तकमस्ति पाठ्यमेषां गहनतयार्ऽस्किनुमेंप्रणीतमेकम् ।
जनपरिग्रत्परिशीलनो पुनः सा किमपि च जीवनसङ्गिनीव तेषाम् ।।८०।।
नवविवृतिः किल रौषतर्कपात्रं भवतितरामथ चाऽङ्ग्लदेशतो ये ।
भरतभुवं पुनरागता उदाराः सितभवनस्थविभूतिकार्यजातम् ।।८१।।

अनुगमयन्ति रहस्यपूर्णवाक्यैः सितभवनं हि विकुण्ठधाम तेषाम् ।
प्रथमयुगे त्वमरीकनस्य मृत्यौ व्रजति स पंरिसमेतदीय आत्मा ॥८२॥
इति कथयन्ति पुरातने युगेऽद्य सुलिवरलात्मकृतेऽस्ति लक्ष्यमेतत् ।
सितभवनं तदुदारजोव एत्य परिक्रमतेऽस्य समन्ततश्चिराय ॥८३॥
इह लिखितं मयकास्त्युदारकाणां परमिदमस्त्यपि कांगरेसिकानाम् ।
प्रतिसहयोगिनि तद्विशेषभावात् परिघटते मृदुतागुणेऽस्त्युदारे ॥८४॥
सहि सहजः किल कांग्रेसिके वा सततमुदारमते जनेऽपि तुल्यः ।
प्रतिसजतां किल नो विभागरेखा भुवि विशदास्ति न चापि निश्चितास्ति ।
यदवधि तत्र विचारवोचिधारा प्रगतिपथातिगतेऽप्युदारपुंसि ।
मृदुतरकांग्रसिके च नास्ति भेदो भवति हि मार्गमदः स वै सुगन्धिः ॥८६॥
प्रतिजनमत्र च काङ्ग्रसेन क्लृप्तो जनपदतद्वसतिष्वसौ स मन्थः ।
प्रतिफलमत्र च धुन्धुलो तथा धोः श्रयति किलागततद्विचारधाराम् ।
परमिह गान्धिकृतज्ञकांगरेस्यस्थितिरिति तैरिह नूतनप्रतनबन्धः ॥८८॥
दलवपुषा प्रतिनिध्यतास्ति तेषां परिमृशतां क्रमशोऽत्र सन्नधीनाम् ।
न च सुलभं श्रवणं तदर्थवाचां जलजसमध्वनितस्य तस्य सर्वैः ॥९०॥
स्मृतिमुपयातमिहाङ्ग्लपद्यमेकम्-'इह विरला भुवि सन्ति भाग्यवन्तः ।
यदनुविलोकितमण्डमस्ति पिण्डे नवसुमनःस्वलोकयन्ति नाकम् ॥९१॥
सुनियमयन्ति तथाञ्जलावसोमम् चिरमवधि किल मिन्वते पलेन ।
प्रकृतिरहस्यगजोवनानुभूतेर्वयमिह भाग्यवशेन दूरसंस्थाः ॥९२॥
प्रकृतिकृतं स्वररम्यगीतमेकं श्रवणसमीपगतं तथा न श्रुत्वा ।
प्रकृतिकृतं मृदुकोमलं सुवर्णं प्रियमपि न स्पृशतां विधेर्वशान्नः ॥९३॥
प्रविगलितानि दिनानि तानि सद्यः परमधुना प्रकृतेरलं न दृष्टौ ।
प्रकृतिगदिव्य तयाक्षिणी न लग्ने मनुजगुरुत्वलघुत्वगेतिहासेतिहासे ॥९४॥
गुरु पुरुषुत्विदमन्तरङ्ग स्वप्नेषुमहति चान्तरिकोपसंप्लवे च ।
विफलतया सह तद्व्यथासु भूयो विपदयितासु च संमृषासु तासु ॥९५॥
परमपरत्र तदुज्ज्वले भविष्ये महिममयेषु किलाभिकांक्षितेषु ।
मनसि भृतासु चिरन्तनीषु चाशास्वपि प्रकृतेरनुदर्शनं प्रतीष्टम् ॥९६॥

इयमनुसन्धिरनेककष्टखेदान् व्यतरदिहानुपुरस्कृतिं तदीयाम् ।
इयनुसन्धिरुदाधरत्तथास्मान् निजजनिभूमितटस्थितेश्च तोच्छ्रयात् ।।९७।।
इह वहुभिर्न कृतः प्रयत्नलेशो प्रतिनिजमार्गगतेः पृथक् स्थितास्ते ।
भवति च कोऽपि न पारणीय मार्गश्चलितुमिहास्ति न पार्श्वगोऽथ तेषाम्।९८।
न खलु भवन्ति भावनाः समुच्चा न च कतरोऽपि प्रवर्तते प्रयत्नः ।
न समवयन्ति सुखेन वाच्यमर्थं प्रविहितवारसरूसराज्यक्रान्तेः ।।९९।।
चिरममिता दमितास्तथाभिलाषाः जटिलकठोरतरातितीव्रघाताः ।
उपजनयन्ति भयं तदन्तरङ्गे न समभवत्किल पारसीकदुर्गपातः ।।१००।।
इदमभिधीयत एव देशभक्तेर्नहि निविदा किल काङ्गरेसिकानाम् ।
मुहुरयमेव किलाभिवर्ततेऽस्मान् नहि नवलस्तु विशिष्यतेऽत्र शब्दः ।।१०१।।
इति मम श्रृण्वत एव दुःखमास्ते, अहमवयामि किलात्मने तदर्थम् ।
मनसि कृता क्षणकेन भावनापि न हि भुवि काङ्ग्रसिकेन केनचिद्वै ।।१०२।।
न विविशिषाधिकृताऽत्र पूर्णगेहे त्विह सत्यमहं सहर्षमेताम् ।
अभिलषतेऽत्र जनाय दातुमुत्कोऽप्यवसरवादिजनस्य वर्मभूताम् ।।१०३।।
इह सुखिने गतवित्तजीवनं चाप्यभिलषते पुरुषाय कर्मपृष्ठम् ।
प्रतिरुचि च प्रतिवर्गमानुकूल्यं वहति सदा प्रतिरूपमेतदीयम् ।।१०४।।
यदि च स 'जूडस' जीवितोऽभविष्यत् यतनममुष्य सुनाम्नि सोऽकरिष्यत् ।
परमधुना यदिहास्ति देशभक्तिर्नहि वयमभ्यधिकं ततो लषामः । १०५।।
नहि मृदुता स्वयमस्ति तद्धि वस्तु यदलमिहापि भवत्यदोहिताय ।
वरमिह संयम एकवस्तु तादृग् भवति च संस्कृतिमापकं सदा नः ।।१०६।।
परमिह वस्तु तदप्यपेक्षणीयं यदनु वयं भुवि संयमं विदध्मः ।
मनुजमतिस्तु सदानुशास्ति भूतान्यवनिजलाग्निसमीरणाम्बरास्ति ।।१०७।।
तदिति स वाहनतां दधाति चाग्नौ ज्वलति जगद्गतवारिभारवाहे ।
वरमिह दुष्करमस्य जातमेतत् स निजमनोविकृतीर्जयेद्यथाऽयम् ।।१०८।।
यदवधि नैष नियन्त्रयत्यमूर्वै तदवधि नैष मनुष्यतामुपैति ।
श्वसितुनु कश्चरणौ निरुध्य हस्तौ निहतबलौ भुवि पक्षघातवातात्।।१०९।।
इह न सहे किल रायकैम्पबेलाभिहितचतुष्पददानलोभरोधम् ।
यदलिखदेष तु दक्षिणाफरीकाध्युषितकथामृतमाधृतं कदाचित् ।।११०।।

स यथा यथा प्रतिनिधिः समभूत् किल ग्रामवासिजनताप्रणये ।
स तथा तथाऽभ्युपचितो लिबरल्दलभेदखात इह काङ्ग्रसतः ॥ १३ ॥

प्रतियातमन्तरमिहोपचयं तदियन्तमत्र यदुदारनृणाम् ।
अवगन्तुमस्य दृशमप्युचितां क्षमता विनाशमयते स्म तदा ॥ १४ ॥

न तदादरश्च समभून्मनसि ध्रुवमुच्चवर्गभवनस्य कृते ।
लघुकं कुटीरमवगन्तुमिवाभवदेतदित्यपि मिथः श्लथता ॥ १५ ॥

उभयोश्च धर्मयुगलस्य स्थितिश्चिरकालमस्ति सदृशे हृदये ।
अथ मात्रयैव च स भेद उदैन्न मृषेति काङ्ग्रसिकता मृदुता ॥ १६ ॥

उभयोश्च धर्मयुगलस्य गतिश्चिरकालमस्ति सदृशे हृदये ।
अवसानतोऽपि बहु कांग्रसिकाः प्रमुदाऽभजन्त तदुदारदलम् ॥ १७ ॥

कतिभिश्चिदाङ्ग्लपुरुषाः पुरुषैरवयन्ति भारतभुवं स्वगृहम् ।
प्रमुदामुदारपदमारमणानुभवास्पदं स्म कलयन्ति चिरात् ॥ १८ ॥

इह भद्रवंशजनिताः प्रभवोऽस्य गृहस्य तस्य रमणीयपदे ।
विहिताधिकारकलितस्थितयः कृतवन्त एव जनताधिकृतौ ॥ १९ ॥

अनुगप्रकोष्ठशतमेतदितः सपरिच्छदावसथपाकगृहम् ।
इह सुव्यवस्थितगृहेष्विव चानुगवर्गभेदविहितो नियमः ॥ २० ॥

अपि पाचकश्च परिवेशयिता शुचिताकरो जलहरप्रभृतिः ।
इदमीयतुच्छगुरुतादिकृतो विहितः प्रबन्ध इह बन्धुरकः ॥ २१ ॥

परमत्र गेहपदशीर्षपदेष्वबला समाजनृपनीतिमुखी ।
वृतिरास्थिता न भवतीह गतिः अकृताभ्यतिक्रममितश्च ततः ॥ २२ ॥

ब्रिटिशव्यवस्थितिमिमां शिरसा किल वक्ष्यतीति न हि विस्मयकृत् ।
परमस्ति विस्मयकृदेतदहो यदभिप्रणाममदधुर्बहवः ॥ २३ ॥

इयमस्ति किं नु विधिजीवनयोः प्रकृतिव्यवस्थितिरवश्यभवा ।
वयमेकसद्मनि सुभृत्यसमां स्वमतिं प्रकल्प्य विचराम इह ॥ २४ ॥

अभवाम जातु कृतसत्कृतयो भवने प्रदाय मृदु चायजलम् ॥ २५ ॥

वयमुत्सुका जगति मान्यतयाऽऽसितुमत्र जातु महनीयपदे ।
अवितव्य आस्त किलकूटनयैर्विजयादयं विजय आन्तरिकः ॥ २६ ॥

मतिमद्भिरुक्तमिदमादिभवैर्विमृशंत्यहो परवशोऽनुगवत् ।
युगमस्ति चाद्य परिवृत्तमिदं न च भारतेऽपि न तथाङ्गलपदे ॥ २७ ॥
प्रभुकिङ्करान्वयगसभ्यतयोः स्थिरता सुखाद्यदुररीक्रियते ।
परमद्य सन्ति विवशास्तु जना अनुगप्रकोष्ठवसतिस्पृहया ॥ २८ ॥
अभिमन्वते कनकचापरसैः कटिपट्टकैर्नियतवेषवरैः ।
अथ त्रिलकै रनुगताशुनकैरपरे जनाः पुनरुदारधियः ॥ २९ ॥
भवनं तदत्र लसतादधिकं निजशिल्पकल्पनविशिष्टतया ।
परमुत्सुकाः प्रभुपदेषु कदा स्वयमागता गृहसुखं दधते ॥ ३० ॥
भुवि भारतीयकरणं तदिदं किल लक्ष्यमेकमसुकैर्विहितम् ।
इह शिष्टिवर्णपरिवृत्तिरलं नवशिष्टिसृष्टिरलमस्त्यथवा ॥ ३१ ॥
नवराज्यसंस्थितिमिमे न कदाचन कामयन्त इति तस्य गिरा ।
न प्रकाशयन्ति सुविचारमिमे त्वथ चिन्तयन्ति मनसापि तथा ॥ ३२ ॥
निजराज्यमेव च स्वराज्यमिमे त्ववयन्ति नीलमिदमस्तु शितम् ।
विदधत्यमी भुवि भविष्यगतेः परिकल्पनां न हि ततस्तु पृथक् ॥ ३३ ॥
विदधत्वमी उत तदाकृतयः किल राज्यसूत्रपरिचालकताम् ।
पदमाङ्गलशासकजनस्य समं दधतामिमेऽन्यदिह पूर्वसमम् ॥ ३४ ॥
इह किङ्करत्वमथ शासकता प्रविभागकल्पन—विधानसभाः ।
अथ वाणिजी न च नवोद्यमकाः सकलाः पुरेव प्रचलन्तु सदा ॥ ३५ ॥
स्वपदेषु सन्तु पतयोऽधिकृता निजवेषभूषणमणिप्रचिताः ।
जनतासु ते प्रभुतया रचितं खचितं प्रभावमुपदर्शयितुम् ॥ ३६ ॥
निजदर्शनं प्रददतां कृपया भुवि भूधरास्तदधिकारभृतः ।
कृषकान् प्रशासतु पुरेव पुनर्धनशालिनां निधिगृहं भ्रियताम् ॥ ३७ ॥
भरणाय तस्य किल भूमिधरान् कृषकांश्च शोषयतु पोषणकृत् ।
अपि प्राड्विवाक इह शुल्कधनं लभतां प्रभुश्च लसतात्स दिवि ॥ ३८ ॥
स्थितमस्ति तन्मतमिहैकपदे चलतादियं भवति याऽत्र गतिः ।
परिवर्तनैश्च पुनरत्र च तैरपि काङ्क्षितैश्च भवितव्यमिह ॥ ३९ ॥
ब्रिटिशैरिमानि शनकैः शनकैः शुभभावनाभिरपि कारयतात् ।
न समाजगानि किल व्यक्तिगतान्यनुराधनैरिदमुदारदलम् ॥ ४० ॥

अखिलार्थनीतिगतराजनयो ब्रिटिशप्रभुत्वदृढतास्थिरते ।
अभिधृत्य याति सफलत्वमियं नहि मूलमुत्खनितुमस्ति बलम् ॥ ४१ ॥
चिरकालमत्र ब्रिटिशप्रभुता प्रचलिष्यतीति च भविष्यदृशा ।
अनुकूलमान्यरचने निरतोऽप्यनुयाति तन्नयमुदारजनः ॥ ४२ ॥
सविचारधारमिह चार्थनया ब्रिटिशैः सहैव परिचिन्तयते ।
उररीकृतैकविधनैतिकतत्समये तदीयप्रभुभावरतः ॥ ४३ ॥
प्रविभिद्यते सपदि कांग्रसिकी रुचिरेतदीयरुचितोऽतितराम् ।
नवराज्यसंस्थितिमिदं रचयेन्नतु शिष्टिमण्डलमभिन्नमतम् ॥ ४४ ॥
नवसंस्थितेः किमिह रूपमिति स्फुटमद्य नास्ति मतिमत्कलितम्
इह सम्मतिर्बहुविधापि भवेत् परमैकमत्यमपि चास्त्युभयोः ॥ ४५ ॥
इह काङ्गरेसतदुदारदले नहि वर्तमानदशयानुमते ।
परिवर्तनं स्थितिविधेर्भवताद् भवताच्च मूलपरिवर्तनकम् ॥ ४६ ॥
इदमन्तरं ह्युपनिवेशपदान्निजतन्त्रतेतिपदगं सुमहत् ।
प्रथमं पुराणमनुपालयते यदिहार्थबन्धनशतैर्नियतम् ॥ ४७ ॥
चरमां परिस्थितिमुदीक्ष्य नवं नवमेव रूपमनुकल्पयितुम् ।
निजतन्त्रतामुपदिशत्यथ तां परिरब्धुमुत्सुकमिहास्तितराम् ॥ ४८ ॥
अयमाङ्गलजातिवसतेरचलां रिपुतां विधातुमथ सर्वविधाम् ।
अनुबन्धमुत्खनितुमस्ति न नः प्रतियत्न इत्यपि सदा श्रयताम् ॥ ४९ ॥
परमत्र यद् व्यवहृतं ब्रिटिशैरवलम्ब्य तद् भवति सा सहजा ।
सुकवी रवीन्द्र इदमाह-ऋतप्रभुता कुरूपमिह दूषयते ॥ ५० ॥
किल कुञ्चिकामथ च विष्कभकं प्रविघाटयत्यहह गेन्तिकया ।
त्रुटितं हि नो हृदयकुञ्चिकया बत गेन्तिकाहतिभिराहतधीः ॥ ५१ ॥
किमु जातिवादमनुकूलतया व्यवहारमेतुममुया क्षमते ।
यदि भारतस्य मनुजस्य वयं परिचर्यया त्ववितुमस्य हितम् ॥ ५२ ॥
प्रयतामहे निजमनोभिरलं न मनांसि वैरकलुषं बिभृयुः ।
इति वर्षपञ्चदशकेन पुरा मुनिगान्धिना सदुपदिष्टमिदम् ॥ ५३ ॥
अवरोत्स्यतोह मनसो विकृतीरिति संस्थितो ब्रिटिशबन्दिगृहे ।
विलिखाभि चिन्तितमनाश्च सहे घटितं यदत्र तनुहानि (तनहाई) पदे॥५४॥

घटनासु कासुचन रोषभृतं हृदयं विरोधमनिशं भजते।
परमत्र बुद्धिमनसोर्गहनं तमवेत्य शोधयति मय्यधुना ॥ ५५ ॥
क्वचिदाङ्ग्लजातिवसतीः प्रति मे न स द्वेषरोषलव एष मतः।
न हि राज्यमत्र सहते हृदयं ब्रिटिशस्य कस्यचिदितीह ऋतम् ॥ ५६ ॥
तदरोपि नः शिरसि, तेन रुषं भृशमन्तरेमि धनवादिदिशि।
स हि शासको भरतभूमिमिमामनुशोष्य जीवति न मे रुचितः ॥ ५७ ॥
अभिरुष्यतीदमपि मे हृदयं न मनस्तमेव तु विलोकयते।
यदि तत्तमेव मनुतामपि साधनमस्य किञ्चन न विक्रियते ॥ ५८ ॥
न हि कृत्स्नजातिरिह रोषपदं न च निन्दनीयचरितेत्युचितम्।
किल मूढतैव भविता मनसो यदि तत्तथेति मनुते तदिदम् ॥ ५९ ॥
किल ते परिस्थितिवशा अभवन् वयमत्र तद्वशत एव यथा।
स्वमनोऽभिसृष्टिमनुचाङ्ग्लपदेऽस्म्यधमर्णतां गत इति प्रकटम् ॥ ६० ॥
स तथा यथास्य परकीयतया मननेऽपि नालमहमस्मि मनाक्।
स कियन्तमत्र यतनं रचये परमेष न स्वमनसोऽभिषवात् ॥ ६१ ॥
परदेशजीवनविचारपथात् उपदिष्टतत्समुचितातिशयात्।
मयकाङ्ग्लदेशगतशिक्षणतो न विमोक्तुमस्ति सुशकं कुहचित् ॥ ६२ ॥
यदि मुच्यते नृपनयाकलनं मम पूर्वरागविषयस्तदयम्।
यदि भारते तदनुशिष्टिरिपुर्ह्यभवं तदा तदभवत् स्थितितः ॥ ६३ ॥
वयमाक्षिपाम इह यं न वयं भुवि साम्मनस्यमिह येन समम्।
क्वचनापि कर्तुमलमास्म पुनस्तदिहाङ्ग्लशासनमिदं न तु ते ॥ ६४ ॥
न तदाधिपत्यमिह सह्यमिदं रुचितो वहैम सखितामपि तैः।
वयमत्र नूत्नपवनस्पृहया नवचेतनामभिलषाम हृदि ॥ ६५ ॥
सहयोग एव समरोगहरोऽस्त्यभिकांक्षितः स्थितवतामनु नः।
परमत्र केसरितया यदि ते प्रतियन्ति तर्हि न सखाय इमे ॥ ६६ ॥
सहयोग एभिरिह नाश्वसितो भविता, क्रियेत किल सम्मुखता।
सम-राज्यवादवनराजपशोरिह बिक्रमेण दमनं न हृतिः ॥ ६७ ॥
वनराजसिंहपशुपालकता विवशीकृतिश्च भुवि सम्भवति।
समराज्यतन्त्रजनतन्त्रहरिद्वयमत्र नास्ति सुकरं वसितुम् ॥ ६८ ॥

न स साम्मनस्यमिह केनचनापि करिष्यतीति कथनं जडता।
किल साम्मनस्यमिह कारयते जनजीवनं सततमेव यतः॥ ६९ ॥
परदेशजातिषु यथास्ति तथाऽवधिमूढता भवति तत्र कथा।
परमेतदत्र यदि रीतिदशास्थितिवस्तुवशात्कथितं तदृतम्॥ ७० ॥
इह यत्र वस्तुनि च साम्मनसी मनुजस्य कापि बहिरेति बलात्।
समराज्यवाद इह ब्रैटिशिको निजतन्त्रतां विषहतां नु कथम्॥ ७१ ॥
उभयं तदस्ति दिनरात्रिसमं विपरीतमेव च परस्परतः।
क्व चमूविधानमथ विश्वगता क्व च चिक्कणाश्चिपिटिताश्च गिरः॥७२॥
उभयं तदेकपदमानयतामिति तादृशोऽस्ति नहि यत्नतरः।
'समराज्यवाद इत एतु बहिः' परमोऽस्त्युपाय इह साधयितुम्॥ ७३ ॥
सहयोगिता ब्रिटिशभारतयोरनुकूलतां स्थितिषु सा जनयेत्।
इह कथ्यतेऽद्य जगति स्ववशित्वमितीह सङ्कुचितलक्ष्यमिदम्॥ ७४ ॥
अधुना परस्परमधिश्रयते जगदित्यहो स्ववशिमानमिह।
अभिवाञ्छतां प्रतिमतिप्रगतिः शमवादिनां सह समाजवदैः॥ ७५ ॥
सहिता उदारमनसोऽभ्यदधुः ब्रिटिशाद्धि राष्ट्रदलतः सरणिः।
जनजीवनस्य किल राष्ट्रियतेत्यतिचित्रितास्ति सरणे रचना॥ ७६ ॥
ब्रिटिशप्रदेशगतसर्वपथास्तदुदारवादशमवादमुखाः।
समराज्यवादमवितुं निरता उपयान्ति ते सपदि तं सततम्॥ ७७ ॥
अथ च स्थितिं प्रचलितामवितुं त्वभिलाषुकाश्रयति शिष्टिरियम्।
किल राष्ट्रवादपथतोऽपि वरः सुविधेय एष हि विबोधपथः॥ ७८ ॥
जयि राष्ट्रमत्र लुठितार्थकृते शमवादमाश्रयति साधु यथा।
इति मैकदानलद आमनुतेऽन्तरराष्ट्रियत्वमिह गान्धिमुखे॥ ७९ ॥
नहि वेद्मि राजनयिकी दृगियं यदि भारतं स्ववशमातनुते।
भविता तु कीदृगिदमत्र च किं नु करिष्यतीत्यपि न वेद्मि पुनः॥ ८० ॥
तदवश्यमेव कलयामि यथा किल भारतीयजनता मनुते।
भुवि राष्ट्रियस्ववशतामधुनान्तरराष्ट्रियत्वमचिरान्मनुताम्॥ ८१ ॥
न समाजवादिषु च राष्ट्रियतान्तरराष्ट्रियत्वमिव तेषु मता।
बहवश्च कांग्रसिकपक्षधरा अपि तामिमां च समुपासत तत्॥ ८२ ॥

न वयं पृथङ् निवसितुं जगतः स्ववशित्वमेतदभिवश्म इमे ।
स्ववशित्वतः किमपि चेद्ध्रियतेऽन्तरराष्ट्रिया प्रगतिरत्र भवेत् ॥ ८३ ॥
समराज्यरीतिरिह कापि कियद्वरनामिकास्तु विरुणध्मि स ताम् ।
अनया हि विश्वहितभावनया स्थिरशान्तिरत्र सुकरा न भवेत् ॥ ८४ ॥
घटना इहाद्य घटिताः किल याः कथितं हि ताभिरिह वै जगते ।
समराज्यरीतय इह स्वभवास्तितया चरन्ति निजवादवशात् ॥ ८५ ॥
जगतोऽखिलात्पृथगिह स्थितये क्रियते प्रयत्न इति तद्विदितम् ।
विपरीतमेव फलमस्ति, किलान्तरराष्ट्रियत्वमिह नोपचितम् ॥ ८६ ॥
इह हेतुमार्गणमदुष्करमस्त्यधुनाप्यवस्थितिगतिर्वदति ।
इति नीतिदुष्परिणतिर्जनिता नवलास्तिता त्वधिकदेशयुजा ॥ ८७ ॥
स्थितमन्यतोऽखिलजगद्धिततांशसमस्तदेशपृथगस्तितया ।
अपि भारतं विमृशतान्मतिमद् ब्रिटिशोद्यमाश्रयविशेषयुजम् ॥ ८८ ॥
वयमन्यतः पृथगवस्थितये विवशीक्रियेमहि दिनैः क्रमशः ।
इति नैकवस्तुहतयोऽप्यभवन् पृथगेव ता भयमिता नयतः ॥ ८९ ॥
इति नो वृताप्युपनिवेशकताऽन्तरराष्ट्रियत्वदिशि नेतुमियम् ।
कुरुतेऽतिदूरमिह सा जनतः क्षिपतीव चात्र पृथगास्थितये ॥ ९० ॥
तदुदारमित्रमनुपश्यति नो ब्रिटिशोपनेत्रमुपधाय शितम् ।
अवलोकते जनपदञ्च जगज्जगदोक्षते तु परकोयमिदम् ॥ ९१ ॥
नहि तावदागमयितुं यतते किमु काङ्ग्रेसमभिवक्ति कथम् ।
ब्रिटिशोऽपि मुक्तिमिह तां पठति त्वधिकं हितास्त्युपनिवेशकता ॥ ९२ ॥
स्ववशित्वमत्र किल संकुचितं न च नैतिकोन्नयनदृष्टिहितम् ।
'शितसद्म' तावदिह वास्तविकान्तरराष्ट्रियत्वमिदमीयदृशा ।' ९३ ॥
सहि देशमन्यमनुपश्यति नो तदुपेक्षणे श्रयति तुष्टिमयम् ।
परदेशबोधविषये च सतामपि भावयापि सुविधा भवति ॥ ९४ ॥
इह भारते तु दृढनीतिमयं विरुणद्धि वैकविधतां दधतीम् ।
सकुतूहलं भवति चात्र मनः परदेशगां तु न विरुन्धति ते ॥ ९५ ॥
अपि दूरगो ब्रिटिशमाद्रियते क्वचिदेकतन्त्रमनुशंसति सः ।
इह वञ्चना भवति नामकृता किल भारते प्रमुखप्रश्न ऋतः ॥ ९६ ॥

अयमस्ति राज्यमभिलष्य नवं वयमुद्यतेमहि नु शिष्टिदलम् ।
तदुदारवर्गकृतमुत्तरणं विशदं विधित्सति च शिष्टिदलम् ॥ ९७ ॥
तदपीष्यते क्रमकृतं च चिरादिह चर्चितास्त्युपनिवेशकता ।
प्रथमन्तु तैरिह नु केन्द्रगतोत्तरदायितैव क्रियते गहना ॥ ९८ ॥
न स्वतन्त्रतादिपदमस्ति प्रियं भयदायकं त्वनुभवन्त्यपि ते ।
इह प्राड्विवाकवचनं च विधिं प्रति ते रुचिं प्रकटयन्त्यधिकाम् ॥ ९९ ॥
न हि रोचते जनसमाजकृते यदि तद्द्वयं तदयमस्ति जडः ।
इतिहासगामि तदुदाहरणं बहु लभ्यते जन-समाजगतम् ॥ १०० ॥
यदिह स्वतन्त्रिमगतौ सुधियां न भयं न जीवनहृतिः क्षतिकृत् ।
परमेतदत्र किल केन्द्रगतोत्तरदायितापदमतीव नृणाम् ॥ १०१ ॥
भुवि संशयास्पदमतोऽस्य कृते मतिमान्न कश्चिदशनं त्यजति ।
न च निद्रितं विकुरुते क्व नु तन्निजप्राणदानमिह सम्भवति ॥ १०२ ॥
इदमस्ति लक्ष्यमिदमद्य भवेदथवा विलम्बत इतीह न शुक् ।
न हि सम्मुखाक्रमणमुग्रतया करणीयमेतदिह शान्तमतम् ॥ १०३ ॥
स च श्रीनिवास इदमाह-निजं मतिमत्त्वप्यनुभवो विनयः ।
प्रतिबोधशक्तिरथ तत्प्रभुता कृतिदक्षतेति परिचाय्य समम् ॥ १०४ ॥
इयमिष्यते व्यवहृतिः कृतिभिः स्वयमन्ततोऽत्र निजशिष्टिदलम् ।
परितोषयिष्यति यदेतदिमं त्वधिकारमाशु विजहातु निजम् ॥ १०५ ॥
वचनान्तरेण विरुणद्धि स नो रुचिमाक्रमं न सहतेऽप्यथवा ।
क्षमतासु संशयमिमे दधतेऽप्युभयं नवाग्रमुखकारणतः ॥ १०६ ॥
समराज्यवाद-सदवस्थितिगं त्विति कीदृगस्ति विशदीकरणम् ।
परमत्र टानिरलिखद् ब्रिटिशश्रमजीविवर्गमधिकृत्य वरम् ॥ १०७ ॥
घटतेऽधिकं तदपि भारतके यदिहाङ्ग्लदेशविषये बहुशः ।
किल लोकतन्त्रमतयोऽपि समा विलसन्ति यासु बहुसभ्यगिरः ॥ १०८ ॥
प्रभवन्ति ता विभवितुं प्रभुतां स च टानिरेतदलिखन्मतिमान् ।
लशुनत्वचः समवतार्य यथाह्युपभुञ्जते न हि तथा मनुजाः ॥ १०९ ॥
भुवि जीवतः क्वचन केसरिणो नखरत्वचं स्युरुपभोक्तुमलम् ।
इह कृन्तति त्वचमथोत्खनति प्रथमः स एव न परस्तु ततः ॥ ११० ॥

यदि कश्चिदस्ति भुवने विषयोऽप्यधिकारिणः कुमतयोऽत्र समे।
नहि तादृशोऽस्ति पुनराङ्ग्लपदे त्विति तत्र न प्रचलति च्छलनम् ॥१११॥
गलितो विचार इह तच्छ्रमिकव्रजचातुरीसुजनते क्रमशः।
निजपक्षमत्र समुपन्यसितुं यतते तदा स्युरिह ते छलिताः॥ ११२ ॥
निजपक्षमेव तमिमे मिनुयुस्तदिदं प्रकल्पनमिहास्ति वृथा।
विधिकोविदं कमपि कश्छलयेदधिकारसम्पदममुष्य हरेत्॥ ११३ ॥
अधिकारपत्रमपि नामयुतं किल हस्तगं च न तदस्य भवेत्।
धनिकेषु केऽपि व्यवहारविदश्चतुराः प्रभाविनिजविश्वसनाः॥११४॥
दमयन्ति नीतिनयनिर्वहणाः किल रोटिकापटलसर्पिरिमे।
प्रतियुञ्जतेऽत्र हि तदल्पतरं भवतु क्वचित्कथमपीति दृशः॥ ११५ ॥
यदि तत्स्थितेर्गहनमाहननं प्रतिशङ्कितं भवति कर्हिचन।
शतरञ्जखेलनप्रतीकमिमे निजकेलिजैत्रभटतां दधते॥ ११६ ॥
स भटो भवेद्यदि तु राजनयेऽप्यथवार्थिकेऽत्र विषये निपुणः।
प्रति साधनं समुचितानुचितं ह्युपयुञ्जते विजहतीह न तत्॥ ११७ ॥
सति चाप्यपेक्षिततरे यतनेऽन्तरराष्ट्रियं तमसमञ्जसकम्।
जनयन्त्यमी कनकमुद्रिकया ह्यवमूल्यते विनिमयावसरे॥ ११८ ॥
शरणार्थिराजनयिकप्रपलायकवत्स्वरक्षणविधौ न मनाक्।
निजदेशकण्ठतटखण्डनयापि किलेष्टवस्तु परियन्ति बलात्॥ ११९ ॥
ब्रिटिशश्रमाश्रयिदलस्य बलावहसंघटास्ति तदनुव्रजना।
इह संस्थितिर्यदनुदानधनप्रदसभ्यलक्षमिह दानरतम्॥ १२० ॥
सहयोगिनी समितिरस्ति बहुभ्रंशमुन्नतं च जनसंघटनकम्।
बहुवृत्तियोगसहयोगजुषः सममानसा इति ममानुभवः॥ १२१ ॥
ब्रिटिशप्रदेशमतदानविधौ किल बालिशाधिकृतिसंश्रितयः।
जनतन्त्रसंसदनुसंस्थितयो बहुवर्षनागरिकसौववशी॥ १२२ ॥
इति नैकधा सुविधयापि युतेऽकथयत्स टानिरिह सम्मतिवत्।
अपि वर्तमानघटनाभिरिदं किल साधितं स्वयमुदाहरणम्॥ १२३ ॥
स्मितभाषितैरवगमय्य निजाशयमाप्नुवन्न खलु शिष्टिपदम्।
सपदि प्रयोग उभयोरनयोरिह लाभदायकतया प्रथितः॥ १२४ ॥

स्पृहणीय एव च नितान्तमयं परमत्र चेच्छ्रमिकवर्गगतम् ।
किल बाहुमत्यमपि चेन्न तदापि विशेषतोऽधिकृतवर्गमुखे ॥ १२५ ॥
स न मूलतस्तु परिवर्तनकं प्रभुतां गतोऽत्र किल कारयितुम् ।
इह तत्करे ह्यविकलाद्यतनी नयिकी समाजविधितार्थकृता ॥ १२६ ॥
बत सैनिकीप्रभृतिसत्त्ववती पृथुशक्तिरस्ति निजरक्षणकृत् ।
न किलेदमस्ति कथनीयमहो न परिस्थितिर्भरतभूमिषु सा ॥ १२७ ॥
नहि संस्थितिस्तु जनतन्त्रभवा न परम्परा अपि च तेन समाः ।
तदपेक्षयैककरणा प्रभुता न च वाचि लेखनप्रकाशनयोः ॥ १२८ ॥
इह वृत्तपत्रमुखयत्नदमः प्रमुखा हि रीतिरधुनास्ति तता ।
दृढसंगतिप्रथनमत्र स्थितं मधुरस्मिताश्रयणमेव सताम् ॥ १३९ ॥
स उदारवर्ग इह कार्यविधेः प्रतिकूलतां वहति तामविधेः ।
यदवैधमस्ति विधिभितमथो स च तत्कदापि न शुभं मनुते ॥ १३० ॥
परमस्ति यो जनपदस्य विधिः किल लोकतन्त्रसमयानुगतः ।
इह वैधशब्द उपयाति विभुं निजमर्थमीरयति यो नियमान् ॥ १३१ ॥
स्ववशित्वमत्र परिपाति विधिर्वशयत्ययं च निजकार्यसभाम् ।
स हि राजनीतिभवमर्थभवं परिवर्तनं सृजति कार्यविधौ ॥ १३२ ॥
निजलोकतान्त्रिकसुसाधनतः स तथा विधातुमवकाशघरः ।
परमत्र भारततले न विधिः पुनरीदृशोऽस्ति न च कार्यसभा ॥ १३३ ॥
इह तत्प्रयोग उचितो न भवेन्नहि तत्कृतेऽस्त्यवसरो न पदम् ।
किल विस्मयेऽत्र गदितुं विवशैरपि भूयते सपदि वैधपदे ॥ १३४ ॥
न यतो विधिः सृजति कार्यसभामिह सा सभा सृजति हन्त विधिम् ।
मनसोऽनुकूलकृतये नियमं सृजतीह यं भवति सोऽत्र विधिः ॥ १३५ ॥
विधिरत्र वै व्यवहृतो नियमे तदिदं भवेदिह तु साधुतरम् ।
यदवैधवैधपदवर्जमिहानियतं तथा नियतमित्युचितम् ॥ १३६ ॥
नियतं तथानियतमित्यधिकं किल गोलमूल्यमवतीति ऋतम् ।
समये तदर्थपरिवृत्तिरिहातनुते नवं नवमिवात्र विधिम् ॥ १३७ ॥
नवलाधिदेशनमथो नबलो नियमो नवस्तदपराधचयः ।
जनयत्यथो तदनुसारमिहैकसभाप्रवेशमपराधमगुः ॥ १३८ ॥

द्विकचक्रिकावहनवस्त्रविशेषपरीहितीर्निशि बहिर्गमनम् ।
पुरुषेऽनिवेदनमथानुदिनं तदिदं समस्तमपराधपरम् ।। १३९ ।।
इति भारतस्य कुहचित्तु पदेऽनपराधतामपि वहेन्नियमः ।
अपराध इत्यनपराध इतीह विधेर्विधानबहुधात्वकृतम् ।। १४० ।।
नियमानिमांश्च लघुसूचनया प्रकरोति कार्यसमितिर्न यथा ।
निजदायिता भवति विस्मृतवत् प्रतिकल्पितेव च दिनेऽत्र दिने ।। १४१ ।।
इह वैधशब्द उपयाति निजं नवमर्थमेव न जगद्विदितम् ।
यदिहाह कार्यसमितिः स विधिस्तदुपेतमत्र किल वैधमिदम् ।। १४२ ।।
इह कार्यकारिणि अवाञ्छितकं निखिलं त्ववैधमिति निर्गलितम् ।
इति यावदीहितमिह क्रियते किल तत्समित्यभिलषित्यनुगम् ।। १४३ ।।
तदिदं रुचेरपि कृतं त्वरुचेः कृतके भवेत्परिणतिर्विषमा ।
अनुपालयिष्यति सदा नियमामिति न प्रतिश्रुतमिहास्ति सुगम् ।। १४४ ।।
इदमेकतन्त्रविगतोत्तरदत्वमुखैर्गुणैः सहितशासनतः ।
भयतो नमस्कृतिरिहात्मवधो निजविक्रयो भवति दुःसहनः ।। १४५ ।।
इदमस्मरंश्च पुरुषो यतनैर्निजतन्त्रतां क्वचिदवाप्स्यति किम् ।
यदि पश्चिमैव दिगनुस्त्रियते तदयं दिवाकरदिशेति कथम् ।। १४६ ।।
प्रतिलोकतन्त्रविषये विषमेऽत्र विवाद एष उदितोऽस्ति यथा— ।
इह वर्तमानविधितन्त्रबलात्परिवर्तनं नु भवितार्थगतम् ।। १४७ ।।
अथ मूलतो न भवतीदमिहाहुरनेकमान्यपुरुषाः स्वमतम् ।
तदसम्भवं गगनपुष्पसमं शशशृङ्गवत्कमठदुग्धमिव ।। १४८ ।।
इह तत्कृते किमपि क्रान्तिकरं सविशेषमेव यतनं क्रियताम् ।
परमस्ति यावदिह नो विषयो नहि भारते भवति तावदिदम् ।। १४९ ।।
नहि वैधमस्ति किल साधनकं यदुपाश्रयेण परिवर्त्यमिदम् ।
यदि शुक्लपत्रमथ तादृशकं भविता विधिस्तत इदं न भवेत् ।। १५० ।।
बहुदिक्षु तर्हि प्रगतिस्थगने तदवैधमेव यतनं श्रयताम् ।
न हि किञ्चिदन्यदिह चात्मवशं तदिहाद्य किन्नु करणीयमिह ।। १५१ ।।
परिवर्तनस्य सकलस्य किलावसरेभ्य एव नु तिलाञ्जलयः ।
प्रहिता भवन्तु विधिनाऽभिहितं प्रणमन्तु हन्त विधिना विहितम् ।। १५२ ।।

इह भारतेऽतिविषमास्ति परिस्थितिरस्य कार्यसमितिः सततम्।
प्रतिरोधमेव कुरुते क्षमतेऽपि तथाऽधिकर्तुमिति नास्ति गतिः ॥ १५३ ॥
भयदायि कर्म सकलं हि तया प्रतिषिध्यते ब्रिटिशप्रेरितया।
प्रतियत्नमित्थमखिलं सहसा प्रतिरुध्यतेऽत्र विधिनेरितया ॥ १५४ ॥
इति सर्वकर्मपरिवर्जनतः किल सार्वदिक्यपहृता प्रगतिः।
स्थितिरीदृशी न सुसहेति वयं निजकार्यमूढमनसः स्म इह ॥ १५५ ॥
वदितुं नहि क्षममिदं यदहं सुनिरन्तरं नियमतः स्वकृतिम्।
विदधामि चेति जनतन्त्रपदेऽप्युपयाति तादृगिह चावसरः ॥ १५६ ॥
यदि कञ्चिदन्तरगतं प्रदिशेदियमप्रतीपमुपयातुमिह।
पुनरत्र देशविषयेऽवसरास्तु भवन्त्यनेकसमये सुलभाः ॥ १५७ ॥
इह शासनं भुवि निरङ्कुशकं यदि चैकतन्त्रमनसा चलति।
नहि नैतिको भवति तत्र मनागपि संश्रयः क्वचन कश्चन वा ॥ १५८ ॥
कथयन्त्युदारमनसः सहसाक्रमणं दिशत्यविनयाचरणम्।
न च लोकतन्त्रगुणवर्गमयं त्वनुयाति तेन तदपाक्रियताम् ॥ १५९ ॥
इदमस्ति दुर्यतनदुर्लिखितं बहुधा किलाक्रमणमग्रकृतम्।
श्रमजोविवर्गहरितालसमो नियमो भवेद् ध्रुवप्रह्लादकृतः ॥ १६० ॥
परमत्र राजनयिकावसरं कथयन्ति ते न तु नृजीवनये।
ननु शार्मणे हिटलराधिकृते क्रियतां किमत्र विनयाधिकृतैः ॥ १६१ ॥
मुनयो नमन्तु शिर एव पुरोऽनियमानुगां दधतु क्रान्तिमुत।
इह लोकतन्त्रमनुगम्य जनः कथमात्मनः प्रकुरुतादवनम् ॥ १६२ ॥
इह लोकतन्त्रपदमाश्रयते बहुधा ह्युदारदलमप्यधुना।
परमेषु तन्निकटयानमपि स्वमनोमतैर्न विदधत्यसुकाः ॥ १६३ ॥
सर ऐयरः स वदतिस्म पुरात्र समर्थयन् किल विधानसभाम्।
जनवृन्दसाधमतिविश्वसिनो किल काङ्ग्रसेतिपरिषद् बहुधा ॥ १६४ ॥
जनसत्तयाय जनयोग्यतया न नयं करोति किल मेऽनुगतम्।
किल गोलपीठसदसोऽवसरे खलु संशये परिणतेर्विषये ॥ १६५ ॥
यदि कांगरेसमिह युक्तनृणां किल सत्यतां सह सुयोग्यतया।
सुसमाद्रियेत तदुपाश्रयतां परिणाममस्य शुभमेव परम् ॥ १६६ ॥

सरऐयरस्य खलु कापि पृथग् भुवि लोकतन्त्रविषयेऽस्ति धृतिः ।
सुसमाहिता भवति या ब्रिटिशैरधिकारिभिर्विनिचितयोग्यजने ॥ १६७ ॥
अथ शुक्लपत्रमपि सद्वचनैः स शुभाशिषा समनुमोदयन्ते ।
समतुष्यदेष न ततो यदपि प्रविरोधमस्य स न कामयते ॥ १६८ ॥
न च खल्वदः सुमतिमत्त्वमहो इति साम्प्रतं स्फुटमिदं भवति ।
ब्रिटिशप्रशासनमिदं न कथं सहयोगभागभवदैयरतः ॥ १६९ ॥
अथ कांगरेसमकरोत्स्वकृतं किल नम्रभङ्गमिह तं स्थगितम् ।
तदुदारनेतृजनमोदकरं समभूदितीह न हि विस्मयकृत् ॥ १७० ॥
मतिमत्त्वबोधकरणं तदभूद्यदिमे स्थिताः पृथगितः सततम् ।
कथयन्त्यमी प्रथममुक्तमिदं परमस्त्यदोऽद्भुततरं कथनम् ॥ १७१ ॥
वयमत्र बद्धकटयः समरे सममुत्थिताश्च निजविक्रमतः ।
चिरयुध्यमानदशया स्वबलं स्वधृतिं च शासकदलस्य पुरः ॥ १७२ ॥
परिदर्श्य चेन्निपतिता न ततो वरमुत्थितं तदभवन्नहि नः ।
इति भूतले जठरघर्षणतो गतिमेम सम्यगिति तेऽकथयन् ॥ १७३ ॥
यदिहोत्थितः पतति तन्मनुजैर्न तदुत्थितं क्वचन सत्क्रियते ।
धरणिस्थितस्तु जठराश्रयतो न पतत्यतो धरणिमाश्रयतात् ॥ १७४ ॥

इह येन कविना पञ्चभिस्त्वध्यायकैर्लिखिता कथा
मूलस्वराज्यायनमितीह स एव काव्यमरीरचत् ।
अत्र नेहरुमामकीकथया समानार्थे त्वयं
द्व्यधिकपञ्चाशो गतः सर्गोऽयमद्य मनोरमः ॥

हिन्दुस्थानं प्रत्नं नूत्नं च

मणिमाला

त्रिपञ्चाशः सर्गः

स्वाभाविकमासीद्यद्राष्ट्रियवादो देशे ब्रिटिशानां शिष्टिं विरुणद्धु ।
कौतूहलवार्ताऽस्माकं बहुसंख्या सैकाल्पितविंश्यां शत्यां पठितानाम् ॥१॥
बोधात्तदबोधाद्विश्वासमिहोच्चं तेऽन्तः किल साम्राज्यादर्शपथेऽधुः ।
आधार इहादर्शोऽयं खलु तर्के तेषामभवद्यस्मिन् सूक्ष्मसमीक्षा ॥२॥
ते तत्कतिचिद्वाह्यान्येव च लक्ष्माण्याधृत्य समीक्षां कृत्वा समतुष्यन् ।
विद्यालय उच्चैर्विद्यालय एतैर्ये ये विषया अध्याप्यन्त किलेष्टाः ॥३॥
ते ब्रैटिशसाम्राज्यादर्शितदृष्ट्या तावल्लिखितैस्तद्ग्रन्थैरिह पाठ्याः ।
येष्वस्मदतीते चैवाधुनिके वा काले स्थितदोषा एवोल्लिखितास्तैः ॥४॥
एवं ब्रिटिशेष्वासन्नानां ये शुभलेशास्तान्दर्पणवद्दीर्घीकृत्य न्यबध्नन् ।
अत्रोज्ज्वलभाविन्याद्यामददर्शन्नस्माभिः सर्वं समधीतम् ॥५॥
तत्त्रोटितमूलं तन्मोटितशाखं मत्वाऽवितथं तत्सत्यं च गृहीत्वा ।
स्फूर्त्या निजया चेतेषां प्रतिकारः क्लृप्तः परिणामान्मुक्ता नहि तस्मात्॥६॥
पूर्वं तु मतिर्नोनिर्गन्तुमलंनस्तर्कैचर्कवितर्के दक्षाप्तविपक्षा ।
पश्चाद्वयमाश्रित्यैनं सहधर्मं स्व राष्ट्रियवादं साध्यात्मिकवादम् ॥७॥
अभ्युत्थितवन्तः कश्चिन्नहि लोभोऽस्त्यस्मादृश ईदृग्धर्मात्मनि विज्ञः ।
दुर्भाग्यपराधीनत्वेऽपि कृतः सन्तोषो निजमर्मज्ञत्वेन स एषः ॥८॥
पाश्चात्यचमत्कारेऽसत्यपि मूल्यातुल्यान्तरवस्तुज्ञानेन घनिष्ठाः ।
श्रीतीर्थविवेकानन्दादिकविद्वज्ज्ञाने च रुचिर्नश्चात्माभिमतिस्पृक् ॥९॥
भूतं प्रति मूर्छन्मानं पुनरुल्लासं तं प्रापदिदं मूले मन्दममन्दम् ।
आस्माकपुराणेदानीन्तनयोरप्याङ्ग्लैर्दृश योर्यद्वर्णितमासीत् ॥१०॥
तत्संशयपात्रं जातं बत सौक्ष्म्यात्तस्याप्यनुवीक्षामेते कृतवन्तः ।
किन्तु ब्रिटिशानां चक्रे पतितास्तद्ध्यानाश्रयणात्ते भ्रान्तिं श्रितवन्तः ॥११॥

यद्यद् भुवि दुष्टं स्यादब्रिटिशं तत्तेषामथ दोषो व्यक्तेर्नहि जातेः ।
आस्माकमथागो जातेर्नहि व्यक्तेरित्यास्त महांस्तद्दृष्टेरिह दोषः ॥१२॥
शोधे सति हिन्दुस्थाने ब्रिटिशानां शिष्टेरुपलब्धं त्वालोचनवस्तु ।
तेनाद्य कृतोदाराणामपि दृष्टौ काचिन्नवता क्रान्तेर्हेतुः परिवृत्तिः ॥१३॥
आस्माकमिमं वै राष्ट्रे वादं स्थिरयन्ती सा राजनये चैवार्थे च निदाने ।
नौरोजिरमेशौ डिग्बीप्रमुखास्ते ग्रन्थानलिखन् देशेऽस्मिन्किल तांस्तान् १४।
देशेऽत्र दरिद्रत्वं च ब्रिटिशां शिष्ट्यादीन् मननक्रान्तेः कारणभूतान् ।
आस्माकपुराणैतिह्यान्तः पुनरासीच्छोधः स च नः प्रत्नां संस्कृतिमुच्चैः ।१५।
मूर्धन्यपदस्थामास्थापयतेस्मास्याश्चोज्ज्वलकालं संस्थापयते स्म ।
तुष्ट्या तमधीत्याज्ञासिष्म वयं यच्चाङ्ग्लैर्लिखितं तत्सर्वं वितथं नः ॥१६॥
तेनाहितयाऽसत्या धारणया तद्भिन्नो जनितो भावस्तान्प्रति कश्चित् ।
साम्मुख्यमथैषां कर्तुं वयमुत्थानं कामयमाना ऐतिह्यमचाप्ताः ॥१७॥
आस्माकविमर्शाधारः स बिचारो धारात्मतया यस्तैरुल्लिखितोऽभूत् ।
एकाल्पितविश्यां शत्यामिति हिन्दुस्थानेऽनियताऽवस्थो राष्ट्रियवादोः ॥१८।
अद्यापि किलोदाराणामितरेषां वा बालदलानां कांग्रेसिकधीनाम् ।
भावात्क्वचिदग्रे याताःस्युरथाप्येतत्तत्र शताब्द्यामेवासत आरात् ॥१९॥
तेषामियमेवावस्थास्ति ततोऽमी स्वाधीनतया नाद्यापिदारस्युरु ।
औदार्यमथ स्वातन्त्र्यं भवतो नैकाधारगते ते नित्यं स्थितिभिन्ने ॥२०॥
शोचत्ययमारोक्ष्याम्येष पदं तूच्चैरुच्चतरं तन्मन्दक्रमलभ्यम् ।
द्रक्ष्यामि महत्त्वाधायि प्रदलस्फारस्फायिलकार्यमहं तत्सम्यग्धि करिष्ये ।२१।
शिष्टेरिह यन्त्रं पूर्वानुगमेनारामाच्चलितेदं, तद्भूर्भवितास्मि ।
सैन्यं ब्रिटिशानां रक्षिष्यति मां मत्प्राप्ते समयेऽन्यत्रैकत्र विराजत् ॥२२॥
सामाज्यगतस्यासीदौपनिवेशस्यार्थो मतस्तस्यायं बहिरेतम् ।
पूर्णं न वदाम्येतत् तस्माद्ब्रिटिशैरारक्ष्यस्य मतं देशस्यानुचरत्वम् ॥२३॥
मन्येत कदाचिन्नास्तेऽनुचरत्वं देशस्य महत्त्वं हन्तुमवश्यं तत् ।
भुङ्क्ते दधि यो नासौ तन्मथितं साकं स्फैडरिको ह्लादाल्लिखति स्म-॥२४॥
ग्रन्थे विदिते प्राक्प्रत्यग्भवितव्ये यद्भारतवास्तव्योऽद्याप्यनुवेत्ति ।
यत्सर्वविनाशे प्राप्ते ब्रिटिशा हिन्दुस्थानविनाशान्तर्गास्तमवेयुः ॥२५॥

यावद् भ्रममातिष्ठत्येष न तावत् स्वातन्त्र्यकृतेऽयं कर्ता यदि यत्नं चेत् ।
स्पष्टस्तदभिप्रायो यत्प्रतिगामी वा सम्प्रविदायी वोदारदलीयः ॥२६॥
यैः साकमभूत्तस्याध्यक्षतया स्वं संरक्षन्नव एषां मध्येऽस्त्वयमेकः ।
कांग्रेसिकविश्वासो नेदृश आस्ते ज्ञाप्यत्वगतानां केषांचन स स्यात् ॥२७॥
एतेऽप्यमुना सर्फैड्रिक्लेखमतेनाभूवन्नाश्वस्तहृदो वा आङ्ग्लाह्वयदेशे ।
यावन्नहि हिन्दुस्थानाद् भ्रम एषोऽपैत्युक्तजनास्तावत् सहयुक्ताः ॥२८॥
यावच्च न सोऽयं स्वं सर्वविनाशं साम्मुख्यमुपेत्य स्वेनैव निरस्येत् ।
चेत्सर्वविनाशः सोऽयं भाग्ये लिखितः स्यात्तावन्नहि स्वातन्त्र्यं साधयते सः ।
यस्मिन् दिवसेऽस्मान् सेव्यं ब्रिटिशानाम्, आमन्त्रणमात्मीयं त्यक्ष्यति चैतद् ।
अस्य स्ववशित्वोद्योगः सपदि स्यान्नेदं तस्य भवेदाश्चर्याय कदाचित् ॥३०॥
एकाल्पितविंश्याः शत्याः पठिताश्चेदाङ्ग्लविचाराणां धाराभिरभिभूताः ।
नाश्चर्यमिदं त्वाश्चर्यं वरणं स्याद् विंश्यामिह शत्यां जाताभिरपि ताभिः ३१
चेतः परिवर्त्याभिर्दुर्घटनाभिश्चाभिः परिवृत्तिं, स्रष्टुं रचिताभिः ।
कृत्स्नाभिरिहैषां चेष्टाभिरपि भ्रान्तिर्नैव निरस्या तेषां पठितानाम् ॥३२॥
एकाल्पितविंश्यां पुनरस्यामथ शिष्टिः शिष्टब्रिटिशात्युच्चस्थितिलाभात् ।
पूर्णां धनसम्पत्तिं वा प्रभुताञ्चैतावत् सफलत्वं नासीदुपलब्धम् ॥३३॥
दीर्घं सफलत्वं शिक्षा च नवैषा सङ्घातगतं सामन्तार्हगुणानाम् ।
आद्यानामिहाकुर्वत्यां पृथुदोषाणां वा कियतां तत्कालं किल शिष्ट्याम् ।३४।
सत्त्वं वयमात्मन्याधातुमिहार्हाः-अस्माभिरिहाभूद्योगः किल दत्तः ।
पादोनशरद्विशत्या स्थितिमुच्चां शिक्षामधिगन्तुं सामग्र्यनुदानात् ॥३५॥
प्रेक्ष्यं परजात्या राष्ट्रैरथ चान्यैस्तुल्यं हृदि मत्वा त्वीशप्रियमाहुः ।
तत्प्राज्यमिदं चावन्याः सुरलोकं चित्ते सुचिरं मन्वाना अभवंस्ते ॥३६॥
कश्चिद्यदि तेषामेतत् शुभवर्गत्वं च प्रभुतां वा मन्येत समानम् ।
सोऽनुग्रहबद्धः, यदि सर्वे तत्सेवायां निरताश्चेद् हानिर्न तदीया ॥३७॥
तेषां तु विरोधः स्यादीशविरोधः पापं तदिदं स्याद्यत्नैर्दमनीयम् ।
आदेर्विदिशायामस्मिन् हि मनोविज्ञाने रुचिरं व्याख्यानमलेखीत् ॥३८॥
पारस्परिकं सौहार्दं निजशक्त्या साकं द्रविणे स्वामित्वप्रथनं तत् ।
एतां प्रकृतिं वा सारामसुखादौ यैषां धनवत्पुंसां पद्धतिमाधात् ॥३९॥

दैवत्वमिदं निम्नं चाप्तमनुष्यत्वाहंकृतिराश्चर्याधायकरङ्गम् ।
एवावदयं सत्ताह्वानभयेऽप्येतन्नाशमयद् भूयोऽवीवृधदारात् ॥४०॥
शत्यन्तजयूनां यूथं यदुपारम्भादेव च विश्वासं कञ्चिदधात्तम् ।
साफल्यमिदं तेषामस्त्यधिकारप्राप्तं निजयोग्यत्वाद्युपनीतम् ॥४१॥
अस्मिन् घटनामर्माबोधविधौ ध्याने चारुरुचेरास्ते वै विषयोऽयम् ।
आभिर्घटनाभिर्व्यक्ता ब्रिटिशानां वृत्तिः प्रतिकारे साक्षाद् विषयेऽस्मिन्॥४२॥
व्यक्तिर्नहि काप्येतस्याः परिणामप्राप्त्या भवति प्रायो वञ्चितचेताः ।
आङ्ग्लाः कठिनत्वादेर्हेतुमिहान्वेष्टुं बहिरेव प्रायः प्रयतन्ते ॥४३॥
मत्या ह्यपराधारम्भो भवति क्वाप्यन्येन कृतादागस्तो न तु नोऽसौ ।
व्यक्तिः स्वसुधारं कर्तुं सुमतिर्भूयात्तद्यदि सैषा तर्ह्याङ्ग्लजनाः स्युः ॥४४॥
तेषां भुवि चेष्टा चैषा परिवृत्तिः कार्या न निजे तैरन्ये परिवृत्ताः स्युः ।
सर्वं च जगत्प्रत्येतादृग् व्यवहारो यद्यस्ति किलैषां हिन्दुस्थलतोऽपि ॥४५॥
आङ्गलाश्च यथाऽस्मत्प्रश्नोत्तरणं काङ्क्षन्ते तदिहास्त्येव च स्पष्टम् ।
सान्त्वं ददतां तेषां तत्कथनं यद्यद्वै तैः कृतमस्माकं तच्छुभमासीत् ॥४६॥
स्वीयोत्तरदायित्वं चापि निरूढं तद्योग्यतया जातीयं भवितव्यम् ।
साम्राज्यमवेक्ष्य श्रद्धासहितञ्चेदं कश्चिद्भुवि पृच्छेत्तन्मूलमिहाज्ञः ॥४७॥
तर्हीदृशनास्तिक्ये पापिनि कोपो जागर्ति जुगुप्साभावो भवतीदृक् ।
इत्यत्र समेषां मूले प्रकटो धर्मोत्साह इहैकः साक्षात्क्रियते यः ॥४८॥
तैर्मध्ययुगीनै रोमोद्गतकीर्तौ कैथोलिकधर्मे तुल्यत्वमुपेतैः साक्षान् ।
अस्माकमनिच्छामिच्छामनवेक्ष्योद्धाराय कृतो यत्नस्तेन यशोऽर्थः ॥४९॥
आनुषङ्गिकं तद्व्यापारफलं स्यान्न्यायप्रियतायाः नीत्या व्यवहारः ।
एतां जनसूक्तिं प्रत्नां चरितार्थां कृत्वाप्यददर्शन् द्व्यर्थं त्वससाधन् ॥५०॥
अभ्युन्नतहिन्दुस्थानगतेत्यस्यार्थो ब्रैटिशयोगैः सृष्टिर्ह्यनुकूला ।
तत्रत्यजनानां केषाञ्चन निर्माणं ब्रैटिशसाम्राज्याकृत्यनुरूपम् ॥५१॥
यावद् ब्रिटिशादर्शान् ध्येयानि च तेषां मंस्यामह एतेऽर्हाः स्याम हि तावत् ।
लोके निजशिष्टैर्योग्या भवितारो विश्वासमिमं दत्त्वा साक्षादपि कृत्वा ।५२।
यद्यादृशमप्याङ्ग्ला नः स्ववशित्वं दद्युर्ह्युपयोगे तादृग्घि नयामः ।
इत्येव कृते स्वातन्त्र्यं सविधेऽभ्यागन्ता वयमेते मुक्ता भवितारः ॥५३॥

शङ्के त्वहमस्मिन्नाङ्ग्ले नवपत्रे नैतैः सह हिन्दुस्थानं सम्मतं स्यात् ।
स्वाभाविकमप्येतद् ये ब्रिटिशानामेते ह्यधिकारा इतरे रूढा वा ॥५४॥
ते 'भारतमन्त्री' पर्यन्तपदस्था अप्येवमिदं चित्रं चारचयन्ति ।
एवंविधवार्ता यासां न हि मूलं वाचा कथयन्ति त्वाघातमिवेदम् ॥५५॥
आश्चर्यंकरीयं वार्ता कतिचित्तांस्त्यक्त्वा सविशेषज्ञानप्यथ चान्यान् ।
आङ्ग्लाः खलु सर्वे सन्ति ह्यविवेकास्ते भारतदेशे नित्यानवधानाः ॥५६॥
वस्तुस्थितिरेषा यर्हि श्रुतिबाह्या तर्हि क्वनु तेषां ज्ञातोऽभवदात्मा ।
तै र्भारतवर्षस्यान्तः स्थितिरेषा नास्ते विदिता ते देहात्मविमुग्धाः ॥५७॥
तेषामधिकारोऽयं भारतवर्षे ह्यस्ति बलात्कारो वस्तुस्थितिदृष्ट्या ।
नात्मानममुष्यैते जातु विदन्त्येनं वेत्तुं नहि यत्नं कुर्वन्त्यतिमत्ताः ॥५८॥
नैतन्नयनाभ्यां बद्धे नयने स्वे बध्नन्तु वराकास्ते वा कथमेते ।
लज्जाविनते ते चास्तां परिवृत्ते अन्योन्यमिहासन्ने वर्षद्विशतीतः ॥५९॥
ते सम्मुखमायाते अप्यनुभूते स्तोऽपूर्वतरे अन्योन्यारुचिभुग्ने ।
नैते परिचेतुं काङ्क्षामपि चित्ते तां जात्वपि धत्तोऽन्योन्यं धृतशङ्के ॥६०॥
घोरे पतनेऽधो जातेऽपि दरिद्रत्वे भारतवर्षः शालीनतयाऽऽस्ते ।
साकं हि महत्त्वं प्राचीनसरण्या चैवाधुनिकार्त्या दान्तेऽपि किलास्मिन् ।६१।
श्रान्त्या भरनम्राः सन्त्यस्य निमेषास्तर्ह्यपि तस्यान्तर्दीप्तिरिहोद्भाति ।
तस्याणुषु काचित्स्वच्छन्दविचाराणां कल्पनया साकं भावशतानाम् ॥६२॥
कान्तिः प्रतिभात्येषा जीर्णशरीरे चैवात्मिकभव्यत्वं भासत एवान्तः ।
स्वस्यां चिरयात्रायां नैकयुगैर्मार्गे बहुज्ञानं तत्सानुभवञ्च ॥६३॥
देशान्तरजैर्वाणिज्यं स्वकुटुम्बत्वं पतनं चोत्थानं क्षयवृद्धी ।
सर्वस्थितिकाले सोढा महती बाधाऽभुज्यत दुःखं दृष्टं बहु दृश्यम् ॥६४॥
प्रत्ना न च सात्मीया संस्कृतिरुत्सृष्टा प्राप्तमभूत्तद्वच्छक्त्या बलमुच्चम् ।
देशान्तरवास्तव्यास्तावदिमे भोज्यन्ते स्म तमध्यात्मानन्दममन्दम् ॥६५॥
उच्चैश्च घटीसूचीवत्क्वचनारूढं क्वापि च नीचैरायातमनेन ।
स्वैःसाहसिकैर्यत्नैरीश्वरस्वर्लोकान्तां गतिमप्येष विन्दति यावत् ॥६७॥
उद्घाट्य च तन्मर्माण्येतत्तदपश्यद्भू यश्चाददर्शज्जिज्ञासुजनानाम् ।
कट्वन्वभवन्नारककुण्डे जातं त्वपि दुःखं चैतन् ग्यरुरूपच्च परेषाम् ॥६७॥

खेदप्रदविश्वासानां पतनाधाराणां च मृषारीतीनामपि सत्त्वे ।
तैश्चास्य कृताधः पाताच्च विचाल्यो नाभूत्परमादर्शादौपनिषद्यात् ।।६८।।
यत्रत्य ऋषीणां काचिच्च कुशाग्रा ऋद्धिः कृतशुद्धिर्नूत्नार्थशतानाम् ।
सत्यस्य च शुद्धयै व्यग्रा जडसूत्राण्येवाश्रयमाणा नातिष्ठदिहाद्या ।।६९।।
व्यर्थानिह कर्म्यान् काण्डान् विधिवैविध्यानीह च लुप्तप्रायाणि विसृज्य ।
नैतै भुवि लोके स्वं रक्षितुमैच्छन् रुष्टादपि तु त्रेधा संविदितात्सर्वान् ।७०।
नैच्छन् परलोके स्वर्गादिकमेते तु प्रत्युत सत्यज्ञानं च प्रकाशम् ।
त्वं मामसतस्तत्सत् प्रापयध्वान्ताज्ज्योतिरथो मां मृत्योरमृतं तत् ।।७१।।
अभ्यर्थयितुं त्वित्यादेशमदुः सर्वस्मै जगते ते गायत्रिकया च— ।
कृत्वा जपमद्यत्वे प्रातरथो सायं लक्षजना, याचन्तेऽत्र प्रकाशम् ।।७२।।
यद्राजनयिक्यां 'दृष्ट्या बहुधा' खण्डं खण्डमभूद्भूयः किन्तु सदाऽखण्डम् ।
आध्यात्मिकता नित्यं संस्कृतिमस्यारक्षद्विविधत्वेऽपीदं स्थितमेकम् ।।७३।।
कृत्स्नेतरदेशेष्वस्मिन्नपि कश्चिद्दोषोऽस्ति गुणो वास्ते मिश्रणमेकम् ।
आच्छन्नगुणेऽस्मिन् शोध्या अभवंस्ते, दोषाः स्फुटितास्तु ।।७४।।
सूर्यस्य कठोरो घोरश्च किल द्योतोऽद्योतयदेनम् ।
आस्ते समता हिन्दुस्थान—इटल्योः, प्रत्नावसुको द्वौ ।।७५।।
प्रत्नास्त्युभयोः ख्याता संस्कृतिरप्यास्ते किन्त्विटली तस्मान्नूतनः किञ्चित् ।
तस्माच्च विशालं वै भारतवर्षं द्वन्द्वस्य च खण्डं खण्डं कृतमास्ते ।।७६।।
अस्मि स्त्विटलीयाः, स्मो नूनमितोदृश्या भावनया प्राप्ता नो परिवृत्तिम् ।
वैविध्यविरोधेष्वस्याः स्थितमैक्यं हिन्दुस्थलवन्न प्रान्तप्रमुखत्वम् ।।७७।।
ऐक्यं त्विटली मध्येरोमनमैक्यं मुख्यं त्विटलीयं मन्ये हि तदङ्गम् ।
अस्मिन्निटलीसंज्ञं तन्नगरं स्रोतोवत् प्रभुसत्त्वं चैक्यामृतराशेः ।।७८।।
तादृङ् न च हिन्दुस्थाने किमपि स्थितया तु व्यलसत्कुत्रापि तु केन्द्रम् ।
यन्नाम वयं काशीं मोक्षपुरीं वक्तुं शक्नुम आद्यस्यानेहस एनाम् ।।७९।।
सेयं न हि हिन्दुस्थानस्य, तथा पूर्वे व्याख्यान्ति महाद्वीपस्याप्यभवत्सा ।
रोमण्यवदत्रास्थाप्यं नहि साम्राज्यं वा न च सत्ताऽभूल्लौकिकदृष्ट्या ।।८०।।
सा भारतवर्षेऽस्मिन् संस्कृतिरासीद् व्याप्ता तदियं प्रोक्ता विश्वविचारा ।
किञ्चिन्नगरं तस्याः केन्द्रतया वक्तुं शक्यमभून्नेदानीं न च पूर्वम् ।।८१।।

कन्यासुकुमारीतः सा बदरीनाथान्तं जगन्नाथान्तं द्वारवतीतोऽभिव्याप्य ।
तुल्यैव विचाराचाराश्रयिणी धारा सर्वमतत्वाज्ज्ञाता भवति स्म ॥८२॥
यस्याः क्वचनैकक्षेत्रे च विरोधे सर्वत्र प्रतिध्वन्येतेत्यपि काचित् ।
आसीद्रचना प्राचारः किल देशेऽस्मिन् किन्त्विटली साऽऽसीदात्मनिमग्ना८३।
पाश्चात्ययुरोपे सा स्वौ संस्कृतिधर्मौ प्राचारयदस्मिस्तु यथेयम् ।
हिन्दुस्थलमापूर्वेश्यापदमेतौ प्राञ्चौ त्वतिप्राचीनेऽप्यथ चीने ॥८४॥
मान्योऽप्यभवद्धिन्दुस्थानसमानः, शैथिल्यमुपेते तस्मिन्निटलीके ।
चीनस्य युरोपे तौ संस्कृतिधर्मौ प्राचीनतरतां च प्राप्ताववकाशम् ॥८५॥
मेटर्निखनाम्नाऽलेख्यार्स्टियिकामात्येनेटलि-शब्दो भूगोलपरोऽयम् ।
तद्भाविभिरस्मन्मेटर्निखकैः प्रायोजि स शब्दोऽस्मद्देशपरार्थे ॥८६॥
आश्चर्यमिमौ देशौ स्तः सदृशौ भूगौलस्थितिदृष्टयापीमौ त्रिजलाढ्यौ ।
आङ्ग्लास्ट्रियिकासादृश्यं त्वतिमात्रं, तद्भारतवर्षे रुच्यं त्वधिकं तत् ॥८७॥
विंश्यां शतवर्ष्यामाङ्ग्लस्य समत्वं चेदास्ट्रियया विंश्यां एककलव्या ।
मानोन्मद तेजस्विन्या हृठ धारिण्या या तुलना स्वाभाविक्यनया सा ॥८८॥
तेजस्वितया ख्यातायास्तदिदं यैर्मूलैरधुना तैः संकुचितैर्वै ।
वृक्षः पतनाणूनामावसनादन्तःशून्यतया यायात् प्रत्युपपातम् ॥८९॥
एतच्च महाश्चर्यं मानवताढ्ये देशेऽस्य निवेशो रोद्धुं न हि शक्यः ।
जाता प्रकृतितः संस्कारा अपि पूर्वे सन्तीह तथा चास्मद्भारतमेतत् ॥९०॥
स्याद्भारतमातेत्येका सुभगा रम्या स्त्री जरती सत्यैषा युवतिःस्यात् ।
चक्षुर्भूतशून्यत्वाऽऽशङ्कितदुःखा वैदेशिकलोकैः पीडयाप्य वमान्या ॥९१॥
आर्तस्वरसम्पाद्याह्वानकृतायत्या रक्षणसंकल्पा दीनमुखी सा ।
एवं विधचित्रा सैकान् भावनयोद्दीप्यानेकसुतानायुंक्ते प्रतिकर्तुं ॥९२॥
'पुत्रा मम पुत्र्यो रक्ष्या मे' इति चाहं रक्ष्येति रटन्ती तेभ्यो बलिदानम् ।
वीरस्य नरस्येच्छन्ती महिलेयं प्रायः स्फुरतीवाक्ष्णोरग्रपथे सा ॥९३॥
अस्ति त्वयमस्मद्देशः कृषकश्रान्त्याजीविजनानां गृहकल्पः ।
देशो नहि सौन्दर्यात्मा न दरिद्रत्वं सुन्दरमस्तीति क्वास्ति रमा सा ॥९४॥
येषामिहचित्रं तत्कल्पितमासीत् क्वेमे कृशकाया नग्नाः कटिनम्राः ।
ग्रामेष्वथ यन्त्रेषु व्यापृतिमन्तः, कार्येषु निजेषु व्यग्रा बलवन्तः ॥९५॥

किं सा प्रतिनिध्यात्मास्ते कृषकाणां यद्वा लघुसंख्यानां तन्मथने वा।
तच्चूषणकर्मण्यासक्तजनानामेषा प्रतिनिध्यात्मैषां शासनिकानाम्॥९६॥
यैर्घोरतरा रीतीनां प्रभरास्तेष्वारोपिता अस्पृश्यत्वादितयोत्थाः।
ये काल्पनिका बुद्धया सत्यमुपेक्ष्यासत्ये जगतीह व्याघ्नन्त्यथ सत्यम् ॥९७॥
भेदे सति जातौ पंक्तावपि तेषां संघर्षपराणामेकं किल सूत्रम्।
बध्नाति हि हिन्दुस्थाने तदिहैतांस्तेषां दृढतास्ते विस्मापकशक्तिः ॥९८॥
शक्तेरिदमीयायाः कारणमास्ते सा निष्क्रियशक्तिर्जाड्यं न च धारा।
आस्ते महिमा यश्चाप्येतदुपेतस्तदिहास्ते पुष्टिपदमेकम् ॥९९॥
बाह्यप्रभुतायास्तेजः प्रतिकारे तेजस्तदहो श्लाध्यं सफलानाम्।
तस्याद्युअवरोधेषूतक्तराणां साम्मुख्यविधाने गूढ बलानाम् ॥१०१॥
सर्वापि च सात्मन्यालोयत भूयःशक्तावपि सत्ता स्वाराज्यनयोद्या।
सा राजनयिक्या दृष्ट्या सुलभं चैकत्वं वत नान्तः संसाधयते स्म ॥१०१॥
एवं ननु विज्ञातं नस्तदिदं द्वन्द्वं न ह्युपयोगि स्यादेतदवज्ञा।
मोहाद्विहिता तेनैषा क्षतिरत्यन्ताप्ता त्वितिहासे प्रत्ने क्वचनापि ॥१०२॥
नो राजनयिक्या गीता विजयाशंसा नापि च सैनिक्येषा परिगीता।
सम्पत्तिषु सम्पत्त्यर्जासु घृणा व्यक्तिष्वस्य तथाऽभूत् तस्याः परिणामः।१०३
सम्मानधनोऽपश्यद्भारतवर्षो यस्माद् धनसम्पत्ती क्षणिके ते।
सम्मानमपश्यत्तेन प्रविलोक्यैष द्वन्द्वसमायोगं दुर्घटमेनम् ॥१०४॥
सिद्धान्ततया सम्भारो जनसेवालभ्यः, कञ्चिद्यदि नाशास्ते सेव्युपहारम्।
सा संस्कृतिरेषा प्रत्ना किल वातोत्पातानतिभीमान् नित्यं सहमाना ॥१०५॥
वक्रानपि वात्याचक्रान् सहते स्माजस्रं ह्यमरप्राणा जीवयतीयम्।
वाह्यं निजरूपं वाह्यं समरक्षत् तत्त्वं तदपि त्वन्तर्यातमरक्षत् ॥१०६॥
किञ्चित्तु विलुप्तं रम्यं तदगम्यं चाद्यापि पराक्रमाद् वाणिजिकेषु।
तेषामपि नूत्नेयं संस्कृतिरास्ते पाश्चात्यतया ख्याता वाणिजिकीति॥१०७॥
वृद्धा तु जिता स्यात्तारुण्यबलेन ज्ञानं विजितं स्याद्विज्ञानबलेन।
आस्ते किल पाश्चात्यानां सविधे विज्ञानं शतशो मूर्खेभ्यो दददन्तम्॥१०८॥
अन्योन्यगलच्छेदिन्या तु सभासाधुत्वाभिधया लोकेऽङ्गीकृतदोषान्।
संशोधयितुं चानीतास्ति चिकित्सा सहयोगः साम्योक्तिरियं वा ॥१०९॥

सर्वस्य हितार्थं वा जातिसमाजाभ्यर्चा इति सिद्धान्तास्तत्सहचाराः ।
एते नहि भिन्ना ब्रह्मोचितसेवादर्शात् परमस्यास्तात्पर्यमिदं स्यात् ।।११०।।
धर्मात्मतया न स्यात्कर्मितया सर्वे स्युर्भुवि ब्रह्मीभूता इति तावत् ।
भ्रष्टो भवतु प्रायो जातिकृतो भेदोऽयं तद्भारतमेतन्नेपथ्यधरः स्यात् ।१११।
प्रत्नं किल नेपथ्यं खलु विखण्डीभूतं तदिहाधेयो यत्नविशेषः ।
प्रत्ना अथ नूत्नास्ते सम्मिलिताः स्युर्भूमौ समतायुक्ताः सन्तु विचाराः।११२।

महामहिम-भारतीयराष्ट्रपतिसम्मानितः पुरस्कृत एषः
कविशिरोमणिरमीरचन्द्रो विरचितवान् यद्गुरुतरकाव्यम् ।
'हिन्दुस्थानं प्रत्नं नूत्नं' नामायं सर्गस्तस्यायं
स त्रिपञ्चाशत्संख्याकः समाप्तिमेति स्फुटवहुवृत्तः ।।

ब्रिटिशशिष्टे रहस्योद्घाटनम्

जलधरमाला

चतुःपञ्चाशः सर्गः

हिन्दुस्थाने, ब्रिटिशकुशिष्टेः कीदृक्सोऽस्थान्नव इतिहासः।
हिन्दुस्थानी ब्रिटिशजनो वा कश्चिन्निष्पक्षो विमृशति यावत् ॥१॥
अस्मिन् दीर्घे नव इतिहासे निर्लेपः सन् लिखति हि कोऽयम्।
तोल्यं शोध्यं द्वयमपि चेतोविज्ञानेऽथो ह्यणुघटनौघः ॥२॥
एतच्चोच्यामह इह शिष्या दत्तं युष्मज्जनपदहस्ते।
वस्त्वेतद्यच्छतशतवर्षे नैव प्राप्तं क्वचिदपि तेन ॥३॥
यत्सत्तास्मिन्नुपसुद्वीपे कोणे कोणे भवति सुमान्या।
सेयं शिष्टीः रचितवती या वर्षशतैरपि तेन न लभ्या ॥४॥
राज्यं वैधानिकमिह चैकं न्याय्यं दक्षं शासनबन्धम्।
हिन्दुस्थाने रचयति शिष्टिं क्लृप्तिं व्यक्तिस्ववशिमसिद्धिम् ॥५॥
यावत्सूते ब्रिटिशमिदं तच्चैकच्छत्रे सुघटितराज्यम्।
सम्यक् सम्प्रत्यथ परिवर्त्त्यान्योन्यं चैक्यं नृपनयिकं तत् ॥ ६ ॥
राष्ट्रीयत्वं किल परिपुष्टं वर्षेभ्यो यत्सुलभमिहासीत्।
न्याय्या शिष्टिर्निजवशता च व्यक्तेः क्लृप्ता ब्रिटिशसुशिष्ट्या ॥ ७ ॥
हिन्दुस्थाने नवयुगकाले सिंहालोके विधिविहितेऽस्मिन्।
बह्व्यो वार्ता महिमसमेता अर्थाध्यात्मक्षतिददृश्याः ॥ ८ ॥
शिष्ट्या वैदेशिकतरतायामस्मानेषा क्षतिरुपयाता।
दृष्टो भेदो भरतधरायाः सत्ताया वा ब्रिटिशजनानाम् ॥ ९ ॥
यन्निन्दामो वयमिह देश्यास्तच्छंसन्ति ब्रिटिशजना यत्।
दत्तानि स्फुट इह लाभः स्वाम्यानन्दो यदलिखदेतत् ॥ १० ॥
आङ्ग्लं राज्यं भरतभुवीदं यद्यप्यास्ते विविधविधानम्।
तेष्वेकास्तेऽद्भुततरवार्ता हानिर्भाति स्फुट इह लाभः ॥ ११ ॥

सत्यं त्वेतद् गतशतवर्षात् हिन्दुस्थाने विनिमयना याः।
विश्वव्याप्ता ध्रुवमभवंस्ताः प्राक्प्रत्यञ्चाविह समभाजौ ॥ १२ ॥
प्रत्यग्यूरोपत इह पश्चाद्देशेष्वन्येष्वपि विकसत्सु।
उद्योगेषु प्रपरिणतौ तद् राष्ट्रीयत्वं दृढप्रभुता सा ॥ १३ ॥
अभ्युद्याते ब्रिटिशजनास्तच्छ्रेयोभाजो भवितुमिहार्हाः।
द्वारं प्रत्यग्जनपदगत्यै हिन्दुस्थानस्य हि विवृतं तैः ॥ १४ ॥
प्रत्यग्विज्ञानमथ च तस्मै सोद्योगं चार्पितमिह किञ्चित्।
तत्कृत्वौद्योगिकविकसित्याः कण्ठोद्बन्धोऽक्रियत पुनस्तैः ॥ १५ ॥
यावद्वैवश्यकमुपनीतास्तात्कालिक्या स्थितिविधया तैः।
हिन्दुस्थानं प्रथममभूत्तत् सुक्षेत्रं संस्कृतिमिलनस्य ॥ १६ ॥
प्रत्यक्स्थैश्यागतयवनानां प्राग्घिन्दुस्थानगतऋषीणाम्।
संस्कृत्योः सम्मिलननिकेतं हिन्दुस्थानं त्विदमिति मन्ये ॥ १७ ॥
विश्वावासभुवि प्रथमासीत् या तां पश्चादभिहितवान् यत्।
रूपं तत्संस्कृतियुगमिश्रं स्वस्मिन् गर्हाऽऽदृतिरपरस्मिन् ॥ १८ ॥
प्रत्यग्दूरात्तदितरवीचिर्वेगादायात्तदिदमभूत्तत्।
युद्धक्षेत्रं समकृतिकेन्द्रं नूत्नं प्रत्नं द्वितयविचारे ॥ १९ ॥
वीचिः सा स्याद्विजयवती चेत् सर्वे प्रश्नाः स्वयमहनिष्यन्।
यैरानीता स्वयमिह ते तामत्रारुन्धत् प्रविषमदेशे ॥ २७ ॥
औद्योगिक्यां नृपनयजायां बाधां कृत्वोन्नतिसरणौ नः।
प्रत्ना रूढीरिह परिपोष्यारुन्धत्ते नः प्रगतिपथं च ॥ २१ ॥
प्रत्नं यन्माण्डलिकप्रभुत्वं रीतिर्नीतिस्त्वधिक पुराणी।
मूले बद्धा दृढदशनानां तासां बन्धे निगडितपादाः ॥ २२ ॥
हिन्दुस्थानेऽभ्युदयनमेतच्चाढ्यस्यास्ते क्वचन दलस्य।
तत्रैतेषां नहि शुभभावो हेतुर्जातः स हि शुभयोगः ॥ २३ ॥
उद्योगानामुपकरणानां सामग्रीणां रयलधनानाम्।
प्राचाराद्यद्विनिमयनं तद्बन्द्धुं नाशक्यत तत एतत् ॥ २५ ॥
रोद्धुं वा मन्दयितुमिदं यच्छक्यं ह्यासीदिति तदकुर्वन्।
लाभः स्पष्टं समभवदेषामित्यस्याः स्थापितमिह हर्म्यम् ॥ २६ ॥

शिष्टैः पुष्टोऽभवदभियोगो वाच्यं निश्चप्रचमिदमैतैः ।
अष्टापञ्चाशत इह तस्याः कम्पन्याः प्राक्भारतभूमेः ॥ २७ ॥
सर्वं क्षेत्रं ब्रिटिशसम्राजः शिष्टिर्मान्याऽभवदथ शिक्षा ।
कक्षामभ्युन्नतिपरकाष्ठामध्यारूढा सपदि परस्तात् ॥ २८ ॥
एतादृक् शिक्षणविषयेऽभूत्पूर्वं सा नोन्नतिरिति केचित् ।
अप्यारोहावतरणकाले हिन्दुस्थानस्य सदितिहासे ॥ २९ ॥
नेदं वाक्यं त्ववितथमस्यां शिष्ट्यां वै साक्षरनरतायाः ।
संख्यानं न्यूनतरमुदीतं तद् भूयोभिः कथितमिहास्ते ॥ ३० ॥
चेत्तत्सत्यं मतलव एष स्यात्तद्वाक्ये यदिह विशेषात् ।
पूर्वैरौद्योगिकयुगसाम्यं विज्ञानोद्योगयुगविकासे ॥ ३१ ॥
तत्सम्बद्धा भवति हि शिक्षा सा स्याद् भूयस्यपि न विशङ्क्या ।
इत्थं शिक्षाक्रमविधिभेदे साम्यं नूनं ह्यनुचितमास्ते ॥ ३२ ॥
अस्यां शत्यां जनपदमीदृङ् न स्याद्यस्मिन् प्रगतिविशेषः ।
शिक्षाक्षेत्रेऽभ्युदयनगाथा यस्मिंश्चैषा नहि कथिता स्यात् ॥ ३३ ॥
स्यान्नामास्य प्रगतिकथेयं हिन्दुस्थानेऽनतिशयनूत्ना ।
एतादृक्ष्युन्नतिरिह देशे प्राप्येतौद्योगिकयुगयोगात् ॥ ३४ ॥
प्रायोऽसत्त्वेऽपि ब्रिटिशशिष्टेरित्येष स्याद्वितथविवादः ।
अन्यैर्देशैः सह समतायां स्यादेकस्मिन्नधिकतरैव ॥ ३५ ॥
अस्माभिः शिष्टियतनरोधे यत्नः कार्योऽभवतधिको यत् ।
यान्यासंस्तद्धिहिततराण्याबन्धुं कण्ठं भरतभुवोऽस्याः ॥ ३६ ॥
तारं निस्तार-रयल-दूरेभाषत्वाद्या न ब्रिटिशशिष्टेः ।
भद्राभद्रत्वमिह निचेतुं हेतुत्वं यान्ति जनपदेऽस्मिन् ॥ ३७ ॥
एतत्सर्वं त्वतिवरणीयं तैः स्वार्थैऽभूदिति विनियुक्तम् ।
सर्वेभ्यः प्रागिदमुपनीतं तत्रापि स्मः सपदि कृतज्ञाः ॥ ३८ ॥
किन्त्वौद्योगिकविकसित्या मित्राण्येतान्युपहृतवन्ति ।
शिष्टेः पुष्टयै न तु जनतुष्टयै नाडीतुल्यान्यथ धमनीभिः ॥ ३९ ॥
ताभिर्विज्ञानमवततं स्याद् व्याप्तं चौद्योगिकरुधिरं स्यात् ।
व्यापारस्य प्रगतिरिह स्यादुत्पाद्यानां प्रवितरणं स्यात् ॥ ४० ॥

कोटीनां जीवनधनलाभः स्यादीदृक्कश्चन परिणामः ।
शिष्टेस्त्वेषामिह विनियोगे त्वासीत्पञ्चाङ्गुलदृढतार्थः ॥ ४१ ॥
वस्तु त्वाङ्ग्लं विपणिषु यायात् स्यात्तत्रैकाधिकृतिरियं नः ।
इत्युद्देश्यात्तदिह प्रणीतं ताराद्यं तत्फलितमिहैषाम् ॥ ४२ ॥
अस्म्यौद्योगीकरणसपक्षश्चोत्पाद्यानां वितरणपक्षः ।
हिन्दुस्थानस्थलगतयात्राःस्वेतत्प्राणप्रदमपि यानम् ॥ ४३ ॥
लौहं वन्द्यं तु रथवयानं मन्येऽहं भारतयमनार्थम् ।
हिन्दुस्ताने' च ब्रिटिशशिष्टेराज्यं यत्पौरुषमुपक्लृप्तम् ॥ ४४ ॥
शिष्टेः कार्यं निजपरिरक्षामात्रं त्वासीदितरदमीषाम् ।
भृत्यानां तत् सकलजनीनं राजस्वं सैनिकव्ययसिद्ध्यै ॥ ४५ ॥
यद्वा शिष्ट्यै पुरुषदलार्थं वृत्त्यै वा वार्धुषिकजनानाम् ।
आर्थिक्यावश्यकतरता तूपेक्ष्याऽभून्नागरिकजनानाम् ॥ ४६ ॥
शिष्टचाः स्वार्थे बलिवदमुष्या दानं वा सांस्कृतिकदृशा ताः ।
सर्वापेक्षा अपि जनतानां किञ्चिदवर्ज्यं स्मृतिबहिरङ्गम् ॥ ४७ ॥
ताश्च स्वाराजिकधृतयोऽमूर्या रूपं स्वं विनियमयन्ति ।
अन्यैर्देशैः किल गतशुल्कं शिक्षालाभोऽधिगत इहास्ते ॥ ४८ ॥
लोकस्वास्थ्यं गतधनजीवाजीवः श्रान्त्याश्रितजनरोगः ।
नैष्कर्म्ये निश्चितिरिति सर्वं तस्याः शिष्टेः कलनमतीतम् ॥ ४९ ॥
सा ह्येतेषु व्ययबहुलेषु कार्येषूद्योक्तुमपि तु नैच्छत् ।
शैली तस्याः करग्रहणस्यासीदत्यन्तं प्रगतिविरुद्धा ॥ ५० ॥
बह्वायेभ्यो मितमथ लब्वायेभ्यो यस्यामधिकमपेयम् ।
रक्षाशिष्ट्योरधिकमपेयं यस्मिन्नायः सकल उपेयात् ॥ ५१ ॥
आङ्ग्ला शिष्टिः प्रमुखविशेषा सार्थं राज्ञो नयमधिकुर्यात् ।
यत्सा नान्यत् किमपि विधत्तां गौणं त्वासीदितरदशेषम् ॥ ५२ ॥
चेत्केन्द्रीयां व्यधित सुशिष्टिं सृष्टिं चेद्दक्षपुरुषपङ्क्तेः ।
कुर्यात्तस्याः सममपि श्रेयः सा स्वीकुर्यात् परमिह लोकाः ॥ ५३ ॥
हिन्दुस्थानावसतिजनोयः स स्वं भाग्यं क्वचन न शंसेत् ।
ऐक्यं वस्तुस्तुतिपदमस्मिन् नान्याधीना विदधति गर्वम् ॥ ५४ ॥

स्वैरित्वात्तद्बलमपि शिष्टेर्लोकानां मूर्धनि गुरुभारः ।
शक्तिः सा पूरुषदलगा चेद् रक्षार्था, तानिह परिभक्षेत् ॥ ५५ ॥
वट्रॉण्डो यल्लिखति-विशेषं सभ्यत्वेऽस्मिन्नथ यवनान्याः ।
तत्रायोग्यं पौरुषमासीत् यस्याद् भद्राः स्वगतमरक्षन् ॥ ५६ ॥
अत्राङ्ग्लानामधिपतितायां शान्तिं प्राप्ना वयमखिलाः स्मः ।
साम्राज्यान्ते किल मुगलानां देशः कष्टादलषत शान्तिम् ॥ ५७ ॥
शान्तिर्मूलास्पदमिह वस्तून्नत्यै चावश्यकमिह लोके ।
प्राप्तायाः स्वागतमचरामः शून्यं त्वस्या बहुतरमासीत् ॥ ५८ ॥
तद्दत्त्वा चेद्विनिमयतस्तां गृह्णीमः स्याच्छ्मशयनशान्तिः ।
तद्द्वारा चेत्प्रभवति रक्षा सा स्यात्कारागृहगतरक्षा ॥ ५९ ॥
यद्वा शान्तिर्भवति निराशा तेषां ये रक्षितुमसमर्थाः ।
जेतुर्वैदेशिकजनतो या शान्तिः संस्थापनमुपयाता ॥ ६० ॥
तस्यां विश्रामसुखदतायां दुःखादेवाधिगतगुणाः स्युः ।
ये सत्यायामिह खलु शान्तौ भूयासुर्वै सुलभतरास्ते ॥ ६१ ॥
युद्धं नामाहुरिह भयाढयं तस्मादात्मानिशमवनीयः ।
चेतोवैज्ञानिकविलियम् सादगुण्यप्रोत्साहकमिति वक्ति ॥ ६२ ॥
ते तन्निष्ठाघटनदृढत्वान्येवं वीरत्वपुरुषताद्याः ।
शिक्षाऽऽशक्तिव्ययपरिमित्यात्मन्यास्थाशोधकमतिमुख्याः ॥ ६३ ॥
जेम्सोऽसौ सङ्गरगतमेकं नैत्यं रूपान्तरमनुवेष्टुम् ।
येते युद्धस्य च भयदत्वं वर्जित्वोत्साहयतु गुणांस्तान् ॥ ६४ ॥
यस्यां जातावनुविशतिस्म हिन्दुस्थाने सुलभतरांस्तान् ।
नान्वध्यायत्सहि समपश्यत् तान् भङ्गे नूनमसहयोगे ॥ ६५ ॥
युद्धस्यैतद्द्वयमपि रूपं नैतिक्यं शान्तिमयमथासीत् ।
तल्लब्धं तेन समभविष्यत् हिन्दुस्थानं यदि समधास्यत् ॥ ६६ ॥
ऐतिह्यानां च यदि परन्तद्वाणीसम्भाषणमपि चिन्त्यम् ।
तच्चिन्ता स्यादिह हि वृथेति मत्वा विश्वासमनुवदामि ॥ ६७ ॥
हिन्दुस्थानं यदिह युरोपे विज्ञानोद्योगयुजि सुबद्धम् ।
जातं भव्यं तदिह महीयान् विज्ञानाख्योऽभवदुपहारः ॥ ६८ ॥

तन्नैयून्यं महदिदमासीत् तेनर्ते तन्मृतमिव चासीत्।
शैली सम्बन्धकरणशीला दुर्भाग्येनाभवदिह पूर्णा॥ ६९ ॥

वेगाघाता अविरतजाता एवास्माज्जागरयितुमर्हाः।
एतद्दृष्ट्या प्रतिगतिशीला व्यक्तेर्भक्ता ब्रिटिशकुलोत्थाः॥ ७० ॥

कर्मण्युद्बोधनकरणेऽस्मिन् युक्ता जात्यन्तरकमपेक्ष्य।
अन्योन्यस्मिन्नतिशयभेदा वेगाघातान्वितरितुमर्हाः॥ ७१ ॥

तेऽस्मभ्यं राजनयिकमैक्यं प्रादुर्यद् वाञ्छितमतिमात्रम्।
अस्मास्वैक्यं भवतु न वा तत् राष्ट्रीयत्वं प्रगतिमुपेतम्॥ ७२ ॥

तादृक्षैक्ये निजमनुरोधं कुर्यादेवेत्युपजनितोऽयम्।
अद्यत्वे सन्ति न बहुभागा अर्वाणस्ते स्वपरवशाद्याः॥ ७३ ॥

राष्ट्रीयैक्यात्प्रविलसदैक्यास्ते सर्वे स्युर्यदि न विषक्ताः।
साम्राज्याकांक्षितमिदमेषां किन्त्वस्माकं पथि तु यथैतम्॥ ७४ ॥

साम्राज्येच्छा जनयति भेदं घोरं चाल्पातरतमन्वम्।
तद्वै यौयुत्सविकप्रवृत्तिं प्रोत्साह्यास्मानिव कलहे तान्॥ ७५ ॥

अप्यापात्योत्थितमिह वेगं राष्ट्रीयत्वोपजनितमेनम्।
भेदोपायैरथ शमयित्वा साम्राज्यं स्वं स्थिरयति नीत्या॥ ७६ ॥

निष्पक्षत्वं कपियुगले तन्मार्जारस्येव हि कलयित्वा।
तद्रोटीवन्निजवशतां तां मन्दं मन्दं ग्रसति छलित्वात्॥ ७७ ॥

हिन्दुस्थाने घुणलिखितार्णन्यायाद्वै राजनयिकमैक्यम्।
प्राप्तुं राष्ट्रीयमिदमथैक्यं लीनं नूनं नृपनयिकेऽस्मिन्॥ ७८ ॥

तेनोद्दीप्यं बलमिह शिष्टिस्तेषामावाहयति रणार्थम्।
अस्याकर्षंत्वपि किल भेदोऽभ्यो नानामतजनितोऽयम्॥ ७९ ॥

तेषां नानामतहवनानामग्निं प्रोद्दीपयति च वातः।
साम्राज्येच्छाव्यजनकृतोऽयं फूत्कारैर्वा बलमुखक्लृप्तैः॥ ८० ॥

एते नानामतहवनोत्था अन्योन्यद्रोहजनिततापाः।
मार्गेऽस्माकं निपतितघोरग्रावाणो वा विदधति रोधम्॥ ८१ ॥

आङ्ग्लानां भारतहृदयोपारूढानां निष्ठुरचिरकालः।
यत्पादोनद्विशतशरत्कस्तेऽस्मिन्स्वैरा इव विहरन्ति॥ ८२ ॥

कार्यं कुर्वन्त्यपि च यथेच्छं हिन्दुस्थानं त्वभिमतरूपम् ।
निर्मातुं वै त्ववसर आसीत् वर्षेष्वे तेषु च परिवृत्तम् ॥ ८३ ॥
कृत्स्नं विश्वं तदपरिचेयं जातं ह्याङ्ग्लं जनपदमेतद् ।
जापानामेरिकसहितोऽद्धा यूरोपोऽयं धृतपरिवृत्तिः ॥ ८४ ॥
अष्टादश्यामिदयमटलाण्टिकवार्धेस्तीरे स्थितिरुपयाताः ।
आमेरिक्या सदुपनिवेशाः संभूतास्ते बहुधनवन्तः ॥ ८५ ॥
शक्तिश्रेष्ठाः सकलकलास्ते विज्ञानेनाधिकसम्पन्नाः ।
सम्प्रत्युन्नतिमतिशयशीलां प्राप्ता राष्ट्रे महदभिधानम् ॥ ८६ ॥
जापानेऽनेहसि च लघीयस्याश्चर्योत्पादकपरिवृत्तिः ।
रूसे जारस्य स करपञ्चाङ्गुल्या सर्वोन्नतिगलबन्धे ॥ ८७ ॥
अद्यास्मिन् हृष्यति नवजीवन्याः पुष्पं नूतनजगदेतत् ।
उद्भूतं नः पुरत इतीयं त्वस्मद्देशे गुरुपरिवृत्तिः ॥ ८८ ॥
अष्टादश्या अतिशयभिन्नं विद्यायन्त्रालयरयलानाम् ।
कुल्याकालेऽजनि भव्यानां कार्यौकोनिर्मितिरतिरम्या ॥ ८९ ॥
एषा चास्मिन् बहुपरिवृत्तिष्वप्यास्तेऽवस्थितिरिह कीदृक् ।
क्रीताद्दासादनधिकमूल्यः पञ्जरबद्धाखिलबललेशः ॥ ९० ॥
स्वैरं श्वासग्रहणसमर्थो नास्ते, दूरागतजनशिष्टः ।
यद्वास्तव्याः परमसमर्था रोगार्तांश्चास्थिरचिरजीवाः ॥९१॥
शिक्षाहीना मलिनप्रदेशा अस्वच्छाश्चाकलितचिकित्सा ।
निष्कर्माणः सचरममध्याः स्वार्थे मग्ना इह हि महान्तः ॥ ९२ ॥
आदिष्टाः स्मो निजवशतोक्तिः साम्यं सामाजिकजनसत्ता ।
अव्याहार्या जलधरवाचां तुल्याः सिद्धान्तादर्शवादाः ॥९३॥
सत्यास्तेषां जनहितमेको वस्तुस्थित्या निकष इहोक्तः ।
हिन्दुस्थानं तु न निकषेऽस्मिन् धत्ते माहात्म्यमिह लघु स्यात्॥ ९४ ॥
अन्ये देशाः कृतिरहितत्वं दूरीकर्तुं विविधविधानम् ।
कुर्वन्त्यायोजनमिति लोकेऽधीतं नास्मज्जनपदमेतत् ॥ ९५ ॥
अस्मिन् कोटिः कृतिरहितानाम् स्थायित्वेनास्ति च विपदा नः ।
तत्कोऽस्मिन् पृच्छति किल देशेऽन्यस्मि श्चाश्रृण्म गृहचर्याः ॥९६॥

अस्मिन् कोटिर्वसति कुटीरेऽपक्वे, कोटिः स्थलतलहीना।
अन्येष्वीप्यस्ति जनपदेषु येष्वास्ते तत्सकलमपेक्ष्यम् ॥ ९७ ॥
शिक्षा स्वाच्छ्यं लसति चिकित्सा सौविध्यं सांस्कृतिकमशेषम्।
अन्नोत्पत्तिर्विकसति तूर्णं, यत्रासीना वयमिह सुप्ताः ॥ ९८ ॥
पैपीलिक्या प्रसरति गत्या कश्चित्तत्र स्थितिमुपयुङ्क्ते।
रूसस्यात्मा लघुसमयेनाश्चर्यैर्यत्नैः प्रगतिमवाप्तः ॥ ९९ ॥
वर्षैः स द्वादशभिरशिक्षां दूरीकृत्याद्रियत सुशिक्षाम्।
या तेषां जोवनमवलम्बाधानादुत्थापयति नितान्तम् ॥ १०० ॥
टर्क्यापि व्यापिनि नवशिक्षामार्गे दीर्घः क्रम उपनीतः।
प्राणाधानादिमसमये साऽशिक्षामाक्राम्यदियमिट्ली ॥ १०१ ॥
शिक्षामन्त्री ध्वनयति यावत् नैरक्षर्यं तु निरसनीयम्।
व्याधिस्फोटो नृपनयशास्त्रं दुष्यंस्तप्तायसदहनीयम् ॥ १०२ ॥
आरामौकस्युपविशतोक्ताः शब्दा एते श्रवणभिदः स्युः।
किन्त्वेतैस्तद्दलगतदार्ढ्यं शक्तिश्चापि प्रकटयितव्या ॥ १०३ ॥
नम्राः स्मोऽत्यन्तमिति वयं तैर्मुग्धस्निग्धां गिरमभिदध्मः।
फूत्कृत्यैते पदमुपदध्मः शक्तिञ्च स्वां समितिषु युञ्ज्मः ॥ १०४ ॥
हिन्दुस्थानावसतिषु दोषारोपो लोकैः क्रियत इहोक्तः।
ते वार्ता अभिदधति महिष्ठाः कुर्वन्त्येते किमपि न कार्यम् ॥ १०५ ॥
सत्यारोपो भवति स नूनं किन्त्वाङ्ग्लानां समितिषु नित्यम्।
उत्पश्यामो यदिह सुवाचा प्रस्तावान् यान्निदधति तासु ॥ १०६ ॥
तेषां श्रान्त्या विवरणमेकं सृष्टं वैदुष्यभिपरिपूर्णम्।
'किञ्चिन्महद् विवरणं शिष्टे'रित्याख्यातं प्रस्तुवतीमे ॥ १०७ ॥
तत्सभ्यानां स्तुतिवचनैस्तैर्भूयो भूयो विहितविकासम्।
रक्षन्ति स्फायिलदलकोषे प्रस्तोतव्यं त्वविचलितं स्यात् ॥ १०८ ॥
सम्मानं तद्भवति सुलब्धं स्वार्थाश्चेमेप्यभिकृतरक्षाः।
वृद्ध्याभासो भवति तथेत्थं सर्वं च स्यादिह फलशून्यम् ॥ १०९ ॥
अन्ये देशा प्रगतिपथानां कुर्वन्त्यन्वेषणमनुवेलम्।
बाधाबन्धादिकमनुचिन्त्यं 'वेगान्मा वयमत्र गमाम' ॥ ११० ॥

दारिद्र्याणां परिमितिदण्डः शिष्टेः सौख्यादिकपरिवृद्धिः ।
साम्राज्येऽभून्मुगलनृपाणामित्येतेभ्यो भवति निदिष्टम् ।। १११ ।।
तत्सत्यं किन्तु न वयमद्याप्येतं मन्येमहि मितिदण्डम् ।
वायस्त्रायस्य न बहुसौख्यं तद्वै राज्याधिपबहुमानम् ।। ११२ ।।
एतन्मातुं किमु मितिदण्डः स स्याद्युक्तः किमिति न युक्तः ।
एतत्पृष्ठे निरवधि चास्ते दारिद्र्यं तद्भूरतजवर्षे ।। ११३ ।।
अन्योन्यस्मिंश्च हि स विरोधश्चेतो नः खेदयति नितान्तम् ।
नो कल्प्यं कोमलहृदयानाभेतत्स्याद्वै कथमिव सह्यम् ।। ११४ ।।
कृत्स्नस्यास्य प्रभुविभुतायाः पृष्ठे दैन्यं भवति च शोकः ।
राज्यं चैतद्विभवसमेतं स्थाप्यं बद्ध्वा परिकरमस्मिन् ।। ११५ ।।
पृष्ठेऽस्यास्ते मध्यमवर्गो दुःखैः शोकैर्निचितनिसर्गः ।
विश्वस्थित्या यः परिपिष्टस्तत्पृष्ठेऽस्ति श्रमिजनवृन्दम् ।। ११६ ।।
तद्दारिद्र्यपेषणीपिष्टम् दुर्भाग्याजीवनमुपजीवन् ।
पृष्ठे देशप्रतिनिधिकोऽयं ध्वान्तेऽनन्ते स कृषक आस्ते ।। ११७ ।।
बोढा भारं बहुलशतीनां पश्यन् नम्रो हृलधृतभूमिः ।
शून्यत्वं तद् युगयुगजातं तं वक्त्रे पश्यत कृशमुदरे ।। ११८ ।।
संसारोऽयं शिरसि तदीये भारीभूतो ह्युपविशति स्म ।
कंकालस्तस्य निमिषतीमां दुर्दान्तां वै युगयुगपीडाम् ।। ११९ ।।
माहाकालिकमिदमितिवृत्तं वा पृष्ठस्यानमनमिहेदम् ।
वञ्चितलुण्ठितपीडितधिक्कृतमानवता परितो ह्याक्रान्ता ।। १२० ।।
स्रष्टुः पुरतो रोदिति दुःखं ध्वनयति हन्त भविष्यद्वाणी ।
हिन्दुस्थानस्याखिलदुःखोत्तरदायित्वं ब्रिटिशजनेषु ।। १२१ ।।
नैवारोप्यं, स्वशिरसि धार्यं नास्मादात्मा रहयितुमर्हः ।
स्वे दौर्बल्ये परिणमतीहान्यस्मिन् दोषावहनमयुक्तम् ।। १२२ ।।
काचिद्रीतिर्ह्यधिकृतशिष्टेर्वैदेशिक्यास्तदपि विशेषात् ।
दास्यां वृत्तिं प्रोत्साहयतीयं प्राज्यां दृष्टिं सीमयिता च ।। १२३ ।।
तस्या यूनां प्रवरप्रवृत्तीरुद्योगं साहसिकमथौजः ।
तेजस्वित्वं मौलिकतरताञ्चापीक्षे चेष्टासु प्रमादम् ।। १२४ ।।

रेखाधैन्यं ह्यधिकृतदास्यं चाटुकारितादिकमपि लोके।
प्रोत्साहयितुं ह्यभिलषितं तत् सत्यां सेवां समजनसेवाम् ॥ १२५ ॥
नादर्शासज्जनमपि सूते सेवाभावैर्विरहितलोकम्।
एते त्वाचिन्वति सुखिनस्तान् ये निर्वाहार्थं प्रयतन्ते ॥ १२६ ॥
पश्यामो यद् भरतभुवीमे कीदृक्षानानयितुमिह स्वान्।
काङ्क्षन्ते—'ये कुशमुखबुद्ध्या सम्यक्कार्यं विदधति नम्राः ॥ १२७ ॥
एतेऽन्यत्रानधिगतवेला शिष्टेवर्धिस्याप्यनुचर्याम्।
लब्ध्वा नम्रत्वमधिगतास्तद्यन्त्रस्यैकाङ्गमिव चरन्ति ॥ १२८ ॥
तन्मस्तिष्कं शिथिलसरण्यां कार्याणां गच्छति नियतत्वम्।
भृत्याचर्यागुणगण एषां कार्यैकश्चालनपटुभावः ॥ १२९ ॥
लेखनकार्यकुशलतां सूते सार्वजनिकसेवा मुखभक्तिः।
नोद्दीप्तं साहसमिह लेशादप्यागच्छति भवतु कुतस्तत् ॥ १३० ॥
वैदेशिकशासनसमये तत्सम्भूतिर्न प्रभवति चैषु।
तेभ्यश्चान्येऽप्यधिकृतिभाजो नैव स्तुत्या लघुगुरवः स्युः ॥ १३१ ॥
एतैः स्वोच्चाधिकृतपदाब्जस्पर्शादन्यत्किमपि नार्जितम्।
भर्त्स्यास्तेषामनुगतभृत्यानेते वै भर्त्सयितुमलं स्युः ॥ १३२ ॥
नास्मिंस्तेषां कथमपि दोषः शिष्टेः शैली शिक्षयतीदम्।
चेच्चर्या चाटूकृतिषु दक्षा चेद् बन्धूनां फलति च साह्यम् ॥ १३३ ॥
प्रायो यत्तद्भवति समन्तात् सेवावृत्तिर्न्तरहितेयम्।
एषां पृष्ठे दुरधिगमत्वं तस्याश्छेदे मरणं क्षुधया ॥ १३४ ॥
भूतप्रेतादिवदनु धावन्त्येभ्यो भीताः समभिलषन्ति।
यद्वा तद्वा भवतु वयं नो सेवावृत्तेर्याम निवृत्तिम् ॥ १३५ ॥
बन्धुभ्यश्चोपसृतसुहृद्भ्यः प्राप्तुं सेवावसरमपीमे।
वृद्धक्षुधो वृका इव भीता अतिभीता मुखसाक्ष्या अन्ये ॥ १३६ ॥
भ्राम्यन्त्येते परितो यस्यां तस्यां कान्तगुणाः कथमीयुः।
दुर्गीभूतजगद्घटनाभिः भावुकसार्वजनिकजनतायाः ॥ १३७ ॥
शिष्टेः सेवायां विनियोगः शिष्ट्यै ह्येते नहि रोचन्ते।
एषामेतैः सह सम्बन्धो नेष्टो यावन्नार्थिककष्टम् ॥ १३८ ॥

विश्वं वेत्तीदमखिलमेतत् साम्राज्यस्याऽऽस्ते ह्यतिभारः ।
कृष्णेऽवास्ते न तु स इतीमां सत्तापरम्परां प्रस्तोतुम् ॥ १३९ ॥
नानाविधशासनपरिचर्यास्तासाञ्चाप्यधिकारविशेषान् ।
संरक्षयितुं रक्षकवर्गाः सन्ति न नूनं भारत ऊनाः ॥ १४० ॥
सर्वमिदं भारतहितमेवेत्याख्यायते तदत्याश्चर्यम् ।
उच्चाभिः सेवाभिरमूमिर्बद्धं किं भारतहितमेतत् ॥ १४१ ॥
इत्थञ्चैते वयमभिधीयामहे जातु यदि कोऽप्यधिकारः ।
छिन्नोऽपि स्यात्तदेह हेतुर्दुष्प्रबन्ध उत्कोचो वा स्यात् ॥ १४२ ॥
चेद् भारतीयचिकित्सासेवा निश्चितपूर्वा क्रियते न्यूना ।
सा भारत आरोग्यहरी स्यात् प्रवर्धिताऽऽङ्ग्लसैनिकसुखदा ॥ १४३ ॥
प्रवर्धिता चेदाङ्ग्लसैनिकसङ्ख्या तदा विश्वभयहरणम् ।
प्रयोजनं तस्या व्यपदिष्टं भवतीत्येतत्सकलं युक्तम् ॥ १४४ ॥
मन्येऽहं किञ्चिदिह तु सत्यं यद्युच्चाभिर्ह्यधिकृतिभिर्नः ।
क्वचिद् गम्यते तदा सहायैर्विहिते कार्ये शिथिलत्वं स्यात् ॥ १४५ ॥
किन्त्वत्रास्ते विशदनिदानम् क्लृप्तं तादृशकार्यविधानम् ।
सहायकाः स्युः क्वचन न योग्या नोत्तरदायित्वमिह च दत्तम् ॥ १४६ ॥
विश्वासो मे भरतभुवीदं ह्यस्ति समस्तं साधनमच्छम् ।
सद्यः प्राप्तुं सुशकमपीदं चेत्तदुपायाः समाद्रियन्ते ॥ १४६ ॥
इत्यस्यास्ते त्वयमिह भावः शिष्टिः समाजदृष्टिपरिवृत्तिः ।
यस्यास्तात्पर्यं भवतीदं काचिन्नूतनशासनक्लृप्तिः ॥ १४८ ॥
सम्प्रत्युच्यत एतदिहास्मान् यावत्परिवर्तनमिह धत्ताम् ।
निरीक्षणावेक्षणविषये स्यात् उच्चाधिकृतौ ब्रिटिशनिवेशः ॥१४९॥
शिष्टिमन्दिरे गूढरहस्यं विद्यस्तीर्थपुरोधस एते ।
येऽन्येभ्यो ददतेऽधिकृतिम्, नानधिकारी वै विशतु तदन्तः ॥ १५० ॥
योग्यत्वं चार्जयति यथान्यो नेपथ्यान्तरमेति तथाग्रे ।
इत्यन्ते किल दूरभविष्ये प्रोद्घटिताः स्युर्मर्मकपाटाः ॥ १५१ ॥
साश्चर्याणां कुतुकभृतानां चास्मन्नेत्राणां पुरतः स्यात् ।
सा काचिद्विहिताखिलपूर्तिः चित्रपवित्रतमा, हरिमूर्तिः ॥ १५२ ॥

शिष्टैः सेवासु च जनसेवास्थानं सर्वोच्चमिति निचेयम् ।
भारतशिष्टैः साधुप्रबन्धे साधुवाद एष त्वपवादः ।। १५३ ।।
अस्याः सेवायाश्च गुणास्ते भूयांसोऽस्मभ्यं दिश्यन्ते ।
साम्राज्यस्य योजनायां तन्महत्त्वमेकः सिद्धान्तोऽभूत् ।। १५४ ।।
हिन्दुस्थानेऽस्य सर्वमान्यस्याधिकारपूर्णा स्थितिरस्याः ।
स्वेच्छाचारितया पर्याप्ते स्तुत्या लम्भितया परिमाणे ।। १५५ ।।
एतत्सर्वं कस्यचनापि व्यक्तेर्वा समुदायस्यापि
वस्थातुं स्थिरमिह मस्तिष्कं नो पथ्यं स्यान्नापि हितं स्यात् ।। १५६ ।।
एताः सेवाः प्रति प्रशंसाभावे सत्यपि सङ्कोचेन ।
स्वीकार्यं मे व्यक्तिगतत्वात् सामूहिकताया उभयस्मात् ।। १५७ ।।
व्याधिरयं नूत्नो वा प्रत्नो महत्त्वलाभ उन्मादमयेन ।
रूपेणेह च विलक्षणेन मृगयास्पदतां यातुमलं स्यात् ।। १५८ ।।
भारतनागरिकी परिचर्या धत्ते यानिह गुणान् विशेषात् ।
तेषामस्वीकरणं व्यर्थम्, तान् विस्मर्तुं न प्रभवः स्मः ।। १५ ।।
किन्त्वस्या विषये सेवायाः कथ्यन्ते बह्वोऽनृतवार्ताः ।
मह्यं जातु जातु भात्येतत्, तद्रहस्यमुद्घाटयितव्यम् ।। १६१ ।।
तद्धितकरं भविष्यति नूनं सर्वबलेनाऽमरीकनोऽपि-
श्रुतोऽर्थशास्त्री यदत्र वाच्यो वर्गो मुख्याधिकारभाजाम् ।। १६० ।।
'सुरक्षितो वर्गः' किल नाम्ना तद्विषयेऽहं विचारयामि ।
भारतनागरिकी परिचर्या 'सेवा' नाम्ना सुरक्षितेति ।। १६१ ।।
एषा वृत्तिर्व्ययभरसाध्या काचिदिन्द्रियारामजनानाम् ।
श्रीडी ग्रैहम्पोलो विद्वान् ब्रैटिशसंसच्छ्रमिकसदस्यः ।
हिन्दुस्थानसमस्यारुचिभृत् कस्माच्चित्कालादिह पूर्वम् ।
आदर्शाभिप्रायेऽलेखीदस्मिन् नागरसेवाविषये ।। १६४ ।।
अद्यावधि नाकुरुतापत्ति यद् भारतनागरसेवेयम् ।
योग्याश्चतुरः कर्मकराश्चासते संस्थानप्रियतरवस्तु ।। १६५ ।।
आङ्ग्ले देशे त्वभिहितमित्थं प्रायो भवति च तद् विश्वास्यम् ।
तस्य परीक्षा लाभकरी स्यादेवंविधनिश्चितव्याख्यानम् ।। १६६ ।।

यत्स्यात्सहसा प्रत्याख्येयं तत्स्यादनिशं भयजनकं वै ।
ग्रैह्म्पोलकल्पनात्यन्तं मिथ्यासीत्क्वचिदपि नाक्षिप्तम् ।। १६७ ।।
एतद्भूयो गतमाह्वानम् नाभिमतं चावितथाख्यानम् ।
श्रीगोखलेऽप्यनिन्दद् भारतनागरसेवां कटुवचनैस्तैः ।। १६८ ।।
कांग्रेसिक इतरः सामान्यो ग्रैह्म्पोलगिरा नो मनुताम् ।
तथापि सम्भवति द्वयमपि तत् पृथग्विशेषदृशा चिन्तयतोः ।। १६९ ।।
योग्यत्वं दक्षत्वं वा तत्कतमैः स्यान्मापितमिह मानैः ।
यदि नामेदं द्वयमपि ब्रिटिशानां राज्यस्य स्याद् दृढकरणम् ।। १७० ।।
घोषणमथ देशस्य विधातुं चेदियमेवं स्तुताभिनन्द्या ।
तत्सेवा भारतनागरिकी वृणुयाद्वरतरताधिकृतिं सा ।। १७१ ।।
भारतजनहितदृशा समीक्षां चेदत्रोपन्यस्यामः स्वाम् ।
तदा तु वाच्यं नूनं तस्यामधिकृतवर्गो विफलीभूतः ।। १७२ ।।
विफलीभावश्चायममीषां भूयः स्फुटतां गच्छत्यधिकाम् ।
यदा च तन्महदन्तरमेषामाये वासादौ विमृशामः ।। १७३ ।।
येन जनेभ्यः पृथक्कृतास्ते यत्परिचर्यैषामिह धर्मः ।
येभ्यश्चैषा महती वृत्तिर्वेतनरूपा तैरुपलब्धा ।। १७४ ।।
तदा तदत्यन्तं विशदं स्यात् सत्यञ्चेदं यदियं सेवा ।
श्रेणीमेकां कल्पयति स्म स्याच्छ्रेणी सा स्तरतो निम्ना ।। १७५ ।।
प्रायस्तस्या व्यक्तिविशेषा निर्यातास्ते भुवि पुनरीक्ष्याः ।
आशास्यते च किमधिकमन्यत्स्वस्याश्चान्तर्गुणदोषाढ्ये ।। १७६ ।।
आङ्ग्लानां सा जनताशिक्षाकेन्द्राणामपि भृता भावना ।
यद्यपि सर्वेऽधिकृतास्तस्यां नासञ्जनताशिक्षाकेन्द्रात् ।। १७७ ।।
श्रेणीमेकामूढवतीयं किन्त्वनयेष्टो न रूढित्यागः ।
व्यक्तिगताश्चाधिकृतगुणास्ते दैनिकनीरसकर्मसु लीनाः ।। १७८ ।।
केचिच्चान्येभ्यो न विभिन्ना दृश्येरन्निति भये निमग्नाः ।
अस्यामुत्साहिनोऽपि चासन् सेवाभावभृता अपि केचित् ।। १७९ ।।
साम्राज्यस्य प्रथमा सेवा हिन्दुस्थानस्य तु द्वितीया ।
ते निजशिक्षाया अनुरूपं परिस्थितेश्चैवं स्म वदन्ति ।। १८० ।।

तेषां संख्या पुनरल्पासीत् वैदेशिकवातावरणे ते ।
समावृताः स्वस्मिन् स्म रमन्ते श्रेणीं स्वीयां स्म निर्वहन्ति ॥ १८१ ॥
आसीत्पदजात्योरनुरोधः स्वैरागाराधिकृतो सत्याम् ।
प्रत्यालोचनतः कुपितास्ते तदिह महापातकमवयन्ति ॥ १८२ ॥
असहिष्णुत्वात्ते विद्यालयशिक्षकचेतोवृत्तिजुषश्च ।
नोत्तरदायित्वकृतदुर्गुणदूषितमनसो निजसन्तुष्टाः ॥ १८३ ॥
अन्यस्यावश्यकतायामपि किञ्चिन्नानुभवन्त्यबुद्धयः ।
परिवर्तिनि संसारेऽपरिवृत्ताः प्रगतिकालानुपयुक्ताः ॥ १८४ ॥
योग्यान् विज्ञान् निजापेक्षया भारतचिन्तां मन सिदधानान् ।
कुर्वाणानपि वीक्ष्य च रुष्टाः कटु रटन्ति रुन्धति दमयन्ति ॥ १८५ ॥
यूरोपीयमहायुद्धादथ परिवर्तनगतिशीलस्थितिषु ।
उद्दीप्तास्ते तदनुकूलगं स्वात्मानं न विधातुं शक्ताः ॥ १८६ ॥
तेषां परिमितसङ्कुचिता सा शिक्षा संकटदशानुरूपा ।
नापि परिस्थितियोग्यानकरोदिति विस्मृतदायित्वा विकृताः ॥१८७॥
समुदायतया ते प्राप्तनिरङ्कुशप्रभुताकास्तत्संसदधीनाः ।
ऐक्टन लेखः- प्रभुता पुरुषं विकरोत्येषा पूर्णा त्वखिलम् ॥ १८८ ॥
साधारण्यादभवन्नेते परिमितकेन्द्रे विश्वसनीयाः ।
दैनिककार्यं चतुरतया तेऽविन्दंस्तत्र परं नहि दक्षाः ॥ १८९ ॥
शिक्षा तादृक्षी किल तेषामाकस्मिकघटनासु सशङ्का ।
निजविश्वासात्कार्याभ्यासादान्तरिकैक्याद्विजयमवाप्ताः ॥ १९० ॥
तात्कालिककाठिन्यान्येषां चित्तं भ्रामयितुं नालं स्युः ।
मेसोपोटामियाकृताभिः सुप्रसिद्धघटनाभिरमीषाम् ॥ १९१ ॥
ब्रिटिशानां ता अयोग्यता वा जडता अस्फोटयन्त हि घटवत् ।
किन्त्वीदृशघटनाः प्रकटत्वं प्रायो नो नीयन्ते शिष्ट्या ॥ १९२ ॥
या वृत्तिस्तैः सविनयभङ्गे प्रादर्श्यासीदियमतिगर्ह्या ।
गोलीयष्टिप्रहरणरुद्धा न समाधानं विरोधिचेष्टा ॥ १९३ ॥
यच्छ्रैष्ठ्यं रक्षितुमिदमात्तं तस्मिन्नभवत्कुठारघातः ।
यत्तेजस्वि तरस्वि प्रयुक्तं राष्ट्रीयान्दोलनमवरोद्धम् ॥ १९४ ॥

हिंसाऽऽश्रीयत नहि तच्चित्रं साम्राज्येऽभूदिदमनिवार्यम् ।
साम्राज्याधारोऽस्ति हि हिंसा नान्यः पन्थाः प्रशिक्षितस्तैः ॥ १९५ ॥
किन्त्वतिशयानपेक्षितरूपात्तेषां हिंसाश्रयणमवादीत् ।
यत्तेषामस्मिन् स्थितिवेगे नासीदधिकारो ह्यवशिष्टः ॥ १९६ ॥
तेषु न शिष्टः किलात्मसंयम एष च निग्रहशक्तिलवोऽपि ।
यः साधारणतया स्थिताभूत् तेषु, परन्त्विह भयभीतेषु ॥ १९७ ॥
फुल्लितपाणिपादयुगलेषु सार्वजनिकवक्तव्यपलेषु ।
वृथाप्रजल्पनमाश्रितवत्सु विगलितचिरविश्वासबलेषु ॥ १९८ ॥
भयमिह निष्ठुरतया रहस्यं ह्युद्घाटयतेऽस्माकं सत्यम् ।
दौर्बल्यस्यान्तरिकस्यैतं क्षणाद्घटस्फोटं यत्कुरुते ॥ १९९ ॥
सविनयभङ्गोऽभूद् भयरूपः सोऽभूदुभयपरीक्षणकालः ।
यत्र न कांग्रेसिकजनविजयो नापि ब्रिटिशशासनविजयोऽभूत् ॥ २०० ॥
भयसमयेऽभ्युन्नतमास्तिष्किकशक्तिभृतावत्र स्त्रीपुंसौ ।
अल्पावेव जगति भवतस्ताविति लाट्जार्जोऽपि स्म ब्रूते ॥ २०१ ॥
अन्येषां त्विह गणनातीता स्थितिरस्तीति स्फुटमस्माकम् ।
वृद्धे गङ्गाजलप्रवाहे पर्वतिकास्ताःस्युर्जलमग्नाः ॥ २०२ ॥
किन्तून्नतशिखरा गिरयोऽमी नैवोच्चस्तरमिह मुञ्चन्ति ।
ऊर्ध्वावधिके जलाप्लवेऽपि निजं मस्तकं प्रदर्शयन्ति ॥ २०३ ॥
यत्संजातं, तस्य कृतेऽसौ भारतनागरिकी सेवाऽऽसीत् ।
नेवोद्यता तु मनसा मत्या तस्याः कार्यकराणां शिक्षा ॥ २०४ ॥
प्रारम्भिको पुरातन्यासीदिति ते संस्कृतिमपि स्म जानते ।
मतिरपि तेषां व्यावहारिकी तान् व्यवहारप्रियानकार्षीत् ॥ २०५ ॥
तेषां मनः पुरातनविश्वानुरूपमासीद् विकटोरियने ।
युगाय सम्यक्तयोपयुक्तं किन्त्वाधुनिकावस्थायां तत् ॥ २०६ ॥
किमपि स्थानं प्राप्तुमनर्हं ते स्वविनिर्मित आङ्ग्लभारते ।
परिमितविश्वे निवसन्तिस्म च यन्नाङ्ग्लं यन्नापि भारतम् ॥ २०७ ॥
तात्कालिके समाजे चास्मिन् कुर्वन्तिस्म शक्तयः कार्यम् ।
ताः कर्तुं नैव प्रभवन्ति भारतीयजनताभिभावनाः ॥ २०८ ॥

निश्चिपश्च स्म इतीह धारणां मनसि दधानास्तान्न जानते।
मध्यमवर्गीयांस्तु विदन्ति स्वल्पं ते भारतवर्षयोग्यताम् ॥ २०९ ॥
मिन्वति निकटस्थेषु हि तानावृत्य सदात्मनिवेदनकृत्सु।
चाटुकारतत्सेवाभ्यर्थिषु स्थितयोग्यतयोपनीय नित्यम् ॥ २१० ॥
अन्यानान्दोलनकर्तृत्वादथ विश्वासघातमुखदोषान्।
युद्धानन्तरमार्थिकक्षेत्रे चाधिकपरिवर्तनमपि न विदधते ॥ २११ ॥
ते गाढायामथ रेखायां ग्रस्ताः क्षमा न निजमुद्धर्तुम्।
नानुभवन्ति स्म च यच्छ्रेण्यास्ते प्रतिनिधयः साद्य पुराणी ॥ २१२ ॥
संजाता, समुदायरूपतः शनैः शनैस्ते तामुपयान्ति।
यां वर्णयते 'नी. एम्. इलियड् 'निःसत्वः पूरुष' इति ग्रन्थे ॥ २१३ ॥
किन्त्वेवं सत्यपि स तु वर्गो ब्रिटिशराज्यसत्तामनुगच्छति।
नेतारो योग्या अथ दक्षाश्चाद्याप्यस्य धृताखिलशक्तेः ॥ २१४ ॥
भारतवर्षे गलद्दशनवच्चाङ्ग्लं राज्यं निवद्धमूलम्।
पीडां कुरुते दुर्निष्कासनमियमिह पीडा प्रवर्त्स्यते च ॥ २१५ ॥
वर्धिष्यतेऽपि न यावन्मूलादुन्मूल्यते स्वयं वा निपतति।
जनताविद्यालयीयलोका गतदिवसास्ते जनपद आङ्ग्ले ॥ २१६ ॥
नाद्यास्त्येषां तथा प्रतिष्ठा सार्वजनिककार्ये प्रमुखानाम्।
हिन्दुस्थाने तेऽनुपयुक्ता नैते चोग्रराष्ट्रियैर्मुक्ताः ॥ २१७ ॥
सामाजिकपरिवर्तनकर्तृषु तत्सहयोगकथाप्यतिदूरे।
भारतनागरिकीसेवायामुत्तमपुरुषा अपि किल सन्ति ॥ २१८ ॥
आङ्ग्ला वा भारतीयलोकाः यावत्प्रस्तुतशासनशैली।
तावत्तद्दक्षता प्रयोजनलग्नापीह हिताय न नः स्यात् ॥ २१९ ॥
अस्याः केचित्त्वधिकृतिभाजो जनताविद्यालयभावनया।
दासीकृताः निजं सम्राजो राजभक्तमधिकं मन्यन्ते ॥ २२० ॥
भारतनागरिकीसेवाया अधिकारिणा नवेन हि यूना।
सह संलापं स्मराभि यस्मिन् स स्वं प्रत्युन्नतमतमूचे ॥ २२१ ॥
दुर्भाग्याद्दहमस्य न तन्मतसम्मत आसमसौ सेवायाः।
गुणानगायद् बहूनिहान्ते ब्रैटिशसाम्राज्येऽद्भुतयुक्तिम् ॥ २२२ ॥

प्रास्तौद्यत्किमिदं न वरं स्यात् रोमनचंगेजखाँतैमूरात् ।
साम्राज्यत्रितयादिति तस्मिन् ब्रिटिशराजभक्ति समपश्यम् ।। २२३ ।।
भारतनागरिकीसेवाया अधिकृतवर्गे प्रमुखभावना ।
यत्ते कर्तव्यं चतुरतया कुर्वन्तीत्यधिकृतियोग्यास्ते ।। २२४ ।।
अधिकृतयोऽपि विविधवहुरूपा यदि भारतमिदमस्ति दरिद्रम् ।
तर्हि स सामाजिकरीतीनां महाजनानामृणदातृणाम् ।। २२५ ।।
सर्वस्मादधिकः स्ववशिम्नः किन्तु महावणिजो ब्रिटिशस्य ।
सहसा विस्मियतेऽत्र तु चर्चाऽसौ स्ववशिमनि वाञ्छति किं वा ।२२६।।
इत्येष न जाने दुष्कालैरेभिराभिश्च महामारीभिर्म्रियमाणे ।
प्रजाजने भूयस्यपि भारतजनसंख्या विवर्धते यत् ।। २२७ ।।
सन्ततिनिग्रहसम्मतिरपि सा प्रदीयते, यद्यपि सोऽस्मि मन्ये ।
ज्ञानस्य वै सन्ततिनिग्रहस्योपायस्य चापि क्रियतां प्रचारः ।। २२८ ।।
सन्ततिनिग्रहविधिप्रयोगो जनताजीवन उच्चा शैली ।
साधारणशिक्षादानञ्च देशे भूरि चिकित्साकेन्द्रम् ।। २२९ ।।
अद्यावधि सन्ततिनिग्रहविधिरस्ति जनानां बोधाद् बाह्यः ।
मध्यमवर्गीयाश्चैतस्माल्लाभं प्राप्तुं किल प्रभवेयुः ।। २३० ।।
मन्ये केचिद्विधिमिह बुद्ध्वा तस्माल्लाभं प्रतिपद्यन्ते ।
आवश्यकतातोऽधिकजनवृद्धिं रोद्धुं युक्तिरियं त्ववधेया ।। २३१ ।।
विश्वस्मिन्विश्वेऽद्य प्रश्नो नास्ति स भोज्यादिकवस्तूनाम् ।
न्यूनत्वस्य तु तद्भोक्तृणां तेषां वा क्रयविक्रशक्तेः ।। २३२ ।।
थै तपस्विनः क्षुधा म्रियन्ते हिन्दुस्थानेऽपि न्यूनत्वम् ।
नास्ति खाद्यवस्तूनां सत्यं भोक्तृणां भोज्यानां तुलना ।। २३३ ।।
भोक्तृजना इह यथाविवृद्धा तथा विवृद्धाः भोज्यपदार्थाः ।
जनपरिमाणाद्भोजनगरिमा वर्धयितुं शक्यश्चास्माभिः ।। २३४ ।।
जनसंख्यावृद्धेरिह शङ्का यथा वर्धते तथा विचिन्त्यम् ।
तद्गतिरिह पश्चिमतो न्यूना भावी सत्यं भाविनि भेदः ।। २३५ ।।
पश्चिमदेशे जनसंख्याया वृद्धिं रोद्धुं कृता ह्युपायाः ।
हिन्दुस्थानेऽपि च सीमयितुं कृतैरुपायैः सा रुद्धा स्यात् ।। २३६ ।।

यदा कदापि भविष्यति देशः स्वाधीनोऽस्माकं सविशेषः।
सोऽत्र यथास्वं चेच्छति स्रष्टुं तथा सहायाः सत्पुत्राः स्युः ॥२३७॥
उच्चश्रेणीका दुर्लभ्या हिन्दुस्ताने विशेषतस्ते।
ब्रैटिशराज्ये स्वोन्नयनायानवसरतो नहि ते जायन्ते॥ २३८॥
सार्वजनिककार्याणां नैके सन्ति विभागास्तेषु विदेश्याः।
विज्ञाः स्युश्च सहाया इत्यावश्यकताऽस्माकं नहि सा स्यात्॥ २३९॥
ईदृशकार्येभ्यो विशेषतो यान्यौद्योगिकतायाः किंवा।
वैज्ञानिकताया व्युत्पत्तेर्दधतेऽपेक्षां भारतवर्षे॥ २४०॥
ये भारतनागरिकीं सेवां शुश्रूषितवन्तोऽन्तस्तेषाम्।
वैदेश्या अथ भारतीयकाः केचन च स्युरपेक्ष्यास्तस्मिन्॥ २४१॥
नूत्नायां ते व्यवस्थितौ नोऽपेक्षिततया स्युरादरणीयाः।
स्वागतमेषां विधास्यतेऽतः परमस्त्येष च मम विश्वासः॥ २४२॥
यावद्राज्यशासनेऽस्माकं भारतनागरिकीसेवायाः।
सार्वजनिकसेवास्वथवा तत्समावेश इह कार्यस्तावत्॥ २४३॥
काचिन्नूत्ना नहि व्यवस्था शक्या स्यादिह नाम रचयितुम्।
शासनमनोवृत्तिरियमास्ते सा साम्राज्यवादपोषिणी॥ २४४॥
स्वाधीनतया सह चैवास्याः सम्भवतीह न खलु निर्वाहः।
किं वैषा तन्मनोवृत्तिरिह स्वातन्त्र्यं वो हन्यान्नूत्नम्॥ २४५॥
आहोस्वित्सा शासनवृत्तिः स्वयं भवेदुत्पाटितमूला।
केवलनैकविधायां शैल्यामत्र भवेन्निर्वाहस्तस्या॥ २४६॥
अत्यावश्यकमिह मम भाति भारतनागरिकी सेवेयम्।
तत्सदृशी चान्यापि प्रवृत्तिः पूर्वमितो दूरीकरणीया॥ २४७॥
ततो व्यवस्थाया नूत्नायाः कार्यारम्भो वास्तविकः स्यात्।
आसां सेवानां यद्येकैका व्यक्तिर्नूतनसेवायै॥ २४८॥
स्यात्सुसम्मता योग्या च स्यात् तदा सहर्षं साप्यागच्छतु।
नूत्नेष्वेवैषः पणबन्धः प्राचीनाद्वेतनसौविध्यात्॥ २४९॥
सा नूनं मुक्तैव भविष्यति तत्कल्पनाप्यसम्भूता स्यात्।
नूत्ने हिन्दुस्ताने सत्या योग्याः कर्मचारिणोऽपेक्ष्याः॥ २५०॥

ये स्वस्मिन् कार्ये दृढरुचयो ये साफल्ये दृढप्रयत्ना:।
ये न महावेतनसुखलोभात् प्रत्युत सेवाजनितानन्दात् ॥ २५१ ॥
गौरवसिद्धयै कार्यं कुर्युः मुद्रालोभवृत्तिमपहाय।
वैदेशिकाः सहाया भूयः समपेक्ष्या वहवः खलु नः स्युः ॥ २५२ ॥
परमौद्योगिकवोधविहीना: नागरिकीं सेवां कृतवन्तः।
अपि नो विरला एवापेक्ष्या ईदृक्षाणां नात्राभावः ॥ २५३ ॥
पूर्वमलेखिषमत्र भारते तैरुदारदलगैरितरैश्च।
आङ्ग्लविचारसरणिरियमङ्गीकृता भवति सा, सेबाविषये ॥२५४॥
दृष्टिश्चेयं विशदं व्यक्ता तासां ते भारतीयकरणम्।
इच्छन्त्यासां न रूपभावना राज्यव्यवस्थायां परिवृत्तिः ॥ २५५ ॥
इदमस्त्येकं मौलिकतत्त्वं यस्मिन् सम्भवतीह न सन्धिः।
साम्मनस्यमथवा तत् किञ्चित् नह्यतोऽन्यथा स्यात्स्वतन्त्रता ॥२५६॥
केवलब्रिटिशसैन्यविनिवृत्तौ सेवानां वा प्रत्यानयने।
नावलम्बिता नः स्वतन्त्रता प्रत्युत मनोवृत्तिपरिवृत्तौ ॥ २५७ ॥
तन्मस्तिष्कात् स्वैराचारः स्थूलस्थूलवेतनाभोगः।
तत्सौविध्यलाभलोभो वा परिहार्यः समता चानेया ॥ २५८ ॥
शासनविधिरचनाकालेऽस्मिन् संरक्षणचर्चाऽस्ति प्रचुरा।
हिन्दुस्थानहिते संरक्षणमस्तु न वर्गव्यक्तिहितदृष्ट्या ॥ २५९ ॥
भारतनागरिकी सेवा वा तादृश्यन्याऽद्यतनसुरूपे।
दत्तशक्तिसौविध्याधिकृतिप्रभृतिसमेता समापिता स्यात् ॥ २६० ॥
नैतासां नूतनविधानके सम्बन्धः कश्चन निहितः स्यात्।
अस्मद्रक्षार्थं संस्थापितसैनिकसेबारूपरहस्यम् ॥ २६१ ॥
आस्ते तद् भयदायकमधिकं नालोचयितुं तत्प्रभवामः।
नापि च वक्तुं क्षमा इह स्मो जानीमः किं विषये तस्मिन् ॥ २६२ ॥
अस्मत्कार्यं ननुनचवर्जं स्थूलस्थूलकवेतनदानम्।
हिन्दुस्थाने मुख्यनियन्त्रकसरफिलिपः कतिपयदिनपूर्वम् ॥ २६३ ॥
राज्यसभायां शिमलाक्षेत्रे भाषितवांस्तत् फौजिभाषया।
भारतराजनयिकसम्बोधनपुरस्सरं तूरुन्तुदवाचा ॥ २६४ ॥

हिन्दुस्थानराजनीतिज्ञाः स्वस्मिन् कार्ये दधतु ध्यानम् ।
अस्मत्कार्ये हस्तक्षेपं मा कार्षुस्ते मा कार्षुस्ते ॥ २६५ ॥
कस्मिंश्चित्प्रस्तावे संशोधनमुपरक्षन्तं प्रति तूक्तम् ।
किमिमे किं वैषां सुहृदस्ते मन्यन्ते यद्यैरिह वीरैः ॥ २६६ ॥
नानायुद्धेष्वर्जित एषः सुमहान् विजयो निजकरवालैः ।
रणपटुराङ्ग्लजातिरियमधुना यया स्वसाम्राज्यं किल विजितं ॥२६७॥
करवालस्य बलेन रक्षितं अनुभवलब्धं युद्धज्ञानम् ।
किलासन्दिकारामकरेभ्यः समालोचकेभ्यः शिक्षिष्यति ॥ २६८ ॥
तेनान्यान्यपि स्वादभृतानि वचांस्युक्तानि विनोदमयानि ।
वयं न मन्येमहि यदसौ नः समक्षमावेशादिदमगदत् ॥ २६९ ॥
इति सोऽब्रूत यदेतद् भाषणमतिविचारपूर्वकमालेखि ।
तामिह हस्तलिपिं भवदग्रे पठता मयाऽद्य भाषितमेतत् ॥ २७० ॥
कस्यापि च साधारणपुंसः सेनाविषये सेनापतिना ।
सह संवादविवादाचरणं सत्यं धाष्टर्यं स्यादक्षम्यम् ॥ २७१ ॥
परमिह कश्चित्कुरसीत्रोटकक्वचिदालोचकजनोऽपि वक्तुम् ।
इदमपि बोधतु यैः साम्राज्यं करवालस्य बलेनाधिकृतम् ॥ २७२ ॥
येषां शिरसि चमत्कृतिशाली करवालः सन्ततमान्दोलति ।
तेषां हितं मिथो भिन्नं स्यादिदमपि सम्भवतीह परञ्च ॥ २७३ ॥
हिन्दुस्थानिकसैन्यं हिन्दुस्थानहिते साम्राज्यहिते वा ।
प्रयोजिता स्यादुभयोर्हितयोः नास्तु पृथक्त्वं किन्तु विरोधः ॥ २७४ ॥
राजनैतिकः कुरसीत्रोटक आलोचक ऋच्छत्याश्चर्यम् ।
यूरोपीयमहायुद्धस्याप्यनुभवतः परमधिकारोक्तिः ॥ २७५ ॥
सेनाप्रमुखनायकानां मा तत्कार्ये भूद्धस्तक्षेपः ।
कियती युक्ता ? तदाहि तेषां प्राप्तं क्षेत्रं स्वतन्त्रमासीत् ॥ २७६ ॥
यावज्ज्ञातं तैः सर्वास्वपि वार्तास्वेका विकृतिराहिता ।
आङ्गलपारसीकजर्मण्यास्ट्रियनरूससेनासु प्रायः ॥ २७७ ॥
ख्यात आङ्ग्लसैनिकः ऐतिह्ये विशारदः सङ्ग्रामकलासु ।
लिडैल हार्ट इतिहासग्रन्थे स्वीये लिखति स्मैतां वार्ताम् ॥ २७८ ॥

महायुद्धदिवसेषु चैकदा युध्यन्ते स्माङ्ग्लसैनिका रिपुभिः ।
तस्मिन् समये सेनाध्यक्षाः कलहायन्ते स्मान्योन्यस्मिन् ।। २७९ ।।
ईदृशि राष्ट्रियसंकटकालेऽप्येते कार्यविचारेष्वैक्यम्
आनेतुं न प्रभवन्ति स्म प्रविलिखति स्म पुनः स सैनिकः ।। २८० ।।
नूनं युद्धं महदिदमस्मद्भावानाराध्येष्वादरजान् ।
अनीनशद्यन्महापुरुष इह नैव मृत्स्नया तयास्ति रचितः ।। २८१ ।।
यया जना अन्ये रच्यन्ते' सत्यं नेतारोऽपेक्ष्यन्ते ।
प्रत्युताद्य तेऽधिकमपेक्षिताः किन्त्वेतान्प्रति भावस्यास्य ।। २८८ ।।
उत्पत्तिर्यत्ते सामान्याः पुरुषा इव सन्तीति तदस्मान् ।
तान्प्रत्याशामथ विश्वासं कर्तुं भापयतेऽथ च रक्षति ।।। २८९ ।।
महान् राजनयिकः श्रीलायड्-जार्जो युद्धस्मृतिष्वलेखीत् ।
स महायुद्धस्थलजलसेनानायकसन्ततिचित्रमलेखीत् ।। २९० ।।
याभिर्याताः लक्षजनानां प्राणास्तासामतिगलतीनाम् ।
आङ्ग्लजनपदे तत्सहायका युद्धेऽस्मिन्वै विजयं प्राप्ताः ।। २९१ ।।
किन्त्वेता गलतयस्तु यस्मिन् विजये रुधिररञ्जिता जाताः ।
उच्चाधिकृतं सैन्ययुद्धयोरविवेकात्सञ्चालनमेतत् ।। २९२ ।।
आङ्ग्लं देशं सर्वनाशतटमानीयाक्षिपदस्य तु सुहृदाम् ।
रक्षा शत्रूणाममान्यया मूर्खतया विहितेति च चित्रम् ।। २९३ ।।
महायुद्धसमये पुनराङ्ग्लप्रधानमन्त्री चैवं विलिखति ।
जेलीको मस्तिष्के कतिपयविचारपरिवेशाय स कियतीम् ।। २९४ ।।
मस्तकपाच्यां कर्तुं विवशोऽभूदिति नाद्यापि स विस्मरति ।
विशेषतो वाणिज्यपोतगणरक्षार्थं रणपोतप्रेषणे ।। २९५ ।।
पारसीकमार्शलजाफरके तस्य विचारः प्रतिभात्येषः ।
दृढमुखमुद्रा तस्य गुणोऽभूद्या हृदये भावयति भावनाम् ।। २९६ ।।
इदमेवात्र त्रस्ताः सङ्कटसमये नेतृष्वन्विष्यन्ति ।
ते ह्यवगन्तुं न प्रयतन्ते 'निवसति हनौ क्वचिन्मतिमत्ता ।' ।। २९८ ।।
लायड जार्जस्यारोपोऽयं ब्रिटिशसैन्यनायकविषयेऽभूत् ।
सोऽभूच्च फील्डमार्शल हेगो यः स्वमन्त्रिमण्डलतो जुगोप तत् ।।२९८।।

स व्यर्थाभिमानवशगोऽभूत् राजनयिकवचनानि श्रोतुम् ।
सोऽनङ्गीचकार जुगोप च येनाङ्गलसेनाक्षतिरधिका ॥ २९९ ॥
तत्राप्यसफलतासम्मुखदर्शनकालेऽप्येष दुराग्रहवशतः ।
अचालयदेव तेषु तद् युद्धं पैस्शण्डेलकैम्ब्राईपङ्के ॥ ३०० ॥
सहजातङ्के कतिचिन्मासानिह तन्मौढ्ययुतेऽस्मियुद्धे ।
अधिकृतपुरुषसहस्राण्यस्मिन् सप्तदशाभूवन् निहतानि ॥ ३०१ ॥
चतुर्लक्षञ्चैवाङ्गलवीराः हताहता युद्धेऽस्मिन्नभवन् ।
एतावान् सन्तोषहेतुरिह यत्ते मृता अपि पुरस्क्रियन्ते ॥ ३०२ ॥
जीवनकाले यस्य जीवनं स्वल्पमूल्यमनपेक्षितमासीत् ।
राजनैतिका अपि जीवा इव गलितीः कुर्वन्त्येते प्रायः ॥ ३०३ ॥
परमिह यो जनसत्तावादी जनतारुचिं च घटनां ध्यायति ।
ताभ्यां प्रभावितो भवतीत्थं गलितीः स्वीकुरुते च निरस्यति ॥ २०४ ॥
किन्तु सैनिको वातावरणेऽप्यस्मिन्नेव स विधीयते यत् ।
यस्मिन् भवति शिष्टिसाम्राज्यं न चालोचनास्थानं किञ्चित् ॥२०५॥
इति सोऽन्येषां सम्मतिमयथा मनुते गलितिं चेत्कुरुतेऽपि ।
तस्य कृते न मनो न मतिर्वा दृढमुखमुद्रा श्रयति महत्त्वम् ॥ ३०६ ॥
हिन्दुस्थाने मिश्रितकक्षोत्पादनवेला कलिता चेयम् ।
स्वयं हि तन्नागरिकशासनं शिष्टिस्वाश्रयणार्धसैनिके ॥ ३०७ ॥
वातावरणे पालितमास्ते तस्मादस्मिन्नंशैर्बहुभिः ।
सैनिकमोजस्तेजोमुख्यास्तेऽत्र विशेषाः संराजन्ते ॥ ३०८ ॥
वयमुक्ताः स्मः सेनानां तद् भारतीयकरणं प्रवर्धते ।
अग्रिमत्रिंशदधिकवर्षैस्तद् भूयोऽभ्युन्नतिपथे सृतं स्यात् ॥ ३०९ ॥
श्रुत्वाऽऽश्चर्यं भवितुमिहार्हति यद् भयसमयेऽप्याङ्गलदेशः ।
कथमेकद्वैर्वर्षैर्लक्षैः पुरुषैः सैन्यबलं समसृक्षत् ॥ ३१० ॥
तस्यान्तिकतश्चेत्सम्मतिदा अभविष्यन्नस्माकमिवैते ।
तदा च सावधानतया फूत्कृत्याध्वनि दक्षतया त्वसरिष्यन् ॥ ३११ ॥
सम्भवमासीदिदं सर्वथा शिक्षितसेनोद्यतताहेतोः ।
प्रागेवायं रणोऽवसानं प्राप्स्यत सोवियतो रूसोऽपि ॥ ३१२ ॥

तत्सेनाअवदधान इह या प्राक् सज्जामन्तराप्यकस्मात्।
समुद्यताः प्रतिसेना अजयन्नद्यैताः कुशला गण्यन्ते ॥ ३१३ ॥
संसारे सर्वाधिकशक्तेः केन्द्रतया चैता मन्यते।
एतासां पार्श्वे सम्मतिदा नासन् कृतयुद्धा रणदक्षाः ॥ ३१४ ॥
शिक्षालयो देहरादूने सैनिकशिक्षाया अस्त्येकः।
सोऽयं सेनाधिकारितायाः प्रशिक्षणं दत्तेऽभ्यर्थिभ्यः ॥ ३१५ ॥
प्रकथ्यते यतेऽतिपटुतया कुर्वन्त्यस्मिन् युद्धाभ्यासम्।
निश्चप्रचमेतेऽधिकारितां सम्यक् प्राप्ताः प्रति यास्यन्ति ॥ ३१६ ॥
नेदं समवेदिषमिह यत् स्यात्को लाभः सैनिकशिक्षायाः।
यावत्तया व्यावहारिकी रणशिक्षा काचिन्न दीयते ॥ ३१७ ॥
पत्तीनामश्वारोहाणां सेना अद्यत्वेऽत्र तदर्थाः।
सन्ति यदर्था रोमनसेनास्तस्मात्प्रायोगिकी प्रयोज्या ॥ ३१८ ॥
अद्यत्वे समरे समीरणे करणीये समीरवम्बाद्यैः।
टङ्कैर्वा शतसहस्रहतिभिः भुशुण्डिभिः शरचापसमाभिः ॥ ३१९ ॥
तत्र शिक्षकाः सम्मतिदाश्चाप्यनुभवन्ति प्रायोगिकशिक्षाम्।
हिन्दुस्थानेऽत्राङ्गलराज्यस्येतिहास इह कीदृगभूत्सः ॥ ३२० ॥
तेषां त्रुटीर्विवेचयितुं वा सूचयितुं वा वयं नु के स्मः।
यदा गलितयोऽस्मद्दौर्बल्यात् फलस्वरूपाः सन्ति समस्ताः ॥ ३२१ ॥
यदि परिवर्तनधाराबन्धं त्यक्त्वा पङ्केऽस्मिन् मज्जेम।
एकाङ्गिनः स्वयंसन्तोषा कुक्कुटोष्ट्रवन्मीलितनेत्राः ॥ ३२२ ॥
सर्वा अपि घटनाः प्रति च स्मस्तत्रास्माकं भविता-हानिः।
आङ्गला अस्मज्जगत्सागरेऽभ्युत्साहैकवीचिवदुपेताः ॥ ३२३ ॥
शक्तीरीदृक्षीरपि महतीरैतिहासिकीः समरचयंस्ते।
यास्तैः स्वयमपि नानुभवाध्वनि कदापि नीता नापि प्रतीताः ॥ ३२४ ॥
वयमिह किं तं वातोत्पातं चर्चामो योऽस्मानुत्पाट्य।
इतस्ततो निक्षिपति निर्दयो वातं वातं प्रति वेपथवे ॥ ३२५ ।
भूतं तत्कलहान्प्रति सम्प्रति चान्त्यस्तिलाञ्जलिः प्रणिधेयः।
साम्मुख्यं च भविष्यस्यास्य प्रति कार्यं यच्छिरसि समेतम् ॥ ३२६ ॥

महते चैकस्मा उपहारायास्माभिः पुनराङ्ग्लसखीनाम्।
कृतज्ञतापि प्रकाशनीया यत्ते समानयन्नायन्तः ॥ ३२७ ॥
विज्ञानं तत्परिणामाश्चेत्युपहारोऽसौ तैः समर्पितः।
शिष्टेस्ते यत्ना विस्मर्तुं शान्त्या वा सोढुं सुदुष्कराः ॥ ३२८ ॥
तैर्देशेऽस्मिन् कलहकारिणः प्रतिक्रियावादिनो विरुद्धाः।
जातिवादिनो दुर्बलघाताः अवसरवादिजना उन्नीताः ॥ ३२९ ॥
इयमप्यस्माकं नु परीक्षा वाऽऽह्वानं वेति न वयं विदाम।
ततः पुरा हिन्दुस्थानस्य नूत्नं जन्म भवेदिति तेन ॥ ३३० ॥
वारं वारं तस्मिन्नग्नौ तपनीयं स्याद्यः प्रतिकुरुते।
शुद्धं दृढमथ यो ज्वलयिष्यति दुर्बलपतिताचारविहीनान् ॥ ३३१ ॥

श्रीवृन्दावनमहिमामृतगतनैकपद्यचयमप्यनूद्य यो
बोधसारमपि हिन्दीभाषानुवादपद्यरचनैर्भूषितवान्।

कविरत्नेन तेन विहितेऽस्मिन् नेहरूचरिताभिधगुरुकाव्ये
सर्ग एष चतुः पञ्चाशो गतो ब्रिटिशशिष्टिविकाशः

अन्तरजातीयविवाहो लिपिप्रश्नश्च

तोटकम्

पञ्चपञ्चाशः सर्गः

स सितम्बरमासि तु सप्तदिनीमधिमोहमयीमथ पुण्यपुरे ।
न्युषितः प्रतियातुमहं चलितः किल लक्ष्मणपूरिति सन्नगरम् ।। १ ।।
जननी मम तावदिहातुरतां प्रतिमुञ्चति सा रुगालयके ।
कमला स्वयमातुरितापि तदा मम मातुरभूत्परिचाररता ।। २ ।।
प्रति सप्तदिनं भगिनीयुगलं सविधे मम मातुरगान्नियमात् ।
इह सप्तदिनत्रयमस्मि वसन्नवकाशमवाप्नुवमत्यधिकम् ।। ३ ।।
दिवसे द्विरगान्तु रुगालयकं व्यलिखं समयादखबारकृते ।
प्रतिपत्रमिमे मम लेखगणा उपयन्ति तदा स्म विकासपदम् ।। ४ ।।
क्वनु भारतमित्यधिकृत्य कृतां मम लेखगुणावलिमावदधे ।
जनतार्थमहं किल तास्वलिखम् हलनाश्चलना इह विश्वगताः ।। ५ ।।
अथ भारतवर्षपरिस्थितिभिः सह ताभिरिहान्वयमाकलयन् ।
प्रविचारितवान् प्रथमं लिखनाद्विदितं तु ममेदमशेषतया ।। ६ ।।
अनुवाद्य प्रकाशमनीयत साखिललेखगुणावलिरन्यगिरा ।
त्रिहराणककाबुलयोः प्रथिताः खलु पारसवाचि विशिष्टतया ।। ७ ।।
नहि सम्प्रति पश्चिमचिन्तनतो घटनाक्रमतश्च प्रतीतिभृताम् ।
इह लेखगणे नवमद्भुतवत् किमपि प्रचितं विचितं समभूत् ।। ८ ।।
परमत्र तु भारतवासिजनो गृहवस्तुषु सोऽस्त्यतिव्यस्ततरः ।
अवधातुमयं लभते न पलं परदेशपदे भवतीह तु किम् ? ।। ९ ।।
मम लेखशुभागमनं यदभूत्तत एतदिहावगतं मयका ।
अपि कारणतोऽपरतोऽपि यथा दृगियं वितता भवतीह नृणाम् ।। १० ।।
जननी मम सोद्विजते स्म रुगालयकोष्ठगता शयने पतिता ।
इति तामुपनेतुमधार्यत तत्त्रिणदीतटवर्तिनि नैजगृहे ।। ११ ।।

प्रतियाननिदानमभूद् भगिनीसुविवाहविधेः प्रथमः स विधिः।
वचसात्र वराय वितीर्य सुतां, वरणं क्रियतेऽस्य सुबन्धुतया ॥ १२ ॥
शकुनं तदमुष्य दृढीकरणम्, समभूदथ, सत्वरमेव यथा।
मम वन्दिगृहे गमनात्प्रथमं परिणीतिरियं भवितेह तथा ॥ १३ ॥
विदितं न कियत्समयेन मया बहिरत्र भविष्यति च न्युषितम्।
इह भङ्गप्रवृत्तिरभून्नियता विधिबाह्यमभूदथ कांग्रसिकम् ॥ १४ ॥
अपरा अपि तावदनेकसभा विधिबाह्यतया सुखनिग्रहणाः।
अहमष्टममासि परार्धमुखे परिणीतिमिमां व्यदधां नियताम् ॥ १५ ॥
इह नागरिको परिणीतिविधौ परिणीतिरियं समभून्नियता।
सममूमुददेष विधिः किल मां न च कश्चिदुपाय इहास्त परः ॥ १६ ॥
सहि ब्राह्मणब्राह्मणभिन्नयुगे ब्रिटिशार्श्रितभारतसंविधितः।
कतमेऽपि हि धार्मिकरीतिविधौ विहितोऽपि च वैध इहाभिमतः ॥ १७ ॥
शुभदैववशाद्दिवसेषु च तेष्वभवद्विधिरेष विधानकृतः।
स सहायकतां तु गतः किल नो द्विविधेऽत्र विधौ स परश्च विधिः ॥ १८ ॥
यदुपाश्रयतो मम सा भगिनी परिणीयत एव मितेऽवसरे।
इह हिन्दुकुलादथ हिन्दुमतादितरत्र स शिष्यकजैनमुखात् ॥ १९ ॥
लगति स्म न तेष्विह जन्मवशादथवा परिवर्तनकारणतः।
न मतानि स तानि समाद्रियते वर एव वधूरपि चैकतरः ॥ २० ॥
स्थितिषु प्रथमं विधिमाश्रयितुं विवशोभवतिस्म जनोऽत्र समः।
स परित्यजतान्मुखधर्मविधीनथवा कथयेन्मनुते न स तान् ॥ २१ ॥
अनपेक्षितमेतदहो त्यजनं त्वतिगर्हितमस्ति समाजदृशा।
क्वचनापि मते दधतां न रुचिं तदिदं त्यजनं नहि भाति वरम् ॥ २२ ॥
इति तेऽस्य विधेः परिणामसुखं न किलाप्तुमिहावसरं दधते।
स्वमते स्वमते दृढतां भजतां परिवर्तनमीदृशमप्रियकम् ॥ २३ ॥
यदुपाश्रयतोऽन्तरजातिगता परिणीतिरियं भवतात्सुकरा।
परमाश्रयतोऽस्य विधेस्तु फलं प्रतिलब्धुमनास्त्यजति स्वमतम् ॥ २४ ॥
अथवा स मतान्तरमाश्रयते यदुपाश्रयतः सुकरोऽस्तु च सः।
त्यजनं हि यथा वचसैव भवेत् श्रयणं हि तथा वचसैव भवेत् ॥ २५ ॥

इति लोकसुखाय मनोवचसोः पृथगाश्रयता न सतां दयिता।
अहमन्तरजातिगते रुचिमान् बलमाहितवांस्तु विवाहविधौ ॥ २६ ॥
बलमाहितमस्तु न वात्र विधौ परमन्तरजातिगताय विधिः।
करणीय इहास्ति स वै सुतरां स च सर्वमतानुगताँल्लगतात् ॥ २७ ॥
न यथा परिणीतिसुखाय भवेन्निजधर्मपरित्यजने विवशः।
भगिनीपरिणीतिविधौ नहि मे समभूदिह नोत्सवसंरचना ॥ २८ ॥
सकलोऽपि विधिः सरलत्वमयः समपाद्यत साधुतयैव तदा।
जननीरुजि भङ्ग ऋताग्रहणे बहुसङ्गिविनिग्रहणे च तथा ॥ २९ ॥
निजभारतरीतिसमाश्रयणान्न तदुत्सवसंरचनास्त्युचिता।
इति कैश्चन बन्धुगणैः सखिभिः सुनिमन्त्रितमङ्गलसम्मिलितैः ॥ ३० ॥
सहयोगधिया परिणीतिविधिर्विहितः समभूद्बहवः कुपिताः।
पितुरेष सुहृद्गण आह तदाऽस्म्यवधाय न तं तु निमन्त्रितवान् ॥३१॥
भगिनीपरिणीतिनिमन्त्रणकं दलमेतदहं किल मुद्रितवान्।
निजदेशगिरा परमत्र मया समधीयत लैटिनवर्णलिपिः ॥ ३२ ॥
इदमस्ति नितान्तनवं हि तदा लिपिराद्रियते स्म जनैर्द्विविधा।
किल दैवतनागरिका बहुभिः कतिभिश्चन पारसदेशभवा ॥ ३३ ॥
नहि सैन्यमथो मिशनं च विना क्वचनापि तु लैटिनवर्णलिपौ।
निजदेशगिरा लिखिता भवतीति विदन्नपि तामहमायुयुजम् ॥ ३४ ॥
विविधेषु जनेषु नवस्य मया विहितस्य विधेस्तु प्रभावमहम्।
खलु वेदितुकाम इमं प्रविधिं व्यवहर्तुमिहास्मि कुतूहलवान् ॥ ३५ ॥
कतिभिश्चन तद्रुचितं कतिभिश्चन नेति पुरैव मया विदितम्।
परमत्र रुचिं दधतस्तु मिता अरुचिं दधतस्त्वमिता अभवन् ॥ ३६ ॥
मितमित्रगणे प्रहितस्य यदा परिणाम इहैष विनिर्गलितः।
बहुषु प्रहिते तु निमन्त्रणके त्वरुचिं दधतां गणनास्त्वधिका ॥ ३७ ॥
न महामनसोऽपि तु गान्धिमुनेरिदमभ्युचितं प्रतिभाति पुरा।
नहि रोमनलिप्यनुयोगविधिर्मयकाद्रियते स्म निमन्त्रणके ॥ ३८ ॥
अहमत्र लिपौ किल पक्षधरश्चिरतोऽभवमित्यभवद्विदितम्।
खलु रोमनवर्णलिपिर्मम सा समकर्षयदन्तरमत्र चिरात् ॥ ३९ ॥

इह तुर्कपदे पुनरैश्यहृदि स्थितरोमनवर्णलिपिः सफला।
प्रतिभावयति स्म च युक्तिरपि प्रबलास्ति तदीयसमर्थनकृत् ॥ ४० ॥

परमस्मि न भारतवर्षकृते तदुपाग्रहणे पुनराग्रहवान्।
यदि स्यामपि वेद्मि न नोऽभिजने लवमात्रमियं सुमता भविता ॥४१॥

अपि राष्ट्रियधार्मिकहिन्दुजनैः सह मुस्लिमकैः नवप्रत्नदलैः।
प्रकटीकृतरोधविरोधशता न हि भावुकताऽत्र यथार्थकता ॥ ४२ ॥

इह यास्ति पुरोज्ज्वलभाग्यमयी सुरगीर्न लिपेः परिवृत्तिसहा।
सुमहान् हि लिपिः सुरनागरिका निजदेशगिरां प्रथिताऽनुगता ॥ ४३ ॥

परिवर्तनतोऽथ लिपेरितराऽऽकृतिरत्र पुरः प्रकटीभवति।
ध्वनिरेति च तां परिवृत्तिमयं किल भावगणोऽपि भजेत भिदाम् ॥४४॥

इह नूत्नपुरातनवाङ्मययोरचलां किल भित्तिसुपस्थपयेत्।
भ्रमिता च पुरातनवाङ्मयकेऽत्र विजातिविदेशगिरेव कृता ॥ ४५ ॥

अथ गीरपि सा भुवि यास्ति मृता लिपिगा परिवृत्तिरियं च गिरि।
नहि यत्र तु वाङ्मयमस्ति महत् नहि सा भविता किल भारतके ॥४६॥

इह भारतवाङ्मयमस्ति महत् सुसमृद्धममूल्यमिति प्रथितम्।
इतिहासविचारपरम्परयोः सततान्वयशालि नृजीवनतः ॥ ४७ ॥

नहि सम्प्रति रोमनलिप्यनुगः किल प्रश्न इहास्ति वचोविषयः।
लिपिशोधनदृष्टिगतेन पदक्रमणेन पुरा भवितव्यमिह ॥ ४८ ॥

इह संस्कृततो जनितास्तु गिरः सकला अपि सन्तु समानलिपौ।
मनुते तु मनो मम गुर्जरतः किल बङ्गपदावधि वाक्समताम् ॥ ४९ ॥

इह भाषितवाक्षु समानतया किल संस्कृतमुद्गममाहुरिदम्।
लिपयोऽपि समानतया सकलाः प्रथयन्ति समोद्गमतां भुवने ॥ ५० ॥

न मिथोऽस्ति पृथक्त्वविशेष इति प्रचिता लिपिरेकतमा भविता।
अमुना यतनेन चतस्र इमा सविधे च परस्परमीयुरिह ॥ ५१ ॥

पुनराङ्गलशासकसंप्रथिता अधिभारतमत्र च दन्तकथाः।
अपि तास्वियमेककथास्ति यथा शतमत्र गिरां प्रगिरन्ति जनाः ॥५२॥

मम तद्गणना स्मृतिमेति न सा प्रमितिस्तु मनुष्यकसंगणनम्।
इदमस्ति विचित्रतमं ब्रिटिशा प्रभवन्ति न कामपि तां वदितुम् ॥५३॥

सकला अपि ता वरनाक्युलरेतिपदेन वदन्ति हि लैटिनगी: ।
'वरना' इति 'जीवनदास'वदा क्युलरेति च तद्गिरमाह सदा ॥ ५४ ॥
इममर्थमजानत एव च नो वरनाक्युलरेति पदे निरतान् ।
मनसा हसतीयमिहाङ्ग्लमतिर्मतिमूढतया न वयं विरता: ॥ ५५ ॥
इदमस्ति नितान्तसुविस्मयकृत् यदिहाङ्ग्लजना न विदन्ति गिरम् ।
परमत्र दधत्यधिकारमिमे निजपाचककिङ्करिकानुकृते: ॥ ५६ ॥
गिरमाविरकुर्वत काञ्चिदिमे श्रवणेकटुभारतवाग्विकृतिम् ।
तदिमामवयन्ति यथार्थगिरं कृशरागिरमाहुरिमां सुधिय: ॥ ५७ ॥
इह भारतजीवनवृत्तमिमे निजकिङ्करजीवनदर्शनत: ।
प्रविदन्ति तथा गिरमप्यसुकां तदुदीरितया कृशरागिरया ॥ ५८ ॥
किल किङ्करकिङ्करिका: प्रभुभि: स्वगिरा कृतिनिर्वहयाऽभ्यलपन् ।
नहि ते त्ववयन्ति गिरामितरां विदितं न च वाङ्मयमस्त्यबुधाम् ।५९॥
इह हिन्दगिरोऽप्यथ देवगिरोऽप्यथ वङ्गगिरादिगिरां पृथुलम् ।
परमोन्नतमस्ति च वाङ्मयकं न विदन्ति तदेतदिह ब्रिटिशा: ॥६०॥
इह मानवसंगणनाविततिर्वितनोति शतद्वयवाग्विवृतिम् ।
अपि शर्मणदेशप्रजापि करोत्यनुषष्टिगिरां व्यवहारमिह ॥ ६१ ॥
न च वेद्मि कदाचन केनचनाप्यमुयाऽसमगी:प्रभृतेर्दशया ।
अपि शर्मणदेशगतेषु भिदाऽत्र मिथो विमनस्कतयानुमिता ॥ ६२ ॥
ऋतमेतदिहास्ति लघुर्लघुकापि गिरा लिखिताऽल्यजनाभिहिता ।
लघुभेदमपीह विलोक्य च तैरनुदर्शयितुं पृथगेव धृता ॥ ६३ ॥
इह भारतभूमिविशालतले त्वियती गणना नहि विस्मयकृत् ।
यदि भागमियन्तमवेक्ष्य तुला क्रियते न युरोपपदे स्युरिमा: ॥६४॥
परमत्र जनेषु किलापठिता अधिका इति तत्स्तर आकलित: ।
विविधाश्च गिरो रचनामयिता इह ब्रह्मपदादितरत्र गिर: ॥ ६५ ॥
द्विविधा भरतावनिमुख्यगिरा किल हिन्दगिरा पुनरुर्दुगिरा ।
अथ वंगलगुर्जरतेलुगुवन् मलयालमतामिलकन्नडवत् ॥ ६६ ॥
असमो किल सिन्धुकलिङ्गगिरा पशतोरथ पञ्चनदीयगिरा ।
इति सम्मिलिता इह चाष्टगिर: सकलस्य हि भारतकस्य मता: । ६७।

कतिचिद् गिरिजंगलवासिगिरः परिवर्ज्य समास्वपि वाङ्मयकम् ।
अथ पूर्वत आर्यगिरोऽन्तरतः पुनरुत्तरतोऽप्यथ पश्चिमतः ।। ६८ ।।
प्रसृते किल भारतभूमितले वितताः प्रमिलन्ति मिथो बहुधा ।
अथ दक्षिणतो द्रविडादिगिरः पृथगाकृतयोऽपि प्रभावभृतः ।। ६९ ।।
किल संस्कृतशब्दबहुत्वजुषः कृतसंस्कृतरीतिकवाङ्मयकाः ।
इह चाष्टसु गीःषु पुरातनकं बहुमूल्यमिहास्ति हि वाङ्मयकम् ।। ७०।।
विषयश्च विनिश्चित एव गिरां विशदश्च तदाश्रितनामभृताम् ।
यदि वक्तृगणे गणना क्रियते प्रमुखासु तदा दधतेऽत्र पदम् ।। ७१ ।।
इह हिन्दगिरस्तु चतुर्दश ता अथ बङ्गगिरो भुवि पञ्च पुनः ।
यदि कोटय एव भवेयुरिह व्यवहारकराः पुरुषाः परितः ।। ७२ ।।
परमत्र तु यामपि कामपि ते व्यवहारगिरं दधते वदने ।
श्रवणे न तु हिन्दगिरं सकला अवयन्ति जना अपि हिन्दपदे ।। ७३ ।।
इति हिन्दगिरा विशदाशयताऽभ्युदयाश्रितसंस्कृतवाग्विभवा ।
दृढमूलतया धृतपारसगीः सुसमृद्धसरोद्वयसिक्तपदा ।। ७४ ।।
कतिभिश्चिदियं च समाभिरिहाङ्ग्लशब्दपरिग्रहपूर्णतनुः ।
इह दक्षिणतो द्रविडैकपदे प्रतिभाति तु हिन्दगिरेतरगीः ।। ७५ ।।
परमत्र जनाः किल हिन्दगिरं पठितुं वदितुं च प्रयत्नपराः ।
इति वत्सरयुग्मत एव पुरा विदितं गणनाङ्कविलोकनतः ।। ७६ ।।
मम मित्रगणेन कृता परिषद् गतवर्षचतुर्दशकेन किल ।
त्रिनभोऽस्वसुसंख्यजनान् समपीपठदत्र तु हिन्दगिरं यतनात् ।। ७७ ।।
परिषत्त्वनुपाश्रितशिष्टिबला जनताश्रयतः सफलीभवति ।
पठितैः परपाठनतः क्रमशो निजयत्नविधिः श्रित एष जनैः ।। ७८ ।।
न मनागपि संशय एष ममाश्विह राष्ट्रगिरः पदमर्जयिता ।
भुवि हिन्दगिरेति यथार्थतया व्यवहारदृशास्ति हि राष्ट्रगिरा ।।७९।।
लिपिरत्र भवेत्किमु नागरिकी उत पारसिकीति वृथावदनम् ।
उदयं प्ररुणद्धि हि हिन्दगिरो द्विदलस्य मिथः प्रतिगामिबलम् ।। ८० ।।
इह राष्ट्रगिरः पदमाश्रयितुं भुवि हिन्दगिरा स्वविकासकृते ।
किमु संस्कृतमाश्रयतामथवा किमु पारसवाचमिति भ्रमिताः ।। ८१ ।।

लिपिरप्यधुनास्ति विवादपदं स समाहित एव भविष्यति नः।
न लिपिद्वयमेव कथं न भवेदुररीकृतमत्र किलाधिकृतम् ॥ ८२ ॥
स्ववशाश्च भवन्तु जनाः सुविधां प्रसमीक्ष्य समादधतां किमपि।
इह संस्कृतपारसवाक्पदयोरधिकाधिकृतेरपि दुर्ग्रहिता ॥ ८३ ॥
विनिरोद्धुमिमां यतनीयमिह व्यवहारगिरा सुलभा सरला।
लभतां भुवि वाङ्मयगीः पदतां जनशिक्षणतश्च परिष्कृतताम् ॥८४ ॥
अधुना खलु मध्यमवर्ग्यनृणां लघुकानि दलानि यतन्त इह।
रुचिरोतिविनिर्णयने निरतान्यतिसंकुचितान्यनुदारतया ॥ ८५ ॥
परिवर्तनमात्रविरोधितया निजगीष्षु पुरातनताभिरुचिम्।
परिहातुमशक्ततया जनताजगतोर्न भजन्ति समीपगतिम् ॥ ८६ ॥
इह हिन्दगिरोऽभ्युदयप्रसरावतिरिक्तगिरां व्यवहारविधौ।
उदये च न बाधकरौ भवतान्न भविष्यति चेत्यहमाश्वसितः ॥ ८७ ॥
इह काश्चन हिन्दगिरोऽप्यधिकामवधानपरां दधते प्रकृतिम्।
अत एव च ता इह शिक्षणतो व्यवहारवशादधिकारजुषः ॥ ८८ ॥
ननु ताभिरिदं जनशिक्षणकं निजसंस्कृतिरप्युपसर्तुमलम्।
कतिचिद्दधते तु मतं यदियं भविताङ्ग्लगिरा खलु राष्ट्रगिरा ॥ ८९ ॥
परमुच्चजनान् पठिताँल्लिखितान् कतिचित्प्रविहाय न चान्यजनैः।
नतरामुररीक्रियते हि पुरेत्यवधारणमेतदसम्भववत् ॥ ९० ॥
नहि शिक्षणसंस्कृतिदृष्टिरिमामवयाति मनागपि बन्धवतीम्।
भवतादधुनावदियं क्वचनान्तरराष्ट्रियकार्यविधौ निहिता ॥ ९१ ॥
बहुभिः किल भारतभूमिभवैरधिगम्यत आङ्ग्लगीस्तदियम्।
भविता जगतोऽद्य विचारविधेः प्रगतेश्च परीचितयेऽभ्युचिता ॥ ९२ ॥
इति चात्रदधत्स्पृहयामि यथा युनिवर्सिटिषु प्रपठेयुरिमाम्।
अथ पारसशार्मणरूसगिरामिटलीप्रभृतेरपि सर्वगिरः ॥ ९३ ॥
प्रतिशिक्षयितुं प्रतिबोध्यजनान् नुदतादिह भारतमेव निजान्।
अयमाशय आङ्ग्लगिरोऽनवहेलनमन्त्यजवच्चरिताध्ययनम् ॥ ९४ ॥
न किलाङ्ग्लगिरोऽध्ययनावधिके परिसीमितमत्र न संकुचितम्।
न तदेकनिवेशनमस्तु मनस्तदिदं हि विचारविकारकरम् ॥ ९५ ॥

नहि राष्ट्रियवाददृढा अपि नो ह्यनुमिन्वति ये निजदेशरुचौ ।
इह चाङ्ग्लविचारपरम्परयाऽद्य प्रभावमिहादधते गहनम् ॥ ९६ ॥
नुदतादिह नाम विदेशगिरां ग्रहणाय कियत्तु जनान् मतिमान् ।
परमान्तरराष्ट्रियबन्धकृतेऽध्ययनं समपेक्षितमाङ्ग्लगिरः ॥ ९७ ॥
न च हानिरिहास्ति वयं सुचिरादनुपूरुषतस्तदधीतिरताः ।
सफलत्वमिहाधिगतं, न तु तत्कृतकारितमार्जनकास्ति मतिः ॥ ९८ ॥
इयतोऽवसरश्रमतस्तु फलं कलनीयमिहाङ्ग्लगिरो विभुता ।
न गिरन्तरगास्त्यत एव समा अपि तत्प्रभुतां प्रति सन्ति नताः ॥ ९९ ॥
इति सम्भवतीयमिहाद्रियतामपि सान्तरराष्ट्रियकार्यविधौ ।
गगनोत्थगिरादिषु माध्यमतामुपयातु न चेदवभेदकरी ॥ १०० ॥
इति तावदिहाङ्ग्लगिरः प्रसरो भवतादिति नो यतनीयमिह ।
तदधीतिषु यावदिदंकुशलत्वमुपार्जितमस्तु तदर्जयतात् ॥ १०१ ॥
परमेतदपेक्षितमस्ति न मे यदिहाङ्ग्लगिरोऽभिमतिप्रगतिः ।
कतिचिद्धि तथा यतितुं प्रभवो बहुसंख्यकशीर्षसु नास्तु भरः ॥ १०२ ॥
कतिभिश्चिदहोभिरिहांग्लगिरः किल मौलिकमध्ययनं प्रति मे ।
मन आननमस्ति विभाति च मे सरलाङ्ग्लगिरो भविकं भविकम् ।१०३।
स्तरवर्तिविशेषविदस्त्वथवा मतिमत्तदधीतिषु निक्षिपतात् ।
जनतासु तु मौलिकमध्ययनं ध्रुवमाङ्ग्लगिरः कुरुतात्प्रभुता ॥ १०४ ॥
मम तावदिदं रुचितं भविता यदि हिन्दगिराश्रयतेऽन्यगिरम् ।
समपेक्षितमेतदिहाधुनिकान्यनुसन्ति पदानि न हिन्दगिरि ॥ १०५ ॥
इति संस्कृतपारसिकार्वगिरा नवदुर्गमशब्दप्रकल्पनतः ।
वरमस्ति यदाङ्ग्लगिरादिषु ये प्रचलन्ति चलन्त्वितरास्वपि ते ॥१०६॥
इह गीःशुचितारुचयस्तु मतं मम नेदममन्वत ते स्खलितिम् ।
विदधत्यहहा किल गीर्विभवं परिवर्धयितुं मतमस्त्युचितम् ॥ १०७ ॥
यदि गीर्मृदुलास्ति न सास्ति दृढा परगीरपि तत्र प्रयाति लयम् ।
भगिनीपरिणीतिपरं तु गतः सुहृदं शिवगुप्तमहं मिलितुम् ॥ १०८ ॥
अधिकाशि स वत्सरतोऽप्यधिकात् समयादभवल्लकवातहतः ।
स हि लक्षनवस्थितवन्दिगृहे सहसा लकवातरुजाऽऽतुरितः ॥ १०९ ॥

अधुना स शनैश्च शनैर्विरुजो भवति स्म तदा मम हिन्दगिरः ।
सभया तु कयाचन मानदलो विततो रुचिरालपनावसरः ।। ११० ।।

मयकाभिहितं लघुबोधमये विषये मम विज्ञजने लपतः ।
किल संकुचतीव मनः, परतः कतिचिज्ज्ञपनान्यवदं प्रति तान् ।।१११।।

भुवि हिन्दगिरो यदलङ्कृतिमान् कठिनश्च प्रयोग इहाद्रियते ।
अलुलोचमिमं किल संस्कृतगोनंवक्लृप्तपुरातनरीतिकृता ।। ११२ ।।

कृतवानिह साहसमस्मि तदा मितलोककृतव्यवहारपदा ।
नृपतिस्तुतिपद्धतिमद्य बुधैः परिवर्ज्य नवाद्रियतां विशदा ।। ११३ ।।

अथ हिन्दगिरो नवलेखकविद्गण आद्रियतां यतनं लिखितुम् ।
जनतार्थमथो सरलां सहजां नवहिन्दगिरं श्रयतां सुगमाम् ।। ११४ ।।

जनता प्रतिबोधनबुद्धिरियं नवजीवनवास्तविकत्वमिदम् ।
खलु दास्यति हिन्दगिरे विशदं जनभावप्रकाशनदाक्ष्यमिह ।। ११५ ।।

अधिकं च प्रशस्यमिमे लिखितुं प्रभवेयुरिहेदृशयत्नबलात् ।
प्रपठन्तु च पश्चिमवाङ्मयकं प्रतियान्तु च कंचन लाभमितः ।। ११६ ।।

इदमप्युचितं भवितेह यदाऽत्र युरोपगिरां चिरवाङ्मयकम् ।
सह नूत्नविचारकदम्बमिदं समनूद्य प्रकाशितमस्तु बुधैः ।। ११७ ।।

अपि चेदमिहास्तु च बङ्गगिरश्च मराठगिरो गुजरातगिरः ।
विषयेऽस्ति हि हिन्दगिरोऽभ्यधिकं किल वाङ्मयमुन्नतमित्यवदम् ११८

विगताब्दगणे किल हिन्दगिरोऽभ्यधिकं भुवि बङ्गगिरा लिखितम् ।
रचनात्मकवाङ्मयमित्यभितोऽभ्यलषाम वयं किल मित्रधिया ।।११९।।

तदनन्तरमागममेष मनागपि नान्वभवं यदिदं मिलनम् ।
इदमालपनञ्च द्वितीयदिने प्रकटीभविता किल वृत्तदले ।। १२० ।।

परमत्र गतेषु तु केनचन प्रकटीकृतमेष्विह हिन्दगिरः ।
अधुना मयि मद्दृशि घुष्टतयाऽऽक्रमणं क्रियते स्म तु वृत्तदलैः ।।१२१।।

इह गुर्जरबंगमराठगिरां महिमा लघिमा किल हिन्दगिरः ।
कथमेष कृतो मयकेति समैरहमाक्षिपतां वचनैर्वलितः ।। १२२ ।।

स्वविचारविरोधवचःसु मया वहवः कटुकास्तु गिरः कलिताः ।
बत वादविवादरणे पतितं त्ववकाशलवोऽपि न मे त्वभवत् ।। १२३ ।

श्रुतमेष चिरं चलितः समरः किल यावदहं न गतोऽस्मि पुनः ।
नवबन्दिगृहं परमक्षि ममोद्घटितं घटनाक्रमतस्तु ततः ॥ १२४ ॥
कथितं किल तेन यदत्र बुधा अपि पत्रकृतोऽपि च हिन्दगिरः ।
असहिष्णव एव न ते सुहृदः शुभभावनयापि कृतामुचिताम् ॥ १२५ ॥
विवृतिं श्रुतिरन्ध्रगतां न सहन्त इति प्रकटीकृतमास्त रणे ।
परमस्य सदाशय एष यथात्मनि ते लघुतामनुभूय तथा ॥ १२६ ॥
कुपिता अभवन् स्वसमीक्षणतः परमास्ति किलोनगतिर्विदुषाम् ।
सुसमीक्षणकस्तर एष पुनर्भुवि हिन्दगिरोऽस्ति च निम्नतरः ॥ १२७ ॥
इह लेखकलोचकयोश्च मिथस्त्वपशब्दशतव्यवहारप्रथा ।
इह संकुचितास्ति दृशा सहते नहि निन्दनमात्मप्रशस्तिपरा ॥ १२८ ॥
इह लेखकपत्रकृतोर्यतनञ्च परस्परमात्रहिते निहितम् ।
लघुकेन्द्रगतं जनताहिततो रहितं विषये ततहिन्दगिरः ॥ १२९ ॥
स हि विस्तृत आह्वयतीव जनं स्वसमीपमहो विषयोऽत्र पुनः ।
त्रुटयो लघुका गुरुका न वरं, जनयन्ति हि खेदमिमा मनसि ॥ १३० ॥
इह हिन्दगिरो रचना व्रतिनां यतनानि च शक्तिवृथाव्ययवत् ।
प्रतिभान्ति, यदीयमतीतमभूदिह गौरवशालि प्रकाशमयम् ॥ १३१ ॥
इह नूनमतीतमतीतवतो, भवतस्तु भवन् समयः प्रथितः ।
किल तस्य भविष्यति सास्ति शुभोज्ज्वलतेति चिरं भुवि जीवतु सा १३२
इह वृत्तदलानि च हिन्दगिरो बलवन्ति महान्ति भवेयुरहो ।
यदि लेखकपत्रकृतौ तु बहिर्गमनं कुरुतो लघुकेन्द्रगृहात् ॥ १३३ ॥
जनतार्थमिमे विलिखेयुरहो जनतार्थमिमानि ततानि पुनः ।
परमोन्नतिभाग्ययशःप्रतिभां प्रतिपद्य भजन्तु च जन्मभुवम् ॥ १३४ ॥

भाषा भजन्तामिह जन्मभूमिं सर्वा इतीहेच्छति स स्म नेता ।
इच्छां तदीयामनुवर्तमानः काव्यं किलेदं निजजन्मभूमेः,

वीरस्य पुत्रस्य जवाहरस्य चरित्रमुद्धृत्य चिरात्प्रवृत्तम् ।
तत्पञ्चपञ्चाशकसर्ग एष प्रभाति शान्तिं वितरंश्च कान्तिम् ।

साम्प्रदायिकता प्रतिक्रिया च

चन्द्रवर्त्म

षट्पञ्चाशः सर्गः

मत्स्वसुः परिणयस्य निकटतो विट्ठलो दिवमगात्स जनपदे।
रुग्ण एष बहुभिः किल दिवसैः मृत्युरस्य विषमास्ति च घटना ॥ १ ॥
अस्मदीयगुरुनेतृषु क्रमशोऽस्मान् विहाय विगतेषु सुरभुवम्।
शिष्यते स्म हि निराश-निरयनं केवलाञ्जलिनिबन्धनमभितः ॥२॥
सांसदः स कुशलः समितिपतिपीठलब्धगुरुगौरवसबलः।
गीयमानगुणगाथ इह भवन् मन्मनोविकलतां समजनयत् ॥ ३ ॥
तादृशो न भुवि कश्चिदिह परो नेति वाच्यमिदमत्र बुधवरैः।
किन्तु भारततले मतिमहतां सांसदादिपदयोग्यसुमहसाम् ॥ ४ ॥
न्यूनतास्ति, समभूदथ भविता तत्कृते पठति ना विधिनिचयम्।
विट्ठले गुणगणास्तु तदितरे स्मासते स्मरणकीर्तनविषयाः ॥ ५ ॥
सोऽभवत्स्ववशतासमरमहासैन्यसंघटनशासनकुशलः।
एकदाहमधिकाशि समगमं यर्हि हिन्दुयुनिवर्सिटिसदनम् ॥ ६ ॥
छात्रवृन्दमनुबोधयितुमहं तन्निमन्त्रणमवाप्नुवमुचितम्।
तद्वशादहमगाञ्च समवदम् मालवीयसदसस्पतिसमितौ ॥ ७ ॥
भाषणेऽत्र बहुशोऽप्यपवदता साम्प्रदायिकदृशाभवदुदिता।
तत्र हिन्दुसभया कृतकृतयो निन्दिता, नहि तथाऽऽक्रमितुमिमाम् ॥ ८ ॥
पूर्वमैच्छमिह जातु च मनसा साम्प्रदायिकसुधारविवरणम्।
मन्मनस्यजनयत्किल विविधं सम्प्रदायमखिलं प्रति कटुताम् ॥ ९ ॥
तत्कटुत्वमिह भाषणसमये निर्गतं कुपितमानसनिहितम्।
ज्ञानपूर्वकमहं त्वनुकरणाऽन्धत्वमत्र कृतबांस्तु सुविशदम् ॥ १० ॥
हिन्दुनेतृषु च मुस्लिमविषये भाषणस्य नहि काचिदुचितता।
सम्प्रदायमितरं निजवचसा नास्पृशं प्रतिवदन्निजमधिकम् ॥ ११ ॥

न स्मृतं तु सदसस्पतिरभवत्सैष हिन्दुजसभासु चिरतरम् ।
मालवीय इति नोचितमभवत् तत्समक्षमसुकं प्रवचनकम् ॥ १२ ॥
विस्मृतेस्तु पथिकः स समभवत् यसाचरात्परिहृताऽभवदमुना ।
साहि हिन्दुजसभेति च तदनु प्रायशोऽपरसभापतिरभवत् ॥ १३ ॥
रश्मिरज्जुमथ यावदिह करे मालवीय इममाधृत धृतिमान् ।
साम्प्रदायिकतया न हि विकृता राजनैतिकपथप्रगतिरियम् ॥ १४ ॥
किन्तु केनचन वासरनिकरेण प्रवृत्तिरियमुग्रतरतया ।
प्राचलद्यदवधाय मनसि मे मालवीयकृतबन्धविरहिता ॥ १५ ॥
भासते स्म सभया सह सहसा तत्प्रवृत्तिरपरञ्जितहृदया ।
तर्ह्यपीदमभवन्न समुचितं यन्मयात्र प्रथितं निजहृदयम् ॥ १६ ॥
येन तत्स्थितिरभूदतिविषमा तत्कृतं किल निमन्त्रणकुफलम् ।
अस्य वस्तुन इहानुभवनमप्यस्य दुःखपरितापपरिगतम् ॥ १७ ॥
एकमन्यदपि मौढ्यभरितमत्रास्ति मे स्खलितमेतदविषहम् ।
यस्य पात्रमभवं मम सविधे प्रेषितं किमपि पत्रमुपहृतम् ॥ १८ ॥
यत्र हिन्दुयुवकैः कृतमभवत् प्रस्तुतं स्वसमितौ च विनियतम् ।
आजमीढनगरेऽभिहितमिदं तत्किलातिशयमापदुपजनम् ॥ १९ ॥
वस्तुतो नहि सभा कमपि च कापीदृशं किल विनिर्णयमकरोत् ।
यन्मयात्र परिचर्चितमभवद् तत्तु मां भ्रमयितुं विहितमभूत् ॥ २० ॥
भाषणस्य विवृतिर्लघुतनया वृत्तपत्रहृदि मुद्रणमगमत् ।
तत्र चाभवदतीव कलकलो यद्यपीह कृतमभ्यसनमभूत् ॥ २१ ॥
अत्र हिन्दुसभयानुगतमतैर्नेतृभिस्तु कृतमाक्रमणमिदम् ।
मां तथातिचकितीकृतवदिदं व्यक्तिगामि तदभून्मयि विषमम् ॥ २२ ॥
मुख्यतो न विजयात्परिचलितं भासते स्म न च सीमबहिरिदम् ।
मन्मनो मुदितमेतदपि ततस्तत्र चिन्तनमपि प्रविकसितम् ॥ २३ ॥
अत्र वस्तुनि च बन्दिगृहगतः पूर्णमन्तरमहं निजमधरम् ।
नाऽभ्यगच्छमिह केन तु विधिनोपक्रमेयमिति चिन्तनमचलत् ॥ २४ ॥
एतदेकमिह बर्हसदनमासीदिहास्मि करवेशनव्यसनः ।
किन्तु तादृशविवादनिपतनं रोचते न मम यत्त्वनवसितम् ॥ २५ ॥

अद्य नास्ति मम मार्ग इह परो हिन्दुमुस्लिमयुगं प्रति विततः ।
साम्प्रदायिकदृशाऽत्र विलिखितो लेख एक इह तर्कमनुगतः ॥ २६ ॥
यत्र दर्शितमभूदुभयगतसाम्प्रदायिकतया तु वितथितम् ।
साम्प्रदायिकमिहावरणमथो राजनीतिकृतसंकुचितिरियम् ॥ २७ ॥
वृत्तपत्रशकलानि सुवहुशो यानि पूर्वमवचित्य विधृतवान् ।
बन्दिगेहगत एव तु सुचिरम् साम्प्रदायिकसुनेतृमतगिरः ॥ २८ ॥
मत्समीपमिदमीदृशमभवत् दुष्करं तदुपयुक्तमचिनवम् ।
वृत्तपत्रमिह हिन्दगिरि कृतं लेखमेनमनुमुद्रितवदरम् ॥ २९ ॥
हिन्दुमुस्लिमयुगस्य सुबहुशः सम्प्रदायमधिकृत्य सुविहिताः ।
मद्गिरः प्रतिहता न समभवन् मुस्लिमैःक्वचन हिन्दुभिरपि ताः ॥३०।
हिन्दुवर्गसभया तदधिकृतैर्यैर्महस्विवचनैः प्रतिकथिताः ।
तैरपीह मुनिवृत्तिरधिकृता एष वै सरमुहम्मदिकवलः ॥ ३१ ॥
मुस्लिमप्रतिनिधिश्च मम गिरो गोलपीठपरिषत्समवयवाः ।
ताः मुधारयितुमायासितममुना युक्तिसूदितमनेन न किमपि ॥ ३२ ॥
प्रत्तमुत्तरमिहास्य च मयका यत्प्रकाशयति मन्मतमपि तत् ।
यद्विधानसभयानृपनयिकसाम्प्रदायिक विनिश्चितिरपि सा ॥ ३३ ॥
कार्यतामिति ततो विषयमिमं साम्प्रदायिकमुपाश्रयमलिखम् ।
लेखयुग्मकमिदं च बहुमतं यं प्रभावमकरोत्स बलमधात् ॥ ३४ ॥
नानुमानितमिदं प्रथममिह साम्प्रदायिकविचारतलगतम् ।
गुप्तमस्ति सुमहस्तदहमिदं लेखयुग्मकबलेन निरसितुम् ॥ ३५ ॥
स्यामलं मम तु लक्ष्यमिदमभूत् यत्प्रकाशमु पयात् जगति तत् ।
सम्प्रदायिकनृणां नयिकनृणां चाङ्गलदेशमधिश्रित्य भरतभुवि ॥३६॥
तत्प्रतीकृतिकृताञ्च मिलनतो राजनैतिकदृशा प्रगतिपथे ।
वा समाजिकदृशा तु तदधिकेऽसौ विरोध उररीक्रियत इह ॥ ३७ ॥
साम्प्रदायिकनृणामभिलषितं सम्प्रदायसहगामिषु हितम् ।
तत्तु केवलमिहाकलितदलस्वार्थसिद्धिमुपलक्ष्य विनिहितम् ॥ ३८ ॥
यद्विचार इह चाक्रमणमिदं तर्कपूर्णविधिना चलतु परम् ।
बन्दिगेहगमनेन विफलितो हिन्दुमुस्लिमयुगस्य मिलनतः ॥ ३९ ॥

ऐक्यसिद्धिमभिलक्ष्य विनिहिताः प्रार्थनाः प्रतिदिनं प्रकटतया ।
संशयेन रहिताः फलजनिका व्यर्थवत्समनुभान्ति सततमिमाः ॥ ४० ॥
यावदत्र मतभेदजनकता कुत्र तिष्ठति रहस्यवदिति ताम् ।
नानुसन्धिविषयत्वमुपनयेत किन्तु नास्य जप ऐक्यजनकता ॥ ४१ ॥
विप्लवात्प्रकृतवासरमवधीकृत्य नीतिरिह या ब्रिटिशगता ।
साम्प्रदायिकरणक्रमदृशि सा व्यक्ततामुपगता च विरमिता ॥ ४२ ॥
सानुसन्धिमिममित्यवितथता 'भिन्धिछिन्धि' रणनीतिरिह परमा ।
हिन्दुमुस्लिमभिदां प्रकटयते तन्मिथो न मिथुनक्रमत इति ॥ ४३ ॥
संहता नहि भवेयुरिति यतितं ते मिथोऽकलहयन्निति फलितम् ।
विप्लवात्परमियं चलितवती साङ्ग्लनीतिरिति सङ्करजननी ॥ ४४ ॥
मुस्लिमा ब्रिटिशवञ्चितमतयः स्वाधिकारमदुरस्य करतले ।
सा स्मृतिः प्रखररूपमधृत यत् तेन तान् ब्रिटिशशिष्टिरतिभयात् ॥४५।
उग्रयुद्धपरभीतिभरपुषो बोधतिस्म नवशिक्षणविरतान् ।
किङ्करेष्वपि किलाल्पतरतमान् संशयात्मकदृशैव निमिषितान् ॥ ४६॥
पश्यतिस्म किल हिन्दुभिरधिकं किङ्करत्वमुररीकृतमभवत् ।
आङ्गलीयगिरि चाधिकरुचयस्ते सुसाध्यमनसः प्रतिगणिता ॥ ४७ ॥
राष्ट्रिया तदनु काप्युदयमगाद् भावनोच्चदलगे पठितजने ।
हिन्दुमात्रनियतत्वमपि ततोऽस्याः स्वभावजनितं न मुसलिमे ॥ ४८ ॥
मुस्लिमा ह्यपठनादनुगमिता राष्ट्रियत्वमिदमत्र विनयतः ।
दैन्यतश्च बिशदीकृतमभवत् तत्तथापि सहतेस्म न प्रभुता ॥ ४९ ॥
मुस्लिमानुनयतस्तु नवलया राष्ट्रियत्वनवभावलहरितः ।
आङ्ग्लवागपरिबोध इह परं साह्यमानयति सस्म विधिवशात् ॥५०॥
आङ्ग्लवागपरिबोध इह यथा राष्ट्रियत्ववरणप्रतिहृतिकृत् ।
आङ्ग्लशिष्टिसहभावनिरसने तत्तथैव किल कारणमभवत् ॥ ५१ ॥
इत्यतोऽनिवरणीयमभवदत्राङ्ग्लवाक्परिचयोऽपि स पठनात् ।
आङ्ग्लशिष्टिरतिदूरदृगियमिह मुस्लिमाङ्ग्ल पठनाध्वविरचने ॥५२।
सैयदाहमदखानसहकृतेर्लाभमाभजत लाभशतकरम् ।
सैयदो हि मनसास्त्यतिविकलो मुस्मिलानुपतनेन स परितः ॥ ५३ ॥

शिक्षणे त्वतिशयेन निपतनात् तस्य खेदमनुगच्छति हि मनः ।
तस्य जातिरियमाङ्ग्लकरुणया तन्मनोऽभिभवनेन च रहिता ॥ ५४ ॥
नादरं भजति नापि दरमियं कञ्चिदाङ्ग्लहृदये जनयति यत् ।
तद्युगस्य बहुधाङ्ग्लगुणगणाशंसकेषु च स एकतम इह सन् ॥ ५५ ॥
तद्युरोपगमनं तदुपरि चातिप्रभावमकरोदिति कलये ।
ऊनविंशशतवत्सरचरमेऽनेहसीह महिमानमभजत ॥ ५६ ॥
सभ्यता किल युरोपजनपदस्थायिनी स्वधिपतित्वगरिमतः ।
तत्र तेऽखिलगुणा अपि विशदा येऽधुनास्य महिमानमुदनयन् ॥ ५७ ॥
नास्ति भीतिरपि काचन हृदये सम्मुखे भवति कश्चन सफलः ।
इत्यथो नवसुधारयुगमिदं विश्वसित्यमलभाविनि हि निजे ॥ ५८ ॥
इत्यतोऽपि च युरोपगमनतस्तत्प्रभावपरिणामनियतता ।
सैयदं तममुमूहदियमिहालोकिताङ्गलचमत्कृतिशतकम् ॥ ५९ ॥
हिन्दवः प्रथममत्र यदगमन् ते युरोपमथ चाङ्ग्लजनपदम् ।
स्म स्तुवन्त्यथ शनैः पुनरपि तद्दर्शनेन न भजन्ति चकितताम् ॥ ६० ॥
सैयदस्य तु स विस्मय उदितश्चाकचिक्यपरिदर्शनजनितः ।
ताम्यतिस्म न युरोपलिखिततः पत्रतः प्रकटितोऽभवदिह यः ॥ ६१ ॥
सोऽलिखत्-परिणतिस्तु निसरतीहास्य यद् व्यवहरन्ति न खलु ते ।
शिष्टतानुगतमस्मदभिजने नून् पशूनिव लघूनवददधति च ॥ ६२ ॥
नीचकांश्च घृणितांश्च सततमेतानवेत्य परुषं व्यवहरणम् ।
कुर्वतेऽत्र मनुजान् प्रति यदिमे क्षाम्यमेतदिह जातु न भवति ॥ ६३ ॥
मन्यते मम मनो व्यवहरणं तत्तदीयमिह कारणजनितम् ।
तैर्वयं न विदिता भुवि यदिहाद्यावधि स्खलितमेतदिह तत् ॥ ६४ ॥
नाङ्ग्लमानवमृषास्तुतिमिह तां प्राप्नुवं, यदि वदामि ऋतमिदम् ।
भारतस्य मनुजा यदि पठिता अप्यमी च वणिजः कुलजनिताः ॥ ६५ ॥
आङ्ग्लशिक्षणसुशीलऋतकृतिषूपमासु न भजन्ति सदृशताम् ।
प्रत्युतैकबहुयोग्यसुभगनुः सम्मुखे मलिनजन्तुसदृशताम् ॥ ६६ ॥
ते च चेद्भूरतभूमिजनिभृतां वन्यजीवसमतामभिदधति ।
तत्र हेतुरपि चास्ति सुविदितस्तं तथानुदिनमेव निमिषामि ॥ ६७ ॥

भारतीयमतिबाह्यमिदमलं यत्क्वचिन्मनुजजातिषु सुदृशम् ।
लोकयुग्मकमनीयमविकलं वस्तु दत्तमिह तेषु भगवता ॥ ६८ ॥
सर्वमेव तु युरोपजनपदे तत्र चाङ्ग्लविषयेऽस्ति धृतमिति ।
ईदृशी स्तुतिरहो नहि कुहचित् केनचित्खलु कृताऽऽङ्ग्लविषये ॥ ६९ ॥
सैयदोऽतिपरिभूत इह स तैः सम्भवत्ययमिमासु बलगिरम् ।
साम्यमेतदतिरिक्तवचनकञ्चानयद् व्यवहृतो प्रबलयितुम् ॥ ७० ॥
तस्य विश्वसितिरस्ति खलु पदं त्वाङ्ग्लशिक्षणपथेऽग्रसरयितुम् ।
तत्रि शिक्षणमृते ह्यनुपतिता मुस्लिमाः कृशतराः स्युरतिशयात् ॥७१॥
आङ्ग्लशिक्षणफलं प्रकटयता तेन किङ्करतया निजभवनम् ।
सुप्रभावबहुमाननिचयनं मुस्लिमातिहितकारकमुदितम् ॥ ७२ ॥
इत्यसौ सकलशक्तिमुदयुनक् मुस्लिमान् सपदि शिक्षयितुमिमान् ।
आङ्ग्लवाचमथ चाङ्ग्लसुसरणिं ह्रीप्रमादहरणार्थमतिशयात् ॥ ७३ ॥
इत्यसौ बहिरबाधमुभयमप्यैच्छदत्र नवराष्ट्रियसरणिम् ।
मुख्यबाधमभिमन्य तदवरोद्धुं विरोधमतिमात्रमकुरुत ॥ ७४ ॥
शिक्षणेऽर्धशतवर्षसमयतः पूर्वमग्रसरतामुपदधतः ।
हिन्दवो ब्रिटिशशासनविषये वक्तुमासत तदा त्वतिमुखराः ॥ ७५ ॥
सैयदस्तु निजजातिहितदृशा शिक्षणप्रयतनेषु स कृतिभिः ।
आङ्ग्लशिष्टिपरितुष्टयधिगमने सर्वथा निजमनो वितरितवान् ।७६॥
नैच्छदेष सहसा किमपि च तत् कर्तुमत्र गतिरोधप्रजननम् ।
काङ्ग्रसं समजहात्स च चपलं राष्ट्रवादहितकारि हि तदिदम् ॥ ७७ ॥
तादृशव्यवहृतेरुपहृतये शिष्टिरास्त सुचिरात्कृतमनना ।
मुस्लिमेषु नवशिक्षणविषयो निर्णयोऽयमुचितश्च समभवत् ॥ ७८ ॥
सैयदस्य खलु तत्र सफलता मुस्लिमान्नवलराष्ट्रियसरणौ ।
नेतुमास्त तदपेक्षितमिति सा श्रेयसेऽभवदसम्भवभवने ॥ ७९ ॥
मुस्लिमा हि यदि शिक्षणरहिता राष्ट्रियत्वरचनासहकरता ।
नैषु सम्भवति, तर्हि च किल ते हिन्दुभिर्मिलितुमत्र नु विवशाः ॥८०॥
हिन्दवो हि धनशिक्षणदिशि तांस्तेऽतिशय्य विचरन्ति नवपथे ।
ऐतिहासिकदृशापि च घटनाचक्रमीदृशमजीघटदिह यत् ॥ ८१ ॥

मुस्लिमान्न खलु राष्ट्रियसरणौ गन्तुमीरयति, रोधयति पुरा।
मध्यमो न खलु वर्ग इह समभूत् हिन्दुजातिवदिति प्रतिहतता ॥ ८२ ॥
सैयदस्य स कृतिक्रम उपरिष्टान्मृदुः स परिलक्षित इतरैः।
वस्तुतस्तु स नयत्यतिशमितां क्रान्तिमेव तु विधातुमिह पुरः॥ ८३ ॥
मुस्लिमास्तदवधि प्रतिगतयो भूपतित्वमतिबद्धहृदयकाः।
लोकतान्त्रिकविचारविरहिता हिन्दवस्तु जनतन्त्रपरिचिताः॥ ८४ ॥
ते किलांग्लजनतन्त्रसुधृतिमत्तद्विचारततयः परमुभये।
नम्रनीतिपरिपालननिरता आङ्ग्लराज्यधृतविश्वसितिहृदः॥ ८५॥
सैयदस्य मृदुनीतिरियमभूद् भूपतिप्रचुरवर्गनयसभा।
सा समृद्धमितमुस्लिमदलगा हिन्दुनीतिरभवत्पटुवणिजाम् ॥ ८६ ॥
उद्यमेषु धनयोजनमिह ये मार्गयन्ति सह साधनमनिशम्।
हिन्दुराजनयिका अनवरतं चाङ्ग्लदेशगतरत्नधृतदृशः॥ ८७ ॥
यद्व्युदारदलविश्रुतमिह तद् यद्लेऽस्टनह्वाइटिति विदिते।
शङ्कितोऽस्मि यदि मुस्लिमनयिकैर्जातुचित्कृतमिदं नु भुवि भवेत् ॥८८॥
तेऽनुदारदलमाङ्ग्लजनपदे भूपतित्वमतिवर्गमिह क्वचित्।
शंसयन्त इह ह्वाइटिति विदितम् तुर्क-आरमिनियन् हतिविहितात् ॥८९॥
निन्दनाद्भुवि घृणास्पदमभवत् तुर्कपक्षपतनान्मितगणना।
ते पुनश्च डिजराइलिव नता रक्ष्यप्रश्नरुचयस्तमभिलषिताः॥ ९० ॥
सैयदस्य कतिचित्प्रवचनकान्यद्य चात्र पठितान्यतिचकितम्।
कुर्वते जनमिह स्म स ददते लक्ष्मणाख्यनगरे प्रवचनकम् ॥ ९१ ॥
कांग्रसस्य शरदुत्सवसमये चैष तस्य मृदुयाचननिचयम्।
अप्यनिन्ददतिघोरमथ च तत्सोऽलुलोचदतिमात्रमहमदः॥ ९२ ॥
सोऽवदत्तदफगानजनपदे युध्यतां च जयताद्विधिविषयम्।
आङ्ग्लशिष्टिरिह तत्परिवदनं नास्ति कार्यमिह नः खलु तदिदम् ॥९३॥
सा विधानरचनाय परिषदं कल्पयत्यखिलदिक्प्रतिनिधिभिः।
राज्यकार्यकरणैरथ जनतावस्थया परिचितैर्धनपतिभिः॥ ९४ ॥
पृच्छतादिह जनो धनपतयस्ते किमर्थमुचितास्तु मतियुताः।
पृच्छतीह स जनानिह रुचितो नीचवंशज बि. ए. किमु भवताम् ॥९५॥

एम ए०ऽथ भवतान्नियमविधिं स्रष्टुमत्र निचितस्त्वधमजनिः।
शास्त्वसौ नु कुलजान् निजविभवाऽऽरक्षणाय नियमांश्च विरचयेत्।९६।
नैतदस्त्युचितमत्र कथमपि जातुचित्क्वचिदपीति मतमिदम्।
भारते नरपतिप्रतिनिधिना स्वीकृतो नहि भवेदधमजनिः ॥ ९७ ॥
उच्चवंशजनितात्तदितरमिह कञ्चिदप्ययममुन्न निचिनुयात्।
यः सुहृद् भवितुमर्हति भवतो यश्च बन्धुरपि वा भवितुमलम् ॥ ९८ ॥
प्रीतिभोजननिमन्त्रणसखितामाङ्ग्लदेशजधनिष्ठजनगताम् ।
योऽर्हतीह तमिहैष निचिनुयात् नीचवंशजनितं तु न विबुधम् ॥ ९९ ॥
स्रष्टुमत्र नियमान् बहुविधयः शिष्टिसम्मततया प्रविचलिताः।
तत्र लोकमतमस्ति न तदृते, कं विधिं नु रचयाम इह वयम् ॥ १०० ॥
सैयदस्य तदिदमस्ति प्रवचनं लोकतन्त्रमिसलान्युपवहतः।
तस्य च प्रतिनिधेः सुमतमिदं, यादृशं नहि परस्य भुवि भवति ॥ १०१ ॥
संशयोऽस्ति च परेऽप्यवनिधराः आगरावधविहारविषयगाः।
साहसं दधति तादृशवचसां जल्पनाय, न तु सैयदविरलः ॥ १०२ ॥
काङ्ग्रसस्य सुबहुप्रवचनकं पठ्यते यदि भवेदिदमिव तत्।
हिन्दुमुस्लिमगतस्य खलु तदा प्रश्नकस्य निजरूपमिदमभवत् ॥ १०३ ॥
आर्थिकं च किल राजनयिकमप्यार्थिकप्रगतिशीलदृगयनात्।
साधनादियुतमध्यमदलगा हिन्दवश्चिरतनावनिपतिभिः ॥ १०४ ॥
मुस्लिमैः प्रतिविरोधमुपगताः, रोद्धुमेव किल तानिह यतितम्।
हिन्दुभूमिपतयोऽन्वयमदधुर्मध्यमेन हि दलेन समतया ॥ १०५ ॥
तस्य तेऽभिलषणेषु तटगता वात्र सानुभवशीलितहृदयाः।
स्रष्टुमेतदभिलाषनिचयनं प्रायशः सहकृतिं प्रविदधति ॥ १०६ ॥
आङ्ग्लजातिरिह भूपतिसहकृत् हिन्दुमुस्लिमप्रजास्ववदधताम्।
निम्नमध्यमदलेऽत्र पतितया, स्वोच्चताभिमननादिव सततम् ॥ १०७ ॥
सैयदस्य बलवत्प्रभवति सा व्यक्तिता सकलमुस्लिमनिचये।
कालिजं च तदलीगढविदितं तन्मनोरथशतास्पदमभवत् ॥ १०८ ॥
प्रायशो भवति संक्रमसमये यन्मनोबलमयत् प्रगतिपथम्।
तच्छ्लथीभवति लक्ष्यमधिगतं बाधकं स्वयमपि स्वपथगतो ॥ १०९ ॥

अस्त्युदारदलमत्र सुविदितं तन्निदर्शनमिति स्मृतिमयते।
काङ्ग्रसस्य किल वास्तविकतया तत्परम्परितमुत्तरधरणम् ।। ११० ।।
ते वयं त्विह ततः परमयिताः स्मो हि सूपगतमूसरसमताम् ।
सत्यमस्ति परमिदं दलमधुना विस्मृतास्तु परिवर्तनसमये ।। १११ ।।
कांग्रसस्य किल सा चिरसरणिः कालगर्भकुहरे लयमगमत् ।
शिष्यतेऽद्य किल तत्स्मृतिरियमेकैव, सैयदगिरापि तदिव तत् ।। ११२ ।।
सा हि तद्युगहिता वशभविनी किन्तु न प्रगतिशीलसमुदये।
सान्तिमा भवितुमर्हति नहि साऽऽदर्शतां सततगामिह दधते ।। ११३ ।।
सम्भवत्यद इहैकपुरुषतावध्यभूत्स्थितमथाधिकसमयम् ।
तत् स्वयं निजगिरं नवलदिशि पर्यवर्तयदिहागतसमये ।। ११४ ।।
सैयदस्य सफलत्वमभवदिह श्रद्धयापि च यया स समयुजत् ।
तस्य तेन प्रगतस्य चिरतनीं पङ्क्तिमुज्झितुमभूद्दुरवगमम् ।। ११५ ।।
दैवतो भरतभूमिमधिवसतो मुस्लिमस्य समुदायगततया।
तादृगुच्चतरयोग्यतमतया संयुतस्य पुरुषस्य न सुलभता ।। ११६ ।।
यो नवां सरणिमीरयितुमिहाग्रेसरेदिदमलीगढघटितम् ।
कालिजं कृतवदत्युपकृतिमत् कार्यमत्र खलु मुस्लिमनिचये ।। ११७ ।।
योग्ययोग्यतरपूरुषनिवहान् सज्जयत्तदिह पर्यवृतदिमाम् ।
मुस्लिमेषु रुचिमेष्वतिनवलामाङ्ग्लशिक्षणविधौ समजनयत् ।। ११८ ।।
किन्तु सञ्चयकरूपमिदमन् स्वाकृतौ न कुरुताद्ध्रुवमखिलान् ।
सर्व एव धरणीपतिहृदयाः कैङ्करीमिह च वृत्तिमुपगताः ।। ११९ ।।
साहसेन नहि जीवनसमरे तेऽवतीर्य किल लक्ष्यमतिमहत् ।
प्राप्तुमभ्यनुयतन्त इति किं नाभ्यलक्ष्यत किलेदृशमपि तैः ।। १२० ।।
प्राप्यते क्वचन तैर्यदि तदुपायुक्तताधिकृतिरप्यतियतनैः ।
मन्यते स्वममुनैव सफलितं धन्यमस्त्यतिविडम्बनमधिकम् ।। १२१ ।।
तस्य गर्व उपयाति शममितो यत्स मुस्लिमनृतन्त्रमधिकृतः ।
अस्य बन्धुसहजस्य निवहने रक्तशीर्षकमसौ परिदधते ।। १२२ ।।
टर्किशं तदिह फैजमभिहितं तुर्कदेश इदमद्य न दधते ।
लोकसत्त्वमधिगम्य स कृतवान् स्वीयमुस्लिमजनैः सममशनम् ।।१२३।।

राजनैति कनूतन्त्रमिह तु कां प्राप्तवत्स्थितिमितीह न विमृशेत् ।
दृष्टिसंकुचिततेयमिह परिचर्यया ब्रिटिशशिष्टिचरणयोः ॥ १२४ ॥
आत्मधन्यतमतानुभव इति स्यादलीगढ-तदन्य-पठनतः ।
मुस्लिमस्य मितलक्ष्मभवदित्यस्ति हिन्दुषु च तत्समुदयनम् ॥ १२५ ॥
किन्तु काचन परिस्थितिरुदिता हिन्दुवर्गमुदधारयदिह सा ।
संख्यया बहुलया नहि खलु ते कैङ्करीमधिगता न परिमिताम् ॥१२६॥
वर्गहीनयुवकास्तु तत इमे संघमेकमवकल्प्य सुमिलिताः ।
राष्ट्रियः स खलु सङ्घ इतउतो राष्ट्रियोत्सवमशेषमभजत ॥ १२७ ॥
सैयदस्य किल राजनयिकतेश्च रोधकप्रभावजलनिधेः ।
भारतीयनवमुस्लिमयुवका उद्धृता न खलु साधु समभवन् ॥ १२८ ॥
विंशशत्युपमुखे बहुघटिताः साधनानि घटनाः समुदनयन् ।
यानि तत्र ब्रिटिशान् सहयुजया मध्यखातकरणेऽनुसमनुदन् ॥ १२९ ॥
राष्ट्रियाग्रहकरेषु सुदृढतां प्राप्तवत्सु किल हिन्दुयुवसु ते ।
मुस्लिमेषु युवकेषु च विषमं खातमेकमखनन्नधिकृतया ॥ १३० ॥
बेलैंटाइन शिरोस इति श्रुतो 'भारतेऽशम' इति त्वलिखखदयम् ।
तत्र चैव लिखतिस्म-सुमहतो विश्वसात्कथयितुं प्रभवति ना ॥ १३१ ॥
नाद्यतः प्रथममत्र समुदिता मुस्लिमा निजहितं त्वभिलषितुम् ।
ब्रैटिशीं प्रति न शिष्टिमकथयन् तदधनिष्ठतमभावसहकृतम् ॥१३२ ॥
राजनीतिजगतीयमवितथा भाविवागतिभयङ्करतनुभाक् ।
भारतेऽशम' इति प्रकटमभूत् पञ्चवर्षसमयेन मतिमताम् ॥ १३३ ॥
पादबन्धनकराणि वलयकान्यासितानि बत कांग्रसखिताम् ।
प्राप्तुमाकलितनूतनयतनकाः वर्षमध्यविहितप्रयतनकाः ॥ १३४ ॥
कांग्रसादपि किलाग्रगमनका नेतृतामपि च तत्र विदधते ।
तच्च वर्षदशकं महिममयं यद्युरोपसमरो भवति महान् ॥ १३५ ॥
तस्य चात्र समभूत्तदुदयनम् सोपसंग्रहणमित्यतिमहितम् ।
आत्मलक्षणतया स जगदिदं स्रस्तध्वस्तमपि हारयति पुरा ॥ १३६ ॥
किन्तु शिरोल इह याः किल परिणतीः प्राप; हेतव इहासत उचिताः ।
अग्रखान इह मुस्लिमजनतानेतृतामधरदित्यभवदलम् ॥ १३७ ॥

तत्प्रमाणमिह यद्धरणिधरान् मुस्लिमा न जहतीह सहजतः ।
तत्परम्परिकतां प्रति सुरुचिस्तांस्तया सह निबन्धयति यतः ॥ १३८ ॥

अग्रखान इह मध्यमदलतो नाभवत्स घनवांश्च धरणिमान् ।
भूपतिश्च भुवि धर्मगुरुरभूत् आङ्ग्लशिष्टिघनबन्धनियमितः ॥१३९ ॥

सोऽयमत्र 'निजपूरुष' इति चाभ्युच्यते स्म ब्रिटिशैर्निजसदसि ।
भूमिपाल-धनवत्सुखभरितः क्रीडकश्च स युरोपमधिवसति ॥ १४० ॥

इत्यसौ न निजरूपत इह चाभून्मताग्रहभृतो धृतकरुणः ।
साम्प्रदायिकदशापि न कुहचित् सङ्कुचन्मतिरुदारहृदयकः ॥ १४१ ॥

मुस्लिमेषु ब्रिटिशानुगमनमाधातुमेष धृतनेतृपदभरः ।
साम्प्रदायिकसमाधिरिह गुणो मुख्यलक्ष्यकलनाय प्रकटितः ॥ १४२ ॥

'अग्रखान इदमादिशदिह यद् बङ्गभङ्गजनितां नृपनयिकीम् ।
तां स्थितिं प्रति किमस्ति मतमिति प्रश्नउत्तरमिदं च सुनिहितम् ।१४३॥

आशुकारिमनसा नहि सुविधा हिन्दुषु क्वचन राजनयदृशा ।
दीयतां तु भवता, बहुमतमुत्साहितं हि भविता भयजनकम् ॥ १४४ ॥

ब्रैटिशस्य किल मुस्लिममतमस्यास्ति नैव हितकारि कथमपि ।
राजभक्तिरिह मुस्लिममतकस्यास्ति नात्र खलु संशयविषया ॥ १४५ ॥

इत्यसौ हि परिबोधित इह चाऽनेन लार्डमिनटोरवसरतः ।
इत्थमस्य तु समर्थनकरणादन्यशक्तिरपि कार्यमकुरुत ॥ १४६ ॥

मुस्लिमेषु नवमध्यमदलमिह वर्तमानकुपरिस्थितिकुपितम् ।
राष्ट्रियाग्रहदिशि प्रचलति तत्राग्रखानमवधानवशमधात् ॥ १४७ ॥

आङ्ग्लशिष्टय इहावहितिकरीं वाचमेष विवशोऽलिखदुचिताम् ।
प्राङ्महासमरमेंडिनवरसंशिष्टये स हि परामृशदसुकम् ॥ १४८ ॥

हिन्दुमुस्लिमपरस्परकलहङ्कारिनीतिरियमत्र विजहती ।
साम्प्रदायिकदलद्वयपुरुषान् एकताध्वजतले ह्युपनयतात् ॥ १४९ ॥

येन कापि तरुणा भरतभुवि हिन्दुमुस्लिमविजातिषु जनिता ।
शुद्धराष्ट्रियप्रवृत्त्युपहतये शक्तिरुन्मिषति साङ्ग्लहितकरी ॥ १५० ॥

इत्यनेन विशदं नहि रुचिमान् साम्प्रदायिकहितेषु स मतिमान् ।
अग्रखान इह राजनयपरिवर्तनं स्थगयितुं सरुचिरभूत् ॥ १५१ ॥

किन्तु राष्ट्रियदृशं प्रति प्रगतिं मध्यवर्गगतमुस्लिमनिचये ।
जाग्रतीं समवरोद्धुमलमभून् नाग्रखान इह नापि ब्रिटिशधीः ॥ १५२ ॥
विश्वव्यापिसमरेण पुनरियं दीपिताऽभिनवनेतृषु क्रमशः ।
जायमाननवजागरणबले अग्रखानप्रभुता शममगमत् ॥ १५३ ॥
सोऽप्यलीगढमहालय इह तां नूतनां रुचिमुपाश्रयत तदा ।
नेतृषु त्वभिनवेषु प्रथमतस्तावलीसजठरौ समभवताम् ॥ १५४ ॥
तावलीगढमहालयनिरितौ चेतरेऽबुलकलामसमतुलाः ।
नायका यदनसारिप्रभृतयो मध्यवर्गनयने घृतमतयः ॥ १५५ ॥
साम्प्रतं सकलमुस्लिमनिचये राजनैतिकसुसम्मतिमददात् ।
श्रीमुहम्मदअली स च जिनहाप्यल्पशोऽत्र रुचिमादधत तदा ॥ १५६ ॥
गान्धिरेषु कतिचित्तु मुसलिमान् प्रत्यकर्षदसहान्वयसरणौ ।
कर्षितुं तु जिनहामयमनलं तैः समैः सहकृतोऽक्रमत रणे ॥ १५७ ॥
किन्त्वभात्प्रतिक्रियाऽपि यदुभयोर्हिन्दुमुस्लिमजयोरिह कतिचित् ।
साम्प्रदायिकविचारदृढतया पृष्ठगाः समभवंस्तदितरथा ॥ १५८ ॥
येऽत्र सार्वजनिकादिह विषयाद् वञ्चिताः प्रतिगतास्तु समभवन् ।
तेऽपि सम्प्रति मुहुः सरणिमिमामागता इह शनैरपि च शनैः ॥ १५९ ॥
सागतिः सततमत्र सुशिथिला प्राचलत्प्रथितिमाप प्रथमतः ।
हिन्दुवर्गसभया स्थितिवशतः साम्प्रदायिकपरस्परघटनात् ॥ १६० ॥
राजनैतिकदृशा प्रभवति सा कांग्रसे न किमपीति सुविदितम् ।
मुस्लिमप्रकृतयस्तु समितयो मुस्लिमेषु पुनरापुरुदयनम् ॥ १६१ ॥
किन्तु मुस्लिमदलं किल बलवत् कांग्रसेन सहयोगमकुरुत ।
शिष्टिरप्यपरतोऽत्र कतिपयान् साम्प्रदायिकजनानुदगमयत् ॥ १६२ ॥
राजनैतिकदृशा भुवि यदमी बादिनः प्रतिक्रियामयसमये ।
वीक्ष्य तत्सफलतामथ सभयाऽप्याश्रिता प्रतिक्रियासरणिमिमाम् ।१६३।
ब्रैटिशीमिह कृपांजिगमिषया तत्सभाधिकृतनेतृपरिषदा ।
उन्नतिप्रियविचारसुमतयः केऽपि निर्गमयिताः स्वयमपरे ॥ १६४ ॥
मध्यवर्गगतप्रोन्नतदलगान् श्रेष्ठिनः प्रति महाजननिचयान् ।
प्रत्ययाद्धृतसमाधिकमधिकं तान्नताऽभवदशेषजनहिते ॥ १६५ ॥

साम्प्रदायिकसुराजनयिकता हिन्दुमुस्लिमगताथ च सततम् ।
संसदासनहिताय विवदते या कृपां मृगयते ब्रिटिशसताम् ॥ १६६ ॥
स्याच्च शिष्टिविषये प्रभवति सा मध्यवर्गपठितेष्वनुचरता ।
सात्र हेतुरपरस्परकलहे सा च तावदियती न प्रभवति ॥ १६७ ॥
अर्थिनो न सकला अनुदधते तामितीह कलहायति युगलम् ।
हिन्दवश्च निजरक्षणमनसस्तैरिहानुचरताऽधिकमयिता ॥ १६८ ॥
मुस्लिमाः सततमन्यदितरदिति रारटन्त्यनुचरत्वसुगतये ।
कंकरीमनु च तां प्रचलति सङ्घर्ष एक इतरोऽतिमहिमकः ॥ १६९ ॥
साम्प्रदायिकतया न समयतः साम्प्रदायिकफलाय स कलितः ।
सिन्धुपञ्चनदबङ्गजनपदे हिन्दवोऽधिगतभूमिनगरकाः ॥ १७० ॥
अत्र मुस्लिमजना धनरहिताश्चाधमर्णलघुग्रामवसतयः ।
तेन चात्र कलहोऽयमधिकृतः साम्प्रदायिकतया भुवि विततः ॥ १७१ ॥
मासि यातवति प्रान्तिकसभया ग्रामवासिजनतार्णकमुदितम् ।
तत्र चर्णभरलघूकरणमधिकृत्य पञ्चनदकेऽस्त्यधिकतया ॥ १७२ ॥
यो विवाद उपकल्पित इह स स्पष्टमेतदनुबोधयति जनान् ।
तत्र हिन्दुदलगैर्निजविमतिर्दार्ढ्यपूर्वकमिह स्फुटमुदिता ॥ १७३ ॥
तेऽनुरोधमनुश्रेष्ठिजनमधुः साम्प्रदायिकमतिं क्षिपति सति ।
राष्ट्रियत्वमनुगायति विगलद्दोषयुक्तिरिह हिन्दुपरिषदियम् ॥ १७४ ॥
अस्ति च स्फुटमिदं यदिह सभा मुस्लिमावघटिता प्रकटयति ।
अद्भुतं किमपि रूपमिह निजं साम्प्रदायिकमपीह सुविशदम् ॥ १७५ ॥
साम्प्रदायिकमतिर्न परिषदः सा स्फुटेति वयमत्र परिचिताः ।
सा हि राष्ट्रियपदावरणवृता मुस्लिमैकसदसस्तु सुविशदा ॥ १७६ ॥
यत्र राष्ट्रियहितेन प्रतिगतिं हिन्दुमात्रहितमादधदिह स्यात् ।
तत्र हिन्दुहितविरोधमनुभजेत्तर्हि राष्ट्रियपदेऽस्त्ववितथता ॥ १७७ ॥
ईदृशस्त्ववसरोऽत्र सुबहुधाभ्यागतश्च परिषत्किल परितः ।
राष्ट्रहिन्दुहितयोः प्रविचयने सर्वदा चिनुत हिन्दुहितमियम् ॥ १७८ ॥
आर्थिकं भवति चाल्पमतहितं घोषितां प्रति तु भूरिमतरुचिम् ।
लवीकृतं तदिति सिन्धुजनपदे हिन्दुभिर्नहि पृथक्करणमिह ॥ १७९ ॥

हिन्दुमुस्लिमदलद्वयनिरतैः साम्प्रदायिकविचारपरिगतैः।
राष्ट्रियप्रगतिरोधविषयकं गोलपीठसदसि प्रतियतितम् ॥ १८० ॥
सर्वथा यदि भवेयुरिह पुनः साम्प्रदायिकधियस्तु मुसलिमाः।
गोलपीठसदसे त्विह सहसा स्युर्मनोनयनतो भुवि निचिताः॥ १८१ ॥
अग्रखानधृतनेतृसमयतो मुस्लिमा निपतितास्त्वियदभवन्।
आङ्ग्ल जीवनप्रतिक्रियवचना भारतस्य नहि केवलभयदैः ॥ १८२ ॥
विश्वविश्व वितत प्रगति परान् सम्प्रदायनिचयान् प्रति भयदैः।
मानवैः सह समुद्यतमनसस्तेऽभवन्निह तदा भुवि मिलितुम् ॥ १८३ ॥
अग्रखानमनुगामिजनदलं लार्डलायडदलेन सह मिलितम्।
इत्यभूदिह विशेषसुघटनं, नेयदेभिरिह सौमसमयितम् ॥ १८४ ॥
गोलपीठपरिषद्गतब्रिटिशेसोशियेशननिजप्रतिनिधिकैः।
दुःखदं तदिदमास्त परमनैराश्यकृच्च समभूदुपमिलनम् ॥ १८५ ॥
भारतस्ववशताध्वनि परमं बाधकं समभवच्च तदधुना।
हिन्दुगोष्ठिप्रतिनिध्युपवचनं त्वेतदास्त यदमोभिरतिगुरौ ॥ १८६ ॥
आत्मवश्यपथि पञ्चनदपदे मुख्यतोऽत्र विविधा अभिलषिताः।
प्रत्यगेव प्रतिबन्धप्रविधयः आङ्ग्लपक्षकृतरक्षणनियताः ॥ १८७ ॥
आङ्ग्लयोगविततप्रयतनके मुस्लिमानपि किलास्त्यतिशयिता।
हिन्दुवृन्दपरिषत्परमतया चेष्टया न किमपि त्वधिगमितम् ॥ १८८ ॥
आत्मपक्षहतिरेव तु विहिताप्यात्मवश्यविश्वसनमुपहतम्।
मुस्लिमोक्तिषु प्रतिष्ठितमभवत् साम्प्रदायिकपदं नतु हिन्दुषु ॥१८९॥
स्पष्टमेव मम भाति च तदिदं साम्प्रदायिकयुगप्रतिनिधयः।
उच्चवर्गप्रतिकारणमनसां यूथयोः समवहन् प्रतिनिधिताम् ॥ १९० ॥
धार्मिकस्य महसो जनमनसां स्वार्थसाधनविधौ दुरुदयनम्।
कारयन्ति वितथं च निजहितं साधयन्ति धृतनेतृमुखबटाः ॥ १९१ ॥
आर्थिकं परिहरन्ति दमयितुं प्रश्नमाशु प्रयतन्त इह सदा।
शीघ्रमेव समयः स उदयिता यत्र तद्दमनसम्भवविरहः ॥ १९२ ॥
तर्हि च द्विदलनेतृनर इमेऽभ्यासतः प्रकथयेयुरित उतः।
विंशतेस्तु शरदामपि पुरतस्त्वग्रखानविहितावहितिगिरम् ॥ १९३ ॥

स्यादुदारदलगैर्युगविनिमयकारिणीभिरिह यत्नविततिभिः ।
यच्चिकीर्षितममीभिरिह नवं तद्विरुद्धसमरोद्यमवरणम् ॥ १६४ ॥
किञ्चिदेतदिह विश्रुतमभवद् हिन्दुमुस्लिममताहववचनम् ।
चेत्परस्परशुभाशुभमभिदध्युर्जनेषु परमत्र तु सकलाः ॥ १६५ ॥
संसदीदृशसभासु सहयुजं शिष्टये ददति राष्ट्रदमविधौ ।
सूत्रमीदृगिदमस्ति किल तदोटावमत्र मिलितं त्रिकमभवत् ॥ १६६ ॥
स्वादु चेदमवदध्वमभिजना अग्रखानमनुदारदलसुखम् ।
यः पुमर्थगुणवत्सरदशमे मासि नेविसहभोजमधिगतः ॥ १६७ ॥
लार्डलायडसदस्पतिनिकटे मानदातिथितया स सममिलत् ।
प्रस्तुतीस्तदुदिताः स हृदयतश्चान्वमोदयत ता ब्रिटिशहिताः ॥१६८ ॥
ब्रिस्टिलस्य किल कञ्जरविटिनामेलते ब्रिटिशपोतबलवृधे ।
प्रस्तुतीः समकरोत्स्वयमधिपोऽत्रैष नेतृवर आस्त समुदितः ॥ १६६ ॥
आङ्ग्लसैन्यबलवृधेऽग्रसर इव वाल्डविन् प्रभुपदादपि पुरतः ।
शान्तिरक्षणकृते प्रयतितवानत्र विश्वसितु कोऽवहितमनाः ॥ २०० ॥
अन्यमासि किल वृत्तमधिगतं लन्दनेऽत्र चलचित्रनिर्मिषितेः ।
यत्र मुस्लिमगणो ब्रिटिशकृतशिष्टिमैत्रनवसूत्रनिगडितः ॥ २०१ ॥
वेदितं त्ववसरेऽतिथिवरिवस्यामगादिह स खाननवमणिः ।
ज्ञायते यदिह देहयुगलके प्राण एक इति तत्स्थितिरभवत् ॥ २०२ ॥
राष्ट्रियेऽत्र किल राजनयिकके स्तो हि सप्रजयकरौ जगति यथा ।
अत्र चेदमवधेयमिह समये यत्र तौ जलतरङ्गवदमिलताम् ॥ २०३ ॥
लायडस्तु तदनेहसि कठिनाक्रान्तिनेतृपदभारमभृत यत् ।
राष्ट्रिया यदनु शिष्टिरियमभूद् भारतेऽधिकतराधिकृतिकरी ॥२०४॥
तामिमामबलतामवदधतां शिष्टिरित्यभिमतं पुनरभवत् ।
साम्प्रदायिकनृणां प्रवचनके त्वागतं हि परिवर्तनमधिकम् ॥ २०५ ॥
नास्ति तस्य महिमाऽनुमतमिदं स्यान्नचेतरनृणामपि कुहचित् ।
किन्तु मुस्लिममनोगतिरनया साम्प्रदायिकतयास्त्यवगमिता ॥ २०६॥
मुख्यतापि पुनरत्र विनिहिता हिन्दुमुस्लिमगसंस्कृतियुगले ।
सातिरिक्तबलतोऽस्ति विशदिता काप्यसंगतिरिह प्रवचनगा ॥ २०७॥

राष्ट्रसंस्कृतिगमुस्लिमपदयो संप्रयोग इह मुहुश्च स विहितः ।
तत्परीणतिरियं प्रभवति यत् संस्कृतिद्वयमिदं प्रभुरवितुम् ।। २०८ ।।
आङ्ग्लशिष्टिरिह सानुयुगयुगं भारते स्थिरतरात्र परिचलेत् ।
इत्यपेक्षितमितस्तदितरथाऽन्योन्यघातकतयास्तु हि निहतम् ।। २०९ ।।
साम्प्रदायिककहिन्दुभिरपि तत्स्वीकृतं च प्रकटीकृतमपि तत् ।
अन्तरं सुबहुलात्मगतभिदा दृश्यते मृदुलता च परुषता ।। २१० ।।
हिन्दवो बहुमता इति वत या संस्कृतेर्विलयतोऽभवदयिता ।
रक्षितैव भवतीयमिति धृतिर्हिन्दुवन्न किल मुस्लिमहृदये ।। २११ ।।
हिन्दुमुस्लिमगसंस्कृतिरिति यद्यच्च मुस्लिमगराष्ट्रपदमिदम् ।
तत्पुराणमितिहासगतमथो वर्तमानकभविष्यदुपकृतम् ।। २१२ ।।
चितरञ्जनकरं परममिह वर्त्म किञ्चिदुपदर्शयति नवम् ।
भारतं स्वयमिदं यदि कथितं राष्ट्रमित्यहह किन्नु तदितरत् ।। २१३ ।।
किन्नु मुस्लिमगराष्ट्रमिदमहो तन्न संघटितमस्ति न विचितम् ।
तद्विकीर्णमपि निर्दिशतामिह न प्रमाणमिह भाषणमधुना ।। २१४ ।।
राजनैतिकदृशैष मतविधिः सर्वथा भुवि ह्रियं जनयति नः ।
आर्थिकीदृगनुपश्यति तदिदं शेखचिल्लिसमहास्यवितरणम् ।। २१५ ।।
हिन्दुमुस्लिमकसंस्कृतिनिलया भावनापि किल तादृगियमिह ।
साम्प्रतं तु युगमागतमपरं राष्ट्रियापि यदपैति जगति सा ।। २१६ ।।
कृत्स्न विश्वमिह सांस्कृतिकतया त्वेकतां भजति कामपि जवतः ।
भिन्नराष्ट्रनिचयो न विजहितात्स्वं विशेषमथ गिरं निजसरणिम् ।२१७।
तां विचारपदवीमपि न जह्यात्वन्यदीदृशमथ स्वविभववत् ।
हास्यतीदमखिलं न स सुचिरं यन्त्रकाल इह भौतिकप्रतिपत् ।। २१८ ।।
वायुयान-चलचित्रगगनवाक्-दूरभाष-नववृत्तदलमुखान् ।
तान् विशेषगुणकानिह सहसैवैकभूपमुपनेष्यपि परितः ।। २१९ ।।
साऽनिवार्यगतिरत्र च कुहचित्केनचिच्च परिहर्तुमसुकरा ।
सभ्यतामभिनवां यदि सहसा विप्लवो भवति हन्तुमलमिमाम्।।२२०।।
हिन्दुमुस्लिमिकजीवनसरणावस्ति भेद इह तावदतिमहान् ।
वर्तमानयुगजोद्यमसखविज्ञानदृष्टित इहास्ति नहि भिदा ।। २२१ ।।

दृष्टिकोण इह चाध्वनि चिरगे व्योमभूमिसममन्तरमधिकम् ।
भारते न खलु संस्कृतियुगले, नूतनप्रत्नमननेषु विषमता ॥ २२२ ॥
साधुनातनविवेकसमुदिता सभ्यता विनयते भरतभुवि ।
संस्कृतिद्वयविरोधविषयिणी या विभाति सकलेऽस्ति जगति सा ।२२३॥
अत्र मुस्लिमगसंस्कृतिमवितुं यादृशीयमिह तादृगवयवम् ।
हिन्दुसंस्कृतिकृतं च नहि भयं पश्चिमादसुरतोऽस्ति भयमिदम् ॥२२४॥
तज्जयाय यतनीयमसुकया, संशये न खलु तत्प्रतिगमने ।
हिन्दुमुस्लिमजनैः कृतमुभयैर्यत्नजातमिह सेत्स्यति न समम् ॥ २२५ ॥
सेत्स्यतीह न तदित्यहमनुलापं तु कञ्चन भजामि न हि पुरा ।
वाष्पयानशकटागमसमये स्वीकृतः सपदि चास्य स महिमा ॥ २२६ ॥
सैयदोऽप्यहमदस्तदसृजतालीगढे नवविवेकविचयनम् ।
मुस्लिमेष्वपि तदस्तु सुविदितं नूतनं सपदि भौतिकमननम् ॥ २२७ ॥
मज्जतस्तृणकुशाश्रयसदृशं नान्यदस्ति समयेऽत्र हि शरणम् ।
कास्ति मुस्लिमगसंस्कृतिरिति चेदार्वणी किमथ पारसजनिता ।२२८॥
गीतपद्धतिरियं न निगदिता नापि मुस्लिमविचारणसरणिः ।
अर्वपारसगिरोरिह महितः सत्प्रभाव इतिमात्रमवगतम् ॥ २२९ ॥
पारसी भरतभूमिमुपगता रीतिनीतिसरणिः स्फुटमयिता ।
ताः सहस्रशरदश्च व्यतिगता यत्र पारसगिराऽत्र विभवति ॥ २३० ॥
पारसे भवति फ्रांसजनपदे पारसीति किल संस्कृतिरथ गीः ।
संस्कृतिश्च परितो निजनिकटे व्यश्नुतेस्म सकलेऽपि जनपदे ॥ २३१ ॥
भारतीयजनपैतृकविभवं चास्त्यमूल्यमिह तुल्यमथ प्रियम् ।
मुस्लिमेतिजनजातिजनपदे तत्पराक्रमचमत्कृतिगुरुता ॥ २३२ ॥
गर्वमेकमुपजन्य धृतवतो सास्ति सूत्रमिह मुस्लिममनने ।
अन्यसूत्रशततो दृढमधिकं चास्ति तस्य च न किं त्विह समता ॥२३३॥
यावदस्ति तदनुस्मृतिधरणं तावदस्ति किल गर्वविशरणम् ।
तञ्च कोऽपि न छिनत्ति हृदयतो वस्तुतस्तु स समस्तजनधनम् ॥२३४॥
एशियाधिवसनाद्वयमखिला गर्वतस्तत इहाधिकृतहृदः ।
चेद्युरोपविहिताक्रमणमभिसम्मुखास्तदिह सूत्रमिदमलम् ॥ २३५ ॥

वेद्मि चेह पठतो मम समभूदार्वणेषु स सहानुभवभरः।
स्पेनसङ्करक्रमेऽत्र समयतश्चेतिहासवचनैरपि हृदये ॥ २३६ ॥
पक्षपातरहितो भवितुमहं संयतेऽथ च यतेय कियदहम्।
एशियाधिवसतां स्मृतिविषये त्वेशियाजनिरिहाह्वयति तु माम्॥२३७॥
बोद्धुमेव यतनं यदकरवं तत्पुनः पुनरपीह परिणतो।
क्वास्ति मौस्लिमिकसंस्कृतिरियमित्यद्य यावदधिगन्तुमसफलः॥२३८॥
उत्तरे सकलभारतविषये मध्यवर्गगतहिन्दुमुसलिमाः।
पारसीसरणिवाक्प्रभवनतो वञ्चिता बहुतराः किल बहुधा ॥२३९॥
अत्र मौस्लिमिकसंस्कृतिदृशया लक्ष्यलक्षणगणेऽधिकतरतः।
पादयाम परिधाप्यथ विधितः श्मश्रुकूर्चरचनादि परिचितम् ॥ २४०॥
तन्नलीसहितपात्रविधरणं चेति तेषु गतमक्षिविषयताम्।
तद्वदत्र स्थितहिन्दुसमुदये धौतवस्त्रपरिधा च सशिखता ॥ २४१ ॥
निर्नलीकमथ पात्रमिह च ताः सन्ति हिन्दुपरिचायकरुचयः।
अन्तराणि नगरेषु च निखिलान्यासतेस्म नहि सम्प्रति कुहचित् ।२४२॥
मुस्लिमेषु कृषकेषु च श्रमिकेष्वस्ति हिन्दुषु न भेदनियमनम्।
शिक्षितेष्वपि न श्मश्रुधृतिरुचिः कूर्चकान्तिरपि सास्ति बिगलिता२४३।
काप्यलीगढ पुरेऽरुणतुरकी टोपिका विरचयत्यथ च भिदाम्।
तुर्कदेशपरिवर्जितपरिधा भूतपूर्वगतिरेव तदधुना ॥ २४४ ॥
मुस्लिमाश्च महिला अपि बहुधा शाटिकां परिदधत्यथ कतिचित्।
नावगुण्ठनवृता अथ गृहतस्ता बहिर्निरयिता अवरणकात् ॥ २४५ ॥
मद्रुचिर्न खलु तेषु कतिपयान्वेषभूषणविधीनिह सहते।
नास्ति काचन रुचिश्च मम शिखाश्मश्रुकूर्चधरणेऽपि पुनरियम् ।२४६।
नान्यकण्ठगतमण्डनमिह तां कर्तुमिच्छति मनोरमसुषमम्।
कूर्चकानि विनिवारयति मानुल्लनेतरि ममातिमुदभवत् ॥ २४७ ॥
हिन्दुमुस्लिमजनानिह कृपणान् पश्यतो भवति काचन करुणा।
ते पुराणयुगवस्तुपरिहृतो यद्वदन्ति विनिगृह्य यतनतः ॥ २४८ ॥
यत्तदीयकरतः क्रमनियमाद् भ्रश्यते, परमहं न गतयुगम्।
निन्दितुं न तदभिनन्दितुमथवा वश्मि हातुमथ ग्रहीतुमपि च तत् २४९

सन्त्यतीतगतरम्यतरतमानीह वस्तुविभवान्यनुपमताम् ।
धारयन्ति, न तु तानि पुनरितो रक्षयन्ति तदनर्थकरमपि ।। २५० ।।
कासुचिद्गतशरत्स्वसकृदिमे मुस्लिमा अभिहतास्तु समभवन् ।
यत्र नाशमभजन्त बहुतया पोषितानि हि मतानि समयतः ।। २५१ ।।
तत्र नूतनविधानधारया यच्चमौस्लिमिकराष्ट्रमिति मतम् ।
किन्तु मा भ्रम उदेत्विति कमाल् पाश आह किलसाम्मनसमिदम् २५२
प्राप्यते तु स यदा सदवसरो यास्यतीयमिह नूनमवसितिम् ।
विश्वसिम्यथ कृता तदनुसृतिः सावधानमिह मिश्रजनपदम् ।। २५३ ।।
अग्रसारि भवदस्ति नृपनयात्स्वं मताहवमवत्पृथगधिकम् ।
अर्वदेशततयोऽपि च तदिदं मन्वतेऽर्वमुखदेशमिममृते ।। २५४ ।।
पृष्ठगोऽस्ति स हि तावदतिशयात् पारसः स्मरति वीतमवसरम् ।
संस्कृतिस्फुरणमेतुमभिलषन् तन्मताहव इहोपसरति सः ।। २५५ ।।
राष्ट्रियत्वमुपयाति प्रकटता पृष्ठतस्तदनु वादबहुलता ।
दृष्टिमार्थिकगुणां कलयति सामाजिकीं च दधती बहुरूपा ।। २५६ ।।
मौस्लिमं तदथ राष्ट्रमियमथो संस्कृतिश्च कतमां स्थितिमयतात् ।
उत्तरे किमथ भारतविषये ब्रैटिशप्रभुकृपासु सुफलिते ।। २५७ ।।
चेदिह प्रगतिरस्ति पुनरियं व्यक्तिशो नृपनयाश्रयदृगिति ।
तर्हि वाच्यमिह नः प्रभुतायाः सम्प्रदायसरणेरभिलषितम् ।। २५८ ।।
बुद्धिपूर्वकमनारतमिदमेवास्ति सङ्कुचितदृष्टिनिमिषणम् ।
सर्वथैव विपरीतमिदमितो व्यक्तिदृष्टिविवृतेस्तु परिचितेः ।। २५९ ।।

एकः प्रभौ सर्वदर्शी प्रभुदर्शी परोऽखिले ।
अनन्यस्य द्विभेदं तल्लक्षणं प्रभुणेरितम् ।
इत्यनन्यतया क्लृप्ते काव्येऽस्मिन् भावमञ्जुले ।
षट्पञ्चाशः सर्ग एषः समाप्ति याति शोभनः ।।

दुर्गम घाटी

तामरसम्

सप्तपञ्चाशः सर्गः

पुनरथ निग्रहदण्डनशङ्का सततमिहाऽऽवसति स्म हृदन्तः।
इह समयेऽधिनिदेशनिवेशावसरतया त्वधिभारतदेशम् ॥ १ ॥
विधिबहिरास्थितकाङ्ग्रसमध्ये तदवसरोऽधिकशङ्कित आसीत्।
ब्रिटिशप्रशासनमास्थितचित्तं यत्पुनरेष स्वभावविशेषः ॥ २ ॥
तदुभयवीक्षणतस्तु प्रहारो मय्यनिवार्यः प्रतिभाति स्म।
अहमिह नस्थिरभावगतोऽर्हः किमपि च कर्म विधातुमभूवम् ॥ ३ ॥
सततमियं मम सत्वरतासीत् प्रभवति यावदिदं करवाणि।
न खलु तथापि विनिग्रहमैच्छं स्वमहमरक्षमथेदृशकार्यात् ॥ ४ ॥
भवति यदत्र विनिग्रहहेतुः अधिनिजप्रान्तमथेतरप्रान्ते।
अधिगतवांस्तु निमन्त्रणमेतुं प्रवचनकैर्जनजागरणार्थम् ॥ ५ ॥
तदनुररीकृतवानिह सर्वं त्विह जनजागरणं ग्रहकारि।
अविदमिदं भविता पुनरान्दोलनकरणं किल शिष्टिविरुद्धम् ॥ ६ ॥
हलचलतां जनयेच्च तदान्दोलनमिह तां न सहेत च शिष्टिः।
नियमयितुं मम निग्रहतस्तां प्रयतनमाश्रयिता पुनरेषा ॥ ७ ॥
इति मम नास्ति स मध्यममार्गो भुजगहतिश्च न यष्टिविभङ्गः।
उभयमिदं पथि यत्र भवेत्सः यदितरकार्यवशाद् बहिरेमि ॥ ८ ॥
सकलजनीनसभासु गतोऽहं परिहृतशङ्कतया प्रब्रवीमि।
महदभवज्जनसंघटनं तद् जब्बलपुरे शुभयात्रिकयोक्तम् ॥ ९ ॥
इह सदसी भवति स्म च दिल्ल्यां प्रथमप्रदर्शितलोकसमूहा।
सफलतया च तथोक्तसभानां विशदमिदं सहतां नहि शिष्टिः ॥ १० ॥
परिषदनन्तरमेव च दिल्ल्यां प्रथयति लोक इमं स्म प्रवादम्।
'अयमिह निग्रहमाप्स्यति नूनं' परमहमत्र सुरक्षित आसम् ॥ ११ ॥

सपदि प्रयागमगामिह कृत्वा पथि च विरम्य च्छात्रसदस्याम् ।
प्रवचनमेकमलीगढ़मुस्लिमयुनिवरसिट्यवलोकनकाले- ॥ १२ ॥
इह समयेऽखिलराजनयज्ञैर्दमयितुमेव कृती: क्रियमाणा ।
प्रतियतते स्म च शिष्टिरविज्ञा स्पृहयति नैव मनो मम कार्यम् ॥ १३ ॥
नृपनयभिन्नमथो मम सैकाप्यवतरतिस्म च दृक्पथमेषा ।
प्रबलतमा किल कांग्रसवृत्तिः नृपनयिकेतरकर्मसु सहजा ॥ १४ ॥
सुहितकराण्यपि तानि किलान्दोलनसहबन्धनमुक्ततराणि ।
भवति च सात्र प्रवृत्तिरमुष्याः परमनुदीपनमत्र न कार्यम् ॥ १५ ॥
अथ च परिस्थितिमत्र विम्रष्टुं परममुतश्च क्रमानुपस्रष्टुम् ।
इह समपूपुजमुत्तरप्रान्तस्थितसमकाङ्ग्रससांसदगोष्ठीम् ॥ १६ ॥
अभवदिदं काङ्ग्रसकमवैधं विधिमवहेलयितुं च न सज्जाः ।
मिलितुमिहागतवन्त इदानीमिति न सभा विधिनास्त्यवहूता ॥ १७ ॥
बहिरभवन्निह बन्दिगृहाद्ये समवचिताश्च परे कृतिकाराः ।
इह किल तेऽप्यवहूता आसन् विनिमयहेतुविचारदिशायाम् ॥ १८ ॥
वयमधिवेशनमत्र विदध्मः सततमिदं किल व्यक्तिगतं यत् ।
न च किमपीह रहस्यमगुप्तीकृतमवितुं प्रयतेमहि नित्यम् ॥ १९ ॥
क्षणत इहान्तिमतोऽपि न विघ्नः प्रतिकुरुते किमु शिष्टिरिहेति ।
इह च वयं जगतः स्थितिमेतां यदि विमृशाम एवमथ चान्याम् ॥ २० ॥
अपि विमृशाम महार्धतमत्वं पुनरिह साम्यकवादमुखांश्च ।
अभिलषितं सुहृदो बहिरीक्षादृशमवलम्ब्य विचारमुदारम् ॥ २१ ॥
स्ववशिमनि प्रविदध्युरथान्दोलनममुनाप्युररीकृतमेकम् ।
विवृतमिहास्त हि भारतवासिजनप्रियलक्ष्म च भङ्गनिरोधे ॥ २२ ॥
समितिविरोध इहार्थित आसीत् विदितमथाभवदत्र समेषाम् ।
सविनयभङ्गपुनःक्रमणं सम्भवति न देशततन्तु कथञ्चित् ॥ २३ ॥
स्वगततयापि स शाम्यति शीघ्रं त्वतिलघुरूप इहाथ चलेत्सः ।
न तदवरोध इह स्थितिभेदः प्रचलति शिष्टिसमाक्रमणं यत् ॥ २४ ॥
तदधिनिदेशनमास्त प्रदत्तं सविनयभङ्गपुनःक्रमणं तत् ।
किमपि वचोमयमेव तदाऽभूदवितथ एष सदस्यनिदेशः ॥ २५ ॥

न मतिपुरःसरमीदृशकार्यं कुरुत विनिग्रहमाप्नुत येन।
अबहितिदानमिदं गमितास्ते निजनिजकर्म विदध्युरिहैते ॥ २६ ॥

यदि च विनिग्रह एति तथापि प्रतिकृतिशून्यतया वरणीयः।
अभिहितमेतदभूदथ तेषां यदवसरे प्रतियन्त्विह ग्रामान् ॥ २७ ॥

स्थितिमवगन्तुमिह प्रयतन्तां करविनिमुक्तिप्रशिष्टिगनीत्योः।
परिणतितश्च कृषीवलवार्तं कृतिनिरतैरभिवेद्यमशेषम् ॥ २८ ॥

तदवसरे करबन्धकृतान्दोलनसमयात्तु न कश्चिदिहासीत्।
स्थगितमभून्नियमेन हि पूनामिलदधिवेशनतः परमेतत् ॥ २९ ॥

इदमपि चाभवदत्र सुव्यक्तं यदिह परिस्थितितोऽस्य न कालः।
मृदुलतरः खलु कार्यक्रमोऽयं विधिबहिरङ्गमिहास्त न किञ्चित् ॥ ३०॥

तदपि वयं समविद्म निरोधो भवति पुरेति यथैव च प्रापम्।
प्रविशति कोऽपि तथैव निरुद्धो भवति करप्रतिबन्धप्रचारे ॥ ३१ ॥

अयमधिदेशवशादपराधो बिहित इहास्त मृषाप्यभियोगः।
स्म लगति दण्डविधाविह कारागृहवसतिर्बहुभिः प्रतिलब्धा ॥ ३२ ॥

अहमपि ग्रामगतिं समवाञ्छं परमपरैरवरुद्ध इहासम्।
अहमिह कार्यशतैरनिवार्यैस्तदनु च नावसरोऽप्यवशिष्टः ॥ ३३ ॥

अधिकृतदेशपरिस्थितिचिन्ता वयममिलाम च कार्यसमित्याम्।
समितिरथो न दधाति तु सत्तां विधिविपरीततया परमेषा ॥ ३४ ॥

विरमति, कांग्रसवर्तिषु पुण्या मिलिषवः स्थितगान्धिनिदेशात्।
सकलसभासमितिष्वथ कार्यालयनिचयेषु गतेषु विरामम् ॥ ३५ ॥

स्थितिरिह मेऽङ्ग तवत्समभूत्सा ह्यधिगतमुक्तिर्बन्दिनिवासाद्।
इममधिदेशमहं हि न मन्ये स्वमहमिहाग्रहतः कथयामि ॥ ३६ ॥

'प्रवरः काङ्ग्रससंसदि मन्त्री' क्वास्त्यथ शून्यगता मम सत्ता।
क्वचन न तर्हि सभा समितिर्ह्रा क्वचन न कर्मकरो न तदोकः ॥ ३७ ॥

नहि समितेः पतिरस्ति च कश्चिद् विमृशति गान्धिरिहान्यसदस्यैः।
परमिह सोऽपि किलावसरेऽस्मिन् हरिजनकार्ये महति रतोऽभूत् ॥ ३८ ॥

इदमुपलक्ष्य स भारतवर्षे किल सकलेऽपि तु पर्यटनार्थी।
विरमति न क्वचनेति वयं तं जबलपुरे मिलिता अथ दिल्ल्याम् ॥ ३९ ॥

समितिसदस्यसखः स विमर्शानकृत, कृतं किल तैरिह कार्यम् ।
मतमभितोऽपि विभिन्नमिहैतैः प्रकटितमास्त न्यरुध्यत यानम् ।।४० ।।
इह न च कश्चन सम्मतमार्गोः दलयुगलस्य हि निर्गलितोऽभूत् ।
चलितुममन्वत केचन सत्याग्रहमितरे स्थगनं पुनरस्य ।। ४१ ।।
इह च विनिर्णय एकल आसीत् सरलशिरोधरणीय इहान्ते ।
यदभिमतं भविता भुवि गान्धेस्तदुभयपक्षसमर्थितमासीत् ।। ४२ ।।
स्थगनममुष्य न गान्धिरिहैच्छत् तत इह सैव गतिर्निरगच्छत् ।
कुहचन कांग्रसपक्षत एकोऽमृश्यत निर्वचनीयतयापि ।। ४३ ।।
तदधिविधानसभं पुनरस्मिन्नवसर एष न विषमो युक्तः ।
न रुचिरभूदिह कार्यसमित्याः क्वचन सदस्यगणस्य न काचित् ।। ४४ ।।
अपि च सुधारविधिः स न द्वित्रान् समनुगमिष्यति कर्मणि वर्षान् ।
इह समये च विधानसभायाश्चलति न कापि निचायनचर्चा ।। ४५ ।।
मम च निजेन मतेन निचाये समयदृशा नहि दोष इहासीत् ।
अवसर आश्रयणीय इहायं निचयनमार्गे काङ्ग्रसगोष्ठ्या ।। ४६ ।।
इदमधुना ननु नोऽस्त्यवधानं वलयितुमेव तु चर्चितमेकैः ।
मनसि ममाभवदाचलदान्दोलनमिह धास्यति प्रश्नसमाधिम् ।। ४७ ।।
दधति पुरः किल यानिह केचित् सममतभावरुचिर्न प्रभूयात् ।
स्थितिमधिकर्तुमिमामिह काञ्चित्त्विति सततं निरतोऽस्मि प्रचारे ।४८।
अलिखमहं बहुवृत्तदलेषु निजकथनीयमिहान्तरतश्च ।
मृदुलतया च युतानथ लेखानकरवमेष समीक्ष्य तु कालम् ।। ४९ ।।
न कठिनलेखप्रकाशनमासीदलगदद्य न च गुप्तिविधानम् ।
इतरदनेकविधानमरौत्सीद्विशदसमीक्षणमापदुपेतम् ।। ५० ।।
किमपि तु भीतिकरं प्रविधातुं मयि च समुद्यमितेऽपि परेषाम् ।
समयदलप्रविकाशनकार्येषु विरमतामनुरोध इहासीत् ।। ५१ ।।
समयदलप्रविकाशनकाराः मम सुहृदो ह्यभवन् सुजनास्ते ।
बहुषु रुचिं मम समरक्षंस्ते सदवसरेषु, न सन्ततमेते ।। ५२ ।।
सकृदहमेकमलेखिषमाशातिगततनुं, नहि मुद्रित एषः ।
इह पुरुषार्थगुणाङ्कित (१९३४) वर्षे जनवरिमासि तु पत्रकरो माम्- ५३

अकथयदत्र भवन्मतलेखः प्रमुखमनुप्रहितं दलकारम् ।
किल कलिकात्तगतं मतिमाप्तुं स च न हि सम्मतिमभ्यतनोन्नः ॥५४॥
इति न स मुद्रित आस्त, स चायं किल दलगुप्तिकरः स्वयमासीत् ।
इह दलमुद्रणकारिषु भूयः प्रमिलनभाषणदे समयेऽहम् ॥ ५५ ॥
विविधदलानि नैकपुरुषांश्च कटुकसमीक्षणधृष्टतयापि ।
प्रतिकृतवानिति ते मयि रुष्टाः रुडतिशयोऽभवदुत्तरमौने ॥ ५६ ॥
इयमिह कांग्रसिकी किल नीतिर्नहि करणीयमिहोत्तरदानम् ।
स्वयमिह गान्धिरुदाहरणं नः प्रमुखजना इतरेऽपि तथासन् ॥ ५७ ॥
सततमपीयमिहाद्रियते नो वयमिह चास्फुटवाक्यप्रयोगात् ।
अवसरवादिसमीक्षकवर्गे भुवि जनयाम तु वादविवादम् ॥ ५८ ॥
विगलिततर्कगतिः स विवादः द्विदलगतानपि वास्तवप्रश्नान् ।
सपदि निरस्यति न्यायसमेतो जवसहितो भविता न विवादः ॥ ५९ ॥
चरमदिशि स्थितदेशविशेषप्रणिहितनास्तिकवादप्रवेशे ।
भवति यथा हि स वादविवादो नहि स तथोत्तरदेशविदेशे ॥ ६० ॥
मम महिला-सुहृदा लिखितं यत्-"कतिपयभाषणतीव्रतया ते ।
कमपि तु विस्मयमाप्नुवमेषा" तदिति ऋतं मयि क्षुब्धबिडाले ॥६१॥
परिणतिरस्ति किलेयमिहाशोपरि सलिलप्लवनेन समासीत् ।
स्वयमपि विस्मित आसमिहाहं यदुभयराष्ट्रियव्यक्तिगतास्ताः ॥ ६२॥
वयमफला अवलोक्य निराशाः कमपि दधेमहि क्षोभमिहान्तः ।
परमिह भावनया न हतोऽहं नहि विफलो न पराजयमाप्तः ॥ ६३ ॥
नृपनयिके मम मानसव्योम्नि प्रविततगान्धिनि मया त्वधीतम् ।
'परिणतिभीतिवशान्निजभावान् दमयतु जातु न वीरमनुष्यः ॥ ६४ ॥
नृपनयिके विषयेऽनुपपाल्यासुकमुपदेशमहं परितुष्टः ।
यदपि विपद्यमुना पतितोऽहं तदितरत्र पुनरस्ति स कठिनः ॥ ६५ ॥
अमुमुपदेशमिहाश्रितवन्तो हृदयकटुत्व-पराजय-भावान् ।
सपदि विमुच्य गता इह सान्त्वं बहुजनप्रीतिभरं प्रविचिन्त्य ॥ ६६ ॥
इदमनुचिन्तनमत्र नवोत्साहमुपजनय्य पराजयवृत्तिम् ।
सपदि निरस्यति तेन तदेको भवति किलौषधिरत्र न मोघः ॥ ६७ ॥

'अहमिह चैकल एव परैश्च स्मृतिरपि मे क्रियते न कदाचित्'।
इति तु विचिन्तनमत्र समस्तादपि हि विचिन्तनतोऽस्ति विषह्यम् ॥६८॥
इयति च सत्यपि दुःखमयेऽस्मिञ्जगति किलाद्‌भुतवृत्तिनि कश्चित्।
कथमपराजयभावनया स्वं प्रभवति रक्षितुमत्र बहुत्वात् ॥ ६९ ॥
प्रतिघटनं विकृतिं परिलक्ष्य प्रगतिपथेऽग्रसरन्नपि लोकः।
इह परितोऽन्यजनाननुपश्यन् मनसि स शङ्कित एव तु नाना ॥ ७० ॥
बहुघटनापरिवृत्तिरथ व्यक्तिषु च दलेष्वपि जात्वतिरोषम्।
पुनरपि खेदमिहोद्धवनीतं कतिपयवासरतस्त्वजनयत्तम् ॥ ७१ ॥
अनुभवतीह मनो मम क्षोभं गहनतया विदधत्सु न चिन्ताम्।
अपि जनजीवनप्रश्नशतेषु स्मृतिमपि न स्पृशतीह समस्या ॥ ७२ ॥
नहि कथयन्ति वृथेति च मत्वा प्रभवति ताभिरयं हि प्रभावः।
अधिधृतधारणमत्र तदर्थेष्विति न तदीयकथामपि कुर्युः ॥ ७३ ॥
सति च पराजय-रोषमुखेऽस्मिन् विकृतिशतेऽपि मया न विमुक्तः।
निजपरमूर्खतया कृतकार्ये परिहसतावसरो न कदाचित् ॥ ७४ ॥
प्रभुकरुणां प्रति श्रद्दधते ये मनसि तु विस्मय एषु पुनर्मे।
विपदि विपत्पततीह न श्रद्धा परमपयाति कथं तु न तेषाम् ॥ ७५ ॥
कथमिह तत्करुणाविपदोश्च प्रमितिरियं भवतीह परीक्ष्या।
किल कविता ध्वनतीह बहूनां हृदयघटेष्विह हार्दिकलसस्य ॥ ७६ ॥
अवितथ एव प्रभो ! असि न्यायी यदि विवदामि तदा मम याच्ञा।
अपि त्वयि न्यायभृता भवतीयं फलति च पुष्यति पापकृतोऽपि ॥ ७७॥
मम च निराशमिमे बहुयत्ना विदधति किं हृदयं त्वयि भक्तम्।
प्रियतम बन्धुरसि प्रकरोपि व्यवहृतिमत्र रिपोर्विपरीताम् ॥ ७८ ॥
अधिकपराजयविघ्नकृदस्मात् किमु भविताऽऽक्रमणं तव स्वामिन्।
विषमतृषोऽनुचरा मदिरापा अपि भुवि तस्करवृत्तियुतास्ते ॥ ७९ ॥
विषयविलासशतानि जुषन्ते परमसुखानि च भुञ्जत एते।
अहमिह जीवनकृन्तनकार्यं त्वयि निरतो विदधे भुवि नाथ ! ॥ ८० ॥
तव पथि घोरनिराशतया यो विचरति हन्त स इतस्ततश्च।
इयमिह विश्वसतः किल श्रद्धा प्रगतिपथे शुभकर्मसु लक्ष्ये ॥ ८१ ॥

मुकुरचरित्रभृतावथ वाऽऽदर्शभवनहेतुकजीवनसृष्टौ ।
सुजनतया सहितेऽपि भविष्योज्ज्वलतरता किमु नेश्वरभक्तिः ।। ८२ ।।
यदि तदिदं भुवि साध्यत एकैर्मतिमवलम्ब्य समाश्रिततर्कैः ।
खलु पतिताः प्रभवन्ति विपत्तौ परमिह किञ्चन लग्नमिवान्तः ।।८३।।
भुवि तदृते जनजीवनमेतद् भवति जलाशयहीनमरूद्यम् ।
मम च समाजविचारप्रचारे समितिसहायजने प्रभविष्णौ ।। ८४ ।।
सति विकलत्वमिवानुभवन्तोऽपि च न कृताशङ्कतया युक्ताः ।
कतिपयवत्सरका व्यतियाता दिवसमकार्षुरिहाखिलकार्यम् ।। ८५ ।।
इदमपि तत्र विचिन्तयतिस्म निहितनिजार्थजनं प्रणुदामि ।
"मम गतिरस्ति न हानिकरीयम् इति नहि शक्यमिहाद्य च वक्तुम् ।
मम न सहायगणोऽस्ति समाजी परमहमत्र न कांग्रसकर्षी ।
मम च समाजविचारप्रचारेऽधिकृतिरिहास्ति च पूर्णतमेयम् ।। ८७ ।।
मम पुनरत्र न तां तु सदस्याः कतिचिदमन्वत सङ्कटपतिताः ।
इति निजरोषमिमे प्रविकासं स्फुटमनयन् करवाणि तु किं तत् ।। ८८ ।।
यदहममंसि महत्त्वमयं तन्नहि परिहर्तुमहं मनसैच्छम् ।
उभयविरोधमये समये मे समितिसदस्यपदादुपरामः ।। ८९ ।।
समितिरवैधतया परिहार्या नहि मम सेच्छति विधिवत्यागम् ।
इति न लिखामि तदेतदमुष्यै न खलु तदीयमिहास्ति महत्त्वम् ।। ९०।।
इदमिह दुष्करकर्म सकृन्मे पुनरपि सम्मुखमागतमासीत् ।
किमपि यदा मम गान्धिरहासीद्दलशकलं निहितान्तरव्यूहम् ।। ९१ ।।
इह खलु पृच्छकमेकमपृच्छत् मयि विषये स च प्रत्युदतार्षीत् ।
मम हि स कार्यकलापमगादीत् कमपि च खेदमिह प्रकटय्य ।। ९२ ।।
मम पुनरुद्धरणं प्रति चाशां प्रकटयति स्म च सूचयतिस्म ।
नहि नवलाध्वनि कांग्रसमेतत् क्वचिदवकृष्य नयामि न यामि ।।९३ ।।
निजविषयस्तत्कथाप्रसङ्गे नहि समरोचत मह्यमिदानीम् ।
अधिकमितोऽपि विचालयति स्म दलशकलस्थमहीधरसंस्था ।। ९४ ।।
स्वयमिह गान्धिसुयुक्तिनिबद्धा तदनुमतेन च राष्ट्रियदृष्ट्या ।
वरमनपेक्षितमेतदिदासीदिति मम विस्मयहेतुरभूत्तत् ।। ९५ ।।

नहि धरणीधरणाद्यधिकारं जगति समर्थयतेऽद्य विवेकी ।
अपि च समग्रधरातलमध्ये विनशनमेति समत्र प्रथेयम् ॥ ९६ ॥
अनुभवतीह च भारतदेशेऽवसितिममुष्य वृथाप्रथनस्य ।
स्वयमपि ते धरणीपतयोऽस्यै नवलदिशा स्पृहयन्ति प्रवृत्त्यै ॥ ९७ ॥
अचलविभूतिमुखावजयात्तेऽखिलमपि दातुमिहोद्यतचित्ताः ।
निजदुरितातिभरेण प्रथेयं स्वयमिह गच्छति नीतिसमुद्रे ॥ ९८ ॥
तदपि स गान्धिरिमां परिपुष्यन्निधिपमुखां सरणिं कथयत्योम् ।
दृगिह च तस्य मदीयदृशोऽस्याः कियदिदमन्तरमादधतेऽस्मिन् ॥ ९९ ॥
चकित इवास्म्यमृशञ्च कथं वा कियदवधि सहयोगकरः स्याम् ।
किमहमिह स्वसभासदभावं सविधिकहेयमितो विजहीयाम् ॥ १०० ॥
नहि च तदाहमितो बहिरेतुं पुनरलभे सरणिं भुवि काञ्चित् ।
कतिचन सप्तदिनानि गतानि गतवति वन्दिगृहं मयि सर्वम् ॥ १०१ ॥
सपदि समाहितमेतदभूत्तद् गृहकलहेषु गतो मम कालः ।
मम जननी क्रमशो गतरोगा बलरहितेति त्यजति न शय्याम् ॥१०२॥
परमधुना नहि जीवनपक्षे क्वचन न काचिदवर्तत शङ्का ।
निजमवधानमथार्थिकप्रश्ने विवलितमास्त उपेक्षितपूर्वे ॥ १०३ ॥
महति विमर्शपथे पतिताया इह हि निजस्थितितो व्ययभारम् ।
गुरुतरमेव वहाम इदानीं पुनरिदमल्पनमाकलनीयम् ॥ १०४ ॥
नहि च गृहव्ययचिन्तनमीदृक् चरममशिष्यत यदिह विचिन्त्यम् ।
परमुपयुक्ततरा धनसम्पद् गुरुपथिकस्य भविष्यति भारः ॥ १०५ ॥
धनिकजनो नहि साहसयुक्तं किमपि हि कर्तुमलं भवतीह ।
स हि धनसम्पदपायनभीतो भवति परं यदि शिष्टिगृहीतः ॥ १०६ ॥
भवति वृथेह तदर्जनयत्नः किल यदिहास्यास्तमितमितं तत् ।
तदुभयतोऽपि वियुक्तिमिहैच्छम् परिमितमेवमपेक्षितमासीत् ॥ १०७॥
सति समयेऽर्जितुमस्मि च शक्तो मम जननी कलयेन्नहि कष्टम् ।
व्ययविषये न भवेदवरोधो मम दुहितुश्च न शिक्षणकार्ये ॥ १०८ ॥
प्रतिहतिमत्र ऋते तदुपेयात् यदधिगमाय युरोपप्रवासः ।
सकलमपेक्ष्य च सा मम पत्नी ऋत कमलाकमलापि तथैच्छत् ॥१०९॥

वहु विमृशामि धनाल्पनकालो मम खलु दुःखमतोवाजनयत् ।
मम खलु पुस्तकसंक्रयकलितं व्ययितमिदं स्यात्स्वतो विस्रष्टुम् ।२१०॥
इह समये विकृतार्थिकयोगे स्थितिमवधर्तुमिदं परिक्लृप्तम् ।
सकलमलङ्करणाद्यपिपत्न्याः कनकमुखं त्वितरद् विक्रेतुम् ॥ १११ ॥
तदिदमरोचत नो कमलायै न परिहितं तदु द्वादशवर्षैः ।
अवितुमरक्ष्यत तद्धनकोषे क्वचन दिने दुहितुर्वितरीतुम् ॥ ११२ ॥
श्रुतिगुण (३४) वत्सरके जनवर्यां अविहितकर्मसु नापि प्रवृत्ताः ।
स्वकृतिकराः अपि कांग्रससभ्या अविरतमप्यभवन्निगृहीताः ॥ ११३ ॥
इदमनुरुध्य वयं ह्यनुयातुं प्रथममिमान्, निकटस्थितग्रामान् ।
प्रति च समुत्सुकतां घृतवन्तोऽत्र हि समये समभून्निगृहीतः ॥ ११४ ॥
अहमदकिद्वयिरेष महत्त्वं दधदिह प्रान्तिककांग्रसमन्त्री ।
स्ववशिमवासरको जनवर्या निकटगतोऽप्यनुपेक्ष्य इहासीत् ॥ ११५ ॥
अयमिह त्रिशशरत्प्रभृतिभ्यो भरतभुवः प्रतिकोणमनेकैः ।
समधिनिदेशमुखप्रतिवन्धैर्नहि सुनिरोद्धुमशक्यत शिष्ट्या ॥ ११६ ॥
महिमहनीय इहाभवदस्माकमिति भवेत्प्रमुखः कतमोऽन्यः ।
कथमयमग्रगतो भवितेति न निखिलभारतकांग्रसमध्ये ॥ ११७ ॥
नहि मदृते समभूदिह कश्चित्त्विति सुहृदां मतमत्र गृहीतम् ।
सहमतिमाप्य च किञ्चन कर्तुं तदिह भवेत् किमु कुहचन कार्यम् ।११८॥
इति विषये सुमतेस्तदभावादनियतमास्त यतो ह्यतिदूरे ।
सकलजना इह वर्तितुमुत्काः परिणतितः किल निग्रहणीयाः ॥ ११९ ॥
स्ववशिमवासर एष समायोजयितुमपीरणमेकमयच्छम् ।
महनविधिस्तु पृथक्पृथगास्तां निजविषये पुनरित्यपि चोक्तम् ॥ १२० ॥
अतिविततेन क्रमेण प्रयागे महयितुमेनमहं समयुञ्जम् ।
मतमिदमास्त च वासर आयोजक इह निग्रहमाप्स्यति नूनम् ॥१२१ ॥
पुनरिह वन्दिगृहे प्रविशेयं प्रथममितस्तु भ्रमेयमशेषे ।
सकृदिह जाग्रति वङ्गप्रदेशे भ्रमणमभीष्टभून्मम चित्ते ॥ १२२ ॥
इह चिरमित्रसमागम इष्टः प्रमुखतयातिविपत्पतितेऽस्मिन् ।
मम समवेदनया करुणां तां प्रकटयितुं किल वंगजनेषु ॥ १२३ ॥

अभिलषितं विदतोऽपि यदस्मिन् दुरवसरे न सहायतया तान् ।
प्रति प्रतिकर्तुमहं हि समर्थो नहि समवेदनमस्त्यगदोऽयम् ॥ १२४ ॥
तदपि सहानुभवो मम वङ्क्चै ध्रुवमुररीकृत आस्त कृतज्ञैः ।
इह हि विशिष्टतयैव प्रदेशः पृथगिव भूतममंस्त तदा स्वम् ॥ १२५ ॥
व्यथितमनाश्च यथा विपदीमं परिहृतवानखिलो निजदेशः ।
न खलु विचार एष च न्याय्यस्तदपि तदा मनसा विदितोऽयम् ॥ १२६ ॥
स कमलया सह कालिनिकेतं पुनरगमं तु चिकित्सकवर्यैः ।
रुजि विषये विचिकित्सयितुं च, प्रति च चिकित्सयितुं तैर्मिलितः ।१२७।
बिकृतमभूदिह स्वास्थ्यममुष्याः सुचिरमुपेक्षितमेतदुभाभ्याम् ।
अपि च चिकित्सयितुं नहि यत्नो विहित इहास्त न हि स्थितिवश्यात् ॥
यदि हि स कालिनिकेतनवासी समभवमत्र च कार्यमकार्षम् ।
समभवदेव चिकित्सितमस्या यदि च न बन्दिगृहे समवात्सम् ॥१२९ ॥
वहिरिह संवसतोरवकाशो न भवति वन्दिगृहे तु गतस्य ।
मम सहचर्युपयास्यति तत्र भवति चिकित्सितमाश्वपि यत्र ॥ १३० ॥
परमिह सहसा निग्रहणान्मे समभवदेव न यत्नविशेषः ।
इह तु विनिग्रहसंभव आस्ते इति विहितोऽयमिहास्ति प्रयत्नः ॥ १३१ ॥
जनवरिमासि च पञ्चदशाङ्के सुनिरगमाव गतौ कलिकाताम् ।
स्ववशिमवासरतः प्रथमं तौ प्रतिविनिवृत्य महेऽपि मिलाव ॥ १३२ ॥

कूजतु किमर्थं कोकिलोऽयं गीतमेकस्मिन विरचितम् ।
षड्विंशे दिवसे जनवर्याः इत्यपरस्मिन् वत्सरे ।

येन तेन कविना विहितेऽस्मिन् नेहरुचरिताभिधगुरुकाव्ये ।
सर्गोऽयं स समाप्तिमुपगतो दुर्गमघाटी मुनिपञ्चाशः ॥

भूकम्पः

प्रबोधिता

अष्टपञ्चाशः सर्गः

जनवर्य—पञ्चदशवासराङ्कके
महिते मिते श्रुतिगुणैश्च वत्सरैः।
प्रहरे तृतीय इह सद्मनि स्वकेऽ-
वहितः स्थितः समलपं कृषीबलैः॥ १॥

अथ माघमेलनमभूत्प्रवर्तितं,
सकलं दिनं मिलितुमागता जनाः।
मम पादयोस्तु सहसा प्रकम्पनं
सममुत्थितं, स्वमवलम्बितुं क्षमः॥ २॥

निकटस्थयूपवलनेन चाभवम्
विकटं कपाटपटली रराट यत्।
स्खलिताः स्वराजभवनस्य कर्पराः
रवमत्र ये खरखरेति कुर्वते॥ ३॥

नहि भूमिकम्पमनुभूतवान् पुरे-
ति न बुद्धवान् किमिदमत्र जायते।
परमाशु भूमिचलनाऽवधाततो
नवलानुभूतिजविनोदमाप्तवान् ॥ ४॥

स कृषीवलैः प्रकृतवस्तुभाषणे-
ऽप्यथ भूमिकम्पमवबोधयन्निमान्।
जरती तु मातृस्वसृकाह्वयत्तदा
भवनाद्बहिर्भव जवाहर ! त्वरन्॥ ५॥

स विचार एव मम भद्रको व्यभात्
नहि भूमिकम्पनममंसि तादृशम्।
जननीं ममोपरिगभूमिकाशयां
कमलां परिच्छदनिबन्धने स्थिताम्॥ ६॥

प्रविहाय ते न तु निजात्मरक्षणे
न बहि निरेतुमिह यत्नमाश्रितः।
इह भूमिकम्पहतयश्चिरात्स्थिताः
क्षणचर्चनार्थमिह ताभिरास्थितः ॥ ७ ॥

तमिमं जनाश्च झटिति स्मृतेर्बहि-
ष्कृतवन्त एव न परं स्म जानते।
न च तेऽन्वमन्वत किल क्षणैस्त्रिभिः
स विहारकोटिकजनान्यघातयत् ॥ ८ ॥

रजनीमुखेऽत्र कमला मयाऽचल
त्सह कालिकेतनमुपागतौ च तत्।
रयले स्थितौ पथि विहारदक्षिणाद्
विगतौ परेद्युरिह कालिकेतने ॥ ९ ॥

नहि वृत्तपत्रमवदत्परं त्विदं
नववृत्तमस्य परिणामवृत्तकम्।
अतिघोरवृत्तमुपलब्धमन्यथा
विदितं क्रमेण किल वज्रपातवत् ॥ १० ॥

वयमात्मकार्यनिरतास्ततोऽभवद्
बहुधा चिकित्सकगणैः समागमः।
अवसाननिश्चयवशेन मासत-
स्त्विह कालिकेतनमुपेष्यतेऽनया ॥ ११ ॥

अतिरिक्तमत्र विहितः समागमो
बहुमित्रसङ्गिभिरितीह निर्वृतम्।
परितो हि दान्तिवशतोऽत्र च प्रजा-
हृदि यद्भयं तदनुभूतवानहम् ॥ १२ ॥

इह विभ्यति स्म निजकर्मयोगतो
न विपत्कदाचन च काचिदापतेत्।
इति चिन्तयाधिगतभूरिसङ्कटा
इह वृत्तपत्रनिचया अपीदृशाः ॥ १३ ॥

नहि वर्तमानसमयो भयान्वितः
किल भाविकार्यनिचयोऽपि तादृशः।
न समस्यया विषमयानया पुनः
किल बङ्ग एव विकलोऽभवत्तदा ॥ १४ ॥

सकलेऽपि भारततले प्रदेशका
निखिला अपीदृशसमस्यया वृताः।
इह शङ्कयैव न भयेन राजनै-
तिककार्यमार्गं उपरुध्यते तदा ॥ १५ ॥

इह नास्तिकप्रभृतिदुष्प्रवृत्तयो
बहुवेगतः प्रकटितास्तदाभवन् ।
स समाजसाम्यपथयोः समागमो
मिलितां प्रवृत्तिमुपदर्शयत्ययम् ॥ १६ ॥

अनयोस्तु भेदकरणं सुदुष्करं
ह्यतितङ्कवादविषयेऽनुसंहितेः ।
बहुधात्र विज्ञपितदुर्ग्रहाग्रहे,
न ममावकाश इह नापि सङ्गतिः ॥ १७ ॥

विदितं यथा च नहि राजनैतिको
महिमाऽवशिष्ट इह नापि संस्थितिः।
न पुराणसभ्यजनचित्तचेतना
परिवर्तितं किल विचारधारया ॥ १८ ॥

इह सर्वकारदमनप्रतीपगा
किल रोषवृत्तिरकरोत्प्रतिक्रियाम्।
क्वचिदेकगामथ द्विगां त्रिगां पुन-
र्बहुगां तु सा हृदय एव ताम्यति ॥ १९ ॥

इह सर्वकारदलतोऽपि सा तथा
स्फुटतां गता कलहसंप्रवर्तिनी।
नहि शान्तिमाश्रयति कोऽपि तद्द्वये
हितसाधनाय घटनानिवृत्तये ॥ २० ॥

अतितङ्कवादिकप्रवृत्तिसम्मुखे
नहि सर्वकार इह चोज्झति क्रियाम् ।
इह शान्तिपूर्वकनियन्त्रणं हितं
धृतगौरवं च भवति प्रशिष्टये ॥ २१ ॥

इह सर्वकारकृतदान्तिसङ्क्रमे-
ऽनपराधिनोऽपि दमनास्पदीकृताः ।
अपराधमार्गमुपयन्ति तावता
परिवृत्तिमेति जनक्रान्तिरक्रमा ॥ २२ ॥

परमीदृशेष्ववसरेषु देहिनां
न गभीरधीरहृदयस्थितिस्तु सा ।
सुलभा भवत्यथ वितङ्कवादिनां
घटनाल्पतां प्रतिगता प्रतीयते ॥ २३ ॥

पुनरुत्थितिस्तु सहजैव सम्भव-
त्यपि सर्वकारधृतिभञ्जनं वचः ।
घटना इमा नहि रुजः स्वसम्भवा
रुजि लक्षणं तदचिकित्स्यमुच्यते ॥ २४ ॥

इह यास्ति रुक् प्रतिचिकित्स्यतामियम्
नहि लक्षणोपचरणै रुजः शमः ।
इह विश्वसिम्यहमिमे नवोदिता
युवकास्तथा युवतयश्च गुप्तताम् ॥ २५ ॥

प्रतिमोहिता दधति तङ्कवादिभिः
किल गुप्तकर्मकरणैः परीचयम् ।
युवकेषु साहसिकतासु मन्त्रणा
स्वपि भीतिहेतुषु रुचिः स्म लक्ष्यते ॥ २६ ॥

प्रतिवेत्तुमप्यतिरुचिर्हि तेष्वियम्
परिबोद्धमिच्छति मनो यदस्ति किम् ।
इह सन्ति के च कतरे तले स्थिताः
भुवि कर्तुमद्भुततरं च साहसम् ॥ २७ ॥

अपि चोत्सुका निज महत्त्वकाङ्क्षया
नहि निश्चिते भवति कायसङ्क्रमे।
अपि कर्तुमुद्यममिमेऽभिलाषिणः
न तु तङ्कवादसदृशं कदाचन ॥ २८ ॥

परमत्र यन्मिलनमेभिरिष्यते
यदपीदृशैः सह निविश्यतेऽसुकैः।
तदपीदृशां पुरुषसंशयास्पदी-
भवनेऽथ दृङ्नियमने च कारणम् ॥ २६ ॥

अथवा भवन्ति वत बन्दिकेतनं
त्वयमुच्यते बिटिशशासने गुणः।
यदिह व्यवस्थितिनयानुपालनम्
स्वयमप्यहं गुणमिमं प्रशंसये ॥ ३० ॥

प्रियमस्ति मे पुनरिहानुशासनं
अहमस्म्यराजकतया न सम्मतः।
न सहे त्वशान्तिमपि नाप्ययोग्यताम्
कटूना समानुभवनेन चान्यताम् ॥ ३१ ॥

मम धारणा विनिमिता व्यवस्थिति-
र्न, नयोऽपि नास्ति जनतासु रोपितः।
उपयोगितादृगियमत्र संशयं
विदधाति हन्ति च तयोः प्रशस्यताम् ॥ ३२ ॥

बहुधा तयोर्भवति नानपेक्षितं
त्विह मूल्यमाभृतमिति त्वदर्शयम्।
प्रबलस्य राजनयिकस्य चेच्छया
भुवि चीयते नय इतीह साम्प्रतम् ॥ ३३ ॥

भवति व्यवस्थितिरपीह तङ्कजा
बहुधा व्यवस्थितिनयौ विचारितौ।
इह सिद्धयतोऽथ विपरीततां गतौ,
नहि तङ्कमाश्रितमिहास्ति साफलम् ॥ ३४ ॥

नहि वाञ्छितं भवति तच्च धीमतां
बलमाश्रिता भवति न व्यवस्थितिः ।
नहि तत्प्रयोगमतिरिच्य जीवति
यदि सेयमेतदिह सैन्यशासनम् ॥ ३५ ॥

न तदस्ति नाम विधिशासनं पुनः
कविकल्हणस्य विदिता तरङ्गिणी ।
इतिहासकाव्यमिह यत्र यत्र तद्
वदति व्यवस्थितिनयौ स सर्वदा ॥ ३६ ॥

प्रयुनक्ति धर्ममभयञ्च तत्र तद्
द्वयमेव शासमकृतं समीरितम् ।
स नयो विधिं समतिशय्य राजते
जननिर्भयत्वमुदिता व्यवस्थितिः ॥ ३७ ॥

भयभीतलोकविहितां व्यवस्थितिं
जनरोपितां वदति नीतिचिन्तना ।
तदपेक्षया यदि विनीयते प्रजा
भुवि निर्भयत्वमिह सा व्यवस्थितिः ॥ ३८ ॥

वयमत्र सार्धदिवसत्रयं स्थिता
तिसृषु व्यधां जनसभासु भाषणम् ।
अहमित्थमेव कलिकेतने पुरा-
कृतवानिहास्मि किल भाषणानि यत् ॥ ३९ ॥

परमैषमः सपदि तङ्कवादिनः
प्रतिनिन्दयंश्च परिदर्शयंस्त्रुटीः ।
विधिमालुलोचमथ बङ्गशासने
उररीकृतं ब्रिटिशशासनेन तम् ॥ ४० ॥

महतौजसा च घटनाः प्रकाशिताः
उपकर्ण्य या अविभरं त्वधीरताम् ।
यदिहातिघातकमभून्नियन्त्रणं
स विधिश्च येन तदकारि शासकैः ॥ ४१ ॥

सदसद्विवेकरहितैश्च मानवा-
दरमानभञ्जकबलात्कृतिः कृता ।
इह मानवाधिकृतिप्रश्नसम्मुखे
किल राजनैतिकमहत्त्वमानतम् ॥ ४२ ॥

अथ कालिकेतननयालये मयि
त्वभियोग एतदनुगैस्त्रिरोपकैः ।
अनुचाल्यते स्म किल दीयते स्म मे
गतवन्दिगेहवसतिदण्ड एव सः ॥ ४३ ॥

न रवीन्द्रठाकुरनिकेतनं चिराद्
गतवान् स शान्तिकनिकेतनाभिधम् ।
इति तद्गतेन सुकवीन्द्रदर्शनं
विहितं यदस्ति सततं सुखप्रदम् ॥ ४४ ॥

इयदन्तिकं गतवतापि दर्शना-
न्मयका विना कथमिहोचिता गतिः ।
द्विरगां तु शान्तिकनिकेतनं पुरा
कमलाद्य तावदगमन्मया समम् ॥ ४५ ॥

प्रथमं हि दर्शनमभूत्तदा यदा
प्रजिघासवो दुहितरं वयं गताः ।
दिवसैर्निकेतनमिदं प्रवेक्ष्यती-
ह परीक्षणे किल प्रवेशिकागते ॥ ४६ ॥

तदनन्तराध्ययनमस्तु कुत्र चे-
त्यभवत्पुरः स किल प्रश्न उद्गतः ।
प्रविशेदियं क्वचन शासनेन वा-
परिचालितेऽर्धतरशासनेन वा ॥ ४७ ॥

न तु तादृशे क्वचन नार्धशासका-
धिकृतेऽधिविश्वनिगमालयेऽथवा ।
ते तदरुच्यतेह मम पुत्रिशिक्षणं
परितो हि तद्भवति शासनानुगम् ॥ ४८ ॥

न च संशयस्तत इतोऽपि शिक्षिता
बहुपूरुषा इह महाजनाः स्मृताः।
महिलास्ततश्च बहुलाः समुद्गताः
अपवाद एव युनिवर्सिटीष्वदः॥ ४६॥

बहुधा हि तेषु तरुणावदातगी-
र्दमिता भवत्यथ हतापि रोपतः।
न विमुच्यते क्वचन कोऽपि किञ्चने-
ति विचार्य शान्तिकनिकेतनं गताः॥ ५०॥

इदमेकमेव जगतीह विश्रुतम्
नहि यत्र तादृगुपहासयोग्यता।
इति निश्चितं यदिह प्रेष्यतामियं
न खलु नात्र सा सकलसत्त्वसज्जता॥ ५१॥

प्रति प्रस्थितो पथि बिहारनायकं
नृपपाकशासनमसमाननयाकम्।
अवलोक्य भूचलनपीडिताञ्जनान्
सहकर्तुमेष स्थितवान्स पत्तने॥ ५२॥

स हि वन्दिगेहवसतेरिहागतोऽ
परिहार्यतां दधदिवार्तसाह्यके।
अविशिष्टिकर्मणि किलाग्रतः पदं
न्यदधाद्वयं तु सहसा समागताः॥ ५३॥

नहि तारपत्रकमिहागतं मम
कमलासहोदरगृहञ्च खण्डितम्।
वसितुं वयं यदधि तत्र चागता
तदभूत्किलेष्टकचितं द्विभूमिकम्॥ ५४॥

इति वै जनान्तरवदास्थिता बहिः,
अपरेद्युरेमि स मुजफ्फरं पुरम्।
इह सप्तवासरमयात् प्रकम्पनात्
परमद्य यावदिह मुख्यमार्गतः॥ ५५॥

न ऋते कुतश्चिदपि मृन्निवारणं
प्रति यत्नलेशमपि ते समाश्रयन् ।
सरणीरिमाः स्फुटयितुं कृते कृता
शवदेहनिर्गतिरभूत्तु भूयसी ॥ ५६ ॥

इह केचनातिशयचित्रभावगाः
पततश्छदादिह च भित्तितोऽवितुम् ।
बहुहर्म्यखण्डशतदृश्यमत्र तत्
किल मार्मिकं पुलकिताङ्गताकरम् ॥ ५७ ॥

इह रक्षिता दलनतोऽथ मन्थनात्
हृदयद्रवङ्करनिजानुभूतिभिः ।
कथिताभिरद्भुतभयानकादिभिः
स्वभयं च विस्मयमिह प्रतन्वते ॥ ५८ ॥

इह च प्रयागप्रतिनिवर्तनक्षणात्
सपरिच्छदं धनमिहावचायितुम् ।
कृतवान् प्रबन्धमिह कांग्रसान्विता
इतरे च सर्वसुहृदोऽन्वयुञ्जत ॥ ५६ ॥

सहयोगिनः कतिपये ममाबदन्
इह भूमिकम्पननिमित्ततः समम् ।
अपि चोत्सवाः सपदि ते स्वतन्त्रता-
दिवसे भवन्त्ववसिताः स्वरूपतः ॥ ६० ॥

परमत्र केचन न सम्मता अहं
न हि कारणं किमपि तादृशं मिषन् ।
भुवि कम्पतोऽपि कथमत्र संयमो
भवतात्समुत्सहयतात्किलोत्सवः ॥ ६१ ॥

इह केऽपि पूरुषकृताद् विनिग्रहा-
दिकहस्तपातभयतः समार्थिथन् ।
किल हस्तपातमकरोच्च पौरुषं
दलमत्र विस्मयमयाम चान्ततः ॥ ६२ ॥

समितेः समाप्तमधिवेशनं यदा
न विनिग्रहश्च समभूत्स कस्यचित् ।
वयमत्र विस्मयमगाम, निग्रहाः
क्वचनाभवन् नगरग्रामकेष्विमे ।। ६३ ।।

प्रतिवर्तनात्परमहं विहारतः
प्रतिबेदनं किमपि प्राचकाशिषम् ।
अवसानतोऽत्र घनदानमैरयं
प्रतिवेदने समलुलोचमेकतः ।। ६४ ।।

तदकर्मण्यतामिह विहारशासने
न ममाशयोऽभवदधीक्षकोत्सरे ।
खलु तेऽत्र संकटमयीं परिस्थितिं
प्रति सम्मुखीनतरतामवाप्नुवन् ।। ६५ ।।

न महीयसामपि मनांसि यत्र ता-
न्यवलम्बितुं तु प्रभवन्ति साहसम् ।
अतिकम्पनं त्वनुभवन्ति चान्तरे
ऽप्यनुताप एष समभूच्च शब्दतः ।। ६६ ।।

परमत्र जोषभरतो न्यवीविदं
यदि मुख्यशासकगणैरिहादितः ।
कियती स्वकार्यपरता प्रदर्शिता-
ह्यभविष्यदत्र च मृदादिवारणम् ।। ६७ ।।

वहुजीबजीवनमिहाभिरक्षितं
ह्यभविष्यदेव नहि तत्र संशयः ।
इह केवलेऽपि नगरे मुंगेरके
बहवोऽभवन् विगतजीवनास्तदा ।। ६८ ।।

इह सप्तवासरत्रयात्परं मया
स मृदादिपर्वतनिभोऽवलोकितः ।
निकटे जमालपुर एव भूयसां
रयलाध्वकर्मकृतिनामवस्थितिः ।। ६९ ।।

समयेऽत्र ते च सम एव योजिता
इह जीवतोऽवितुमलं बहूञ्जनान् ।
अपि द्वादशाद्दिवसतः परं यदा
किल जीवमानजनलब्धिरास्त सा ॥ ७० ॥

इह शासनेन धनसम्पदादिकं
ह्यभिरक्षितुं प्रवणता यथाश्रिता ।
न तथा तु जीवनरिरक्षिषार्पिता
नहि शासने नगरपालिकाः स्थिताः ॥ ७१ ॥

मम तत्समीक्षणमभून्नयास्पदं
मयि सम्मताश्च भुवि कम्पपीडिताः ।
उचितं भवेदनुचितं नु वा भवेत्
विहितं यथार्थहृदयेन तन्मया ॥ ७२ ॥

नहि शासने स्खलितरोपणार्थकं
तदभूत्समीक्षणमिहाशु नोदनम् ।
इह केनचिन्न खलु शासने धृताऽ-
करणे स्पृहा च करणान्निवर्तना ॥ ७३ ॥

इयमद्भुता त्वतिनिराशताकरी
स्थितिरागता च स्खलितानि चाभवन् ।
सविशेषणस्थितिवशात् क्षमास्पदं
विदितं च वन्दिभवने स्थितेन तत् ॥ ७४ ॥

कृतमत्र यत्किमपि तैः प्रशासकैः
क्षतिपूर्तये धरणिकम्पनात् परम् ।
अतिवेगतत्प्रवणतान्वितैश्च तै-
र्मम लेखतोऽतिरुषमादधज्जनाः ॥ ७५ ॥

त्वरितं दिनैः कतिपयैर्विहारिभिः
पुरुषैस्तु कैश्चन मदुत्तरात्मना ।
ब्रिटिशप्रशासनप्रशंसया समं
प्रविकाशितोऽत्र निजलेख एककः ॥ ७६ ॥

इह भूमिकम्पसमुपेतशासन-
प्रतिकारकर्म गमितं द्वितीयताम् ।
अपि तन्महत्त्वयुतमास्त लेखकः
कृतवान् समीक्षणमिहापि शासितुः ।। ७७ ।।

अत एव राजभजनव्रतैः प्रजा-
पुरुषैः समर्थनममुष्य तत्कृतम् ।
इह भारते प्रवितते प्रवर्तने-
तदिदं निदर्शनमभूत्समीक्षणम् ।। ७८ ।।

नहि शासनस्य किल दोषचिन्तनं
सहते प्रजा यदलिसाधु पश्चिमे ।
सहजञ्च मन्यत इहेति भारते
तु न रुच्यते तदपराधवत्पुनः ।। ७९ ।।

इति सैनिकी रुचिरियं समीक्षणं
सहते न या, ब्रिटिशशासने न सः ।
क्वचिदस्ति दोषलवलेश इत्यसौ
मनुते, तदुक्तिमपि राजद्रोहवत् ।। ८० ।।

इह चित्रमेतदवयन्ति शासना-
ऽसफलत्वमप्यथ च योग्यतेतरम् ।
यदि रोप्यते न शमकारणं तु तत्
सकठोरताऽकरुणताधिरोपणम् ।। ८१ ।।

इह शासनेऽकरुणताधिरोपणा-
दधिरोपको व्रजतु वन्दिकेतनम् ।
परमत्र शासनमिदं कृताभिवे-
शनमप्यमुत्र समुपेक्षते स्म तत् ।। ८२ ।।

अवसानतस्तदिह लब्धसत्त्वकं
किल साधुवादविषयं हि मन्यते ।
परमत्ययोग्यमिति दुर्बलं त्विति
वचनं तु भृत्यवदमुष्य मानहृत् ।। ८३ ।।

नहि मूलघातकृदयं कुठारको
जगदुद्धरे ब्रिटिशशासने पतेत् ।
इह शासकाः किल भवन्ति चाङ्गलाः
पुनरीशुधर्मवहपादरीसमाः ॥ ८४ ॥

सहते स ईशुमततो विरुद्धमा-
चरणाधिरोपमिह मूर्खतावशात् ।
सहते तु नैव जडताधिरोपणम्
प्रतिकुप्य हन्तुमयमुद्यतेत वै ॥ ८५ ॥

इदमस्ति विश्वसनमेषु सन्ततम्
बहुधा यदुच्यत इहादिसिद्धवत् ।
यदि भारतीयनियमेतिवर्तनात्
ब्रिटिशप्रभावशिथिलत्वमेति तत् ॥ ८६ ॥

उररीक्रियेत न ततो हि शासनं
भवतीह दूषितमिदं निरर्थकम् ।
इति तत्र विश्वसनमेतदास्थितं
कथयन्ति ते त्वतिविवेकिनो बुधाः ॥ ८७ ॥

प्रभवन्त्यमी सपदि चोग्रवादिनः
प्रगतेश्च पक्षपतनाद्विचारकाः ।
इह चेदृशा अकथयन् सुराज्यतो
भवति स्वराज्यमधमं तथा वृथा ॥ ८८ ॥

परमत्र भारतमिदं तु वर्त्मगं
यदि वाञ्छतीह भवितुं तदा भवेत् ।
नहि वेद्मि भारतदशां भविष्यति
ब्रिटिशप्रभावविषयेऽत्र येत्यहम् ॥ ८९ ॥

इदमत्र निर्भरमिमे स्थितिं नु का-
मुपयान्ति कोऽत्र भविताधिकारवान् ।
अतिरिक्तमेतदपि याति चिन्त्यताम्
भविता नु राष्ट्रियमथान्यराष्ट्रियम् ॥ ९० ॥

अथ चाङ्ग्लसाह्यजदशाप्रकल्पने
भविता हि पूर्वत इयं सुदुर्दशा।
अधुनातनैर्हि परिवेष्टिता भवे-
दिह दूषणैरथ च वञ्चिता गुणैः ॥ ६१ ॥

सुविधापुरस्सरमहं व्यवस्थितिं
त्वपरां प्रकल्प्य कथयामि शोभनाम्।
अपि लाभदामविरतं सुसम्भवाम्
इह सम्भवेद्बलयुजं न तन्त्रकम् ॥ ६२ ॥

न च शासने विधिरयं प्रदीपको
परमुद्गमो व्ययनमत्र च त्रिधा।
अपि संस्थितस्य च समुन्नतस्य तत्
सुनिदर्शनस्य च भजेत योग्यताम् ॥ ६३ ॥

इयमस्ति विश्वसितिरत्र सर्वतोः
सुखदं स्वराज्यमिदमस्ति सर्वथा।
न तु तत्सुराज्यमपि मेऽभिवाञ्छितं
भवति स्वराज्यपथबाधकं तु यत् ॥ ६४ ॥

अपि विश्वसिम्यहमिदं हि भारते
ब्रिटिशप्रशिष्टिरभवद्यथाप्यसौ।
परमद्य सा नहि सुराज्यदायिनी
भवितुं दधाति जनतासु योग्यताम् ॥ ६५ ॥

इति भारते तदुपयोगिताधुना
न मनागिहास्ति तदिदं मृशाम्यहम्।
यदि भारते समुचिता स्वतन्त्रता
भविता तदैव भविता सुराज्यता ॥ ६६ ॥

जनता समुन्नतदशा यथा भवेत्
इह संस्कृतेः प्रगतिरस्तु सर्वदा।
भयदं निरैतु दमनं त्विदं पुनः
स विदेशशिष्टिपरिणाम उद्भवेत् ॥ ६७ ॥

ब्रिटिशप्रशिष्टिरिह भारतीयया
जनसेवया सह यथेष्टकर्मकृत् ।
नहि भारतीयसकलानुप्रश्नकान्
दधते निरासयितुमप्ययोग्यताम् ।। ९८ ।।

अथ सा भविष्यगततत्समाधग्रे
सुतरामयोग्य-वितथोपयोगिनी ।
इह मूलभूतसमयेषु धारणा-
स्वतिदोषयुक्तमतिरेषिकास्ति यत् ।। ९९ ।।

दधते न साम्वयमिहाद्य सत्यतो
न चिरं स्थिरीभवितुमर्हतीह सा ।
तदपूर्णयोग्यमिह शासनं भवेत्
प्रपतत्समाजगतया व्यवस्थया ।। १०० ।।

निजप्रातिनिध्यवृतमस्ति तर्हि तत्
न चिरं यथेच्छकृतिकारि जीवति ।
इह च प्रयागसमितिर्धराप्रक-
म्पनसाह्यकृत् प्रतिनियोजयत्यसौ ।। १०१ ।।

यदहं प्रकम्पहतिपीडितस्थले-
ष्ववलोकयामि च सहायताविधीन् ।
विवृतिं पुरो न्यसितुमेव योजिता
चलितोऽस्मि चैकल इतो दिवानिशम् ।। १०२ ।।

दश वासरान् इह च तेषु पर्यटन्
किल नष्टभ्रष्टसकलाङ्गकस्थले ।
प्रचलामि पञ्चमकवादनात्प्रगे
निशि चार्धरात्रिसमये विरामभाक् ।। १०३ ।।

क्वचनैष दीर्णसरणौ च मत्तरिः
क्वचनोडुपाः समवतारयन्ति नः ।
परिभग्नसेतुविनिमग्नमार्गकेऽ-
प्यभितोऽथ खण्डितसुसद्मसध्यतः ।। १०४ ।।

विनतोन्नताऽवनि च तत्स्थले भ्रमन्
दनुजैरिवोन्मथितराजमार्गके ।
क्वचिदन्तराकलितहर्म्यभूमिके
जलमग्नपर्वतशिखाभभूस्थले ॥ १०५ ॥

सरणिस्थले भवनखण्डमापतत्
भवनस्थले च सलिलौघ आवहत् ।
सलिलस्थले गिरिसमुन्नतं गृहं
कृतमज्जनोद्गमनकेलिकौतुकम् ॥ १०६ ॥

क्वचनात्र दीर्घधरणीदरोद्गतैः
सिकताम्बुभिर्गिलितगृह्यमुद्धृतम् ।
अहरत्स्ववेगबलतो जनान्पशू
नभवच्च सञ्चितमिदं समस्थले ॥ १०७ ॥

इति भीतिविस्मयकरं च कौतुका-
वहदृश्यमाकलयमेव भीषणम् ॥ १०८ ॥

सविहारगोपवनसुश्रियां महान्
सुविहार एष उपसंहृतोऽभवत् ।
अलगद्धि सोद्वसितनष्टमुद्रया-
ङ्कित एष दूरसिकतासरोवृतः ॥ १०९ ॥

अतिदूरदीर्णहृदयो यथा व्यभाद्
अविशालज्वालमुखनिर्गताम्बुकः ।
इह वायुवानकृतयानकाङ्क्षका
अवदन्निदं समरदृश्यवत्परम् ॥ ११० ॥

इह पारसे यदनुदृष्टमास्त त-
स्विदमेकलं भयकरानुभूतिमत् ।
घटितं भवेदिति तदा ममान्वभा
दुपक्रान्तमादित इदं त्वितस्ततः ॥ १११ ॥

प्रजवेन येन पतिताः स्थिता जनाः
अध ऊर्ध्ववेगगतिमत्तदन्तरम् ।
सगडत्कृतिध्वनिरभूत्प्रतिध्वनि-
स्त्वदिशन् शतघ्न्य इव च ध्वनिं दिशः ।।११२ ।।

नभसि प्रयन्ति युगपद्विमानका
जलमुद्गतं त्वगणिताद्दूरादिव ।
इह गर्ततोऽपि सलिलस्य धारया
दशपादमूर्ध्वममगद्धरातलम् ।। ११३ ।।

इदमत्र च त्रिचतुरैः क्षणैः कृतम्,
अतिभीतिदं निमिषतां च चेतसि ।
प्रलयोऽयमागत इतीव कल्पनां
जनयन्स भूमिचलनक्रमोऽभवत् ।। ११४ ।।

नगरेषु सद्मपतनारवोऽभवत्
सलिलप्रवाहकलहातिभैरवः ।
रजसा प्लुतं सकलवायुमण्डलं
निकटस्थवस्त्वपि न तत्प्रतीयते ।। ११५ ।।

रजसां तथान प्रसरोऽस्ति ग्रामके-
ष्वत एव तत्र परिदृश्यते परम् ।
परमत्र शान्तिसहिता न दर्शका
इह जीवतामपि भयेन भूश्रयः ।। ११६ ।।

इह कोऽपि द्वादशशरद्वया बटु-
र्दशवासरान्तरमखन्यत श्वसन् ।
चकितः स चातिशयतस्त्रुटत्सुधा-
शकलेष्टिकाभिरयमास्त आवृतः ।। ११७ ।।

हृदि कल्पतेस्म स हि यज्जगत्तरो-
रयमेक एवमवशिष्यतेऽङ्कुरः ।
समये मुजफ्फरपुरेऽत्र कम्पने,
निपतत्सु सद्मसु भयातुरा जनाः ।। ११८ ।।

जनिता कयापि शिशुका परन्त्वमू
जनकौ क्रियेत किमितीत्यमुह्यताम् ।
तदुभावपि भ्रमितचित्ततां गतौ
मयका श्रुतं सजननी सुताऽविता ।। ११९ ।।

स्मृतिरस्य कम्पनपलस्य कन्यका
भुवि कम्पदेवि इति नाम संश्रिता ।
इह पर्यटंश्च नगरं मुँगेरकं
किल लक्ष्यमन्तिममिदं व्यधारयम् ।। १२० ।।

बहु पर्यटाम इह यावदागता
अवधि विहारविषयस्य चान्तिमम् ।
सूबहूनि वै हृदयदारकाण्यहो !
अवलोकितानि बत दृश्यकानि च ।। १२१ ।।

वयमत्र खण्डितगृहाणि ध्वंसिता-
नवलोकयाम इह यावदाश्रयान् ।
परमत्र सम्पदुपगं मुंगेरकं
त्वतिनष्टभ्रष्ट मनुवीक्ष्य भीतिदम् ।। १२२ ।।

अवरुध्यते स्म गतिरोच्छ्वसाश्वसी
हृदि वेपथुश्च बत जायते स्म नः ।
न हि विस्मरामि भयदायकं तु तद्
हृदयद्रवोपयिकमेष कर्हिचित् ।। १२३ ।।

इह भूमिकम्पविषयेषु सर्वतो
नगरेषु पर्यटितमत्र ग्रामके ।
उभयत्र वासिषु निजावलम्बना-
त्मकसत्त्वशून्यहृदयत्वमास्त तत् ।। १२४ ।।

नगरस्थ मध्यमदलेष्वभावमी-
दृशमस्य पश्यत इहाभवच्छुचा ।
प्रतिवीक्षते स्म सकलो जनः सहा-
यकभावमत्र जनतश्च शासनात् ।। १२५ ।।

प्रहितं समेत्य निजयत्नतोऽत्र नो
ध्रुवमुद्धरिष्यति सहायतां ददत् ।
इतरे सहायकतयागताश्च ये
मनसा दधुः प्रतिनिदेशनं नृणाम् ।। १२६ ।।

इति निःसहायमिव ते स्वमात्मना-
यदमन्वतेह तदपाकृतं चिरात् ।
गतसंशयं मनसि दुर्बलत्वकं
जनितं धराचलनतो बिनाशनम् ।। १२७ ।।

स विहारगादितरभागतोऽथवा
प्रतिदेशतश्च य इहागतो जनः ।
सहकारितां हृदि धृतां महौजसा
निजकार्यशक्तिमिह स त्वदर्शयत् ।। १२८ ।।

इति भूमिकम्पजनिताभिभूतितः
क्षततेजसां हतनृणामपेक्षया ।
सहकारिणां प्रयतनानि विस्मयं
जनयन्ति तत्र सहकार्यवर्गतः ।। १२९ ।।

नवयूथकानि युवकैर्नृनारिभि
विहितानि कार्यमदधुस्तथाद्भुतम् ।
अदधुश्च यं व्यदधुरत्र साग्रहाः
परिचारभाव इह विस्मयाय सः ।। १३० ।।

पृथगासते सकलसंघटा इमे
परमत्र तेऽनुसहयोगभावनाः ।
अपरस्परं प्रति कृतिष्वधारयन्
न पृथक्त्वमेषु किमपि प्रतीयते ।। १३१ ।।

कृतवानिहास्मि नगरे मुँगेरके
नवनाटकं कृतनिजावलम्बनम् ।
हृदि कुर्वतस्तदभवत्क्षणं त्रपा
परिणामसाफलिकयास्मि हर्षितः ।। १३२ ।।

सहकारिसंघटननेतृभिः समैः,
करनीतटोकरिलसत्कुदालकैः ।
खनितं दिनावधि शवाश्च निष्कृता
मयका तु तद्दिवस एव चागतम् ॥ १३३ ॥

खननं तदत्र चलितं महाजना-
स्तदकुर्वतेह फलितापुरस्सरम् ।
सहकारिसंस्थितिषु चात्र केन्द्रगा
सहकारिसंस्थितिरभूद् वरीयसी ॥ १३४ ॥

नृपपाकशासन (राजेन्द्र) इहास्त्यधीक्षको
भ्रमिता कांग्रसमयी प्रसारिता ।
झटिति प्रवर्धितदलानुदानदा-
मभवद्दलप्रतिनिधित्वधारिणाम् ॥ १३५ ॥

इति संस्थितिर्निखिलभारतीयता-
मगमत्तया सकलग्रामकांग्रसैः ।
सहकारितामियमवाप्तुमर्हति
प्रविहाय गुर्जरपदोत्तरापथे ॥ १३६ ॥

कतिचित्तु मण्डलपदान्यथाऽपृचन्
कृषकैनं कांग्रसजनास्तथाऽपृचन् ।
सुविहारकाङ्ग्रसजना यथाऽपृचन्
कृषकैः सहैवमथवा स्वयं त्विमे ॥ १३७ ॥

अयमस्ति मुख्यकृषकप्रदेशकः
किल भारते कृषकपृक्तमध्यमः ।
इह जातु मन्त्रिपदभाक्तु काङ्ग्रसे-
ऽहमुपागतो भ्रमितुमध्यवेक्षितुम् ॥ १३८ ॥

इह दृश्यमानकृतिहीनतां तथा
कृतिकोकसि प्रशिथिलां गतिञ्च ताम् ।
कटुभिः पदैः समलुलोचमेव तद्
यदि मे स्थितावुपविशन्ति चासने ॥ १३९ ॥

प्रतिशेरतेऽथ शयने स्वपन्त्यमी
इति नूनमुत्तरतरं भजन्त्यहो ।
नहि पूर्वकल्पमनुमोदयन्ति च
कृतिकौकसस्त्वतिशयेन दीनता ॥ १४० ॥

समपेक्षितानि न भवन्ति साधना-
न्यथ तैर्विनैव सकलं तदुह्यते ।
परमौकसः कटुकया समीक्षया
कृतयापि वेद्मि सकलप्रदेशतः ॥ १४१ ॥

अयमेव कांग्रसदृशास्य कर्मसू-
त्सहते कृतिप्रवणतां दधाति च ।
नहि चात्र बाह्यरमणीयता क्वचित्
स कृषीबलांस्तु सकलान्समाचिनोत् ॥ १४२ ॥

न विहारजा अखिलभारतीयके-
ष्वपि कांग्रसाधिविनिवेशनेष्वपि ।
क्वचनोग्रतां न च कदाचिदाश्रयन्
स्वमिहावलोक्य चकिता भवन्त्यमी ॥ १४३ ॥

परमत्र ते सविनये तु भङ्गके
परमं प्रभावजनकं निदर्शनम् ।
समदर्शयन्नुभयचारकेऽप्यमी
स्वगते विशेषकृतिमाश्रिताः शुभाम् ॥ १४४ ॥

सहकारिणी तु समितिः कृषीबलान्
उपगन्तुमेतदपि सुन्दरं सदः ।
समुपाश्रयत्परमलाभमाश्नुत
नहि साधनानि हि भवन्ति ग्रामके ॥ १४५ ॥

अपि शिष्टपक्षजनताभिपक्षतो-
ऽप्युपयोगितां दधति साधनानि यत् ।
नहि ग्रामकेषु सुलभानि तान्यहो !
समितिद्वयेऽपि नृपपाकशासनः ॥ १४६ ॥

समभूदधीक्षक इहैकनायकः
स कृषीबलेन सदृशोऽपि दृश्यते ।
स विहारभूमितनयः प्रभाववान्
प्रतिभाति निष्कपटनेत्रदर्शनात् ।। १४७ ।।

मुखमुद्रयापि स गभीरधीरया
भवतः स्मृते नयनमुद्रिके हिते ।
स यथार्थतापरिवृतो न संशये
पतितुमर्हतीह क्वचनापि कस्यचित् ।। १४८ ।।

कृषकस्वभाववशतः स सीमितं
दधतेऽत्र दृष्टिविषयं हि कञ्चन ।
नवलप्रकाशदृशि सोऽनुभूयते
सरलश्च साधुरिति तस्य योग्यता ।। १४९ ।।

ज्वलतीव निष्कपटतापि शुद्धिभृत्,
कृतिशक्तिरस्य वहति स्वतन्त्रताम् ।
प्रतिभान्ति सद्गुणगणा इह प्रिया
न विहारकेऽपि तु समस्तभारते ।। १५० ।।

इह सर्वमान्यमधि नायकत्वकं
नृपपाकशासनबुधेन चार्जितम् ।
नहि तादृशं क्वचन केनचिच्छ्रुतं
त्वतिरिक्तमस्य न हि कस्यचिद्वचः ।। १५१ ।।

जनता श्रृणोति नहि गान्धिमन्तरा
ऽप्यनुयाति वेति विरलोऽस्ति तत्समः ।
मस्ति सौभगमहो विहारके
नृपपाकशासनसमोऽस्ति नायकः ।। १५२ ।।

स सहायतासमितिमध्यवेक्षते
वहति विश्वसितिमत्र वै जनाः ।
अथ तत्र चागमनतः पुरैव वा
मम गान्धिभाषणमधीत्य वेदना ।। १५३ ।।

समभूदतीव लिखितं हि तेन यत्
अस्पृश्यतादुरितमेतदाफलत् ।
इह भूमिकम्पफलमस्ति दण्डनं
अभवन्मतिभ्रमकरं हि भाषणम् ॥ १५४ ॥

स रवीन्द्रठाकुर इहोत्तरं त्वदात्
मम सम्मतं तदभवत्समन्ततः ।
कृतवांश्च स्वागतममुष्य हार्दिकं
न विजानतां भवति तादृशं मतम् ॥ १५५ ॥

विज्ञानमीदृशविचारणासु तद्
नहि निर्णयात्मकतया प्रकाशयेत् ।
प्रकृतौ मनोगतविचारवृत्तयः
प्रभवन्ति तादृशप्रभावमासितुम् ॥ १५६ ॥

स्वमनोहृतिः परिणमेदजीर्णता
दिषु कस्यचित्कुहचनेति सम्भवः ।
परमत्र काचन प्रथापि मानवी
प्रकृतिप्रकोपपरिणामिनी स्थिता ॥ १५७ ॥

इति विस्मयं जनयतीह मानसे
दुरितं तथेश्वररुषेति धारणा ।
मनुजस्थितेश्च भुवनेषु भावना
इति नो नयन्ति शतवर्षपृष्ठतः ॥ १५८ ॥

स युरोपगोऽप्यभवदेव धार्मिक-
ब्रुवमानवैस्तु विहितो व्यतिक्रमः ।
इह जोर्डनोब्रुन इह स्म दह्यते-
ऽप्यथ डाकिनीशतमरोपि शूलके ॥ १५९ ॥

विगते शताब्द इह पादरीगणै-
रमरीकनैरपि तथा प्रकाशितम् ।
मयसाचुसेट्सगतभूमिकम्पने
तद्धितः प्रपातमवरोद्धमत्र यत् ॥ १६० ॥

भुवि स्थाणुरोपणमिहास्ति कारितम्
अपवित्रतैव तदमुष्य कारणम् ।
यदि भूमिकम्प इह पापहेतुकः
परमेश्वरेण कृतदण्डदानतः ॥ १६१ ॥

कथमत्र नाम मनुजा विजानतां
इह दण्ड एष कतमस्य कर्मणः ।
बहुपापदण्ड इह भोजनीयके
प्रतिमानवः स्वरुचिहेतुमावदेत् ॥ १६२ ॥

परतन्त्रतेयमिह नो विदेशिनां
प्रभुतोररीकरणपापजं फलम् ।
उचितेतरां किल समाजपद्धतिं
सहते जनोऽथ दयनीयतास्थितिम् ॥ १६३ ॥

अथ चार्थिकी दृगिह वक्ति कारणं
दरभङ्गभूपतिकृताधिकारिता ।
महतीषु भौतिकविभूतिषु स्वयं
महतीं स हानिमिह सोढवान् यतः ॥ १६४ ॥

इति वक्तुमेतदपि शक्यते मया
यदिहावनीपविषया स्थिता प्रथा ।
इह भूमिकम्पननिदानमस्ति से-
त्यवधारणा सकलधारणाद्वरम् ॥ १६५ ॥

वरमेतदस्ति तदपेक्षया हि यत्
सुविहारवासिजनता ह्यदूषणा ।
अपि दाक्षिणात्यविहितादपृच्यता-
त्मकपापतो धरणिकम्पयोगिनी ॥ १६६ ॥

अथ कम्प एष जनपापहेतुकः
किमु नांगतोऽभ्रमिति पृच्छ्यते यदि ।
ब्रिटिशास्तु भङ्गमिह कारणं महत्
प्रतिशक्नुवन्ति वदितुं विहारिणाम् ॥ १६७ ॥

निजतन्त्रतासमर एष मुख्यतां
धृतवान् विहार इह चोत्तरोऽधिकम् ।
महतीह हानिरभवत्किलास्य तद्
बहुकल्पना इह वयं विदध्महे ॥ १६८ ॥

परमात्मनः कृतिषु वा निदेशने-
ष्विह हस्तपातमपि कुर्महे कथम् ।
वयमत्र चात्मनि भजेम विस्मयं
कथमेष पर्यहसदीदृशं खरम् ॥ १६९ ॥

कृतवान् स नः स्खलितकात्मनः पुरा
परितोऽतनोच्च विवराणि वागुराः ।
कठिनञ्च दुःखमयमासृजज्जगत्
पुनरेष दण्डमपि नस्तनोति यत् ॥ १७० ॥

इह तारकाणि किरणान् समाकिरन्
गगनाच्च विन्दव इमेऽपतन् भुवि ।
कृतिमीदृशीं प्रतिविलोक्य सस्मितं
किल मेषवत्सरचनोऽसृजद्धरिम् ॥ १७१ ॥

इह पत्तने निवसतान्तिमां निशां
सुचिरं सुहृद्भिरलपं सहायकैः ।
विविधप्रदेशत इमे सहायतां
परिचर्यया सह विधातुमागताः ॥ १७२ ॥

इह युक्तजानपदतः समागता
निचिताश्च केचिदिह नः कृतिङ्कराः ।
वयमत्र चिन्तयितुमास्थिताः किय-
त्सहकारमेषु विदधाम सार्तिषु ॥ १७३ ॥

इयता प्रयोजनवशेन दूरिता
नृपनीतिकार्यगणतो भवेम च ।
सहकारितातिकठिनाऽभवच्च सा-
ऽत्र निरन्तरत्वमधुनाप्यपेक्षते ॥ १७४ ॥

नहि सावकाशकतयैव कार्यकृत्
समपेक्षितां वितनुयात् सहायताम् ।
इह व्यापृतेन सुचिरं क्रियात्मके
नृपनैतिकेऽपि विषये तटस्थता ।। १७५ ।।

अवलम्ब्यतामिति किलास्त्यपेक्षितं
ह्यनुपस्थितिस्त्विह त्रुटिं जनिष्यति ।
बहवोऽभवन् प्रतिप्रदेशतो जनाः
समुपेत्य कार्यकरणास्तु ते मिताः ।। १७६ ।।

न हि तेऽवकाशमधिगन्तुमर्हतां
दधते स्मपीडितसहायताहिते ।
अनुरोधमादधत नावहेलना-
मिति नास्मि केवलसहायतापरः ।। १७७ ।।

अहमन्वभूवमिह नो भविष्यति
क्षतिरत्र सन्ति बहवो हि कर्मठाः ।
क्वचनातिभीतिकरकार्यकेष्वथा-
धिकदक्षपूरुषमितिस्तु चिन्त्यते ।। १७८ ।।

इति रात्रिमेव सकलां तु चिन्तया
व्यतियापयाम इह यावदन्ततः ।
स्मृतिमागतं यदभवन् स्वतन्त्रता-
दिवसे विनिग्रहमिताः परे जनाः ।। १९९ ।।

न वयं, तदा त्वभिहितं प्रहासतो
मयका स्वरक्षणरहस्यमाश्रितम् ।
अहमागतो गृहमिह श्रमक्लमैः
परिवीत एष विकटीकृतोऽस्मि तैः ।। १८० ।।

परिवारगाः समवलोक्य मां तदा
चकिता मया तु सहकारितां प्रति ।
विवृतेर्विलेखनमुपक्रमात्परम्
मनसेप्सितं, विवशितोऽस्मि निद्रया ।। १८१ ।।

इह यापितं तु दिवसार्धमन्यदा
कमला मया सह निपीतचायका ।
स्थिवत्यभूदुपगतश्च टण्डनः
पुरुषोत्तमो वयमलिन्दके स्थिताः ।। १८२ ।।

समुपागता तु सहसैकमृत्तरिः
पुरुषाधिकार्यवतरत्यतः पुरा ।
समयो ममागत इति त्वकल्पयं
स्ववदञ्च तं त्वमसि नः प्रतीक्षितः ।। १८३ ।।

स क्षमामिवार्थयति च स्म भाषते-
न हि सोऽपराध्यति दलं निदेशकम् ।
कलिकेतनादुपगतस्तदाऽस्म्यहं
किल पाञ्चमासिकविमुक्तिमाभजम् ।। १८४ ।।

पुनरद्य सोऽस्मि रहसि स्थितिं मिषन्
न विनिग्रहो मम कदापि दुःखदः ।
स तु दुःखदो भवति मत्कुटुम्बके
मम रुग्णमातृ-भगिनी-कलत्रके ।। १८५ ।।

शत्यां वै पञ्चविंश्यामिह लिखितमभूद्येन जन्माथ कर्म
बुद्धस्यागात्प्रकाशं प्रथममुपहृतं संश्रितं गोर्जरीं गाम् ।
तेनैवास्मिन् प्रक्लृप्ते महति चरितके ऽनेकवृत्तैरुपेते
ऽष्टापञ्चाशस्तु सर्गोऽवसितिमुपगतो हन्त नैराश्यसंज्ञः ।।

अलीपुरवन्दिगृहम्

वासन्ती

एकोनषष्टः सर्गः

एतावद्दूरं बत सहसा नीत्वा क्षिप्तोऽहम्
इत्थं सङ्क्ष्येयं कियदिह दैवीवीचीभिः।
नेष्यन्ते क्वान्दोलनगुणसूत्राण्याकृष्य
प्राकाश्यं नेक्षे क्व नु लगिता पारे नौका॥ १॥

तस्यां रात्रौ कालिनिषदने तैरानीतोऽहम्
हाब्डा स्थानात्कृष्णशकटमारोप्य स्थानम्।
तन्मुख्यागारे बहु पठितं प्रख्याते यत्पूर्वं
तस्मात्तत्स्थानं त्वलगमहं प्रीत्या द्रष्टुम्॥ २॥

तत्राङ्ग्लास्ते बहुगणना वीक्षाधीशा
यावन्तो नान्यत्र क्वचन संस्थाने तेषाम्।
तत्रत्याः सर्वेऽपि च पुरुषा युक्तप्रान्तात्
बैहारात्प्रान्ताद्वात्र सममिलन् प्रायःपूर्वात्॥ ३॥

न्यायागाराद् बन्दिगृहमहं यातायाते
पौरुष्याऽकार्षं तु सकरियाकारागारम्।
प्रत्येकस्मिन्नेतदवसरे ते मत्सङ्गे-
ऽन्तर्विष्टा यान्ति स्म च पुरुषा दुःखापूर्णाः॥ ४॥

पौरुष्ये पारुष्यमधिकमित्यारोचन्त
स्पष्टं चैते मय्यनुभवमादध्युस्तुल्यम्।
अद्राक्षं तन्नेत्रसलिलमुद्भूतं तत्रा-
न्तस्तस्ते संवेदनवदतिरोऽभूवन्नार्ताः॥ ५॥

प्रेसीडेन्सीबन्दिभवनतो नीतोऽहं तैः
मुख्यप्रेसीडेंसिनयपतेर्न्यायागारम्।
न्यायागारोऽयं मम नवलज्ञानं दद्यात्
तत्कक्षं तत्सद्म च नवप्राचीरं दुर्गम्॥ ६॥

वाक्कीलान्वा पत्रप्रतिनिधीनेवाद्राक्षं
तस्मिन् नान्य: कश्चन लभते स्मावेशन्तम् ।
आसन् संख्यातीतपुरुषकास्ते तत्रानीता:
नायं मह्यं चास्त विहित एतावानारम्भ: ॥ ७ ॥

तत्रत्योऽयं शाश्वतनियमो न्याय्ये कक्षे
गन्तुं यत्कक्षान्तरसरणिं दीर्घां यायाम् ।
तस्या ऊर्ध्वं चोभयत इहाछन्नं जालै:
रुद्धः पक्षी पञ्जरजठरे भ्राम्यन्नासम् ॥ ८ ॥

न्यायाधीशाद्दूरमभवदारोप्यास्थान-
मापूर्णं कक्षं नृपपुरुषैर्वाक्कीलैश्च ।
न्यायागारीयै: पुनरभियोगैर्युक्तोऽहं
कारागारे चापि समभवन्नेके पूर्वम् ॥ ९ ॥

किन्त्वासन् सर्वेष्ववसरकेष्वेष्वस्माभि:
साकं मित्राणां परिचितबन्धूनां केचित् ।
तत्रत्यं वातावरणमभून्मह्यं सह्यं
गौणं रूपञ्चात्र पुरुषवर्गस्याप्यासीत् ॥ १० ॥

दृश्यं नासीत्पञ्जरसदृशं वा किञ्चि-
दत्रान्यत्सर्वे ह्यपरिचिता: पूर्वाकारा: ।
दृश्यन्ते सर्वास्वपि किल दिक्ष्वत्राप्येते
नास्मिन्साम्यं तेषु मयि च किञ्चिद् दृश्येत ॥ ११ ॥

एतन्नैवारोचेत च बहुशो वाक्कीलानां
वृन्दे वाप्येषां कञ्चुकवृतगात्राणां मह्यम् ।
न्यायागारे वै नृपपुरुषाणां वाक्कीला
दृश्यन्तेऽवश्यं त्वनभिमतास्तेषु त्वेक: ॥ १२ ॥

ज्ञातो विज्ञात: समभिलदत्रान्तर्यूथे
सोऽप्यासीत्सम्पृक्तशितिपटो भूयोऽलभ्य: ।
आरम्भात्पूर्वं किल मदभियोगस्याहं तद्-
बाह्ये वै वातायननिकटेऽस्थामासीन: ॥ १३ ॥

तर्ह्यप्येकाकित्वविहितशून्यत्वं मेऽभात्
तीव्रा स्यान्नाडीगतिरिह चावश्यं सेयम् ।
चित्तं मे शान्तं न खलु यथापूर्वं चेदं
तर्ह्यायाद् ध्यानं मयि वहुधा भुक्ताभोगे ।। १४ ।।

अप्येष प्राभूदयमिह देशः कालो वा
नानादोषारोपविहितदण्डे यर्ह्येवम् ।
तर्ह्येषां यूनामनुभवहीनानां भूयो
भूयात्कावस्था सपदि परिस्थित्यामीदृश्याम् ।। १५ ।।

काष्ठास्थाने किञ्चिदभवदेतन्मे शान्तं
न स्पष्टत्वं किञ्चन च यथापूर्वं क्लृप्तम् ।
एकं व्याख्यानं लघु लिखितं तत्राध्यैषि
ह्यन्येद्युर्वै षोडशफरवर्यां विज्ञातम् ।। १६ ।।

वर्षद्वन्द्वं वन्दिभवनवासो मे दण्डो
न्यायागारे निश्चित इति तच्चित्तेऽकार्षम् ।
आस्ते वारः सप्तम इह मे कारागारे
वासस्यायं नास्त्यवसर एतस्मिंश्चिन्ता ।। १७ ।।

अस्मात्प्राक्सार्धानिह बहिर्मासान् पञ्चा-
हं स्वातन्त्र्यस्यावसरमवाप्तः सन्तोषम् ।
कञ्चिच्चाविन्दं, समलगमस्मिन् काले च
कार्येष्वावश्येष्वाप्नुवमुपसंहारानन्दम् ।। १८ ।।

रोगो मातुः प्रत्ययित इतीदानीं स्वस्था
शङ्कातो बाह्याऽभवदथ कृष्णोद्वाहोऽपि ।
मत्पुत्र्याश्चाधीतिगतिरपि प्रक्रान्ताभूत्
गार्हस्थ्यस्वास्थ्यस्य च विहितोऽभूदाबन्धः ।। १९ ।।

आर्थिक्योऽप्यासन् सपदि समस्या निष्पन्नाः
गृह्याश्चान्ते ये बहुसमयात्प्रश्ना आसन् ।
वेद्म्यस्मिन्नानेहसि तु समाधातुं शक्या-
आसंस्ते, ये सावजनिकतां बिभ्राणा नः ।। २० ।।

कांग्रेसीयां शक्तिमिह दृढीकृत्यावश्यं
सार्थिक्यां सामाजिकदिशि वृत्ति वोद्बोध्य ।
मार्गे तस्यागामिनि गमने साहाय्यं तत्
दत्तं गान्धौ पत्रलिखितिमाकार्षं काञ्चित् ।। २१ ।।

वार्तापत्रेषु प्रहितवतस्तांस्तांल्लेखान्
देशावस्थाया अपि परिवृत्तौ वै हेतून् ।
मल्लेखास्तेऽकुर्वत कमपि प्राग्भावं तं
देशव्याप्ते तत्र मतविभेदे स्वल्पत्वम् ।। २२ ।।

वर्षद्वन्द्वानन्तरमहमापश्यं गान्धिम्
सार्थीस्तान् मित्राणि च दयितान्यस्मिन् काले ।
कस्मैचित्कालाय च हृदये कार्यं कर्तुं
शक्ति चैवोपार्जिषमिह मस्तिष्के युक्तिम् ।। २३ ।।

चित्तं ये किन्तु व्यथयितुमासीदेको यः
स त्वासीद् व्याधिः किल कमलाया मत्पत्न्याः ।
गाम्भीर्यं तस्य त्वविदमहं तावन्नेदं
तस्या ह्येषाऽभूत्प्रकृतिरियं यावच्छय्याम् ।। २४ ।।

नारोहेत्तावन्नहि गृहकार्ये ध्यानं सा
मुञ्चेदित्यस्या रुजमवधातुं को यत्यात् ।
सा तत्कष्टं विस्मर्तुमयतत त्वाशाऽऽसीत्
कारागारं यातवति चिकित्सां सा कुर्यात् ।। २५ ।।

एषा मत्पार्श्वेऽधिकसमयं स्थातुं वाञ्छा
तां स्वोपेक्षायै किल विवशीकुर्यान्नित्यम् ।
एकं चान्यद् दुःखमभवदेतद्यद्ग्रामान्
द्रष्टुं यातो नास्मि सकृदपीह प्रायागात् ।। २६ ।।

मत्सार्था नैके नवयुवका अस्मन्नीत्या
कार्यं कुर्वाणा ग्रहणमिह प्राप्ता आसन् ।
तत्र ग्रामाणां कुशलमनारोग्यं च प्रष्टुं
नो यातोऽत्यावश्यकमवलोके वै कर्तुम् ।। २७ ।।

तन्मेऽथो कार्तघ्न्यवदननुरोधाभं वाऽभात्
कृष्णा चैग्रा मूत्तरिरिह मां कारागारे ।
कृष्ट्वा यत्वानाययदसमर्थं कर्तव्य-
द्वन्द्वे वा मग्नं पथि वहवः फौजीया दृष्टाः ॥ २८ ॥

ते फौजीया राजपुरुषा फौजीशस्त्रैः
फौजीयां स्वाँमूत्तरिमथ चान्यत्फौजीयम् ।
नीत्वा भ्राम्यन्तो नयनपथं नीता रन्ध्रात्
स्वारूढाया बद्धशकटिकाया एकस्मात् ॥ ३० ॥

ध्यातं फौजीयाश्च शकटिका भद्राकाराः
टङ्काश्चैवैते कियदिति तान् दृष्ट्वा स्मृत्याम् ।
आरूढाः प्राच्या अजगरदानव्याद्यास्ते
ये स्वाकारेणैव तु जनयन्ति स्माशङ्काम् ॥ ३१ ॥

प्रैसीडेन्सीवन्दिसदनतः केन्द्रीये
कारागारे तैरलिपुरवर्तिन्यानीतः ।
अस्मिन्नेका मे दशपददीर्घोनायामा
कोष्ठी च प्रादीयत लघुकाऽऽवासाद्यर्थम् ॥ ३२ ॥

अस्या अग्रेऽलिन्दसहितमारिक्तस्थानं
तत्किञ्चिच्चासीद्भित्तिभिरभितो लघ्वीभिः ।
तस्यामूर्ध्वाद् भालयत इदं चित्रं दृश्यं
दृष्टं दुःशैलीकभवनजातं गोलाकारम् ॥ ३३ ॥

किञ्चित्तस्मिन्नास्त किल चतुष्कोणं नीचम्
एकाभिर्भूमीभिरथ छदीभिश्चित्राभिः ।
अन्योन्योपर्यासत कतिचिद्दृष्टान्येता
न्येकैकं भूकोणमिव वरीतुं क्लृप्तानि ॥ ३४ ॥

वास्तूनां सृष्टिः क्रमरहिता नीडाभाऽभा-
दष्टव्यूहस्येव किल भविष्यज्ञात्युक्तिः ।
उक्तोऽहं सृष्टिः किल सकला शिल्पाढ्येयं
मध्ये यूपाकारमिदमिहास्तीत्यचौकः ॥ ३५ ॥

तद् वन्दीसूपासकजनपूजास्थानं यत्
सर्वाष्वेवास्तेऽत्र परिवृतं दिक्षु प्रासादैः ।
कारागारे वै नगरहृदि स्थाप्यं स्वल्पायां
भूमावस्यां किञ्चन न लघु स्थानं त्याज्यम् ॥ ३६ ॥

अस्माद्भद्रा दृश्यत इदमक्ष्णोर्युग्मं
यावद् व्यावृत्तं तदवसरेऽन्यद् दृश्यं तत् ।
दृङ्मार्गेऽभ्येतं किल मम किञ्चिद्दुर्दृश्यं
दीपीद्वन्द्वं कृष्णमविरतं निर्यद्धूमम् ॥ ३७ ॥

वातद्वारा यत्सविधमिदं प्रापय्यान्तः
श्वासारोधं मे यदकुरुताद्धन्तासह्यम् ।
दीप्यौ कारागाररसवतीगेहेऽभूतां
तस्मादात्मानं त्ववितुमवोचं चाध्यक्षम् ॥ ३८ ॥

आरम्भो नायं शुभ इति तस्याशा नाग्रे
ऽप्यासीत्कारा सालिपुरगता दीप्यौ धूमाढ्यै ।
कृष्णं धूमं पाययत इयं रुद्धश्वासं
शून्ये नासीदत्र तरुरथो वा पत्राद्यम् ॥ ३९ ॥

आसीत्कारागारमिदमहो पाषाणैः सृष्टम्
धूमाभ्यक्तत्वात्तु तदभवद्धोरं चाभद्रम् ।
तस्मात्पार्श्वस्थद्वितरुशिरःशाखे दृश्ये
मय्यत्रायाते तु विटपिनौ भृशमुद्भूतौ ॥ ४० ॥

मन्दं मन्दं काचन परिवृत्तिस्तत्राभूत्
शाखासूद्भूता हरितिमहार्यङ्कुरा यत् ।
तेषूत्पन्नानीह किसलयान्येतैः संवृद्धैः
स्वल्पे चैवानेहसि हरितीभूताः शाखाः ॥ ४१ ॥

अत्यन्तं हर्षं मम परिवृत्तिः सा प्रादात्
कारागारञ्चैतदपि च जातं श्रीकान्तम् ।
एकस्मिन्वृक्षे च कुररनीडं तत्राभूत्
तस्मिंश्चोत्पन्ना मम रुचिरित्यालोके तत् ॥ ४२ ॥

एकस्मिन् घस्रे लघु लघु डिम्भांस्तान् क्रौञ्च्या:
घुष्टानापश्यं स्वपितृकलाशिक्षाजुष्टान् ।
ते जात्वाश्चर्यं स्म जनयन्त्याचातुर्या
रोटीमाच्छिद्याशितृकरत: खे लीयन्ते ।। ४३ ।।

सायं सन्ध्यात: प्रतिदिवसं प्रात: सन्ध्यां
यावत्कोष्ठ्यां बद्धकरपद: संरुद्धोऽहम् ।
हेमन्ते दीर्घामिह रजनीम् क्लिष्टोऽनैषम्
होरा अभ्यस्यैष समचरं श्रान्तोऽस्वाप्सम् ।। ४४ ।।

तिर्यग्दर्शिक्षेत्रगृहगतो भ्राम्यन्नृक्ष:
कोष्ठयामस्यां पर्यटनकृत: स्मृत्याऽऽनीत: ।
भूयस्तूद्विग्नोऽहमकरवं तां शीर्षास्यां
रात्रेर्याम: पूर्वं इह सदा शान्तो भात: ।। ४५ ।।

विद्युद्यानाद्या नगरगता रावानाकुर्वन्
ते संगीतध्वानमिलिततां प्राप्यागच्छन् ।
दूरादायद्ध्वानमिदमहो मन्दं सान्द्रं
कर्णौ ध्वानै: कर्षति मधुरैश्च चेतोऽपीदम् ।। ४६ ।।

किन्त्वासीदारामलव इहास्यां शान्तायां
रात्रौ कैश्चिन्न प्रहरिजनानामाक्रोशै: ।
होरान्तेषु प्रायश इयमासीत्सा वीक्षा
काचान्तर्दीपाद्यधिकृतिमानायाति स्म ।। ४७ ।।

कश्चिद् बन्दी प्लायित इह मा भूदित्याद्या
शङ्का निद्राभङ्गमकुरुतैषामेते न: ।
रात्रावन्त्याद्यामत इहते पूर्वं पूर्णः
त्वाक्रन्दं कूर्वन्ति कलकलं पात्राघर्षैः ।। ४८ ।।

तस्मिन् काले तत्र रसवतीकार्यारम्भ:
प्रेसीडेंसीवन्दिगृह इवानल्पा आसन् ।
अत्राध्यक्षास्ते प्रहरिण आलेखाकारा:
काराद्वन्द्वे चास्त हि गणनासाम्यं नैन्याम् ।। ४९ ।।

संख्या तावत्कार्यंकरदलेऽतिद्वैगुण्या
एतस्मिन्नाङ्गला अधिकृतिनोऽधिष्ठातारः ।
विश्रान्तेर्वृत्तिं ह्युपलभमाना अध्यासन्
येनेदं स्पष्टं च भवति यद्युक्तप्रान्तात् ।। ५० ।।

वङ्गेष्वाङ्गलानामति कठिना शिष्टिः सासी-
दायाते माहात्म्यवदधिकारिण्याकार्यः
सर्वैरत्रत्यैरिह जयकारो वा नादः
साम्राज्यस्यैतत्परिचितचिह्नं वा स्मार्यम् ।। ५१ ।।

नादोऽयं चासीन्नृपतिनमस्काराकारो
हस्तोद्धृत्या च प्लुतबहुलः सर्वैः कार्यः ।
मत्कोष्ठयाश्चैवाङ्गणवृत्तिभित्तेर्बन्द्युक्तो
भूयो भूयः श्रोतुमयमहो शक्योऽभून्नः ।। ५२ ।।

तस्या भित्तेरूर्ध्वंत इह तद्राजच्छत्र-
मूर्धाद्रष्टुं शक्य इह तदासीद्यच्छायायाम् ।
कारागाराध्यक्ष उपगतो वीक्षां कर्तुम्
आश्चर्ये मग्नो व्यमृशमहं यन्नादोऽयं किम् ।। ५३ ।।

प्राचीनव्याहारसदृश आस्ते सच्चेष्टः
यद्वाऽङ्गलः कश्चिद् व्यरचयदेतश्चेतस्तः ।
नो जाने मन्ये च मनसि तं त्वाविष्कारम्
गन्धो ह्यस्मिन् आङ्ग्लभरतभूजातस्यैव ।। ५४ ।।

सौभाग्यान्नादव्यवहृतिरेनां बङ्गासाम्ये
प्रान्तावेवोरीकुरुत इमौ नान्यः कश्चित् ।
अस्तित्वं शिष्टयाभिमत प्रतिष्ठां रक्षद्भि-
र्या शैलीयं स्वीकृतविहिता साऽश्लीलाऽऽसीत् ।।५५।।

कारागारेलीपुरविगते दृष्ट्वैकं मे
हर्षोऽभूत्साधारणजनबन्द्याहारोऽस्मिन् ।
युक्तप्रान्ताहारत इह यच्छ्रेयानासीत्
कारागाराहारचरमितो युक्तप्रान्तः ।। ५६ ।।

तूर्णं चातीतः शरदृतुरुद्यद्धेमन्तः
धावन् निर्याति सुखप वसन्तः खेदान्तः
ग्रीष्मर्तुश्चायात इह स वृद्धि या तृष्मा
कालीकेतस्याम्बुमरुदुभौ नो रोचेते ॥ ५७ ॥

कश्चिममान्वास इमहार्षीत्तेज
श्चोत्सहि कारागृहमधिकं तस्मादुशम् ।
कालो व्येति स्मैति न मम सात्धंस्वा स्थ्यम्
व्यायामार्थं स्यास्यभवकाशा भावोऽपि ॥ ५८ ॥

न्यूनत्वं यांति स्म मम गुरुत्वं तद्वेगात्
विष्कम्भेभ्येश्चदखनिका भ्सोनिचिभ्यः ।
ग्लानिश्चित्तेऽजायत च शलाकाभ्योऽप्यन्तः
मासान्ते प्राप्तोऽङ्क्षणवयिस्या मोमे ॥ ५९ ॥

व्यायामार्थं सोऽलमभवत्सौविध्येन
चित्ते चेवारोचत परिवृत्तिर्नूनं सा ।
प्रातः सायं वन्दिभवनभित्तेराधारात्
पर्याटम् वाताम्बुसहनमासीदत्रत्यम् ॥ ६० ॥

धूर्तैर्वा कोलाहलकलहैर्युक्ता चापीयं
सोढुं शक्याऽभूच्च रसवती दोषैः सार्धम् ।
अस्मिम्काले मे नवलसमस्या उत्थानं
चाकुर्वन् वैवक्ष्यमभिनवं बाह्यं वृत्तम् ॥ ६१ ॥

वाल्मीकीयं तु रामायणमधिकृतवान् पाठसंशोधनं योः
श्रित्वा बाङ्क्लींलिपिं तां वटपदनगरे प्राच्यविद्या निकेते ।
तेनैवास्मिन्प्रक्लृप्ते भरतवसुधया स्वावशीप्राप्तिवृत्ता-
धारे काव्ये गतोऽयं विरतिमिह शनैरूनषष्टस्तु सर्गः ।

प्राच्यां प्रतीच्यां च प्रजातन्त्रम्

स्रग्विणी

षष्टितमः सर्गः

ज्ञातवान् वन्दिगेहे यदालीपुरे
स्यात्समाचारपत्रं न लभ्यं मया ।
जातमाश्चर्यमेतेन मेऽन्तर्महत्
यावता चाभियोगोऽचलत्तावता ॥ १ ॥

कालिकाताप्रकाश्यं तु तद्दैनिकं
स्टेट्समैनेति संज्ञं मयाऽलभ्यत ।
संस्थिते चाभियोगेऽपरस्माद्दिनात्
तन्निरुद्धं परन्तूत्तरप्रान्तके ॥ २ ॥

आदिमश्रेणिकानां कृते वन्दिनां
शासनस्वीकृतं दैनिकं दीयते ।
अस्ति सोऽयं विधिर्वै प्रदेशान्तरे
पूर्वमासं किलास्मिन्विचारे स्थितः ॥ ३ ॥

स्यादयं बङ्गदेशेऽपि तुल्यो विधिः
किन्तु नो दैनिकं मेऽत्र तद्दीयते ।
किन्तु साप्ताहिकं स्टेट्समैनाभिधं
पत्रमासादयं तत्किलाङ्ग्लार्थकम् ॥ ४ ॥

भारते शासनं वाणिजीं वाऽऽस्थिताः
आङ्ग्लदेशं पुनर्ये त्वलङ्कुर्वते ।
तत्कृते पत्रमेतत्समाचारतः
सारमादाय मुद्रापणं नीयते ॥ ६ ॥

शासनस्येष्ट एवात्र सारः स्मृतो
नात्र वैदेशिकं वृत्तमाधीयते ।
क्षोभमुत्पादयत्येतदेवंविधं
तत्क्रमाज्ज्ञातुमिच्छामि वैदेशिकम् ॥ ७ ॥

तत्र सौभाग्यतः प्राप्तमासीन्मया-
ऽन्यच्च मैन्चेसटर् गार्जियन्नामकम् ।
येन राष्ट्रान्तरीयञ्च यूरोपगं
ज्ञेयवृत्तं मया ज्ञायते स्माखिलम् ॥ ८ ॥

संयतः फर्वरीमध्यतोऽहं यदा
सोऽभियोगस्ततश्चालितोऽभून्मयि ।
तर्हि यूरोपमध्ये महत्येव का-
प्यस्तता व्यस्तताऽभूत्तथोपद्रवः ॥ ९ ॥

पारसीकेऽपि जातो महोपप्लवो
यत्र फासिष्टवर्गोऽकरोद्विप्लवान् ।
यैश्च तत्राहितं राष्ट्रियं शासनं
चास्ट्रिया चांस्लरो डालफस् नामकः ॥ १० ॥

स श्रमाजीविवर्गेषु ता गोलिका
वर्षयंल्लोकतन्त्रं तु सामाजिकम् ।
रम्यहर्म्याभमध्वंसयद्यत्र त-
ञ्चास्ट्रियारक्तपातं पठन् दुःखितः ॥ ११ ॥

एतदास्ते जगद् दुष्टमारक्तपं
बर्बरीभावमायान्ति यन्मानवाः ।
सार्थकेभ्योऽभिरक्षार्थमत्राकुला
न्यग्रसच्चात्र फासिष्टवादोऽखिलम् ॥ १२ ॥

कृत्स्नयूरोप आमेरिकायां तथा
वर्धमानः स फासिस्टवादो जवात् ।
यर्हि शर्मण्यदेशेऽप्यभूद्धिट्लर-
स्याधिपत्यं तदाहं तदन्तेक्षणः ॥ १३ ॥

नैष शर्मण्यदेशस्य तामार्थिकीं
दुःस्थितिं प्राक् समाधत्त यत्सङ्गरात् ।
यत्र कुत्रापि फासिस्टवादो गत-
स्तत्र तत्राहमेतां मतिं ह्याश्रितः ॥ १४ ॥

सान्त्वमाप्तस्तया स्वे प्रतीकारको
लक्ष्यमन्त्यं तदन्तेऽस्यते बन्धनम् ।
साम्प्रतं चिन्तयन्नस्मि किन्त्वेष मे
किन्नु काङ्क्षानिमित्तो विचारो भवेत् ॥ १५ ॥

चेदियं मद्दृशा त्वीदृशी जायते
या त्वसह्या भवेत्तेषु नेतृष्वियम् ।
र्तार्ह किं शिष्टिसूत्रं त्यजन्तोऽद्य ते
स्वीयदेशान् रणे योजयेयुः क्षये ॥ १६ ॥

स्याद्रणस्यास्य को वा परीणामकः ?
अत्र फासिस्टवादश्च नानाकृतिः ।
व्याप्त आसीदथाप्येष नानाविधः
स्पेनदेशः प्रजातन्त्रमास्ते नृणाम् ॥ १७ ॥

न्यायिनां नूतनं केनचिद्यत्कृते
'शिष्टिमैञ्चेसटर्गार्जियन्' इत्यदः ।
नाम निर्देशितं यच्च पश्चान्महा-
गर्तकेऽपप्तदेकान्ततोऽत्यन्ततः ॥ १८ ॥

स्पेनवास्तव्यकोदारनेतृस्मृता-
स्तेऽतिरम्याश्च शब्दाश्च ताः सूक्तयः ।
देशपातं निरोद्धुं नहि प्राभवन्
नाधुनिक्याः स्थितेरग्रतः सा स्थिता ॥ १९ ॥

काचनोदारनीतिः किलापार्थिका
सर्वथाऽसिध्यतासौ परीहासिका ।
शब्दजालैश्च वाग्वागुराभिः स्वयं
बद्धमेतद्दलं वेत्ति वाणीमलम् ॥ २० ॥

अज्ञ वै सङ्कटाकीर्णकाले सदा
लुप्यते चित्रवच्चित्रपट्टान्ततः ।
आस्ट्रियायाश्च दुःखान्तनाट्यं तथा
चाधिकृत्यात्र तल्लेखकैर्विश्रुते ॥ २१ ॥

तत्र मैंचेसटर्गाजियन्पत्रके
ऽलेखि यत्तन्मयाधीयते स्माग्रतः।
मान्यते स्मापि तत्सादरं सद्रुचि,
रक्तयुद्धात्परं त्वास्ट्रिया किं न्वभूत् ॥ २२ ॥

ईदृशी सास्ट्रिया यां प्रतीकारधी-
वर्ग एकोऽन्वशाद्वै भुशुण्डीमुखैः।
मन्यते तस्य चेत् स्वात्मतन्त्रात्मता
आङ्ग्लदेशस्य तन्मूकतेयं कथम् ॥ २३ ॥

तत्प्रधानैकमन्त्री मुखं मुद्रितं
केन नोद्घाट्यत्येष वै हेतुना।
एकतन्त्रप्रशंसा कृता तैस्तु या
सा श्रुताऽस्माभिरास्ते, श्रुतं तन्मुखात् ॥ २४ ॥

'एकतन्त्रं हि जात्यात्मसञ्जीवनं
तन्नवं दृश्यमुत्पादयेत्तद्बलम्।'
इत्ययं सोऽब्रवीच्चेद्ब्रवीत्वत्र सः,
तानिहात्याचरन्तीह ये त्वास्ट्रियाम् ॥ २५ ॥

ये स्थिता यत्र कुत्रापि देशे स्वयं
नाशयन्तीह देहं सकृत् किन्तु ते।
तं तदात्मानमाघ्नन्त्यहो नैकशः
मानभङ्गात्मकेनात्र दुर्मृत्युना ॥ २६ ॥

चेत्स मैंचेसटर्गाजियन् पक्षधृत्
वर्तते स्वात्मतन्त्रस्य तत्तादृशम्।
भारतस्तद्यदा दम्यतेऽसौ तदा
स्वास्यमुद्रां कथं नाम नोन्मुञ्चति ॥ २७ ॥

तवयं केवलान् कायक्लेशानिमा-
नाप्तवन्तस्तदात्माभिमर्शानपि ।
आस्ट्रियालोकतन्त्रं किल ध्वंसितम्
मृत्युपर्यन्तमेषा स्म वै युध्यते ॥ २८ ॥

इत्यमुष्या महद्गौरवं गास्यते-
ऽत्रेदृशी कापि गाथा समुत्पादिता ।
आगमिष्यत्सु वर्षेषु कस्मिंश्चना-
हन्यसौ भोत्स्यतेऽमुं तु यूरोपकम् ॥ २९ ॥

एष यूरोपदेशः स्वतन्त्रो न यत्
यच्च रुद्धाखिलश्वासकः सोऽधुना ।
स्वस्थभावा न तस्योदयन्ते त्वमी
मन्दं मन्दं निरुद्धं हि तत्प्राणनम् ॥ ३० ॥

मानसी तद्विसंज्ञाऽऽगता सन्निधौ
तीव्रसंचालनैरान्तरद्रावणैः ।
दक्षवामादिदिक्ताडनैरेव स
रक्षितुं शक्यते हन्त यूरोपकः ॥ ३१ ॥

राथिनात्सिन्धुतः शैलयूरालतः
कृत्स्नयूरोप आस्तेऽद्य कारागृहम् ।
सन्ति वाक्यान्यमून्यत्र हृद्ग्राहका-
न्यत्र कीदृशि चित्ते ध्वनन्तीह मे ॥ ३२ ॥

साकमेवाहमाचिन्तये भारतं
ये हि मेंञ्चेसटर्माजियन्वेतरे ।
आङ्ग्लदेशे स्वतन्त्रत्वलाभोन्मदा-
स्तेऽस्मदीयां दशां प्रत्युदास्यन्त्यहो ॥ ३३ ॥

यद्विनिन्दन्त्यपीत्थं किलान्यत्र ते
भारते तद्भवेन्नैव पश्यन्ति तत् ।
विंशतिर्वर्षकाणां व्यतीताधुना
सङ्गरोपक्रमात्किञ्चिदेवाग्रतः ॥ ३४ ॥

आङ्ग्लजातेरुदारेण नेत्रोर्नवि-
श्यास्तु पारम्परीणेन तत्रोदितम् ।
'स्याद्विधानेऽत्र शक्तेर्जयो दुःखद-
स्तञ्च पश्यन्नहं मौनभावात्तदा ॥ ३५ ॥

द्रष्टुमिच्छामि नामेतिहासान्निर-
स्तं भवेत्पूर्वमास्माकदेशस्य तत् ।'
तत्कियद्वीरभावोदितं तर्ह्यभूत्
हन्त धाराप्रवाहेण सोद्गारिकम् ॥ ३५ ॥

आङ्ग्लदेशस्य लक्षाधिकाः संख्यया
तर्हि वीरा युवानो विचारं तु तम् ।
पूरयन्तोऽत्र युद्धाङ्गणं ते गताः
किन्तु चेद्भारतीयस्तथा भाषितुम् ॥ ३६ ॥

उत्सहेतास्य का स्यादृशा साम्प्रतं
राष्ट्रिया स्यान्मनोवृत्तिरुद्घातिनी ।
अत्र चास्मास्वनेके जना मन्वते
यद्वयं न्यायिनः स्मोऽथ निष्पक्षगाः ॥ ३७ ॥

अन्य एवात्र कश्चित्प्रमाद्यत्यहो
सोऽस्तु देशो जनो वेति नास्त्यन्तरम् ।
अस्मदीयेऽत्र मस्तिष्ककेऽयं क्वचि-
द्गुप्त ईदृग्विचारोऽत्र सन्तिष्ठते ॥ ३८ ॥

न स्म एते तथा सन्त्यनेके यथा
सोऽस्ति भेदः किलास्मासु चान्येषु च ।
अस्ति भेदो हि सौजन्यतस्तद्वयं
न क्वचिद् ब्रूमहे तद्रहस्यं सदा ॥ ३९ ॥

चेत्तु सौभाग्यतः श्रेष्ठजातौ वयं
प्राजनिष्याम यात्राभविष्यत्तराम् ।
अन्यदेशीयसौभाग्यदौर्भाग्यदा
दुष्करोऽस्मास्वविश्वास एषो भवेत् ॥ ४० ॥

यत्किलास्माकमास्तेऽत्र सर्वोत्तमं
वस्तु सर्वं हि विश्वेऽत्र सर्वोत्तमे ।
ये पुनः शान्तये किञ्चिदान्दोलनं
कुर्वते ते नहि स्वार्थिनः सन्त्यमी ॥ ४१ ॥

ते भ्रमस्थाश्च मूर्खाश्च सन्त्येव ते
सन्त्यहो ते कृतघ्ना अपीहान्ततः।
प्रत्युतैतेऽस्मदाप्यापि लाभान् बहून्
वर्तयन्त्येव धूर्ताः सदा वञ्चनाम् ॥ ४२ ॥

आङ्ग्लजातिः सदा द्वीपवासोचिता
दृष्टिरस्याः सदैवास्ति सङ्कोचनी।
दीर्घकालिक्यहो हर्षिणीयं स्थिति-
स्तच्च साफल्यमेनां व्यधाद्गर्विणीम् ॥ ४३ ॥

अन्यजातीरिमे मन्वते प्रायशः
सन्त्यपूर्वा घृणापात्रतामाश्रिताः।
केनचित्तूक्तमासीद्-दृशैषां पर-
स्तात्समुद्रस्य वन्याः समन्तात्स्थिताः ॥ ४४ ॥

किन्त्विदं वस्तु चास्त्येव साधारणं
स्यादमी अन्यजातीर्विभज्यास्थिताः।
आदिमं वै ब्रिटेनं ततो दूरतो
नास्ति किञ्चित्तदीयोपवेशास्ततः ॥ ४५ ॥

किन्तु तत्रापि गौरत्वचोऽमेरिका
नैव डागा न चेटालियन्नादयः।
पश्चिमोऽयञ्च यूरोप आस्ते ततः
शेषयूरोप एते ततो लैटिनाः ॥ ४६ ॥

दूरदूरं ततो नास्ति किञ्चित्परं
सर्वतो निम्नता एशियाफ्रीकयोः।
यत्र कृष्णाश्च पीताः पिशङ्गा जना
ये समेऽप्येकवर्गे निवेश्याः स्थिताः ॥ ४७ ॥

निम्नवर्गेऽत्र तस्मात्किलाभ्युन्नतात्
स्मो वयं दूरगाः शासकेभ्यः स्थिताः।
इत्थमस्यां दशायां किमाश्चर्यकं
चेदिमे स्वोन्नतस्थानतोऽस्मद्दृशः ॥ ४८ ॥

दृक्च तेषामधस्तान्नता धुन्धुली
लोकतन्त्रस्य वार्ता स्वतन्त्रत्वदाम् ।
कुर्महे तर्हि चेमे यदि क्षोभम-
न्तर्भजन्ते, नहीमेऽस्मदर्थाः शुभाः ॥ ४९ ॥

राजनीतिज्ञवर्यः किलोदारवाक्
जानमार्लेरिदं किं पुरा नोक्तवान् ।
दूरधूम्रे भविष्येऽपि कल्प्यं न तद्-
भारते लोकतन्त्रीयसंस्था भवेत् ॥ ५० ॥

लोकतन्त्रं तथा भारतस्यास्त्यदः
पक्षकोटो यथोष्णः कनाडाकृते ।
एतदन्ते श्रमाजीविवर्गोऽत्र यो
धूतवांस्तं समाजैकवादध्वजम् ॥ ५१ ॥

यस्तथाऽभूद्दलत्पक्षपाती भृशं
स्वस्य लोके जयस्योत्सवं युक्तवान् ।
वंगदेशाधिदेशं पुनः प्रस्तुती-
कृत्य चास्मानुपाहारयत् तत्र तम् ॥ ५२ ॥

तस्य शिष्टौ परस्याञ्च साऽस्मद्दृशां
दुर्दशामध्यनैषीत्पुरातोऽधिकाम् ।
पूर्णविश्वास आसीन्न तेषां जनः
कोऽप्यनिष्टं तु चित्तेऽप्यहो चिन्तयेत् ॥ ५३ ॥

यर्हि चैतेऽत्र नः स्वप्रयत्नक्रमात्
सर्वथैवोत्तमादाह्वयन्ति 'प्रिय !
विश्वबन्धो' इतीवादिभिर्नामभिः
स्तर्हि मन्यन्त एते स्फुरत्कृत्यताम् ॥ ५४ ॥

किन्तु नैते स्म एतावदुच्चा इमे
सन्ति यावत्स्वयं ते न नोऽन्यो भवेत् ।
मानदण्डः परीक्षार्थमित्यस्ति दृक्
संस्कृतेश्चापि वाचश्च भेदादियम् ॥ ५५ ॥

पारसीकेन चाङ्ग्लेषु वै दुष्करं
चिन्तयन्त्वेकधा ते निजं चापरम् ।
इत्यमुष्यां स्थितावेशियाया जने
चाङ्गलके स्यादिहाप्यन्यदत्यन्तरम् ॥ ५६ ॥

वर्तमाने च कालेऽधिविष्टा सभा-
ध्यक्षभावेन देशव्यवस्थाजुषाम् ।
भारतायानुदेयेषु शिष्टेः सुधा-
रेषु तत्र प्रवृत्तो विचारोऽधुना ॥ ५७ ॥

तत्र वादे विवादे विचारात्मका-
न्येव तैर्भाषणानि प्रदत्तान्यहो ।
लार्डलिण्टन्नभूद्राज्यपालः स वै
वायस्रायास्पदेऽप्यासितो भारते ॥ ५८ ॥

सोऽदधाद्भारतेऽस्मिंस्तु संवेदनां
तत्कृताभाषणे प्रोक्तमासीदिदम् ।
अस्ति शिष्टिर्हि काग्रेसतोऽपि स्वयं
भारतप्रातिनिध्यं दधानाधिकम् ॥ ५९ ॥

भारतस्याधिकारि-प्ररक्षाधिपा-
पौरुषी-स्वाधिराजप्रयोगादिकान् ।
प्रातिनिध्येन सोपस्थितान्कुर्वती
काङ्ग्रेसान्महत्त्वं विशेषाद्गता ॥ ६० ॥

हिन्दुमुस्लिम्द्विपक्षानुसंभाषिणी
शिष्टिरास्ते न कांग्रेसकं तत्तथा ।
धर्मतो नैरपेक्ष्यान्न जातेस्तु तत्
प्रातिनिध्यं विधातुं क्षमं कर्हिचित् ॥ ११ ॥

एतदुक्त्वा च सोऽग्रे स्वतात्पर्यकं
प्राचकाशद् यदाहं वदाम्यत्र तत् ।
भारते नानुवद्धं तदाहं तु तद्
ध्यानतः प्रातिनिध्यं सभायां वहे ॥ ६२ ॥

साह्यविश्वासमाधाममीषामहं
राजपालैः स धेयो भवेद् भाविभिः ।
तस्य तद्भाषणे वस्तुयुग्मं महद्
ध्येयमासीन्न तद्वै मनोरञ्जनम् ॥ ६३ ॥

भारतास्तित्वमास्ते यतोऽसौ सहा-
योऽभवच्छासनेऽस्मिन्निति प्राक्तनम् ।
भारते प्रातिनिध्यं दधाति स्वयं
ब्रैटिशी शिष्टिरत्रेति द्वैतीयकम् ॥ ६४ ॥

अस्ति शिष्टिर्हि सा लोकतन्त्रीयका
सर्वतश्चाधिकैकैव संस्था पुनः ।
अस्य तर्कस्य गाम्भीर्यतः प्रस्तुति-
र्व्यञ्जयन्त्याङ्ग्लशब्दात् किलार्थान्तरम् ॥६५॥

स्वेजकुल्यातटावारपारद्वये
भिद्यतेऽर्थोऽथवैषामिति ज्ञायते ।
अस्य तर्कस्य चैवायमस्त्याशयः
स्वैरशिष्टिः सदा प्रातिनिध्येऽधिका ॥ ६६ ॥

लोकतन्त्रस्वरूपा च सा जायते
प्रातिनिध्यं हि सर्वस्य सम्राडिह ।
नित्यमेवात्र धत्ते स इत्यागता
भूय एवेश्वरीयाधिकारानिमान् ॥ ६७ ॥

स्वैरमौलीमणिः फ्रैञ्चसम्राट् लुई
प्राह चातुर्दशोपीह—'राज्यं नहि ।
'राज्यमस्मि त्वहं राज्यमस्मित्वहम्
इत्यवोचत्स वै लार्डलिटन्नपि ॥ ६८ ॥

सत्यमेतत्तु यद् वर्तमाने युगे
स्वैरतापीह कञ्चिद् गता पोषकम् ।
भारतीयाधिसेवाविभूषासरो
माल्कमाहेलिरूचेऽधिवाराणसि ॥ ६९ ॥

वेदलोकैर्मितेऽब्देऽत्र नावम्बरे
उत्तरप्रान्तके राज्यपालस्तदा ।
सोऽवदद् देशराज्येषु स्वैरत्वमा-
स्तामिदं-तस्य नासीन्मतं काङ्क्षितम् ॥ ७० ॥

तेन चोक्ते न किञ्चित्तु राज्यं भुवि
स्वैरतां भोक्ष्यति क्वापि तामिच्छया ।
अत्र यत्नेऽभवत्कापि रुच्योन्नति-
र्यद्युरोपे प्रजातन्त्रसाफल्यके ॥ ७१ ॥

चारु दृष्टान्तताऽत्रैव सन्दर्शिता;
साधिकारो हि मैसूरराज्यस्य सः ।
विस्मयश्चात्र मिर्जा स इस्माइलः
प्राचकाशद्विरोधं मिथो दर्शयन् ॥ ७२ ॥

सर्वतः सांसदो लोकतन्त्रेऽफले
जायमाने यदन्यत्र संस्कारणा ।
क्रान्तिकारिस्वरूपा प्रतिज्ञायते
इत्यलेखीत्स पूर्वं पुनश्चालिखत् ॥ ७३ ॥

"अस्ति विश्वास एषोऽत्र राज्यस्य मे
त्वन्तरात्मा स प्रत्येति यत्साम्प्रतम् ।
प्रायशोऽस्मद्विधानं त्वलं राजनै-
तिक्यकार्यक्रमाय प्रजातान्त्रिकम्" ॥ ७४ ॥

इत्यहं भावये यत्स मैसूरिकोऽ-
प्यन्तरात्माऽस्ति तच्छासके तादृशः ।
तत्र योलोकतन्त्रोऽधुना वर्तते
विद्यमाना तथाध्यात्मिकी भावना ॥ ७५ ॥

स्वैरतायाः पृथक्तन्न विभ्राजते
लोकतन्त्रो न चेद्भारतार्थे हितः ।
तर्हि विज्ञायते मिश्रदेशाय सः
तावतैवोजसा स्यात्सदैवाहितः ॥ ७६ ॥

साम्प्रतं वंदिगेहान्मया प्राप्यते
स्टेट्समैनाख्यपत्रं तु साप्ताहिकम् ।
तत्र मिश्रस्य वै राजधानीपदात्
काहिराते किल प्रेषितं लेखनम् ॥ ७७ ॥

किञ्चिदभ्यापठं यत्र तत्रत्यकः
स प्रधानस्तु मन्त्री नसीम्पाशकः ।
घोषणामीदृशीं तामकार्षीदमां
नूनमाशास्त एषोऽत्र किञ्चिच्छुभम् ॥ ७८ ॥

राजनैतिक्य एताः समाः संसदः
वफ्दसंसद् विशेषात्सहाया भवेत् ।
ऐक्यमत्राश्रिता राष्ट्रियं संसदो
वा विधानार्थपञ्चायतस्याशु ताः ॥ ७९ ॥

चायनं कारयित्वा विधानं नवं
सज्जयिष्यन्ति तूर्णं न तूनं भयम्— ।
ह्यु त्तराधायिषूत्पादितं वर्तते,
अन्ततो ह्याशयोऽस्यैष एवागतः ॥ ८० ॥

लोकतन्त्रीयशिष्टिः पुनः कल्पताम्
येतिहासेन मिश्राय भीतिप्रदा ।
तत्प्रवृत्तिः पुरातो हि कोलाहलाद्
दम्यमाना पुनर्दृश्यते सा पुनः ॥ ८१ ॥

मिश्रदेशस्य वै राजनीतिः प्रजा-
मेतदीयां तथा जानतः कस्यचित् ।
नात्र शङ्का क्षणायापि संभाव्यते-
चायनस्यास्य चैकः परीणामकः ॥ ८२ ॥

वफ्दवर्गो मताधिक्यमाप्यादसौ
तेन कार्यक्रमोऽयं न चेद्रोत्स्यते ।
शीघ्रमस्मासु शिष्टिः पतिष्यत्यसौ
घोररूपा किलोग्रा प्रजातान्त्रिकी ॥ ८३ ॥

वैरिणी सा विदेश्यान् प्रति क्रान्तिकृत्
एतदप्युच्यतेऽस्मिंश्च निर्वाचने।
वफ्दवर्गाभिमुख्याय शिष्टिं प्रति
प्रेरणाऽवश्यकार्या प्रभावात्मिका ॥ ८४ ॥

अस्ति दौर्भाग्यतोऽमात्य आस्माकिको
ऽसौ विधानावधानाग्रही दुर्ग्रहः।
उच्यते तत्किलान्त्योऽस्ति मार्गस्त्वसौ
ब्रैटिशी शिष्टिरत्रान्तरे सम्पतेत् ॥ ८५ ॥

सा प्रकाशीकरोत्वत्र सर्वस्य यत्
सा न सोढा पुनस्तादृशीमत्र च।
ब्रैटिशी शिष्टिरस्मिन् करिष्यत्यथो
नो करिष्यत्यसावित्यहं वेद्मि नो ॥ ८६ ॥

किन्तु स्वातन्त्र्यभक्तेन चाङ्ग्लेन या
प्रस्तुता युक्तिरेषा तया मेंऽशतः।
साह्यमाधीयते-स्टेट्समैन् लेखतो-
मूलमास्तेऽत्र दोषः प्रजातान्त्रिके ॥ ८७ ॥

जीवनस्यात्र येन क्रमेणाथवा
तत्र मस्तिष्करुच्या यया प्राप्यते।
वै विकासोऽस्य वो लोकतन्त्रस्य त-
न्मिश्रवास्तव्यलोकस्य नास्ति द्वयम् ॥ ८८ ॥

नास्ति तादृक्क्रमो जीवनस्य क्वचित्
नास्ति तादृग्रुचिः क्वापि मस्तिष्कके।
तद्द्वयाभावसंयोगिताभावयोः
कोऽपि दृष्टान्त एषोऽत्र विन्यस्यते ॥ ८९ ॥

लोकतन्त्रोऽत्र यूरोपदेशोऽफली-
भूत आसीद्धि वर्षा अनेके गताः।
तेऽभवन् किन्तु मिश्रे त्वयं वर्तते
वफ्दवर्गः किलैकः सदा केवलः ॥ ९० ॥

भारतेऽस्मान् वदन्ति स्वयं ब्रैटिशाः
साम्प्रदायिक्यहो वो भिदाभ्युन्नतेः।
मार्गमेषा रुणद्धीति तर्केण सा
स्थायितां प्राप्यते सर्वथा सर्वदा ॥ ६१ ॥

एतदप्युच्यते नास्ति युष्मास्विदं
चैक्यमित्यत्र मिश्रे तु नास्ति द्वयम्।
सम्प्रदायोऽपि नास्त्यत्र नास्ते भिदा
राजनैतिक्यहो भाति तत्रैकता ॥ ६२ ॥

तत्र सैवैकता बाधिका जायते
लोकतन्त्रस्वतन्त्रत्वयोरध्वनि ।
लोकतन्त्रस्य मार्गोऽस्ति सङ्कीर्णता-
सम्भृतः किन्तु सारल्यभाक् सत्यतः ॥ ६३ ॥

पूर्वदेशेषु तस्याशयः केवलं
यन्निदिश्यात्स साम्राज्यवादी प्रभुः।
तत्प्रकुर्वीत तत्स्वार्थहस्तार्पणं
नात्र कुर्वीत तेनात्र स स्यात्स्थिरः ॥ ६४ ॥

लोकतन्त्रीयस्वाधीनतैभिः पणै-
स्तेषु देशेष्वपि स्थैर्यमाप्ता भवेत्।
पत्रिता पुष्पिता सा निजाधीनता-
ख्याल्लता सौरभाढ्या फलाढ्या भवेत् ॥ ६५ ॥

विद्याकलानिधिरित्युपाधिः शास्त्रिणे यस्मै वितीर्णो
ऋषिकले श्रीगिरिधराचार्यैस्तु शिक्षासमितिपतिभिः।

तेन रचिते नेहरूचरितेति नामनि महति काव्ये
प्राच्यप्रतीच्यं लोकतन्त्रं नाम सर्गो याति षष्टः ॥

नैराश्यम्

मन्दाक्रान्ता

एकषष्टः सर्गः

एषैवेच्छा जननि मनसोऽहं शये तत्र सार्तिः
शीता शीता मधुरहरिता शाद्वली या स्थली स्यात् ।
मातर्भूमे तव चरणयोर्वै निराशस्य दीना-
धीनस्यासन् मम लघुशिशोः स्वप्नजाता विलीनाः ॥ १ ॥

अप्रैलोऽभ्यागत इह ममालीपुरे बन्दिगेहे
प्रत्यासन्ना विविधघटनानां प्रवादा उपेताः ।
या मे दुःखं परमजनयंश्चित्तवैक्लव्यमन्तः
काराध्यक्षोऽकथयदजहाद् गान्धिरात्माग्रहं तम् ॥ २ ॥

नाहं तस्मादधिकमविदं वृत्तमेतन्न मेऽभात्
यद्वर्षेर्मे प्रियमभवदेतत्कथं स्याद्विमुक्तम् ।
जातः खेदस्तदपि समयात्माऽन्तरायो ऽद्यतोऽभूत्
ह्यासीदन्तः क्वचन नियतस्तस्य सत्याग्रहस्य ॥ ३ ॥

चित्तेऽचेति क्वचन समये त्वेष सत्याग्रहाख्यः
सङ्ग्रामोऽपि श्रयति स पुरा क्वापि विश्राममेकम् ।
सम्भाव्यं यत्कतिपयजनास्तत्परीणामचिन्तां
मुक्त्वा कालं त्वनियतमपि प्रायतेरंश्चिराय ॥ ४ ॥

संस्थास्त्वेवं विदधति न ता राष्ट्रियाः कार्यरोधं
नासीच्छङ्कापि च हृदि हि गान्धिः स्वदेशस्थितिश्च ।
प्रायः काङ्ग्रेसिकजनमनोवृत्तिमत्राभ्यजानात्
यज्जातं तल्लगति न वरं किन्त्वकार्षं प्रयत्नम् ॥ ५ ॥

अस्पष्टेयं श्रुतिपथमगादत्र चर्चापि काचिद्
गन्तुं सम्मेलनमिह पुराणीं स्वराजाख्यपङ्क्तिम् ।
भूयः प्रोज्जीवयितुमिह वो यत्न आरभ्यते नो
एतच्चाभान्मम बहुतिथात्कालतश्चानिवार्यम् ॥ ६ ॥

भूयो घस्त्रैरियमपि मतिर्जाग्रती मेऽन्तरासीत्
कांग्रेसं स्याच्चयनरचनातोऽपि भिन्नं कदाचित् ।
मासान्पञ्चाहमिह च वहिर्बन्दिगेहादरोत्सं
ह्येतां सम्मेलनदिशि तदर्धाधंनानाप्रवृत्तिम् ॥ ७ ॥

जानाम्येतामसमयभवां तान्तु चर्यां तदानीम्
तस्या रोधेऽभिमुखसमरादेव न ध्यानभङ्गः ।
यावत्सामाजिकनवविचारप्रचारेऽपि बाधो
ये ते कांग्रेसिकजनमनःसु प्रबेशं तदापुः ॥ ८ ॥

मत्वाहं तां विपदमिह च स्थायिनीमेव किञ्चिद्
ध्यायामि स्म स्फुटमियमिह स्थास्यति क्वापि यावत् ।
तावच्चैतेऽखिलजनगताः शिक्षिताः स्वीकृताः स्युः
स्पष्टेयुस्तां नृपनयगतामार्थिकीं नोऽप्यवस्थाम् ॥ ९ ॥

यत्प्रोक्तं लेनिननयविदा—'संकटं तूपयुक्तं
सामान्यं वा नृपनयकृतं वा भवेद्यादृशं तत् ।
गुप्तान्येतत्प्रकटयति या या च शक्ति स्वकान्तः
कार्यं कुर्वन्त्यपि न विदिता सा च सा व्यक्तिमेति ॥ १० ॥

वाग्जालं तद् भ्रमकरमथो वावदूकान्तरस्थं
भाण्डस्फोटं स्फुटयति सदा वास्तवं दर्शयच्च ।
तथ्यं वेत्तुं विवशमिव चैतत्करोत्यत्र लोकं
ह्याशासानं परिणतिमिमां बुद्धिशुद्धि जनानाम् ॥ ११ ॥

कांग्रेसं स्यान्नियतमनसां निश्चितध्येयभाजां
पुष्टो वर्गः स्फुटमथवा दुर्बलास्तन्त्यजेयुः ।
हानिः काचिन्नहि च भविता तेन कांग्रेसकस्य
सैद्धान्तिक्ये सहजसमरे व्यूहसृष्टेः समाप्तौ ॥ १२ ॥

वैधानिक्यव्यवहृतिपरैः साधनैः कार्यजाते
कांग्रेसाग्रेसरपरिकराः सत्यपक्षस्य लोकाः ।
अप्येतेषामविकलविधीनां किलास्माकमन्त्यं
लक्ष्यं प्राप्तुं विभुलरदृशा ते प्रयोगं विदध्युः ॥ १३ ॥

व्यक्तत्वेन प्रविदितमभूत्कार्यकालोऽयमागात्
किन्त्वेतन्मेऽतिपरवशतां पश्यतस्तर्ह्यकार्षीत् ।
सत्याः सत्याग्रहसमरकस्याश्रयाः काङ्ग्रेस-
कार्याणां मे सुविदिततराश्चाभवन् स्तम्भरूपाः ॥ १४ ॥
ते सर्वेऽपि प्रतिगतिजुषश्चापसर्पन्त आसन्
अन्ये चैवाकृतकृतिलवाः स्वान्निदेशान्निहादुः ।
अस्मात्कैश्चिद्विगतदिवसैः स्टेट्समैन्पत्रकं तत्
अभ्यायातं पठितमिह तच्चापि वक्तव्यमासीत् ॥ १५ ॥
यच्छ्रीगान्धिर्व्यतरदिह सत्याग्रहं स्तम्भयिष्यन्
तद्दृष्ट्वा यच्चकितचकितं चित्तमध्यास्त नीचैः ।
वारं वारं तदहमपठं विस्मृतौ तद्विलीनं
सर्वं सत्याग्रहप्रभृतिकं तत्स्थले संशयोऽभूत् ॥ १६ ॥
सङ्घर्षेणावृतमतिरहं चिन्तयन्नेतदासं
गान्धिश्चात्रालिखदिदमहो अस्य वक्तव्यकस्य ।
दत्तं संप्रेरणमिह तु मेऽस्याश्रमस्य स्वसार्थैः
मुख्यं तत्कारणमिदमभूद्दृष्टिमुन्मीलयन्नः ॥ १७ ॥
यच्च प्राप्तं चिरनिजसुहृद्बन्धितं, सैष कारा-
कार्यं कर्तुं किमपि न तदास्मिन् समुद्युक्तमासीत् ।
तस्य स्थाने पठितुमथवा लेखितुं तत्प्रवृत्ति-
रासीत्सत्याग्रहनियमतः सर्वथैव प्रतीपा ॥ १८ ॥
इत्येतस्माच्च तदबलतां ध्यातवान् स्नेहयोगा-
दात्मानं निर्बलतरमहं मन्यमानस्तदासम् ।
मामभ्याख्यत्समम निबलतां वेत्ति मन्ये भवांस्ताम्
किन्त्वन्धोऽहं भवति परमो नेतृदोषोऽन्धतेयम् ॥ १९ ॥
तत्कालं तन्मम मतिमगात् प्रत्यभान्मे यतस्तत्
न्यूनान्न्यूनोऽहमिह समये सक्रियः स्यामिहैकः ।
याभिर्व्यग्रीकृत-विचलितः सोऽहमासं त्विदानीं-
वक्तव्यं मां परवशमथ व्याकुलं चाप्यकार्षीत् ।
आसीद् गान्धेः सुहृदि निवलत्वं स चेदेकदोषः
सत्यैवैषा यदि निबलता तर्हि साधारणीयम् ॥ २० ॥

स्वीकुर्वेऽहं स्वयमपि तथा दोषभागस्मि नूनं
तस्मिन् गुञ्जापरिमितमपि प्राप्नुवं नानुतापम् ।
चेद्दोषोऽयं भवतु सुमहांस्तर्ह्यपीत्यत्र तावान्
संग्रामोऽयं स्थगयितुमभूदेकलस्यापराधात् ॥ २१ ॥

एषा वार्ता त्वतिभयकरी भाति नीतिप्रतीपा
कर्तुं धार्ष्ट्यं न खलु प्रभवाम्येष सत्याग्रहं च ?
को वा नायं त्विति विशदयान्यत्र किन्तु स्वरीत्या-
ऽऽचारादर्शानपि कलयितुं यत्नमेषोऽप्यकार्षम् ॥ २२ ॥

गान्धेर्वक्तव्यमिदमिह मेऽधात्किलादर्शधातं
तेऽस्मिन्सर्वे मम विचलिता वेद्मि गान्धेः प्रवृत्तिम् ।
साधारण्यात्स इह कुरुते साहजज्ञानतस्त-
त्कार्यं यस्मै कथयति च स स्वान्तरात्मप्रवृत्तिम् ॥ २३ ॥

तस्य ज्ञानं सहजमिति मे नाम रोचेत नित्यं
तच्छ्रीगान्धेरवितथमिह प्रायशो बोभवीति ।
सोऽस्मान्नित्यं तदिदमदद्यद्यदस्यास्ति कीदृक्
प्रज्ञा विज्ञातुमिह जनताया मनोवृत्तिमन्तः ॥ २४ ॥

कार्यं कृत्वा तदिदमुचितं साधयन् सोऽथ पश्चात्
यद्वै तत्कारणमुपदिशत्यत्र सामान्यतोऽरम् ।
चिन्तित्वाप्ता विशदविशदास्ते विचारा भवन्ति
तेषु स्याद्वै क्वचन कुहचित्कस्यचित्पूर्णतोषः ॥ २५ ॥

आपत्कालेऽग्रसरपुरुषाः कर्मवीराः सदैव-
मज्ञातेऽपि प्रसृतमतयः कस्यचित्प्रेरणेन ।
कार्यं कुर्वन्त्यथ च मृगयन्त्यत्र तत्कारणं ते
ध्यातं सत्याग्रहनियमनं साध्वकार्षीन्महात्मा ॥ २६ ॥

किन्त्वेतस्य स्थगनविषये कारणं यत्तदुक्तम्
तद्वै बुद्धेरवमतिकरं राष्ट्रियान्दोलनस्य-
नेतुश्चासीदतिशयमहाश्चर्यकारि प्रतीत-
मासीदस्याधिकृतिरियमत्राश्रमस्थान्निदेष्टुम् ॥ २७ ॥

तैर्वैतास्ता इह परिगृहीताः प्रतिज्ञाः यथोक्ता
एकं चाङ्गीकृतमभवदत्रानुशिष्टेः स्वरूपम् ।
कांग्रेसेनेदृशमिह न तत्किञ्चिदास्ते प्रक्लृप्तं
नैवापीदृक् किमपि मयकासीद् व्रतं सन्धृतं तत् ॥ २८ ॥

तद्ध्येतेभ्यः किमिति वयमस्यामहेऽतस्ततश्च
किं न्वीदृश्याश्रय इह कदाचित्क्वचिद्राजनीतेः ।
क्षेत्रेऽप्यान्दोलनविचलनं कल्पितुं शक्यमास्ते
नैवात्यास्ते किमपि च परं कारणं बन्धनस्य ॥ २९ ॥

मन्ये सत्याग्रहमिममहं नैतिकाद् दृष्टिकोणा-
दङ्गीकृत्य प्रचलित इहास्म्यस्य मूलेऽभिरुच्या ।
तस्मादेतत्प्रतिगतमभूद्राजनीतेः समुच्चं
श्रेष्ठं चाप्यास्पदमिदमयं नेष्यते सर्वथेति ॥ ३० ॥

एतन्मन्तुं त्वपि च यतते मानसं लक्ष्यमुच्चं
प्राप्तुं यत्ना नहि समुचिता नाप्युपायाः शुभास्ते ।
वार्ता त्वेषा विवृतिरथवा क्वापि दूरं प्रयाति
तस्याः कासाञ्चन नवनवानां च सम्भावनानाम् ॥ ३१ ॥

याभिर्व्यग्रीकृत-विचलितः सोऽहमासं त्विदानीं-
वक्तव्यं मां परवशमथ व्याकुलं चाप्यकार्षीत् ।
वक्तव्यान्ते शुभमतिमिमां सोऽभ्यदात्काङ्ग्रसाय
तत्सभ्यैः सा सपदि तु कलासुष्ठुता चाधिगम्या ॥ ३२ ॥

यातमत्यागात्स्वरुचिपरिगृहीते दरिद्रत्व आस्ते
राष्ट्रस्यास्य प्ररचनविधौ तत्परैश्चापि भाव्यम् ।
ते स्वीयाभ्यामिह खलु कराभ्यां निकृत्तैश्च सूत्रै-
र्व्योतं तं खद्दरपटमिमं सुप्रसंचारयन्तु ॥ ३३ ॥

प्रत्येकस्मिन्नपि च सहजे जीवनक्षेत्र एते-
ऽन्योन्यं शुद्धं स्वहितरहितं स्थापयन्त्वत्र बन्धम् ।
लोकानां हृत्स्वथ च विविधैः सम्प्रदायैः प्रणीतं
भेदं हृत्वैक्यमयफलदं बीजमारोपयन्तु ॥ ३४ ॥

अस्पृश्यत्वं प्रतिपदगतं दूरमस्यन्तु चैते
दत्त्वा स्वोदाहरणमिह ते मद्यपान् शोधयन्तु।
तैः सम्पर्कान्निजचरितगां शुद्धतामेषु भृत्वा
द्रव्यं तन्मादकमिह परित्याजयन्तु क्रमेण।। ३५ ।।

सेवाभिश्चाभिरिह सहकृतैः कर्मभिर्जीवनस्य
निर्वाहो निर्धनजनसमः शक्य एवास्ति कर्तुम्।
ये दारिद्र्ये वसितुमनलंभूष्णवः सन्ति सभ्या-
स्ते राष्ट्रीये क्वचन पणने वाथ कार्ये लगन्तु।। ३६ ।।

सोऽयं कार्यक्रम इह हितो राजनीतौ स्थितेभ्यो
यत्पूर्णत्वे वयमिह सदा प्रेरिता गान्धिना स्मः।
आभात्येकं किमपि महदान्तर्यमस्मान् विभज्या-
न्योन्यस्मान्नः पृथगिह विधातुं विधत्ते प्रयत्नम्।। ३७ ।।

तीव्रा काचिन्मम च समभूद्वेदना, यत्सहिष्णु-
श्चित्तेऽप्यायं सपदि त्रुटितान्यद्य सूत्राणि भक्तेः।
यैर्बद्धोऽहं सुचिरमभवं गान्धिना साकमित्थं
ह्यन्तर्द्वन्द्वं मम हृदि चिरात्सञ्चरच्चेदमासीत्।। ३८ ।।

गान्धिर्यां यामकथयदिहैषा न बुद्धा मयान्त-
र्युक्तिः सा सा भृशमथ न मे रोचमाना तदाभूत्।
युद्धे सत्याग्रहविषयके वर्तमाने तदन्ता-
रोद्धा गान्धिः सपदि पतितान् सङ्गिनो मध्यधारे।। ३९ ।।

उज्झित्वासौ क्वचिदनशनैर्जीवनान्तं विधत्ते
ह्यन्यत्किञ्चित्क्वचन कुरुते तन्न वै रोचते मे।
शक्ति स्वीयामिह स व्ययतेऽथ स्वयं निर्मिताभी
रज्जूभिः स्वं निगडयति ताभिः समस्याभिरेषः।। ४० ।।

याभिश्चैनां स्थितिमुपगतः सोऽस्त्यसाधारणीं ताम्
कारागाराद्बहिरवश आसीत् प्रतिज्ञां स कर्तुम्।
नाहं त्वान्दोलननवविधौ चात्र भागं ग्रहीता
नूत्ना नूत्नास्तदनु च कृतास्ताः प्रतिज्ञाश्च निष्ठाः।। ४१ ।।

आभ्यः पूर्वाः सपदि सकलास्ताः प्रतिज्ञाश्च निष्ठा-
स्तद्वश्यान्यपि सुविदितान्यत्र कार्याणि त्यक्तुम् ।
बाध्योऽभूद्यानि न परिसमाप्तानि सम्प्रत्यभूवन्
स्वीयैर्मित्रैः सह च समये यान्युपक्रान्तवान् सः ॥ ४२ ॥

एतैः सर्वैरपि परवशो व्याकुलश्चैष वृत्तः
कारागाराद्बहिरपि कियत्कालमेष स्थितोऽस्मि ।
तस्मिन् कालेऽन्वभवमहकं तानिमान् बुद्धिभेदान्
गान्धिर्ब्रूते स्म हि मतभिदां हेतुरास्ते स्वभावः ॥ ४३ ॥

मन्ये किन्तु स्थितिरियमतोऽप्यग्रतो वर्तते नः
सम्यग्लग्नो वहुषु विषयेष्वस्ति शुद्धो विचारः ।
सोऽयं गान्धेर्विशदविशदैस्तैर्विचारैर्न युक्तः
तस्माद्यत्नः कृत इह मया स्वान्निरोद्धुं विचारान् ॥ ४४ ॥

अद्यावध्येष हि यतितवान् स्यात्तु यावद्धि तावत्
स्वातन्त्र्यार्थं यदिह यतते ध्येयमाप्तुं सभेयम् ।
काङ्ग्रेसाख्या यदभि च ममात्यन्तभक्तिर्दृढेयं
तत्सम्प्राप्तुं विरतमतभेदः प्रयत्नं दधीय ॥ ४५ ॥

स्वं नेतारं प्रति च सुहृदः प्रत्यहं सानुरोधो
विश्वास्यश्चाहमिह भवितुं सर्वथा यत्नमास्थाम् ।
आध्यात्मिक्या मम खलु दृशा ध्येयनिष्ठानुरोधो
मित्राणाञ्चाभिभजत इह स्थानमुच्चैस्तरं तौ ॥ ४६ ॥

आध्यात्मिक्येन हि परतरं कृष्यमाणोऽहमासं
विश्वासेनाचरमिह चिरं त्वान्तरे द्वन्द्वयुद्धे ।
तस्मिन्काले कथमपि कृतं साम्मनस्यं मयात्र
स्यादेवं काचन त्रुटिरिहानुष्ठिता चेतसा मे ॥ ४७ ॥

एतत्कस्मैचिदपि न हितं, यत्स विश्वासमेक-
माध्यात्मिक्यं त्यजतु मतिमानित्यहं साधु वेद्मि ।
किन्त्वादर्शैः सह प्रतिहतावेष मित्रानुरोधा-
द्दर्शाश्लिष्टोऽहमिह चिरमाशासमानोऽभ्यतिष्ठम् ॥ ४८ ॥

धाता धाता स इह घटनानां तथास्मन्नियुद्ध-
विस्तारो नो निखिलविपदां संक्षयं कल्पयेताम्।
क्लिश्यन्ति स्मेह च सपदि मां याश्च काश्च मित्रा-
ण्यानेष्यन्ते मम च निकटे दृष्टिकोणस्य चास्य ॥ ४९ ॥

एकाकित्वं त्वलिपुरगते वन्दिगेहेऽन्वभूवं
संजातं मे पुनरतिशयाद् दुर्भरं जीवनं च।
शून्यत्वं स्यात्प्रतिभयकरं यद्वदेकं पुरस्तात्
घोरात् सत्यादनुभवगतादेतदासीत्कठोरम् ॥ ५० ॥

सर्वस्मादेतदतिशयितं दुःखदं सत्यमासीत्
तच्चैतद् यन्महिमवति युक्तो न विश्वास एषः।
प्रत्येकं स्वात्मनि, न तु परस्मिंश्च विश्वासभाक् स्यात्
विश्वासोऽयं परविषयको घोरनैराश्यहेतुः ॥ ५१ ॥

सोऽयं चामन्त्रणमिह महापत्तिपङ्क्त्यै प्रयुक्तं
रुद्धक्रोधस्य च मम कियानंश आपप्तदत्र।
धर्मे वा धार्मिकदृशि जनेऽचिन्तयं धार्मिकी दृक्-
वैचारिक्या भवति वितता या तथोद्देश्यतश्च ॥ ५२ ॥

स्थैर्यस्यास्ते परमरिपुरस्याः किलाधार एषः
किञ्चास्ते भावुकजनमनोवेग एतद्विकारः।
आध्यात्मिक्या धृतिरिह तया घोष्यते किन्तु सत्या
साध्यात्मिक्याधृतिरिह कियद्दूरमेत्यात्मनोऽपि ॥ ५३ ॥

धर्मात्माऽसौ न परजगतश्चिन्तने दत्तचित्तो
नो जानीते किमपि सहजं मानवस्य स्वभावम्।
रूपं सामाजिकमथ न तन्न्याय्यमप्येष वेत्ति
पूर्वाग्राहाद् दधति स निजे लोचने वास्तवत्वात् ॥ ५४ ॥

स्यादेतस्यास्मदुपनतात्तत्त्वतो मा पृथक्त्वं
सत्ये मूलं कियति निदधात्येष तद्वेत्ति पूर्णम्।
तेन प्राप्तं यदिह तदिदं सत्यमास्ते त्वसत्यम्
नैतद्वेत्तं किमपि यतनं नैष भूयः करोति ॥ ५५ ॥

वाचान्येषां तदुपकथने वेत्त्यसौ धार्मिकत्वं
सत्यान्विष्टेः पृथगिह भवेत्सत्यविश्वास एषः।
यावत्सत्ये नहि भवति कस्यापि विश्वास एषः
तावत्सत्यं नहि मृगयते कोऽपि लोके मनुष्यः ॥ ५६ ॥

यावत्सत्यं नहि मृगयते चात्र विश्वासपूर्वं
तावत्सत्यं सकलमयते कोपि नेत्यस्ति सत्यम्।
धर्मः शान्तेः कथयति कथां किन्तु तास्ताः प्रणाली-
राविष्कृत्य त्रिजगति परामेष हिंसां प्रसूते ॥ ५७ ॥

खड्गासाद्यामपवदति चेदेष हिंसां कदाचित्
तर्ह्यानीयात् मृगपतित्वचाच्छाद्य तस्यार्धकर्णम्।
शान्त्याच्छन्नावतरति घृणा क्षुत्पिपासाकुलाङ्गी-
बाह्याघाताद्विरहिततरा सा हिनस्त्यन्तरङ्गम् ॥ ५८ ॥

मथ्नात्यात्मानमपि हृदयं खण्डशश्चेत्करोति
तत्तस्याः किन्वधमतममन्यद्भवेच्चिन्तनीयम्।
पश्चाद्भूयोऽप्यमुमहमनु ध्यातवान् येन चित्ते
चाञ्चल्यं मे समुपजनितं बुद्धये मूलहन्त्रा ॥ ५९ ॥

अन्ते गान्धिश्चकितयति यः सर्वलोकं स आगात्
आश्चर्याढ्यं तदनु च महामोहकत्वं तदस्य।
यो लोकानां हृदि च दधते विस्मयायाधिकारं
तद्वाणी वा परिचितिममुष्यात्र दत्ते न लेखः ॥ ६० ॥

ताभ्यां यादृक् स हि जनतया कल्प्यते सोऽधिकोऽत-
स्तत्सेवा भारतहितकृते सर्वथास्ते महिष्ठा।
श्रीगान्धिर्भारतहृदि च यत् साहसं पौरुषं च
भूत्वा तेषां विविधविविधां शक्तिमाविष्करोति ॥ ६१ ॥

तेषां तत्कष्टसहनमथो शिक्षिता सानुशिष्टि-
र्ध्येये हर्षाद्घनतनुमनस्त्यागवृत्तिश्च धैर्ये।
नम्रत्वेऽपि स्वजनिभुवि भक्तिस्तथात्माभिमाने
तांस्तान् गान्धिः प्रकटयति स स्मेह सादगुण्यहेतून् ॥ ६२ ॥

अन्येऽनेके नवगुणगणा गान्धिना शिक्षिता ये
तैरेषा भारतजनपदस्थाखिलापि प्रजाऽऽस्ते।
काश्चित्सूक्तीरपि स जनतायै सदा सन्दिदेश
'यावत्कश्चिद् भयमनुभवेत्सत्यवृत्तिर्न तावत्' ॥ ६३ ॥

'धर्मं प्रेमोभयमपि भजेत्साहसान्नैव भीतेः'
'हिंसातोऽप्यस्त्यहितमिह तत्कातरत्वं जनस्य'।
'कर्तुस्तीव्रां रुचिमिह वदेत्सर्वथैवानुशिष्टिः'
'संयम्यात्मानमिह बलिदानेन चैवानुशिष्ट्या ॥ ६४ ॥

मुक्तिर्युक्तैर्भवति सुलभा सा सदाशाभिपूर्तिः,'
'लाभः कश्चिद्भवति बलिदाने न चेन्नानुशिष्टिः'।
एते शब्दाः सुभगवचनाः सूक्तयो वोपदेशा
इत्येतेषामनुगतजने राजते कापि शक्तिः ॥ ६५ ॥

हिन्दुस्थानं विदितवदिदं व्यक्तिरेषा लघिष्ठा
यद्यद्ब्रूते सकलमपि तन्न्यायभावात्पिपर्ति।
साश्चर्यं भारतप्रतिनिधित्वं च तेनोपलब्धं
प्राचीनाया अथ च रुजितायाः स भूमेरिहात्मा ॥ ६६ ॥

न व्यानक्तत्स हि भरतभूप्रातिनिध्यं श्रितोऽभूत्
तस्मिन् दोषा अपि समभवन् तेऽभवन्भारतस्य।
नासौ वैयक्तिक इह भवेद्योऽवमानः कुतोऽपि
कृत्स्ने राष्ट्रे समभवदहो सोऽवमानस्तु तस्य ॥ ६७ ॥

वायस्रायादय इह घृणापूर्णमेतत्त्वकुर्वन्
ते नाज्ञास्यन्नतिभयकरो बीजवापः कृतस्तैः।
स प्रत्यावर्तत जनिभुवं गोलपीठाधिवेशात्
पोपोऽस्यानङ्गीकुरुत तदा दर्शनं स्वस्य तेन ॥ ६८ ॥

तज्ज्ञात्वा मेऽभवदतितरां दुःखमन्तः स्म भाति
सोऽसम्मानो मम भरतभूमेरसह्योऽपमानः।
निःशङ्कं साऽननुमतिरभूज्ज्ञानतो नत्वबोधात्
भिन्ना वार्ता यदि तु कृतौ कल्पना नेदृशी स्यात् ॥ ६९ ॥

कैथोलिक्या न निजदलतो बाह्यमाहुर्हि सन्तम्
प्रोटेस्टेटाः कतिचन जनास्तं महात्मेत्यवोचन् ।
ईशुख्रीष्टीयमवितथमित्याहुरेनं च सन्तम्
तस्मात्पोपः पृथगवितुमावर्तनं तद् वितेने ॥ ७० ॥

अप्रैलेऽलीपुरविहितकारागृहेऽस्मिंस्तु काले
श्रीवर्नार्डशारचितनवनाटचान्यहं चाध्यगैषम् ।
ऑन् दीराक्साभिधकृतिगता भूमिका चात्यभान्मे
यस्यामीसा सममुदितवान् पायलेटः स कश्चित् ॥ ७१ ॥

साम्राज्येनाऽद्य हि विवदते तेन मे भूमिकेयम्-
एतत्कालानुगतरचना प्रत्यभाद्रोचमाना ।
तत्राबोचद्गगनगमिमं श्रील ईसामसीहा
हं वच्मि त्वां – त्यज भयमिदं मा स्म जल्पीश्च रोमन् ॥ ७२ ॥

भूताद्भीतिर्भयमिदमहो ते भविष्याद्, दरिद्राद्
भीतिस्ते चेयमिह च भयं तेऽप्यमीरादथेदम् ।
पीठाधीशाद्भयमथ भयं ते यहूदीजनाच्च
यूनानीयाद् भयमिदमहो योऽस्ति विद्वानिहायम् ॥ ७३ ॥

गॉल्वामिभ्यो भयमिदमथो गॉथहूणेभ्य एषा
भीतिर्ये जांगलजनपदा कार्थजेभ्यश्च भीतिः ।
यद्भीतेस्त्वं तमिह नकुलीकृत्य रक्षस्यथात्मा-
नं चेदानीं भयमधिकमेतस्य मूर्तेस्तवेदम् ॥ ७४ ॥

वा शाही सीजरनबलमूर्तिस्त्वयैवास्ति क्लृप्ता
मादृक्षाद् भीतिरियमथ ते सा कपर्दीविहीनात् ।
द्वाराद् द्वारं ह्यटति भुवि भिक्षामवज्ञायते च
सर्वैर्हास्यादपि भयमिदं नेश्वरस्याधिराज्यात् ॥ ७५ ॥

तस्माद्भिन्नात्सकलविकलाद् वस्तुतस्तेऽस्ति भीती
रक्तापाते द्रविणविभवे तेऽस्ति श्रद्धा च काचित् ।
रोम्णां त्वं पक्षधर इह यद् भीरुतायां प्रसिद्धः
संसारेऽहं पुनरिह तदीशस्य पक्षावहोऽस्मि ॥ ७६ ॥

कृत्वा प्राणार्पणपणमहं स्वं च सर्वं विनाश्य
इत्थञ्चाद्यामरविजरसाम्राज्यमेनज्जयामि ।
संवादेऽस्मिन् प्रकृतिविषमौ पुण्यपापाश्रयौ तौ
ईशाकाशप्रवहणवहौ सत्यमुद्दिष्टवन्तौ ॥ ७७ ॥

नास्ते गान्धेर्मंहिमनि पुनर्भारतस्यानुचर्या-
स्वाहो तेनार्पिततनुमनोऽर्थेन तेनेरितासु ।
लोके सेवास्वपि च विहितास्वस्य मां प्रत्युदार-
भावेष्वासे किल ऋणधरीयेषु नास्तेऽद्य प्रश्नः ॥ ७८ ॥

एतेष्वर्थेष्वपि भुवि भवत्स्वप्यसौ भूरिवस्तु-
ष्वाविष्कर्तुं प्रभवति परास्तास्त्रुटीरित्यवोचम् ।
तस्योद्देश्यं भवति च रणं किन्वियद्वर्षकालं
वासे तस्यातिनिकटतमेऽप्येष नाज्ञासिषं तम् ॥ ७९ ॥

शङ्का मेऽस्मिन्नपि च विषये तस्य मस्तिष्कमेतद्
सुस्पष्टं स्यात्कियदवधि तद्वक्ति पादक्रमो मे ।
पर्याप्तः स्यात्परमिह पुरो लक्ष्यमेकं विधर्तुं
द्रष्टुं भाव्यर्थमपि न कदाचित्प्रयत्नं विधत्ते ॥ ८० ॥

जल्पन्नेतच्छ्रममपि कदाचिन्न कञ्चित्स्म धत्ते-
'ध्याने वै साधनविषयके जायते ध्येयसिद्धिः' ।
आत्मीया जीवनसरणिरेषा पवित्रा यदि स्या-
दन्यत्सर्वं स्वयमिह तदा साधु सिद्धं न किं स्यात् ॥ ८१ ॥

नैषा दृग्राजनयिकतया नापि वैज्ञानिकत्वात्
नाप्येषा नैतिकगुणतया सङ्गता भाति मह्यम् ।
सङ्कीर्णाचारदृगियमहो या सदाचाररूपं
प्राङ्निर्णीय प्रसरति पुरः किन्वियं व्यक्तिगा स्यात् ॥ ८२ ॥

आहो सामाजिकगतिरियं सर्वमोजश्चरित्रे
युङ्क्ते गान्धिर्न हि स महिमानं मनाक् स्वीकरोति ।
शिक्षाया वै मनसि विहिताया विकासस्य वास्य
सत्यं चैतन्मतिरियमिह स्याच्चरित्रं विना का ॥ ८३ ॥

सा स्याद्भ्रष्टाऽतिभयजननी किन्तु सा शिष्यतेऽस्मिन्
नान्यत्किञ्चिद्, विकसति चरित्रं कथं चेति प्रश्नः।
गान्धेः साम्यं कृतमिह जनैर्मध्यकालेसवोयैः
सद्भिर्गान्धिर्वदति च सदा तत्सतामप्रतीपम् ॥ ८४ ॥

किन्त्वेतत्साम्प्रतिकविधिभिश्चित्तवैज्ञानिकाद्यै-
र्नो काञ्चित्सङ्गतिमिह भजन् दृश्यतेऽत्रानुभूत्या।
स्यादेतद्यत्किमपि तु परं ध्येयगाऽस्पष्टता मा-
मत्यन्तं खेदयति भवति ध्येयमावश्यकं नः ॥ ८५ ॥

कार्ये क्वापि प्रगतिरमुना साध्यते, ध्येयमेकं
सुस्पष्टं निश्चितमिह तया वै प्रगत्यात्र लोके।
नास्तेऽस्मज्जीवनमिदमहो ! तर्कशास्त्रं, प्रतिष्ठां
तर्को नैतीति च सफलताप्राप्तये ध्येयभूताः ॥ ८६ ॥

आदर्शास्ते समयसमये स्युः परीवर्तनीयाः
स्पष्टादर्शः प्रतिपलमिह स्थापनीयस्तु कश्चित्।
ध्येये गान्धेरपि न तथा सन्त्यमी वै विचारा
अस्पष्टास्ते प्रतिगतिमितास्ते यथा नः स्वभावात् ॥ ८७ ॥

गान्धिः काञ्चित्स्वनियतदिशं गन्तुमत्युत्सुकोऽस्ति
किन्त्वेतस्यां दिशि तु गमनं नानुकूलं युगस्य।
नाद्यावध्येष च तदुभयोः सङ्गतिं क्लृप्तवान् यत्
नाप्यन्तर्गं प्रवचनपथं प्राप्तवान् ध्येयगं सः ॥ ८८ ॥

सेयं ध्येयं प्रति विशदता भावहेतुर्यतोऽसौ
स्पष्टीकर्तुं प्रभवति पुरा पञ्चविंशाब्दतस्तु।
तस्मात्कालाद् यदवधि स दक्षाफरोकाप्रदेशे
सिद्धान्ताञ्जीवनविषयकान् निश्चिनोत्यद्य यावत् ॥ ८९ ॥

तस्मात्साधारणदृगयनं तस्य कीदृक्प्रवृत्तं
तत्सुस्पष्टं, न हि मम गतिस्तस्य लेखेषु तेषु।
प्रारम्भे येऽलिखिषत तथाद्यापि ते तद्विचारान्
व्यक्तीकुर्वन्त्यथ नहि तथेत्यस्ति तन्मार्गितव्यम् ॥ ९० ॥

शङ्के चास्मिन् विषय इति त लम्भनीया अवश्यं
तैस्तद्ध्रावस्तर-तलगतौ भावना: स्फोटिता: स्यु: ।
याभिस्तत्कार्यमकृत स तदा भावनाभिस्तु ताभि:
शक्यं स्यात्तत्परिचयतया प्रापणीयं रहस्यम् ।। ९१ ।।

सोऽलेखीदत्र हि नवमकेऽब्दे समुद्वार एको
हिन्दुस्थानस्य हि स परमो यद्धि पञ्चाशवर्षात् ।
तेनाधीतं तदखिलमिदं विस्मरेद् रेलतार-
वाक्कीलद्राक्तरप्रभृतय: सर्वं उन्मार्जिता: स्यु: ।। ९२ ।।

"उच्चत्वेनोदितसकलजात्यादय: स्वेच्छयैव
धर्म्यत्वेनैव च नियमतो जीवनं यापनीयम् ।
सामान्यं तत्कृषकजनताभिर्भवेदित्यपीयं
शिक्षा ग्राह्या तदिह सुखदं सत्यसौख्यप्रदं तत् ।। ९३ ।।

"रेले वा मृत्तरणिषु समारुह्य गच्छंस्तु मन्ये
सत्यं सुष्ठु प्रतिगतरुचिर्हिंसया तद्द्‌नोभि ।
एतावद्भि: परमकृतकैर्वेगवद्भिश्च यानै:
संस्कर्तुं स्यादिह हि जगतो यत्न एषोऽन्यथा मे" ।। ९४ ।।

इत्येतन्मेऽतिशयगलितं हानिदं च प्रतीतं
यत्पूर्ति: स्यात्कथमपि न साऽसम्भवा सर्वथास्ति ।
कष्टे धैर्यं मुनिजनसमं जीवनं प्रत्यगाधं
गान्धे: प्रेमादरभृतमिदं तन्मुखाद् व्यज्यते च ।। ९५ ।।

वृद्धि नेयं न खलु मनुजैस्तन्निजावश्यकत्वं
कुर्मश्चेदं वसनमशनं नाधिकद्रव्यसाध्यम् ।
इत्येषा नोन्नतिरिह न सा सभ्यता चास्ति भव्या
सा तु स्याच्चेत्स्वयमिह वयं न्यूनयेम व्यपेक्षा: ।। ९६ ।।

एतेनात्र प्रमिलति सुखं सत्यसंतोष एष:
सेवाशक्तिर्भवति निचिता वर्धिता चेति सत्यम् ।
एता युक्तीर्यदि वयमिहामन्महे तर्हि गान्धे-
राचारास्ते सुगमसुगमा: स्युर्विचाराश्च शेषा: ।। ९७ ।।

किन्त्वस्मासु त्वधिकमनुजा मन्वते नेति तेषां
चर्या अस्मान् प्रति न रुचिताश्चोचिता भान्ति तत्र।
तेषामालोचनमिह वयं कुर्महे तर्हि खिन्ना
भात्येषा मे विपदधिगतिर्न प्रशंसाऽधनानाम् ॥ ९८ ॥

नाहं जाने कथमिदमिह प्रार्थनीयं क्वचित्स्यात्
कष्टं कष्टादधिकतरमेतद्दरिद्रत्वमस्मात्।
देशान्निर्वासितमिह भवेदेतदास्ते मतम्मे
नास्ते सामाजिकहितकरं जीवनं तापसानाम् ॥ ९९ ॥

स्यात्केषाञ्चिद्रुचितमुचितं वा तदेतत्प्रतीतं
सामान्यत्वं जगति समता संयमो मेऽस्त्यभीष्टः।
तेषां चैवादरमपि सदाऽहं करोमीह, किन्तु
देहस्याप्राकृतिकदमनं नैव सम्यग्ब्रवीमि ॥ १०० ॥

विश्वासो मे—यदिह वपुषः साधनं मल्ल-खेला-
द्यानामावश्यकमिह यथा स्यात्तथापेक्षितं नः।
अभ्यासान् स्वानथ निजमनः साधयेमानिवार्य-
भावेनैतानिह च करवामेह नित्यात्मवश्यान् ॥ १०१ ॥

मिथ्याशैषाऽधिकसुखमये जीवने भोगपूर्णे
मग्नो जीवो विपदि पतितो भूरिकष्टानि सोढा।
कञ्चिच्चोग्रं कलयति पुराध्यात्मिकं संयमं सः
कर्तुं शक्ष्यत्यथ स कुहचिद् वर्तनं वीरयोग्यम् ॥ १०२ ॥

नैतिक्यापीह च जनदृशा साधनाऽऽस्तेऽनिवार्या
तावत्युच्चत्वमधिगमितुं यावती देहसिद्धयै।
तस्या नार्थस्तप इति तथा नात्मपीडेति चेयं
सामान्या स्यात्कृषकजनवच्चेति वा रोचते मे ॥ १०३ ॥

उद्वेगो मे भवति हि तयोद्धर्तुकामोऽस्म्यहं तां-
स्तस्या मध्यात्कथमहमिमामात्मने हन्त रोचे।
नैतेषां नागरिककरणं मेऽस्त्यभीष्टं परन्तु
ग्रामे तां सांस्कृतिकसुविधां दातुमिच्छामि तेभ्यः ॥ १०४ ॥

सामान्या सा कृषकजनवन्मे न सौख्यं तनोति
सा मे नूनं त्वशुभतनुभाग्भाति कारागृहाभा।
तावत्कुद्दारकभृति जने को विशेषोऽस्ति दृष्टो
येनादर्शीभवितुमुचितो मन्यतामेष लोकैः॥ १०५॥

नास्मिन्नानायुगविदलिते शोषिते हन्त जीवे
नैवास्त्याशान्तरमिह पशोर्येन संवासभाक्सः।
'केनासौ स्यान्मृत इव कुतो हर्षनैराश्यभागी
व्यग्रः शोकादपि न भवति प्रोत्सुको वाऽऽशयाऽयम्॥ १०६॥

स्तब्धो मूको जड इव स तिष्ठन् कनीयान्निजार्त्या
आस्ते सोऽयं किमिह वृषभो मानवो वा तदाभः।
इत्येतादृक्कृषकसविधे बन्यतां तां पुराणी
प्राप्तुं यत्नो न हि मतिविकासावकाशोऽस्ति यस्मिन्॥ १०७॥

मद्बुद्धि न स्पृशति कथमप्यौचिती तस्य सेयं
यद्दुष्टत्वं मनुजविजये गौरवे बाधकत्वात्।
भौतिक्याश्चातिशयभरतां मानसेऽस्याः स्थितेस्ताम्
स्वेनैवोक्त्वा जनमिममनुत्साहितं कुर्वते ते॥ १०८॥

यच्चाप्यस्योन्नतिमवरुणद्धीह तद्वाञ्छनीयं
कस्माज्जातं न्विति न मतिमास्कन्दते तन्मदीयाम्।
दोषैः पूर्णाऽऽधुनिकयुगगा सभ्यता किन्तु तस्यां
साद्गुण्यं तत्किमपि भरितं वर्तते चास्ति शक्तिः॥ १०९॥

सैतान् दोषान् दमयितुमलं मूलमुन्मूल्य तस्या
नाशः शक्तेरपि तदनुगायाश्च कार्यो भवेत्सः।
भूयः सा नीरसपरमदुःखान्विता निष्प्रकाशा-
ऽवस्था प्राप्या भवति च पुरेत्यस्ति कीदृक्प्रहासः॥ ११०॥

यद्येतादृक्कृतिरिह भवेद्वाञ्छनीयं तथापि
प्रायस्तत्सम्भवति न पुनारुध्यते नैव धारा।
नास्याश्चात्मानमपि बहिरानेतुमस्माल्लभेते
ज्ञातास्वादा न खलु परिहातुं समर्थास्तथैनाम्॥ १११॥

नाप्यायातुं कथमपि पुराणीञ्च वन्यां स्थितिं ताम्,
तर्कोऽस्यां दुष्कर इह यतो दृष्टिकोणौ विभिन्नौ।
गान्धिर्नित्यं सुकृतदुरितोद्घाटिनीमेव भाषां
वैयक्तिक्यै वदति सततं मुक्तये श्लाघनीयाम्॥ ११२॥

किन्त्वस्माकं बहुभिरुपरि स्थाप्यतेऽसौ समाजः
क्षेमः सामाजिक इह सदा चिन्त्यतेऽस्माभिरेकः।
गान्धेः पापेति च पदमहो दुर्भगं कल्पनातो
वाह्यं चार्थं कथयति ततो वेद्मि नैतत्स्वरूपम्॥ ११३॥

गान्धेर्दृष्टिर्दुरधिगमतामेव धत्ते मदर्थं
नायं वाञ्छत्यथ विनिमयं वै समाजस्य कञ्चित्।
नाप्येष प्रार्थयति परिवृत्तिं च सामाजिकस्या-
कारस्याऽपि प्रतिजनमसौ पापवृत्तेर्निवृत्तिम्॥ ११४॥

तेनालेखि श्रममिह वृथा विश्वसंस्कारणस्य
योऽसौ स्वादेशिकमनुगतोऽयं कदाचिन्न धत्ते।
विश्वं त्वेतन्नियमनियतं संसरत्येतदेवं
ये ते सन्तीश्वरनियमितास्तानलं नैष भङ्क्तुम्॥ ११५॥

इत्युक्त्वापि प्रयतनमसौ विश्वसंस्कारणस्य
भूयो भूयः कुरुत इह तद् व्यक्तिसंस्कारणेन।
शब्दाद्यर्थाननुभवितुमेतानि वा इन्द्रियाणि
पापे वृत्तिं यदि परिहरन्ते तदा व्यक्तिशुद्धिः॥ ११६॥

रोमन्कैथोलिकवदलिखत्कोऽपि फासिज्मवादे
स्वातन्त्र्यस्याभिनवपरिभाषाममंस्तास्य गान्धिः।
'बन्धात्पापस्य किल विनिमुक्तिः स्वतन्त्रत्वमुक्तम्
इत्यत्रोक्तं स इह बहुशः पापशब्दं प्रयुङ्क्ते॥ ११७॥

वर्षाणां वा द्विशतकपुरस्तात्स वै लन्दनस्थो
विश्पोऽलेखीदिह निजवशत्वं ददातीशुधर्मः।
यत्तत्पापस्य च तदधिकारस्य बन्धाद्विमोक्षः
इत्येतेनास्य तु न कियती दृश्यते तुल्यतेयम॥ ११८॥

बन्धे पापस्य हि निपतितः पूरुषो वासनाभि-
र्दुष्टाभिश्चाभ्युपगत इह स्यात्सदा कामनाभिः।
इच्छाभिश्चाप्युपगतमनाः स्यादसाधारणीभिः
तत्रैताभ्यो विरतिरिह विमुक्तिः स्वतन्त्रत्वमुक्तम् ॥ ११९ ॥

ज्ञानस्य स्यात्सकृदपि शनैर्दृष्टिकोणस्तथापि
स्त्रीपुंसाभ्यां सहवसतिगा यात्र गान्धेर्दृगस्ति।
अद्यत्वे चाखिलजनमनो वेत्त्यसाधारणं यत्
सर्वं बुद्धेरिह विषयगं शक्यमास्ते विबोद्धुम् ॥ १२० ॥

गान्धेर्दृष्ट्याऽसति ननु जलाभैषणायास्तु बन्धे
स्त्रीपुंसौ चेत्सहवसतिमात्राश्रयात्तेऽथ पापम्।
एते सन्ताननियमनमालक्ष्यचेदाद्रियेते
ऽत्रोपायान् कृत्रिमविधियुतांस्ते महापापकल्पाः ॥ १२१ ॥

तेषां योगे परिणतिरियं क्लीबता स्नायुह्रासः
पापं स्यात्तत्कृतपरिणतेस्त्राणयत्नो विधेयः।
एतद् दुष्टं प्रथममनपेक्ष्यैर्भृतं स्वोदरं स्या-
त्पश्चाद् भैषज्यमशितमजीर्णादिदोषापहृत्यै ॥ १२२ ॥

एतत्त्वत्यन्तमिह दुरितं पाशविक्या प्रवृत्त्या
तृप्तिं क्लृप्त्वा निजमनसिजानां परीणामरोधः।
गान्धेरेतां रुचिमनुचितां सर्वथा चास्वभाव्यां
मन्ये भीत्यावहननिरतां व्यक्तिगत्वेन चाहम् ॥ १२३ ॥

चेद्गान्धेर्युक्तमिह वचनं तर्ह्यहं क्लीबतां तां
स्नायुह्रासं तमुपगत एवास्मि किं सम्प्रति स्यात्।
रोमन्कैथोलिकसमुदयोऽप्योजसा सन्ततीनां
संरोधं तं भृशमनुचितं वक्ति कर्तुं निरोधम् ॥ १२४ ॥

किन्त्वेते स्वां दृशमवधिमेतां न वै नीतवन्तो
यां गान्धिर्नो नयति मनुतेऽसौ मनुष्यस्वभावम्।
सामञ्जस्यं किमपि कलितं तेन साकं च तेन
दत्ता मुक्तिः खलु समयतस्तेन कैथोलिकेन ॥ १२५ ॥

गान्धिः किन्तु स्वमननमन्त्यावधिं नीतवान् सः
सन्तानप्राप्तिरनभिमता चेन्न तौ संवसेताम्।
संवासं तं स खलु मनुतेऽन्याय्यमेवानपेक्ष्यम्
स्त्रीपुंसौ स्तः प्रकृतिवशतोऽन्योन्यमाकर्षितौ तौ ॥ १२६ ॥

इत्येतन्नो सपदि मनुते ब्रूत एवात्र भूयः-
किन्त्वेतत्कथ्यत इह सदाऽऽदर्श एषोऽस्ति मिथ्या।
वाऽसभ्याकल्पनमिदमिहाकर्षणं वै स्वभावात्
अन्योन्यं तौ भजत इति तन्नाहमाचिन्तयामि ॥ १२७ ॥

तन्नाङ्गीकर्तुमहमिदमत्रास्ति नाकर्षणं तत्
जातु स्वाभाविकमभिमतं हेतुजं किञ्चिदेतत्।
यद्येतत्स्यात्तदिह निकटे सर्वनाशः स्थितोऽस्ति
एतद्वैवाहिकमभिमतं जन्मजातं तदन्यत् ॥ १२८ ॥

मातापुत्रौ पितृदुहितरौ चात्र भ्राताभगिन्यौ
स्त्रीपुंसौ स्तः परमिह न तत्तादृशं दृश्यते यत्।
एतत्स्वाभाविकमिदमिहाकर्षणं विश्वमेतत्
सत्तायां स्थापयति" पुनरेषोऽभिवक्त्योजसेदम् ॥ १२९ ॥

'स्त्रीपुंसावैन्द्रियमपि मिथः किञ्चिदाकर्षणं तत्
प्राप्तौ स्वाभाविकमिदमिहास्ते न वक्तव्यमेतत्।'
फ्रायड् कांप्लेक्समतमिदमास्ते युगेऽस्मिन्किलैतं
विश्वासं तादृशमतिबलाद् वक्ति साश्चर्यकारी ॥ १३० ॥

भातश्चासामयिक इति स श्रद्धया युज्यतेऽत्र
प्रश्नस्तर्केण न पुनरयं स्यात्समाधेय एवम्।
गान्धेर्वृत्तिः खलु ऋतदृशा तापसी साधुकल्पा
संसारस्याखिलविधिविधानाच्च रीतेस्तटस्था ॥ १३१ ॥

यो मिथ्या पश्यति किल जगज्जीवनं चाप्युपेक्ष्यं
तस्मै योगस्थितिमुपगतायास्ति स्वाभाविकं तत्।
स्त्रीपुंसौ यौ न जगदमृतं जीवनं पश्यतो वा
संसारीयौ सपदि सकलं चोपयोक्तुं यतेते ॥ १३२ ॥

ताभ्यामेतद् दुरधिगममेवास्ति दूरे स्थितत्वात्
तस्मादस्मादवितुमिह तौ स्वं समन्ताद्यतेते।
ताभ्यामेकं प्रति नतिभृतिभ्यां समस्या भवन्ति
नैके दोषा जगति सहनीयाः किलैकत्र दोषे ॥ १३३ ॥

वक्तव्याद्वै निजविषयतो दूरमेषोऽस्मि यातः
किन्त्वेतस्मिन्ननलिपुरगते वन्दिगेहे दिनेषु।
दुःखार्तेषु प्रतिविषयकास्ते विचारा ममान्त-
श्चेतस्येते गगनजलदन्यायतश्छादयन्ति ॥ १३४ ॥

ते कस्मिंश्चित्क्रमिकविषये तर्कतो व्यक्तिशो वा
नो संवीता अपितु परितो विप्रकीर्णा इवायन्।
ते मां व्यग्रं विवशमथ वा कुर्वते स्माद्य तेभ्यो
ऽप्यासीद्वृद्धो रहसि भृशशून्ये च सोऽयं हि भावः ॥ १३५ ॥

कारागारीयमसुदमनं चाम्बुवायुप्रयुक्तं
लघ्व्याः कोष्ठया अपि रहसि मे वर्धमानं तदासीत्।
चेदेतस्मात्तु बहिरभविष्यत् तदा मेऽभिघातः
कालोऽभूतः क्षणिकमिव तत्स्यात्स्थितेरानुकूल्यम् ॥ १३६ ॥

कृत्वा स्योद्गारमपि च बहिष्कृत्य वास्थापयिष्यं
कृत्वा कर्म प्रियमिह मनः स्वास्थ्यमाकल्पयिष्यम्।
कारागारे समभवदिदं नैव तस्मादिमानि
घस्राण्यासं मम कुविधया यापनीयानि गुर्व्या ॥ १३५ ॥

सौभाग्यादस्मि नुदित मनाः नैष नैराश्यगर्ते
भूयस्तिष्ठामि झटिति च विस्मर्यते दुःखघातः।
कारागारे मम कमलया साकमावासयोगा-
देकाकित्वा पगमनकृतः कोऽपि हर्षस्तदाभूत् ॥ १३६ ॥

अन्वाभूतं यदपि भवतु त्वास्व एवाधुनाऽऽवा-
मन्योन्यस्य प्रणयविषयौ जीवनस्यास्य सार्थौ।
सौख्यैर्दुःखान्यपहरति वै यो हि यस्य प्रियः स्यात्
नो कुर्वाणः किमपि भुवि सोऽमुल्य एवास्य कोषः ॥ १३९ ॥

विद्यावाचस्पतिरिति धृतः कोऽप्युपाधिस्त्रिषष्टे
वर्षे शोधात्मक नव गवेष्योत्थसंस्कृत्य लेखे।
येनादौ तेन हि विरचिते नेहरूचारुकाव्ये
नैराश्याख्यो व्यतिगत इहास्त्येकषष्टोऽद्य सर्गः ॥ १४० ॥

आचार्यतां सममाप्य विद्या भास्करे त्यन्तिममुपाधि
लब्धवान् श्री मान्य लीलाधर गुरोः कविरत्नसाहितम्।
तेन रचिते चारुनेहरू चरित नामनि महति काव्ये
सैक षष्टः सर्ग एति समाप्ति मद्य निराशताख्यः।

विकटाः समस्याः

अनुष्टुप्

द्विषष्टः सर्गः

ये गान्धिं व्यक्तिरूपेण दृष्टवन्तो न मानवाः।
लेखैरेव विजानन्ति मन्यन्ते ते तु तं खलु ॥ १ ॥
धर्मोपदेशकनिभं नीरसं शुष्कमद्भुतम्।
औदासीन्यप्रदं मौनमुद्रामीलितलोचनम् ॥ २ ॥
गान्धेर्लेखास्तेन साकमन्यायमिव कुर्वते।
यल्लिखत्येष स ततो महीयानस्ति सर्वथा ॥ ३ ॥
अतो यत्तेन लिखितं तदुद्धृत्य समीक्षितुम्।
तदुपस्थानमेतस्य नूनमस्यावमाननम् ॥ ४ ॥
धर्मोपासकतः कस्माच्चिदप्यध्वास्य भिद्यते।
तत्स्मितं मोदजनकं हास्यं हास्यप्रवर्तकम् ॥ ५ ॥
विनोदवीचीर्वहतस्तस्य काचिद्विशिष्टता।
मुग्धस्य बालकस्येव चेष्टा चाप्यस्ति मोहिनी ॥ ६ ॥
चरणन्यासमात्रेण सदनेषु समीरणम्।
सुगन्धि शीतलं मन्दं संचारयति सर्वतः ॥ ७ ॥
निदर्शनं समस्यानामसाधारणमस्ति सः।
मन्ये चान्येऽप्यसामान्याः पुरुषाः सन्ति तादृशाः ॥ ८ ॥
वर्षाण्यावदयं बक्रः प्रश्नो व्यग्रयतीव तान्।
गान्धिरार्तान् प्रति प्रेम्णा तद्धितं चिन्तयन्नपि ॥ ९ ॥
समर्पयति तां शैलीं प्रसूते यात्र पीडितान्।
कदर्थयति या चैतान् इदमप्यस्ति चाद्भुतम् ॥ १० ॥
एकतोऽसावर्हिसाया अनन्योपासकः स्थितः।
परतो राजनयिकं सामाजिकमथ स्वयम् ॥ ११ ॥

प्रतिरूपकमीदृक्षं काङ्क्षते यद्बलात्कृतिम् ।
हिंसां च पूर्णां श्रयते शैलीमालम्ब्य तादृशीम् ॥ १२ ॥
तत्तु न्यूनाधिकत्वेनाराजकं दर्शनान्वितम् ।
अराजकानामादर्श एकः सम्प्रति दूरतः ॥ १३ ॥
सारल्येनानुमातुञ्च न वयं तस्य शक्नुमः ।
अतस्ते विद्यमानां तामवस्थामेव मन्वते ॥ १४ ॥
परिवर्तनं साधनैः कैरित्यत्रापन्न तावती ।
यावत्यस्तीह हिंसायामिति मन्येऽहमात्मनि ॥ १५ ॥
वर्तमानव्यवस्थायाः परिवृत्यै तु माध्यमैः ।
कैरत्र कार्यं सम्पाद्यमिति प्रश्नं विहाय च ॥ १६ ॥
वयमीदृक्षमादर्शभूतं ध्येयं समक्षतः ।
रक्षितुं प्रभवामो यत्सुपूरं स्यान्न दूरतः ॥ १७ ॥
ब्रूते कदाचिदात्मानं स समाजैकवादिनम् ।
समाजवादशब्दस्य त्वर्थस्तस्य विलक्षणः ॥ १८ ॥
स्वकल्पितस्य तस्यात्र न सम्बन्धोऽस्ति कश्चन ।
आर्थिकप्रतिरूपेण सुप्रसिद्धेन सर्वतः ॥ १९ ॥
तं दृष्ट्वान्येऽपि काङ्ग्रेस्यास्तं तु शब्दं प्रयुञ्जते ।
ते मानवसमाजस्य सेवां गृह्णन्ति तां ततः ॥ २० ॥
इत्थमज्ञातमूल्याया शब्दावल्याः प्रयोजकाः ।
जनाः सहासते तेन प्रसिद्धिं काञ्चिदास्थिताः ॥ २१ ॥
सर्वे हि ते राष्ट्रियायाः शिष्टैर्ब्रिटिशसम्पदः ।
प्रधानमन्त्रिणं रैम्जेमैकडानल्डमन्विताः ॥ २२ ॥
जाने समाजवादेन गान्धिः परिचितोऽस्त्यलम् ।
समाजवादे वा मार्क्सवादे वाऽप्यर्थशास्त्रके ॥ २३ ॥
ग्रन्था अधीता यत्तेनान्यैर्वादश्च प्रवर्तितः ।
परन्तु मम विश्वासः स्थिरमन्तः स्थितोऽस्ति यत् ॥ २४ ॥
ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि ।
नहि सर्वो विजानाति सर्वं चेति विचारतः ॥ २५ ॥

नात्यन्तिकमहत्त्वेषु विषयेषु मनीषया ।
एकया हि वयं दूरं नेतुं शक्याः कदाचन ॥ २६ ॥
विलियम् जेम्स आहेदं—यदि चित्तं न वाञ्छति ।
विश्वस्यतां न मस्तिष्कं विश्वासं स्थापयिष्यति ॥ २७ ॥
सामान्यं दृष्टिकोणं हि भावना नः प्रशासति ।
ता एव नश्च मस्तिष्कं स्ववशे स्थापयन्त्यमूः ॥ २८ ॥
विचारविषयः सोऽस्तु धार्मिको वार्थिकोऽपि सः ।
सोऽस्तु सामाजिकः किं वा सोऽस्तु नो राजनैतिकः ॥ २९ ॥
सर्वोऽपि निर्भरः सोऽयं भावनासु भविष्यति ।
शोपेन हारोऽप्याहैतत्—सङ्कल्पयति यन्नरः— ॥ ३० ॥
तत्स साधयितुं शक्तः किन्तु सङ्कल्पमेष यम् ।
कर्तुमिच्छति तत्रैष न स्वतन्त्रो भविष्यति ॥ ३१ ॥
अफ्रीकायां दक्षिणस्यां प्रारम्भिकदिनेष्वभूत् ।
श्रीगान्धौ भूयसी काचित्परिवृत्तिरिति श्रुतम् ॥ ३२ ॥
तेनास्य जीवने कृत्स्ना परिवृत्ता विचारदृक् ।
ततः प्रभृति तेनैको विचाराधार आश्रितः ॥ ३३ ॥
तमाधारं परित्यज्य प्रश्ने कस्मिंश्चनापि सः ।
न स्वतन्त्रो विचारं तं प्रवर्तयितुमात्मनः ॥ ३४ ॥
ये केचन नवां तस्मै बोधयन्ति विचारणाम् ।
तां स ध्यानेन धैर्येण शृणोति सततं स्थिरः ॥ ३५ ॥
नम्रतायां रुचौ चास्यां सत्यामपि निवेदकाः ।
मनस्यनुभवन्त्येतैः शिलाखण्डः स आहतः ॥ ३६ ॥
केषुचिच्च विचारेषु दृढास्था तस्य बन्धिता ।
यत्रान्यत्सर्वमप्यस्य प्रतिभाति निरर्थकम् ॥ ३७ ॥
गौणेषु वस्तुषु ध्यानान्मुख्याद् ध्यानं चलिष्यति ।
तेन तद्रूपविकृतिर्भवेच्चित्राभिलेखवत् ॥ ३८ ॥
दृढस्य च निजास्थायां सर्वमन्यत्प्रसेत्स्यति ।
साधुभिः साधनैः साध्यं साधु सिद्ध्यति तत्स्वयम् ॥ ३९ ॥

अहं मन्ये तद्विचाराधार एषोऽस्ति निर्मलः ।
समाजवादं वा मार्क्सं संदेहेनैष पश्यति ॥ ४० ॥
तयोर्हिंसाभिसम्बन्धात् वर्गयुद्धमपीदृशम् ।
हिंसागन्धपराभूतं तस्मै नाम न रोचते ॥ ४१ ॥
नेच्छत्यसौ च सामान्यजनावासादिपद्धतिम् ।
परिवर्तयितुं चाऽपि परिवर्धयितुं तथा ॥ ४२ ॥
चेदारामेणावकाशे स्थास्यन्त्येते जनास्तदा ।
तेषु भोगविलासाद्यैः पापवृद्धिर्भविष्यति ॥ ४३ ॥
अमी मुष्टिमिता भोगे विलासे पतिताः सदा ।
पतिताः सन्त्यनर्थायाधिकं मा वीवृधन्नमी ॥ ४४ ॥
षड्विंशे लिखितं पत्रं तेन, तस्य प्रयोजनम् ।
अस्माभिरासीद् विज्ञातुं, शक्यमेतन्न चान्यथा ॥ ४५ ॥
आङ्ग्लदेशे किलेङ्गालखनिश्रमिकवृन्दकम् ।
हरितालेऽवतीर्णं तन्नाथैः खनय आवृताः ॥ ४६ ॥
एतत्संघर्षसमये यत्पत्रं तमुपागमत् ।
तस्यैवमुत्तरं तेन दत्तमासीन्महात्मना ॥ ४७ ॥
महाशयेन येनेदं लिखितं तेन चान्ततः ।
संघर्षेऽस्मिन् श्रमाजीवा भविष्यन्ति पराजिताः ॥ ४८ ॥
इति तैः कृत्रिमोपायानाश्रित्याधिकसन्ततेः ।
उत्पादनं रोधनीयं तेषां संख्याल्पिता भवेत् ॥ ४९ ॥
अस्य पत्रस्योत्तरं च लिखितं तर्हि गान्धिना ।
अन्तिमा चास्ति वार्तेयं खनिनाथा गलत्पथाः ॥ ५० ॥
अपि जेष्यन्ति चेत्तेषां जयोऽस्मान्न भविष्यति ।
यस्मादेते श्रमाजीवा जनयन्ति बहुप्रजाम् ॥ ५१ ॥
प्रत्युतैतैः श्रमाजीवैः संयमो यन्न शिक्षितः ।
तेन पापेन ते न्याय्यपथा अपि पराजिताः ॥ ५२ ॥
बहुप्रजोत्पादनतस्त्वमी कर्मसु नोदिताः ।
पारिश्रमिकवृद्ध्यै च प्रेरयन्ति खनीश्वरान् ॥ ५३ ॥

धूम्रपानं मद्यपानं द्यूतमावश्यकं कथम् ।
चेदुच्यते—सर्वमिदं खनिनाथैरपि श्रितम् ॥ ५४ ॥
तथाप्यारामवंशीं ते वादयन्ति मुदान्विताः ।
तत्रेदमवधेयं स्यात्—श्रमाजीवा न चेदमी ॥ ५५ ॥
स्वश्रैष्ठ्यं स्वनिनाथभ्येः स्युः साधयितुमक्षमाः ।
संसारसंवेदनाप्तेरधिकारं कथं श्रिताः ॥ ५६ ॥
किन्तु ते खनिनाथानां संख्यां वर्धयितुं स्वयम् ।
खनिनाथत्वमेवाप्तुं प्रयतन्ते तपस्विनः ॥ ५७ ॥
वयमुच्यामहे 'लोकतन्त्रंयत्त्वाद्रियेमाहि ।
अन्ये चैवाभिधीयन्ते—लोकतन्त्रस्य शासने ॥ ५८ ॥
आर्थिकीयं दशा लोके भविष्यति परिष्कृता ।
संख्यात्र खनिनाथानां भविष्यति च भूयसी ॥ ५९ ॥
भूयसां खनिनाथानां मद्यपानादिदूषणाः ।
न स्युरित्यद्य तास्त्याज्याः श्रमाजीविभिराग्रहात् ॥ ६० ॥
यदा मया पत्रमिदं पठितं तर्हि सम्मुखे ।
आङ्ग्ला खनिश्रमाजीबास्तेषां भार्यार्भकास्तथा ॥ ६१ ॥
क्षुत्क्षामकण्ठवदनाः साक्षादिव समागताः ।
षड्विंशवर्षेऽदृश्यन्त ये मया ग्रीष्मगोचरे ॥ ६२ ॥
ते निर्धनास्तदा पैशाचिकवृत्त्यात्ममर्दिनीम् ।
प्रणालीमभिसंक्षुब्धाः सङ्घर्षं तं स्म कुर्वते ॥ ६३ ॥
सङ्घर्षेऽस्मिन्निःसहाया दयनीयदशां गताः ।
गान्ध्युल्लिखितवार्तास्ता न यथार्थास्तदाऽभवन् ॥ ६४ ॥
पारिश्रमिकवृद्ध्यै ते नागृह्णन् किन्तु तत्क्षये ।
यत्प्राप्यते न तन्न्यूनी क्रियेतेत्येकयाचनाम् ॥ ६५ ॥
अवरुद्धाश्च खनयः प्रोद्घाट्यन्तां पुनस्त्विति ।
द्वितीयां याचनामेते पुरस्कुर्वन्ति साग्रहम् ॥ ६६ ॥
किन्त्वस्मिन् समये ताभिर्नास्ति किञ्चित्प्रयोजनम् ।
नास्ति प्रयोजनं यत्ते सन्तानोत्पत्तिरोधनम् ॥ ६७ ॥

कुर्वन्नु वा न कुर्वन्तूपायैस्तैरिह कृत्त्रिमैः ।
यद्यप्ययं स्वामिभृत्यसंघर्षे नूतनो विधिः ॥ ६८ ॥
मयात्रोत्तरतो गान्धेरिदं मे तावदुद्धृतम् ।
यथास्माकं सहायोऽस्तु तत्तत्तात्पर्यबोधने ॥ ६९ ॥
आद्यन्ते कीदृशं दृष्टिकोणं चेति निर्दशितम् ।
गान्धेर्हि दृष्टिकोणोऽस्ति स समाजैकवादिनाम् ॥ ७१ ॥
न तेषामेव साम्राज्यवादिनामपि दृक्पथात् ।
सर्वथा भिन्न एवास्ति पर्याप्तं दूरमेव वा ॥ ७२ ॥
यदि तस्मै निवेद्येत-बाधन्तां स्वार्थिनो न चेत् ।
विज्ञानोद्योगसाहाय्याद्वयमद्यतनस्थितेः ॥ ७३ ॥
अधिकान् भोजनाच्छादावासान् कर्तुं क्षमागहे ।
तेषाञ्चावासभोजादिपद्धतिं चोन्नयामहे ॥ ७४ ॥
तदा तस्य न तत्रापि भविष्यति न वै रुचिः ।
वस्तुतोऽसो नातिसीमं क्वचिदस्ति कुतूहली ॥ ७५ ॥
अतः समाजवादेन भवेल्लाभो न तं प्रति ।
सदधात्याकर्षकत्वं यथान्यान् मादृशान् प्रति ॥ ७६ ॥
साम्राज्यवादमप्ये ष सोढुं शक्तोऽस्ति सावधिम् ।
सहि दोषान्निगृह्यातिसीम्नि वै तान् नियच्छति ॥ ७७ ॥
समाजवादं साम्राज्यबादं चेत्युभयं हि सः ।
न वै रोचयते तत्र द्वितीयं च सहेत सः ॥ ७८ ॥
आतोऽपि तं स सहते स हि पूर्वमुपस्थितः ।
तस्मै न मुद्रयत्येष लोचने वस्तुलोचने ॥ ७९ ॥
तन्मस्तिष्के विचारान् स्वान् वेशयन्नथ रोहयन् ।
कदाचिदेष स्खलिते भवेयं त्वस्ति मे मतम् ॥ ८० ॥
इत्थं स चिन्तयन् भाति तद्वचः सु च यान्यमी ।
परस्परविरुद्धास्ते त्वस्तव्यस्ततत्वकादयः ॥ ८१ ॥
अस्मान् विदधते व्यग्रानस्ति तत्कारणं त्विदम् ।
तर्काधारास्तस्य भिन्नाः सर्वथा, स च नेच्छति ॥ ८२ ॥

जना इमं बर्धमानमारामं चावकाशकम् ।
स्वजीवनस्याभिन्नाङ्गं मा कल्पिषत लक्ष्यवत् ॥ ८३ ॥
स तु वाञ्छति यल्लोका नैतिके जीवने रताः ।
तदङ्गानि विचिन्वन्तु मुञ्चन्तु च विरोधिनः ॥ ८४ ॥
इमे शारीरिकान् भोगानल्पयन्तु दिने दिने ।
इत्थमाध्यात्मिकं श्रेयो भौतिकं साध्नुवन्तु च ॥ ८५ ॥
ये च सेवां कामयन्ते सर्वसाधारणस्य ते ।
स्वीयार्थिकदशासिद्धयै यतनीयं न तावता ॥ ८६ ॥
याबता यतनीयं तैर्नीचैर्गन्तुं तु तत्स्तरात् ।
मिलन्तु तान् समानत्वस्तरेण च निरन्तरम् ॥ ८७ ॥
एवं कुर्वन्त एवैते निश्चयेनैव तद्दशाम् ।
सुखं वृहत्तरीकर्तुं साधयेयुः सहायताम् ॥ ८८ ॥
तन्मतेनैष एवास्ति लोकतन्त्रो महीतले ।
चतुस्त्रिंशे तु वक्तव्यमेकं गान्धिरदादिदम् ॥ ८९ ॥
तत्रालिखत्स बहवो विरोधाशां तु मां प्रति ।
त्यक्त्वा सन्ति सुखासीनाः किन्त्विदं वाधतेऽत्र माम् ॥ ९० ॥
सलज्जीकरणं तन्मे लोकतन्त्र्यस्मि जन्मतः ।
मिलन्तु तान् समानत्वस्तरेण च निरन्तरम् ॥ ९१ ॥
परोऽपि तद्दशो भूत्वा ततो वापि सुदुर्दशः ।
स्वशक्त्या तत्स्तरं यावत्प्रत्यवातरणोत्सुकः ॥ ९२ ॥
इत्येतेषां विशेषाणां यदि स्यात्स समन्वयः ।
तेनात्मानं लोकतन्त्रवादीत्यामन्यते तु यः ॥ ९३ ॥
सोऽहमस्मीति वक्तुं चाधिकारं यः समाश्रितः ।
स लोकतन्त्रवादी स्यान्न तदक्षरवाचकः ॥ ९४ ॥
एतावदवधि वार्तां गान्धेः सर्वोपि मंस्यते ।
सर्वसाधारणात्स्वस्मिन् 'अहमस्मि विलक्षणः' ॥ ९५ ॥
इत्याकारायाः प्रतीतेर्हेतुना स्वविलासिता ।
स्वोच्चावासादिव्यवस्था तेषामग्रे प्रदर्शिता ॥ ९६ ॥

अत्यावश्यकवस्तूनामपि येषामिहोनता ।
तदत्यशोभनीयं स्यात्तथैवानुचितं भवेत ॥ ९७ ॥
गान्धेरितोऽतिरिक्ताभिर्युक्तिभिर्दृष्टिकोणतः ।
नैव साम्प्रतिकः कश्चिल्लोकतन्त्रादिवादवान् ॥ ९८ ॥
समाजवादी वा कश्चिद्वा साम्राज्यैकवादभाक् ।
न कश्चिदपि साम्मत्यं भजतेऽत्र भुवि स्थितः ॥ ९९ ॥
पुराणधार्मिकदृशस्तेन ते सन्तु सम्मताः ।
उभये हि विचारैक्यदृष्ट्याऽतीतेन यन्त्रिताः ॥ १०० ॥
प्रत्येकं वस्तु तेऽतीतदृष्ट्या पश्यन्ति नित्यशः ।
वर्तमानं भविष्यच्च न शोचन्ति तथातिगम् ॥ १०१ ॥
भूतकालं चिन्तयन्तो यथा हृष्यन्ति खिन्दति ।
भूतं प्रतिनयन्तीनां भविष्यं प्रति चान्यतः ॥ १०२ ॥
द्यावापृथिव्योरिव च स्यादन्तरमिहाद्भुतम् ।
प्राचीने समयेऽस्यासीच्चिन्तनं ह्यपि दुष्करम् ॥ १०३ ॥
सर्वसाधारणस्यात्र संस्कार्या स्थितिरार्थिकी ।
निर्धनाश्च समाजस्याभिन्नान्यङ्गानि चासत ॥ १०४ ॥
धनिनोऽङ्गुलिगण्यास्ते समाजप्रतिरूपके ।
अर्थोत्पादप्रणाल्याश्च मुख्यमङ्गमिमे स्मृताः ॥ १०५ ॥
सुधारकाः समाजस्य धार्मिका अत एव तान् ।
स्वीकुर्वन्ति स्म धनिनः परदुःखेषु कातराः ॥ १०६ ॥
सहैव तान् श्रावयितुं यतन्ते स्म निरन्तरम् ।
न निर्धनेभ्यो बन्धुभ्यः कर्तव्यं विस्मरन्तु ते ॥ १०७ ॥
धनिनो निर्धनानां स्युर्निधिपालाश्च दानिनः ।
इत्थं तद्दानपुण्यं च धर्मस्याङ्गमवीभवत् ॥ १०८ ॥
दरिद्रान् भर कौन्तेय ! मा प्रयच्छेश्वरे धनम् ।
इत्यादीनि च सूक्तानि तद्व्याख्यानाङ्गतामगुः ॥ १०९ ॥
राज्ञां भूस्वामिनां पुञ्जपतीनां च कृते सदा ।
निधिपास्ते भवन्त्वत्रेत्यादर्शं गान्धिरब्रवीत् ॥ ११० ॥

स चात्र बिषयेऽनेकधार्मिकानां परम्पराम् ।
अनुयात्यब्रुवन् काले काले चैवंविधां गिरम् ।। १११ ।।
पोपेनोद्घोषितमिदम्-ध्यातव्यं धनिकैः सदा ।
स्वयमीसामसीहेन निर्धनानां हि भावि तत् ।। ११२ ।।
तेषां हस्तेऽर्पितं, सन्ति ते किलेश्वरसम्पदाम् ।
रक्षकाः सेवकास्तस्य सम्पदां परिवेषकाः ।। ११३ ।।
सन्तीमा हिन्दुधर्मेऽपीस्लामेऽपि च विचारणाः ।
प्रेरणाश्चेति धर्मोऽस्ति दानमेकं कलौ युगे ।। ११४ ।।
उभयेऽप्युपदिशन्तीमे कुरुध्वं दानपुण्यकम् ।
धनिका मन्दिरं वात्र मस्जिदं स्थापयन्ति ते ।। ११५ ।।
धर्मशालाः स्थापयित्वा भाण्डागारांश्च कांश्चन ।
राजतांस्ताम्रकान् दत्त्वा पणान्मनसि मन्वते ।। ११६ ।।
वयं स्मो धार्मिका लोके दानिनश्चेति तत्कुले ।
जाताश्चैवाभिनन्दन्ति निजां पितृपरम्पराम् ।। ११७ ।।
नियोनाम्ना च पोपेन धर्माज्ञैषा प्रवर्तिता ।
तस्यां प्राचीनविश्वस्यादर्शयद् धार्मिकीं दृशम् ।। ११८ ।।
ज्वलद्वाक्यमिदं नूत्नोद्योगस्थित्यां सयुक्तिकम् ।
समुद्धृतमभूत्तेन समाजे मानवे द्वयम् ।। ११९ ।।
सहनं विपदामेकं द्वितीयं धैर्यधारणम् ।
इति भाग्यं तया सिद्धं धैर्यं विपदि' तत्स्मृतम् ।। १२० ।।
मानवः कुरुतां यत्न परं यज्जीवने तु यैः ।
दुःखैः कष्टैः कृतं स्थानं तन्निराकर्तुमक्षमा ।। १२१ ।।
न कापि शक्तिर्युक्तिर्वा न काचिदपि कर्हिचित् ।
बहिष्कर्तुं प्रभवति तद्दुःखं कष्टमप्यहो ।। १२२ ।।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्मेत्यादयः सूक्तयः प्रमाः ।। १२३ ।।
यदि कश्चित्तत्प्रतीतं दम्भमाश्रयते जनः ।
दुःखात्कष्टान्मोचयितुं दत्ते मिथ्याभिसान्त्वनाम् ।। १२४ ।।

आशां चित्ते जनयति निर्विघ्नारामसौख्ययोः ।
स वञ्चयति तान्मूढो दम्भं दर्पं समाश्रितः ॥ १२५ ॥
मिथ्या प्रतिश्रुतिस्तस्य द्विगुणीकुरुतेऽस्य तत् ।
प्रत्युतैतन्महद्दुःखमत्यन्तासह्यताङ्कतम् ॥ १२६ ॥
पश्येमेदं जगत्तस्य रूपं वास्तविकं यथा ।
तद्दुःखनाशोपायञ्चान्यत्र तं मार्गयामहे ॥ १२७ ॥
वस्तुतस्तूपभोगानामवगन्तुमिह स्थितिम् ।
मूल्यमङ्कयितुं चापि परलोकस्य शाश्वतम् ॥ १२८ ॥
जीवनेऽपि विचारोऽत्र करणीयः प्रतीयते ।
प्रकृतेर्वयं महत्सत्यं शिक्षेमहि यदादितः ॥ १२९ ॥
ईसवीयेऽपि धर्मेऽस्मै सिद्धान्तः सर्वसम्मतः ।
तत्सत्यमेतदस्तीह लौकिकाज्जीवनात्परम् ॥ १३० ॥
आरभ्यते यथार्थं तज्जीवनं पारलौकिकम् ।
ईश्वरो नायमस्मान् हि जगत्यामुदपादयत् ॥ १३१ ॥
भोक्तुं मिथ्योपभोगांस्ताननित्यान् क्षणभङ्गुरान् ।
इदमीश्वरदत्तं नो देशनिर्वासनं परम् ॥ १३२ ॥
न जगन्निजदेशोऽयमिति जीवा विजानताम् ।
धनमन्यपदार्थांश्च मन्यन्तेऽभीष्टमुत्तमम् ॥ १३३ ॥
तेषां बाहुल्यमल्पत्वं वात्र संभवति स्फुटम् ।
शाश्वते तु सुखे तेषां सत्त्वासत्त्वे न वाञ्छिते ॥ १३४ ॥
प्राक्कालिकेन जगता सम्बद्धा धार्मिकी रुचिः ।
आसीद्यस्यां वर्तमानदुःखात्त्राणं तदेककम् ॥ १३५ ॥
या पारलौकिकी जीवजीवनाशेति कीर्त्यते ।
आशातीतोन्नतिर्जाता यद्यप्यार्थिकसंस्थितौ ॥ १३६ ॥
तथाप्यतीतस्वप्नेनाविष्टास्मद्दृष्टिरस्त्यसौ ।
अद्याप्याध्यात्मिकी वार्ता भवत्येषा प्रभाविता ॥ १३७ ॥
अस्तव्यस्ता गोलमूल्या मीयते या न तोल्यते ।
क्वाथोलिकानां दृश्याति द्वादशीं वा त्रयोदशीम् ॥ १३८ ॥

ये शत्यावन्यविज्ञानामन्धकारयुगं स्मृते ।
धर्मे ते एवेसवीये ख्याते 'स्वर्णयुगाख्यया' ॥ १३९ ॥
यतस्तदेसवीयानां सतामासीत्प्रभूतता ।
प्रस्थानं धर्मयुद्धाय चक्रुस्तदनुगा नृपाः ॥ १४० ॥
निर्मिताश्चाभवंस्तर्हि गोथिकागिरजागृहाः ।
तेषां मते युगमिदं लोकतन्त्रस्य वस्तुतः ॥ १४१ ॥
महाजनाङ्कुशे मध्यकाले स स्थापितोऽभवत् ।
ततः पूर्वञ्च पश्चाच्च लोकतन्त्रो न तादृशः ॥ १४२ ॥
साक्षादक्रियतायं न कदाचिन्न च कुत्रचित् ।
मुस्लिमाः पुनराद्यानां खलीफानां हि विस्मयात् ॥ १४३ ॥
दिशि दृष्टिं क्षिपन्ति स्म लोकतन्त्राय धर्मतः ।
तेर्हि दूरदवीयःसु देशेषु विजयध्वजाः ॥ १४४ ॥
समुद्धूतास्तथा रामराज्यस्वप्नावलोकिनः ।
हिन्दवो वैदिकं कालं पौराणिकमिहैक्षिरे ॥ १४५ ॥
तथापि विश्वेतिहासा वदन्ति प्रायशस्तदा ।
आधिक्येन प्रजा आसन् महासङ्कटसंस्थिताः ॥ १४६ ॥
तासां कृते ह्यभूद्घोरं दुर्भिक्षं ह्यन्नवस्त्रयोः ।
शीर्षस्थाः केचिदध्यात्मजीवनं चाप्ययापयन् ॥ १४७ ॥
तेषां तदावकाशश्च साधनञ्चाप्यवर्तत ।
अन्येषां तु कृते रात्रिन्दिवं जठरपूरणम् ॥ १४८ ॥
चिन्तानाञ्चापि यत्नानां लक्ष्यमेकमभूदिदम् ।
उन्नतिं ते सांस्कृतिकीमपि चाध्यात्मिकीमपि ॥ १४९ ॥
साधयन्तु कथं नाम वाधितास्ते क्षुधा तृषा ।
द्वादश्या वा त्रयोदश्याः शत्याः सा स्थितिकल्पना ॥ १५० ॥
बङ्गेषु सोऽन्तिमो राजा गोवर्धनसमाश्रयः ।
असौ लक्ष्मणसेनोऽभूद्द्वादश्यामिह भारते ॥ १५१ ॥
त्रयोदश्यां शार्ङ्गदेवो गुर्जरेषु नरेश्वरः ।
तस्यैतिहासिकं वृत्तमनुसन्धेयमत्रतत् ॥ १५२ ॥

औद्योगिकं युगं स्वेन समानयति दुर्गुणान् ।
घनीभूता दृशोरग्रे ये भ्राम्यन्ति निरन्तरम् ।। १५३ ।।
विस्मरामो वयञ्चैतद् समस्ते जगति स्थितम् ।
यत्र यत्रैव भूयैतै सूद्योगा विंतता भुवि ।। १५४ ।।
तत्र तत्रैव भौतिक्या उन्नतेर्मूलमाहितम् ।
येन सांस्कृतिकी चैषाध्यात्मिकी प्रगतिः स्वतः ।। १५५ ।।
जाता जनसमाजस्य कृते सुगमतां गता ।
इदं न भारते स्पष्टं न चाप्यौपनिवेशिके ।। १५६ ।।
देशे प्रतीयते स्पष्टं नात्रोद्योगः फलप्रदः ।
सोऽत्र शोषक एवाभूदार्थिकीं दुर्दशामदात् ।। १५७ ।।
दोषो नोद्योगवादस्याधिपत्यस्य च सोऽस्त्ययम् ।
येन सांस्कृतिकी चैवाध्यात्मिकी नाभवद्गतिः ।। १५८ ।।
काचिदत्रास्ति वस्तूनां पश्चिमीकरणात्मिका ।
क्लृप्तिः सा माण्डलिकतां सुदृढीकुरुते क्रमात् ।। १५९ ।।
तेनास्माकं समस्यानां समाधानं न कल्पितम् ।
प्रत्युतासां प्रपञ्चोऽयं नीतः संकीर्णतां पराम् ।। १६० ।।
इदं दौर्भाग्यमस्माकं न तथादृश्यतां जगत् ।
साम्प्रतं न समाजाय न वस्तूत्पादनाय च ।। १६१ ।।
अपेक्ष्यन्तेऽत्र धनिनस्तेऽद्य जाता निरर्थकाः ।
वाञ्छनीया न ते सन्ति सन्ति नावश्यकाश्च ते ।। १६२ ।।
तेऽद्य मार्गेषु संजाता दुर्वार्याः प्रस्तरा इव ।
न च धर्मोपदेष्टृणामुपदेशाः प्रभाविनः ।। १६३ ।।
यैरिमे धनिनो दाने पुण्ये सन्तु प्रवर्तिताः ।
निर्धनाः स्वस्थितौ कुर्युः सन्तोषमधुना पुनः ।। १६४ ।।
धन्यवादाः प्रदिश्यन्तामीश्वरस्य च तत्कृते ।
सर्वे मितव्ययाः सन्तु जीवन्त्वथ च साधुवत् ।। १६५ ।।
यन्मानवसमाजस्य साधनानीह पूर्वतः ।
प्राचुर्येण प्रवृद्धानि तत्साम्मुख्याय कल्पते ।। १६६ ।।

सांसारिकसमस्यानां चोपाय कर्तुमप्यमी ।
आधिक्येनात्र धनिनः परकीयश्रमाश्रयाः ॥ १६७ ॥

जीवनं यापयन्तीमे समाजे च श्रमाध्वनि ।
समाजोऽयमुत्पादकानां शक्तीनां वै पराश्रयी ॥ १६८ ॥

बाधां करोति चाप्येषोऽपव्ययं कुरुतेऽधिकम् ।
अयं वर्गोऽस्य वर्गस्य जननी च व्यवस्थितिः ॥ १६७ ॥

उद्यमं च तदुत्पादं निरुणद्धि निरन्तरम् ।
समाजस्य द्वयोः शीर्ष्णोः प्रोत्साहयति निःश्रमान् ॥ १७० ॥

अर्थात्तान् येऽन्यदीयेन श्रमेणेहारमन्त्यमी ।
तांश्च ये कर्मणोऽभावान्म्रियन्तेऽत्र बुभुक्षिताः ॥ १०८ ॥

स्वयं गान्धिः पुरालेखीत्-कर्महीनाञ्जनानिमान् ।
क्लृप्नवान् म्रियमाणानां पारिश्रमिक-वेतने ॥ १ ॥

भोजनप्राप्त्युपायत्वादाश्वासनतयेश्वरः ।
ईश्वरो हि मनुष्याणां सृष्टिं कृत्वाभ्युवाच तान् ॥ १७३ ।

भुञ्जीध्वमर्जयित्वात्र न भुञ्जीध्वं विनार्जनम् ।
विनार्जनं हि यो भुंक्ते तस्करः स्तेन एव सः ॥ १७४ ॥

वर्तमानाः समस्याश्च प्राचीनां पद्धतिं श्रिताः ।
प्राचीनैरेव सूत्रैश्च यतन्ते बोद्धुमप्यमूः ॥ १७५ ॥

तासाञ्च विषयेऽतीतकालिकीं वाचमुच्चरन् ।
असामञ्जस्यमेवात्र समुत्पादयते नवम् ॥ १७६ ॥

अभिमन्त्रयतेप्येकं साफल्यं तद्यशोहरम् ।
यतस्तस्मिन् युगे नैताः समस्या जनिताः क्वचित् ॥ १७७ ॥

केषाञ्चिद्धारणा चैषा स्वसम्पत्स्वामितात्मिका ।
विश्वसृष्टेरादिकालाच्चलन्तीध्वेककल्पना ॥ १७८ ॥

वस्तुतः कल्पना सेयं परिवर्तनशालिनी ।
कदाचिदासीद् दासानां सम्पत्सु गणना यतः ॥ १७९ ॥

स्त्रियश्च बालकाश्चैव सम्पदेवान्वमन्यत ।
अन्यथा नोपपद्येते तेषां तौ दानविक्रयौ ॥ १८० ॥

नववध्वाः पूर्वरात्रौ पतिरस्त्यधिकारवान् ।
अथ विश्वजनीनेषु मार्गमन्दिरसेतुषु ॥ १८१ ॥
सामाजिकैर्नागरिकैर्वाधिकारः प्रदर्श्यते ।
पशवोऽद्यापि सम्पत्सु परिगण्यन्त एव ते ॥ १८२ ॥
अनेकदेशेषु पशुस्वामित्वेनाधिकारिता ।
मर्यादिताधिकतया त्वस्ति साद्यापि भारते ॥ १८३ ॥
युद्धकाले स्वसम्पत्तेरधिकारे निरन्तरम् ।
कुठाराघात एषोऽत्र जायते, ह्रियते हि सः ॥ १८४ ॥
स्वसम्पत्तिरियं स्थूलं रूपं त्यक्त्वा दिने दिने ।
दधाति साम्प्रतं नानारूपं हन्त नवं नवम् ॥ १८५ ॥
निधिष्वंशस्वरूपेण व्यङ्केषु न्यसनेन च ।
तथा ऋणप्रदानेन धनराशेर्नियोगतः ॥ १८६ ॥
यथा यथा धारणेयं सम्पदां परिवर्तते ।
तथा तथा राज्यमत्र हस्तक्षेपं करोत्यदः ॥ १८७ ॥
जनतायाचनाभिश्च सम्पत्तिस्वामिनामिदम् ।
अन्धान्वन्धाधिकारांश्च मर्यादयति सर्वतः ॥ १८८ ॥
विविधा हि करा अत्र प्रजाकल्याणकाम्यया ।
गुरवश्च गरीयांसो लग्नाः सन्त्यद्य राज्यतः ॥ १८९ ॥
हरन्त्येते व्यक्तिगतानधिकारान् शनैः शनैः ।
अधिग्रहणमेवेदं वर्तते करनामतः ॥ १९० ॥
नीतेर्हि सार्वजन्याया मूलं विश्वजनीनता ।
न व्यक्तेरधिकारोऽस्ति तद्विरुद्धप्रयत्नगः ॥ १९१ ॥
पश्यामश्चेत्पुराणेऽपि युगे सम्पत्स्वधिकारिता ।
नासीत्ते स्वयमेवात्र राजसम्पत्तयोऽभवन् ॥ १९२ ॥
अद्यापि चाधिकारास्ते सन्ति केषाञ्चनैव तु ।
तत्र संस्थापितस्वार्थानां कथा बहुधा श्रुता ॥ १९३ ॥
अद्यत्वे स्थापितस्वार्थपदार्थोऽप्यन्यथा स्थितः ।
स्त्रीपुंसयोर्हि प्रत्येकमधिकारोऽस्ति घोषितः ॥ १९४ ॥

सर्वे जीवन्तु कुर्वन्तु श्रमं श्रमफलानि च।
यथेच्छमुपयुञ्जन्तु भुञ्जन्तु च ददत्वथ ॥ १९५ ॥
इत्थं लोके परीवर्तमानाः सन्त्येव धारणाः।
नहि स्वामित्वसम्पत्त्योरधिकारो विलुप्यते ॥ १९६ ॥
व्यापकं तु तयोः क्षेत्रं क्रमेणैतद् विधीयते।
इत्थं स्वामित्वसम्पत्त्योः क्वचित्केन्द्रीकृतिस्तु सा ॥ १९७ ॥
केषाञ्चनात्र जीवानामन्येषु प्रभुतामधात्।
सोऽधिकारः समाजस्य हस्तेऽस्ति पुनरागतः ॥ १९८ ॥
गान्धिर्वाञ्छति संस्कारं लोकानां नैतिकं तथा।
आध्यात्मिकं च वाह्यं च तथान्तरिकमार्थिकम् ॥ १९९ ॥
इत्थं परिस्थितिं बाह्यां परिवर्तयितुं च सः।
वाञ्छतीह जनाः सर्वे त्यजन्तु व्यसनान्यमी ॥ २०० ॥
ऐन्द्रियेभ्यश्च भोगेभ्यो वितरन्तु तिलाञ्जलिम्।
कर्मणा मनसा वाचा पवित्राः सन्तु सर्वतः ॥ २०१ ॥
आगृह्णाति स यल्लोका ब्रह्मचर्यपरायणाः।
मादकद्रव्यग्रहणाद्विरमन्तु समन्ततः ॥ २०२ ॥
धूम्रपानादिकं सर्वे वर्जयन्तु भयङ्करम्।
व्यसनं किं गरीयोऽस्ति किं लघीयोऽस्ति चेत्ययम् ॥ २०३ ॥
लोकानां मतभेदस्य विषयो वर्तते ध्रुवम्।
परन्तु लोभः स्वार्थैकपरत्वं च परिग्रहः ॥ २०४ ॥
वैयक्तिकहितार्थञ्च मिथः सङ्घर्ष-सङ्ग्रहौ।
समूहेषु च धर्मेषु कलहो वर्गशोषणम् ॥ २०५ ॥
दमनं चात्र राष्ट्राणां मिथः सङ्ग्रामवर्तनम्।
इत्येतेषां पुरस्तात्ते दोषा व्यक्तिगतास्तथा ॥ २०६ ॥
ते समाजगताश्चैव तथा हानिकरा न ते।
किमत्र संशयः कश्चित्कस्यचिद्वोपजायते ॥ २०७ ॥
सत्यमेतद् गान्धिरयं हिंसाञ्च कलहं मिथः।
जुगुप्सते परन्त्वेते सन्ति श्रीमत्समाजके ॥ २०८ ॥

स्वाभाविकतया सर्वं येन जाता जनश्रुतिः ।
'यस्य हस्ते यष्टिरस्ति महिषी यातु तद्गृहे' ॥ २०९ ॥
पुराणयुग वच्चास्ति व्यवस्था यस्य चेदृशी ।
'बाह्वोः शक्तिर्हरेत्सर्वं सर्वमात्मगृहं नयेत्' ॥ २१० ॥
युगस्यास्य च लाभेच्छा सूते सङ्घर्षमुद्धतम् ।
इयं व्यवस्थाऽऽचिच्छित्सां मानवस्य लुलुण्ठिषाम् ॥ २११ ॥
स्वाभाविकीं तां पुष्णाति तथा पल्लवयत्यमूम् ।
पुष्पयत्यथ कालेन फलयत्यपि ते इयम् ॥ २१२ ॥
निःसंशयं मनुष्यस्योच्चाकाङ्क्षां तु प्रदीप्य सा ।
तदीयहीनवृत्तीनामपि पुष्टिं करोत्यसौ ॥ २१३ ॥
इयं व्यवस्था सफला भवत्यत्र तदा, यदा ।
अत्रैकोऽन्यं पातयते पृष्ठं चस्याधिरोहति ॥ २१४ ॥
समाजश्चेदिमान्येषामुद्देश्यानि प्रपूरयन् ।
एषां महत्त्वाकाङ्क्षास्ताः प्रोत्साहयति, तान् प्रति ॥ २१५ ॥
समाजस्य तथोत्कृष्टा आकृष्टाः सन्ति व्यक्तयः ।
तदा किं मन्यते गान्धिः समाजस्य सुधारणाम् ॥ २१६ ॥
सदाचारा भविष्यन्ति किमादर्शाश्च शाश्वताः ।
एवंविधेऽपि किं वातावरणे स महामतिः ॥ २१७ ॥
लोकान् सदाचारपरान् विधातुमिह शक्ष्यति ।
सर्वसाधारणांश्चैष जनान् सेवापरायणान् । २१८ ॥
सम्भाव्यते कतिपयान्निर्मातुं स तथाविधान् ।
साफल्यमपि लब्धः स्यात् समाजं तु न यावता ॥ २१९ ॥
लुब्धादर्शान्मोचयित्वा वर्जित्वा लाभभावनाम् ।
विशुद्धं नु करिष्यति न तावद्बवो जनाः ॥ २२० ॥
मार्गमेनं परित्यक्तुमुद्योक्ष्यन्ति नवे पथि ।
नैष प्रश्नः सदाचारैर्नीतिशास्त्रैश्च सङ्गतः ॥ २२१ ॥
अयन्तु साम्प्रतं लोकापेक्षितो व्यावहारिकः ।
पङ्के हीदृशि तन्मग्नं निराशं स्वविनिर्गमे ॥ २२२ ॥

ततस्तदुन्मज्जनार्थमुपायोऽन्विष्यतामिह ।
मिकावरवदत्रैष नोपविष्टैः प्रतीक्ष्यताम् ॥ २२३ ॥
किञ्चिद्भविष्यत्येवेति यद्भविष्यैर्न भूयताम् ।
राशिवादः, साम्यवादो न समाजादिवादकाः ॥ २२४ ॥
दुष्टपक्षसमीक्षा वा नाप्याशात्र निराश्रया ।
कश्चित्स मध्यमो मार्गो निर्गतोऽत्र भविष्यति ॥ २२५ ॥
योऽद्याधिकतरप्रत्ननवीनपदवीचितान् ।
सर्वांस्तान् सद्विचारांस्तु समन्वेष्यति वेत्यसौ ॥ २२६ ॥
न किञ्चिदपि कार्यं नो वक्ष्यतीत्यस्ति निश्चितम् ।
निदानं ह्यस्य रोगस्य धारणीयं भविष्यति ॥ २२७ ॥
उपचारैश्च विज्ञेयः प्रयोक्तव्यो भविष्यति ।
निश्चप्रचमिदं चास्ति यत्र वर्तामहे वयम् ॥ २२८ ॥
न तत्रैवाधुना स्थातुं शक्नुमो राष्ट्रदृष्टितः ।
न चान्ताराष्ट्रदृष्टयात्रावस्थातव्यं भविष्यति ॥ २२९ ॥
मार्गद्वयमिहास्माकं कृते केवलमस्ति यत्— ।
पश्चाद्वा प्रतिगच्छेम पुरो वानुसरेम तत् ॥ २३० ॥
परं पश्चात्तु प्रगतिः साम्प्रतं नास्ति कल्पितुम् ।
इति नास्त्येष संकल्पविकल्पावसरोऽत्र सः ॥ २३१ ॥
तथापि गान्धेर्बहुभिर्जायतेऽत्र प्रवृत्तिभिः ।
तद्द्वयेयमतिसङ्कीर्ण स्वावलम्बिव्यवस्थितिम ॥ २३२ ॥
पुनरानयतीहाग्रे स न राष्ट्रं हि केवलम् ।
बिधित्सति स्वावलम्बि प्रतिग्राममपीह सः ॥ २३३ ॥
पुराऽभूवन् समाजेषु ग्रामास्ते स्वावलम्बिनः ।
ते भोजनार्थमन्नानि परिधानाय वाससी ॥ २३४ ॥
स्वापेक्षितानि सर्वाणि वस्तून्युत्पादयन्ति यत् ।
निश्चितस्तन्निवासोऽभूदत्यन्तं निर्धनोचितः ॥ २३५ ॥
मन्ये न सर्वदा गान्धेरिदं लक्ष्यं भविष्यति ।
इदं ह्यसम्भवं लक्ष्यं न स्थायित्वं किलार्हति ॥ २३६ ॥

तथा सति च देशास्ते बहुसंख्यजनाश्रयाः ।
नार्हन्ति जीवितुं लोके सहिष्यन्ते न ते ततः ।। २३७ ।।
पश्चात्प्रतिगतिं लोकाः क्षुधा मर्तुं च वैवशीम् ।
मन्येऽत्र भारते देशे कृषिमुख्येऽतिनिर्धने ।। २३८ ।।
जीवनस्य स्तरो नूनं निम्न एव सदा स्थित ।
ग्रामोद्योगानुन्नमय्य स्थितिः संस्कारमर्हति ।। २३९ ।।
शेषेण जगता चापि वयं स्मो यन्निबन्धिताः ।
असम्भवैव सा चास्ति जगद्भिन्नतया स्थितिः ।। २४० ।।
अतः सर्वं समाधेयं कृत्स्नस्य जगतो दृशा ।
तया दृशा च सङ्कीर्णस्वावलम्बिव्यवस्थितेः ।। २४१ ।।
कल्पनापि न लोकेऽस्मिन् कदाचिदपि युज्यते ।
अहं व्यक्तिदृशा मन्ये तस्याश्चावाञ्छनीयताम् ।। २४२ ।।
अनिवार्यतयास्माकमुपायः सम्भवत्ययम् ।
समाजवादव्यवस्थास्थापनं तदिहोदितम् ।। २४४ ।।
इह स्यात्सम्पदुत्पादस्तद्विभागश्च नैकतः ।
जनताहस्तगा भूयाद्दृशा विश्वजनीनया ।। २४५ ।।
कथञ्च स्यात्कार्यमिदमित्यस्ति विषयः पृथक् ।
इयत्स्पष्टन्तु चेदल्पजनलाभो भवेदिह ।। २४६ ।।
अस्माभिर्निजराष्ट्रस्य जातेश्च हितकाम्यया ।
कार्यरोधो न कर्तव्यस्तेषामापत्प्रकाशनात् ।। २४७ ।।
यदि सामाजिकी काचित्संस्था वा राजनैतिकी ।
बाधां प्रकुरुते तस्यां परिवृत्तौ तदा त्वियम् ।। २४८ ।।
संस्था समापनीया स्यान्नत्वादर्शो विवर्ज्यताम् ।
वाञ्छनीयाय नो तस्मै देयो हन्त तिलाञ्जलिः ।। २४९ ।।
तादृश्या संस्थया सन्धिर्देशद्रोहोऽस्ति केवलः ।
आभ्यश्च परिवृत्तिभ्यः प्रेरयेन्नो जगद्दृशा ।। २५० ।।
गतिं च परिवृत्तीनां सा तीव्रीकुरुतादपि ।
किन्तु ता इह साध्याः स्युर्नूनं बहुजनेच्छया ।। २५१ ।।

अता जनान् समुद्बोध्य परिवर्तनपक्षगः ।
तत्सङ्ग्रहोऽपेक्षितोऽस्ति नाल्पैः स्यात्परिवर्तनम् ।। २५२ ।।

नापि तद्धिसया साध्यं साध्यं तद्धार्दिकाज्जवात् ।
परिवृत्तिरतः साध्या हृदयानां प्रबोधनैः ।। २५३ ।।

इयमद्यतनी येषां व्यवस्था स्वार्थसाधनी ।
तेऽपि सम्बोध्य साध्याः स्युः परिवर्तनपक्षतः ।। २५४ ।।

यद्यप्यसम्भवं भाति बहूनां तेषु बोधनम् ।
यावन्तोऽपि प्रबुद्धाः स्युस्तावद्भिर्नः प्रयोजनम् ।। २५५ ।।

खाद्यान्दोलनमप्यस्ति कृन्तनं वयनं स्वयम् ।
तद्विशेषात्प्रियं गान्धेर्व्यक्त्यान्दोलनतीव्रता ।। २५६ ।।

सास्मानौद्योगिके काले पश्चात्क्षिपति, बाधते ।
न सास्ति महतः कस्यचित्प्रश्नस्य समाहितिः ।। २५७ ।।

नैषा विश्वसितुं योग्या तया दृष्टया कदाचन ।
किं च सैकां मनोवृत्तिं सूते तां लक्ष्यदिग्गतिम् ।। २५८ ।।

न साधयति किन्त्वस्यामुपस्थापयति त्रुटिम् ।
तथाप्यहं स्वीकरोमि लाभं तस्या अपि क्वचित् ।। २५९ ।।

यावद् व्यापकरूपेण कृषेरुद्योगपद्धतेः ।
प्रश्नानां कृत्स्नदेशेऽस्मिन् समाधानं न साध्यते ।। २६० ।।

तत्कार्यं शासनस्यास्ति तं भारं शासनं वहेत् ।
तावद्या भारते कार्याभावजन्या दरिद्रता ।। २६१ ।।

यस्या नान्तोऽस्ति कुत्रापि नैष्कर्म्यस्य प्रभावतः ।
ग्रामेष्वेतच्च नैष्कर्म्यं भूय एवास्ति चांशिकम् ।। २६२ ।।

शासनं तन्निवृत्त्यर्थं नैव किञ्चन चेष्टते ।
नापि नैष्कर्म्यपीडायाः कृते दत्ते सहायताम् ।। २६३ ।।

इत्थमार्थिकदृष्ट्यैषा खादी क्वचिदिहांशिकीम् ।
क्वचिच्च पूर्णां नैष्कर्म्यनिवृत्तिं साधयत्यमूम् ।। २६४ ।।

साहाय्यमेतच्च जनैः स्वयत्नात्समुपार्जितम् ।
इति कोऽप्यात्मविश्वासो जागर्त्येषां मनस्स्वयम् ।। २६५ ।।

तेन चात्माभिमानोऽपि तेषु कश्चित्प्रबोधितः ।
खाद्याः प्रभावो लोकानां मनस्स्वापतितः परः ॥ २६६ ॥

नगरग्रामयोर्मध्ये यश्च खातो महान् स्थितः ।
सोऽपि खाद्याः समानेनोद्योगेन विनिवारितः ॥ २६७ ॥

पठितांल्लिखितान् मध्यवर्गीयान् सा कृषीवलैः ।
सामीप्यं किञ्चिदापाद्य शिक्षतेस्म श्रमे रुचिम् ॥ २६८ ॥

वाससः परिधानेन दर्शनेन च मानसे ।
प्रभावः कोऽपि पतति, खाद्यास्त्वतिशयेन सः ॥ २६९ ॥

यदा मध्यमवर्गीयैः खादी परिहिता तनौ ।
शुभ्रया प्रभया तस्या मनः शुभ्रमजायत ॥ २७० ॥

साधारण्यं च तद्वेषाद् ग्राम्यतां चापि दृश्यताम् ।
निराकृत्यैकतामाधात्सर्वसाधारणैः सह ॥ २७१ ॥

निम्नमध्यमवर्गीयैः स्ववेषविषये पुनः ।
धनिकानामनुकृतिः परित्यक्ता स्वचित्ततः ॥ २७२ ॥

साधारणेन वेषेण जाग्रती हीनभावना ।
खाद्याः सम्परिधाने नो हीना कर्पूरगन्धवत् ॥ २७३ ॥

ये किलाद्यापि कौशेयं दधते मलमलादिकम् ।
तान् खादीधारिणः सत्यं सम्मानेनातिशेरते ॥ २७४ ॥

खादीधारिषु च क्वापि समवेतेषु कार्यतः ।
कोऽत्रास्ति धनिकः कश्च निर्धनो नेति चीयते ॥ २७५ ॥

समानवेषभाषाणां समां संस्कृतिमर्चताम् ।
तेषां स बन्धुभावोऽपि जागर्ति स्म परस्परम् ॥ २७६ ॥

निःसंशयञ्च कांग्रेसं खाद्यैव जनतामगात् ।
राष्ट्रियस्वाधीनताया वेषभूषा त्वभूदियम् ॥ २७७ ॥

वानयन्त्रस्वामिनां सा मूल्यवृद्धिकरी गतिः ।
खाद्यैव रुद्धाभूत्पूर्वं सा लङ्काशायरादिषु ॥ २७८ ॥

वैदेशिका एव वानयन्त्रागारा अरुन्धत ।
यदा कदाचिद्रुद्धाभूत्सा त्वेषां प्रतियोगिता ॥ २७९ ॥

यथात्र विश्वयुद्धादौ तथा ते स्वामिनः पुनः।
वैदेशिकपटाभावे वस्त्रमूल्यान्यवर्धयन् ॥ २८० ॥
वानयन्त्रालयैरत्र भारतीयैस्तु निर्भयैः।
यथेष्टमूल्यलाभेन समृद्धिः समगृह्यत ॥ २८१ ॥
खाद्यां तूत्पाद्यमानायां शाश्वती प्रतियोगिता।
तान् स्वच्छन्दतयाऽन्यायाद्रुणद्धि स्म विशेषतः ॥ २८२ ॥
ततः स्वदेश्यान्यदेश्यवस्त्राणान्तु वहिष्कृतेः।
आन्दोलनेनापि तेषां कृता भूरि सहायता ॥ २८३ ॥
यतःप्रभृति खादीयं प्रतिस्पर्द्धास्ववातरत्।
ततःप्रभृति वार्तैषा काचिदन्याप्यजायत ॥ २८४ ॥
वानयन्त्रालयैः पश्चाद् भारतीयैरपि क्रमात्।
स्थूलवस्त्रोत्पादनेन खादौ भावनयान्विताः ॥ २८५ ॥
वञ्चिता भारतीयाश्च खादी हानिं प्रपादिता।
परिस्थित्या कयाचित्तु ततो युद्धसमानया ॥ २८६ ॥
प्रवेशो रुद्ध एवाभूद् भारते तस्य वाससाम्।
वानयन्त्रालयाः किं किं भारतीया व्यधास्यत ॥ २८७ ॥
यदि खाद्या न तन्मार्गे प्रतिरोधोऽकरिष्यत।
खादी संघटनं जातं समर्थमधुनाधिकम् ॥ २८८ ॥
तद्रोद्धमपि शक्तं तं तेषामन्यायमीदृशम्।
स्वकार्यवृद्ध्या देशस्यापेक्षामपि विगर्हितुम् ॥ २८९ ॥
खाद्या आन्दोलस्यैते लाभाः सन्त्यत्र यद्यपि।
तथापि मे तत्सङ्क्रान्तिकालिकं भात्यशाश्वतम् ॥ २९० ॥
मुख्यार्थिकव्यवस्थातोऽर्थात्समाजैकपादतः ।
पूर्वं तत्काङ्कुरेसस्य सहकारिप्रवृत्तिवत् ॥ २९१ ॥
भविष्यत्यपि वर्तेत प्रवर्तेत च साग्रहम्।
परं भविष्ये त्वस्माकं मुख्यशक्तिः कृषेर्दिशि ॥ २९२ ॥
आमूलपरिवृत्तिं तां कुर्यादुद्योगवर्त्मनः।
प्रचारं च प्रसारञ्च कर्तुं भूयः प्रवर्त्स्यति ॥ २९३ ॥

नैवं कृषिसमस्याभिः सह केवलखेलनात्।
अत्र देयांशवृद्धेश्च भूयस्या अपि लक्षशः ॥ २९४ ॥
मुद्राणाञ्च व्ययात् बाह्यप्रतिरूपे कयाचन।
परिवृत्याथ तुच्छानां योजनानाञ्च योजनात् ॥ २९५ ॥
किञ्चिन्न सेत्स्यते कार्यमिहत्या भूव्यवस्थितिः।
समक्षमेव ह्यस्माकं स्खलन्तीव प्रतीयते ॥ २९६ ॥
सा चाधुनोत्पादनाय, विभागायोपयोगिनी।
युक्तियुक्तस्य महतः कर्षणस्य विरोधिनी ॥ २९७ ॥
अस्यां व्यवस्थितौ कृत्वाऽऽमूलं हि परिवर्तनम्।
लघूनां क्षेत्रखण्डानां स्थाने सामूहिकीं विधाम् ॥ २९८ ॥
कर्षणस्योररीकृत्य स्वल्पेनैव श्रमेण तु।
महदुत्पादनं कृत्वा वयमद्यतनस्थितेः ॥ २९९ ॥
साम्मुख्यं कर्तुमर्हामोऽस्मिंश्च यो गान्धिसंशयः।
स यथार्थो महाक्षेत्रेष्वास्तां संख्या लघीयसी ॥ ३०० ॥
उपयुक्ता श्रमाजीविजनानामिति भूयसाम्।
श्रमिकाणामकर्मण्या स्थितिः स्यादुपहासिनी ॥ ३०१ ॥
परं लघुलघु क्षेत्रेष्वपि कार्यं न तादृशम्।
यस्मिंस्ते श्रमिकाः सर्वे कार्ये लग्नाः स्युरेव च ॥ ३०२ ॥
तत्र केऽप्यलघूद्योगेष्वेव योज्या यथा स्थिताः।
तथात्रापि लघूद्योगस्तेषामर्थे विधास्यते ॥ ३०३ ॥
'भूयांसश्च स्वसमाजस्योपयोगिक्रियान्तरैः।
नैष्कर्म्यान्मुक्तिमाप्स्यन्ति भविष्यन्ति सकर्मकाः ॥ ३०४ ॥
सत्यमेतदनेकेषु प्रदेशेषु किलानया।
खाद्या प्राप्यन्त सुविधास्तस्याः सफलतात्मिकाः ॥ ३०५ ॥
किन्त्वेषा तत्सफलताप्यासीदाच्छन्नदुर्भया।
साह्यत्र्त्यां जीर्णशीर्णा पूर्वां भूमिव्यवस्थितिम् ॥ ३०६ ॥
पुष्णातिस्मैकसीमान्तं तामानेतुं विलम्बते।
उन्नतां भूमिव्यवस्थां तत्स्थलेऽत्रानिनोषिताम् ॥ ३०७ ॥

इदं सत्यं न प्रभावः खाद्यास्तावानिहाभवत् ।
येन स्यादन्तरं किञ्चित्प्रवृत्तिः सा तु वर्तते ॥ ३०८ ॥
कृषीवलाय लघवेऽप्यत्र ये ददतेंऽशुकम् ।
भूस्वामिनस्तत्क्षेत्रस्योत्पादमध्यान्न सोऽस्त्यलम् ॥ ३०९ ॥
येनासौ दीनदीनायां दशायामपि निर्वहेत् ।
स्वकुटुम्बभरं सम्यक्ततः स्वायप्रवृद्धये ॥ ३१० ॥
स बाह्यसाधनान्येवाश्रयते यानि कान्यपि ।
आहोस्वित्तद्यथा प्रायो जायते करहेतवे ॥ ३११ ॥
पतत्येष ऋणादानगर्ते तत्राधिकाधिकम् ।
इत्थं कृषीवलस्यास्य खादीप्रभृतियत्नतः ॥ ३१२ ॥
आयोऽतिरिक्तो यः कश्चित्तेन स्वामी च शासनम् ।
स्वांशग्रहणयत्नेषु प्राप्नुवन्ति सहायताम् ॥ ३१३ ॥
आयोऽतिरिक्तस्तस्यायं नाभविष्यत्तदा तु तौ ।
स्वांशग्रहणसौविध्यं कुतस्तावदलप्स्यताम् ॥ ३१४ ॥
यदि चायमायो वर्द्धेत तदा किञ्चिद्दिनान्तरम् ।
करस्तदंशो वा वृद्धिं गतः स्यात् सोऽत्र लीयताम् ॥ ३१५ ॥
वर्तमानव्यवस्थायां निर्बलोऽसौ कृषीवलः ।
यावन्तमधिकं यत्नं करिष्यति मितव्ययी ॥ ३१६ ॥
तावानेवाधिको लाभः स्वामिनः शासनस्य च ।
सौविध्येनैव सिद्ध्येत, न सुखी स्यात्कृषीवलः ॥ ३१७ ॥
स्मरामि—'हेनरी जार्जो' प्रगतिश्च दरिद्रता ।
इत्याख्ये पुस्तके प्रश्नमिमं सम्यक् समादधात् ॥ ३१८ ॥
तत्र चायर्लैण्डदेशस्तेन भूयो निदर्शितः ।
एकस्य प्रगतौ तत्रापरस्यास्ति दरिद्रता ॥ ३१९ ॥
ग्रामोद्योगसुधारार्थं गान्धेर्यत्नोऽपि वस्तुतः ।
खादीकार्यक्रमस्यैव वर्तते कोऽपि विस्तरः ॥ ३२० ॥
तेन तात्कालिको लाभः कश्चित्स्थायी भविष्यति ।
कश्चिच्चास्थायि लाभः क्रमादल्पाधिकांशयोः ॥ ३२१ ॥

एष ग्राम्यजनानां स्यात्प्रस्तुतापदि साह्यकृत् ।
मृतप्रायान् सांस्कृतिकान् कलाकौशलमूलकान् ।। ३२२ ।।
संस्कारांश्चाप्ययं तेषां पुनरुज्जीवयिष्यति ।
प्रयत्नोऽयमस्ति विद्रोहो यन्त्रोद्योगैकवादयोः ।। ३२३ ।।
अतो नेष्यति साफल्यं पत्रे हरिजनाह्वये ।
सम्प्रत्येवालिखद्गान्धिः—यन्त्रयोगः प्रशस्यते ।। ३२४ ।।
तत्रैव यत्र कार्यस्य कृतेऽपेक्षितपूरुषाः ।
न प्राप्यन्तेऽन्यथा तेषां निष्कर्मत्वं भविष्यति ।। ३२५ ।।
सति पूरुषबाहुल्ये यथास्त्यद्येह भारते ।
यन्त्रयोगो न योगाय न क्षेमाय भविष्यति ।। ३२६ ।।
नास्गाकञ्च समक्षेऽस्ति प्रश्नो लोकविसर्जनः ।
यथा स्वग्रामवास्तव्यान् पुरुषानधिकाधिकान् ।। ३२७ ।।
केन यत्नेन कार्येभ्यो विमुक्तिर्दीयतामिति ।
अस्माकं तु समक्षेऽस्ति प्रश्नः कर्मनियोजनः ।। ३२८ ।।
यथा स्वग्रामवास्तव्यान् पुरुषानधिकाधिकान् ।
केन यत्नेन कार्येषु नियुक्तान् विदधीमहि ।। ३२९ ।।
एषां कृषीवलानां यन्नैष्कर्म्यं मासषट्किकम् ।
तत्कथं विनिवर्तेत तत्र कुर्वन्तु ते नु किम् ? ।। ३३० ।।
न्यूनाधिकतयान्येऽपि देशा निष्कर्मतापदि ।
पतिताः सन्ति तेषामप्ययं प्रश्नो भविष्यति ।। ३३१ ।।
वस्तुतो नास्ति कर्तॄणां कृते कार्यं न खल्विति ।
नैतदस्ति, परन्त्वस्ति दूषणं स्वामिनामिदम् ।। ३३२ ।।
तेऽधिकाधिकलाभार्थं पुरुषानल्पकाल्पकान् ।
यन्त्रशालीयकार्येषु नियुञ्जन्ति निजार्थिनः ।। ३३३ ।।
भूयसामत्र कर्तॄणां विनियोगेन भूयसी ।
वृत्तिर्देया भवेत्तेन नार्जिताः सन्तु सम्पदः ।। ३३४ ।।
कार्याणि सन्ति भूयांसि यान्यत्राकारयति नः ।
आयात लोका आयातास्मान् पूरयत सत्वरम् ।। ३३५ ।।

यथा सरणिनिर्माणं तथा सेकव्यवस्थितिः ।
स्वच्छतायाः प्रबन्धश्च सौविध्यं चौषधादिषु ॥ ३३६ ॥
जलविद्युत्समुद्योगः प्रयोगश्च गृहे गृहे ।
सामाजिक्यः सांस्कृतिक्यः सेवाश्च बह्वो भुवि ॥ ३३७ ॥
शिक्षाप्रसारश्चेत्यादीन्यसंख्येयानि तान्यहो ।
स्वस्वानुष्ठानसिद्ध्यर्थं प्रतीक्षन्ते जनानिह ॥ ३३८ ॥
लोकेषु नैकवस्तूनामभावोऽयं प्रवर्तते ।
तानि तान् प्रत्युपानेतुं निर्मातुं चाप्यपेक्षिताः ॥ ३३९ ॥
इत्यमूनि च कार्याणि पञ्चाशद्वार्षिकेऽवधौ ।
कर्तुं न प्रभविष्यन्ति कोटिकोटिकबन्धवः ॥ ३४० ॥
अत्रावधानदानेन कार्याण्यन्यान्यपि ध्रुवम् ।
प्रतिभास्यन्ति यत्कर्तृपुरुषान्न लभेमहि ॥ ३४१ ॥
किन्वेतत्सम्भवेच्छक्त्या समाजे प्रेरितोन्नते ।
न तु व्यक्तिगतायां स्याल्लाभवृत्तिर्धनैषिणाम् । ३४२ ॥
समाजो योजनां कुर्यात्कर्मणां सर्वहेतवे ।
यूथे यथा सोवियते दोषेष्वन्येषु सत्स्वपि ॥ ३४३ ॥
न कोऽप्यस्ति नरः कर्मप्राप्तिर्यस्य न विद्यते ।
अस्माकं बन्धवः कर्माभावान्नो सन्त्यकर्मकाः ॥ ३४४ ॥
अपि त्वेते न कार्यस्य संस्कृतेश्चोन्नतिं गताः ।
यदि बालाञ्छ्माजीवं कर्तुं रुन्ध्युर्विधानतः ॥ ३४५ ॥
नियतं च वयो यावच्छिक्षा स्यादनिवार्यतः ।
बालका बालिकाश्चैव तदा न श्रमिकेषु ते ॥ ३४६ ॥
नाप्यकर्मसु गण्येरन् तथा च श्रमिकापणात् ।
भाविश्रमिककोटीनां भारो लघुकृतो भवेत् ॥ ३४७ ॥
गान्धिश्चक्रे च तर्कौ च सुधारेणोपयोगिताम् ।
तदुत्पादनशक्तिं च वर्धितुं सफलोऽभवत् ॥ ३४८ ॥
किन्तु तस्यैष यत्नस्तु यन्त्रोपकरणोन्नतिः ।
यद्युन्नतिः प्रवृत्ता स्यात्तदा स्याल्लाभभावना ॥ ३४९ ॥

तत्फलत्वेन तूत्पादप्राचुर्ये स्यादकर्मता ।
विद्युच्चलद्गृहोद्योगकल्पना नास्त्यसंभवा ॥ ३५० ॥
ग्रामोद्योगेषु यावच्चाधुनिकौद्योगिकान्यपि ।
यन्त्राणि नोपयोक्ष्यन्ते न तावद्भौतिकान्यपि ॥ ३५१ ॥
न च सांस्कृतिकान्येतान्यपि शक्ष्याम आसितुम् ।
यानि सन्त्यावश्यकानि गृहोद्योगाश्च ते पुनः ॥ ३५२ ॥
विधातुं यन्त्रसाम्मुख्यं शक्नुवन्ति न कर्हिचित् ।
अस्मद्देशेऽपि प्रवृत्ता यन्त्रशाला अनेकशः ॥ ३५३ ॥
महत्यश्च महीयस्यस्तन्निरोधो न युज्यते ।
सम्भवत्यपि वाद्यत्वे गान्धिना नित्यमुच्यते ॥ ३५४ ॥
नास्मि यन्त्रविरुद्धोऽहं मन्ये सोऽत्रानुपश्यति ।
नास्त्यस्मिन् भारते स्थानं यन्त्राणां स्थापनाय यत् ॥३५५ ॥
किन्तु लोहायसादीनामुद्योगानांनु किं भवेत् ।
वयं किलात्र तेभ्यः प्राग्वर्तमानान् प्ररुन्धमहे ॥ ३५६ ॥
न तथा कर्तुमर्हाम इति स्पष्टमिहोत्तरम् ।
यदि रेलादियानानि सेतवो वाहनानि च ॥ ३५७ ॥
मृत्तरिप्रभृतीन्यत्र रक्षणीयानि भारते ।
तदैतानीह सर्वाणि निर्मातव्यानि किं स्वयम् ॥ ३५८ ॥
परेषु निर्भरैः स्थेयं स्याद्वास्माभिरिहान्ततः ।
साधनानि स्वरक्षाया यदि रक्ष्याणि पार्श्वतः ॥ ३५९ ॥
तदा विधेयः स्याद्यत्नो न मूलोद्योगमात्रकः ।
अपि त्वत्यन्तपुष्टा सा व्यवस्थौद्योगिकी परा ॥ ३६० ॥
प्रतिष्ठाप्या भवेदत्र न हि देशोऽद्य कश्चन ।
स्वतन्त्रः स्थातुमर्हेद्धि न साम्मुख्यं विना स्थितिः ॥ ३६१ ॥
औद्योगिक्या दृशा कश्चिद्यदि नास्ति च शक्तिमान् ।
नोन्नतो भविता यन्त्रनिर्माणे स्वाश्रयं विना ॥ ३६२ ॥
मूलोद्योगाय कस्मैचित्तूद्योगान्तरमिष्यते ।
तस्मै चान्य इतीहान्ते यन्त्रनिर्माणमिष्यते ॥ ३६३ ॥

एतेषु मूलोद्योगेषु चालितेष्वन्यविस्तरः ।
अनिवार्यो भवत्यत्र को रुन्धे प्रक्रियामिमाम् ।। ३६४ ।।

नास्मिन्हि केवलास्माकं भौतिकी सांस्कृतिक्यहो ।
आस्थिता सोन्नतिः सत्यं स्वातन्त्र्यं नस्तथा स्थितम् ।। ३६५ ।।

यावन्महान्त उद्योगा वर्धिष्यन्तेऽधिका भुवि ।
ग्रामोद्योगास्तु लघवस्तावन्न्यूनास्तदग्रतः ।। ३६६ ।।

समाजवादप्रणाली लघूद्योगानविष्यति ।
पुञ्जीवादप्रणाल्यां तु नाशास्यं तत्प्रजीवनम् ।। ३६७ ।।

समाजवादप्रणाल्यामप्येते चलितुं तदा ।
शक्ष्यन्ति यर्हि वक्ष्यन्ति स्वल्पापेक्षितवस्तुनः ।। ३६८ ।।

उत्पादनभरं ह्येते महोद्योगैरसंस्पृशः ।
केचित्काङ्ग्रेसनेतारो बिभ्यत्युद्योगकारणात् ।। ३६९ ।।

तेषां विचारेऽद्यतन्या आपदो मूलमस्ति सः ।
उद्योगप्राणदेशाश्च तत्र सन्ति निदर्शनम् ।। ३७० ।।

यैरपेक्षिततोऽत्यर्थं वस्तूत्पादनमादृतम् ।
किन्तु तन्न समीचीनं स्थितेरध्ययनं स्मृतम् ।। ३७१ ।।

सर्वसाधारणं वस्तु यत्तु न्यूनमिहास्ति तत् ।
चेद् बहूत्पाद्यते तर्हि न दोषस्तत्र विद्यते ।। ३७२ ।।

किमेतदेव श्रेयोऽस्ति यन्नोत्पाद्येत वस्त्विह ।
तदभावे च लोकस्तद्विना कार्याणि निर्वहेत् ।। ३७३ ।।

वस्तुतो नैष दोषोऽस्ति बहूत्पादनकर्मणः ।
अयं दोषोऽस्ति तद्वस्तु लोकप्रापणपद्धतेः ।। ३७४ ।।

एषा चेन्मूर्खता पूर्णाऽयोग्यता पूरिताऽथवा ।
अल्पोत्पादनमप्यत्र स्यात्तत्कारणमापदाम् ।। ३७५ ।।

ग्रामोद्योगप्रचाराणामपरापदियं स्थिता ।
अस्मदुत्पादनं लोकस्यापणेष्वस्ति निर्भरम् ।। ३७६ ।।

विवशीभूय ते नात्रोत्पादकाः कृषकादयः ।
व्यापृतव्यानि वस्तूनि समुत्पादयितुं गताः ।। ३७७ ।।

लोकप्रचलिते भावे तिष्ठन्त्येते च निर्भराः ।
भावा हि परिवर्तन्ते वस्तुमूल्यात्मकाः सदा ॥ ३७८ ॥
परं कृषीवलाद्यास्ते करदेयांशदानकम् ।
द्रव्यरूपेणैव दातुं भवन्ति विवशीकृताः ॥ ३७९ ॥
तद्द्रव्यं येन केनापि प्रकारेणेह लभ्यते ।
यतो ह्यसौ तत्प्रदातुं सर्वान् यत्नानुपाश्रितः ॥ ३८० ॥
अतस्तदेव वपति काङ्क्ष्यते यद्यदापणैः ।
मन्यते चास्य मूल्यं स वास्तवाल्लप्स्यतेऽधिकम् ॥ ३८१ ॥
स स्वस्य स्वकुटुम्बस्याप्युदरापूर्त्यपेक्षितम् ।
नान्नमुत्पादयत्येष स्वक्षेत्रे, मूल्यलोभतः ॥ ३८२ ॥
इहामीषु च वर्षेषु वस्तुमूल्याल्पनावशात् ।
युक्तप्रान्ते विहारे चापीक्षूत्पादनमाश्रिताः ॥ ३८३ ॥
वैदेशिक्यां शर्करायां चायातकरयोजनात् ।
अत्र देशे शर्करायाः समुत्पादाय नैकशः ॥ ३८४ ॥
यन्त्रशालाः संप्रवृत्ता इक्ष्वपेक्षा च वर्धिता ।
अथेक्षूत्पादनं जातमपेक्षातोऽधिकं यदा ॥ ३८५ ॥
तदात्र शर्करायन्त्रशाला स्वामिभिरर्दिताः ।
कृषीबलास्तदिच्छातः स्व्यकुर्वन्मूल्यमैक्षवम् ॥ ३८६ ॥
इत्थमत्यन्तनैष्ठुर्यात्स्वामिभिस्ते प्रपीडिताः ।
वञ्चिताश्चापि कृषका अभूवन्नतिदुःखिता ॥ ३८७ ॥
इक्षुमूल्यावपातेन भग्नाशा भग्नचेतसः ।
यन्त्रशालास्वामिनस्तु समिद्धास्तत्समृद्धितः ॥ ३८८ ॥
विनैव श्रममाप्तास्तेऽत्युत्तमं तत्फलं खलु ।
इमे तु श्रमभारेण भग्ना अप्यासताफलाः ॥ ३८९ ॥
खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
रावणस्यापराधेन सिन्धुरासीन्नियन्त्रितः ॥ ३९० ॥
साधुः करोति सद्वृत्तं नूनं फलति तत्खले ।
कृषकाः श्रममृच्छन्ति फलमृच्छन्ति चापरे ॥ ३९१ ॥

एतैरेतादृशैश्चान्यैः कारणैः प्रतिभाति मे ।
न वयं स्वकृषेरुद्योगान्तरे विषये स्थिताः ॥ ३९२ ॥
समस्यास्ताः समाधातुं क्षमाः स्मः प्रस्तुते पथि ।
न संकीर्णस्वावलम्बियोजनातः समाहितिम् ॥ ३९३ ॥
कर्तुं न प्रभविष्यामो नापि युक्तास्ति तत्कृतिः ।
सत्यमेता राष्ट्रियस्य जीवनस्य पदे पदे ॥ ३९४ ॥
स्वप्रभावं पालयन्ति पातयन्ति तथापदि ।
न वयं भावुकत्वेन पूर्णैः शब्दैरिहात्मनः ॥ ३९५ ॥
परित्राणं स्वयं कर्तुं क्षमा वर्तामहेऽधुना ।
वस्तुस्थितीनामेतासां साम्मुख्यं कार्यमेव तत् ॥ ३९६ ॥
अनुकूलयितुं यत्नः कार्यश्चात्मानमत्र च ।
यथा वयं नेतिहासे दयनीया भवेम ते ॥ ३९७ ॥
उल्लेखनीया एवेह स्यामेति प्रयतामहे ।
पुनर्मम पुरः साक्षात्समस्यामूर्तिरुत्तमः ॥ ३९८ ॥
समागतो ध्यागमार्गे श्रीगान्धिः पुरुषोत्तमः ।
न सम्यज्ज्ञायते-तीव्रबुद्धिर्दलितवत्सलः ॥ ३९९ ॥
दलितानां पीडितानामुद्धारं च सुधारणाम् ।
प्रतीत्थमुत्सुकस्तीव्रभावनां धारयन्नपि ॥ ४०० ॥
समर्थयति तामेतां व्यवस्थां पतनोन्मुखीम् ।
या दत्ते दुःखमेतावद्विनाशं कुरुते च या ॥ ४०१ ॥
सत्यमेतत्सर्वमार्गं मार्गयन्नस्ति कञ्चन ।
किन्तु प्राचीनकालस्य मार्गोऽयं किन्न रुध्यते ॥ ४०२ ॥
सोऽद्यापि देश्यराज्यानि, भूस्वामिक्षेत्रपालकान् ।
पुञ्जीवादप्रणालीं च साक्षात्प्रगतिवैरिणीम् ॥ ४०३ ॥
प्राचीनाया व्यवस्थाया अवशेषान् समानपि ।
स्वाशीर्वादेन सुचिरं जीवितुं प्रेरयत्यमून् ॥ ४०४ ॥
निधिपत्वस्य सिद्धान्ते विश्वासः किमिहोचितः ।
किं न्वेकस्याधिकारेऽबाधे सम्पत्समर्पणम् ॥ ४०५ ॥

प्रजाहिताय तां सर्वामुपयोक्ष्यति चेति किम्।
युक्तमाशासितुं किन्तु सन्त्यस्मासु च सज्जनाः ॥ ४०६ ॥
ते पूर्वे येष्वियान् कार्यो विश्वासः स्यादितीह किम्।
अफलातूनसंक्लृप्ताध्यात्मिकावनिपालवत् ॥ ४०७ ॥
अस्ति योग्यतमः कश्चिद्योऽत्र विश्वासमीदृशम्।
निर्वहेत्, किञ्च सुष्ठु स्यादन्येषामपि वै नृणाम् ॥ ४०८ ॥
यत्ते स्वशीर्ष्णर्युदारस्यातिपुरुषस्यास्य शासनम्।
स्वीकुर्युः किञ्च तादृक्षाध्यात्मिको वातिपूरुषः ॥ ४०९ ॥
कुत्रास्ति, सन्ति लोकेऽस्मिन् सामान्या मानवा भुवि।
ये मन्यन्ते स्वविचारप्रसारं हितकारकम् ॥ ४१० ॥
वंशानुगतकौलीन्यप्रतिष्ठा भावना तथा।
सम्पत्स्वामित्वाभिमानः स्थायी भवितुमर्हति ॥ ४११ ॥
परिणामस्तु तस्यापि भवत्येव सुदारुणः।
अभिमानोन्नतो मूर्धा कदा कस्य न नम्यते ॥ ४१२ ॥
'द्वरुक्तिं चाहमिच्छामि नाहमत्र विचारणाम्।
प्रश्नस्यास्य करोमीति कथं स्यात्परिवर्तनम्' ? ॥ ४१३ ॥
इह मार्गोऽस्ति यद् बाधाद्वयं तत्स्यात्कथं हृतम्।
किं वा बलप्रयोगेण हृदो वा परिवर्तनात् ॥ ४१४ ॥
हिंसया वाऽहिंसया वा यस्मिन्नंशे विचारणाम्।
प्रस्तोष्याम्येस्य वै पश्चात् वर्तते परिवर्तनम् ॥ ४१५ ॥
आवश्यकं हि स्वीकार्यमनिवार्यमिति स्फुटम्।
यदि हीदं न नेतारो नापि नीतिविचारकाः ॥ ४१६ ॥
स्वयं नानुभविष्यन्ति न वदिष्यन्ति च स्वयम्।
कथमाशास्यतामत्र यदन्यत् स्वविचारगात् ॥ ४१७ ॥
करिष्यन्ति भरिष्यन्ति स्वविचारपरम्पराम्।
असंशयमियं शिक्षा घटनाभिः प्रदीयते ॥ ४१८ ॥
किन्तु तासां महत्त्वं वा परिणामं मनोरमम्।
निष्क्रष्टुमावश्यके स्तः सम्यग्ज्ञानप्रचारणे ॥ ४१९ ॥

मद्भाषणैश्च लेखैश्च समुद्वेजितबुद्धयः ।
सुहृदः सङ्गिनः प्रायः पर्यपृच्छन्निदं तु माम् ॥ ४२० ॥
किं त्वया कोऽपि राजाऽसावुपकारपरायणः ।
शुभचिन्तकोऽथ भूस्वामी सज्जनश्चात्र पुञ्जिमान् ॥ ४२१ ॥
न दृष्ट इति तेऽभ्युक्ताः—'दृष्टस्तेऽवश्यमीदृशः ।
अस्मि स्वयं तद्वर्गीयो ये मिलन्ति सदेदृशैः ॥ ४२२ ॥
स्वयञ्चास्म्येष लक्ष्मीवान् लक्ष्मीवद्भिः प्रपालितः ।
प्रारम्भिकी च शिक्षा या तस्याः सम्प्रति मय्यमी ॥ ४२३ ॥
शुभाशुभाश्च संस्कारा मस्तिष्के हृदये तथा ।
साम्यवादाश्च मामर्धलक्ष्मीवन्तं प्रचक्षते ॥ ४२४ ॥
तच्च तेषां तथाख्यानं यथार्थं सर्वथास्ति च ।
स्यादिदानीं वदिष्यन्ति प्रायश्चित्ते स्थितञ्च माम् ॥ ४२५ ॥
किन्त्वहं कोऽस्मि किं नास्मीत्येष प्रश्नो न विद्यते ।
जातीयान्तरराष्ट्रीयार्थिकसामाजिकादिकान् ॥ ४२६ ॥
प्रश्नान् केषांचिदेकेषां दृशा द्रष्टुं न युज्यते ।
एतेषु नः सखायो मां प्रश्नान् पृच्छन्तु यादृशान् ॥ ४२७ ॥
परं बदन्त्यश्रान्तं ते भवन्तः पापवैरिणः ।
पापिनो न द्विषन्तीति नाहं याम्यत्र तावता ॥ ४२८ ॥
न मे व्यक्त्याऽस्ति कलहः प्रणाल्या कलहोऽस्ति मे ।
सत्यं प्रणाली व्यक्तौ वा समूहे व्यज्यतेऽथवा ॥ ४२९ ॥
व्यक्तयो वा समूहा वाऽस्माभी रञ्ज्याः स्वरञ्जतः ।
अन्यथा तैस्तु कलहात्मैव सम्बन्ध इष्यते ॥ ४३० ॥
यदि काचित्प्रणाली च निरर्था साम्प्रतं भवेत् ।
साररूपा च जातास्ति सा मृष्टा स्यात्स्वभावतः ॥ ४३१ ॥
या व्यक्तयः समूहा ये सम्पृच्यन्ते तया सह ।
तैरात्मा परिवृत्तव्यः परिवृत्तौ न रुग्भवेत् ॥ ४३२ ॥
भवेदेषा च साल्पैव सुसहा च भवेद्यथा ।
दुर्भाग्यात्तत्र कष्टस्यास्तव्यस्तत्त्वस्य सम्भवः ॥ ४३३ ॥

एतेभ्योऽल्पमहद्भ्यो वा कष्टेभ्यश्च भयादिह ।
भवन्त्येतान्यसह्यानि तत्स्त्याज्यं भयं ततः ॥ ४३४ ॥

मानवस्य भवत्येव क्रियामूलेऽत्र तात्त्विकः ।
विचारः सा क्रिया राजनैतिकी वास्तु सार्थिकी ॥ ४३५ ॥

अथ सामाजिकी सा स्यात्स्वभावाद्रचनात्मिका ।
रचनायुगमेतच्च यदैव परिवर्तते ॥ ४३६ ॥

तदा तदा तदाधारस्तात्त्विकोऽपि भवेदिह ।
परिवर्तित एतेनानुकूलः स भवेन्नृणाम् ॥ ४३७ ॥

ततश्च पूर्णो लाभोऽपि तदा साध्यो भवेदिह ।
प्रायस्तीव्रतरा काचिद्गतिर्भवति कर्मणाम् ॥ ४३८ ॥

ततो विचाराश्चादर्शाः पश्चात्तिष्ठन्ति कर्मिणाम् ।
इदमेव विपत्तीनां मूलमस्तीह सन्ततम् ॥ ४३९ ॥

लोकतन्त्रः पुञ्जवादो द्वयमेको न विंशतौ ।
शताब्द्यां जनितौ किन्तु नान्योन्यमनुकूलितौ ॥ ४४० ॥

तद्द्वये मौलिको भेदोऽप्यासीदेव स्वरूपतः ।
लोकतन्त्रन्तु सर्वेषां बहूनां शक्तिमिच्छति ॥ ४४१ ॥

पुञ्जवादस्तु केषांचिदल्पानामेव तामिति ।
इदं मिथोऽयोग्यमपि युगलं युगपद्युगे ॥ ४४२ ॥

अस्मिन्नचलदेवेति तत्र हेतुरिहेतरः ।
सांसदो लोकतन्त्रो हि संकीर्णोऽत्यन्तमस्ति सः ॥ ४४३ ॥

स राजनैतिको लोकतन्त्रो हस्तं च नाक्षिपत् ।
अधिकैराधिपत्यस्य केन्द्रीकरणवर्धनम् ॥ ४४४ ॥

निरोद्धुं किञ्चिदुल्लेखयोग्यमित्यास्त चाग्रहः ।
तथापि लोकतन्त्रस्य भावनेयं यथा यथा ॥ ४४५ ॥

उपाचीयत सम्बन्धविच्छेदोऽप्यनिवार्यताम् ।
अगादिदानीं समयोऽप्ययमास्ते समागतः ॥ ४४६ ॥

अद्यापकीर्तिमापन्ना सांसदी सा प्रणालिका ।
तत्प्रतिक्रियया चैते श्रुता नादा नवा नवाः ॥ ४४७ ॥

अतश्च प्रतिगामित्वं पूर्वस्मादधिकं श्रिता ।
ब्रैटिशी शिष्टिरस्माकं हिन्दुस्थानं प्रति स्वयम् ॥ ४४८ ॥
व्याजस्तया च संप्राप्तः स्वातन्त्र्ये राजनैतिके ।
अपि चर्चा निरोधस्य साकं कांग्रेसनेतृभिः ॥ ४४९ ॥
आश्चर्यस्य प्रसङ्गोऽयं भारतीया नृपा अपि ।
इदमाधृत्य स्वगतामबाधां निर्गतां कुशीम् ॥ ४५० ॥
उचितां स्थापयन्तीमे स्थितिं तां मध्यकालिकीम् ।
प्रविवर्तिषयोद्घोषमुच्चैः कुर्वन्ति सम्प्रति ॥ ४५१ ॥
या जगत्यद्य कुत्रापि केनचिन्न प्रवर्त्यते ।
सांसदे लोकतन्त्रे तु त्रुटिरैषा न लक्ष्यते ॥ ४५२ ॥
अपि त्वनेन कियता वेगेनाग्रप्रसारिता ।
कर्तव्याभून्न सा तेन तावता नैव साधिता ॥ ४५३ ॥
पर्याप्तलोकतन्त्रीयो न सोस्तीत्यपि सत्यवाक् ।
यतस्तस्मिन् स्वतन्त्रत्वमार्थिकं न व्यवस्थितम् ॥ ४५४ ॥
प्रणाल्यो मन्दगामिन्यः सन्देहैश्चापि सम्भृताः ।
स चास्य तीव्रवेगस्य नानुरूपो युगस्य च ॥ ४५५ ॥
अधुना विश्वविश्वेऽस्ति या स्वेच्छाचारिताभितः ।
इमानि देश्यराज्यानि तत्प्रतीकानि सर्वथा ॥ ४५६ ॥
तत्रापि तान्युदग्राणि तथोग्राणि च मन्महे ।
निःसंशयं च ब्रैटिश्यां शिष्टौ तानि ह्यधीनताम् ॥ ४५७ ॥
प्राप्तानि ब्रैटिशी शिष्टिस्तद्वृद्धौ स्वार्थसिद्धये ।
हस्तक्षेपं करोत्येषा सत्यमाश्चर्यमेव तत् ॥ ४५८ ॥
इमानि प्राग्युगीयानि निर्जीवान्यपि साम्प्रतम् ।
विंश्याः शताब्द्या मध्येऽपि स्थितानीह यथाक्रमम् ॥ ४५९ ॥
यन्माण्डलिकदुर्गेषु तेष्वस्ति परिवर्तनम् ।
तन्नास्ति किञ्चिदुल्लेख्यमिहत्यं वायुमण्डलम् ॥ ४६० ॥
करोति श्वाससंरोधं स्थिरं चापरिवृत्ति च ।
गतिर्मन्दा कथयति स्थितिं मन्दां जडां मतिम् ॥ ४६१ ॥

परिवर्तनसंघर्षौ यस्य स्वाभाविकावपि ।
तथापि ताभ्यां श्रान्तोऽत्रागन्तुको मूर्छतीव सः ।। ४६२ ।।
मन्दञ्च यौतुकं तस्मिन् प्रभावमिव मुञ्चति ।
चित्रं यथा न कालस्य प्रभावमधिगच्छति ।। ४६३ ।।
अतस्तस्यापरीवर्त्यं रूपमग्रे प्रतिष्ठते ।
देश्यराज्यं तद्वदेवापरिवर्त्यतयानिशम् ।। ४६४ ।।
अवास्तविकमाभाति सर्वथाऽज्ञातभावतः ।
भूतकालं प्रतिवहत्स्वबाल्यं स्वप्नदर्शनम् ।। ४६५ ।।
शस्त्रसज्जा, शूरवीराः, सुन्दर्यश्च कुमारिकाः ।
तासामपूर्वं वीरत्वं कान्तकाङ्गूरदुर्गकम् ।। ४६६ ।।
प्रेमशौर्याभिमानाश्च गौरवं साहसं पुनः ।
मृत्युं प्रति तिरस्कारश्चेत्यद्भुतमहाद्भुतम् ।। ४६७ ।।
एतेषां भूतकालं तन्नेत्रयोरिव नृत्यति ।
राजस्थाने विशेषेण शौर्यसौन्दर्यशालिनि ।। ४६८ ।।
स्वप्ना इमे विलीयन्ते विषादोऽभिभवत्यथ ।
वातावरणमत्रत्यं श्वासोच्छ्वासौ रुणद्धि च ।। ४६९ ।।
स्थिरमन्दाम्बुधारायामधस्ताज्जडतामलौ ।
पश्यन्नरोऽनुभवति कण्टकैरावृतां तनूम् ।। ४७० ।।
न तनूरेव तस्यास्ति मनोऽपीह नियन्त्रितम् ।
कान्तिं द्युतिं राजसद्मन्यतश्च जनजीवने ।। ४७१ ।।
प्रतीपं पश्यतस्तस्य कष्टपूर्णामवस्थितिम् ।
राज्यस्यैष कियान् कोषस्तस्यारामसुखादिषु ।। ४७२ ।।
व्ययीभवति लोकस्य कल्याणाय कियानिति ।
गणयन्नेष रोषेण निन्दत्येनां व्यवस्थितिम् ।। ४७३ ।।
राजोत्पतिः पोषणञ्च स्वं नाशयति तत्कियत् ।
व्ययितस्य प्रतीकारं केन कुर्वन्ति कर्मणा ।। ४७४ ।।
देश्यराज्येषु पतिता रहस्यावृतिरस्त्यसौ ।
मा समाचारपत्रं स्यात्तदुद्घाटनकारकम् ।। ४७५ ।।

इति तत्तत्र जन्मापि न प्राप्नोति विनिग्रहात्।
साहित्यिकं वार्धशिष्टं साप्ताहिकमपीह तत् ॥ ४७६ ॥
स्वल्पमेव प्रचलति शिरोलम्बितखड्गकम्।
बाह्यानि वृत्तपत्राणि नात्र प्रतिविशन्त्यथ ॥ ४७७ ॥
दाक्षिणात्यानि राज्यानि कोचीनादीनि ताम्यृते।
यत्र साक्षरता शिष्टैः क्षेत्रेभ्योऽप्यधिकास्ति सा ॥ ४७८ ॥
देश्यराज्यान्तरं किञ्चिन्न शिक्षार्थं करोत्यदः।
साक्षराणां हि संख्यास्ति तेष्वल्पाल्पतरा पुनः ॥ ४७९ ॥
एतेभ्यः प्राप्तवृत्तेषु ब्रिटिशप्रातिनिध्यतः।
वायसरायाद्यागमनसमारोहो निशम्यते ॥ ४८० ॥
परस्परप्रशंसायां भाषणानि सुभाषितम्।
स्मारयन्ति बलादेतत्कविना केनचित्कृतम् ॥ ४८१ ॥
क्रमेलकविवाहेषु गीतं गायन्ति गर्दभाः।
परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः ॥ ४८२ ॥
राज्ञो विवाहे जातस्य प्रचुरस्य व्ययस्य च।
अन्धान्वन्धत्वमपि तत्पत्रेषु स्यात्प्रकाशितम् ॥ ४८३ ॥
तद्वज्जन्मदिनादीनामुत्सवानामपि व्ययः।
न केवलं महाश्चर्यं महत्कष्टं ददात्ययम् ॥ ४८४ ॥
कृषीवलानां विद्रोहं दमयन्ति महाव्ययैः।
न मुञ्चन्ति तु तत्तेषां करदेयांशलुञ्चनम् ॥ ४८५ ॥
भारते ब्रैटिशी शिष्टिरपि राजानुलोचनम्।
विशेषेण विधानेन रुणद्धि परिपाति तान् ॥ ४८६ ॥
मध्ये नु देश्यराज्यानां म्रदीयस्यनुलोचना।
दम्यते सातिदार्ढ्येन न सार्वजनिकीं सभाम् ॥ ४८७ ॥
तद्वासिनो विजानन्ति सार्थां सामाजिकीं सभाम्।
अपि रुद्धा भवन्त्यत्र बाह्या नेतार एव च ॥ ४८८ ॥
प्रमुखाः प्रतिरुध्यन्ते प्रवेष्टुं चात्र भाषितुम्।
पञ्चविंशे देणवन्धुरासीद् रुग्णो विशेषतः ॥ ४८९ ॥

स्वास्थ्यलाभाय काश्मीरान् गन्तुमेतेन निश्चितम् ।
न राजनैतिकं किञ्चित्तत्रासीत्तत्प्रयोजनम् ॥ ४९० ॥
स वै काश्मीरसीमानं यावदासीद्‌गतस्तदा ।
जम्बूकाश्मीरराज्येन मध्येमार्गमरुध्यत ॥ ४९१ ॥
हैदराबादराज्येन श्रीजिनापि निरोधितः ।
सरोजिनी नायडूश्च हैदराबादवासिनी ॥ ४९२ ॥
प्रत्यादिष्टाऽभवत्तत्र प्रवेष्टुं स्वगृहेऽप्यसौ ।
यदैतद् देश्यराज्येषु वृत्तमासीत्प्रवर्तितम् ॥ ४९३ ॥
तदा स्वाभाविकं कार्यं कांग्रेसस्येदमप्यभूत् ।
यत्तत्तत्रत्यलोकानामधिकारान् समुद्धरेत् ॥ ४९४ ॥
तेषां संजायमानं च दमनं प्रतिषेधयेत् ।
परं स गान्धिः कांग्रेसे देश्यराज्येषु वर्तितुम् ॥ ४९५ ॥
एकां नीतिं नवामत्र निरणैषीद्विशेषतः ।
देश्यराज्येषु घटना घटन्ते स्मातिदुःखदाः ॥ ४९६ ॥
कांग्रेसेऽप्यक्रियन्तात्राक्रमणान्यप्यकारणम् ।
स गान्धिर्मौनभावेन स्थानं नीतिमकल्पयत् ॥ ४९७ ॥
स्पष्टमासीत्प्रतीकारे रोषमेष्यन्ति भूमिपाः ।
हृदयस्य परीवृत्तिश्चैषां जायेत दुष्करा ॥ ४९८ ॥
चतुस्त्रिंशे देश्यराज्यप्रजापरिषदोऽथ सः ।
सभापतिं प्रत्यलेखीत्पत्रं केलकरं प्रति ॥ ४९९ ॥
तत्र पत्रे सविश्वासं द्विरावर्तयदीदृशम् ।
अहस्तक्षेपरूपात्र नीतिरस्ति दृढा स्थिरा ॥ ५०० ॥
वुद्धिमत्त्वेन पूर्णा च तव वाच्यं न किञ्चन ।
वीक्ष्य राज्यस्य नियमानथ वैधानिकीं स्थितिन् ॥ ५०१ ॥
प्रति यां सम्मतिं गान्धिस्तत्र पत्रेष्वरूरुपत् ।
सासीदत्यद्भुता, तत्रालेखीत्कांग्रेसनायकः ॥ ५०२ ॥
ब्रिटिशेन विधानेन देश्यराज्यस्य साऽस्तिता ।
स्वतन्त्रास्ति तत्र वक्तुं नास्ते ब्रिटिशभारतम् ॥ ५०३ ॥

निर्णेतुं वास्य नीतिं तन्न वास्त्यधिकृतं पुनः ।
अफगानिस्तानलङ्कावत् पृथग् राज्यान्यमूनि यत् ॥ ५०४ ॥
देशराज्यप्रजार्था सा परिषच्चास्त्युदारवाक् ।
गान्धेस्तां सम्मतिं प्रत्याक्षेपं चैतह्यंकुर्वत ॥ ५०५ ॥
तत्र नाश्चर्यलेशोऽस्ति देश्यराज्यैस्तु सम्मतिः ।
समादृता ततो लाभोऽप्याधृतो बुद्धियोगतः ॥ ५०६ ॥
एकेनैव च मासेन त्रावन्कोरेण कांग्रसम् ।
उद्घोषितमवैधं वै स्वक्षेत्रे सर्वतोऽपि तत् ॥ ५०७ ॥
तदीयाश्च सभाः सर्वाः सदस्यग्रहणे बिधिः ।
इत्यादिकानि कार्याणि चारुध्यन्तानुरोधतः ॥ ५०८ ॥
'उत्तरदायित्वपूर्णे नेतृभिस्तत्तथोदितम् ।
इति प्रस्तुवना तेन राज्येनाचरितं तथा ॥ ५०९ ॥
तस्यायं खलु सङ्केत आसीद् गान्धिमतं प्रति ।
इदं च वस्तु निध्येयं रोधो ब्रिटिशभारते ॥ ५१० ॥
पश्चादभूदयं सत्याग्रहान्दोलननिर्वृतेः ।
देश्यराज्येषु तदिदं न कदाचित्प्रवर्तितम् ॥ ५११ ॥
देश्यराज्ये यदा चैतत्सर्वमासीन्निषेधितम् ।
तदा ब्रिटिशशिष्टचेदं कांग्रेसं वैधमोच्यत ॥ ५१२ ॥
अत्रेदमवधेयञ्च मनोरञ्जनहेतवे ।
तदा त्रावनकोरस्य परामर्शप्रदो नये ॥ ५१३ ॥
आसीत् सी. पी. रामस्वामी ऐय्यरोऽद्यापि सोऽस्त्यसौ ।
यः पूर्वं कांग्रसे गेहशिष्टिसंघस्य मन्त्र्यभूत् ॥ ५१४ ॥
पश्चादुदारवाद्येष भारते मद्रराज्यके ।
उन्नतोन्नतसत्त्वेषु वर्तमानस्तथाऽभवत् ॥ ५१५ ॥
श्रीगान्धेः सम्मतिं मत्वा कांग्रेसं नीतिमाश्रयत् ।
तामेव चानुसरता त्रावन्कोरेण तत्कृतम् ॥ ५१६ ॥
तत्प्रतीकाररूपेण न सार्वजनिकत्वतः ।
एकोऽपि शब्दः सम्प्रोक्तः कांग्रेसेन सहिष्णुना ॥ ५१७ ॥

अन्यत्रोदारवादास्ते चाप्येतस्मिन् विरोधिताम् ।
प्राचकाशन् स्वरेणोच्चैरिति सत्यं यदत्र सः ॥ ५१८ ॥
देश्यराज्येषु नम्रोऽभूद् गान्धिः संयत एव च ।
उदारवादिनोऽप्यत्र सोऽतिशेते स्म बुद्धिमान् ॥ ५१६ ॥
मुख्येषु नेतृषु श्रीमान् मालवीयः स एकलः ।
बहुभी राजभिः साकं सम्पर्कस्य च कारणात् ॥ ५२० ॥
संयतः खल्वियानासीत्सावधानश्च सर्वदा ।
नैतानि देश्यराज्यानि क्षोभणीयानि खल्विति ॥ ५२१ ॥
स गान्धिर्देशराज्येषु फूत्कृत्य पदमादधात् ।
षोडशेऽब्देऽद्धावसरे महाराजेन केनचित् ॥ ५२२ ॥
अधीक्षितां सभामेष श्रीगान्धिः समबूबुधत् ।
प्रत्यागतोऽभूत्तर्ह्येष चाफरीकाप्रदेशतः ॥ ५२३ ॥
नास्मिन्नासीद् भारतीयराजनीतिभरस्तदा ।
दृढसत्येनेश्वरीयसंदेशवाहकेन च ॥ ५२४ ॥
तेन सर्वेऽपि राजानः स्वसुधाराय नोदिताः ।
मिथ्यामानविलासित्वपरित्यागाय सर्वतः ॥ ५२५ ॥
'नरेशा यात स्वीयानि भूषणानि च सत्वरम् ।
'विक्रीणीध्वं' इति प्रोक्तं तेन तैस्तत्कृतं न वा ॥ ५२६ ॥
किन्तु तस्मात्समुत्थायासनात्ते निर्गता बहिः ।
अतिभीताः किलैकैकशो वातिलघुयूथशः ॥ ५२७ ॥
सर्वे तु निर्गता एव निरगात्स सभापतिः ।
सभाभवनमध्ये च व्याख्याता गान्धिरेकलः ॥ ५२८ ॥
स्थितोऽभूत्तत्र वासन्ती श्रीमती साप्यवर्तत ।
नारोचत च तस्या अप्यहो श्रीगान्धिभाषितम् ॥ ५२९ ॥
सापि तस्मात्सभास्थानान्निरयादन्यलोकवत् ।
सत्यस्य कटुतां चापि दर्शयन्ती त्वसह्यताम् ॥ ५३० ॥
पत्रेऽलेखीदिहाग्रेऽथ श्रीगान्धिः केलकरं प्रति ।
अहं तदा प्रसीदेयं यदा राज्यं निजाः प्रजाः ॥ ५३१ ॥

स्वतन्त्रताप्रदानेन कृतार्थयतु सर्वथा ।
स्वञ्च मन्येत निधिपं सम्पदां पूर्वसम्पदाम् ॥ ५३२ ॥
निधिपत्वाभिमानेऽस्मिन् वस्तु स्वस्थमिहास्त्यदः ।
तदा ब्रिटिशशिष्टेः स्यादत्र कस्य न मान्यता ॥ ५३३ ॥
सा भारतस्य निधिपास्तीति भेदो न विद्यते ।
केवलं सा विदेश्यास्ते साम्प्रतं भारतस्थिता ॥ ५३४ ॥
सन्ति चैकविधत्वक्काः सन्ति चाप्येकजातयः ।
तेषां च मूलजातिः सा भिन्ना भिन्ना च संस्कृतिः ॥ ५३५ ॥
गतवर्षेषु देश्येषु राज्येषु ब्रिटिशा नराः ।
अधिकारजुषो भूत्वा प्रविष्टाः सन्त्यनेकशः ॥ ५३६ ॥
प्रायस्ते निःसहायानां राज्ञाभिच्छाप्रतीपगैः ।
अधिकारिभिरेतेषां शिरस्यारोपिताः स्वयम् ॥ ५३७ ॥
सदा ब्रिटिशशिष्टेश्च देश्यराज्येष्वमीष्वलम् ।
नियन्त्रणं स्थितं किन्तु महान्त्येतानि साम्प्रतम् ॥ ५३८ ॥
अन्तर्निगडितान्यस्या यत्किञ्चित्कथ्यते क्वचित् ।
केनचिद् देश्यराज्येन तदुक्तं ब्रिटिशैः स्वयम् ॥ ५३९ ॥
इत्थं ब्रिटिशशिष्टिस्तन्माण्डलिक्या अपि स्थितेः ।
पूर्णं लाभमवश्यन्तु लभते नात्र संशयः ॥ ५४० ॥
असम्भवं सदा मन्ये यदन्यत्र विधीयते ।
तत्कदाचिद्देश्यराज्येऽप्यस्माभिः प्रविधास्यते ॥ ५४१ ॥
ब्रिटिशभारतप्रान्तेषु भिन्नभिन्नेषु वै कृषौ ।
उद्योगे चाप्यहो जातौ तथा शासनपद्धतौ ॥ ५४२ ॥
मिथो भेदो महानस्ति न सर्वत्रैकनीतितः ।
कार्यं निर्वोढुमर्हामो दृष्ट्वा तां तां परिस्थितिम् ॥ ५४३ ॥
तथापि भिन्नभिन्नेषु स्थलेष्वपि तु काचन ।
सामान्या नीतिरेका स्याद्यद्दुष्टं दुष्टमेव तत् ॥ ५४४ ॥
अन्यथा दोषभाजोऽत्र भविष्यामस्त्वनिश्चितेः ।
अस्माकं लक्ष्यमेकं स्याच्छक्तिहस्तीकृतिः परम् ॥ ५४५ ॥

धर्मदृष्ट्याल्पसंख्यानां जातीनां या पृथक्कृतिः।
निर्वाचनेषु विहिता तद्विरुद्धा ननूक्तयः॥ ५४६ ॥
बहवोऽत्र जातास्ताः सत्या लोकतन्त्रात्मकं न तत्।
नात्र शङ्का यदि वयं मतदातॄन् पृथक् पृथक्॥ ५४७ ॥
कक्षेषु तेषु रक्षामो लोकतन्त्रं न तद्भवेत्।
न तथोत्तरदायिन्याः शिष्टेः सृष्टिर्हि सम्भवेत्॥ ५४८ ॥
परन्तु मालवीयो वान्ये च हिन्दूमहासभाम्।
आश्रिताश्चापि नेतारः पृथङ् निर्वाचनस्य ये॥ ५४९ ॥
समीक्षकाः सन्ति सत्यास्ते कथं देश्यराज्यगान्।
अत्याचारान्धकारान्नो वर्धमानान् दिने दिने॥ ५५० ॥
विरुन्धति न चैतेषां कृते मौनं त्यजन्त्यमी।
साक्षात्समुद्यतान्यद्य स्वेच्छाचारीणि तान्यथ॥ ५५१ ॥
देश्यराज्यानि शिष्टञ्च लोकतन्त्रात्मभारतम्।
मिलित्वा संघराज्यं स्यु र्मृष्टं स्याच्च पृथक्त्वकम्॥ ५५२ ॥
इत्येतस्य संयतस्य संघराज्यस्य कल्पना।
दुष्करा, परमेतां ते स्वीकुर्वन्त्येकशब्दतः॥ ५५३ ॥
वयं तर्कं च बुद्धिं च पुरस्कुर्मो गिरैव तु।
मनसा भावनामेव समाश्रित्याचरामहे॥ ५५४ ॥
इत्थं भूयोऽहमायामि तयोः काङ्ग्रेसराज्ययोः।
समस्यां विकटामेतां थॉमस्वाक्येन नोदितः॥ ५५५ ॥
यत्तेन सार्धशतकाद्वर्षात्पूर्वमुदीरितम्।
तर्कस्तु करुणां याति पक्षेषु पतितेष्वधः॥ ५५६ ॥
म्रियमाणां तु चटकामयं विस्मरति स्वयम्।
इदं सत्यं न नो गान्धिर्मृतां विस्मरति त्विमाम्॥ ५५७ ॥
परं स तस्याः पक्षेषु तथाऽऽधत्ते बलं कथम्।
न्यूनाधिकत्वेन पुनर्भूस्वाम्यादिप्रथास्वपि॥ ५५८ ॥
लग्ना भवन्त्यमी तर्कास्तर्कान्तिरमनर्थकम्।
अर्धसम्पत्स्वाम्यशैली समयप्रातिकूल्यभाक्॥ ५५९ ॥

साप्युत्पादनशैलीनामुन्नतेश्चाध्वनि स्फुटम् ।
उपस्थापयते बाधां महतीमिति साहजम् ॥ ५६० ॥
पुंजवादविकासेऽपि विघ्नं पातयतीह सा ।
प्रायो विश्वस्य भूस्वाम्यप्रथा नष्टाः शनैः शनैः ॥ ५६१ ॥
अद्य भूस्वामिनां स्थानं तद्गृहीतं कृषीवलैः ।
प्रायोऽहं कल्पयाम्येकं प्रश्नं प्रतिफलस्य तम् ॥ ५६२ ॥
गतवर्षे त्वभूदत्याश्चर्यं तत्पश्यतो मम ।
यद्गान्धिः क्षेत्रस्वामित्वप्रथामद्यापि वाञ्छति ॥ ५६३ ॥
कर्णपुरे हि तेनोक्तं चतुस्त्रिंशेऽब्दके यथा ।
कृषकेषु महीपेषु परिवृत्त्या हृदोर्मृदुः ॥ ५६४ ॥
सम्बन्धः शक्य आधातुं यदि चेदं भवेदिह ।
तदोभावपि शान्त्या च सुखेन च परस्परम् ॥ ५६५ ॥
प्रीत्याधिवसितुं शक्तौ मित्रे भवितुमर्हतः ।
अहं न भूक्षेत्रस्वाम्यप्रथालोपमकामयम् ॥ ५६६ ॥
ये तस्या लोपमिच्छन्ति ते न वाचं निजां विदुः ।
श्रीगान्धेरयमारोपोऽन्तिमोऽस्ति कटुताभृतः ॥ ५६७ ॥
श्रूयते यत्तदग्रेऽपि तेनोक्तमभवद्यथा— ।
विनैव कारणं सम्पत्स्वामिवर्गाच्च सम्पदाम् ॥ ५६८ ॥
तदीयानां समाच्छेदे न जातु स्यां सहायकः ।
मम ध्येयं तावदेतद्गृहं कृत्वा भवद्धृदि ॥ ५६९ ॥
भवन्तं स्वमतासक्तं कुर्यां येन भवान् स्वयम् ।
स्वसम्पत्तिं निधित्वेन कृषकाणां तु रक्षतु ॥ ५७० ॥
तस्याः प्रयोगो मुख्यश्च कृषकार्थे भवेदिह ।
मन्यतां चेदिह भवानन्यायेन स्वसम्पदा ॥ ५७१ ॥
वञ्च्यते तर्हि मामात्मपक्षे सज्जं प्रपश्यताम् ।
पाश्चात्यः साम्यवादो वा स समाजैकवादकः ॥ ५७२ ॥
अस्मन्मूलविचारेभ्यो भिन्नेष्वर्थेषु तिष्ठतः ।
ईदृशस्तद्विचारोऽन्योऽप्ययमेको विवर्तते ॥ ५७३ ॥
मानवोऽयं स्वभावेन स्वार्थी भवति किञ्चन ।
समाजवादसहितः साम्यवादः प्रतिष्ठितः ॥ ५७४ ॥

भवेदहिंसा—कृषकभूस्वामिगतस्नेहतः ।
इतीदं तेन भूस्वामिशिष्टमण्डलमीरितम् ॥ ५७५ ॥
पूर्वपश्चिमयोर्मूलकल्पनास्वस्ति चान्तरम् ।
नवेति नाहं जानामि, स्यान्न तद् भेद एष तु ॥ ५७६ ॥
स्पष्टोऽस्ति यद् भारतीयैः पुञ्जभूस्वामिभिः स्वकात् ।
पाश्चात्यबन्धुवर्गात्तु कृषकश्रमिकावलेः ॥ ५७७ ॥
हितमत्यन्तमेवात्रोपेक्ष्यतेस्म च भारते ।
भूस्वामिभिर्न कृषककल्याणाय तु कस्यचित् ॥ ५७८ ॥
सामाजिकीयसेवार्थकार्यस्योपक्रमः कृतः ।
पाश्चात्यालोचको ब्रेलसफोर्डः कथयति स्म सः ॥ ५७९ ॥
हिन्दुस्थाने महीपालास्तथैव च महाजनाः ।
परोपजीविनः क्रूरा नृशंसा रक्तशोषकाः ॥ ५८० ॥
न समाजे साम्प्रतिके प्रतिभैषां प्रपद्यते ।
स्यादत्र तत्रत्यमहीस्वामिनां दूषणं न तत् ॥ ५८१ ॥
परिस्थितिवशादेव ते साम्मुख्ये पराजिताः ।
निरन्तरञ्च पतनान्निबद्धाः कठिनस्थितौ ॥ ५८२ ॥
यतस्तेऽद्य निजात्मानमुद्धरेयुः प्रयासतः ।
बहुभ्यस्तु भूमिस्वामिभ्यस्तद् भूस्वाम्यं महाजनैः ॥ ५८३ ॥
आच्छिन्नं, ते लघीयांसो लघिष्ठाश्च महीधराः ।
यस्याः स्वाम्यं दधन्ते स्म तस्यामेव कृषन्ति ते ॥ ५८४ ॥
नगरेषु वसद्भिश्च पूर्वं तेषां मही धृता ।
ऋणं च दत्तं पश्चात्तु सा हृता ऋणनिष्क्रये ॥ ५८५ ॥
तेऽद्य भूस्वामिनो जाता गान्धिदृष्ट्या च सम्प्रति ।
ते तेषां मन्दभाग्यानां निधिषाः सन्ति रूपतः ॥ ५८६ ॥
गान्धिरेतादृशाल्लोकादाशास्ते यदितः परम् ।
ते निजार्यविशेषेण योजयिष्यन्ति तद्धिते ॥ ५८७ ॥
यदि सा क्षेत्रस्वाम्यादिप्रथा साधीयसी मता ।
तदा सर्वत्र देशेऽस्मिन् कथं नैषा प्रयुज्यते ॥ ५८८ ॥

हिन्दुस्थानस्य भूयस्सु भागेष्वस्ति प्रजाप्रथा।
प्रवर्तयते गान्धिस्तामिमां न प्रदेशके ॥ ५८९ ॥
महीयसीं तां भूस्वाम्यक्षेत्रस्वाम्यादिकप्रथाम्।
संचालयितुमेकां वाप्युभे वा न प्रसत्स्यति ॥ ५९० ॥
कश्च हेतुर्भवत्येका युक्तप्रान्तेऽङ्गवङ्गयोः।
श्रेयसेऽन्या च पञ्चाम्बुगुर्जरादिप्रदेशके ॥ ५९१ ॥
ध्यायामि हिन्दुस्थानस्योत्तरदक्षिणयोरहम्।
पूर्वपश्चिमयोश्चापि वासिनां न तदन्तरम् ॥ ५९२ ॥
तेषां मूलविचारेषु यदा भेदो न विद्यते।
तदा यदद्य तच्छ्व: स्याच्छ्वस्तनं न परेदिवि ॥ ५९३ ॥
यदेव वर्तते सर्वं तदेवेह प्रवर्तताम्।
परिवर्तनं किमप्यत्रापरिहार्यं न विद्यते ॥ ५९४ ॥
न परीक्ष्यञ्च लोकानां वाञ्छनीयं हितप्रदम्।
वा किमस्तीति हृदय-परिवर्तनमस्तु तत् ॥ ५९५ ॥
जीवने तस्य प्रश्नेषू चेयं स्याद्धार्मिकीह दृक्।
राजनीत्यर्थशास्त्राभ्यां वा समाजैकशास्त्रत: ॥ ५९६ ॥
न सम्बन्धोऽस्ति गान्धिस्तु राजनैतिकराष्ट्रिये।
क्षेत्रे त्वितोऽप्यसावग्रे गच्छतीति विरम्यते ॥ ५९७ ॥
एता: कियत्यो विकटा: समस्या: सन्ति सम्मुखे।
कैश्चन ग्रन्थिभिश्चैतेऽनुज्झिता: स्मो मनस्स्वति ॥ ५९८ ॥
यावच्च तैर्न मुक्ता: स्मस्तावदग्रे गतिर्न सा।
सम्भाव्यतेऽथ मुक्ति: सा भावुकत्वेन दुर्लभा ॥ ५९९ ॥
सुबहूनि दिनानीयु: स्पिनोजा: प्रश्नमुक्तवान्—।
भवते किंनु रोचेत ज्ञानान्मुक्तिरथो भुवि ॥ ५९० ॥
भावुकत्वेन बद्धत्वमत्र तस्याभवत्प्रियम्।
अस्माकं तु परं चेत्स्यात्तत्स्वातन्त्र्यस्य साधकम् ॥ ६०१ ॥

दरभङ्गादिभूपालानभ्यायातानृषे: कुले।
अभिनन्दन पत्रैर्य: कौमारे पूर्वमार्चिचत् ॥
सोऽद्य वृद्ध: करोत्येतन्नेहरूकाव्यमुत्तमम्।
यस्यो द्विषष्ट: सर्गोऽयं समाप्तिमुपगच्छति ॥

हृदयपरिवर्तनं बलप्रयोगो वा

शिखरिणी

त्रिषष्टः सर्गः

अहिंसासिद्धान्तं रसविधुमिताब्दादिह पुरा
स गान्धिर्मुद्रावत्स्म विलिखति हिन्दुस्थलहृदि।
तदातश्चाद्यावध्यपि लसति मुद्रेयमुरसि
मुहुः हिन्दुस्थानक्षितिजमपि साच्छादयति च ॥ १ ॥

द्विरुक्तोऽयं लोकैर्बहुभिरविचारावहिततः
कृतः सङ्घर्षोऽपि स्वमनसि जनैः कैश्चन पुनः।
चिरादङ्गीकारे विनिहित इतश्चोपहसितः
स्फुटं स्पष्टं चायं समभजत भागं नृपनये ॥ २ ॥

तथास्माकं सामाजिकमपि ततो जीवनमिदं
प्रभावं प्राप्तं सत्तदिह बहुभागं स भजति।
बहिर्हिन्दुस्थानान्महति जगति ध्यानमकृषत्
किलायं लोकानामतिशयपुराणोऽस्ति यदयम् ॥ ३ ॥

पुराणश्चेयान् स प्रभवति पुराणीयमियती
मनुष्यस्यास्ते सा खलु मननशक्तिस्तदनुगा।
परं गान्धिर्व्यक्तिर्भवति प्रथमा यद्यतनतः
प्रयुक्तोऽयं सामाजिकनृपनयान्दोलनयुगे ॥ ४ ॥

पुराऽहिंसा वैयक्तिकविधिषु धर्मेण मिलिता
ऽभवत्तेषां सेव्या प्रविदधति ये मुक्तिपदवीम्।
अमीषामात्मानं नियमयितुमावश्यकयमे-
ष्वियं पूर्वोक्तत्वात्प्रकटयति चाभ्यर्हितपदम् ॥ ५ ॥

तया नासीत्सामाजिकगतिपरिस्थित्यवसरे
समाधानं कर्तुं क्वचन परिवृत्ति च समयः।
यदि त्वासीदेष ध्रुवमभवदाध्यात्मिकतया
जनोऽन्यायं सामाजिकविषमतां चाप्यसहत ॥ ६ ॥

अशोचत्तन्त्वोतुक्रम इह चलिष्यत्ययमिति
परं गान्धिर्व्यक्तिव्रतमकृत सामाजिकव्रतम् ।
अहिंसा-सत्यादिव्रतमिह पुरा व्यक्तिविषयं
प्रदत्ते मुक्तिं तत्प्रवितरतु सामाजिकतया ॥ ७ ॥

परीवृत्तिं कर्तुं यदुभयगतां गान्धिरुदगात्
अमुष्माद्धेतोश्च प्रविततमिदं क्षेत्रमदधात् ।
अलेखीदेषोऽस्मिन् जगति मनुजस्य स्थितिषु यः
परीवृत्तिं वाञ्छेत्स इह जनयेत्क्रान्तिमुचिताम् ॥ ८ ॥

तथा कर्तुं चास्ते सरणियुगलं नान्यसरणिः
अहिंसा हिंसा वा प्रभवति परा मानवतनौ ।
परं त्वेतां कर्तुं बलमिह प्रयोज्यं भवति, तत्
प्रयुञ्जानो लोके स्वयमपि पतत्येष च परः ॥ ९ ॥

प्रयुञ्जानः पूर्वां व्रतसममहिंसां तु मनुजः
प्रभावं यं सूते स भवति न मोघः क्वचिदपि ।
प्रयोज्यानां देहं स्पृशति नहि सात्मानमिह तं
प्रयोक्तारं चैषा दृढदृढतरं चात्र कुरुते ॥ १० ॥

विचारोऽयं साक्षाद्भरतभुवि दृष्टेरनुगतः
स्ततोऽस्मद्देशे स्व्यक्रियत इयमत्रोपरिदृशा ।
अतिस्वल्पैस्तस्या विशदपरिणामा अवगताः
परेऽस्पष्टज्ञाना अपि समुदितश्रद्धहृदयाः ॥ ११ ॥

समुत्साहेनासन् नृपनयिककार्येषु निरता
गतौ शैथिल्ये चाप्यगणित-समस्या उदगमन् ।
समाधानं तासां कठिनमभवत्तेन जनता
किमप्यौदासीन्यं प्रगतिजवभङ्गं श्रितवली ॥ १२ ॥

अमीषां प्रश्नानां नहि नृपनयोक्ते गतिविधौ
प्रभावोऽभूत्साक्षात् स्म स भवति सिद्धान्तविषये ।
अहिंसात्म त्वान्दोलनमिह न जातं सुफलितम्
यतो हिन्दुस्थानं निहितमिह साम्राज्यनिगडे ॥ १३ ॥

अहिंसातः क्रान्तिर्नहि भवति सामाजिकपदे
तथाप्येतद् द्रष्टुं स भवति जनोऽस्या बलमिदम् ।
इहत्यानां कोट्योऽक्रुषत परिवर्तनमिदं
अहिंसात्मन्यान्दोलन इह चरित्रं विकसितम् ॥ १४ ॥

प्रवृद्धेयं शक्तिः समुपचितविश्वासमहसा
श्रितं साद्गुण्यं तैः कलित ,उदयो राजनयिकः ।
अयं चाथो सामाजिकसमुदयोऽप्यस्ति फलितः
न वाच्यं संघर्षादिदमिदमर्हिसाश्रयणतः ॥ १५ ॥

अनेकैर्यद्राष्टैरधिगतमिदं सद्गुणबलं
स्वया हिंसाशक्त्या तदधिगतमस्माभिरमुया ।
अहिंसायाः शक्त्या भवति किल निश्चप्रचमिदं
महामूल्यं सिद्धं बलमिदमहिंसाश्रयणजम् ॥ १६ ॥

स वै यस्याः क्रान्तेरदधत समाजे प्रचलनं
अहिंसेयं तस्याः समुपजननेऽभूत्सहचरी ।
इह क्रान्तेर्मूलस्थितिरपि गता कारणपदं
तया तीव्रत्वेनाक्रियत जनताजागरणकम् ॥ १७ ॥

यदेतत्क्रान्तेः प्राग् भवति परिवृतस्तु जनकं
स्फुटाऽहिंसापक्षस्तुतिरथ न सा दूरमयते ।
अतोऽयं नः प्रश्नो व्रजति न समाधानपदवीं
न गान्धिश्चास्माकं कमपि सहयोगं वितनुते ॥ १८ ॥

अमुष्मिन् प्रश्नेऽसावलिखदवदच्चापि बहुलम्,
परं यावज्जाने न स ततविचारं विहितवान् ।
तदर्थेऽसौ वैज्ञानिकदृढमथो दर्शनदृशं
प्रयोक्तुं न प्राप्तोऽवसरमपि तत्सार्वजनिकम् ॥ १९ ॥

बलं नित्यं धत्ते किल महिमवत्साधनमिदं
सदा साध्यं तस्मान्मतिवितरणं साधुवलतः ।
भवेदाद्योपायाद् हृदयपरिवृत्तिर्न परतः
स सत्याहिंसाभ्यां किमपि शुभमाह स्म न पृथक् ॥ २० ॥

अमीषां शब्दानामकुरुत प्रयोगं समतया
यथा ते तुल्यार्था न खलु पृथगर्थानभिदधुः ।
न चास्मिन्यस्यास्ते सहमतिरसौ नास्ति मतिमान्
न चैवोच्चात्मेति प्रभवति स दोषी नयदृशा ॥ २१ ॥

प्रवृत्तिस्तन्मन्तुं प्रचलति पुरा तेन बहवो-
ऽनुगाः श्रीमद्गान्धेरभिक्षधति धर्मात्मसु निजम् ।
परं येषां गान्धावियदधिकश्रद्धाधिगमकं
न जातं सौभाग्यं हृदि दधति शङ्काः सपदि ते ॥ २२ ॥

इहासां शङ्कानां समयगतकर्तव्यविषयि-
ण्यपेक्षा नो काचित्परमिह स सिद्धान्त इषितः ।
किलान्वीतः कार्यैर्भवति च प्रतिव्यक्ति नियतः
स नोत्याथो सामाजिकनवदृशा स्याच्च सफलः ॥ २३ ॥

अहं मन्ये शङ्का अपि मयि लसन्त्येव विविधा
न चाप्यासां किञ्चिन्मिलति च समाधानमपि मे ।
न हिंसां स्वीकुर्वे, परमिह तया सम्भृतमनाः
सदा कुर्वे हिंसां परदमनयत्नेषु निरतः ॥ २४ ॥

पुनर्गान्धेर्दान्तेरधिकतरदान्तिः क्व नु भवेत्
परीणामे कुण्ठीभवति मतिरत्रैकमनसाम् ।
अनन्यानां येषां तदभिमतवस्तूनि भजतां
यथा ते स्वातन्त्र्यान्न किल कुशलाः शोचितुमपि ॥ २५ ॥

यथार्थोऽयं प्रश्नः किमिह समुदाया अपि हृदा
क्षमन्तेऽहिंसां तां वरितुमिह ते व्यक्तिवदिति ।
भवेदस्यार्थोऽयं किल जनसमाजः सुजनता-
दिशि प्रेमाकाशेऽविशदविततः साम्प्रतमिति ॥ २६ ॥

इदं सत्यं भूयादिह जनसमाजोऽयमियता
महादृक्कोणेनोन्नत इति परं लक्ष्यमिह नः ।
घृणा, कुत्सा, स्वार्थाभिरतिरिति तस्मान्निरयिता
भविष्यत्येतद्वा नहि तदिति वादस्य विषयः ॥ २७ ॥

विना त्वेतामाशां जडगदितमस्तीह विरसं
निरर्थं स्यात्कम्पस्फुरणभृदिदं जीवनमपि।
इमं चैवादर्शं कलयितुमिहैते किमु गुणाः
सुनिर्देश्यास्ते स्युः किमु न विनिवार्या विहतयः॥ २८॥

पुरो वैतान् विघ्नानिह परिहरामस्तदनु चो-
पयुक्तं तद्वातावरणमनुकूलञ्जनयितुम्।
प्रयत्नं वा कुर्वीमहि किमथवोपाययुगलं
क्रियायामानेतुं युगपदभिवर्धेमहि पुरः॥ २९॥

अहिंसाहिंसाभ्यामिह सुमतिदानेन हृदये
परीवृत्तिः साध्याप्यथ बलप्रयोगेण वपुषः।
द्वयोर्भूयान् भेदो विशद इह शारीरिकबला-
त्कृताया हिंसाया वरमधिकृतं नैतिकबलात्॥ ३०॥

इदं ह्यन्यस्मात् स्यादधिकदमनं भूरिभयदं
प्रसिद्धं लोकेऽस्त्रं व्यवहृतिविशुद्धं स्थिरफलम्।
अहिंसा सत्ये स्तः किमथ भुवि पर्यायवचने?
तयोर्भेदः सत्यं किमिति सुचिरात्प्रश्न उदितः॥ ३१॥

अथास्य प्रश्नस्योत्तरशतसहस्रेष्वपि किला-
स्थितः प्रश्नोऽद्यापि ध्रुवमिह समाधानरहितः।
यदप्यस्याद्य स्यात् पृथगिदमहिंसास्ति च पृथक्
भवेद्धिंसा दुष्टा न सततमियं पापमुदितम्॥ ३२॥

स्वरूपाण्यस्याश्चाभिदधति च भेदानपि बहून्
क्वचिद्दृष्टा रम्या यदियमुररीकर्तुमुचिता।
स्वयं ब्रूते गान्धिर्भयपरवशत्वाद्यवगुणात्
इयं हिंसा श्रेष्ठा परमभिदधात्यादिपदतः॥ ३३॥

इदं सत्यं हिंसाऽनिशमनुगता द्वेषसदृशै-
र्मनोवेगैः प्रायो नहि सहचरत्वं तु नियतम्।
कदाचित्सद्भावोऽपि हि भवति हिंसाधिकरणः
क्रिया शल्योपेता किमु भवति नोदाहरणकम्॥ ३४॥

यदाधारश्चायं तदिह खलु पापं न भवति
सदाचारे नोतो भवति निकषोऽयं दिवि भुवि ।
तदित्थं हिंसाया अनुचिततरत्वेऽपि दृगियं
तदौचित्यं ब्रूते तदिदमुदितं कर्म गहनम् ।। ३५ ।।

न हिंसासंघर्षौ किमपि जहितो जीवनमिह
प्रतीतं हिंसेयं जनयति च हिंसामिह भुवि ।
अतो हिंसारोधे भवति भुवि हिंसा न करणं
न हिंसिष्यामीति प्रतिश्रुतिरतो नास्ति सुकृतम् ।। ३६ ।।

नकारात्मा दृष्टिः प्रतिपदमुपस्थापयति नः
किलान्तर्द्वन्द्वं तं नियमयति तां जीवनगतिम् ।
इदानीं राज्यानां धमनिषु समाजस्य च हृदि
प्रवाहो हिंसाया रुधिरसदृशोऽयं प्रवहति ।। ३७ ।।

न राज्यानामस्त्रं भवति यदि हिंसा च जगति
करादानादि स्यात्कठिनमथ दण्डाधिकरणम् ।
भवेत्तद्दुःसाध्यं प्रभवति हि दण्डोऽत्र जगति
स्थितौ योगक्षेमौ खलु तमधिकृत्यैव परितः ।। ३८ ।।

सशक्तं चेद्राज्येऽत्र पुरुषदलं सैनिकबलम्
तदैवातङ्कानां भवति प्रतिरोधः समुचितः ।
अयं दण्डो व्यक्ति नियमयति व्यक्त्यन्तरधनात्
तथैवैकं राज्यं स्थगयति स राज्यान्तरधनात् ।। ३९ ।।

अयं दण्डो राष्ट्राण्यपि सपदि गोपाययति ता-
न्यथो तत्तद् ग्राह्यं सहजगतिभिर्ग्राहयति च ।
इदं सत्यं गान्धेर्न भवति नकारात्मकतया
न चाप्येषा लोके प्रविशति क्वचिद्रोधकतया ।। ४० ।।

अहिंसात्मा रोधो भवति हि परं वस्तु किमपि
विधेयात्मा सेयं प्रचलति प्रणालीह सततम् ।
न तेषामेषास्ते स्थितिषु नमयन्तीह तु शिर-
स्तथा सामाजिक्या प्रगतिकगतेर्विभ्यति न ये ।। ४१ ।।

भवेदुद्देश्यं सद्धृदयपरिवृत्तेः किमपि तत्
परं वैवश्यार्थं प्रकृतिदमनार्थं तदुचितम् ।
इदं त्वन्यद्यत्तद् दमनमिह शिष्टञ्च सुखदं
न वै बाह्यापत्तेर्जनकमथ नैवाप्रियमपि ॥ ४२ ॥

इदं वैवश्यञ्च प्रथमलिखितिष्वस्ति भवतो-
ऽपि पञ्चापे गान्धेरिह सपदि सैन्यैर्नियमने ।
कृतानत्याचारानवददधिकृत्य प्रतिनिधिः
स वार्डोचैम्स्फोर्डैः, प्रतिवदति गान्धिः स तदिदम् ॥ ४३ ॥

मनोवृत्तिर्याऽभान्मम प्रवदतस्तस्य महतो
हिते संसत्प्रोद्घाटनमहसि तद्धेतुकतया ।
न कश्चिन्मानी तैः सह कमपि सम्बन्धमधुना
त्वसम्भाव्यं मत्वा तदधिकृतशिष्टैरपि क्वचित् ॥ ४४ ॥

स पञ्चापस्यार्थे यदचरददमुष्याशयमिमं
तु जानीमो नासौ किमपि प्रतिकर्तुं न क्षमते ।
न चापीच्छत्येव प्रणिदधतु सर्वे तदधुना
भविष्येऽत्यासन्नेऽभ्युपगतसमस्या घटयितुम् ॥ ४५ ॥

भविष्ये त्वासन्नेऽभ्युपगतसमस्या त्वियमहो
यथात्याचाराणां प्रति तिषु पश्चात्तपतु सा ।
परं शिष्ट्याश्वासोऽपि न वितरितुं चेतसि धृतो
अहो वायस्रायस्तमिममितिहासाय व्यसृजत् ॥ ४६ ॥

इतीदृक्षी वार्ता किल जनमनःखेदजननी
भविष्यत्स्येवेति प्रतिविदितमप्यस्त्यविदितम् ।
अमुष्यार्थोऽयं स्याद् भरतभुवि नात्माभिमननैः
सुसम्बद्धेऽप्यर्थे मतिरियममीषां न विशदा ॥ ४७ ॥

कृता अत्याचारा इह जनसमाजे यदधि ते
ऽतिशान्ते विश्वासास्पदवदनपात्रैरधिकृते ।
भविष्ये चैतिह्यैरनुगतविनिर्णीतिफलने
कृतेऽपि स्यात्कोऽर्थः प्रतिकृतियुगे दूरमयिते ॥ ४८ ॥

न पञ्चापे न्यायं कमपि हि चिकीर्षन्त्यधिकृताः
तथाप्यस्मात्साह्यं महदभिलषन्तीति सुतराम् ।
स एषां पाखण्डः प्रतिफलति तत्रेति कटूवाङ्
मया वैवश्येन स्थगितमनसा काचिदुदिता ।। ४९ ।।

भवेद्राज्यं हिंसाश्रितमिति जगज्ज्ञानमखिलं
न शास्त्रोत्था हिंसापितु परमसूक्ष्माधिकरणी ।
रहश्चारैः साक्ष्ये निपुणमतिभिर्ग्राहकवरैः
पुरः पश्चाच्छिक्षासरणिसुसमाचारदलकैः ।। ५० ।।

प्रचारे चासत्ये सुकृत-द्रविणाभावजभये
प्रसङ्गानित्येतान्प्रणिगदति हिंसापदमिदम् ।
इहाऽऽकालं शान्तेरिदमखिलमेवास्ति सहजं
प्रशिष्टिक्षेत्रेषु प्रकटयति कश्चिन्न यदि तम् ।। ५१ ।।

तथा संग्रामानेहसि तदुचितञ्चातिशयितं
स हेनूीबाटन्यः स्वयमपि कविश्चापि ब्रिटिशे ।
अभूद्राज्ञो दूतोऽकृत स शतवर्षत्रितयतः
परीभाषां दूतो भवतु किल कीदृग्गुणमयः ।। ५२ ।।

स विश्वस्या व्यक्तिर्भवति निजदेशस्य च हिते
प्रचारेऽसत्येऽपि प्रभवति विदेशेषु प्रहितः ।
इहाद्यत्वे दूतैः सह सहकृतः सैनिकवर-
स्तथा सेनान्वेते भवति च बणिग्भेदविदुरः ।। ५३ ।।

अमीषां कार्याणि प्रहितविषये भेदग्रहणं
तदर्थं तत्पृष्ठे चरजनदलं तिष्ठति महत् ।
दलस्यास्य प्रायो यदगणितशाखाश्च प्रशिखा
व्रजन्त्यासां मध्ये बहुतरचराश्चाप्युपचराः ।। ५४ ।।

सदोषाणां गोष्ठीभिरपि परिचित्यै प्रयतते
तथोत्कोचाश्चान्ये नरपतनकोपायनिवहाः ।
प्रयुज्यन्ते गुप्ता अपि भुवि च हत्या अपि नरै-
रिमाः शान्तेः काले भृशमनुचिता अप्यनुकृताः ।। ५५ ।।

रणस्यैताः कालेऽधिकमहिततां यान्ति परितः
परीणामश्चासां भवति स विनाशो दिशि दिशि ।
गते विश्वव्याप्ते महति समरे यत्प्रचरणं
कृतं तस्याद्योदाहरणपठनाद्विस्मयभवः ॥ ५६ ॥

रिपूणां देशेभ्यः कियदनृतवार्ता न चरिताः
अमूषां वार्तानां प्रचरणविधौ गुप्तचरकाः ।
तदाभूवञ्जाता इह च वितताास्तङ्क्तिरणे
धनं चान्धान्वन्धं प्रविततमभूत्तत्विव इतः ॥ ५७ ॥

द्वयोर्मध्ये विश्राम इति तदभूच्छान्तिसमयः
नियुद्धार्था सज्जा च तदवधिमात्रं प्रकथितः ।
स संघर्षो नूनं प्रचलति च किन्त्वार्थिक इहा
न्यदेशेष्वत्रैतत्कियदवधि चाद्यापि चरति ॥ ५८ ।

ततः शान्तेः कालेऽपि स चलति शश्वद्गतिरयं
मिथो भिन्ने शीले सततमिह विद्रोहनिरते ।
निवेशे साम्राज्ये विजयिनि पराभूतिविषये
सुरक्ष्ये वा शोष्ये क इह न ययौ युद्धरसिकः ॥ ५९ ॥

अतः शान्तेः कालेऽपि न समरसज्जा विरमति
तथा सेनासेवाधिकृतिपरमास्तावदुभये ।
स्थितेः साम्मुख्यार्थं विदधति किलाभ्यासमपि ते
रणक्षेत्रे योद्धुर्हितकरमिदं पुस्तकमपि ॥ ६० ॥

रणक्षेत्रे सैन्यार्थकनवलग्रन्थेऽस्ति लिखितं
वयं सिद्धान्तेऽस्मिन् पुनरपि पुनर्ब्रूम इह यत् ।
सदा सत्ये निष्ठा, परमनय इत्यस्ति जयति
सदा सत्यञ्चेति स्फुटमुपदिशन्तीह शिशुकान् ॥ ६१ ॥

यदीदं युद्धानेहसि सदुपयोक्तुं प्रयतते
तदा तस्य श्रेयो नयतु न स खड्गं बहिरिति ।
इदानीं हिंसाया अथ च तदसत्यस्य वरणं
विरोधेऽन्योन्यस्मिन् स्वयमपरिहार्यन्तु भवति ॥ ६२ ॥

स्थिता वर्गाणां वा अधिकृतिरियं सम्प्रति करे
ततस्तैः स्वां सत्तामधिकृतिविशेषात् समवितुम् ।
पतद्वर्गाणाञ्चानवसरप्रदानाय नियमा-
द्मो हिंसाऽसत्यं त्रयमपि समाश्रेयमधुना ॥ ६३ ॥

इहोद्बुद्धेऽस्मिल्लोकमत इह सङ्घर्षदमन-
स्वरूपे सुस्पष्टे, शिथिलयति हिंसा-'प्रखरताम्' ।
परं वस्तुत्वेनाधुनिकमनुभूतं प्रदिशति
प्रतीपामेवाशां, प्रखरयति चान्दोलनमपि ॥ ६४ ॥

प्रवृद्धा स्याद्धिसा यदि भवति क्षीणा क्वचिदियं
क्षणेऽन्यस्मिन् भूयः प्रखरतरतां सात्र वहति ।
प्रवृत्ति हिंसाया नियमयति नेयं त्वणुमितां
सहिष्णुत्वं धर्मेऽपि न, न किल सा नैतिकरुचिः ॥ ६५ ॥

पृथक्किञ्चिद् व्यक्त्या क्रियत यदि चेत्नैतिकपथे
किलौन्नत्यं तर्हि प्रपदितमनेनोन्नतपदम् ।
अतीतापेक्ष्यत्वाज्जगति बहवः सम्प्रत्ति जना-
स्तमुच्चं वै वर्गं श्रयितुमधिकारं तु दधते ॥ ६६ ॥

ततः सम्भूयात्रोन्नतिरधिगतास्त्येव चरमैः
समाजेनानेन प्रथमनिजवृत्तिर्नियमिता ।
समस्तैः किन्त्वेतैरिह समुदयैरुन्नतिरियं
विशेषान्न प्राप्तेति न भुवि समाजोन्नतिरभूत् ॥ ६७ ॥

इह व्यक्त्या व्यक्त्याऽभ्युदयगतये या विकृतयः
पुरातन्यस्त्यक्ता विदधति समाजे स्थितिमिमाः ।
द्वितीयैस्तैर्हिसां प्रति नमनमाविष्कृतमिदं
ततो वर्गाणां ते दधुरिह समे नेतृपदवीम् ॥ ६८ ॥

यदि स्वीकुर्मोऽमी क्रमकृतनिरासा जनपदा-
दमी हिंसादोषाः स्युरिति तदपीदं न सुकरम् ।
यदेषोपेक्ष्येत स्थिरबलप्रयोगस्य विषयः
स राज्ये वा सामाजिकमनुजजीवन्युपनये ॥ ६९ ॥

अपेक्ष्यं स्याद्राज्यं किमपि भुवि सामाजिकनये
ततो येषां हस्तेऽधिकृतिरिह दीयेत बत ते।
कुवृत्तीनां व्यक्तेरथ जनसमाजस्य दमने
ततः स्वार्थादीनां किमपि परिवृद्धाः सहजतः॥ ७० ॥

पतत्येवात्रासावधिकृतिमवाप्तो हि मनुज-
स्ततः स्वातन्त्र्यार्थी दमन-सजुगुप्सोऽपि सरलः।
सदोषाणां दण्डे खलु बलप्रयोगं स कुरुते,
करिष्यत्येवेति स्फुटमिह स निःस्वार्थहृदयः॥ ७१ ॥

जगत्यस्मिन्यावन्न भवति जनोऽन्योपकृतिमान्
तथान्येषामाक्रामकरुचिभृतां चापि दमने।
भवेत्कर्तव्यस्तैः खलु बलप्रयोगोऽत्र नियतं
तथा तेभ्यो रक्षार्थमपि निजदेहादिवसुनः॥ ७२ ॥

इहापेक्षा दूरे भवति च तदा यर्हि परितो
भवेदेकं राज्यं, तदियमिह हिंसास्ति नियता।
इति प्राप्ते बाह्याक्रमणसमये चान्तरिकसु-
व्यवस्थार्थे कार्ये किल बलप्रयोगोऽस्ति नियतः॥ ७३ ॥

तदेतस्मिन् द्वन्द्वे भवतु कतरो वा स समयः
इति प्रश्ने 'सामाजिकशुभव्यवस्थार्थमपि चेत्।
भवान्नीतेः शास्त्रं नमयति सुराज्यस्य पुरतो
प्रयोगं चावश्यं मनसि स बलस्यास्य मनुते॥ ७४ ॥

तदा हिंसाहिंसात्मकबलप्रयोगेऽथ विहिते
प्रशिष्टया वा क्रान्त्या कृतबलप्रयोगे न कमपि।
प्रभेदं तं शुद्धं प्रकटयितुमास्ते क्षम इहा-
हमेतन्नो जाने मनसि किल मन्ये स्थितिमिमाम्॥ ७५ ॥

समाधातुं गान्धिः स्फुटमिह वदिष्यत्यवसरे-
ह्यपूर्णे संसारे सकलमपि सच्छासनमिह।
विना हेतुं बाह्याक्रमणकृतकष्टात्स्वभवितुं
स्वराज्यं चावश्यं भुवि बलप्रयोगेऽस्तु विवशम्॥ ७६ ॥

अवश्यं राज्येन स्वनिकटगराज्येन सह वा
परै राज्यैः साकं शममयसुहृद्भावघटितः।
सुसम्बन्धो धार्यः परमिह तदाक्रान्तिसमयो-
ऽपि सम्भाव्यस्तस्मिन्नपि नियमनिर्माणमुचितम् ॥ ७७ ॥

बलात्कारं कुर्युस्त इह नियमा, भिन्ननिचये
विभिन्ने वा वर्गे तदधिकृतिभङ्गान्नियमितुम्।
स्वतन्त्रत्वं कार्येऽप्युपहतममीषां च भविता
ऽथवा संकीर्णं स्यादिति झटिति हिंसाप्युपगता ॥ ७८ ॥

बलात्कारः सर्वत्र च भवति यस्मात्तु नियमे
कराचीकांग्रेसेऽप्यभिहितमभूत्कार्यसरणौ ।
जनानां तत्संशोषणनिरसनार्थं नृपनयो-
पलब्धस्वातन्त्र्येऽघनजनगतस्वावशमपि ॥ ७९ ॥

समावेश्यं तस्यास्य च परमलक्ष्यस्य नियत-
स्वसिद्ध्यै येषां स्युस्त्वधिकृतिविशेषाः समधिकाः।
अमीभिः स्वस्वस्मादपि कृतिविशेषात्कतिपये-
ऽधिकाराः संत्याज्या इह परिमितायामधिकृतौ ॥ ८० ॥

अमुत्राग्रेऽप्युक्तं श्रमिकजननिर्वाहकरणं
भवेत्प्राप्यं पारिश्रमिकमथ सौविध्यमितरत्।
प्रभुत्वेष्वन्येषामधिककरयोगोऽयमुचितो
विशिष्टोद्योगेषु प्रतिखनिजवस्तुष्वथ च सः ॥ ८१ ॥

समस्तेष्वन्येषु स्थलजलनभोमार्गगतिषु
तथा यातायातौपयिकरयलादिष्वपि भवेत्।
प्रतिस्वं राज्यस्याधिकृतिसुनियन्त्रादिनियतं
प्रतीबन्धः स्यान्मादकसकलवस्तुन्यपि च सः ॥ ८२ ॥

अनेके चैतेषां सकलनियमानां क्वचन वा
विरोधं कुर्वीरन् बहुमतपुरःशीर्षनमनम्।
कृतस्याज्ञाभङ्गस्य भयत इतीदं च नियतं
प्रजातन्त्रं प्राहुर्बहुमतनतेनाल्पमततः ॥ ८३ ॥

प्रभुत्वान्वेतानां ध्रुवमधिकृतीनां नियमने
तथा न्यूनीकारे यदि नियमनिर्माणमभवत् ।
विरोधः किन्तस्य न्विह बलप्रयोगप्रतिवचः-
प्रयुक्त्या स्वीकार्यो भवति, नहि सोऽस्तीह नियमः ॥ ८४ ॥

विधानानां सृष्टौ सपदि जनतन्त्रात्मकविधे-
रयं मार्गः श्रेयो भवति न ततो युक्तिरिह सा ।
इदं वक्तुं शक्यं बहुमतमिदं वै त्रुटिगतं
अनैतिक्ये मार्गे प्रचलति स चेत्यत्र मननात् ॥ ८५ ॥

प्रतिप्रश्नो जातो—बहुमतकृतः किन्नु नियमः
स सिद्धान्तं कञ्चिन्नववमनुत' इत्याह स पुनः ।
अगत्यास्माकं तद् वहतु किल मध्यस्थपदवीं,
यदि प्रत्येकस्याधिकृतिरिह दीयेत च पृथक् ॥ ८६ ॥

तदा मूलान्नश्येदिह स जनतन्त्रात्मकविधिः
अहं व्यक्तित्वेनानुभवमिह वक्ष्यामि बहुधा ।
स्वसम्पत्ते रीतिः कतिपयजनेभ्योऽलिकपदं
समाजस्याधातुं वितरति किलैतामधिकृतिम् ॥ ८७ ॥

तयैते चात्यन्तां क्षतिमभिवहन्त्यस्य परित-
स्ततोऽहं मद्यादप्यधिकमभिमन्येऽत्र दुरितम् ।
हिनस्ति व्यक्तिं तत्पुनरिह समाजं तु प्रभुता-
र्महिंसा सिद्धान्ते पुनरपि जना येऽत्र परमाः ॥ ८८ ॥

अमीषां मध्यान्मामकथयदिहैकः प्रतिनिधि-
र्विना हानिस्वीकारमिव धनराष्ट्रीयकरणम् ।
अयुक्तं स्यादेतत्स्फुटबलप्रयोगानुचरितं
ततोऽहिंसासिद्धान्तहतिकर-हिंसाविरचितम् ॥ ८९ ॥

विचित्रं वस्त्वेतत् समहिममहीपादथ बलात्
करादाने शिष्टैः सह कृतिषु सङ्कोचरहितैः ।
अनेकासां यन्त्राद्यधिकरणिकानां च पतिभिः
श्रियां पुञ्जीकारे निरतमतिभिस्तर्कितमिदम् ॥ ९० ॥

अयं भावो येषां हितमिह परीवर्तनविधौ
न तेषां पक्षे तद् बहुमतमिहास्ते तु तदलम् ।
परीवृत्त्या येषां क्षतिरिह त एवात्र हृदये
परीवृत्त्यै युक्ताः इह मितदलास्तत्प्रतिरुधः ॥ ९१ ॥

इतीहासात्सिद्धं भवति यदिहार्थाहितहितं
समूहानां तेषां वृशमिह विनिर्मान्ति सदृशीम् ।
अमीषां तर्कैर्वा किमपि न भवेन्नैतिकमतैः
प्रसीदेयुः केचित्त्वथ परिहरेयुस्त्वपि कृतीः ॥ ९२ ॥

समूहा वर्गा वा क्वचिदपि तथा नो विदधति,
स्वसत्तां त्यक्तुं ते नहि समुदिताः शासकगणाः ।
न च त्यक्तुं तांस्तानधिकृतिविशेषान् सुपुरुषैः
कृता यत्नाः सर्वे त्विह दिशि मनाङ्नो सफलिताः ॥ ९३ ॥

न चाप्येतन्मन्तुं किमपि प्रबलं मानमिह मे
यदग्रे यास्यामो हृदयपरिवृत्तौ सफलताम् ।
स राइनहोल्डश्चालिखदिह जना येऽभिवधते
विवेकाद्धर्माच्चाभवदिह हि सद्भावचयनम् ॥ ९४ ॥

इदानीं व्यक्तीनां स्वहितपरतायां प्रतिदिनं
प्रयुक्तं चास्तीदं किमपि नवमेवाङ्कुशमहो ।
अतो भिन्ने भिन्ने भुवि जनसमाजे च किमपि
समूहेष्वैक्यस्य स्थितिमतिदृढां कर्तुमुचितम् ॥ ९५ ॥

क्रियैषा स्याच्छश्वद्गतिरिति त आचारविबुधाः
समाजे लोकानां चलति यदिह न्यायगतये ।
महान् संघर्षोऽयं यदभिलषते राजनयिकं
निजाधारं तं ते न खलु विमृशन्तीति विशदम् ॥ ९६ ॥

न ते स्वीकुर्वन्ति प्रभवति समहात्मकबलम्
न चैते जानन्ति प्रकृतिनियमानत्र बहुशः ।
अमीभिः सामूहिक्य इह विलसन्ति प्ररुचय-
स्त्विमा वृद्धेर्धर्मस्य च दधति नैवाङ्कुशमलम् ॥ ९७ ॥

तदास्तां साम्राज्यात्मकमथ नु वर्गप्रभुतया
तदेतद् दौर्बल्याभिभवनिहितं शोषयति च।
अतिस्वल्पा येषां भुवि समभवन्नाधिकृतयः
बलं तन्नापास्यं प्रबलबलसाम्मुख्यत इतः ॥ ९८ ॥

पुनश्चास्मिन् सामाजिकस्थितिविशेषेऽनुचरतो
विवेकः स्वार्थस्यानुसरति तामेकसरणिम्।
अतो नीत्या बुद्ध्या प्रभवति जनो जागरणतोऽ-
प्यहो न्यायं संस्थापयितुमिह कश्चित्क्वचिदपि ॥ ९९ ॥

अतः संघर्षोऽयं ध्रुवमपरिहार्योऽत्र भवति
सुसाम्मुख्यं शक्तेः प्रबलतरशक्त्यैव क्रियते।
अतः कश्चिद्वर्गः क्वचिदपि च राष्ट्रे हृदयजां
परीवृत्तिं कृत्वा न हि भजति सिद्धेरधिगमम् ॥ १०० ॥

न वा न्याये याच्ञा न पुनरिह युक्तिश्च सहिता
विवेको नाप्येषः परिहरति संघर्षमिह तम्।
अयं पन्था नूनं तदुपरिगतान् वञ्चयति तान्
भ्रमश्चायं शिष्टिं जयति विवशीकार इह सः ॥ १०१ ॥

स चायं वर्गस्यापि न हरति तामुच्चपदवीं
विशिष्टां वा न त्याजयति खलु कस्याप्यधिकृतिम्
इदं स्पष्टं गान्धिर्दमनमिह कार्येषु गमय-
त्यदो न स्वीकर्तुं किल बलप्रयोगं च मनुते ॥ १०२ ॥

परस्मै कष्टं चेदिह बलप्रयोगः स उदितो
यदा स्वस्मै कष्टं सृजति स तदा नास्ति विहितः।
विचाराणां तस्यावगमनमलं दुष्करमिदं
यतस्तस्मिन्नाध्यात्मिकमतिरगोपायत इयम् ॥ १०३ ॥

वयं तां नो मातुं प्रभव इह नो तोलयितुम-
प्यमूं भौतिक्या वा क्वचन विधया वीक्षितुमपि।
असन्दिग्धं सैषा प्रभवति विधावादिनि जने
विधेयं युक्तीनामपि वरणभङ्गं प्रकुरुते ॥ १०४ ॥

इयं तान् गुप्तात्मा विसृजति च तान् विह्वलयति
तदीयान् सर्वोच्चानपि हृदयभावांश्चलयति ।
सुसामञ्जस्यद्वारमपि च समुद्घाटयति त-
न्न चास्ते शङ्कास्मिन् प्रभवति परं कष्टसहनम् ॥ १०५ ॥

अयं सिद्धान्तश्चेत्सकृदभिमतो नाम भवति
स्वरक्षार्थं राज्यं कलयतु तु हिंसामपि मनाक् ।
स्वराज्यप्राप्त्यै तां कथमिव च तत्स्वीकृतवदि
त्ययं प्रश्नः कांश्चिद् भ्रमयति विमोहाय जगतः ॥ १०६ ॥

भवेद्धिंसोपायोऽनभिलषित एवेत्यविहितः
परं नैषोऽयुक्तः किल तदति नो वर्जित इह ।
प्रशिष्टिः शक्तास्ते प्रहरणलसत्सैन्यसहिता
न तेनैवैषास्ते तदनुचितहिंसास्वधिकृता ॥ १०७ ॥

अहिंसात्मा क्रान्तिः सफलयतना राज्यमहिता
किमेषा हिंसाया अधिकृतिमिदानीमुपगता ।
यदेतस्याः शिष्टेः प्रतिभटतमा क्रान्तिरुदियात्
तदा केनोपायेन बत शमयेत्तामियमपि ॥ १०८ ॥

स्वभावादेवैषा त्विह बलप्रयोगं न तमिया-
दियं चैवाहिंसा सरणिषु सरन्तीह जयतात् ।
परं हिंसाद्वारा तदथ निजराज्यं समवितुं
स्वतः प्राप्तं नैषा सहजमधिकारं तु जहितात् ॥ १०९ ॥

इदं निर्णीतं ये जनसमुदये सन्त्यतुषिताः
परीवृत्तिं चैतां प्रतिमुखतया रुन्धति पुरा ।
यतेरंस्ते पूर्वां स्थितिमिह समानेतुमपि चेत्
पुनः शोचेयुस्ते नहि दमनशस्त्रैः प्रतिकृतिम् ॥ ११० ॥

करिष्यत्येषा नः यदि न बलयुक्तिं शममयी
तदा त्वेते हिंसामधिकमधिकां युञ्जति पुरा ।
अतो ज्ञेया हिंसा हृदयपरिवृत्तेर्बलयुजः
अहिंसेत्येतेषां कमपि प्रविभागं विदधती ॥ १११ ॥

सुरेखा तन्मध्ये लिखितुमविशक्यास्ति नितरां
परीवृत्तीः काश्चिद् विमृशतु कथं राजनयिकीः ।
विशिष्टां प्राप्तानामधिकृतिमथो शोषणजुषा-
मुभौ वर्गौ शोचन्नतिकठिनतां प्राप्स्यति जनः ॥ ११२ ॥

इहादर्शार्थं चापदभिषहणं स्तुत्यमुदितं
नतिर्नो नैवापि प्रतिकृतिरिहोन्नत्यकरणी ।
तथाप्यस्यां चापत्सहन इह रेखास्ति लघुका
द्वितीयं चैवापत्सहनमिदमानेष्यति हृतिम् ॥ ११३ ॥

यदि क्रूरा हिंसा पतनकरणी क्वापि भवती-
त्यहिंसेयं तत्र स्वनकृतिविरूपाऽस्ति गलितिः ।
इदं सम्भाव्यं स्यात्किल सहजकातर्यमथवा-
प्यकर्मण्यत्वं स्वं स्थगयितुमियं स्यादुपधृता ॥ ११४ ॥

पुरा हिन्दुस्थाने कतिपयसमाभिः कथयितुं
प्रवृत्तिर्जाताभूद्यदवधि परीवृत्तिरुदिता ।
परीवृत्तिर्नेदृक् कथमपि विना हिंसनमिह
प्रणीता स्यात्काचित्क्वचन च कदाचिच्च जगति ॥ ११५ ॥

अतोऽस्मिन् पक्षे तैरधिकबलमाधातुमुचितं
न क्लृप्तं चर्चापि प्रसृतिमुपयाता न खलु सा ।
यदेषा वर्गाणां समर इति नाम्ना प्रचलति
भवेन्नामैषोऽस्ति प्रचलितचरोऽपि प्रविरलः ॥ ११६ ॥

इयं चर्चाऽहिंसाप्रगतिसरणौ विघ्नकरणी
रुणद्ध्येषा पूर्णां सहयुजमथो लक्ष्यमपि नः ।
समस्या सामाजिक्यपि भवति कुत्राप्यवसरे
विना हिंसां शक्या न भवति समाधातुमिह सा ॥ ११७ ॥

प्रपन्ना वर्गा येऽत्वधिकृतिविशेषान्न सहसा
परित्यक्ष्यन्तीमामिति सरति हिंसात्मसरणिः ।
परं चेत्सिद्धान्तान्नृपनयिकमप्यत्र सुकरं
परीवृत्तं यत्नैः सविधिभिरहिंसात्मकतया ॥ ११८ ॥

पुनर्यद् धैर्यैस्तत्सुकरमभवत्तैरिह कथं
परीवृत्तिः सामाजिकपथगता न प्रतिफलेत् ।
अहिंसाद्वारा चेद्वयमधिगताः स्याम नयिकं
स्वतन्त्रत्वं साम्राज्यमपसरतात्तद् ब्रिटिशिकम् ॥ ११९ ॥

तदा तद्द्वारेण प्रकृतनृपतीन् भूमिधरकान्
निराकृत्यान्यांश्च श्लथयितुमलं स्यान्न हि कथम् ।
प्रशिष्टिं तां संस्थापयितुमपि सामाजिकमुखी-
मर्हिसाद्वारेदं सकलमपि संसेत्स्यति न वा ॥ १२० ॥

इति प्रश्ने ब्रूयादुभयमपि संसेत्स्यति सुखा-
दहिंसा द्वारेणोभयमपि न संसेत्स्यति किल ।
अहिंसाख्यं शस्त्रं खलु ब्रिटिशशिष्टौ चलति चेत्
ततोऽन्यस्मिन्नप्येतदुपनतमस्त्वेव सकलम् ॥ १२१ ॥

विदेश्यापेक्षायां भवति निजदेश्येषु सफलं
मनोविज्ञानोत्थं कमपि हि प्रभावातिशयकम् ।
प्रकुर्यात्तेष्वेतत्तदिह नहि चिन्तासु विषय-
स्त्वियं हिन्दुस्थाने प्रसरति च वृत्तिस्त्वभिनवा ॥ १२२ ॥

बहून्युद्देश्यानि त्वथ नगणिता नीतय इह
स्वतः प्रत्याख्याताः सपदि च भवन्तीत्यवितथम् ।
अहिंसासाङ्गत्यं भवति निकषं तत्र सहसा
तदेतत्प्रश्नानामनुमितसमाधानमुदितम् ॥ १२३ ॥

अहिंसात्मोपायः प्रथममुररीकृत्य निचितो
यथा तेनाभीष्टेन च फलवता लक्ष्यनिगमः ।
तदास्माकं लक्ष्यं स्वगतमपि हिंसापरिगतम्
न सासील्लक्ष्याङ्गं न च परिणतिस्तस्य महतः ॥ १२५ ॥

तदा स्वातन्त्र्यं नः समधिगमनीयं समभवत्
भवेद्धिंसातस्तद् भवतु तदहिंसाप्रणयतः ।
इतीदृक्षो भेदः प्रथममिह नासीत्प्रणिहितो-
ऽद्य जाताऽहिंसेयं निकष इव लक्ष्यस्य कलने ॥ १२६ ॥

परीक्षातो लक्ष्यं यदि भवति तस्मिन् सुविशदं
तदा तत्स्वीकार्यं तदिदमधुनास्ते परिणतम् ।
अहिंसा सिद्धान्तो भवति, न विरुद्धं भुवि ततः
प्रवक्तुं शक्यं स्यात्प्रभवति न साध्यात्मकतया ॥ १२७ ॥

इदानीं श्रद्धाया विषय इति धर्मः स परमः
स्मृतो वेत्यास्तेऽयं स्थित इह सुखाकीर्णसरणौ ।
न चैतावत्स्वार्थान्धितसमुदयाधारवदयं
यथावत्स्थातुं ते वत दुरुपयोगं विदधति ॥ १२८ ॥

इदं वै दौर्भाग्यं नहि भरतभूमौ परिगता
अहिंसात्मा रोधस्तदनुगतनीतिर्यदधुना ।
अपि त्वेते कृत्स्ने जगति प्रतिलाभप्रदतया
स गान्धिर्नः सर्वानिह स विवशीकृत्य धृतवान् ॥ १२९ ॥

महासेवां गान्धिः स खलु कृतवानस्य जगतो
भविष्यञ्चैतेषां महदिति प्रतीतिर्भवति मे ।
इहेदं संभाव्यं न मनुजसमाजोऽग्रसरतो
गतः स्याद्वै तावत्स इदमुररीकर्तुमनलम् ॥ १३० ॥

इहेण्टर्प्रेट्सस्याकलनवति ग्रन्थे प्रथयति
किलैकं तत्पात्रं कथयति-भवानन्धकरयोः ।
प्रदीपं ज्ञानाख्यं वितरति, परं दण्डवदिमे
प्रयोगं कुर्वन्ति प्रभवति प्रयोगः क इतरः ॥ १३१ ॥

स आदर्शः सम्प्रत्यतिफलतु नेति प्रभवति
विचाराणां भूम्नामिह तु महिमास्यापि जयतात् ।
इह स्युःकार्याण्यप्यधिकमधिकं स प्रभवतात्
विधातुं वैतानीत्यपि सपदि सम्भाव्यमिह तत् ॥ १३२ ॥

ततो वर्गाद्राज्यादपि जनसमाजादसहयुक्
परां शक्तिर्धत्ते रचयति तु क्रान्तिं च महतीम् ।
इमां चेत्सच्चारित्र्यस्फुरितमनसो द्वित्रपुरुषा
अपि श्रित्वा त्वेतामतुलितप्रभामाविदधति ॥ १३३ ॥

प्रभावोऽस्या लोके प्रसरतु च वर्धेत स इहा-
धिकाश्चेत्तां कुर्युर्बहिरपि प्रभावः स्फुटति सः ।
तथाप्या वार्ताचादमयति परं नैतिकबलम्
यथा तद्विस्तारादतिप्रखरता शाम्यति सतः ।। १३४ ।।

सुशक्तिः सामूहिक्यथ सपदि निर्वारयति तां
परं शक्तिर्व्यक्तेः प्रथममिह काचित्प्रसरति ।
तथाप्यस्थाः शुद्धो य इह क्रियते त्वाग्रहभर-
स्ततोऽहिंसा दूरीभवति जगतो जीवनपथात् ।। १३५ ।।

प्रवृत्तिश्चैषात्र प्रसरति यथान्धा इव जना
इमां स्वीकुर्वन्ति स्फुटसुकृतभावेन, नहि वा ।
अमुष्या वृद्ध्यंशान्नयति च जनो विस्मृतिपथं
इहाब्दे वै विंशेऽभ्यभवदियमातङ्कजनकान् ।। १३६ ।।

तदा तेषां मध्यान्निरगमदसंख्यातनृदलम्
स्थितश्चान्यस्तेषु भ्रममधरदज्ञातसरणिः ।
परित्यक्ता हिंसा बहुभिरिह तत्कार्यविमुखैः
परन्त्वद्यैतेषु प्रभवति नहिंसा न किमपि ।। १३७ ।।

अनेकैः कांग्रेस्यैरयमसहयोगेषु न क्वचित्
प्रसङ्गे भागोऽभूदविरतगृहीतो महिमवान् ।
अहिंसापद्धत्या ह्यपि कृतमभूत् पावनमिदम्
इदानीं मन्यन्ते नहि तमिह नास्तिक्यमतयः ।। १३८ ।।

इदं चैवाभ्युक्तं भवति किल ते सन्त्यधिकृता
न कांग्रेसे स्थातुं, न सुकृतमहिंसां हि ब्रुवते ।
न चैनां ध्येयत्वाद्दधति, खलु लक्ष्यं न जहति
समाजोत्थं राज्यं परमपुरुषार्थं च ब्रुवते ।। १३९ ।।

समेषां सौविध्यं सममिह भवेदेव सुविधा
समाना न्यायस्येह च न सुविधायामधिकृतिः ।
विशेषादत्र स्यादथ न भवेत्सम्पदि च सा-
धिकारास्ते छिन्ना इह खलु भवेयुश्च क्रियताम् ।। १४० ।।

स विद्युच्छक्तिर्नः प्रभवति च गान्धिर्नविशयो
ह्यहिंसा जीवन्ती विलसति च तस्येति नियतम्।
न कश्चिद् वै वक्तुं क्षम इह सकृद् गान्धिरिह सः
पुनः सर्वानग्रे गमयितुमलं नेत्यपि वचः ॥ १४१ ॥

स्वमाहात्म्येनायं सकलजनतामद्भुततया
प्रभाव्याग्रे नेयादिति भवति सोच्चैरितरतः।
यथान्यानेतेऽत्र क्वचन मिनुमस्तोलनधिया
परीक्षन्ते वा तं न खलु कुहचित्केऽपि तु क्वचित् ॥ १४२ ॥

परं मन्यन्ते ये तदनुगमने स्वं दृढतरं
त्विदानीं ते जाताः कृतिविरहिताः शान्तिवचसः।
स्वमार्गे सङ्कीर्णे प्रगतिमतयो जीवनपथा-
दसम्पृक्ता नन्वप्रतिरुधि क्रियायाञ्च कुशलाः ॥ १४४ ॥

तथा यैः सम्बद्धास्त इह तु समाजस्य रचनां
चलन्तीमिच्छन्ति स्वहितमिह तेषां हि निहितम्।
तदर्थं तेऽहिंसां शरणमुपयाताः प्रकटतो
ह्यहिंसायां वृत्तिविशति समयं साधयति या ॥ १४४ ॥

प्रयत्नं कुर्मोऽन्यो हृदयपरिवृत्ति स भजता
महिंसारक्षायां स्वहृदयवृत्तेर्विनिमयम्।
श्यामः; श्रेणीञ्च प्रतिनिविशतेऽन्यां मतिरियम्
ततः शान्ते स्वौजस्यथ कृशतया साऽपसरति ॥ १४५ ॥

समाधातुं चेष्टा भवति च कला सा त्वभिहिता
विरुद्धांस्ताञ्जेतुं ह्यनुभवति तोषं स च तया।
कदाचिच्चेष्टायामिह च सुहृदो मुञ्चति जन-
स्त्वमर्यादामेषामपवदति, भाषामपि खराम् ॥ १४६ ॥

यया क्षुब्धा नूत्नाः सुहृद इह सन्दूषयति तान्
स्वसंस्थाभङ्गाद्यैः सुबहुभिरिहारोपवचनैः।
व्यवस्था सामाजिक्यपि न परिवृत्ति विषहते
समाजेऽतो दाने रुचिजननमौदार्यजननम् ॥ १४७ ॥

प्रकर्तव्यं नूनं हृदयपरिवृत्तिप्रयतनैः
समूहाः सम्पन्ना अधिकृतिभिरेते स्वविचलाः ।
ममायं विश्वासो यदिह मनुते गान्धिरधिकं
महत्त्वं यत्साध्यादिह सपदि संसाधनगतम् ॥ १४८ ॥

तदत्रानेनायं भृशमुपकृतश्चोपचरितः
समाजस्त्वाधेयं बलमथ निजध्येयशिरसि ।
न यावत्तत्कुर्मो नहि किमपि तावद् भ्रमणतो
वृथा शक्तेर्नाशात्सरलसरले वस्तुनि कृतम् ॥ १४९ ॥

उपेक्षाप्येतेषां न खलु करणानां समुचिता
ह्युभौ स्तस्तत्पक्षौ व्यवहृतिपरो नैतिकपरः ।
अनैतिक्यं हीनं करणमिह साध्यं विफलये-
त्समस्याश्चानेकाः प्रबलनवलाश्चात्र जनयेत् ॥ १५० ॥

न कश्चिद् विज्ञेयो भवति निजलक्ष्यात्प्रकथितात्
जनो विज्ञातः स्यात्प्रबलनबलैरेव करणैः ।
स यैरस्मिंल्लोके व्यवहृतिगतिं चालयति ताम्
भवेदङ्गीकारे किमिह नु फलं यैस्तु कलहः ॥ १५१ ॥

घृणा वृद्धिश्च स्यादपसरतु लक्ष्याधिगमनम्
इदं साध्यं तत्साधनमथ मिथोऽत्यन्तनिकटम् ।
दधाते सम्बन्धं यदिह न पृथक्कर्तुमुचितं
न चाप्यास्ते कर्तुं सुकरमिति सर्वोऽनुभवति ॥ १५२ ॥

अतः स्यात्तन्निश्चप्रचमिह तथा साधनमिदं
यथा सम्भाव्यं तत्कलहघृणयोः स्यान्निवरणम् ।
यतो ह्येतेऽवश्यं न कलहघृणे नात्र भवतो
भवेन्मात्राधिक्यं क्वचिदथ च नैयून्यमनयोः ॥ १५३ ॥

भवेत्सद्भावोत्साहनमपि परं प्रश्न इह स
प्रमुख्यः कस्याश्चित्पुनरिह स रीतेर्न हि तथा ।
यथास्ते तद्धेतोरथ च स रुचेश्चापि प्रकृतेः
स गान्धिर्मूलेऽस्मिन्नधिकमवधानं हि दधते ॥ १५४ ॥

स्वभावो मानुष्यो नहि स परिवर्त्योऽत्र क्षमतां
स गान्धिर्वैपर्यैक्षत कियति सीमन्यपि निजाम् ।
परं यस्मिन्नान्दोलन इयमभूत्कोटिरधिका
मनुष्याणां तेषां मनसि किल मुद्रास्ति निहिता ॥ १५५ ॥

इदं साफल्यं तत्कियदपि परीवर्तनमिहा-
प्यकार्षीदेवेति स्फुटमियममुत्रास्ति निहिता ।
पुनर्गान्धेरत्याग्रह इह विधेः पालनविधौ
भवेद्भिन्नौ वैयक्तिकनियमसम्पालनविधेः ॥ १५६ ॥

यतः पापात्सामाजिकत इह वैयक्तिकमिदं
महत्त्वेनावेक्षेत स इति मता तस्य प्रकृतिः ।
अमुष्यावश्यत्वं स्फुटमिह किलापत्पथ इति
महाशक्तेः सत्ताधरदलसखित्वे न रमते ॥ १५७ ॥

इतीहानेकांस्तानहरत प्रलोभोऽयमभित-
स्त्वितः स्वर्गद्वारं विघटितकपाटं स्थितमिदम् ।
प्रसिद्धानां कांग्रेसिकसकललोकेषु महताम्
इतो वोतो वाऽऽसीद्धृदयपरिवृत्तेर्विलसितम् ॥ १५८ ॥

इहाद्यत्वे कृत्स्नं जगदपतदासङ्कटपथे
अमीषामप्याध्यात्मिकमिदमभूत्सङ्कटवरम् ।
इदं पूर्वस्मिन् दृश्यत इह किलैश्यां द्रुततरं
परीवृत्तेर्दृश्यं भवति च समन्वीतिजनितम् ॥ १५९ ॥

समस्या चाद्यैषा महिमनि गता राजनयिकी
प्रधाना साऽस्माकं न महिमशालिन्यपि पुरा ।
अमुष्याः सन्तोषप्रदमिह समाधानमुचितं
पुरास्मादस्माकं ह्यवितथपदार्थेषु लगनात् ॥ १६० ॥

युगेभ्योऽनेकेभ्यो वयमपरिवर्त्यां स्थितिमिमा
मधिष्ठायैवास्यां प्रकृतिसमतां प्राप्नुम पराम् ।
व्यवस्था सामाजिक्यथ समुचितान्या न भवती
त्यमीषामस्माकं हृदि परमविश्वास उदितः ॥ १६१ ॥

न नैतिक्या दृष्ट्यापि च कमपि दोषं कलयता-
मियं युक्ता युक्त्या भवति भवता भूतमिलनम् ।
वृथा यत्नाश्चास्यां तदितरसमावेशविधये
भवन्तीति स्वाभाविकमपि निवार्येतरमपि ।। १६२ ।।

स वेल्लेनोऽलेखीत्-इह हि नियमः स्वामनुकरो-
त्यपेक्षामार्थिक्या अपि व्यवहृतेरार्थिकमिव ।
इदानीन्तन्यस्ता इह च विवशीकुर्युरधुना-
तनांल्लोकांस्तादृङ्नियमपरिक्लृप्त्यै नियमतः ।। १६३ ।।

सदाचाराणां चाद्यतनसमये नूत्नविवृति
र्वयं चेच्चैवाध्यात्मिकविपदि पारं गमयितुम् ।
स्वभावानां मूल्याङ्कनमिह विधित्साम तदिमाः
समस्या निर्भीकैरिह प्रतिसमाधातुमुचिताः ।। १६४ ।।

अमूषां साम्मुख्यं सपदि करणीयं किल भवे—
न्न वै धर्मादेशाश्रयणत इदं सेत्स्यति समम् ।
अभिब्रूते धर्मः शुभमशुभमेतद् द्वयमपि
तथायं ब्रूते तन्मतिविषयतां नेतुमिह नः ।। १६५ ।।

सहायो नैवायं भवति, वदति फ्रायड इदम्
स्थिता धर्मादेशा इह सपदि विश्वाससरणौ ।
अतोऽस्माकं पूर्वे दधुरिह सुविश्वासमचलम्
प्रमाणान्येतस्मिन् पुरुषक्रमतः सन्ति सततम् ।। १६६ ।।

अमीषां सत्यत्वे न खलु भवतां तर्क उचितोऽ
स्त्यहिंसां निर्भ्रान्त्या विमृशति दृशा चेदिह जनः ।
तदा तस्मिन् वादावसर इह नोत्तिष्ठति पर-
स्तदाऽहिंसेयं स्यात्सुकृतमिह धर्मैकदृशा ।। १६७ ।।

भवत्येतद् ध्येयं सपदि मतदृष्ट्या च सुकृतं
सजीवत्वं तस्मिन् न खलु किमपीहाधिवसति ।
समस्याः सद्यस्काः पटुरिह समाधातुमपि नो
विवादं चेत्कर्तुं वयमिह रतास्तर्हि सहकृत् ।। १६८ ।।

भवत्येषा नूत्ने जगदुपप्रक्लृप्त्यै प्रयतने
तथा कुर्वन् व्यक्तेः प्रकृतिपथशक्तिं स्मरतु सः।
प्रवृत्तौ कस्यांचित्समुदयगतायां यदि भवेत्
स्थितेः कायाकल्पे परमपरिवृत्तावभिरुचिः ॥ १६९ ॥

विचारा नेतॄणां सपदि प्रभवन्तीह समये
स्थितेर्नेतॄणां वा तदनुगतलोकस्य च सतः।
इहैतिह्ये विश्वस्य च भजति हिंसाधिकृततां
तथाद्यत्वेऽप्येषात्यधिकतरभागं च भजति ॥ १७० ॥

भविष्यत्यप्येषाप्यधिकृतिमिमां धास्यति भुवि
गते काले हिंसा व्यधित परिवृत्तीरिह बहु।
स डब्ल्यू. ई. ग्लैडस्टन इदमगादीत्—कथयतो
ऽतिदुःखं मे जातं यदि विपदि हिंसासु घृणया ॥ १७१ ॥

व्यवस्थायां प्रेम्णा मनसि बत धैर्येण विहिता-
भविष्यत्सर्वाशाऽस्य न जनपदस्य स्ववशता।
अतीते चाद्यत्वे स्वमहिमनि हिंसावगणनां
न सोढेयं, हिंसावगणनमिह जीवावगणनम् ॥ १७२ ॥

तथाप्येतां दुष्टामनुसरति दुष्टा परिणति-
र्महत्या पङ्क्त्यास्ते ध्रुवमनुसृता स्वप्रणिधिभिः।
ततो दुष्टाश्चेमा बहुविधप्रवृत्तीरिह घृणा-
प्रतीशोधक्रौर्यादिकविकृतिरूपाश्च कलये ॥ १७३ ॥

स्वतो हिंसा दुष्टा न भवति सुदुष्टाभिरसुका-
भिरेवैषा दुष्टा भवति हि घृणाद्याभिरभितः।
प्रवृत्तीरेताश्चेत्परिहरति हिंसा यदि भुवि
प्रभावस्तस्याः स्यादशुभशुभरूपो ह्युभयथा ॥ १७४ ॥

प्रमत्तानां हिंसाऽशुभपरिणतिर्दोषरहिता
चिकित्सायां हिंसा शुभपरिणतिर्दोषरहिता।
परं हिंसादोषान्न परिहरतीमान् सहजत-
स्ततो यावच्छक्यं परिहृतिमिहैषार्हति भुवि ॥ १७५ ॥

ततश्चात्मानं रक्षितुमिह वयं नैव न कृति-
स्वरूपां तां वृत्तिं कुहचिदुररीकर्तुमुचिताम् ।
वदिष्यामो, यास्मानितरदुरितात्मा तु सरणिः
प्रसर्तव्यत्वेनावृणुत न नमामोऽन्यदुरितम् ॥ १७६ ॥

नतिर्यास्ते हिंसां प्रति तदधिकारे स्थितमथा-
परा न्यायं प्रत्यप्यतिशयमहिंसातिक्रमणम् ।
अहिंसायाः पन्थाः समुचिततया स्यादनुगतो
यदा सा तां शिष्टिर्विनिमयतु सामाजिकगतिम् ॥ १७७ ॥

अहिंसा तत्कर्तुं प्रभवति न वेत्यस्त्यविदितं
परं मन्ये सास्मान्नयति निजशक्त्या परतरम् ।
इहाशङ्के भूयोऽन्तिममपि सुलक्ष्यं नयति सा
न वेत्यस्मिंल्लोके क्वचन बलमप्यर्हति युजाम् ॥ १७८ ॥

'भवेन्नायं ह्यात्मा बलविरहितेनात्र सुगमः'
करे येषां शक्तिर्भवति पुनरेकाधिकृतिता ।
न ते तावत्त्यक्तुं द्वयमपि तु शक्ता हि विवशी-
क्रियन्ते नो यावत्तदुभयमपि त्यक्तुमिह ते ॥ १७९ ॥

न यावत्सावस्था शिरसि पतिता वा न भवति
द्वयं यस्यां हित्वापसरणमुपायो न भवति ।
समाजे संघर्षा अपि बलप्रयोगादिह ऋते
समाधेया राष्ट्रेऽप्यथ विविधवर्गेषु निहिताः ॥ १८० ॥

न सन्देहो भूयो हृदयपरिवृत्तिर्न विहिता
यदि स्यात्तह्यन्दोलननियमिताधाररचना ।
अपि स्यान्नैवैषा किमपि बलमत्रास्तु सुतरां
प्रयुक्तं, नो युक्तं परमसममाच्छादनमिदम् ॥ १८१ ॥

तथा कृत्वा सत्यं दमयति, जनान् वञ्चयति च
परीणामः प्रत्येकमपि च तदीयोऽयमुदितः ।
व्यवस्थामद्यस्थां द्रढयितुमथौचित्यमखिल-
प्रशिष्टव्यक्षाणामधिकृतिविशेषस्य तनितुम् ॥ १८२ ॥

स शास्तॄणां वर्गः किमपि नवसूत्रं मृगयते
तदेतेनोपात्तं भवति; पुनरन्यायसरणेः।
मुहुः सामुख्यार्थं भवति सदपेक्ष्यं गलितिको-
पपत्तीर्या अध्यासत प्रकटितास्ताः स्युरिति च॥ १८३॥

विशेषोऽयं ख्यातो ध्रुवमसहयोगस्य जगति
स मिथ्या वार्तास्ता न खलु मनुते घोषयति ताः।
इह ध्येयं चास्माकमिदमन्त्यं प्रभवतु
यदेकः स्थाप्येताबहुदलसमाजोऽत्र जगति॥ १८४॥

समेषां न्यायः स्याद् भवतु सुविधा चापि सदृशी
जना उत्थाप्येरन्निह च गमिताः सांस्कृतिकताम्।
अकामा सेवा चाप्रतिविकसिताध्यात्मिकगुणैः
समाजस्थापत्यं सुनियतमिहास्तां च जगति॥ १८५॥

पथि प्राप्ता बाधा इह निरसिताः स्युर्झटिति च
विनम्रत्वेऽप्यस्मिन् प्रति सबलताप्यस्तु निहिता।
प्रयोगश्चामुष्याः सति सदुपयोगेऽस्तु विहितो
घृणाद्यैर्युक्तायाः किल प्रकृ।बाधा निरसितुम्॥ १८६॥

तथा कर्तुं चेद् दुष्करमपि भवेत्तर्हि सुकरं
न कार्यं खल्वेतन्न च स सरलो मार्ग इह नः।
न चास्ते विघ्नानामिह तु गणना काचन मना-
गुपेक्षामात्रेणापि न निरसनीयाः पुनरिमे॥ १८७॥

अभिज्ञायैवैषामवितथस्वरूपं स्वमहसा
विधेयं साम्मुख्यं निपुणबलयोगेन सहसा।
इमे कल्प्याः स्वप्ना इव हृदि विभान्ति प्रथमतः
स्वभावो नैवायं भवतु सकलः प्रेरित इति॥ १८८॥

स्वदृष्टौ रक्षन्तो बलमपि भरन्तो नवनवैः
क्रियादर्शैरेषु स्थितमखिलद्वन्द्वं निरसितुम्।
इदं साध्यं प्राप्तुं सकलमपि नः साधनमिदं
भवेद्भावैः सम्प्रेरितमिह परां शक्तिमयितम्॥ १८९॥

यथेदं नो मानुष्यकमिह तथा सर्वजनता
न सास्माकं युक्तीरपि च विनयान्नावदधतात् ।
न कुर्यात्कार्यं चेत्यनुबलप्रयोगाद्यधिकतां
मनुष्यायैवास्या हृदयपरिवृत्तेः प्रयतताम् ।। १६० ।।

तदर्थं यत्किञ्चिद्वयमिह प्रकर्तुं त्वधिकृतं
क्षमाः स्मस्तत्कुर्वीमहि बलप्रयोगं त्वनधिकम् ।
स्वकार्ये चानीयास्य भवतु यथाऽदूषणखरो
यथा श्रीरामस्य श्रुत इह महान् विक्रमगुणः ।। १६१ ।।

विद्यावाचपतिरिति धृतः कोऽप्युपाधिस्त्रिषष्टे
वर्षे शोधात्मकनवगवेष्योत्थसांस्कृत्यलेखे ।
येनादौ तेन हि विरचिते नेहरूचारुकाव्ये
सर्गो यातोऽयमवसितिमद्य त्रिषष्टोऽस्त्युदारः ।।

पुनर्देहरादूनकारायाम्

इन्द्र वज्रा, उपेन्द्र वज्रा, उपजातिः

चतुःषष्टः सर्गः

नालीपुरे स्वास्थ्यमभूद्वरं मे तौ कालिकातोष्मसमीरणौ च ।
नित्यञ्च मां पीडयतः स्म तस्मात्क्षेत्रे क्वचित् स्वम्बुसमीरणे स्याम् ॥
'मे' सप्तमेऽहं स्वपरिच्छदाद्यं बन्द्धुं च यातुं बहिरुक्त आसम् ।
तं देहरादूनपरिस्थितञ्च कारागृहं नेतुमिमे प्रदिष्टाः ॥ २ ॥
कांश्चिच्च मासान् रहसि स्थितेन सायं तु सांयात्रिकवन्मयात्र ।
मतेऽतिशीते किल कालिकातामध्याद्विनिर्गम्य च गम्यमासीत् ॥ ३ ॥
तन्मेऽनुकूलं प्रतिभासते स्म तद्धावड़ामञ्जुलरेलकेन्द्रात् ।
सम्मर्द आसीत्सुमहाञ्जनानां सोऽयं ममाभादतिशोभनश्च ॥ ४ ॥
हर्षो ममासीत्परिवर्तनेऽस्मिन्नत्युत्सुकोऽभूवमहं पुरेव ।
तद्देहरादूनपुरं तदन्ते द्रष्टुं हरित्पादपशैलमालाम् ॥ ५ ॥
तत्रागतोऽपश्यमहं यथैतत् पूर्वं तु मासां नवकान्मनोज्ञम् ।
सम्नीयमानेन किलात्र नैनीं दृष्टा स्थितिः सम्प्रति सा तु नासीत् ॥ ६ ॥
नूत्ने स्थले सम्प्रति रक्षितोऽहं कोष्ठीं परिष्कृत्य विनिर्मितं तत् ।
कोष्ठीस्वरूपं न विरूपमासीत् साकं तया मन्दतनूरलिन्दः ॥ ७ ॥
लग्नञ्च पञ्चाशदुपाङ्घ्रिमात्रं दीर्घं किमप्यङ्गनमग्र आसीत् ।
यासीच्च कोष्ठीह पुरोपलब्धा तस्या इयं चारुतरा रुचासीत् ॥ ८ ॥
किन्त्वाशु विज्ञातमभूदिहत्या नाम्याः पदव्यः खलु सन्ति मान्याः ।
प्राचीरभित्तिर्दशपादिका सा मत्कारणादुन्नमितातिमात्रम् ॥ ९ ॥
यच्छैलमालासुषमां दिदृक्षुर्मग्नाऽभवत्सा खलु भित्तिपृष्ठे ।
कांश्चिद् द्रुमाणामिह मञ्जुमूर्ध्नो द्रष्टुंममासीदिह भाग्यशेषः ॥ १० ॥
अस्म्यत्र मासत्रयमाशयास्थां शैलैर्नं मे दर्शितमात्मरूपम् ।
पूर्वं यथा नाऽऽपि बहिर्भ्रमाज्ञा लब्धवङ्गणं मद्भ्रमणार्थमात्तम् ॥ ११ ॥

एते तथान्येऽपि विनिग्रहास्ते नैराश्यमुत्पादयितुं प्रवृत्ताः ।
यैरेष विक्षुब्ध इवोन्मनाश्च व्यायाममप्यत्र न रोचमानः ॥ १२ ॥
स्यात्कर्हिचित्स्वं कलये किलैकमेतावदस्माज्जगतश्च भिन्नम् ।
एकान्तकारागृहवास एष मत्स्वास्थ्यहानिं कुरुते तदानीम् ॥ १३ ॥
मत्कायचित्ते अवसादमाप्ते जानेऽत्र भित्तेः परतो विदूरे ।
सद्यस्कता चापि सुगन्ध आस्ते पूर्णौ नवे मारुतमण्डलेऽस्मिन् ॥ १४ ॥
व्याप्तः स्थले शाद्वलके च भूमेर्गन्धः प्रियः कश्चन शीतशीतः ।
दूरातिदूरे विलसन्ति दृश्यान्यश्यामरूपाण्यविलोकितानि ॥ १५ ॥
सर्वाणि मत्प्राप्तिपथाद्विदूरे विद्योतमानान्यपि नैव भान्ति ।
दर्शं च दर्शं किल शुष्कभित्तीर्नेत्रे मम प्रस्तरतां प्रयाते ॥ १६ ॥
नात्राभवद्बन्दिगृहेषु लभ्या सा चेतनेत्येकल एव सोऽस्मि ।
सप्ताहषट्कात्परमत्र मेघो ववर्ष वातः प्रववौ च तीव्रः ॥ १७ ॥
सप्ताह आद्ये चतुरङ्गुलानां षट्कं पपातात्र जलं नभस्तः ।
तौ वातमेघौ नवजीवनस्य संचारमेवं कुरुतः स्म लोके ॥ १८ ॥
ऊष्मक्षयोऽभूच्च वपुर्लघुत्वं प्रासर्पि चारामसुखं समन्तात् ।
नेत्रे च मस्तिष्कमिदं न किञ्चित्प्रापुः सुखं भित्तिनिरुद्धदृश्यम् ॥ १९ ॥
काराधिकर्तुर्गमनागमार्थमुद्घाटिते चाङ्गणलौहद्वारे ।
एकं क्षणं बाह्यजगत्प्रकाशे क्षेत्राणि वेल्लन्ति हरिद्भृतानि ॥ २० ॥
रङ्गानुरक्तास्तरवश्च वर्षाम्भोबिन्दुमुक्ताफलकान्तिभाजः ।
विद्युच्चमत्कारमिव स्वभासं सन्दर्शयन्ति स्म भवन्ति लुप्ताः ॥ २१ ॥
द्वारं तदुद्घाटयत एव चार्धं निर्देशितास्ते पुरुषा अभूवन् ।
पार्श्वस्थिते मय्यथ नो विमोच्यं चेन्मोच्यते चापि तदर्धमेव ॥ २२ ॥
सद्यस्कताया हरितिम्न एता आभासिकाः सम्प्रति मे न रुच्याः ।
दृष्ट्वा हि ताः संस्मृतिमेमि गृह्यां शूलं च हार्दं मम जायते स्म ॥ २३ ॥
तस्मात्तदुद्घाटनवेलयाऽहं क्षिपामि तस्यां दिशि नैव दृष्टिम् ।
तत्पारवश्यं किल बन्दिगेह-निमित्ततो मन्मनसोऽत्र नासीत् ॥ २४ ॥
एतास्तु बाह्याः प्रभवन्ति वार्ताः सन्तापयन्ती कमलारुजाऽऽसीत् ।
यद्येकतस्तर्हि शुचा परस्मात्सा राजनीतिप्रभवा दिगन्तात् ॥ २५ ॥

तद्भाति तावत्कमला पुराण्या रुजा पुनर्ग्रस्ततनूरिहास्ते ।
सेवां तदीयामनलञ्च कर्तुं किलास्म्यहं तेन नितान्तदुःखी ।। २६ ।।

जानामि तस्या निकटे स्थितेऽस्मिञ्जने दशैषा परिवर्तिता स्यात् ।
किञ्चिन्न कुर्वन्नपि हि प्रियोऽहं दुःखानि सौख्यैरपबाहयेऽस्याः ।। २७ ।।

नालीपुरे दैनिकपत्रमापम् तद्देहरादूनगतो लभेऽहम् ।
वृत्तानि बाह्यान्यपि राजनीतेरन्यानि वा सम्प्रति वेद्मि तानि ।। २८ ।।

आयोजनं काङ्ग्रसिकं त्रिवर्षात्परञ्च यत्पुष्पपुरे प्रणीतम् ।
मध्ये ह्यत्रैधं तदभूत्किलेति तत्कार्यधारापठनात्तु मन्ये ।। २९ ।।

आश्चर्यमासीदिह दिग्दिगन्ते जातेऽपि तावत्यतिभात्यनर्थे ।
वर्षत्रयाज्जात इहाधिवेशे परिस्थितेर्नास्ति गवेषणापि ।। ३० ।।

नैवास्ति यत्नो यदि चर्चनस्य पुराणरीतेश्च विनिर्गमस्य ।
तर्ह्यस्ति नो चित्रमिदं हि मूले सत्येव शाखादलचिन्तनं स्यात् ।। ३१ ।।

दूरात्प्रतीतं किल गान्धिरारादभ्युत्थितेः प्राक्तनमेकतन्त्रम् ।
रूपं समास्थाय स भाषतेस्म 'मद्दिष्टमार्गेण चलन्त्यमी चेत् ।। ३२ ।।

स्वीकुर्वतां तर्हि मदुक्तिमेते' इत्यस्य याच्ञास्ति हि युक्तियुक्ता ।
नैतद्धि संभाव्यमिहैष तिष्ठेत्कार्यञ्च विश्वासविरुद्धमस्तु ।। ३३ ।।

किन्त्वेवमाभाद्दमनस्य वृत्तिर्मुख्याभवच्चर्चनकस्य गौणी ।
चित्रं किलैतत्स मनो मतिञ्च लोकस्य पूर्वं स्ववशीकरोति ।। ३४ ।।

पश्चाच्च पंगुत्वममुष्य वाक्यैर्व्यनक्ति शङ्कायतभाषयाक्तैः ।
मन्येऽत्र यावज्जनसंख्ययास्य श्रद्धानुरागाप्लुतचेतसोऽऽज्ञाः ।। ३५ ।।

सम्पालिता नान्यजनस्य कस्यचिदप्यहो देशविदेशयोः स्यात् ।
ईदृक्स्थितौ तेषु जनेषु दोषारोपो न मे न्याय्य इहावभाति ।। ३६ ।।

यत्तेषु या या विहिताः किलाशास्ता नैव पूर्णा नहि पूरितास्तैः ।
तद्भारतीयाखिलकाङ्ग्रेससभां वृथालापशतेन नीत्वा ।। ३७ ।।

कार्येण कार्यं वहताऽत्र कार्यसमिन्मतान्येव निवर्तितुं तान् ।
सम्बोध्य कैश्चिद्वचनैस्तदानीं प्रत्यागतोऽभून्न चिराय तिष्ठन् ।। ३८ ।।

स्यात्सत्यमेतद् बहुभिर्विवादैर्दीर्घैश्च किञ्चिन्न निवर्तितं स्यात् ।
सदस्यवृन्दस्य मनःसु नानाविधा विचाराः स्फुटितास्तदासन् ।। ३९ ।।

कर्तुं तदा नन्विति केचिदासन् केचिन्न चेति प्रतिवक्तुमुत्काः ।
तात्कालिकी त्वत्र परिस्थितिः साऽऽसीदेव तत्तत्र स्वभावजुष्टम् ॥३९॥
संग्रामभारः स पृथक्पृथग्वै प्रान्तेभ्य एतेष्विह नेतृषु स्यात् ।
श्रान्ताश्च ते चान्यवशा इवासन्, तेषां प्रतीतः किल युद्धबन्धः ॥ ४१ ॥
'किन्त्वत्र कार्यं किमु कार्यमग्रे' प्रश्नेऽत्र वर्गौ द्विविधावभूताम् ।
वैधानिकं तत्र समिद्धिरेकस्त्वान्दोलनं कर्तुमिहेच्छतिस्म ॥ ४२ ॥
अन्यश्च निर्णीतसमाजवाद-प्रवाहमध्ये वहति स्म वेगात् ।
आसीत्तृतीयोऽपि पुरोक्तयुग्माद्भिन्नैः सदस्यैर्बहुभिः प्रणीतः ॥ ४३ ॥
तेभ्यो न चारोचत पूर्वमार्गे संसत्समित्यादि-प्रपत्तियोगः ।
ते बिभ्यति स्मात्र समाजबादात्कदाचिदायातु न भेदभावः ॥ ४४ ॥
नासन्विचारा रचनात्मकाश्च तेषां समाशाश्रय आस्त गान्धिः ।
पुरेव तेऽद्यापि तमभ्यपश्यन् तस्योक्तिमेवाद्य समाश्रयंश्च ॥ ४५ ॥
अस्त्यन्यदेतद् बहवो हि गान्धेर्वार्ता समन्तान्नहि रोचमानाः ।
अभूदमीषां मृदुधारणानां कांग्रेसमध्ये प्रथितः प्रभावः ॥ ४६ ॥
एतत्तु भाव्यं भवितव्यमासीत् परं यथा चिन्तितमास्त पूर्वम् ।
ततोऽधिकं कांग्रसमास्त पृष्ठगामीह पश्चाद्धि सृतं तदासीत् ॥ ४७ ॥
यातेषु वर्षेष्विह पक्षघस्रैर्मितेषु कांग्रेसिकनेतृभिर्नो ।
वैधानिकत्वस्य तथाविधस्याभ्युच्चस्तरीया कथिता न वार्ता ॥ ४८ ॥
स्वराज्यपंक्तिः प्रथमा किलासीत्प्रतिक्रियात्मा दलतोऽस्यमुष्मात् ।
अग्रे गतासीत्तु विचारधारा दृशानया तत्र च मादृशास्ते ॥ ४९ ॥
आसन् प्रभावातिशयेन युक्तास्ता व्यक्तयः सन्ति न तादृशोऽत्र ।
अस्मिंस्त्वनेके भयसंशयेऽपि पृथक् स्थिताश्चोपगता निवृत्तौ ॥ ५० ॥
आन्दोलनाद्दूरगता इदानीमभ्यागता गड्डलिकाप्रवाहात् ।
अभ्येत्य चैतेऽत्र गता महत्त्वं न जानतेऽन्यं स्वसमानमेते ॥ ५१ ॥
शिष्टया निरोधा विनिवारितास्ते कांग्रेसकं सम्प्रति तद्धि वैधम् ।
किन्त्वस्य नैकास्तु सहायसंस्था अद्याप्यवैध्यः प्रतिघोषितास्ताः ॥५२॥
अस्य स्वयंसेवकसंघ एष सेवादलं नाम, सभाः स्वतन्त्राः ।
कृषीबलानामथ शिक्षणार्था यूनां सभा बालसभा अवैध्यः ॥ ५३ ॥

विशेषतस्त्वीश्वरसेवकानां सीमान्तरक्तप्रभकञ्चुकानाम् ।
संस्थेयमाप्ता किल कांग्रेसस्याङ्गत्वमेकाधिकत्रिंशवर्षे ॥ ५४ ॥

सीमान्तप्रान्ते प्रतिनिध्यवस्थां प्राप्ता च सा वाहयतेस्म कार्यम् ।
साक्षान्नियुद्धं तु विरुद्धमासीद् वैधी प्रथेयं च समाश्रिताभूत् ॥ ५५ ॥

शिष्ट्या तु सत्याग्रहहेतुकानि विधानकानीह विनिर्मितानि ।
सर्वाणि चैतानि प्रवर्तितानि सम्बद्धसंस्थाः प्रतिबन्धितास्तत् ॥ ५६ ॥

कृषीवलानां च श्रमानुजीवानाञ्चापि दान्तावववधानमासीद् ।
विनोदहेतुस्स्वयमास्त तत्र शिष्टेर्जनाः सङ्कटनान्यकुर्वन् ॥ ५७ ॥

महीधराणामथ ग्रामणीनां संस्थासु सर्वाः सुविधाः प्रदत्ताः ।
संयुक्तप्रान्तीयसभाद्वयस्यानुदानमेभिः स्वयमेव सञ्चितम् ॥ ५८ ॥

मन्ये मदन्तर्नहि हिन्दुमुस्लिम्-तत्साम्प्रदायिक्यसभासु नास्ते ।
यः पक्षपातश्च परत्र हिन्दू-सभां प्रतीमां कटुतां गतोऽहम् ॥ ५९ ॥

अस्या हि मन्त्रीह निरर्थमेव सीमान्तरक्तप्रभकञ्चुकानाम् ।
संस्थासु लग्नप्रतिबन्धनस्य समर्थनैः शिष्टिमुपाश्रितेयम् ॥ ६० ॥

इहाप्रवृत्ते समरेऽपि तेषां यन्नागरिक्याधिकृतिर्हृताभूत् ।
तस्यामुना तद्विहितं समर्थनं दुःखञ्च मे विस्मयमातनोत्तन् ॥ ६१ ॥

सिद्धान्तप्रश्ने परिवर्जितेऽपि सर्वे विदन्त्यस्य दलस्य वृत्तिम् ।
यद्युद्धघस्रेषु विलक्षणोऽभूत्सीमान्तवर्गे व्यवहार एषः ॥ ६२ ॥

नेता स तेषामतिशूरवीरो विश्वासपात्रं पुरुषो महान् सः ।
अब्दुल्लगफ्फारखानेति नाम्ना सीमान्तगान्धिः प्रथितो जगत्याम्॥६३॥

विनाभियोगं स नियन्त्रितोऽभूद्दृग्बद्धकारागृहनिगृहीतः ।
तस्मिन्क्षणेऽप्येष च तत्र तिष्ठन् हिन्दूसभायाः किमपाकरोत्सः ॥ ६४ ॥

हा,सम्प्रदायेषु विरोध एष विनैव हेतुं यदिदं समर्थनम् ।
अन्यैः सदस्यैः प्रतिपादितोऽपि कलङ्क एषः परिमार्जितः स्यात् ॥६५ ॥

इत्याशयाहं सुचिरं प्रतीक्षामकार्षमेकोऽपि न कोऽप्यवादीत् ।
हिन्दूसभामन्त्रिण एतदुक्तं समर्थनं मां व्यथयत्यजस्रम् ॥ ६६ ॥

वक्तव्यमेतत्स्वयमप्यभद्रं श्रुत्वा ममाभादिह देशमध्ये ।
नूत्ना स्थितिर्या समुपस्थितास्ति तत्सूचकं भाषणमेतदासीत् ॥ ६७ ॥

ग्रीष्मस्य घस्त्रेऽवपराह्णकाले नेत्रे मदीये मिषिते विनिद्रे।
स्वप्नस्तदादर्शि मयाद्भुतोऽयम् 'अब्दुल्ल गफ्फारखाने' समन्तात् ॥६८॥
भवन्ति घोराक्रमणानि तञ्च संरक्षितुं युद्धमहं करोमि।
श्रान्तोऽतिमात्रं तनुवेदनाभिः क्लान्तोऽस्म्यजागः समपश्यमग्रे ॥ ६९ ॥
क्लिन्नन्तु वाष्पैरुपधानमासीदभून्महान् विस्मय एतदेवम्।
जाग्रत्यहो मय्यधिकं कठोरे न भावुकत्वं क्वचिदध्यरोहत् ॥ ७० ॥
न तेषु घस्त्रेषु मनो मदीयं स्वस्थं किलासीदिति सत्यमस्ति।
निद्रामि नो सम्यगिति त्वपूर्वं स्वप्ना उपायन्त दिवाप्यभद्राः ॥ ७१ ॥
आकारयामीव नितान्तमुच्चैश्चीत्कार आसीत्सकृदेव घोरः।
तेन स्वयं जागरितोऽभ्यपश्यं पुंसोद्वयं विष्टरसन्निधौ मे ॥ ७२ ॥
चीत्कारमाकर्ण्य हि चिन्तितौ तावपश्यमत्रैष तु कण्ठबन्धम्।
अत्रान्तरे कार्यसंसद्यकार्षीत्प्रस्ताव एको मयि दुष्प्रभावम् ॥ ७३ ॥
मनोऽतिदुःखाकुलमप्यकार्षीत्-अत्रोक्तमासीदवतारिकायाम् ।
प्रस्ताव एष प्रहितः स्वसम्पत्त्यधिग्रहेऽनुत्तरदायिचर्चाम् ॥ ७४ ॥
तां वर्गयुग्मेऽपि कृतां निशम्य चाध्याय च स्वीक्रियतेस्म सोऽयम्।
एतेन कांग्रेससजना इहोक्ताः कराचिकाङ्ग्रेसकृतानुबन्धम् ॥ ७५ ॥
एषा पुनः कार्यसमिन्मनीषा—सम्पत्त्यधिग्राहण—वर्गयुद्धे।
एतेन काङ्ग्रेसमतामहिंसामन्वायते स्तो हि किलात्र हिंसे ॥ ७६ ॥
प्रस्तावभाषा सुतरां सदोषा विज्ञायते ह्यत्र तया यथैषः।
प्रस्तावको वेत्ति न वर्गयुद्धपदस्य वाच्यार्थमपीह सम्यक् ॥ ७७ ॥
नवीनकाङ्ग्रेससमाजवादे साक्षात्प्रहारो विहितोऽस्त्यनेन।
न वस्तुतस्तस्य दलस्य कोऽपि सम्पत्त्यधिग्राहकथामकार्षीत् ॥ ७८ ॥
परिस्थितौ यत्किल वर्गयुद्धं प्रवर्तते तस्य कथा कृताभूत्।
प्रस्तावमध्येऽभवदिङ्गितं यन्न कोऽपि नो वाञ्छति वर्गयुद्धम् ॥ ७९ ॥
योग्यो न कांग्रेससदस्यतायै मन्येत तन्येत न नाम तस्य।
कांग्रेसमास्तेऽत्र समाजवादि सम्प्रत्यधिग्राहि न तच्छ्रुतं च ॥ ८० ॥
आसीत्पुरा तावदिदं मतं नः किन्त्वद्य तत्स्पष्टमभूद्रहस्यम्।
संस्था किलैषा भुवि राष्ट्रियास्ति सर्वाश्रया नास्ति समाजवाद्या ॥८१॥

प्रायश्च राष्ट्रप्रतिनिध्यदोऽस्ति ह्याराजरङ्कं सकलास्तदास्थाः ।
आन्दोलनानामिह राष्ट्रियाणामेषोऽधिकारो भवतीति सत्यम् ॥ ८२ ॥

तत्राशयोऽयं त्ववधारणीयो राष्ट्रस्य तस्मिन् किल बाहुमत्यम् ।
दत्ते तदस्मै निजप्राधिनिध्यं न प्रातिनिध्यं गतबाहुमत्यम् ॥ ८३ ॥

तन्नीतिरास्ते जनताहिताय समूहमाहुर्जनतां जनानाम् ।
न तत्र भेदः किल जातिसम्पच्छिक्षाकृतः कश्चिदवेक्षणीयः ॥ ८४ ॥

न राजनैतिक्यपि कापि संस्था संस्थाप्यते विश्वजनीनतां विना ।
स्यात्तादृशो सा नहि निर्बलैव संजायते सात्र निरर्थिकापि ॥ ८५ ॥

नास्याश्च चिह्नं किमपि स्थितं स्यात्स्थैर्यः स्वरूपं च कदापि न स्यात् ।
आस्ते दलं तत्किल राजनैत्यमुद्देश्यमेकं भुवि यस्य निश्चितम् ॥ ८६ ॥

आहो सभा सास्ति परोपकारिणी यास्ते दयाः धैर्यप्रचारिणी सदा ।
स्वार्थं विना स्वाशयमन्तरापि सर्वस्य कल्याणमसौ, तनोति ॥ ८७ ॥

येषामिदं ध्येयमिह प्रणीतं येषाञ्च सिद्धान्ततति: प्रणीता ।
तेषामियं धारयते नितान्तं तत्प्रातिनिध्यं च गुणात्मकत्वम् ॥ ८८ ॥

ये ध्येयसिद्धान्तविरोधिनोऽस्य विरोधिनस्तानभियच्छतेऽदः ।
तेषां प्रभावक्षयमिच्छतीदं यथा न सिद्धान्तविलोपनं स्यात् ॥ ८९ ॥

इदञ्च साम्राज्यविरोधिभावात्सङ्घर्षतोऽन्यादृशतो विमुक्तम् ।
विरोधिनोप्यत्र सुसम्मतास्ते साम्राज्यवादप्रतिरोधकत्वात् ॥ ९० ॥

साम्राज्यवादप्रतिरोधतो ये न सम्मतास्ते पृथगास्थिताः स्युः ।
कांग्रेसतो निष्क्रमिताः प्रपन्नास्ते ब्रैटिशीं शिष्टिमिति प्रसिद्धम् ॥ ९० ॥

एतत्तथा स्थायि च सार्वजन्यं संजातमान्दोलनमेकमात्रम् ।
अन्योन्यमेकस्वरतान्वयेन नानादलान्यत्र समागतानि ॥ ९२ ॥

मुख्यस्य सिद्धान्तमतस्य चैक्याद् गान्धेश्च सर्वोपरि व्यक्तिसत्त्वात् ।
एकत्र सूत्रे यमिताः समेऽपि स्वाधीनतायै सहिता यतन्ते ॥ ९३ ॥

पश्चाच्च सा कार्यसमित्प्रयुक्तं स्वं वर्गयुद्धेति पदं विवृत्य ।
प्रस्तावभाषाविषये तटस्था तस्याशयं बोधयितुं प्रयेते ॥ ९४ ॥

कांग्रेसतः सांसदवर्गनुन्नः प्रस्ताव एषः परिपारितोऽभूत् ।
वर्गः स संसच्चयने स्वसम्पत्सम्पन्नवर्गाच्च सहायताप्त्यै ॥ ९५ ॥

एषां प्रभावेण च कांगरेस-दृष्टिर्मृदुत्वं भजते स्म किञ्चित् ।
तद्देशगान्नूत्नपुराणलोकान् संयोजयत्तत् समशिश्रियत्तान् ॥ ९६ ॥
यैः प्रत्नचित्तैः प्रथमं विरोधः कांग्रेसचेष्टासु प्रदर्शितोऽभूत् ।
सत्याग्रहे शासनसाह्यमेतैः समादृतं चाप्यभवत्पुराणैः ॥ ९७ ॥
तान्प्रत्यपीमे चटुकाकुवाक्यैः सान्त्वं प्रयुज्यादरमाददर्शन् ।
कोलाहलं वा विदधत्समीक्षां तीव्रं दलं विघ्नमिहाचरेच्च ॥ ९८ ॥
इत्येतदस्माद् बहिरासितं स्यात् कांग्रेसकार्यार्थसमित्सदस्यैः ।
कांग्रेससंसद्दलमत्र नम्रं फूत्कृत्य फूत्कृत्य च चालनीयम् ॥ ९९ ॥
कार्यक्रमं कंचन यं न्यदिक्षन्नैतादृशं पूर्वमुपास्यते स्म ।
गान्धेस्तु भिन्ना अपि ते प्रसिद्धाः स्वातन्त्र्यसङ्ग्राममहारथास्ते ॥१००॥
यथार्थतानिर्भयतास्वदेश—सेवामुखैर्भव्यगुणैरुपेताः ।
पश्चात्कृता नूतननीतिभाग्भिः प्रधानपङ्क्तौ भृशमाविशद्भिः ॥१०१ ॥
सम्मानलुब्धैः क्षणवादिभिश्चाप्युद्घाटितं द्वारमिहातिरेकात् ।
सत्यप्यहो गान्धिमहाप्रभावे सन्दूषितं कांग्रसमेतदासीत् ॥ १०२ ॥
द्वैमुख्यमप्यस्य स दोष आसीत् येनाविशन्नाधिकृता अपीह ।
एकं मुखं केवलराजनैतिकं यस्मिन्दलं संघटितं तदासीत् ॥ १०३ ॥
अन्यत्त्वहो धार्मिकमत्र धर्मनिष्ठा तथा भावुकता स्थितासीत् ।
ताः प्रार्थनार्थाश्च सभामुखे किलास्मिन्नप्यभूवन्नभिवेशितास्ताः १०४।
शिष्टेश्च पक्षे विषयस्य रूपं प्रकाशमासीदिह मन्यते सा ।
आन्दोलनानां दमनेन लब्धः सोऽयं तयासीद् विजयोऽधुना यत्॥ १०५॥
छेदक्रियायां प्रतिसाधितायां जीविष्यतीदं नु मरिष्यतीदम् ।
इत्यादि चिन्ता कथमुद्गताभूत् काङ्ग्रेसमासीदिह भूरिदान्तम् ॥१०६॥
तथापि शिष्टिः परिवर्तनेन केनापि नीतिं दमनोचितां ताम् ।
निरन्तरं वर्तयितुं यदैच्छत् सा वेद हेतुं तमतोषमत्र ॥ १०७ ॥
यावच्च सोऽविद्यत तावदस्यां नीतौ न शैथिल्यमुपासनीयम् ।
तन्नीतिशैथिल्यमिह प्रसोष्यत्यहो महान्दोलनमेव तीव्रम् ॥ १०८ ॥
शिष्टिः किलैतद्विविनक्ति नूनं कांग्रेसिकेषु श्रमजीवनेषु ।
कृषीबलेष्वेषु च सोष्मभावान् निर्बन्धितुं नीतिरियं प्रवर्त्या ॥ १०९ ॥

तयेह फूत्कृत्य पदक्रमं ये न्यस्यन्ति नम्रा न भवन्ति रुष्टाः ।
ते बाहुमत्येन विवर्तमानाः शान्तास्तदा कांग्रसमास्त शान्तम् ।। ११० ।।

तद्देहरादूनगतेऽत्र कारागारे ममाभूदियमेव दृष्टिः ।
सम्पर्कलेशेऽपि न विद्यमाने नाहं मतस्थापनकर्मणेऽलम् ।। १११ ।।

अलीपुरेऽत्यन्तमविज्ञ आसं परिस्थितीनामिह किंचनशः ।
अत्रास्ति शिष्टैरुचितस्य वृत्तपत्रस्य लाभेन मनाक् प्रकाशः ।। ११२ ।।

इहैकपक्षा अथ चार्धरूपा मया समाचारलवाः श्रितास्ते ।
सम्पर्कतो वा सुहृदां विचारेष्वासीत्परीवर्तनकामना मे ।। ११३ ।।

स वर्तमानेन विनिर्जितोऽहं स्वं भूतकालं बहुशः स्मरामि ।
कार्येषु चाहं समयं ददानो यत्सार्वजन्येष्वनुभूतवांस्तत् ।। ११४ ।।

यद्यत्कृतं तत्र किमास्त साधु किं चाप्यसाधु प्रलिखामि सर्वम् ।
एतान् विचारांश्च तदा व्यवस्थावस्थानतस्तेऽप्युपयोगिनः स्युः ।।११५।।

एतेन मस्तिष्क मिहैककार्ये लग्नं भवेन्न भ्रमितं जगत्याम् ।
जूनाच्चतुस्त्रिंशतमाब्दकाद्धै 'मेरी कहानी' त्यलिखं क्रमेण ।। ११६ ।।

(त्रिंशत्समानन्तरमत्र जूनमासेऽनुवादार्थमुपाश्रितेयम् ।
अमीरचन्द्रेण तु संस्कृतेन प्रारभ्यतान्तं गमिता सिताम्बरे ।
वर्षे नवाशीतितमे निरन्तरं सरस्वतीसेवनकौतुकेन
समर्पिता जन्मशताब्दिकायै श्रीनेहरोरेव कलात्मिकायै ।)

अत्राष्टमासावपि यावदेतल्लेखे मनोवृत्तिरियं तु लग्ना ।
अलेखिषं चावसराः समागता लिलेखिषा यत्र न जायते स्म ।। ११७ ।।

वारत्रयं चैतदभून्न मासं यावत्तु किञ्चिल्लिखितं मयात्र ।
निरन्तरं वर्तयितुं प्रवृत्तिं लेखस्य यत्नान् सुबहूनकार्षम् ।। ११८ ।।

यात्राकथा जीवनदर्शनस्य समाप्तिसान्निध्यमुपागतेयम् ।
अत्राधिकांशोऽद्भुतपारवश्ये चिन्तासु चालिख्यत खिन्नतायाम् ।।११९।।

मनःस्थितिः काचन तादृशी मे लेखे मदीये प्रतिबिम्बितास्ति ।
एतेन लेखेन हि वर्तमाना विस्मारिता मे बहुशस्तु चिन्ता ।। १२० ।।

न पाठकान् ध्यायति मानसं मे, स्वयं ब्रुवन् स्वं प्रतिबोधयामि ।
प्रश्नान् स्वलाभाय पुनः प्रकल्प्य तदुत्तराणि प्रददामि तूर्णम् ।। १२१ ।।

तन्मे मनोरञ्जनमप्यभूच्चानासक्तभावात्स्पृहयामि वक्तुम् ।
अचिन्तयं भूतविचारणा मे कार्येऽत्र लेखेऽतिसहायिका स्यात् ॥१२२॥
जुलाइमासावसितौ च वेगाद्विकारमापत्कमलाशरीरम् ।
दिनेषु चाल्पेषु च सातिमृद्वी जाताऽस्म्यमस्तैकदशे दिनेऽहम् ॥१२३॥
तद्देहरादूनगतञ्च कारागारं परित्यक्तुमिहोदितोऽस्मि ।
तस्यां निशायां पुरुषावधाने प्रयागमेष प्रतिप्रेषितोऽस्मि ॥ १२४॥
अन्येद्युरागो तु प्रयागराजे स मण्डलन्यायकरोऽवदन्माम् ।
अस्थायिरूपेण विमुक्तिरेषा प्रदीयते येन विलोकयेयम् ॥ १२५ ॥
पत्नीं रुजार्तामिह तां मदीयां या मासषट्कादभवद्वियुक्ता ।
विनिग्रहस्यावधिरद्य शिष्टं ह्येकं दिनं मासविपूरणीयम् ॥ १२६ ॥

कविशिरोमणिरित्युपाधिः पण्डितैर्मण्डितपुरीकैः
संस्कृतप्रविचारपरिषन्नेतृभिर्यस्मै वितीर्णः ।
तेन कविना कल्पितेऽस्मिन्नेहरूकाव्येऽतिभव्ये
सर्ग एष समाप्तिमेतो वै चतुः षष्टः शुचार्तः ॥

एकादश दिनानि

इन्द्रवंशा, वंशस्थलिम्, उपजातिः

पञ्चषष्टः सर्गः

स्वयं निकृत्यासिरिहात्मकोषकं
विनिक्षिपत्येष यथातिदूरतः ।
तथैव जीवो निजकञ्चुकं वपु-
र्विलोक्य जीर्णं प्रतिमुञ्चति स्वयम् ॥ १ ॥

विमुक्तिरासीन्मम कालिकी हि सा
तथोक्तमासीदियमस्ति दैनिकी ।
चिकित्सको यावदपेक्षितामिमां
स मंस्यते तावदियं प्रवर्त्स्यते ॥ २ ॥

अनिश्चितत्वेन भृता स्थितिश्च सा-
ऽद्भुताभवद्यत्र विनिश्चयाक्षमः ।
सुनिश्चितायामवधौ त्ववेदिषं
स्थितिर्मदीया नु किलास्ति कीदृशी ॥ ३ ॥

अभोत्स्यमेतां यदि मामकीं स्थितिं
तदाऽकरिष्यं स्वमिहानुकूलितम् ।
इहास्ति या सम्प्रति तत्र वै मुहु-
र्निगृह्य कारागृहमेष नेष्यते ॥ ४ ॥

अभूदकस्मात्परिवर्तनं त्विदं
न तत्कृतेऽभूवमहं समुद्यतः ।
विनिग्रहान्तस्तलताश्चिकित्सकैः
स्वबन्धुभिर्वै परिचारिकान्वितैः ॥ ५ ॥

समाकुले ह्यागतवानहं गृहे,
पुत्रीन्दिरा शान्तिनिकेतनात्पुनः ।
समागता द्रष्टुमथात्र यामिमे
ह्यनामयं प्रष्टुमथेन्दिराम्बिकाम् ॥ ६ ॥

निवासभोजादिविधौ पृथग्विधे
ह्यभूदिहारामयुतं सुभोजनम्।
सति त्वमुष्मिन् कमला रुजातुरा,
तदीयचिन्ता विवशीकरोति माम्॥ ७॥

शरीरमस्यास्तदवस्थितास्थिकं
तदीयकार्श्येऽजनयत्तु विस्मयम्।
तदास्त छायावदपीच्यदर्शनं
कृशापि साऽयुध्यत तद्रुजा समम्॥ ८॥

इयं परित्यक्ष्यति मामिति स्मृति
स्त्वजीजनच्चेतसि घोरवेदनाम्।
विवाहकालस्य तया ममाधुना
सहार्धमष्टादशवर्ष आगतः॥ ९॥

मनस्यभूवन् स्मृतयः प्रबोधिता-
स्ततो दिनादद्य दिनावधि स्थिताः।
तदास्मि षड्विंशतिवर्षकोऽभवं
परन्त्वियं सप्तदशाब्दिकाऽभवत्॥ १०॥

नितान्तमज्ञा विषयेषु लौकिके
ष्वियं किलाबोधविमुग्धबालिका।
वयस्यभूदन्तरमावयोरलं
ततोऽपि सौमानसिके दृगञ्चले॥ ११॥

गभीरतायामपि बालचापलं
नमाममुञ्चन्न मयान्वभूयत।
इयं नितान्तं सुकुमारिकाऽबला
क्रमेण फुल्लन्मतिरस्ति बालिका॥ १२॥

इयं मया भावुकचेतसाश्रयं
वितत्य बालावहितेन सेव्यताम्।
मिथः किलाकर्षणमेधते स्म नौ
परस्परं चारु मिलन्मनोरथम्॥ १३॥

अभूत्परं दृष्टिपथे किलान्तरं
मिथोऽनुकूलत्वमभून्न चावयोः ।
तदेव सङ्घर्षमजीजनत्क्वचित्
क्वचित्कलिं बालकयोरिवातनोत् ।। १५ ।।

कलिश्च सङ्घर्ष इहातिकालतो
न तिष्ठतः स्माचिरमेव मार्जितौ ।
झटित्यभून्मेलमिलापनं पुनः
समाप्तिमेति स्म च कापि रूक्षता ।। १५ ।।

स्वभावतीव्रावथ क्षुब्धमानसौ
स्वस्वप्रतिष्ठाग्रहिणौ शिशूपमौ ।
तथापि नो प्रेम विवर्धते स्म य-
त्तदेकविंशादिह मासतः परम् ।। १६ ।।

तदैकमात्रं यदपत्यमागतं
तदिन्दिराऽऽसीत्प्रियदर्शिनी सुता ।
विवाहसङ्गीव च सर्वदेशगो
विवर्धते राजनयः स्म सर्वतः ।। १७ ।।

इहाभवंस्तर्हि नवा नवा इमा
अनेकरूपा घटनाः क्रमागताः ।
इमासु चाकर्षणवर्धनात्परं
शनैः शनैरासु रुचिर्ममास्थिता ।। १८ ।।

दिनानि तान्यासत होमरूलका-
न्यतः परं मार्शलला प्रवर्तितः ।
प्रदेशवर्ये किल पाञ्चनद्यके
समागतं चासहयोगिकं युगम् ।। १९ ।।

अहं ततः सर्वजनीनकार्यिक-
क्रमस्य वात्यामयचक्रचङ्क्रमे ।
विशन्निहैवाधिकतोऽधिकं क्रमा-
न्निमज्य नोन्मज्जनमाप्नुवं चिरात् ।। २० ।।

विलीनताऽऽन्दोलनके विवर्द्धिता
यथा न काले सहयोगितोचिते ।
अजानता सा कमला स्वदृक्पथा-
न्निराकृता स्वात्मनि निर्भरीकृता ॥ २१ ॥

न तां प्रतिप्रेम न पुष्यते स्म मे
सहायतां दातुमिहापि सोद्यता ।
इदं विजानन्मुदमुद्धतामयां
यथाबलं मय्यदधादियं हि ताम् ॥ २२ ॥

परं सदाऽऽवामिह मानसीं व्यथा-
मधाव, सा मे तुदतीह तां भवेत् ।
इमामहं विस्मृतवान् कदाचि-
त्कदाचिदस्याः स्मृतिमप्यथाचरम् ॥ २३ ॥

अपेक्षया तत्य ममाकृपा यदि
प्रयुज्यतेऽस्यै तदभूद्वरं तदा ।
तिरस्कृतं प्रेम तथा न हृष्यति
ह्युपेक्षितं प्रेम यथातिवर्धते ॥ २४ ॥

ततश्च रोगक्रम एष आगतः
किलेदमीयश्च मदीय एष च ।
प्रवेशकार्यक्रम आहितोऽभव-
न्नवेनवे वन्दिगृहे नवो नवः ॥ २५ ॥

इहैव कारागृहमेलनेऽमिलत्
कदाचिदेषा स्वयमप्यगादिदम् ।
प्रतिष्ठिता साऽऽदिमपङ्क्तिसङ्क्रमे
स्वतन्त्रतासंगरसैनिकालिषु ॥ २६ ॥

शरीरतो दूरगतावपि स्वयं
स्वतन्त्रतासङ्गरसैनिकत्वतः ।
उभाविहावां निकटं समागतौ
परस्परं हर्षमदद्वहि स्फुटम् ॥ २७ ॥

इमानि वै जातु भवन्ति मेलना
न्यमूल्यतामास्मदजीवनेऽदधुः ।
प्रतीक्षमाणौ किल तानि मध्यगा
न्यहो दिनानि त्वनयाव गण्यताम् ।। २८ ।।

परस्परं नात्र विरक्ततां गतौ
मिथो न कुर्वःस्म कथाश्च नीरसाः ।
यतः क्षणार्थोचितमेलनेषु
सद्यस्कतानूतनते सदा स्थिते ।। २९ ।।

मिथो विशेषांश्च नवान्नवान् सदा-
ऽभिपश्यतोस्तृप्तिलवोऽपि नाभवत् ।
मिथस्तृषार्तौ श्रुतिनेत्रवाणिभि-
र्मिथः पिबावः किल पाययावहे ।। ३० ।।

कदाचिदासन्नुचिता न संकथा
वयःप्रवृद्धावपि बालता स्थिता ।
मताभिभेदात्सुतरामभिन्नयो-
रपि प्रभेदः समपद्यत क्षणम् ।। ३१ ।।

विवाहतोऽष्टादशवर्षसंक्रमा-
त्परं हि तस्या वदने मनोहरे ।
विमुग्धताद्यापि पुरेव संस्थिता
विदग्धता काचन नोपलक्ष्यते ।। ३२ ।।

दिने किलाद्येऽभिनवा वधूरियं
यथागतास्मद्भवनेऽभिनन्दिनी ।
तथैव साद्यापि विलक्ष्यते यत-
स्वदस्ति तस्याः कमलात्वमद्भुतम् ।। ३३ ।।

अहन्तु भूयः परिवर्तितोऽभवं
वयोऽनुरूपं चपलत्वमावहन् ।
बहन् क्रियाशीलतयापि योग्यतां
वदन्ति केचिन्मयि बालचापलम् ।। ३४ ।।

तथा च मद्वक्त्रमिदं स्म वक्ति मे
वयोधिकत्वं च कचाश्च लुण्चिताः।
परेऽवशिष्टा परिहाय कृष्णतां
दधत्यहो काञ्चन शुक्लतां क्रमात् ॥ ३५ ॥

स्फुटा वलीनामवलिश्च मस्तके
मुखेऽपि मे संकुचतीव च त्वचा।
विलोचने सर्वत एव कालिमा
ऽऽवृणोति छायापरिवर्तितोऽस्म्यहम् ॥ ३६ ॥

गतैश्चतुर्भिः परिवत्सरैर्णयि
प्रपातिताभिस्तु विपद्भिरन्यथा।
कृतोऽस्म्यहो कैश्चन पारवश्यकै-
र्गतेषु वर्षेषु गतो युवत्वतः ॥ ३७ ॥

नवे स्थलेऽहं कमला च सङ्गतौ
ततोऽविदन्मां पितरं च तां सुताम्।
मिथो भगिन्याविव ते विभाविते
सुतेन्दिरा मे कमला च सङ्गते ॥ ३८ ॥

विवाहितस्यास्य च जीवनस्य मे
गताःकिलाष्टादश वत्सरा अहो।
अमीषु कारागृह एव भूयसा
गताश्च तस्या अपि चातुरालये ॥ ३९ ॥

इहाद्य यावत्किल बन्दिगेहगः
कियद्भ्य एवात्र दिनेभ्य आगतः।
इहातुरा सा कुरुते स्वजीवना-
वनाय संघर्षमिवात्र स्वरुग्गणैः ॥ ४० ॥

अनामये स्वस्य तटस्थतामिमां
विचिन्त्य तस्याः क्षुभितं मनो मम।
तथापि तस्या इह काऽस्ति दूषणा,
यदात्मनि व्याकुलतास्ति राष्ट्रिया ॥ ४१ ॥

रणेऽत्र वै राष्ट्रियके स्वभागितां
प्रदातुमात्माऽऽकुलतां गतो महान्।
शरीरशक्तिः किल मन्थरा सती
ब्रवीति तस्याः समरेऽसमर्थताम् ॥ ४२ ॥

इति प्रयातुं समरे बहिस्तथा
तटस्थभावेन विमोक्तुमेषणाम्।
किलात्र द्वन्द्वं कमपि श्रिता सती
रुजा महत्या दमनीयतां गता ॥ ४३ ॥

इहाद्य यस्या महती ममास्त्यहो
भुवि व्यपेक्षा खलु सर्वतोऽधिका।
परित्यजेत्किं नु सहायिकाऽत्र सा
सुखे च दुःखे विषमेऽत्र मामियम् ॥ ४४ ॥

परस्परं सम्प्रति सम्प्रति त्वहो
क्रमावहे वै परिचेतुमादरात्।
अथाधुनैवास्ति मिथः प्रवर्तिता
प्रतीतिरेषा क्रमशः शनैः शनैः ॥ ४५ ॥

कियच्च कार्यं करणीयमासी-
त्संवासभाग्भ्यां सहयोगलम्भनात्।
दिने दिनेऽथ प्रतिहोरमीदृशीं
विलोक्य रोगाकुलतां मदन्तरे ॥ ४६ ॥

इमे विचारा भृशमुत्थिताः समं
ममान्तरङ्गं व्यथयन्ति शाश्वतम्।
समागमायात्र मया सुहृद्गणा
उपागतास्ते श्रुतवृत्तचर्चया ॥ ४७ ॥

अबुद्धवृत्तार्चनया ममाखिलं
जगत्समाचारमिह न्यवेदयन्।
अमीषु केचिद्यमकुर्वतात्र मे
सुदुष्करं प्रश्नमहं तमाविदम् ॥ ४८ ॥

यथा कथञ्चिच्च समाहितो मया
तदीयप्रश्नोऽस्थिरमानसेन सः ।
रुजानयाहं कमलावपुर्गया
नितान्तमाक्रान्तमनाः समन्ततः ॥ ४९ ॥

स्थितो किलास्यामभवं न वै तदा
यथा धनप्रश्नसमाधये क्षमः ।
प्रशिक्षितश्चानुभवेन सोऽस्म्यहं
न वन्दिगेहे पठितं भवेदलम् ॥ ५० ॥

स्फुटं च वेत्तुं त्वथ चेतितुं मतो
जनैः समं व्यक्तिगतं विवेचनम् ।
ऋते ततः केवलपुस्तकाश्रयाद्
यथार्थवस्तु प्रतिवेद्यते न तैः ॥ ५१ ॥

न गान्धिना नापि च काङ्ग्रेसिकै-
स्तथेतरैः कार्यसमित्सभासदैः ।
समस्तवार्तास्वपि चर्चया विना
वचोऽत्र काङ्ग्रेसनये प्रयुज्यते ॥ ५२ ॥

परत्र वा कुत्रचनापि सम्मतेः
प्रकाशनं तान्प्रति चानयोर्व्यभात् ।
यदत्र जातं मनसा मयात्र या
कृता समीक्षाऽऽस्त तया मनो भृतम् ॥ ५३ ॥

परन्त्वहं निश्चितसूचनास्तदा
प्रदातुमासं न समुद्यतो यतः ।
न वन्दिगेहाद् बहिरागमस्य मे
तदाभवद्ध्यानमतो न चिन्तितम् ॥ ५४ ॥

अयं विचारोऽपि तदा ममाभवत्
अदर्शि शिष्टचा मयि यात्र शिष्टता ।
स्वभार्यया साकमिहैकवासिता-
प्रदानतस्तामिह ध्यायता मया ॥ ५५ ॥

इहानुकूलावसरे न काचन
क्रियात्र कार्या किल राजनैतिकी।
न तादृशी कापि मया प्रतिश्रुतिः
कृताभवद् यद्यपि नेदृशः पणः॥ ५६॥

तथापि तस्यास्य कृतज्ञताजुषः
प्रभाव आसीत्सुविचारणस्य मे।
असत्यसंसूचनखण्डनादृते
न भाषितं विश्वजनीनभाषणम्॥ ५७॥

स्वतन्त्रवार्तासु न कोपि निश्चितो
न यो मयाऽभून्न समर्थितस्तदा।
परं पुराण्यो घटनाः समीक्षिताः
स्वतन्त्रभावेन मया तदाप्यहो॥ ५८॥

समाजवादीति च कांगरेसिकं
दलं तदानीमिह सत्त्ववमागतम्।
मदन्तरङ्गा बहवश्च सङ्गिनः
समागमन्नत्र दलेऽविचारतः॥ ५९॥

यथा मया तत्कलितं तथा नय-
स्तदीय आसीद्रुचितो ममाग्रिमः।
परन्तु तन्मे कुशरोपमं मतं
ततो न तस्मिन् मिलितः पराश्रयः॥ ६०॥

गृहीत आसीत्समयो विवादकै-
रिहापि कैश्चित्स्थलराजनैतिकैः।
यतः प्रयागेऽपि परत्रवत्पुरा
प्रचार आसीद्विहितो विषात्मकः॥ ६१॥

न तत्र सिद्धान्तभवं तु कारणं,
इहाभवन्व्यक्तिगतास्तु हेतवः।
निवेदितोऽहं तु समाधयेऽभवं
क्वचिद्विवादे पतितुं त्वनिच्छुकः॥ ६२॥

न चाप्यभून्मे समयोऽपि कश्चन
तथापि काश्चिद् घटनाः पुरः स्थिताः ।
गतोऽस्मि दुःखं भृशमेष तावता
काङ्ग्रेसनिर्वाचनमत्र दूषितम् ॥ ६३ ॥

इदं किलाश्चर्यंकरं परं ममा-
भवत्स्थलीयस्य हि कांग्रसस्य तत् ।
निर्वाचनं यत्र जनाः किलेदृशं
उत्तेजनं वा अभजन् सभासदः ॥ ६४ ॥

अमीषु मुख्याः किल तेऽभवञ्जना
अनेकवैयक्तिककारणैस्तु ये ।
सत्याग्रहस्यावसरे वलीयसि
कांग्रेसमुत्सृज्य गताः पराश्रयम् ॥ ६५ ॥

सत्याग्रहे च स्थगिते समान्यपि
शान्तानि वैयक्तिककारणान्यपि ।
इमेऽमुतश्चाभिगता रणस्थलम्
परस्परस्याथ विरुद्धमुद्धतम् ॥ ६६ ॥

प्रचारमेते व्यदधुर्भयङ्करं
प्रायोऽतिनीचं पतयिष्णुमादरात् ।
इदं त्वसाधारणमास्त वस्तु य-
न्निपातितं स्यान्नु कथं दलान्तरम् ॥ ६७ ॥

इत्यत्र लक्ष्यं परिगृह्य चौजसा
साधारणाः शिष्टतया युता अपि ।
प्रविस्मृतास्ते नियमा इहाभवन्
विशेषतो रोषकरं ममाभवत्— ॥ ६८ ॥

यदत्र रोगः कमलाशरीरगो
नामापि तस्याः कमलेति भूयसा ।
प्रायुज्यतास्मिन् समये यदा त्वियं
मध्ये स्थिता जीवनमत्युसंशये ॥ ६९ ॥

प्रश्नेष्वथो व्याप्तियुतेषु संसदः
कांग्रेसकस्यागमिचायनेष्वपि ।
प्रश्नौ प्रधानौ समुपस्थितौ तदा
समाश्रये निश्चिनुयाम तत्तगोः ॥ ७० ॥

प्रत्यर्थिनं स्वं प्रतिघोष्य तच्चये
विनिर्णयं नेतुमपीह चर्चितम् ।
नवेषु नैके युवसु स्म कुर्वते
विरोधमस्यात्र विनिर्णयस्य ते ॥ ७१ ॥

यतस्तवैतत्पुनरेव तत्र वै
मार्गे पुराणे समभूत्प्रवर्तनम् ।
यः साम्मनस्याय पुरा प्रकल्पितो
नान्यस्तु पन्था निचितस्तदाभवत् ॥ ७२ ॥

अभूदिदं चित्रममीषु केचन
कांग्रेसभिन्नादिह संस्थिकान्तरात् ।
निर्वाचनार्थोद्यमने विरोधिनः
सिद्धान्तवादा व्यदधुर्विरोधिताम् ॥ ७३ ॥

प्रतीयते लक्ष्यममुत्र तादृशां
यत्साम्प्रदायिक्यविताऽस्तु संस्थितिः ।
इति स्थलीयात्कलहाच्च दुर्नयाद्
घृणा ममाभूदहमैक्षिषीह यत् ॥ ७४ ॥

ममानुकूल्यं न भवेदिहेदृशैः
स्वीये प्रयागेऽहमभूवमद्भुतः ।
व्यचिन्तयं चेदृशि वायुमण्डले
करिष्यते किन्नु मया क्रमागमे ॥ ७५ ॥

गान्धिं प्रति प्रागलिखं 'रुजातुरा
भार्या ममास्ते कमला तपस्विनी ।'
ममास्त चिन्ता पुनरेव वन्दिनां
गृहं मया शीघ्रमुपासितं भवेत् ॥ ७६ ॥

पुनः स्वचित्तस्थमिदं च वृत्तकं
निवेदितुं मेऽवसरो न लप्स्यते।
अतो यदासीन्मम बुद्धिविभ्रमे
तदप्यहं तत्र तदा न्यवेदयम्॥ ७७॥

अथाधुनिक्यो घटना ममान्तरं
सन्तापयन्ति स्म ददत्यवश्यताम्।
पत्रे मदीये लघुमुद्रया मया
निवेदितं चास्त पुनस्तदप्यदः॥ ७८॥

कार्यं मया किं, किमकार्यमत्र वे-
त्यपीह पृष्टो न मयैष गान्धिः।
मया कृतं यत्तदिहत्यवर्तनैः-
प्रतिक्रियात्मा यम मानसेऽभवत्॥ ७९॥

तत्रैव पत्रे विवृतिः कृताभवत्
पत्रं तदासीद् दमितौजसो जवः।
पश्चान्मया ज्ञातमनेन गान्धिना
ऽप्यत्यन्तदुःखं स्म तदानुभूयते॥ ८०॥

दिनानि यान्तिस्म गृहे स्थितः किल
प्रतीक्षमाणोऽस्मि न वन्दिगेहतः।
पत्रान्तरेणाग्रिमसूचनामहं
काले च काले च किलास्म्युदीरितः॥ ८१॥

श्वो वा परश्वः किल शिष्टिसूचना
मयाप्स्यते साऽत्र हिताहितान्विता।
इहान्तरेऽदिश्यत तच्चिकित्सको
दातुं तु शिष्ट्यै कमला रुजः स्थितिम्॥ ८२॥

साधारणोऽयं च विचार आस्त यद्
विशेषतः शिष्टिसमीपवर्तिनाम्।
अक्तूबरे मोहमयीस्थकांङ्ग्रसा-
धिवेशनं चात्र सभानिचायनम्॥ ८३॥

द्वयं भवेच्चेत्स्थगितं जवाहर-
स्तदा विमुच्येत चिराय शासकैः ।
बहिः स्थितस्तत्र भजामि भागं
ततस्त्रिमासीं पुनरस्ति वन्दिता ॥ ८४ ॥

पुनर्न कारभवने प्रवेशनं
भवेदितीहास्त जनैश्च तर्कितम् ।
यथा यथा यान्ति दिनानि तत्तथा
सम्भाव्यते स्माधिकतोऽधिकं जनैः ॥ ८५ ॥

मयाथ कार्ये लगितुं मनः कृतम्—
एकादशोऽयं दिवसो ममाभवत् ।
कारागृहान्मुक्तिजुषो गृहस्थिते-
रभ्यागता पौरुषमृत्तरिस्तदा ॥ ८६ ॥

एकेन चागत्य निदेशितोऽस्म्यहं
तवावकाशावधिरेष आगतः ।
मयाऽद्य नैनीगत वन्दिकेतने
तेनैव साकं गमनीयमस्ति च ॥ ८७ ॥

मयापि मित्राण्यनुयाचितान्यथो
यथैव चारोहमिमाञ्च मृत्तरिम् ।
माता मदीया त्वतिदुर्बलागता
तस्या असावाकृतिरस्ति नेत्रयोः ॥ ८८ ॥

अध्यापकत्वेन च षष्टिवार्षिके-
नाग्राह्यद्यो निजबोध मार्थिनः ।
तेनैव कांग्रेस कथात्मिका कृति
र्व्यधायि सर्गोऽत्र च पञ्चषष्टः ॥

पुनर्नैनी कारागृहे

मालिनी

षट्षष्टः सर्गः

पुनरहमिह नैनीनामकग्रामकारा-
गृहमविशमयं मे प्रत्यभान्नूत्नदण्डः ।
बहिरथ पुनरन्तश्चास्मि नीतोऽत्र कारा
गृहगृहपतिहस्तैः कन्दुकीभावमाप्तः ।। १ ।।

क्षणमिह मम मुक्तिश्च क्षणं निग्रहो मे
हृदयमिदममथ्नादागतं तद्गतं च ।
असुकरमिह भूयो भूय आत्मानुकूल्यं
नवनवपरिवृत्तौ कल्पितुं स्तोकतोऽपि ।। २ ।।

मम मनसि तदाभूदत्र नैन्यां पुराणी-
मधिवसितुमुपेतः स्यामहं तां प्रकोष्ठीम् ।
बहुसमयकदण्डं प्राक्तु यत्रान्वभूवं
कतिपयकुसुमाढ्यैस्तैः क्षुपैश्वाप्यखेलम् ।। ३ ।।

इह मम भगिनीशः पूर्वमारोपयद्यान्
सपदि सरणजीतः पण्डितो दण्डितः सन् ।
किमपि च तदलिन्दं यत्र मन्दं किलासे,
परमिह न ममासीदैषमः सम्प्रवेशः ।। ४ ।।

अपि तु दृगवरुद्धो नापविद्धोऽभियोगै-
रहमिह खलु षष्ठे कोष्ठके रक्षितोऽस्मि ।
इदमनुचितमाभाद्यत्तदीयप्रसङ्गे
ऽहमिह वसतिमान् स्यामित्यधीयेऽन्यभागे ।। ५ ।।

स किल निपुणमन्तः पत्रपुष्पादिहीनो
हरितिमरहितो वाऽत्यन्तशुष्कः प्रकोष्ठः ।
न मम विषय आसीच्चिन्तितानां तदानीं
क्वचिदपरपदेऽभून्मानसं मेऽनुलग्नम् ।। ६ ।।

अहनि बत चतुर्थे पञ्चमे नापि षष्ठे
करण शरणमाप्तो न प्रतीक्षानिमग्नः ।
अहह ! दिवस एवं सप्तमोऽपि व्यतीतो
भृशमवशतयाऽऽसं तत्प्रतीक्षातुरोऽहम् ॥ १४ ॥

श्रुतिपुटमविशन्मे दुःसहं वृत्तमेतद्
यदतिशयितमस्या वर्ततेऽद्यातुरत्वम् ।
उपहसितिरभान्मे दर्शनाभाषणादेः
स च विधिरिह सप्ताहे द्विवारं प्रक्लृप्तः ॥ १५ ॥

कथमपि विगतोऽभून्माः स सैतम्बरोऽपि
व्यतिगतमिदमीयं त्रैंशदाहं स दाहम् ।
इह दिवसरजन्यौ दीर्घदीर्घे मिथो मां
व्यथयितुमिह मन्ये स्पर्धमाने अभूताम् ॥ १६ ॥

कतिपयपुरुषै र्मे वेदितं 'शेषकाले
किल न कलयिताहं राजनीतौ तु भागम्' ।
इति भवति वचोगाऽपि प्रतिज्ञा तदा ते
प्रभवति कमलायास्तूपचारेऽधिकारः ॥ १७ ॥

ध्रुवमिह समये सा राजनीतिर्दविष्ठा
वहिरुपगतवान् यद् दुर्दशामभ्यपश्यम् ।
मम मनसि जुगुप्सा तां प्रति प्रोदिताऽभू-
त्परमिह न समाश्वासः स मे कल्पनीयः ॥ १८ ॥

इह हि निजवचोभिः कर्मभिर्वा सुहृद्भिः
सममथ च निजेनाप्यस्ति विश्वासघातः ।
परिणतिरिह या स्यात्सम्भवत्येव सापि,
क्वचन न पणबन्धः प्राणबन्धेऽपि युक्तः ॥ १९ ॥

अयमिह निजसत्त्वे तस्य मूले प्रहारः
पदहतिरियमासीद्वै पवित्रेषु तेषु ।
विकृतिमुपगतेयं मत्प्रियाया अवस्था
मयि सविधगते स्यात्संस्कृता सेति सत्यम् ॥ २० ॥

भयमिदमभवन्मे यत्किमप्यस्ति लब्धं
वपुषि कमलया मे स्वास्थ्यमत्रोपचारैः।
तदिह मुहुरमुष्मिन् बन्दिभावे मदीये
श्रवणविषयमाप्ते संशये पातितं स्यात् ॥ ७ ॥

अहह, तदभवद्वै कानिचिच्चाप्यहानि
प्रतिदिनममिलन्मां द्राक्तरात्स्वास्थ्यवृत्तम्।
इदमपि परितो मामागतं वै भ्रमित्वा
ऽधिकृतपुरुषक्लृप्तात्यन्तसंक्षिप्तरूपम् ॥ ८ ॥

न वयमधिकृताः स्मो द्राक्तरैर्दूरभाषे-
ऽभिलपितुमिह च साक्षात्कर्मकृच्चापि तत्र ।
द्विमुनिदिवसकालं वृत्तमेतत्कथञ्चि-
त्समधिगतमथेदं रुद्धयतेऽस्वस्थतायाम् ॥ ९ ॥

दिवसविनिगमो मे दुष्करोऽभूत्तदानी-
मिदमिह कटुवृत्तं वृत्तमन्यच्च वेत्तुम्।
श्रवणपुटसहायं मानसं मे समुत्कं
कथमपि न शमं यत्प्राप्तवद् व्याकुलं तत् ॥ १० ॥

अतिशयभयपूर्णा याति रात्रिस्ततोऽपि
गतिरिव समयस्याभाति रुद्धाथ मन्दा।
भयभरभरितेवालस्यघोरास्त होरा
ऽनुभवविषय आसीन्नेदृशोद्वेगकालः ॥ ११ ॥

मम मनसि तदासीन्मुम्मयी भाविनीहा
वसितिमुपगते काङ्ग्रेससम्मेलनेऽस्मिन्।
अहमधिगतमुक्तिः स्यामितो मासयुग्मा-
त्परमयमपि कालोऽनन्तवन्मेस्म भाति ॥ १२ ॥

अधिकृतपुरुषो मामेकमासान्तरेणा-
नयत स कमलाया हन्त ! सन्दर्शनार्थम्।
अकथयदथ सप्ताहे द्विवारं व्यवस्था-
पितमिह युवयोः सम्भाषणं दर्शनञ्च ॥ १३ ॥

अहनि बत चतुर्थे पञ्चमे नापि षष्ठे
करण शरणमाप्तो न प्रतीक्षानिमग्नः ।
अहह ! दिवस एवं सप्तमोऽपि व्यतीतो
भृशमवशतयाऽऽसं तत्प्रतीक्षातुरोऽहम् ॥ १४ ॥

श्रुतिपुटमविशन्मे दुःसहं वृत्तमेतद्
यदतिशयितमस्या वर्ततेऽद्यातुरत्वम् ।
उपहसितिरभान्मे दर्शनाभाषणादेः
स च विधिरिह सप्ताहे द्विवारं प्रक्लृप्तः ॥ १५ ॥

कथमपि विगतोऽभून्माः स सैतम्बरोऽपि
व्यतिगतमिदमीयं त्रैंशदाहं स दाहम् ।
इह दिवसरजन्यौ दीर्घदीर्घे मिथो मां
व्यथयितुमिह मन्ये स्पर्धमाने अभूताम् ॥ १६ ॥

कतिपयपुरुषै में वेदितं 'शेषकाले
किल न कलयिताहं राजनीतौ तु भागम्' ।
इति भवति वचोगाऽपि प्रतिज्ञा तदा ते
प्रभवति कमलायास्तूपचारेऽधिकारः ॥ १७ ॥

ध्रुवमिह समये सा राजनीतिर्दविष्ठा
वहिरुपगतवान् यद् दुर्दशामभ्यपश्यम् ।
मम मनसि जुगुप्सा तां प्रति प्रोदिताऽभू-
त्परमिह न समाश्वासः स मे कल्पनीयः ॥ १८ ॥

इह हि निजवचोभिः कर्मभिर्वा सुहृद्भिः
सममथ च निजेनाप्यस्ति विश्वासघातः ।
परिणतिरिह या स्यात्सम्भवत्येव सापि,
क्वचन न पणबन्धः प्राणबन्धेऽपि युक्तः ॥ १९ ॥

अयमिह निजसत्त्वे तस्य मूले प्रहारः
पदहतिरियमासीद्वै पवित्रेषु तेषु ।
विकृतिमुपगतेयं मत्प्रियाया अवस्था
मयि सविधगते स्यात्संस्कृता सेति सत्यम् ॥ २० ॥

परमयमिह दम्भोऽहङ्कृतिश्चेयमन्त-
र्ममकिमु कमलाया जीवनाच्छ्लाघनीया ।
इयमतिमहती मे काचिदासीत्समस्या
परमिह विधियोगात्तत्तथा नोपजातम् ॥ २१ ॥

अहमविदमिहास्यै मे समाश्वास ईदृक्
कथमपि न हि रोचेताहृता स्यात्तथेयम् ।
ध्रुवमिह पणबन्धे स्वीकृते स्वास्थ्यमस्या
विकृतिमुपगतं स्यादप्युपात्तोपचारम् ॥ २२ ॥

पुनरहमुपनीतो द्रष्टुमार्तां प्रियां मे
ध्रुवमियमिह संज्ञाहीनभावे स्थिताऽभूत् ।
ज्वरमतिशयतीव्रं वीक्ष्य दूनं तु सा मा-
मधिकसविधमैच्छत्प्राप्तुमाश्वासमेकम् ॥ २३ ॥

परमिह मयि कारागारमेवैतुमुत्के
श्रवसि किमपि वक्तुं सेङ्गितेनाह्वयन्माम् ।
अथ सविधमुपेतं शङ्किता साहसाङ्क-
स्मित सहितमवादीन्—'मास्तु मुक्तिः पणेन' ॥२४॥

अहमिह बहिरासं केवलैकादशाहं
निरणयमथ नेयान्यत्र सुस्था सतीयम् ।
अवसरमिममासञ्च प्रतीच्छन् परं सा-
ऽनुदिनमपचयेनात्यन्तदौर्बल्यमार्च्छत् ॥ २५ ॥

अनुचितमिदमाभात्तत्प्रतीक्षाऽऽसनं नो
निरचिनुम भुवालीपर्वतं नेतुमेताम् ।
अथ गमनदिनात् प्राक् द्रष्टुमेनां गतोऽहं
व्यमृशमियमहो मे स्यात्कदा दर्शनीया ॥ २६ ॥

अहह ! नु पुनरेषा दर्शनीया मयेति
व्यथित इव तदासं किन्तु साऽऽसीत्प्रसन्ना ।
इह दिवसविशेषे स्वस्थरूपां निरूप्य
प्रमुदमहमवापं काञ्चिदाख्यानबाह्याम् ॥ २७ ॥

त्रिमुनिदिवसकालानन्तरं चास्मि नैन्याः
प्रहित इह तदासं बन्दिभूतोऽलमोडाम् ।
पुरुषसहकृतोऽहं नीतवांस्तत्र होराः
कतिचन किल मध्येमार्गमायां भुबाल्याम् ।। २८ ।।

अवगतकमलाङ्गस्वस्थभावः प्रसादं
कमपि मनसि धृत्वा चात्र पाथेयकल्पम् ।
अनुमतिमधिगम्य प्रस्थितः पर्वतानां
ततिभिरतिविनोदं दीयमानं प्रपन्नः ।। २९ ।।

पुनरुपगमतोऽहं पर्वतेषु प्रहृष्यन्
भ्रमिमति पथि यान्त्यां मृत्तरौ तीव्रगत्या ।
हिमपवनमनोज्ञे वै प्रभाते प्रकृत्या
क्रमविशदितकान्त्या प्राप्तवान् मोदपारम् ।। ३० ।।

गिरिततिमधिरोहन्नासमेषोऽत्र चोप-
र्युपरि न तु गभीरोपत्यका यान्त्यधस्तात् ।
गिरिवरशिखराल्यो लज्जमानाङ्गनाव-
ज्जलदपटलमध्ये स्वञ्च गोपाययन्ति ।। ३१ ।।

हरितिमनि च रागानेकतां लम्भमाने
गिरिततिरपि दृष्टा देवदारूपगूढा ।
क्वचन सरणिचक्रे पारिते पर्वतानां
ततिरतिविनताऽऽसीत्क्वापि चोपत्यकानाम् ।। ३२ ।।

अथ गहनगभीरेऽत्रावकाशे च लघ्वी
कलकलनिनदेन प्रोद्यदुत्सा सरिच्च ।
इदमखिलमपीत्थं पश्यतो दृश्यमारा-
न्न मम मनसि तृप्तिं कर्तुमीशे स्म काञ्चित् ।। ३३ ।।

स्मृतिमयमथ पात्रं तेन सम्पूरयेय-
मिति मनसि ममाभूद्येन मिथ्याक्षणेषु ।
इदमहमिह पायं पायमेकान्तरम्यं
कमपि सहजमोदं कल्पनाभिः श्रयेय ।। ३४ ।।

गिरितलमधिवासाः केऽपि कूटाः कुटीनां
विदधति परितस्तान् वेष्टितान् क्षेत्रभागाः ।
क्वचिदपि नतिमीषद् वीक्ष्य घोरश्रमेण
गिरिकृषकगणास्तां क्षेत्रतां प्रापयन्ति ॥ ३५ ॥

क्वचन बत गवाक्षाः क्वापि रम्या वलभ्यः
क्वचन च परिदृष्टा भान्ति सोपानमार्गाः ।
अहह ! गिरितलेभ्यो नूनमारुह्य शृङ्गा-
वधि सरलमुदारं श्रेणिबन्धं सृजन्ति ॥ ३६ ॥

विततवसतिहेतोरीषदन्नोपलब्ध्यै
प्रकृतिनवनिधानाद् घोर एव श्रमोऽयम् ।
अनवरतमुपास्या किन्तु तेनापि चैषां
भवति नु किमपेक्षापूर्तिरित्यस्ति चिन्त्यम् ॥ ३७ ॥

अनुकृतवलभीनां क्षेत्रकाणां तु हेतो-
रिह गिरिषु वसत्या जायते वोध एषः ।
वनवृतनतभूमिः क्षेत्रशून्या विचित्रा
किमपि किमपि भाति स्पष्टमेषां पुरस्तात् ॥ ३८ ॥

दिवससुभगमुच्चैरुन्नताकाशमार्गं
व्रजति दिनकरेऽस्मिन्नूष्मणा वर्धितेन ।
किमपि नवमिवाभात्यद्रिगं जीवनं त-
द्यदवति न विचित्रं मित्रमस्माकमेकम् ॥ ३९ ॥

इह दिनविगमे तद्रूपमत्यन्तमात्रं
विपरिणतिमुपेतं किञ्चिदन्यत्वमेति ।
लघु लघु पदपातै रात्रिरागत्य विश्वं
वहति निजसदङ्के यत्र काले लसन्ती ॥ ४० ॥

प्रकृतिमथ विहायोच्छृङ्खलामात्मतन्त्रां
मृगयति निजमार्गं जीवनं रक्षितुं स्वम् ।
गिरिततिरचिदेषा शीतलाथो गभीरा
खगविधुनवधाम्न्याकारहीना स्म भाति ॥ ४१ ॥

अपि च पवनराव: श्रूयते घाटिकान्त-
भंयजनकरहस्याऽऽपूरिते पर्वतौघे।
इह पथिकबराकैश्चैकलो वेपतेऽय
न्मनुभवति च शक्तीरात्मसङ्गे विरुद्धाः ।। ४२ ।।

उपहसति च वायो: सन् सनत्कार आरा
द्विलसति तदुपेक्षां दर्शयन् भाति चायम्।
क्वचन तदनु क्लृप्तो हन्त निःश्वासबन्धो
ध्वनिरहिततया सम्पूर्णशान्तिर्विभाति ।। ४३ ।।

परमियमिदमीया चण्डतास्मिन् सदैवा
प्यनिकटहलतारा एव मन्दं ध्वनन्ति।
चमदकृषत ताराश्चाप्यदूरे विभान्त्यो
गिरिततिरपि नीचै र्वीक्षते सा गभीरा ।। ४४ ।।

किमपि ननु रहस्यं त्रासदं धूर्णतेऽद्धा
विमृशति पुरुषो वै पास्कलो वाऽतिमात्रम्।
'अहममितनभस्तोऽनन्तशान्तेर्विभेमी
ति न भवति निशाद्धा चातिशून्या स्थलेषु ।।४५ ।।

श्रुतिपथमुपयाति प्राणकम्पस्तदापि-
प्रविदलति च शब्दः प्राणिनां नीरवत्वम्।
इति गिरिषु निशायाश्चापि तस्या: स्थलेषु
स्थितिमतिशयभिन्नां चिन्तयामि स्म तत्र ।। ४६ ।।

परमहमलमोडां मृत्तरारूढ आगा-
मभिनवरजनी सा दूर आसीत्सुशीता।
अतिनिकटमथागादन्त एवाभियाते-
रुपनयति हि यत्नोऽप्राप्तभावस्य लब्धिम् ।। ४७ ।।

सरणिवलयपारे वारिदानां निरासे
मम किमपि नवीनं दृश्यमागाद् दृगग्रम्।
मुदितचकित आसं तद्विलोक्यातिमात्रं
वनवृतगिरिश्रृङ्गेषूर्ध्वभागाग्रजाग्रत् ।। ४८ ।।

हिमगिरिशिखराणि द्योतमानान्यभूवन्
गहनहिमवृतानि स्युर्यथा राजतानि ।
मतिविभवमतीतं बिभ्रदाभाति शान्ते-
र्भरतभुवि विशालक्षेत्रगो यामिकोऽयम् ॥ ४९ ॥

मनसि शम इवैको दर्शनादेव तेषा
मुदयति, पुनरेषां नित्यताया: पुरस्तात् ।
जनपदनगराणां तेऽतितुच्छाः प्रपञ्चा
विलयमिव गताः स्युर्द्वेषसङ्घर्षशीलाः ॥ ५० ॥

अवनतभुवि सृष्टो वन्दिगेहोऽलमोढा-
स्थित इह च निवासोऽभून्ममैकप्रभागे ।
सुमहदिह न पक्वं कुट्टिमे चोच्चनम्रं
घुणविगुणितपृष्ठं निश्चितं मे प्रकोष्ठम् ॥ ५१ ॥

अविरतपतदंशं साङ्ख्यतत्त्वोन्मितैस्त-
द्वृतमलघुगवाक्षैस्तैः शलाकोपक्लृप्तैः ।
इदमकृतकपाटं नूनमन्यूनवातं
हिममहिमनिवीतं नारिकेलैः कटांशैः ॥ ५२ ॥

इह सुमहति हर्म्ये देहरादूनकारा
गृहभवनमहिष्ठे किञ्चिदेकान्तसेव्यम् ।
विभवमहमभुञ्जे, 'मिष्टमेको न भुञ्ज्याद्'
इति लघुचटकाभिस्तच्छविस्थाभिरास्यम् ॥ ५३ ॥

भ्रमितजलदखण्डं नैकवातायनेभ्यः
प्रविशति मम मित्रं दर्शनोत्कं यथा सत् ।
चिरविरहसमुत्थैर्हन्त वाष्पैः प्रकोष्ठं
तदुपनयति सर्वं सर्वतोऽप्यार्द्रभावम् ॥ ५४ ॥

अनुदिनमिह सायं चान्तिमाद् भोजनान्मा-
मुदितमरुणदस्मिन् पञ्चहोरावसाने ।
उषसि पुनरमुञ्चत्सप्तहोरात्मकालेऽ
ह्नि बहिरथवान्तः सेव्यते स्मातपोऽत्र ॥ ५५ ॥

मम च सदनतोऽस्माद्वै चतुर्भित्तिरूपाद्
दृगयनमगमत्तन्नातिदूरेऽद्रिशृङ्गम् ।
शिरसि विततमासीन्नीलमेकं वितानं
गगनमयमनन्तं वारिदैश्छाद्यमानम् ॥ ५६ ॥

अहह, दधति रूपं वारिदाश्चित्रचित्रं
यदहमहनि दर्शं दर्शमश्रान्त एव ।
क्वचन विविधजन्त्वाकारमेषु प्रक्लृप्तं
क्वचन जलधयस्ते भान्ति चात्युच्छलन्तः ॥ ५७ ॥

क्वचन जलधिकूलाद्देवदार्वन्तरीत
पवनकृतरवो मेऽभाद् ध्वनिस्तत्समुत्थः ।
क्वचन च जलदः कोऽप्याभिमुख्येन सर्पन्
नयनपथमगान्मे साहसी वीरकल्पः ॥ ५८ ॥

घननिबिड इवासौ प्रत्यभात्पार्श्वमायन्
स च निकटगतोऽभूद्धन्त नीहारमात्रम् ।
विरलमृदुलवासोवच्च सोऽवेष्टयत्त
त्वभवदतिविशालं तत्प्रकोष्ठं प्रियम्मे ॥ ५९ ॥

भवति न लघुकोष्ठयामीदृगेकाकिभावः
परमिह परितोऽहं वर्षणेऽपि भ्रमामि ।
उपचितहिमकाले वर्धितं त्वौन्मनस्यं,
भृशमुपचयभाजि प्रेम मे क्षीणमस्मिन् ॥ ६० ॥

अभिनवपवने मे सावकाशे प्रदेशे
निवसनरुचिरप्यागाच्च शैथिल्यमेव ।
भृशमहगमञ्चानन्दमन्तर्यदाब्दे
नव उपगतमात्रेऽपप्तदत्यन्तहैमम् ॥ ६१ ॥

हिमविततिषु वातावर्तनं नीरसं त-
न्नयधित सरसभावं हन्त कारागृहस्य ।
बहिरथ गृहभित्तेर्देवदार्वङ्घ्रिपास्ते
हिमपरिवृतगात्रा लोभनीया अभूवन् ॥ ६२ ॥

मनसि तु कमलायाः स्वास्थ्यगाभ्यामुभाभ्या-
मपचयनिचयाभ्यां कापि चिन्ता ममाभूत् ।
अपचयकथयाहं सत्यतः खेदमापं
गिरिसततगतिर्मां स्वस्थशान्तं त्वकार्षीत् ॥ ६३ ॥

पुनरपि गहनायामस्वपं निद्रिकायां
व्यमृश महच्च माद्यन्दोलया खेलितोऽहम् ।
ध्रुवमियमपि निद्रा किञ्चिदाश्चर्यमास्ते
किमपि भुवि रहस्यं वर्तते नूनमेषा ॥ ६४ ॥

कथमिव मनुजोऽस्या उत्थितः स्यात्कदाचित्-
त्क्वचिदहमपि तस्या जागृयां कस्य हेतोः ।
स्मृतिहरणपटुत्वे सर्वसौख्यप्रदत्वे
सति जयति हि निद्रा सर्वदुःखापहत्वे ॥ ६५ ॥

अवसितिमगमत्तन्मुम्मयीकाङ्क्षरेसम्,
समुदयदथ मुक्तेः काचिदाशा मदन्तः ।
नवम इति च मासोऽभ्येत्य यातस्तदानीं
चयनमपि समाप्तं संसदः प्राप्तकालम् ॥ ६६ ॥

अथ झटिति निबन्धान्मोचितः स्याममुष्मा
दिति मनसि ममाशा काप्यभूत्सावकाशा ।
परमबदुलगफ्फार्-खानवन्धस्तदानीं
भरतभुवि सुभाषे चागते शासनाज्ञा ॥ ६७ ॥

विगतमनुजभावा निर्विचारा च याऽऽसी-
त्प्रणय परिगतायाशेषदेशाय चास्मै ।
सहि निजरुजमत्रोपेक्ष्य तातं मुमूर्षुं
सकृदपि सहसागाद् द्रष्टुमाप्नोन्न चेमम् ॥ ६८ ॥

प्रभुजनमनसश्चेद् वृत्तिरेषास्ति तर्हि
स्वविषयकदुराशा वर्जनीया मयेयम् ।
इति मम च विचारो वक्तृतायां प्रभूणा-
मतिविशदतयाऽभूत्सर्वथा व्यक्तभावः ॥ ६९ ॥

पुनरहमलमोडाबन्दिगेहाच्च मासा
न्नयनविषयतां तां स्वप्रियां नेतुमागाम् ।
त्रिमुनि दिवसकालानन्तरं दृष्टवांस्तामथ
सदयनिदेशान्मन्त्रिणो भारतस्य ।। ७० ।।

सहि मुहुरदिशत्सर् सेम्युअल् होरनामा
मिलतु मुनिदिनौघे द्विस्त्रिरेष प्रियां स्वाम् ।
परमिदमृतपार्श्वे चाभविष्यत्स मासे
यदि सकृदथवा द्विर्द्रष्टुमादेक्ष्यदेनाम् ।। ७१ ।।

व्यतिगत गुणमासेष्वर्धयुक्तेषु पञ्चा-
वसरमहमविन्दं द्रष्टुमेत्यालमोडाम् ।
न खलु पिशुनतेयं वेद्म्यहं सर्वकारो
मयि सहितविचारः सर्वदातिष्ठदत्र ।। ७२ ।।

सम किल कमलाया दर्शनार्थं च दत्ता
इह खलु सुविधा याः सन्त्यसाधारणास्ताः ।
अहमधिककृतज्ञस्तस्यवर्ते हृदन्त
र्मिलनमिदमभून्नो नूनमत्यन्तमूल्यम् ।। ७३ ।।

मिलनदिवस आसीद् द्रावतरैर्यामिकत्वं
शिथिलितमथ कालो नौ च भूयान् प्रदत्तः ।
इदमनुवशमावां सन्निधानं समे तौ
विरहसमय आसीद् दुःसहो नावथायम् ।। ७४ ।।

यहह विरहहेतौरेव नौ सम्प्रयोगो
ऽभवदिति सरुजाहं चेतसा चिन्तयामि ।
भवति भवति नूनं विप्रयोगे कदाचि
त्क्व चिदपि भविता नावन्तिमो विप्रयोगः ।। ७५ ।।

न च रुजमतियाताऽऽसीन्मदीयापि माता
तदिति नवचिकित्सार्थं गता मुम्मयीं सा ।
प्रभवदिव च तत्र स्वास्थ्यमाभाति तस्याः
परमिदमिह वृत्तं येन क्लृप्तं मनो मे ।। ७६ ।।

उषसि दिवस एकस्मिन्नकस्मात्तु तारं
समदिशदियमाप्ता पक्षघातं किलेति।
इदमुपनतमुग्रं कल्पनातीतमीदृक्
तदिह मम दुराशा मृम्मयीं गन्तुमासीत् ॥ ७७ ॥

अनुगतविधियोगान्मातरि स्वस्थितायां
प्रभुरनुमतिदाने तत्र जातोऽनुदारः।
पदमथ जनवर्याः पत्रपातोत्सुकायाः
सपदि फरवरी सा नूत्नतद्वाऽग्रहीत्तत् ॥ ७८ ॥

पत्रनवलयरूपं तद्वसन्तागमं नः
समदिशदिह नानागुञ्जनाकूजनाढ्यम्।
बुलबुल चटकानां भृङ्गपुंस्कोकिलानां
कलरवमधिगत्येवाङ्कुराण्युद्गतानि ॥ ७९ ॥

दृशमथ च जगत्यां न्यक्षिपंस्तेऽद्भुतायां
सततविकसितायां रक्तहस्तप्रसूनैः।
बदरकुसुमवर्गः शान्तिपूर्वं तदानीं
पवनवलयमुक्तः सन्निव ध्यायति स्म ॥ ८० ॥

दिवसविगककाले हन्त संख्यामि तेषां
पुनरपि च भुवाली प्रस्थितिं चिन्तयामि।
उपहृतय उदारा हन्त लभ्यन्त एता
ध्रुवमदयनिराशा विप्रयोगावसाने ॥ ८१ ॥

इति सुवचनमास्ते वेद्यथार्थं कियत्त-
च्चकितचकित एतच्चापि पृच्छामि चित्तम्।
यदि च न तदवस्थास्ता भवेयुस्तदासां
समुचितमिह मूल्यं नाङ्कितं स्याज्जनेन ॥ ८२ ॥

अभिलषति विचारस्पष्टता कष्टपातं
परमतिशय एषामावृणोत्येव बुद्धिम्।
समुदयमिह काराप्यात्मदृष्टेस्तनोति
ध्रुवमहमिममाप्तुं कारया प्रेरितोऽस्मि ॥ ८३ ॥

न मम सहजमन्तर्दर्शनस्यानुकूलं,
परमिदमिह काराजीवनं मे व्यधत्त।
प्रबलकपिकचूर्णं शुद्धभल्लातसत्त्वं
नयति सपदि कारा चात्मदृष्टिं प्रति स्वम् ॥ ८४ ॥

क्वचन खलु विनोदान्मेकडूनल्डशाहं
स्वयमिह बहिरन्तर्वृत्ति वर्गं परीक्षे।
भवति च चकितं मे चित्तमन्योन्यमेता
विनिमयमुपयान्ति प्रद्रुता नैकवारम् ॥ ८५ ॥

प्रवचन कलया यो द्वारशऽब्दे स्फुर्यंत्या
ऽहमदपुर निवासान् सज्जनां नारराधे।

इह वयसि ससप्तो सप्ततौ तेन काव्ये
मृदुनि विरचितेः षट्षष्ट सर्गोऽतिकष्टः।

कतिपयः सद्योजाता घटनाः

वसन्ततिलका

सप्तषष्टितमः सर्गः

याता निशा समुदितं भुवि सुप्रभातं
नायान्ति हन्त विगतानि पुनर्दिनानि।
आशासिता नयनयोरमिता, मनस्तु
वासन्तिकी स्मृतिरियं विकलीकरोति ॥ १ ॥

मह्यं प्रदत्तमिह नूतनवृत्तपत्रं
व्यज्ञापयत्तदधिवेशन कार्यं जातम्।
काङ्ग्रेसमग्रसरमीदृशसंसदां नो
मुम्बापुरीतिनगरे समयूयुजंस्तत् ॥ २ ॥

तस्यास्य राजनयकार्यकरेषु काचि-
दासीद्रुचिर्मम यथासहजात्मिकैव।
जातश्च विंशतिशरद्गहनाभिषङ्गा
त्तेनैव कश्चन दृढः पुनरेष बन्धः ॥ ३ ॥

तत्रोत्तरप्रदपदाधिकृतिप्रभृत्या-
बन्धादपि प्रबलबन्धनमस्ति दृश्यम्।
यत्संस्थयालमनया सह वृद्धिमत्या
सार्थैश्च तैः शतशतैः सह बद्धवन्माम् ॥ ४ ॥

इत्थङ्गतेऽपि मम चेतसि काचनापि
स्फूर्तिर्न सञ्चरति तादृशकार्यबाह्या।
सत्स्वप्यहो मम महत्सु विनिर्णयेषु
भाताधिवेशनगतिः किल नीरसैव ॥ ५ ॥

यत्राभवन्ममरुचिर्विषयेषु तस्मि-
न्काचिद्विचारकणिकाप्यभवन्न तेषु।
तस्मादचिन्तयमहं ह्यभविष्यमस्मिन्
किं वाऽकरिष्यमिह तावदुपेयसिद्ध्यै ॥ ६ ॥

नूनं न किञ्चिदविदं न च वक्तुमार्हं
का वाऽभविष्यदिह मे स्थितिषु प्रवृत्तिः ।
अन्ते व्यचारयमहो किमहं विचारै
र्मस्तिष्कमाकुलितवानधिकारशून्यः ॥ ७ ॥

यस्मै कठोरतमनिर्णयकर्मणेऽहं
क्लिश्यामि सम्प्रति भवेन्मम तेन कोऽर्थः ।
कालः प्रतीक्ष्य इह मे पुनरीदृशो वै
याते जले भवति किं खलु सेतुबन्धैः ॥ ८ ॥

यत्राधुनातनसमस्तसमस्यया मे
स्यात्प्रातिमुख्यमथ मत्पथनिर्णयः स्यात् ।
तस्याश्च निर्णयविधानमतिप्रमादः
स्यान्नूतना स्थितिरिहापतिते च कार्ये ॥ ९ ॥

ऐकान्तिकेऽप्यथ दवीयसि शृङ्गिवासे
यद् बुद्धवांस्तदिह तस्य विशिष्टते द्वे ।
व्यक्तित्वमेकमिह गान्धिमहात्मनोऽस्ति
श्रीमालवीयविहिता च विरोधदृष्टिः ॥ १० ॥

श्रीमानणेसहकृतः किल मालवीयो-
ऽभूत्साम्प्रदायिकदलैकविरोधनेता ।
गान्धिः किलाखिलदिगादिदिगन्तने ते
तेत्याश्चर्यकृन्न खलु भारतहृद्विदां नः ॥ ११ ॥

शिष्टेरधीक्षकगणा धृतरूढिवादा
स्ते राजनीतिनिपुणाश्च विचारयन्ति ।
स्वेच्छानुगामि विमृशन्ति च कल्पयन्ति
गान्धीयुगं नृपनयावनितो व्यतीतम् ॥ १२ ॥

क्षीणः प्रभाव इह तस्य किलातिमात्र
मित्यास्थिताः सपदि विस्मयमावहन्ति ।
श्रीगान्धिनि प्रविशति स्वबलप्रभावा-
त्कार्याङ्गणं पुनरिमे मृगयन्ति हेतुम् ॥ १३ ॥

कांग्रेस-देश-जनता-प्रभुतास्ति गान्धा
वस्योररीकृतविचारपरम्पराभिः ।
तादृङ्न्न यादृगिह तस्य किलाद्वितीय-
व्यक्तित्वहेतुभिरिति स्फुटमस्ति सत्यम् ॥ १४ ॥

सर्वत्र तत्प्रभवति ध्रुवमत्र देशे
तस्य प्रभावपरिपाकगुणः प्रसिद्धः ।
कांग्रेसतोऽस्य च पृथक्त्वमिदं महत्त्व-
पूर्णैव कापि घटना समभूत्तदानीम् ॥ १५ ॥

सामान्यतः स्म परिभाति यदत्र कश्चि-
त्कांग्रेसदेशयतनाभिधयैतिहासे ।
अध्याय एष सुमहान्विगतः समाप्तिं
किन्त्वत्र तादृगभवन्न महत्त्वपूर्णम् ॥ १६ ।

वाञ्छन्नपीह नहि नेतृपदाद्विमुक्तिं
गान्धिः किलाप्तुमलमस्ति विभुत्वयुक्तात् ।
तस्य स्थितिः पुनरियं न पदाधिकारा-
त्प्रत्यक्षतोऽपरविधादभवन्न बन्धात् ॥ १७ ॥

कांग्रेसमत्र दिवसेऽपि पुरेव तस्य
प्रायः प्रकाशयति कश्चन दृष्टिकोणः ।
चेद् भ्रश्यते स्वपथतोऽथ किमप्यजानद्
गान्धिः स्वदेशमसुकं प्रभवेद्विनेतुम् ॥ १८ ॥

भारात्तथोत्तरतरप्रदताधिकारा
दस्मात्पृथग्भवितुमर्हति नैव गान्धिः ।
देशस्थितौ निमिषतः किल तस्य किंचिद्
व्यक्तित्वमेव हठतो नयतेऽवधानम् ॥ १९ ॥

इत्थं कदाचिदपि गान्धिमहोदयं तं
देशे न कस्यचिदुपेक्षितुमस्ति शक्तिः ।
काले किलात्र पृथगस्ति स यन्मदीय-
सम्बन्धतः पततु तन्न किलात्र कष्टे ॥ २० ॥

मन्ये स चिन्तयति साम्प्रतमात्मचित्ते
सत्याग्रहः परिणमेत्कलहे न शिष्ट्या ।
तं व्यक्तिगामिनमयं प्रविधाय तेन
काङ्ग्रेसमिच्छति कथञ्चन नानुबन्द्धम् ॥ २१ ॥

हृष्यामि यत्तदुररीकृतमस्ति देशे
निश्चेतुमाशु च विधानसभाविधानम् ।
मन्ये स्थिताविह समाहितयेऽस्ति नान्यः
पन्थाः कदाचिदिह सा विवशैर्विधेया ॥ २२ ॥

पश्यामि यद् ब्रिटिशशिष्ट्यनुमत्यभावे
तन्नास्ति शक्यमिह चेत्क्रमते न काचित् ।
क्रान्तिः, किलाद्यतनसंस्थितिषु प्रशिष्टे
र्नैतादृशीमनुमतिं क्वचनाप्तुमर्हम् ॥ २३ ॥

यावद्बलात्क्रमितुमेति बलं न देशे
तावन्न धास्यति विधानसभा स्वरूपम् ।
तावच्च नैष्यति समाहितिमत्र कश्चि-
त्प्रश्नो हि राजनयिको लघुकोऽपि नूनम् ॥ २४ ॥

काङ्ग्रेसनेतृभिरयं च विधानसंस
त्क्लृप्तेर्विचार उररीक्रियतेऽद्य कैश्चित् ।
किन्तूग्रतामपहरद्भिरिदं पुराणं सम्मे-
लनं विरचितं धृतसर्वपक्षम् ॥ २५ ॥

कार्यक्रमोऽयमखिलः किल सर्वथैव
व्यर्थो भविष्यति, जनाः खलु ते पुराणाः ।
निर्वाचिता अपि मिथोऽमिलिता भवेयु-
स्तेषां भवेच्च मतभेदफलः प्रयत्नः ॥ २६ ॥

आस्ते विधानसभया खलु सर्वलोक-
निर्वाचनेन कृतया ततयाऽस्मदर्थः ।
सा प्राप्नुयाज्जनतया विहिते तु शक्ति
स्फूर्तौ, भवेद्धि सफला किल सैव कार्ये ॥ २७ ॥

काङ्ग्रेसमीदृशगतावपि चाङ्क्षनीयं
प्राप्नोज्जयं मम महानभवच्च हर्षः ।
भूयांस एव समराङ्गणतोऽपसर्तुं
वैवश्यमापुरिह नूनमवाञ्छनीयाः ॥ ३५ ॥

काङ्ग्रेसराष्ट्रियदलस्य च नामधर्तुः
खेदाय मे समभवत्किल सा प्रवृत्तिः ।
यत्साम्प्रदायिकविनिर्णयदुर्विरोधी
सत्साम्प्रदायिकदलाश्रयतो जयेच्छुः ॥ ३६ ॥

यावत्सनातनिदलेन सहाप्यनेन
योगः कृतः स्वविजयं प्रति लोलुपेन ।
यस्मात्परं नृपतिनीतिसमाजदृष्टचा
देशेऽत्र नास्ति सपदि प्रतिगामि तीव्रम् ॥ ३७ ॥

अन्यैः सहापि बहुभिः प्रतिगामिभिस्तै
स्तै राजनैतिकदलैः सहयोगमास्थात् ।
वङ्गेषु कारणविशेषवशाच्च तस्य
काङ्ग्रेसमेकमपि तत्सहयोगि जातम् ॥ ३८ ॥

अन्यत्र नूनमिह ये मिलिताः समे ते
काङ्ग्रेसकं प्रति विरोधविशेषभाजः ।
ते भूमिपा, मृदुदलाः किल शासनस्या-
ध्यक्षादयः प्रबलशक्तियुताः समेताः ॥ ३९ ॥

काङ्ग्रेसकेसरिणि गर्जति किन्तु सर्वे
गोमायवः क्वचन लीनरवा अवास्थुः ।
तत्सार्थिनश्च विजयं सुमहान्तमापुः
को नाम नो विजयते महदाश्रयेण ॥ ४० ॥

तं साम्प्रदायिकविनिर्णयमभ्यपूर्वं
काङ्ग्रेस दर्शनमभूद्यदवश्यभावात् ।
सा भूतकालिकतटस्थितिनीतिजाता-
ऽवार्याऽभवत्परिणतिः कृशनीतिजा वा ॥ ४१ ॥

आरम्भतः सुदृढनीतिसमाश्रयेण
तात्कालिकीं परिणतिं प्रति निर्भयं सत् ।
तस्याश्च निश्चयपुरस्सरपालनेन
काङ्ग्रेसमेतदगमिष्यदतिप्रतिष्ठाम् ॥ ४२ ॥

तन्नैच्छदेतदिह कर्तुमतः स पन्था
एवाभवद्यमिदमाश्रयदत्र नान्यम् ।
स्वीकर्तुमास्त तदशक्यतरं च नूनं
यत्साम्प्रदायिकविनिर्णयनं स्वनिष्टम् ॥ ४३ ॥

तस्मिन्हि तिष्ठति न सम्भवति स्म लब्धुं
स्वातन्त्र्यमत्र किमपीति निरूढमासीत् ।
नादायि मुस्लिमगणस्य विशिष्टभाग
इत्येष हेतुरिह तस्य न किं प्रदेश्यः ॥ ४४ ॥

एतेन निर्णयबलेन किल प्रशिष्टि-
र्देशं परस्परविभागशतैर्व्यभाङ्क्षीत् ।
अन्योन्यशक्तिहरणाय हि जिह्मचेताः
सुन्दोपसुन्दनयमेनमशिश्रियत्सा ॥ ४५ ॥

'रे शाधि शाधि सुचिरं विभजस्व लोक'
मित्येव नीतिरमुया किल शिक्षिताऽऽसीत् ।
एतद्बलादियमशेषबलोपरिस्था
जाता सभाश्रयविधेरनिवार्यपात्रम् ॥ ४६ ॥

वङ्गेषु यत्र लघुकोऽपि महत्त्वमेकं
यूरोपवासिनिवहो न्यवहद् विशेषात् ।
हिन्दुष्वथातिशयितोऽप्यनयः कुतोऽभूत्
कार्यो विरोध इह तस्य विनिर्णयस्य ॥ ४७ ॥

आरोपितोऽयमथ राजनयस्य हेतो-
रस्थायिभावसहनीयतयाऽत्र तिष्ठन् ।
अन्योन्यविग्रहणमूलतया तु शश्व-
द्देशेऽत्र पुष्यति पुरा फलतीह यावत् ॥ ४८ ॥

अत्यन्तदूषिततमत्वममुष्य कश्चि-
ज्ज्ञेयो गुणो न भुवि धास्यति स व्यवस्थाम् ।
अस्यात्र राष्ट्रियदलं च ततोऽपि हिन्दू-
संसच्च संघटनमन्यदधुर्विरोधम् ॥ ४९ ॥

आलोचनापि बत तस्य समर्थनेन
शिष्टैर्विचारसरणावतिनिर्भराऽऽसीत् ।
सैतान् विचित्रनयमार्गमिहानयच्च
भूयोऽपि नेष्यति भविष्यति चैतदिष्टम् ॥ ५० ॥

ते साम्प्रदायिकपरेतपराभवेन
मिथ्याशया ब्रिटिशशिष्टिमुपासतेऽत्र ।
यत्सा प्रसह्य परिवर्तयितार्थमस्या
स्मास्वेव कञ्चिदनुकूलमितीरयन्तः ॥ ५१ ॥

आशा च सा परमहत्तरलक्ष्यसिद्धा-
वावश्यकं दृढविरोधमपि ग्रसन्ती ।
हिन्दूसभां समनयत्किल तामिहाग्रे
या नाभिपश्यति परामवमाननां ताम् ॥ ५२ ॥

नैषा च सैव बत तादृशवर्तनेन
क्लिष्टाऽत्र निर्णयपरीतिरतीव सा स्यात् ।
किञ्चात्र मुस्लिमगणा भृशमुद्विजन्ते
दूराच्च दूरमपयान्ति हृदा परेभ्यः ॥ ५३ ॥

दुःशक्यमेव किल राष्ट्रियशक्तयस्ताः
स्वं पक्षमाश्रयितुमुत्सुकिता विधातुम् ।
शिष्टौ च तासु महदन्तरमस्ति चासु
सङ्घर्ष एष विशदोऽस्ति निजार्थजन्यः ॥ ५४ ॥

शिष्टया च दुःशकमिदं किल सम्प्रदाय-
वादिद्वयं समनुनेतुमिहोदितार्थे ।
एकस्तयात्र चयनीय इति स्वदृष्टया
सा मुस्लिमानचिनुतानुनयाय योग्यान् ॥ ५५ ॥

किं साऽङ्गुलीमुखगणेयमिदन्नु हिन्दु-
वृन्दं प्रसादयितुमुत्सृजतात्स्वनीतिम् ।
खिन्नांश्च मुस्लिमगणान् प्रविधाय तेभ्यो
लभ्यानि हन्त सुवहूनि मतानि जह्यात् ॥ ५६ ॥

हिन्दूगणा भृशमिहाग्रसराः समन्ताद्
दृष्ट्वा हि राजनयसङ्गतया भवन्ति ।
ते राष्ट्रियस्ववशताधिगमाय भूयः
शक्तिं प्रयुञ्जति विदन्ति न दोषमस्याः ॥ ५७ ॥

यत्साम्प्रदायिकरयायतलेशहेतो
स्ते राजनैतिकविरोधमिहाद्रियन्ते ।
तेनात्र काचिदपि सिद्धिरसम्भवैव,
बाधस्तु मुस्लिमजनव्यवहारतः स्यात् ॥ ५८ ॥

निर्वाचनन्त्वथ विशद्यकरोदिहासे-
म्बल्या उभे अपि किल प्रतिकारशीले ।
हिन्दूमहासमितिमुस्लिमलीगपक्षि-
सङ्घस्य चाखिलरहस्यमिह प्रकीर्णम् ॥ ५९ ॥

अभ्यर्थिनो यदुभये धरणीधरास्ते,
ते श्रीधराश्च परमा अभवंश्चिराय ।
सा व्याञ्जयन्निजविरोधमृणानुवद्धे
हिन्दूसभा किल विले परिदर्शयन्ती ॥ ६० ॥

हिन्दूसमाजगतनैकविधप्रमेय
लोकैः कृता खलु सभेयमिहाप्रमेयान् ।
हिन्दूगणान् प्रतिनिधिः प्रति नास्ति नूनं
यद्वद्दलं श्रमिचिकित्सकमुख्यक्लृप्तम् ॥ ६१ ॥

हिन्दूगणे कमपि तन्न दधे प्रभावं
निम्ने हि मध्यमदलेऽभ्युदितास्ति नीतिः ।
औद्योगिका अपि पृथग्व्यवहारमीयु-
र्नूत्नोद्यमार्धपतिवर्गहिते विरोधम् ॥ ६२ ॥

औद्योगिका विगतसाहसधैर्यलेशाः
शिष्टयां च राष्ट्रियदले च समानभावाः ।
ते साम्प्रदायिकदलेषु तथा श्रमिष्ठ-
वर्गेषु कञ्चिदवधानलवं न तेनुः ॥ ६३ ॥

औद्योगिकी प्रगतिरेव तथा तदुत्थो
लाभश्च केवलममुष्य दलस्य लक्ष्यम् ।
राष्ट्रेऽपि नास्ति हृदयं न च सम्प्रदाये,
धर्मेऽपि नास्ति च रतिर्न च तस्य जातौ ॥ ६४ ॥

निम्नेऽथ मध्यमदले किल मुस्लिमानां
जागर्तिरभ्युदयमेष्यति सा चिरेण ।
औद्योगिकेन खलु दृष्टिबलेन तेषां
पश्चात्पदत्वमधुनापि न गुप्तमस्ति ॥ ६५ ॥

इत्थं विदाम धरणीधरवर्ग एष
सेवानिवृत्तपदधारिगणश्च लोके ।
संस्था इमाः समधिकृत्य यथेष्टमेषां
जातावपि प्रतिदधाति निजं प्रभावम् ॥ ६६ ॥

शिष्टेरुपाधिमयिताः सचिवाश्च भूत-
पूर्वाः प्रकामधरणीपतयश्च यत्र ।
दृष्टिं प्रयान्ति मिलितास्तदिहास्ति नून-
मायोजनं जगति मुस्लिमलीगसंज्ञम् ॥ ६७ ॥

जाने च मुस्लिमजनेऽल्पसमाजवर्ति
स्वातन्त्र्यहेतुकमजागरणं स्वशक्तेः ।
हिन्दूगणे पुनरिदं न तथा, तथापि
वर्धिष्यते सपदि जागरितः स वेगात् ॥ ६८ ॥

अद्यास्ति शिक्षितजनः किल तस्य बुद्धया
कायेन चापि सुतरां नयचित्तिमुक्तः ।
अस्फूर्तिमान्निजपुरातननेतृवर्ग-
भावप्रतीपवचनोच्चरणेऽप्यनर्हः ॥ ६९ ॥

काङ्ग्रेसमद्य नृपनीतिदृशाऽखिलस्य
संस्थागणस्य भृशमग्रसरं विभाति ।
तन्नेतृकाश्च समयोचितनेतृताया
निर्वाहमद्य विदधत्यवधानपूर्वम् ॥ ७० ॥

वाञ्छन्ति लोकसहयोगमिमे परं तद्-
दु:खादिकं नहि विदन्ति, न तन्मतञ्च ।
निर्वाचनात् प्रथममाप्तुमिदंमतानि
सर्वेष्ट-कार्य-परिपाटिकयाऽचलंस्ते ॥ ७१ ॥

ते मन्दिरेषु लषितं जनताप्रवेशं
त्यक्त्वा विरोधिजनसङ्कुलितानुरोधाः ।
निर्वाचन यददधुर्भविता तदुग्रं
सोत्साहमेव च न चेन्मृदनोऽभविष्यन् ॥ ७२ ॥

तेनागमिष्यदुचितोऽवसरो जनानां
शिक्षाक्षणस्य बहुभेदनिवारणस्य ।
काङ्ग्रेसमद्य खलु लोकसभासमग्र-
कार्यक्रमं श्रयति तेन मतानि लब्धुम् ॥ ७३ ॥

तद्राजनैतिकसमाजगरूढिवादि-
लोकस्य नूनमधिकं निकटं प्रयाति ।
तन्नेतृषु व्यवहितिर्जनतासु चेयं
नक्तन्दिवं किमपि याति पुरा महत्त्वम् ॥ ७४ ॥

तीव्राणि भाषणशतानि भवेयुरद्धा
संसत्सु सांसदिकशिष्टतयाऽऽश्रितासु ।
शिष्टिः पराजयमुपेष्यति यत्र काले
काले च सा च विचलिष्यति नानपेक्षा ॥ ७५ ॥

काङ्ग्रेसदर्शितविधानसभाविरोधे
शिष्टिः स्म शंसति यदेष न दर्शनीयः ।
एताः सभाः प्रतिनिधित्वमशेषदेश-
वासिप्रजासु दधतीह मतं प्रकाश्य ॥ ७६ ॥

किन्त्वेष हास्यविषयो यदियं प्रशिष्टिः
काङ्ग्रेसलब्धविजयस्य कथां निशम्य ।
तस्य प्रभुत्वमधिगम्य च तत्सभासु
निर्वाचनादिविधिनिन्दनतत्परास्ति ॥ ७७ ॥

सङ्ख्याल्पतास्ति मतदातृजनस्य त्रिश-
त्येतासु कोटिषु हि तन्मितलक्षमानात् ।
ते वञ्चितास्तु मतदानविधेरमीषु
शिष्टि प्रति प्रणयिनो बहवो लसन्ति ॥ ७८ ॥

अस्योत्तरं विशदमस्ति—समे वयस्का
मान्या मताधिकृतये विहिता भवन्तु ।
तस्मात्परं यदि भवेन्मतदानमेत
ज्ज्ञातो भविष्यति तदा भ्रम एव शिष्टेः ॥ ७९ ॥

निर्वाचनात्परमभूदथ शासनस्य
संस्कारकारिसमितेर्विवृतिः प्रकाशा ।
आलोचनास्तु परितोऽप्यभवन्नमुष्या
यास्वेक एव मुखरः स्वर उद्गतोऽभूत् ॥ ८० ॥

यद् भारतीयजनतां प्रति संशयोऽत्रा-
विश्वासभावसहितः प्रविकाशितोऽस्ति ।
सामाजिकेषु पुनरेषु च राष्ट्रियेषु
प्रश्नेषु नः स हि विचारपथो विचित्रः ॥ ८१ ॥

साम्राज्यवादिनि नये ब्रिटिशप्रभूणा-
मस्मद्धितेषु च न कश्चन किं विरोधः ।
अस्त्येव किन्तु कतमन्महिमानमीया
दित्येष एव विषयोऽस्ति विचारणायाः ॥ ८२ ॥

साम्राज्यवादिनयरक्षणमेव कर्तुं
स्वातन्त्र्यमिच्छति नु राष्ट्रमिदं चिरेण ।
मन्यै तथा स्म मनुते ब्रिटिशप्रशिष्टिः
स्मः सूचिता ब्रिटिशनीतिमिमेऽनुसर्तुम् ॥ ८३ ॥

तं वा तदाशयमनुव्रजतां स्वराज्ये
योग्यत्वमत्र किल दर्शयतां सतां नः।
संरक्षणानि किमपि ब्रिटिशप्रशिष्टे-
र्नैवोपयोगमुपयन्ति पुरेति सत्यम् ॥ ८४ ॥

चेद् भारते ब्रिटिशनीतिरिहावनीया
तर्ह्युद्यमः किमयमाध्रियते स्वशिष्टेः।
स्पष्टं क्रयाऽऽक्रयविधिर्ब्रिटिशाय यावां-
स्तावान्न भारतजनस्य हितावहोऽयम् ॥ ८५ ॥

वाणिज्यमस्ति हितकृद् ब्रिटिशस्य नूनं
देशेन नः सममिति भ्रमलेशशून्यम्।
तद्राजनीतिनियुणव्यवहारदृष्ट्वा-
ऽस्मद्देशविस्तृतहितार्पणयैव सिद्धम् ॥ ८६ ॥

सेयं स्थितिस्तदितरोपनिवेशजात
आस्टेलियाप्रभृतिनि प्रतिगामिनीव।
येनोग्रवाणिजिकसन्धिरकारि तेन
हानिर्ब्रिटेनविषया स्वगतश्च लाभः ॥ ८७ ॥

इत्थ गतेऽपि निजवाणिजिकप्रवृद्ध्यै
देशान्तराणि न विधिं तमिमं सहन्ते।
यद्राजनैतिकदलं यतते कनाडा-
देशस्थितं वचनबद्धमितोऽस्य मुक्त्यै ॥ ८८ ॥

आस्ट्रेलियापि यदमुष्य विधेः पदाना-
मर्थान् प्रकल्प्य फलतः करवृद्धिमाधात्।
वस्त्रेषु तन्तुषु च येषु किलाद्य लङ्का-
शायर्वणिग्जन उपोद्धरते विरोधम् ॥ ८९ ॥

नूनं स तद्विधिविभङ्ग इति प्रणिन्द-
न्नास्ट्रेलियापटबहिष्कृतिमेष कर्तुम्।
आन्दोलनं स्म कुरुते, परमेष रोषो
नास्ट्रेलियामनसि सम्भ्रममाततान ॥ ९० ॥

नैवानयोर्ब्रिटिशशासकवैरभावः
सङ्घर्षमार्थिकमिमं जनयन्विभाति ।
आस्ते समक्षमिह सन्निहितः स आय-
र्देशोलैण्डे न यत्र मिलितानि हितानि तानि ॥६१॥

सङ्घर्ष एष मिलितेषु हितेषु घाता-
घातात्समुद्भवति, सम्प्रति भारतेऽस्मिन् ।
संरक्षणस्य फलमस्ति, हितानि तानि
संरक्षितानि परितो ब्रिटिशे यथा स्युः ॥ ६२ ॥

संरक्षणस्य फलमस्य च भारतीय
व्यापारसन्धिनियमेष्ववभासतेऽदः ।
यांस्ते विदुर्ब्रिटिशवाणिजिकाः समन्ता-
त्ते भारतीयवणिजामनिवेदितास्तु ॥ ६३ ॥

तेषां विरोधमथ लोकसभाविरोधं
नापेक्ष्य सन्धिरयमत्र किल प्रवृत्तः ।
संरक्षण ध्रुवमपेक्षितमीदृशं वा
आस्ट्रेलियाप्रभृतिषु प्रबलं तदासीत् ॥ ६४ ॥

एते यथा न खलु वाणिजिकेषु ताव-
त्साम्राज्यरक्षणविधिष्वपि जागरूकाः ।
संरक्षणानुसरणाः प्रसरेयुरग्रे
न स्वैरमेव निजमात्रहिते निषण्णाः ॥ ६५ ॥

साम्राज्यमाहुरिह केऽपि महर्णमेकं
संरक्षणानि वशयन्त्यधमर्णमस्य ।
तान्यावहन्ति सततं हितमुत्तमर्णं
स्वार्थेषु शक्तिमपि चास्य विवर्धयन्ति ॥ ६६ ॥

युक्तिश्च तत्र पुनरुच्यत एव शिष्टया
संरक्षणेष्वनुमतोऽभवदेषु गान्धिः ।
सन्धौ किलेर्विनकृतेऽप्युररीकृतानि
यत्रापि भारतहिताय विवेचितानि ॥ ६७ ॥

'ओटावपैक्ट' पदभाग्विधिरेष तच्च
संरक्षणं किल मतं लघुवृत्तमेतत्।
चिन्त्यास्तु शोषणविधौ कृतराजनीत्य-
र्थोपायसाह्यविधयः सुविधाश्चिराय॥ ९८॥

यावच्छ्वसन्ति सुविधा अथ जीवतीदं
संरक्षणं, न भवितोन्नतिरत्र तावत्।
वैधेन चात्र विधिना परिवर्तनार्थं
नो शिष्यते कथमपि क्वचिदप्युपायः॥ ९९॥

सर्वोऽप्युपाय इह घातविघातभीया-
त्संरक्षणाख्यदृढभित्तिकठोरकूलैः ।
स्पष्टं च नित्यमिदमप्युदितं भवेद्य-
द्वैधो न नैष्यति जनान्निजलक्ष्यमध्वा॥ १००॥

प्रस्ताविता सपदि शासनयोजनेयं
सङ्घश्च भीमतनुरेष विवेकमान्द्यम्।
नो राजनैतिकसुधारदृशैव ताव
त्सामाजिकार्थिकदृशास्ति ततोऽपि घोरम्॥१००॥

रुद्धोऽस्ति बुद्धिबलतोऽत्र समाजवाद-
मार्गो वितीर्णमथ चोत्तरदायि तत्त्वम्।
कार्यन्तु किञ्चिदपि साधु महत्त्वपूर्णं
कर्तुं न शक्तिरथ साधनमस्ति दत्तम्॥ १०१॥

शक्तिः समापि निहिताङ्गलदेशहस्ते
स्वल्पापि नास्ति पुनरुत्तरदायितास्य।
एतां निरङ्कुशतयाऽऽस्थितनग्नताञ्चा
प्याच्छादयेत्स इह नास्ति परस्तनीयान्॥ १०३॥

सर्वोऽपि वेत्ति यदयं समयो विधानं
वाञ्छत्यहो मृदुतरं ग्रहणातुरञ्च।
येनानयातिचपलं परिवर्तमाना
वस्थाविशेषदशया समियात्समग्रम्॥ १०४॥

स्युर्निर्णया झटिति तान् क्रिययान्वितांश्च
कर्तुं न शक्तिरपि कार्यकरेषु भूयात् ।
इत्थं स्थितेऽपि किमु सांसदलोकतन्त्रं
सञ्चालनाय जगतः सफलत्वमीयात् ॥ १०५ ॥

पाश्चात्यदेशविषया हि निदर्शनानि
ये नाम नालमभवन् परिवर्तनेभ्यः ।
अस्माकमत्र विषये तु न सम्भवोऽस्य
यत्पाणिपादनिगडा गतिमाहरन्ति ॥ १०६ ॥

द्वाराणि हन्त पिहितानि विधाय चास्मिन्
विष्कम्भका अपि दृढा विनिवेशितास्तैः ।
सा मृत्तरिर्वितरिता गतिरोधयन्त्रै
र्या भूषितास्ति गतिदायकयन्त्रशून्या ॥ १०७ ॥

सेनाविधानमथ संश्रितवद्भिरेत-
च्छिष्टैर्विधानमुपकल्पितमस्ति हन्त ।
शस्त्रे निषण्णमतयः किमिहाश्रयन्ता-
मन्यद् यतोऽस्ति तदृते प्रलयः किलैषाम् ॥ १०८ ॥

प्रस्ताविितेन बहुशो ब्रिटिशैरनेन
स्वातन्त्र्यमेष्यति कियन्ननु भारतं नः ।
एतत्तु नम्रदलनिन्दनयाऽथ राज
नीतौ नितान्तशिथिलोक्तिशतैः प्रतीतम् ॥ १०९ ॥

तेऽपि ब्रुवन्ति यदि तत्प्रगतेर्विरोधि,
किं स्यात्तदा प्रगतिकारकमत्र देशे ।
शिष्टैः समर्थकतराणि पुराणमित्रा-
ण्यप्यस्य चक्रुरिह काञ्चन दुःसमीक्षाम् ॥ ११० ॥

ते चाटुकारपरिपाटिकया वदन्ति,
किन्तूग्रमेतदपरे च विरुन्धते स्म ।
एतैश्च नम्रदलविश्वसितिर्विनष्टा,
ये भारते ब्रिटिशशासनमाहुरच्छम् ॥ १११ ॥

देवः स हन्त मतिमान् भुवि येन छत्र-
च्छाया ब्रिटेनविहिता किल नोऽपि दत्ता ।
इत्युक्तिशालिभिरपि प्रबला समीक्षा
वस्तुस्थितेः परतरा विहिता सु शब्दैः ॥ ११२ ॥

आडम्बरेण वचसां नवहावभावै
स्तैराहितं बलमहो स्वसमीक्षणेषु ।
यन्नाम नास्ति विवृतौ न च संविधाने
शब्दः स्वराज्यमिति चौपनिवेशिकेति ॥ ११३ ॥

कोलाहलोऽत्र विषये विहितः किलैतै
स्तत् सैमुअल्वचनतोऽपि समाहितं स्यात् ।
संरक्षितश्च भविता खलु तावतापि
सम्मान आत्मविषयः पृथुदर्शिनाञ्च ॥ ११४ ॥

मन्ये भविष्यति किल क्वचनापि मिथ्या
छायैव नाम महदौपनिवेशिकं तत् ।
एतादृशे शशविषाणसमे हि देशे
नैते प्रवेशमहहा ! मनसापि यामः ॥ ११५ ॥

स्वप्नांस्तु तावदवलोकयितुं क्षमाः स्मः
शक्ताश्च तस्य विविधाः सुषमाः प्रगातुम् ।
सन्देहदूषितमना ब्रिटिशैकसंस-
द्यापन्न एव शरणं प्रभुमेव सम्रूः ॥ ११६ ॥

नूनं सुयोग्यतम एष विधिज्ञमूर्धा
वैधानिकं नवमिमं समयं प्रवक्ति ।
'कुर्यान्नवा ब्रिटिशसंसदथ प्रजा वा
सम्राट् तु भारतहितं च शमं च वष्टि' ॥ ११७ ॥

इत्यस्ति हन्त सुखदः समयः समन्ता
द्यो नोऽभिरक्षति सुशिष्टिविधानतोऽपि ।
सामाजिकीरथ च राजनयोपनीताः
क्रान्तीरपि प्रथयितुं न ददाति वेगम् ॥ ११८ ॥

स्यात्सूक्तमेतदपि नैव यदत्र नम्रै
रल्पीकृतो नवविधानविरोधभावः ।
व्यक्तीकृतं बहुभिरेषु यथात्र देशे
ऽस्माद् रोप्यमाणबिलतो वरमस्ति सत्त्वम् ॥११९॥

एतावदुक्तिपरमान् परमातुरांस्ता
नग्रे न सर्तुमपरे समया ददन्ते ।
एतच्च ते चिरमपीह वदेयुरेवे
त्येतत्तु वक्तुमलमस्मि विनिश्चयेन ॥ १२० ॥

सिद्धिर्न चेत्सकृदुपैति तदात्र भूयः
कोलाहलं कुरुत तीव्रमितीह सूक्तिम् ।
रूपान्तरे परिणतां समयोचितत्वा
दादर्शवाक्यवदिमे चिरमारटेयुः ॥ १२१ ॥

कैश्चिज्जनैः श्रमिकनेतृभिराङ्ग्लदेशे-
ष्वाशास्यते श्रमिकवर्गजयोत्थशिष्टिः ।
निःसंशयं प्रगतिशीलदलस्य साद्या
ल्लाभो भवेदधिगतः श्रमिकप्रशिष्टेः ॥ १२२ ॥

किन्त्वाङ्ग्लदेशविधिचक्रपरिक्रमाया
माश्वास ईदृगुचितो नहि भारतस्य ।
शोभास्पदं न खलु तन्न च राष्ट्रियस्य
तद्गौरवस्य पुनरस्त्यनुरूपमेतत् ॥ १२३ ॥

आशास्महे कथमिमां श्रमिकप्रशिष्टि-
माङ्ग्लेषु यां द्विरनुभूतवतां सतां नः ।
नाद्यापि विस्मृतिमुपेति पुरस्कृतिः सा
या भारताय मतयापि तथा प्रदत्ता ॥ १२४ ॥

श्रीरैमजेः पृथगभूच्छ्रमिकप्रवर्गा
त्तत्सङ्गिनस्तु परिवर्तिततद्विचाराः ।
त्रिंशे च मेननमरुन्ध हि सौथपोर्टे
सम्मेलने श्रमिकवर्गकृते स आर्थः ॥ १२५ ॥

आवश्यकं यदिह तत्सकलं स्वराज्यं
प्राप्तुं स्वभाग्यनियतः समयः प्रयोज्यः ।
इत्यास्तुतं प्रतिनयेति स मेननोऽत्र
तेनार्थरेण बलवत्प्रतिनोदितोऽभूत् ॥ १३६ ॥

नाङ्गीचकार किल कार्यसभाधिकारा-
न्नीतिं स्वभाग्यनियतेरथ भारतस्य ।
प्रत्याह—'सम्भवति चाखिलसम्प्रदायैः
साकं विमृश्य विषयेऽत्र विचारयेम ॥ १२७ ॥

इत्युक्तितः स परितोष इहास्थिरोऽभूद्
दृष्ट्वा तदा श्रमिकराष्ट्रियशिष्टिनीतिम् ।
याऽसूत गोलपरिषत्सितपत्र-संसद्-
व्याख्याञ्च भारतविधिं नवमत्र कञ्चित् ॥१२८ ॥

साम्राज्यनीतिविषये ब्रिटिशेऽनुदारो-
दारेषु नैतिकदलेषु न कोऽपि भेदः ।
अग्रे सृतः श्रमिकवर्गजनोऽस्त्युदारः
किन्तु प्रभुर्न निजनेतृषु सङ्कुचत्सु ॥ १२९ ॥

अद्य स्थितिः सपदि यत्परिवर्ततेऽसौ
सम्भाव्यते श्रमिकवर्गसशक्तताऽत्र ।
राष्ट्रान्तरे तु नयसङ्क्रमणप्रतीक्षा-
ऽस्मद्राष्ट्रियप्रगतिवेगमिमं न रुन्ध्यात् ॥ १३० ॥

अस्मज्जनाः श्रमिकवर्गगता ब्रिटैन-
तद्वर्गगेषु दधते किल यां प्रतीतिम् ।
तस्यास्तु मूलमतिविस्मयकारि नूनं
सम्भावनासु निहितं न यथार्थरूपम् ॥ १३१ ॥

सायोगिकं भवति चेत्तदुदग्रभावं
सामाजिकञ्च निजकार्यविधिं प्रयुङ्क्ते ।
अत्रत्यनम्रदलवच्छ्रमजीववर्गे
चिन्त्यं च कात्र भविता फलतः क्रियेति ॥ १३२ ॥

एतेषु सन्ति वहवो हि समाजदृष्टया
रूढाग्रहाश्च परिवर्तनकामिनश्च ।
देशेऽत्र ते सपदि तत्परिवर्तनानां
सञ्चालने भयमिवानुभवेयुरेव ॥ १३३ ॥

सम्भाव्यते ब्रिटिशलक्षणमागतायां
क्रान्तौ लयं ब्रिटिशभक्तिरुपाश्रयेत ।
तस्यां स्थितौ ब्रिटिशसख्यजुषः स्वराष्ट्र-
स्वातन्त्र्यपक्षपतिताः परिवर्तिताः स्युः ॥ १३४ ॥

अस्मादृशो ब्रिटिशसंगतिमाद्रियेरन्
अस्त्येव तज्जनतया सहयोग एषाम् ।
साम्राज्यवाद इह नोऽस्ति विरोधपात्रं
तत्त्यागिनां तु सुहृदां विशदोऽस्ति पन्थाः ॥१३५॥

तस्मिन् क्षणे नु किमु नम्रदलस्य भूया
न्मन्ये नवामपि वदेयुरिमां व्यवस्थाम् ।
अस्तीश्वरस्य ननु बुद्धिमतोऽपरेयं
बुद्धिप्रभेनि कथयेयुरनुग्रहार्ताः ॥ १३६ ॥

सा गोलपीठपरिषद् बत सङ्घशिष्टिः
प्रस्तावतोऽग्रमनयत्किल देश्यराजान् ।
रूढा उदारपथिकाश्च शुभानुशंसा-
संवेगतो नवमनैषुरमूंस्तु वेगम् ॥ १३७ ॥

नास्मात्पुरा किमपि तेषु महत्त्वमात्तं
निःसाहसेषु ब्रिटिशैरवहेलितेषु ।
सङ्केतमात्रमपि तत्पदधारि क्लृप्तं
स्वीकर्तुमेव सततं प्रवणाः किलासन् ॥ १३८ ॥

तेषां किलान्तरिकवस्तुनि हस्तपाता
न्याय्या इति ब्रिटिशिकाः प्रतिपादयन्ति ।
अद्यापि तानि पदधारिभिरेव दत्तै
रध्यक्षितानि नसमक्षसमक्षताभ्याम् ॥ १३९ ॥

श्रीचर्चिलस्य किमु रादरमेयरस्य
वान्दोलनैर्ब्रिटिशशिष्टिरिह त्रसन्ती।
तेषां विनिश्चितमतेष्विह हस्तपातं
कर्तुं किमप्यनुभवत्यथ सावधाना ॥ १४० ॥

गर्वं दधाति बत देश्यनरेशवर्गो
भूयांसमित्यपि तदीयगतिर्ब्रवीति।
जानंस्तु राजनयिकीर्घटना बहिष्ठा
नैवादधाम्यहममूषु महत्त्वमल्पम् ॥ १४१ ॥

आसाञ्च मूलगतभारतसंस्थितिर्मा
ध्याता चिराय विवशीकुरुतां मनो नः।
स्वातन्त्र्यमत्र विविधं खलु दम्यमान-
मस्तीति कष्टसहिता वितता निराशा ॥ १४२ ॥

सद्भावनासु परितः प्रतिदूषितासु
सन्दीपितासु लघुवृत्तिषु नैकधासु।
भूयःसु बन्दिषु च यौवनमात्मनीन-
मुच्छिद्य जीवनमिह व्यतियापयत्सु ॥ १४३ ॥

तद्बन्धुमित्रपरिवारजनान्तरेषु
वृद्धिं परां श्रयति साम्प्रतिके कटुत्वे।
नग्ना हि पाशविकता विवशत्वकुत्सा
चैतानि हन्त परितः परिवेष्टयेते ॥ १४४ ॥

साधारणेऽपि समये विधितो विरुद्धाः
संस्थाश्च सन्ति बहवः परिपोषितास्ताः।
ते शान्तिरक्षणविधानसमन्वितापत्
त्कालाधिकारविधयोऽपि विशेषतोऽद्य ॥ १४५ ॥

सन्ति ब्रिटेनखरशासनशस्त्रशाला
स्वन्तर्निवेशिततया हितकृत्तये नः।
स्वाधीनतां प्रति पुनः प्रतिबन्धबन्धाः
साधारणास्तु नियमा इव सन्ति जाताः ॥ १४६ ॥

बन्दीकृतानि सुबहूनि च पुस्तकानि
संरोधिताः सुबहवः किल पत्रिकाश्च ।
तेषां प्रवेशमवरोधयते प्रशान्ति
र्नूनं करग्रहविधेः समधीनतायाम् ॥ १४७ ॥

दण्डान् सुदीर्घसमयानुपयन्ति घोर-
साहित्यरक्षणविलक्षणदोषभाजः ।
कोपं च सेंसरगणः श्रयतेऽव राज ।
नीत्यर्थसम्मतिद-रूससमर्थकेषु ॥ १४८ ॥

'माडर्नरिव्यु'पदशालि च पत्रमत्र
वङ्गीयशिष्टिरकरोत्किल सावधानम् ।
तेन प्रकाशितमभूद्धि रवीन्द्रनाथ-
क्लृप्तं तु रूसविषयं लिखनं तदानीम् ॥ १४९ ॥

रूसादुपागतवता स्वयमेव तेन
तल्लेखितं तदधिगत्य किलोपमन्त्री ।
'लेखेऽत्र भारतकृता ब्रिटिशानुकम्पाः
सन्दर्शिता विकृतरूपतयेत्युवाच ॥ १५० ॥

यासां विनिर्णयकरः किल सेंसरोऽस्ति
तद्विप्रतीपमतमस्ति न नः प्रकाश्यम् ।
डब्लिन्स्थितां प्रति च मित्रसभां रवीन्द्र-
संक्षिप्तवाक्प्रकटनेऽपि विपत्कृताऽभूत् ॥ १५१ ॥

यः संस्कृतीतरसमस्तजगत्प्रपञ्चा-
दद्योत्थराजनयतो नितरां तटस्थः ।
नो भारतेऽपितु समग्रभवि प्रतीतः
सम्मानितश्च बत सन्तकविः स दम्यः ॥ १५२ ॥

तत्रासहायकजनस्य कथैव का स्याद् ?
आतङ्ककारि किमपि प्रकृतं प्रशिष्टया ।
तन्नूतनस्य दमनस्य समक्षभूताद्
दृष्टान्ततोऽपि विकटं प्रकटं तदासीत् ॥ १५३ ॥

निष्पक्षपत्रचलनं ध्रुवमत्र वस्तु
स्थित्यां न सम्भवति नाध्ययनञ्च तस्याः ।
अत्रैतिहासिकनयार्थिकवर्तमान
प्रश्नोच्चयस्य कथमस्तु समाहितिस्तु ॥ १५४ ॥

इत्थं सुधारणसखोत्तरदायिशिष्टे
मुख्यास्वपेक्षिततरासु नवक्रियासु ।
प्रारम्भणीयविषयासु विचित्ररूपा
वातावृतिर्ब्रिटिशशासनिकैः कृतास्ति ॥ १५५ ॥

सर्वोऽपि वेदसुमतिर्यदिदं विचार-
क्रान्त्यन्तरे विशति विश्वमशेषमद्य ।
व्याप्नोति चाप्यविदितो विदितोऽथवेदं
सद्यः परिष्ठितिषु कश्चिदतोष उग्रः ॥ १५६ ॥

प्रत्यक्षतश्च परिवर्तनमत्र भूयो
बोभोति, नास्ति परतोऽविदितं भविष्यम् ।
तस्मिन्न दर्शनसमाजनयज्ञवर्गः शास्त्रीय-
दृष्ट्युपचितां विदधीत चर्चाम् ॥ १५७ ॥

तद्विश्वगाहितहितान्वितमस्ति वस्तु
तस्माज्जनः परिचिनोतु विभिन्नशक्तीः ।
याः साम्प्रतं विदधतीह समग्रकार्यं
तास्वेष कार्यपथमद्य विनिश्चिनोतु ॥ १५८ ॥

सा प्राक्तनी च जगतीह समाप्तिमेति
निर्मीयते नवमिदं च जगत्किलैकम् ।
प्रश्नोत्तराधिगतये परिवेदनीयं
यत्तत्किमस्ति यदिहास्ति गवेषणीयम् ॥ १५९॥

प्रश्नस्य चाधिगतिरस्ति महत्त्वपूर्णा
तावत्किलोत्तरगवेषणमस्ति यावत् ।
खेदोऽयमस्ति यदिमे न विदन्ति विश्व-
प्रश्नानहो नयविदस्तदुदासतेऽस्मात् ॥ १६० ॥

अज्ञानमेतदधिकं विततं प्रशिष्टे-
रध्यक्षवर्गहृदयावधि चेति मन्ये।
यत्पौरसेवकपदे नियताः सुखेन
तोषेण चात्र दधते रुचिमल्पमात्राम् ॥ १६१ ॥

सर्वोच्चकेन च किलाधिकृतेन कार्या
चिन्ता समाहितिपरा भवतीति सत्यम्।
संसारचक्रघटना ब्रिटिशेन नूनं
ध्येया भवन्ति निजनीतिविनिर्णयार्थम् ॥ १६२ ॥

वैदेशिकीं ब्रिटिशनीतिमिहाधिपत्यं
तद्रक्षणं च परिभावयतीति विद्मः।
अत्रत्यराजनयिका विमृशन्ति किन्तु
राष्ट्रान्तरैः सह निजान्वयनं कियन्तः ॥ १६३ ॥

साम्राज्यवाद इह वा जयपत्तनीयः,
शक्तिश्च सोवियतरूसगतैधमाना।
चक्राणि रूसजयपत्तनराजनीतेः
कुर्वन्ति किं ब्रिटिशजान्यपि सिक्किमाङ्के ॥ १६४ ॥

मध्यैशियासु जनिता अफगानदेशे
ताः पारसेषु घटना इह भारते च।
तां राजनैतिकगतिं परिभावयन्ति
केनाथ केन विधिनेति न चिन्तयामः ॥ १६५ ॥

मध्यैशियास्थितिरियं दधते समक्षं
काश्मीरदेशविषये परिणाममेकम्।
तस्मादिमं ब्रिटिशराजनयोऽत्र रक्षा-
कार्येषु कञ्चन नवं भजतेऽद्य भागम् ॥ १६६ ॥

अस्मान्महत्त्वमधिकं परिवर्तनानि
बिभ्रत्यमूनि जगतां पुनरार्थिकानि।
यातोनविंशशतकेऽत्र दिने तदीया
सामाजिकी न घटते निपुणा व्यवस्था ॥ १६७ ॥

वाक्कीलवद्गतनिदर्शनदानरीति-
देशे चिरात्प्रचलतीति नितान्तसत्यम् ।
किन्त्वद्य तानि न लगन्ति ततोऽद्य कार्य-
शैली भविष्यति हिताय न सा पुराणी ॥ १६८ ॥

गोयानमत्र निहितं रयले न तस्यात्
तस्मादिदं वितथमित्यपवर्ज्यमेव ।
रूसातिरिक्तविषयेष्वपि योजनानां
चर्चाभवद्धि परिवृत्तिकृतां नवानाम् ॥ १६९ ॥

साम्राज्यवाद सरणिं स्थिरयामि लोके
तां सर्वथा च दृढयामि किलेति वाञ्छन् ।
अप्येष साहसमयीर्बहुयोजनास्ता
रूज्वेल्ट एव परिचालयति स्म मान्यः ॥ १७० ॥

आमेरिकं विनिमितं खलु जीवनं स्या-
देताभिरित्यहह तेन कृतोऽस्ति घोषः ।
प्राप्ताधिकारगुरुवर्गनिरासकारी
पादाधरोकृतदलोन्नतिकारकश्च ॥ १७१ ॥

साफल्यमत्र लभतां स न वेति चास्तां
किन्त्वस्य साहसमिदं भवति प्रशस्यम् ।
यत्रैष देशमवकृष्य पुराणरेखा
पङ्कान्महत्त्वमभिकाङ्क्षति वागतीतम् ॥ १७२ ॥

यन्नीतिरीतिपरिवर्तनतः प्रमाद
स्वीकारतश्च स मनागपि नो बिभेति ।
श्रीलायडः स्वनवयोजनयाऽऽङ्ग्लदेशे
ऽप्यभ्यागतो यदिति सोऽप्यतिविस्मयो मे ॥ १७३ ॥

श्रीभारते कतिपयीर्नवयोजनाश्चा
काङ्क्षामहे, भयकरं भुवि मन्महे च — ।
'वेद्यं समं सुविदितं सुकृतञ्च कार्यं
सर्वं किलेति न विवेकसहो विचारो ॥ १७४ ॥

वाक्कीलवद्गतनिदर्शनदानरीति-
देशे चिरात्प्रचलतीति नितान्तसत्यम् ।
किन्त्वद्य तानि न लगन्ति ततोऽद्य कार्य-
शैली भविष्यति हिताय न सा पुराणी ॥ १६८ ॥

गोयानमत्र निहितं रयले न तस्यात्
तस्मादिदं वितथमित्यपवर्ज्यमेव ।
रूसातिरिक्तविषयेष्वपि योजनानां
चर्चाभवद्धि परिवृत्तिकृतां नवानाम् ॥ १६९ ॥

साम्राज्यवाद सरणिं स्थिरयामि लोके
तां सर्वथा च दृढयामि किलेति वाञ्छन् ।
अप्येष साहसमयीर्बहुयोजनास्ता
रूज्वेल्ट एव परिचालयति स्म मान्यः ॥ १७० ॥

आमेरिकं विनिमितं खलु जीवनं स्या-
देताभिरित्यहह तेन कृतोऽस्ति घोषः ।
प्राप्ताधिकारगुरुवर्गनिरासकारी
पादाधरोकृतदलोन्नतिकारकश्च ॥ १७१ ॥

साफल्यमत्र लभतां स न वेति चास्तां
किन्त्वस्य साहसमिदं भवति प्रशस्यम् ।
यत्रैष देशमवकृष्य पुराणरेखा
पङ्क्तान्महत्त्वमभिकाङ्क्षति वागतीतम् ॥ १७२ ॥

यन्नीतिरीतिपरिवर्तनतः प्रमाद
स्वीकारतश्च स मनागपि नो बिभेति ।
श्रीलायडः स्वनवयोजनयाऽऽङ्ग्लदेशे
ऽप्यभ्यागतो यदिति सोऽप्यतिविस्मयो मे ॥ १७३ ॥

श्रीभारते कतिपयीर्नवयोजनाश्चा
काङ्क्षामहे, भयकरं भुवि मन्महे च — ।
'वेद्यं समं सुविदितं सुकृतञ्च कार्यं
सर्वं किलेति न विवेकसहो विचारो ॥ १७४ ॥

साम्मुख्यमद्य च विधेयमहो बहूनां
शौर्येण सम्प्रति समेतसमस्यकानाम् ।
सामाजिकीह किमधिक्रियतेऽद्य जाता
चैवार्थिकी गतिरियं भुवि जीवनेऽपि ॥ १७५ ॥

या नाम नाद्य जनमात्रदशासु काञ्चि-
न्नूत्नां परिष्कृतिमुपाश्रयितुं समर्था ।
किं काचिदस्ति च परा सरणिः प्रगत्या
आश्वासनं वितनुते ननु तादृशं या ॥ १७६ ॥

किं राजनैतिकमिदं परिवर्तनं न-
स्तां क्रान्तिदां प्रभवति प्रगतिं प्रदातुम् ।
किञ्च क्वचित्प्रमुखसत्परिवर्तनेन
स्वार्थाकुलेषु पथि बाधकतां गतेषु ॥ १७७ ॥

धर्म्यो मवेत्किमयमत्र जगज्जनस्य
दारिद्रयदुःखगहने बहु सन्निपातः ।
संस्थापितात्महितमात्रपरायणानां
संरक्षणं च परितः क्रियताममीषाम् ॥ १७८ ॥

नूनं वयं न निहितान् प्रतिहन्तुमुत्काः
स्वार्थान्, यतेमहि किल क्षतिपूर्तयेऽपि ।
स्वार्थैरमीभिरिह सम्भवताच्च साम-
ञ्जस्यं तदा तदपि नः सुतरामभीष्टम् ॥ १७९ ॥

वैमत्यमस्तु गुणदोषदृशां न साम-
ञ्जस्यस्य तूपयुजि कस्यचनास्ति शङ्का ।
स्पष्टं न सम्भवति यत्प्रथमः परश्च
स्वार्थौ मिथो विजहितां सहजं विरोधम् ॥ १८० ॥

स्वार्थं नवं विरचितं भुवि रक्षयित्वा
पूर्वस्य तस्य विनिवारणमित्यशक्यम् ।
आवश्यकत्वसुशकत्वमवेक्ष्य साम-
ञ्जस्यार्थएष परिपूर्तिकरो विधेयः ॥ १८१ ॥

सम्भाव्यते हि कलहे महतीह हानि-
स्त्याज्यं तदर्धमपि तैरिह सर्वनाशे ।
दुर्भाग्यमेतदितिहासविदो विदन्ति
स्वार्थान्धिता न किल तं क्रममाद्रियन्ते ।। १८२ ।।

वर्गा न येऽवयवतां दधते समाजे
तेऽलं भवन्ति भुवि हन्त विवेकशून्याः ।
ते रक्षितुं सकलमेव, विनाशयन्ति
हाहन्त तत्सकलमेव, च याति नाशम् ।। १८२ ।।

अत्रात्मसात्कृतिमुखे विषये च चर्चा
बह्वी प्रवर्तत इयं मदभाषितेव ।
किन्त्वात्मसात्कृतिरियं बलपूर्विका स्या
द्या वर्तमान सरणौ प्रथितास्ति मूलम् ।। १८४ ।।

क्रान्तिः किलाबसितये प्रकृतास्ति चास्याः
सामाजिकी प्रतिदिनं प्रतिशोषणाया ।
प्रत्यर्जनं श्रमिकगाढपरिश्रमाणां
कारुण्यशून्यहृदयैर्धनिकैः कृतायाः ।। १८५ ।।

उत्पादनानयनयोश्च करास्तथेमे
संवर्धिता, न कृषकाः प्रभवन्ति येषु ।
हा हन्त तद्विनियमे निजसात्क्रियन्ते
तेषां स्वकार्यकरणा वृषभादयोऽपि ।। १८६ ।।

पूर्वे युगे जनगणो मिलितो बलेन
भूमौ क्वचित्स्म कुरुतेऽधिकृतिं स्वकीयाम् ।
इत्थञ्च भूमिपतिता रचिता महत्यो
भूस्वामिनश्च कृषका असिताः सुदूरम् ।। १८७ ।।

इत्यात्मसात्कृतिरियं नवलां प्रणाली-
मप्याश्रयत्यहह जीवनदेयमस्याः ।
एवं सुधारयितुमत्र बहून् प्रकारा-
नप्यात्मसात्कृतिपरस्तनुते समाजः ।। १८८ ।।

युङ्क्ते करान् सुमहतश्च ऋणाद् विमुक्ति-
दानाय चापि विधिमृद्धिमुखांस्तथान्यान्।
सम्प्रत्यथो ऋणनिराकरणादनेक
राष्ट्राणि यान्ति विमुखत्वमितीह दृष्टम् ॥ १८९ ॥

नासौ च सोवियतसङ्घ इहैक एव
यावत्पराण्यपि धनाढ्यतया श्रुतानि।
अत्यन्तमुज्ज्वलमुदाहरणं प्रभूणा-
मामेरिकाऋणनिरासपराङ्मुखानाम् ॥ १९० ॥

तैरेव भारतसमक्षमुदाहृतिर्या
प्रस्ताविताति भयदा सुतरामियं नः।
किन्त्वात्मसात्कृतिभिराभिरहो ऋणानां
निष्कारतश्च भविता नहि रुङ्निवृत्तिः ॥ १९१ ॥

नाभ्यां समाजघटनाप्रतिकूलमूल-
भूता रुजः समुपयान्ति शमं चिराय।
नूत्नस्य चापि भवतीह सुचिन्तितस्य
निर्माणकस्य चरणेऽपि कुठारपातः ॥ १९२ ॥

किञ्चात्र चेदभिमताद्यतनी व्यवस्था
रूपान्तरं गमयितुं भवतां नवीनम्।
तर्ह्यभ्युपायपरिचिन्तनयोपयोग-
श्चिन्त्योऽस्य भौतिकसुनैतिकदृष्टितोऽपि ॥ १९३ ॥

सङ्कीर्णया तु भविता न दृशास्मदर्थो
ऽस्माभिस्तदत्र भवितव्यमपार्श्वदृग्भिः।
द्रष्टव्यमेव यदिदंपरिवर्तनेन
किं मानवी सुखसमृद्धिरुपैति वृद्धिम् ॥ १९४ ॥

ध्येयञ्च साम्प्रतिकरीतिपरीत्यभावे
भीष्मा भविष्यति कियत्यथ लक्ष्यहानिः।
अस्याः क्रमे प्रचलतीह च कैः प्रकारै-
र्भारः पतिष्यति हताशनृजीवनेषु ॥ १९५ ॥

सह्या भवत्यर्थ दरिद्रतयैव साकं
क्षुज्जा मृतिः पतनमात्मिकनैतिकञ्च ।
आगन्तुकी सलिलवृद्धिरिवार्थिकीयं
रीतिर्जनानगणितान्नयते विनाशम् ॥ १९६ ॥

शक्या न रोद्धुमिह नः प्रलयङ्करीयं
पात्रैर्जले परिहृते नहि जीवरक्षा ।
बन्धान्निबध्य निकलय्य तथात्र कुल्या
योज्या हि तेषु सलिलस्य विनाशशक्तिः ॥ १९७ ॥

नूनं निनीषति महत्परिवर्तनं य-
त्तन्नार्हतीह विधिकल्पनया समाजः ।
सर्तुं पुरो रचयितुं नवभूमिकाञ्च
हस्ते कृता भवतु तद्विधिमूलसत्ता ॥ १९८ ॥

चेदेष कर्तुमुचितोऽस्ति समाजवादी
तर्ह्यप्यसौ भुवि न दैष्टिकतावलम्ब्या ।
निर्बाधमेव रचितस्य विभञ्जनेन
निर्मापणेन च पुनर्भवितार्थसिद्धिः ॥ १९९ ॥

वार्या विशेषविदिताः पुनरत्र विघ्नाः
सम्पादनाय सकलस्य न वञ्चनाय ।
दारिद्र्यमेतदधुना परिवर्तनीयं
सम्पन्नता सुलभशोभनरूपतो नः ॥ २०० ॥

लक्ष्यस्य चास्य महतः परिसाधनाय
स्वार्थाः समाजगतिविघ्नकराश्च बाधाः ।
तन्मार्गगा ध्रुवमवश्यनिवारणीया
सिद्धिः श्रिता निहतवाधकसाधनानि ॥ २०१ ॥

मार्गः श्रितः सपदि यः स रुचि न काञ्चिद्
वैयक्तिकीमनुगतोऽस्त्यरुचिं च नायम् ।
सैद्धान्तिकेऽपि न नयेऽस्ति च निर्भरोऽयं
किन्त्वार्थिकी दृगुचितं मनुते तमेनम् ॥ २०२ ॥

एषोन्नतिं प्रगतिं च नेतुमलम्भविष्णुः
कर्ताधिकाधिकमयञ्च समाजभव्यम् ।
स्वाभाविके बत मिथः कलहे जनानां
स्वार्थेषु नास्ति किल कश्चन मध्यमार्गः ॥ २०३ ॥

प्रत्येकमेव निजमार्गनिचायकः स्याद्
वेद्यं तु तन्निचयनात्प्रथमं समेन ।
न प्रार्थनालमिह सास्ति समाजवाद-
माहात्म्यदर्शिदृढभावनयाऽभ्युपेता ॥ २०४ ॥

तर्कैर्यथार्थघटनाभिरथास्तृताभि-
श्चालोचनाभिरुचितेन विवेचनेन ।
युक्ताग्रहेण च सदा भवितव्यमत्र
सिद्धान्ततां दधति तेन हि सर्ववादाः ॥ २०५ ॥

साहित्यमीदृशमिहास्ति च पश्चिमेषु
देशेऽस्त्यभाव इव नः खलु यादृशस्य ।
अच्छाच्छपुस्तकसमागमनं निरुद्धं
वैदेशिकस्य पठनं तदलं च नेदम् ॥ २०६ ॥

अन्वीतया पुनरिमं च समाजवादं
चेद् भारते रचनया भवितव्यमस्मिन् ।
एतत्परिष्ठितिततिं श्रितयैव भाव्यं
नूनं तयेति च तदध्ययनं प्रयोज्यम् ॥ २०७ ॥

एवंविधाश्च सुधियः समपेक्षिताः स्यु-
स्तावत्तदर्थमिह नः कुशलाः समन्तात् ।
ये योजनां ससकलावयवां प्रणेतुं
शक्ता भवन्ति गहनाध्ययनं विधाय ॥ २०८ ॥

दौर्भाग्यतश्च सुधियो बहुधाऽस्मदीयाः
सेवासु शासनभवासु निमग्नचित्ताः ।
किं वार्धशासनसमेधितविश्वविद्या-
केन्द्रेषु ते नियमिता नियमान् सहन्ते ॥ २०९ ॥

तेऽस्यां परिष्ठितिततो प्रगतिं विधातुं
नो साहसं किमपि कर्तुमलं भवन्ति।
नो भूमिका मतिमयी च समाजक्लृप्त्यै
सैवालमत्र समपेक्षितनैकशक्तौ॥ २१० ॥

कर्तुं समाजरचनां न च भूमिकां ता-
मप्यन्तरा विषयमर्म कदापि वेद्यम्।
आन्दोलनञ्च बलवत्किमपि प्रयोक्तुं
नैवाहंमित्यनुभवामि सदैव चित्ते॥ २११ ॥

अद्यास्ति नो गुरुतरा कृषिभूसमस्या
देशे चिराय न भविष्यति साग्रतोऽपि।
औद्योगिकी न लघुरस्ति पुनः समस्या
साप्यत्र वृद्धिमुपगच्छति घस्रघस्रे॥ २१२ ॥

राष्ट्रं भवेदिदमथापि कृषिप्रधान-
मुद्योगमुख्यमिति चास्ति चिराय लक्ष्यम्।
स्यान्मुख्यता किल कृषेरुभयोस्तयोर्वा
नोद्योगवृद्धिरुपरोधमिहार्हतीयम्॥ २१३ ॥

उद्योगकर्मपतयः स्वविचारदृष्ट्या-
ऽऽश्चर्यावहेन खलु पृष्ठगताः क्रमेण।
ते सन्ति नाधुनिकविश्वगता नितान्त-
नूत्ना धनाधिपतयो न पुरातनास्ते॥ २१४ ॥

साधारणा इह जना अतिमात्रदीनाः
पश्यन्ति ते च न दृढग्रहिणः किलैतान्।
वृद्धिं किल श्रमफलस्य तथा च काल-
स्यापक्षयं कथमपीह न मानयन्ति॥ २१५ ॥

वासोमिलेषु समयो दशहोरकाणां
स्थानेऽद्य यत्तु नवहोरकतां प्रणीतः।
तेनाधुना श्रमफलं श्रमजीविनां त
न्न्यूनीकृतं त्वहमदामिलमालिकैस्तैः॥ २१६ ॥

कालापचाय ईह हन्त फलापचायो-
पायोऽथ च श्रमिकजीवनदैन्यहेतुः ।
औद्योगिकी तु फलवृद्धिमृतेऽपि वृद्धि-
मेकीकृतिः श्रयत एषु भरक्लमौ च ॥ २१७ ॥

औद्योगिका इह समेऽपि किलोनविंश्या
आरम्भकालिकदृशाऽऽकलिताः शताब्द्याः ।
लाभातिरेकमुपयान्ति धृतावकाशा-
स्तेहा भवन्ति सततं श्रमिकास्तु दीनाः ॥ २१८ ॥

मन्दार्घतासु च फलापचयं विनाऽयं
कार्यक्रमश्चलति नेति जपन्ति तेऽमी ।
ते सर्वकारसहयोगजुषो नयज्ञै-
र्मध्यस्तरैरपि सहानुभवं भजन्ते ॥ २१९ ॥

इत्थङ्गतेऽप्यहमदामिलसंश्रयाणां
मुम्बापुरीप्रभृतिगश्रमजीविवर्गात् ।
काञ्चित्स्थितिः शुभतरा श्रमजीविनां सा
पश्यन्नधो हि महिमानमुपैति सर्वः ॥ २२० ॥

वङ्गीयशाणमिलगश्रमजीविवर्गा-
त्साधारणी स्थितिरियं श्रमिणां स्वदेशे ।
इङ्गारभारखनिगश्रमिकोच्चयाच्च
वासोमिलश्रमिकसंस्थितिरस्ति भव्या ॥ २२१ ॥

उद्योगकर्मसु लघुस्वथ च स्थितिः का-
प्येषां मुहुर्भृशमसङ्कटनेन शोच्या ।
वासःशणादिमिलमालिकहर्म्यमाला-
श्चुम्बन्ति हन्त गगनं विभवैर्विलासैः ॥ २२२ ॥

अन्यत्र काश्चन दिगम्बरकल्पनाल्प-
श्रान्तश्रमाश्रयिजनस्य तु कालकोष्ठ्यः ।
अत्रैतयोस्तुलनया कृतया महीया
नास्तीयंते मतिमतां तु महोपदेशः ॥ २२३ ॥

स्वाभाविकं तदिदमन्तरमित्यचित्ता
मन्यामहे वयमतो न मनागमुष्मात् ।
वैषम्यतोऽत्र विचलाम इति त्ववाच्यं
नैव प्रभावमथ कञ्चिदिहावहामः ॥ २२४ ॥

हा ! भारतश्रमिकवर्गदशास्ति शोच्या
किन्त्वर्थदृष्टिकलिता कृषकोच्चयस्य ।
आस्ते दशातिविषमेति किलास्ति सत्यं
लाभान्विता हि भुवि ते श्रमिकेभ्य एव ॥ २२५ ॥

स्वच्छे हि वातवलये स्ववशं वसन्त-
स्तेऽस्वच्छवासपतनान्नरकाद्वियुक्ताः ।
एतेऽपि गोमयमयं विदधत्यमीषां
स्वर्गोपमं तमिति गान्धिरुवाच सत्यम् ॥ २२६ ॥

एतेषु नास्ति सहयोगबलात्समाज-
कल्याणसाधनकरी किल भावनेति ।
निन्दावचांसि सुवचानि परन्तु तेऽपि
कुर्वन्तु तत्र किमहो विवशा वराकाः ॥ २२७ ॥

तज्जीवनं हि कटुकं कलहैः समन्ता-
द्वैयक्तिकैः परिवृतं परितः प्रहारैः ।
तद्यापयन्ति कथमित्यतिचित्रमस्ति
दारिद्रयदुःखदहनज्वलिता अपीमे ॥ २२८ ॥

पञ्चाम्बवीयकृषकस्य किलानुपाता-
दायो नवाणकमितो नवविंशवर्षे ।
नैयून्यमाप्य समभूत्त्रिपणप्रमाणो
वर्षद्वयादिति वयं परिदृष्टवन्तः ॥ २२९ ॥

पञ्चाम्बवीयकृषकाः सुखिनः किलैभ्यो
युक्तप्रदेशमिथिलावनिवङ्गजेभ्यः ।
इत्युच्यते स इह कल्पयितुं सुशक्यो
ह्येषां पणप्रमित एव किलायमायः ॥ २३० ॥

युक्तप्रदेशवसतेः कृषकस्य चायो-
ऽभूदाणकद्वयमितस्तु समृद्धिकाले ।
दारिद्र्यमेतदनु मानवमानसेषु
प्रेम्णा दयाभ्युदयकृद्यतनं वृथा स्यात् ॥ २३१ ॥

स्थानीययत्नशतकैर्दयनीयताया
उद्धारणाय यदि कापि कथा क्रियेत ।
सा स्यात्किलास्य कृषकस्य तपस्विनोऽत्र
वैवश्यमेतदभिलक्ष्य किलोपहासः ॥ २३२ ॥

पङ्कादितः कथमुदेतुमलं भवेम
दौर्गत्यतो जनगणोद्धरणं हि कष्टम् ।
किन्त्वस्य कश्चन विधिः परिचिन्तनीय
एवेति तत्र न कदाचिदुदास्महेऽमी ॥ २३३ ॥

कष्टन्तु वास्तविकमत्र ततो निजार्थ-
मग्नादुदेति समुदायत एव सत्यम् ।
यो वर्ततेऽत्र परिवर्तनतः प्रतीपः
साम्राज्यवाद्यधिपतौ तदसम्भवञ्च ॥ २३४ ॥

आगामिवत्सरगणे किल भारतो न-
स्त्वङ्गीकरिष्यति रुचिं कतमामधीनः ।
वृत्ती प्रधानपदवीमधितिष्ठतोऽस्य
तङ्कः समाजरचनेति समाश्रिते द्वे ॥ २३५ ॥

मध्यस्तरीयशिथिलास्थितयश्च वर्गा
लुप्यन्त एव, सरमालकमश्च हेरी— ।
श्रीभारतोऽयमुररीकुरुतेऽत्र याव-
च्छङ्का स्वरूपमिव राष्ट्रसमाजवादम् ॥ २३६ ॥

इत्यब्रवीन्नयबुधोऽत्र भविष्यवाणी
या भात्यसाववितथा निकटे भविष्ये ।
देशस्य हन्त तरुणीतरुणेषु तङ्क-
वादात्मिकास्ति विशदा किल भावनेयम् ॥ २३७ ॥

बङ्गेषु सास्ति सविशेषतयाऽथ दृष्टा
काङ्ग्रेसकेऽपि च तदीयविभाप्रभावः ।
किन्त्वस्य हिंसनपरात्क्वचिदुग्ररूपा-
त्काङ्ग्रेसवृद्धपुरुषाः पुरु बिभ्यतीह ।। २३८ ।।

हिंसेतरव्रतवतान्न स तङ्कवादः
स्वाधारतो रुचिपदं क्वचनाश्रयेत ।
वैयक्तिकी भवति यत्र विभूतिरद्धा
स्वार्थाविलोपसहितापि च शिष्टयधीना ।। २३९ ।।

आरम्भतः सुभगतां दधते क्रमोऽयं
प्राचीनतापि नवतापि च भाति यस्मिन् ।
रक्षन्त्यदन्त्युभयहस्तगमोदकास्ते
पूर्वं परञ्च चतुरा द्विफलाध्वगाः स्युः ।। २४० ।।

प्रोत्साहनं समधियास्यति तङ्कवादो
मध्यस्तरीयतरुणीतरुणाश्रयेण ।
अद्यापि भारततले किल कुर्वते ते
क्रान्ति यथा न कृषकश्रमिकास्तथैते ।। २४१ ।।

उद्योगसद्मसु कलानिलयेषु नूनं
सम्भावनास्य महती फलिनी न दृष्टा ।
मध्यस्तरीयनवराष्ट्रविधानवादे-
ष्वेव प्रचारयितुमुर्वरभूष शक्यः ।। २४२ ।।

वैदेशिकन्तु भुवि शासनमस्ति याव-
द्यूरोपगः स न चलिष्यति तावदत्र ।
स्वातन्त्र्यपक्षपतितो भुवि साम्यवादो
नूनं भविष्यतितरामपि भारतीयः ।। २४३ ।।

साम्राज्यवादमनु यास्यति नैष किञ्चि-
त्साहाय्यमेष्यति च सर्वजनेभ्य आरात् ।
याते पुनर्ब्रिटिशशासनपातकेऽस्मिन्
वर्धिष्यते त्वरितयाऽऽयतया स गत्या ।। २४४ ।।

मध्यस्तरीय-वैर-वर्ग-लसन्निजार्थे
रप्यस्य साह्यकरतात्र समादृता स्यात् ।
सम्भावना ब्रिटिशशासननिर्गमस्य
शीघ्रं तु नास्ति दमनस्य विभाति चक्रे ॥ २४५ ॥

अप्यत्र साम्यमतिरेति समाजबुद्धि-
श्चाभ्येति कापि भुवि तीव्रतरं प्रचारम् ।
यातास्त्यवैधपदवीमिह साम्यसंस्था
दृष्टं श्लथत्वमपि साम्यपदार्थगामि ॥ २४६ ॥

अर्थेन तेन च विरोधकरा हरन्ते
तांस्तत्र नैष्ठिकतयापि रुचिं दधानान् ।
ये बिभ्रतीह हृदयेन सहानुभूतिं
ये दीर्घरूढनियताः श्रमिणां च सङ्घाः ॥ २४७ ॥

स्यात्तङ्कवाद उचितो रुचितस्तु मह्यं
बिभ्रत्सहानुभवमेष च साम्यवादः ।
एतत्कथाध्ययनतः प्रतिभास्यतीदं
सत्साम्यवादपदवी सुदवीयसी मे ॥ २४८ ॥

अद्यापि सीमनि मम क्वचनोनविंश्याः
संस्कारकाः प्रतिलसन्ति तरां शताब्द्याः ।
याञ्च प्रभावितवतीह परम्परा सो-
दारा वहन्ति मयि मानववादधाराः ॥ २४९ ॥

तस्याः प्रवञ्च्य सहसा न सहे प्रसर्तुं
मध्यस्तरीय बहुसंस्कृतयो मयीताः ।
तत्साम्यवादिसुहृदो बहवः स्वभावा-
न्मां प्रत्यहो प्रकटयन्ति कमप्यमर्षम् ॥ २५० ॥

दार्ढ्यं च मार्क्सलिखितं तु किलेश्वरीयं
वाक्यं तदस्ति किल पुस्तकमन्यदीदृक् ।
तन्नैव शङ्क्यमिह सैनिकवत्तदन्धा
नुक्रान्तिरत्र विमतान् प्रति चोपरोधः ॥ २५१ ॥

इत्यादिकानि कथितप्रथितानि साम्य-
वादस्य सन्त्यरुचिराणि तु लक्षणानि ।
भूतं च यद्यदपि सात्मनि रूसदेशे
हिंसामयं तदपि मां प्रतिभाति नाहम् ।। २५२ ।।

मार्क्सस्य तद्भुवि विवेचनमत्र मूल्य-
वादे तथा च विषयान्तरगं न साधु ।
निर्णेतुमेतदखिलं न किलास्मि योग्यो
मन्येऽहमस्य गहनाञ्च गतिं समाजे ।। २५३ ।।

शैलीमिमामनुसरन् यदि पूर्ववृत्तं
वा वर्तमानघटनाश्च पठेन्मनुष्यः ।
शैल्यन्तराज्झटिति कार्यमनेन भावि
येनाधुनातनजगत्मनुलोच्यतेऽदः ।। २५४ ।।

शिक्षाप्रदं खलु विवेचनमत्र यद्यद्
विद्वद्भिरेव विहितं च विधीयते च ।
सर्वत्र तत्र किल मार्क्समतानुयायि-
सल्लेखकैर्नतु बुधैः क्रियते तदन्यैः ।। २५५ ।।

एतत्किलास्ति सुवचं यदिहैष मार्क्स-
स्तत्क्रान्तिकारिसदृशस्तरभावनानाम् ।
प्रत्यक्षजागरणमन्यतथाविधेहा-
श्चोपेक्षिता लिखितवांश्च महत्त्वमासाम् ।। २५६ ।।

यो मार्क्सवादविषये सुमहान् विशेष-
श्चाभाति मे स किल तद्द्रढिमाद्यभावः ।
निश्चप्रचे दृगयने ग्रहिलत्वमेत
त्सा काचनास्य सहजा कृतिशीलता च ।। २५७ ।।

एतच्च तद्दृगयनं समये समाज-
सङ्घट्टनावगमने सहकारि नः स्यात् ।
कार्यञ्च कर्तुमथ बाधशतानि तर्तु-
ञ्चोपायदर्शनविधौ च भवेत्सहायः ।। २५८ ।।

एषा च कार्यपदवी परिवर्तनीया-
ऽप्यास्तेऽस्थिरा स्थितिवशादनुकूलनीया ।
लेनिन्मतं तदुदितं परिवर्तमाना
अन्वेत्य कार्यमकरोद्धि परिस्थितीः सः ॥ २५९ ॥

सोऽयं ब्रवीति—समरक्षणगा स्थितिः के
त्यैतत्सुसूक्ष्ममतिनावहितेन चिन्त्यम् ।
पश्चाच्च तत्समरसाधनयोग्यतायां
स्वीकारवागथ नकारवचो निगाद्यम् ॥ २६० ॥

एवं ह्यकुर्वदिह मार्क्सविधेः समन्तादु-
ल्लङ्घनं विदधते समतैषि राष्ट्रम् ।
नास्तेऽद्य संसृतितले कतमोऽपि पूर्णः
शिक्षा सदा भुवि परिस्थिततोऽनुनेया ॥ २६१ ॥

अस्मिंस्तते दृगयने वितते प्रबुद्धा
व्यक्तिः स्वसीमनि समाजगजीवनस्य ।
उद्बोधयेदखिलतानुगभावनां तां
सर्वस्य यद्धितमहो भुवि तद्धितं नः ॥ २६२ ॥

तस्यै न तत्क्षणिककिञ्चनहानिलाभ-
लेखा तमोनिचयना च न राजनीतिः ।
आदर्शलक्ष्यपरिपूर्तिहिताय यत्ना
न्यानाचरत्यलमिमे जनयन्ति तोषम् ॥ २६३ ॥

ते तत्परिश्रममलं बलिदानकल्पं
त्यागं प्रसादसहितं विहितं समस्तम् ।
कुर्वन्ति सार्थकमहो सफलञ्च सा स्वं
सेनाङ्गमेव मनुते तनुते च योगम् ॥ २६४ ॥

मानुष्यकस्य स च भाग्यभविष्यक्लृप्त्या
अग्रेसरो भवति साधयते च लोके ।
या तस्य कापि मतिरस्ति तया च पूर्व-
वृत्तेन च प्रतिपदं यतते स गन्तुम् ॥ २६५ ॥

मन्ये च साम्यमतयो बहवः समग्रा
वार्ता इमाः समवयन्ति च मार्क्सशिष्याः ।
एकः पुमान्स इह लेनिन एव विद्वा
नासीदखण्डपरिपूर्णनृजीवनस्य ॥ २६६ ॥

भूयस्सु साम्यमतिषु व्यवहर्तुमत्र
सन्तोषपूर्वकमहो भुवि दुश्शकं नः ।
उद्वेजनाय परकीयहृदोऽद्भुतस्तैः
कश्चित्क्रमो यदुररीक्रियते समस्तैः ॥ २६७ ॥

उद्वेजिता भृशमिमेऽपि भवन्ति लोके
तत्रापि सोवियतरूसबहिःस्थितैस्तैः ।
नानाविधाः कठिनताः सहनीयभावं
नेया भवन्ति महता सह साहसेन ॥ २६८ ॥

सा श्लाघितास्ति मयका बलिदानशक्ति-
स्तेऽभाग्यकोटिजनवद्विपदः सहन्ते ।
न श्रद्धया क्वचन तेऽन्धवदाश्रयन्ते
क्रूरं समग्रबलशक्तिधरञ्च दैवम् ॥ २६९ ॥

ते वीरपुंवदिह सम्मुखतां वहन्ते
सर्वापदामिह हि गौरवमस्ति तेषाम् ।
घोरैर्मरुद्भिरिव नाम चलन्ति तेऽन्ये,
नैते कदापि गुरवो गिरयः कथञ्चित् ॥ २७० ॥

रूसे समाजरचनाविषयाः प्रयोगाः
प्राप्ताः फलाफलमतो न स मार्क्सवादः ।
प्रत्यक्षतः कमपि धारयते प्रभावं
साफल्यमस्ति हि परिस्थितिगामि नित्यम् ॥ २७१ ॥

सम्भाव्यते त्वननुकूलपरिस्थितीनां
वा राष्ट्रशक्तिसमवेतबलस्य हेतोः ।
नष्टाः समाजरचनाविषयाः प्रयोगा
यद्यप्यमुष्य बहुसम्भवतापि नास्ति ॥ २७२ ॥

सामाजिकस्य महतः परिवर्तनस्य
तस्यास्ति नाम महिमा तु चिरस्थिरोऽयम् ।
तत्राभवद्यदपि तत्प्रति मे स्वभावा-
दासीत्किलारुचिरथापि तदस्मि वेद्मि ॥ २७३ ॥

सन्देशमस्य जगतो वितनोति कञ्चि-
दाशामयं बहुतरञ्च बहूत्तमञ्च ।
रूसस्य वेद्मि न समग्रमथ स्वमस्य
निर्णायकं न गणयामि तथोपयुक्तम् ॥ २७४ ॥

शङ्के तु चेतसि कदाचिदतीव हिंसा
दान्त्योः स वातवलयो जहितान्न चिह्नम् ।
यस्मादनुव्रजनतो निजपृष्ठरक्षा
स्याद्दुशःका सपदि रूसनिवासभाजाम् ॥ २७५ ॥

सर्वातिशायि पुनरस्तु विशेषवस्तु
रूसस्य भाग्यरचना व्रतिनां तु पक्षे ।
यत्ते प्रमादपदतः स्वकृतादपीह
शिक्षां सदाऽऽददति तत्र विहाय लज्जाम् ॥ २७६ ॥

ते पृष्ठतोऽप्यपसरन्ति पदं, पुनश्चा
प्यग्रेसृता विदधते रचनां नवीनाम् ।
आदर्शमेव च पुरः सततं धरन्तो
राष्ट्रान्तरीयमपि चादधतेऽत्र सङ्गम् ॥ २७७ ॥

राष्ट्रान्तरीयमपि कञ्चन साम्यवादि-
सङ्घं प्रचालितवतां विफलत्वमासीत् ।
तस्य प्रवृत्तिरधुना भुवि मन्दमन्दं
याता किलोपमितिवस्त्वपसारकल्पम् ॥ २७८ ॥

श्रीभारते सपदि साम्यसमाजवादौ
दूरस्थितौ न घटनाबहिरुद्भवास्तौ ।
चेदानयन्ति सहसा विवशीकृतेऽस्मि-
स्तर्ह्यागमः किल तयोरतिदूर आस्ते ॥ २७९ ॥

नैतैश्च साम्यमतिसम्मुखता विधेया
सा सम्प्रदायमतिरेव पुरापनेया।
मत्यानया हि गहने तमसि प्रलीनो
देशोऽस्त्यसौ भरतवंशसमुद्भवानाम् ॥ २८० ॥

व्यर्थासु सम्प्रति कथासु तथा छलेषु
वा कौशलेषु निजशक्तिमिमे प्रणाश्य।
मान्तापयन्ति पुरुषार्थिजनाः परेषा-
मेवापकर्षविधये भृशमुद्यतन्ते ॥ २८१ ॥

स्युस्तेषु तेऽपि विरला जगदुद्धृतौ चा
प्यत्युज्ज्वलीकृतिविधौ च रुचिं दधानाः।
आकस्मिकी स्थितिरियं न सनातनेति
काले तदर्थमुदयो भवतीश्वराणाम् ॥ २८२ ॥

काङ्ग्रेसमेतदमुतस्तमसोऽतिदूरे
किन्त्वस्ति तद्दृगयनं किमपीह निम्नम्।
अस्मै तथा च विषयान्तरहेतवे च
तच्चिन्तयत्यहह तत्स्तरतोऽपि तादृक् ॥ २८३ ॥

किन्तु क्रमेण तदनेन भवेत्कृतार्थ-
मित्यस्ति साम्प्रतमसम्भवमेव सत्यम्।
आस्ते च तत्प्रतिनिधिः किल निम्नमध्य-
वर्गस्य तारवचनस्य च क्रान्तिकर्तुः ॥ २८४ ॥

एतत्प्रतीतिविषयेऽस्ति यथा बलिष्ठं
याथार्थ्यतोऽस्ति न तथाऽपितु निर्बलं तत्।
शक्तिद्वयेन युगपत्किल दम्यमान-
मेकास्ति यत्र सबला च पराऽबलास्ति ॥ २८५ ॥

पूर्वा सुरक्षिततराथ, पराक्रमेण
संवर्धमानविभवेति किलास्ति सत्ता।
शङ्काख्यपङ्कपतिता तु भविष्यतीयं
कां वा गमिष्यति दशामिति चिन्तयामः ॥ २८६ ॥

यावच्च नेयमयते निजलक्ष्यमेकं
स्वातन्त्र्यमेति निजराष्ट्रभवं न यावत् ।
तावत्सुरक्षितगणान् प्रति यातुमस्याः
शक्तिर्न हन्त भुवि जागरितेति सत्यम् ।। २८७ ।।

स्वातन्त्र्यलाभविषये सफलत्वतोऽपि
पूर्वं प्रवर्धितुमिहार्हति शक्तिरन्या ।
आकर्षितुं स्वदिशि चेदमथास्य मन्दं
मन्दं पदं समधिगन्तुमपीश्वरा स्यात् ।। २८८ ।।

एतत्तु सम्भवति यावदिहांशतोऽपि
स्वातन्त्र्यमेतदिह सिद्ध्यति राष्ट्रियं नः ।
काङ्ग्रेसमेव तदिदं प्रमुखं समस्त
शक्त्यन्तरेषु पदमेष्यति तावदेकम् ।। २८९ ।।

हिंसात्मकं किमपि कर्म च शक्तिनाशो-
ऽनावश्यकः क्षतिकरः प्रतिभाति चायम् ।
एकत्रहिंसनकथासु सतीष्वपीह
मन्ये प्रवृत्तिरियमत्र वृथा मता स्यात् ।। २९० ।।

मार्गो हि हिंसनमयः प्रतिहिंसनात्मा-
ऽस्मान् दिग्भ्रमे भ्रमयितुं भविता स चालम् ।
तस्माद्विनिर्गमनमत्र सुदुष्करं स्या
त्सोऽयं विनेष्यति न कुत्रचनापि चास्मान् ।। २९१ ।।

दिश्यामहेऽत्र बहुधा—'मिलिता भवेम,
संयुक्तमेव करवाम तथा विरोधम् ।
श्रीनायडूरखिलया निजकाव्यमय्या
तीव्रं करोति भुवि भावनया प्रचारम् ।। २९२ ।।

प्रेमैकतादिविषयेषु महत्त्वमेषा
सन्दर्शयेदिति कवित्वकृतोऽधिकारः ।
निश्शङ्कमेव सततं भुवि वाञ्छनीयः
संयुक्त एष नयशालितया विरोधः ।। २९३ ।।

विश्लेषणे तु विहिते किल वाक्यमेत-
दस्मान्नयेत्परिणतिं पुनरेकरूपाम् ।
यद्वाञ्छ्यते तदिह भिन्नमतेषु सन्धि-
र्मूर्धन्यपुंस्वथ परस्परमैकमत्यम् ।। २९४ ।।

अस्यैकमत्यसुविधेः परिणामतश्च
नम्राः सशङ्कमतयश्च पुरस्सराः स्युः ।
ते निर्णयेयुरपि लक्ष्यमथात्र लोकान्
पन्थानमप्यहह ! ते भुवि दर्शयेयुः ।। २९५ ।।

यावद्विदन्ति बहवः किल तेषु पुंसु
नान्दोलनं बहुविधं बहवः सहन्ते ।
तस्माद्भवेत्परिणतिर्न तथा विरोधः
संयुक्तमेव किमपीह चिरं स्थिरत्वम् ।। २९६ ।।

इत्थं सम तु हलनं चलनं निरुद्धं
संयुक्तया स्थिरतया गलितो विरोधः ।
संयुक्तपृष्ठपरिदर्शनमेव चास्याः
काचिद्भवेत्परिणतिर्जडतोपहास्या ।। २९७ ।।

स्यान्मूर्खतैव यदि कोऽपि वदेद्यदन्यैः
साकं तु सन्धिसहयोगमिमे न कुर्मः ।
गूढे नितान्तमिह जीवनराजनीती
तद्दुःशकास्ति सरलैरुभयोः प्रतीतिः ।। २९८ ।।

लेनिन् समो दृढमतिः पुरुषोऽप्यवादीद्—
'अत्रैकमत्यकलनात्स्मृतितोऽपसारात् ।
स्यादान्तराग्रसरणं मनसो लघुत्वं'
तत्रैकमत्यविषये दृढभाषयेदम् ।। २९९ ।।

अस्त्यैकमत्यकलनं समपेक्षितं नः
किन्त्वातुरीभवनमत्र तथा न युक्तम् ।
कुर्याम तत्परिहरेम तदित्यमुख्यं
मुख्यस्तु मुख्यकृतिमुख्यपदाधिरोहः ।। ३०० ।।

गौणा भजन्तु न कदापि पदं तु मुख्यं
सिद्धान्तलक्ष्यदृढता यदि रक्षिता स्यात्।
अस्थायिसन्धिरपि नो कुरुतेऽत्र हानिं
शङ्क्या तु लक्ष्यगलितिर्विषमानुरोधात् ॥ ३०१ ॥

चेत्सन्त्यजेम समयान्निजलक्ष्ययुक्तां-
स्तेषां प्रसादनविधौ नवसन्धिहेतोः।
भूयोऽप्रसादनमिहास्ति वरं जनानां
मार्गच्युतिः क्षतिकरी हि ततोऽधिकं स्यात् ॥ ३०२ ॥

सामान्यतोऽस्मि विलिखन् घटनासु सद्यो-
जातासु तात्त्विकदृशा बहुलांशतोऽहम्।
दूरस्थदर्शकवदेष तटस्थभावे
सन्यत्नवान् परिहरन्निह पक्षपातम् ॥ ३०३ ॥

मन्ये निमन्त्रणमवाप्य तु कर्म कर्तुं
नो कौतुकी जन इव प्रभवामि धर्तुम्।
आरोपितं मयि तु दूषणमेव कैश्चि
द्यत्प्रेरणामपि विना प्रविशामि सद्यः ॥ ३०४ ॥

कर्तास्मि किं किमथ कर्तुमहं स्वदेश्यान्
देक्ष्यामि चेति नहि निश्चयतोऽस्ति वाच्यम्।
प्रायः समाजकृतिलग्नजनस्य तर्क-
वृत्तिर्हि मां समयतः प्रथमं रुणद्धि ॥ ३०५ ॥

बद्धो भवामि वचसा सहसा न येन,
सत्यं वदामि यदि वेद्मि न वस्तुतोऽहम्।
वेत्तुं च यत्नमपि नैव करोमि कञ्चि-
च्छक्तो न कर्तुमिह चेत्किमु विह्वलः स्याम् ॥ ३०६ ॥

एकांशतो मयि समेत्यपि विह्वलत्वं
किन्त्वत्र साम्प्रतमहं निरुपाय एव।
कारागृहेऽस्मि किल यावदहं च ताव
त्तात्कालिकं कृतिचयं प्रयते विहातुम् ॥ ३०७ ॥

कारासु सर्वहलनाचलनात्परस्ता-
त्स्थातव्यमत्र घटनाविवशेन पुंसा ।
कार्या च भाति घटनाघटनप्रतीक्षा
नो कर्मकर्तृपदवी त्ववलम्बनीया ।। ३०८ ।।

देशस्य चास्य जगतश्च समाजराज-
नीतिश्रितासु विलिखामि समस्यकासु ।
कारागृहस्य लघुनो जगतो मदीय-
गेहीकृतस्य ननु का ममतास्ति तासु ।। ३०९ ।।

स्याद्वन्दिनामतिरुचिः स्वविमुक्तिथस्ते
नैन्यादिषूपगतवन्दिजनो ह्यपृच्छत् ।
सा मुक्तिदात्र जुगली भविता कदेति ?
तेषां विवक्षितमहो जुबलीत्यबोधम् ।। ३१० ।।

ते षष्ठजार्जसिलवरजुबलीति नाम्ना
मान्यस्य तस्य दिवसस्य कृतेऽभ्यपृच्छन् ।
ते जानते स्म दिवसे किल तत्र केचि
न्मुक्त्याऽपरे च समयाल्पतया श्रिताः स्युः ।। ३११ ।।

तस्मात्समोऽपि चिरदण्डधरो विशेषाद्
वन्दी समुत्सुकतरो जुबलीकृतेऽभूत् ।
शिष्टेश्च संसदयनाच्च समाजसाम्य-
वादद्वयाच्च जुगली गुरुरास्त तेषाम् ।। ३१२ ।।

श्रृङ्गेरीमठधिष्ठितात् भगवतः श्री शङ्कराचार्यतः
प्राप्ताशीर्वचनः कर्विविहितवान् पद्यैस्तदर्चाञ्च यः ।
तेनैवारचितेऽत्र नेहरुमहाकाव्येऽतिभव्ये गतः
सद्योजातघटो मितो ऋषिरसै सर्गो निसर्गोज्ज्वलः

उपसंहारः

भुजङ्गप्रयातम्

अष्टषष्टः सर्गः

'वयं कर्म कर्तुं किलादेशिताः स्मः
स्वकार्येषु साफल्यलाभेऽस्वतन्त्राः ।
इति श्रीमता तालमुत्पण्डितेन प्रकाशी-
कृतं गीतयोक्तं कदाचित् ॥ १ ॥

कथान्तं गतोऽहं किलाहन्तयेयं
समेता मदीयाऽसती वा सती वा ।
समाप्तेयमाल्मोडकारागृहेऽद्य
चतुर्दश्यसौ फरवरीपञ्चत्रिंशे ॥ २ ॥

त्रिमास्यास्तु पूर्वं ममैवात्र जन्म-
दिनं पञ्चचत्वारिंशं मानितं स्वैः ।
मया जीवनीयं बहून्यत्र वर्षा
ण्यथापीति मन्ये भवद्भावनाभिः ॥ ३ ॥

कदाचित्कदाचिद्भयः स्मर्यतेऽदः
कदाचिच्छ्रमश्चिन्त्यते चेतसायम् ।
परं तन्मुहूर्तात्परं स्वं बलेना
भृतं भावये चेतनोत्साहजेन ॥ ४ ॥

शरीरं ममेदं दृढं सङ्कटत्वा
न्मनोऽपि क्षमं सोढुमाघातपातम् ।
अतोऽहं चिरं जीवितुं निश्चितोऽस्मि
न चेत्किञ्चिदाकस्मिकं सङ्कटेत ॥ ५ ॥

भविष्ये लिखेयं किमप्यत्र, तस्मा-
त्पुरा तस्य चावश्यको भोग एव ।
मदीया इमा जीवनोत्थाश्च वार्ता
न रोमाञ्चकर्यो न चाश्चर्यकर्यः ॥ ६ ॥

अनेकेषु वर्षेषु कारानिवासो
न वै साहसं स्यान्न तत्कार्यमेव ।
न चापूर्वता तत्र काचित्किलैषु
सहस्रं भगिन्योऽप्यधुर्भ्रातरस्तत् ॥ ७ ॥

अतो भिन्नभावा विषादोऽथ हर्षः
प्रचण्डान्यथान्दोलनानीह तानि ।
पुनः पारवश्याच्च कारानिवासो
न मे तत्कथाङ्गं किलास्माकमेतत् ॥ ८ ॥

समूहस्य यस्यास्म्यहं व्यक्तिरेका
सहानेन कार्याणि कुर्वाण आसम् ।
कदाचिन्नयंस्तं गतो नेतृभावा
त्कदाचिद्विनेयो भवन् भावितोऽस्मि ॥ ९ ॥

व्यतीतं यदन्योन्यभिन्नं समेषां
समूहस्य मध्ये पृथग्जीवनं नः ।
अनेकैरहो रूपकाऽऽबन्धनैस्त-
त्कृतं वै नटैर्नाटकं चैकमेतत् ॥ १० ॥

कृतं यद्यदस्माभिरस्मिंश्च रङ्गे
ध्रुवे तत्र वस्तुन्यभूत्तीव्रनिष्ठा ।
तया क्षुद्रयाऽहन्तया वञ्चितैस्त
त्समुत्थाय शक्तिर्महत्त्वञ्च लब्धे ॥ ११ ॥

इदं नान्यथा शक्यमासीदवाप्तुं
यदस्माभिरस्मिन् स्वसौभाग्यमाप्तम् ।
मता पूर्णता जीवनस्यास्य भूयः
क्रियाभिः किलादर्शरक्षान्विताभिः ॥ १२ ॥

इदं चाभिदृष्टं किलास्माद्विभिन्नं
द्वितीयं जगज्जीवनं तावदास्ते ।
मुधा यत्र दैन्यं परिग्राह्यमास्ते
तथाऽऽदर्शजातं परित्याज्यमेव ॥ १३ ॥

अहो पाशवस्याग्रतो नम्यतेऽस्मि-
न्वृथा हन्यते चात्र सन्तोषलेशः ।
सदैवात्र चान्तर्व्यथाभिः प्रपूर्णं
मनो धारणीयं भवत्यर्थिकल्पैः ॥ १४ ॥

अमीष्वेव वर्षेष्वमूल्यो ममाभू
न्महाँल्लाभ एषोऽथ लाभान्तराढ्यः ।
अहं जीवनं ज्ञातवानस्मि भूयो
रसाढ्यञ्च किञ्चिन्महत्त्वोपयुक्तम् ॥ १५ ॥

यतोऽस्मिन्सुबह्वस्ति नः शिक्षणीयं
पुनर्भूय एवास्ति चास्मिन्विधेयम् ।
क्रमेणोन्नतिः साधनीयेति भावः
पुराऽऽसीदिदानीञ्च मय्यस्ति रूढः ॥ १६ ॥

अनेनैव भावेन नानाप्रवृत्ति-
ष्वथो पुस्तकेष्वप्यथो लेखनेषु ।
मया प्राप्यते चात्र पाठे रसो यः
स एतद्विधस्तेतरां जीवनीयम् ॥ १७ ॥

ममास्यां कथायां मया तत्र तत्र
स्ववृत्ते विचारांश्च भावान् समस्तान् ।
इहालेखितुं, चानुभूतीः समग्रा
अभिव्यञ्जितुञ्चादृतोऽभूत्प्रयत्नः ॥ १८ ॥

अतीता दशाश्चेतसो दुष्प्रबोध्याः
स्मृतेराश्रयेणापि हन्तातिमात्रम् ।
न विस्मर्तुमर्हाश्च तत्कालभूता
उदन्ताः कथञ्चिच्च लोके प्रबुद्धैः ॥ १९ ॥

ममारम्भिकाणां दिनानामिहैवं-
विधे वर्णने प्राग्विचाराः प्रभूताः ।
मदीयं तु लक्ष्यं स्वलाभार्थमेवा-
ङ्कनं मानसिक्या वितत्याः किलासीत् ॥ २० ॥

न चालेखि कीदृक्कदाऽऽसं किलेति
न हीष्टं ममेदं प्रकाशार्थमासीत् ।
कदा कीदृगासं बुभूषुः किलेति
मया कल्पितं कीदृशत्वं कदेति ॥ २१ ॥

कियन्मासपूर्वं सभायां किलोक्तं
सि० पी० रामस्वामीतिनाम्नैयरेण ।
यथा 'नेहरूर्भीषणोऽयं, न चेतो-
दशानां वहत्येष नः प्रातिनिध्यम् ॥ २२ ॥

यतस्त्यक्तवानेष भूयो यतश्च
दृढं विश्वसित्येष आदर्शवादी ।
अतस्तन्मतेनात्मसम्मोहनं मे
ऽस्ति जातं ततो नास्मि निर्णेतुमर्हः ॥ २३ ॥

अहं व्यक्तिगामिन्यथास्मिन्मते तं
विवादाय नैवाह्वयामि क्वचित्तु ।
चिरान्नो मिथः स्वोऽत्र साक्षात्कृतौ य
त्पुराहोमरूले स्थितौ मन्त्रिभावात् ॥ २४ ॥

ततोऽनैकवृत्तानि वृत्तानि चायं
धृतावर्तसोपानमारुह्य रूढः ।
नभश्चुम्बिनः स्तम्भशृङ्गस्य मौलिं,
धरायां स्थितोऽहं जनः पार्थिवोऽस्मि ॥ २५ ॥

समानेऽत्र राष्ट्रे वसावः किलेति
स्थितं साम्यमित्यावयोरद्य यावत् ।
स चाद्यास्ति देशे ब्रिटिश्शासनस्य
महापक्षपाती गताभ्यः समाभ्यः ॥ २६ ॥

स वै भारतेऽस्माद् बहिश्चापि देशे
किलैकस्य सत्तां ब्रवीत्यर्चनीयाम् ।
स्वयं साम्प्रतं चैकराज्यस्य रत्नं
चिरत्नं प्रभाप्रोज्ज्वलं चास्ति सोऽयम् ॥ २७ ॥

अनेकांशतो दध्वहे दृष्टिभेदं
परं सम्मतौ स्याव साधारणेषु।
जनप्रातिनिध्याय नार्हामि नूनं
भ्रमो नास्ति मे कश्चनाप्येतदुक्तौ ॥ २८ ॥

विशङ्काऽऽत्मगैषा कदाचिन्मनो मे
स्पृशत्यस्ति किं कस्यचित्प्रातिनिध्यम्।
समाधानमाप्नोमि चान्ते यदेष
प्रभुर्नास्मि वोढुं क्वचित्प्रातिनिध्यम् ॥ २९ ॥

मयीमे कृपाभावमैत्र्यादिभावै
रभिव्यञ्जयन्ते जनाः पक्षपातम्।
परं पश्चिमं पूर्वमेतन्मिलित्वो-
भयं निर्ममे वस्तुतो मामपूर्वम् ॥ ३० ॥

अहं चिन्तयन् क्वापि नात्मानमीक्षे
स्वकीये गृहे वाऽऽश्रये वा वसन्तम्।
मदीयो विचारो मदीया च दृष्टि
र्न पूर्वानुगौ स्तौ न तौ पश्चिमात्तौ ॥ ३१ ॥

परं मातृभूमिः स्ववत्सान्तराणा-
मिव भ्राजते मामके मानसेऽपि।
क्वचिच्चान्तरे पूर्वपुंसानुगास्ते
निलीय स्थिता विप्रसंस्कारलेशाः ॥ ३२ ॥

न मुक्ति किलाप्तुं समर्थोऽस्मि तेभ्यो
न चैतेभ्य एवाधुना सञ्चितेभ्यः।
नवेभ्योऽप्यभिज्ञानभूतेभ्य एते
ममाङ्गानि जातानि नामोभयेऽपि ॥ ३३ ॥

इमे पश्चिमं पूर्वमासञ्जितुं मे
सहाया, न वै जीवने वर्तनेऽपि।
सदैकाकिभावं तदा हार्दिकं मे
समुत्पादयन्तीह ये लोकबाह्यम् ॥ ३४ ॥

विदेशेषु वैदेशिकोऽज्ञातकल्पः
स्वदेशे च देशाद्विनिर्वासितोऽहम् ।
न तेषां भवाम्येष जातु स्वकीय-
स्तथैतस्य भाम्येव भूयोऽन्यदीयः ॥ ३५ ॥

सुदूरे स्थितः पर्वतो नः सुगम्यः
सुखारोहणश्चापि भात्यन्तरेण ।
तदीयञ्च शृङ्गं मुदावाहनं नः
प्रकुर्वत्किलाभाति सोत्कण्ठकण्ठम् ॥ ३६ ॥

परं तस्य पार्श्वे यथैते प्रयाम-
स्तथा दुर्गमत्वं प्रयाति प्रतीतिम् ।
तथैवास्य शृङ्गञ्च सान्द्रेषु मेघे-
ष्वथास्मानमाभाति सङ्गोपयच्च ॥ ३७ ॥

तथापि प्रयत्नस्तदारोहणस्य
स्वकं मूल्यमेकं बिभर्त्येव भव्यम् ।
विचित्रं तथाऽऽनन्दमस्मिन्पवित्रं
मनस्तोषमेकञ्च विन्दाम एव ॥ ३८ ॥

तथा जीवनस्यास्ति मूल्यं प्रयत्ने
फले नास्ति तत्सर्वथैवान्यतन्त्रे ।
अहो दुष्करो बोद्धुमध्वास्ति साधुः
कदाऽसाधुमध्वानमुत्सृज्य यामः ॥ ३९ ॥

इहात्यन्तनम्रो लिखाम्यन्तिमानि
वचांस्यञ्जसा सौकरातानि तानि ।
'न जानामि मृत्युं भवेन्मञ्जुलं त-
सतोऽहं न किञ्चिद्बिभेमीह जातु ॥ ४० ॥

परं वेद्मि यन्मानवस्य स्वकर्मो-
पभोगादिह प्लायनं नास्ति सम्यक् ।
असम्यक्तया ज्ञाततोऽहं समीचः
स्वकार्यस्य सत्कल्पनं साध्ववैमि ॥ ४१ ॥

मया यापितानीह वर्षाणि कारा-
गृहेष्वेकलेन स्थितेनाऽऽस्थितेन ।
विचारेषु मग्नेन नानतंबश्च
क्रमादागता निर्गताश्चापि दृष्टाः ॥ ४२ ॥

विलीना इदानीञ्च ते विस्मृतो मे,
प्रपूर्णास्तथा क्षीयमाणाश्च चन्द्राः ।
कियत्यश्च कम्पोज्ज्वला हन्त तारा
अबाधं भ्रमन्त्योऽत्र दृष्टा अजस्रम् ॥ ४३ ॥

मदीयस्य ते यौवनस्यात्र धस्राः
कियन्तश्चिताभस्मवद्विप्रकीर्णाः ।
कियन्तश्च तेषामिमे प्रेतभावा-
त्समुत्थाय कष्टां स्मृतिं बोधयन्ति ॥ ४४ ॥

शृणोम्येतदुक्तीश्च कर्णान्तिकोक्ताः—
यदस्मिन्ननुभूत्किं हितं किञ्च नेति ।
अशङ्कोऽस्मि चित्ते च तस्योत्तरार्थं
परं दुर्लभा जीवनावृत्तिरन्या ॥ ४५ ॥

यदि स्वानुभूत्या सह ज्ञानमेत-
त्समाश्रित्य तां प्राप्नुयां नूनमेषः ।
स्वके जीवनेऽहं परीवृत्तयेऽद्धा
प्रयत्नाननेकान्नवानाश्रयेयम् ॥ ४६ ॥

न यत्किञ्च पूर्वं कृतं तत्तदद्या-
खिलं कर्तुमत्र प्रयत्नं विदध्याम् ।
परं सर्वगेष्वत्र मन्निर्णयेषु
न कश्चित्परीवृत्तिलेशोऽपि भूयात् ॥ ४७ ॥

असन्दिग्धमेतानहं नालमस्मि
परीवृत्तिभिर्योक्तुमद्धा बलिष्ठान् ।
कदाचिन्मदूर्ध्वंस्थया हन्त शक्त्या
बलादेष तान्प्रत्यहं प्रेषितोऽस्मि ॥ ४८ ॥

मदीयस्य दण्डस्य जातोऽद्य वर्षो
व्यतीतो द्वयोर्वर्षयोरेष आद्यः।
परः पूर्ण एवास्ति शिष्टः कृपाया
विशेषान्नहि न्यूनतामेति कालः ॥ ४९ ॥

न चैतावदेव, व्यतीते त्वगस्ते
यदेकादशाहान्यवात्सं बहिःस्थः।
प्रयुक्तानि तानि स्फुटं मेऽत्र दण्डे,
बहिर्यामि कारागृहाद् वीतकालः ॥ ५० ॥

ततः किं भवेदित्यहं नैव जाने
मनस्येव भावः समुत्तिष्ठते मे।
यदध्याय एकः समाप्तिं गतोऽयं
परश्चाधुनाऽऽरभ्यते जीवनस्य ॥ ५१ ॥

इह स्याच्च यन्नानुमातुं क्षमे तत्
कथायां मदीयस्य वै जीवनस्य।
ममाख्यायिकायाः समाप्तानि पृष्ठा-
न्यहो स्पष्टकष्टानि धैर्याङ्कितानि ॥ ५२ ॥

अथेमं कथांशं स्थितं कञ्चिदन्यं
पुनः प्रारम्भे स्वाहस्वार्डे स्थितोऽहम्।
दिनेक्तूबरे पञ्चविंशे च भूत-
गुणेऽब्देऽथ वेडन्यवीलर्पदेऽस्मिन् ॥ ५३ ॥

स्थितं किञ्चिदन्यद् गते मास एव
मदीया हि पत्नी चिकित्सानिमित्तम्।
भुवालीत एतास्ति यूरोपमस्या
बहिर्दर्शनार्थं गतिर्मेऽवरुद्धा ॥ ५४ ॥

न सम्प्रत्यहं मृत्तरीरोहणः सन्
गिरीणां सरण्यां सरिष्यामि पश्चात्।
इयञ्चालमोडास्थिता मेऽद्य कारा
भृशं शून्यशून्येव जाता चिराय ॥ ५५ ॥

कुवेटासु भूकम्पवृत्तान्त आरा
त्समस्तान्यवार्ताः प्रविस्मार्य सृप्तः ।
परं शासनं भारतीयं विचित्राः
स्वरीतीर्न विस्मारयत्यद्य यावत् ॥ ५६ ॥

इहैव श्रुतं यत्स काग्रेससंस
त्सभाध्यक्षराजेन्द्रबाबूरुदारः ।
विदन्नत्र भूकम्पसाहाय्यरीति
कुवेटागमायामुनास्तै निषिद्धः ॥ ५७ ॥

न गान्धिर्न चान्योऽपि कश्चित्प्रसिद्धो
जनः सर्वजन्योऽत्र गन्तुं मतोऽभूत् ।
प्रलीनानि भूकम्पवृत्तान्तलेखा-
दनेकैश्च पत्रैः स्वरक्षाधनानि ॥ ५८ ॥

यतो दृश्यते तत्र सैन्यप्रवृत्ति-
स्तथा पौरुषी दृष्टिरादृश्यतेऽत्र ।
सभायां समित्याञ्च शिष्टौ समन्ता-
त्प्रसीमान्तबम्वर्षणे सैव वृत्तिः ॥ ५९ ॥

विशेषादिदं भाति यद्भारतेऽस्मिन्
व्रिटिश्शासने च प्रजास्वस्ति युद्धम् ।
मता पौरुषी शक्तिरावश्यकीयं
तया क्रान्तमेतज्जगत्किन्तु हेयम् ॥ ६० ॥

यदुक्तं प्रयोगो हि शक्तेरुदग्रो
नियन्तुर्विनाशाय पाताय वा स्यात् ।
तथा पात्रमेतस्य भूयोऽवमानाद्
विहायोचितं मार्गमुद्दण्डितं स्यात् ॥ ६१ ॥

इदानीमिहोच्चासु सेवासु युक्तै-
र्विशेषात्स्थितैः पौरुषास्थासु लोकैः ।
इहोपार्जितान्नैतिकाद् बौद्धिकाद्वा
प्रपातात्परं नैक्ष्यतोल्लेखनीयम् ॥ ६२ ॥

प्रपातश्च सोऽयं किलोच्चाधिकारि-
ष्वथो कैङ्करीमाश्रितेषु प्रसुप्तः ।
नवायां नियुक्तो स योग्येषु योग्यो
मतो यस्य वृत्तिः किलैतादृशी स्यात् ॥ ६३ ॥

चतुर्थी तु सैतम्बरी मद्विसृष्टे-
स्तिथिर्नूनमेवातिथिर्मे प्रतीता ।
यदा मोचितोऽञ्जोऽलमोडास्थकारा-
गृहादस्म्यकस्माद्‌गतो विस्मयान्तम् ॥ ६४ ॥

श्रुतं हन्त पत्नी मदीयातिरुग्णा
स्थिता स्वार्टस्वाल्डेऽथ वेडन्यवोले ।
ततः सार्धपञ्चात्र मासान् पुरैव
स्वतन्त्रीकृतोऽगां विमानैर्विदेशम् ॥ ६५ ॥

विदेशः स यूरोप एतर्ह्यशान्तः
समन्तात्स युद्धैरुपद्रुत्यघैश्च ।
तदीयेऽन्तरिक्षेऽर्थकष्दाम्बुवाहा
भ्रमन्तो विलोक्यन्त आच्छादयन्तः ॥ ६६ ॥

अबीसीनिया नूनमाक्रम्यमाणा
प्रजास्तत्स्थिताश्चापि बम्बवर्षणाभिः ।
अनेके मिथः सन्ति साम्राज्यवादा
नियुद्धाय सन्नद्धबद्धाणुशस्त्राः ॥ ६७ ॥

स्वकीयेषु चात्याचरन्नाङ्ग्लदेशः
स्वकीयेषु बम्बवर्षको निष्ठुरश्च ।
स साम्राज्यवादैकमूर्धा विशेषा
दभूद्राष्ट्रसङ्घं च शान्तिं प्रपन्नः ॥ ६८ ॥

इहान्धे वने शान्तिनिस्तब्धभावा-
धिकारे नहि स्वस्ति सन्दृष्टिमेति ।
समाप्नोति च फ्रांससीमामिहारा-
न्नगोपत्यकोत्थोऽपि नीहारभारः ॥ ६९ ॥

प्रपश्यामि हन्तायमस्मिंश्च दृश्ये
करोत्यावृतिं काञ्चिदावञ्चयित्रीम् ।
अहं विस्मये मग्नचित्तोऽस्मि चास्मात्
परं पारदेशो किमु स्यात् किमु स्यात् ।। ७० ।।

काष्ठहार-कृषीबल-श्रमजीविनस्त्रीनधिकृताभि-
र्हैन्दवीकविताभिरार्चन्माधुरीषु प्रकाशिताभिः ।

यः कविः, किल तेन रचिते नेहरूचरिताख्यकाव्ये-
ऽष्टाष्टषष्ठः सर्ग एष समाप्तिमेत्युपसंहरंस्तत् ।।

पञ्चवर्षानन्तरम्

मन्दाक्रान्ता

एकोनसप्ततः सर्गः

एतां गाथां हलनचलनाद् बाह्यतो दूरसंस्थः
कारागारेऽलिखमहमवस्थाय चैकाग्रचेताः ।
पूर्वञ्चित्ते मम बहुविधा वीचयः प्रादुरासन्
भावोल्लासा दधति हृदयं वन्दिनामव्यवस्थम् ।। १ ।।

मन्दं मन्दं मयि समुदभूद् वीचिरात्मेक्षणाख्या
तस्या हेतोः सपदि समभूत्कापि शान्तिर्ममान्तः ।
सैषा वीचिश्चपलमधुना कुत्र नेया मया स्यात् ?
तस्याः सम्यक्कथमिव कृतः स्याच्च लेखेन बन्धः ।। २ ।।

गाथाग्रन्थः पुनरपि मया वीक्ष्यमाणो ममाभात्
किं पौराणीं विलिखति कथामत्र कश्चिद्विपश्चित् ।
पञ्चाब्यासो किमपि जगती रूपमन्यत् प्रयाता
मुद्राङ्कं मे मनसि जहती सर्वथा कर्कशेऽपि ।। ३ ।।

कायेनाहं किल समभवं पञ्चवर्षाणि वृद्धः
किन्त्वाघातैर्मम मृदु मनः कर्कशं पक्वमासीत् ।
स्वीजर्देशे किल कमलया देहगेहो त्यजन्त्या
मद्गाथायाः प्रकरणमिदं हन्त ! नीतं समाप्तिम् ।। ४ ।।

अस्तित्वांशा मम समभवञ्जीवने येऽवशिष्टा-
स्ते निर्याता यदपरिचिता वाद्य मज्जीवनाङ्कात् ।
दुर्बोध्यं मेऽभवदिदमहो ! यन्न सा जीवतीति
प्राभूवं नो सहजविधया प्राप्तकालानुकूल्यः ।। ५ ।।

कार्ये युक्तः किल यतितवान् सान्त्वनां काञ्चिदाप्तुं
धावं धावं निजजनपदेऽस्मिन् दिगन्ताद्दिगन्तम् ।
सम्मर्दानां बहुतरकृतीनामथैकाकितायाः
किञ्चिच्चित्रं मिलनमभवज्जीवनं मे क्रमेण ।। ६ ।।

पश्चान्माता दिवमुपगता भूतकालानुबन्धे
सोऽन्त्यो बन्धोऽप्यहह समगात्सर्वथा छिन्नभावम् ।
पुत्रीन्दुर्मेऽपठदसविधे चाक्सफोर्डे विदेशे
साप्येकस्मिन् प्रकृतिमचिनोत्सच्चिकित्सालये स्वाम् ।। ७ ।।

भ्रान्तः श्रान्तो गृहमहमगां तर्ह्यभूवं विचित्रः
शून्ये तस्मिन् यदसहचरोऽनेडमूकोपमोऽस्थाम् ।
नो पश्येयं कमपि, कमपीहालपेयं न किञ्चित्
सम्मर्देभ्योऽभ्यलषमभितोऽत्यन्तमेकान्तभावम् ।। ८ ।।

नाहं शान्तिं परमुपगतो नापि कार्ये न चित्ते,
स्कन्धे न्यस्तैरथ च दलितो दुर्वहैः कार्यभारैः ।
नैकैः पक्षैर्न च बहुदलैर्नापि मित्रैर्घनिष्ठैः
केनाप्यासं नहि मुहुरहं सङ्गतिं प्राप्तुमुत्कः ।। ९ ।।

ऐच्छं यद्यत्तदलमभवन्नैव कर्तुं परेऽपि,
प्रैच्छन्यद्यत्तदुपकरणात्तानरुन्धे सदाऽहम् ।
वेगं प्राप्ते मनसि विमनस्कत्व-निःसाहसत्वे
एकाकी चाभवमिह समाजोपयुक्तात् स्वभावात् ।। १० ।।

सम्मर्दा मे प्रवचनमशृण्वन्महान्तो महान्तः
प्रोत्साहा मामथ नवनवाः पर्यगुः सर्वकालम् ।
यूरोपीयं मयि निहितवद्यं प्रभावं सुदूरं
पौरस्त्यं वा तमिह न जनेऽप्यत्र कुत्राप्यपश्यम् ।। ११ ।।

आघातो म्यूनिकपरिगतो दुःसहः सर्वथाऽऽसीत्
स्पेनध्वंसः किल मम कृतेऽभूत्स्वदुःखादनूनः ।
भीतैरेतैः क्रमिकदिवसैरागता मामकार्षुः
शङ्काक्रान्तं शिरसि पततां सङ्कटानां प्रसङ्गाः ।। १२ ।।

विश्वासं मे किल मलिनिमा पर्यभूद्यज्जगत्या
अस्याः किञ्चिद् ध्रुवमुदयते प्रोज्ज्वलं यद् भविष्यम् ।
तच्चेदानीमिदमुपगतं सङ्कटं ज्वालवक्त्रा
यूरोपीया अनलमभितो नाशनं तूद्गिरन्ति ।। १३ ।।

नो जानीमः स्फुटननटनं संश्रयेयुः कदा ते ?
इत्यादिभ्यः पृथगपगमः प्रस्तुतप्रश्नकेभ्यः ।
उत्पादो वा मनसि सहसा पर्यवेक्षाख्यवृत्तेः
पञ्चाब्द्या वा सुकृतकलनं चेति दुर्लेख्यमेतत् ॥ १४ ॥

चेत्तत्कर्तुं प्रभुरपि भवेयं तदा लेखनीयो
ग्रन्थोऽन्यः स्यात्खलु गुरुतरो, भूय एवास्ति वाच्यम् ।
तस्मात्तेषामिह विवरणं दातुमद्योद्यतिष्ये
येषामंशानभजमथवा यैः प्रभावः कृतो मे ॥ १४ ॥

नो जानेऽहं निकटमवसं मृत्युकाले स्वपत्न्या
अष्टाविंशे फरवरिदिने ख्रीष्टषट्त्रिंशवर्षे ।
तस्मात्पूर्वं विदितमभवद् यद् द्वितीया पुनर्मे
काङ्ग्रेसस्याधिपतिपदवी निश्चिता नेतृमुख्यैः ॥ १६ ॥

तत्कालं चागममहमिमं वायुयानेन देशं
मार्गे रोमन्यभवदुदयत्कौतुकैकानुभूतिः ।
प्रस्थानात्प्राक् समदिशदिदं कोऽपि यद् रोममार्गाद्
यास्यन् सिन्धोर्मुसलिनिमहं द्रष्टुमर्हो भवेयम् ॥ १७ ॥

फासिस्टाया विनयसरणेरस्मि घोरो विरोधी
किन्तु द्रष्टुं मुसलिनिमहं रोचमानस्तदासम् ।
कीदृक्षोऽसौ विकटघटनाचक्रधारीति वेत्तुं
वाञ्छन्नप्येतदनवसरे नास्य सम्पर्कमैच्छम् ॥ १८ ॥

मार्गे बाधा मम गुरुतराऽऽसीदबीसीनियाया-
माक्रान्तिः सेदृशमिलनतो लाभमेवाप्स्यतीति ।
श्रीगान्धीव प्रथित इह चानागतोऽपि क्रियेये-
त्याद्याशङ्का किल निरसिता, नागमं तां तथापि ॥ १९ ॥

गन्तव्यो मेऽभवदवशतो रोममार्गो यथा तत्
तत्रावात्सीद् रजनिमखिलां वायुयानं मयात्तम् ।
रोमप्राप्तं मुसलिनिकृते कश्चिदामन्त्रयन्मां
तत्राध्यक्षं, परमिह हठान्नो गतो नो गतोऽहम् ॥ २० ॥

अत्रायातः स्वकृतिषु परां व्यस्ततां प्राप्नुवं य-
द्यत्काङ्ग्रेसाधिपतिपदवीमध्यतिष्ठं सभायाम् ।
तेनैवाहं कतिपयशरद्वन्दिताच्छिन्नबन्धोऽ-
जानां रूपान्तरमुपगताऽनेकधा नः सभेति ।। २१ ।।

नूत्नां रेखां दलविरचनावेगिता भावनाश्चा-
न्तःसन्देहं क्वचन कटुतां क्वापि सङ्घर्षमैक्षे ।
नाहं तत्राधिकमवहितो व्यश्वसं नूनमेनां
साम्मुख्येन स्थितिमविकलां संस्करिष्ये किलेति ।। २२ ।।

कञ्चित्कालं दिशमभिमतां तां सभां सन्नयामी-
त्येतत्पश्यंस्त्वरितमविदं साधु सङ्घर्षदौःस्थ्यम् ।
अस्मच्चित्ते सपदि कटुतासंशयौ चागतौ यौ
तौ दुर्भाज्याविति निचितवांस्त्यागपत्रन्तु नादाम् ।। २३ ।।

तस्मिंस्तु स्यादधिकविकृता हन्त काङ्ग्रेससंसत्
सैषेत्याद्या मम समुदितास्तत्र नैके विकल्पाः ।
स्थायं स्थायं हृदि कतिपयैरभ्यशोचं तु मासै-
रस्मिन् प्रश्नेऽधिपतिपदतस्त्यागपत्रप्रदाने ।। २४ ।।

मित्रैः कार्यान्वयनसमितेरेव कार्यान्वितीनां
दौष्कर्यं मेऽधिगतमभवत्स्पष्टमेतत्तदाऽऽभात् ।
शङ्कादृष्ट्या मम तु सकला हन्त पश्यन्ति चेष्टा
यद्यप्यासन् क्वचिदपि कृतौ ते न मय्यप्रसन्नाः ।। २५ ।।

सामान्यां मद्गतिमथ दिशां नाभ्यरोचन्त चैते
दृष्ट्या ह्यासीदपरविधया युक्तियुक्तं तदेषाम् ।
काङ्ग्रेसस्याविचलित इह्रासं सदा निर्णयेषु
कांश्चित्त्वंशांस्तदनभिमतानन्वमोदं विशेषात् ।। २६ ।।

निर्णीतं तच्चरमगतितस्त्यागपत्रप्रदानं
श्रीगान्धिश्च प्रविदितमदीयाशयोऽकारि तूर्णम् ।
तस्मिन्पत्रेऽलिखमिह विदेशात्किलाभ्यागतोऽहं
श्रान्तः कार्यान्वयनसमितेरासनाभिर्भवाभि ।। २७ ।।

तासामास्ते परिणतिरियं क्षीयते कापि शक्ति-
र्वृद्धत्वं मे प्रतिघटनमत्राधिकञ्चावभाति ।
नैवाश्चर्यं यदि तु समितेरन्यसभ्या अपीदं
मन्येरन्, स्यात्तनुविकरणं कर्मणां बाधकं तत् ॥ २८ ॥

पश्चाद्वैदेशिकघटनया भारतापृक्तयाहं
भूयः प्राभाविषि च तमिमं निश्चयञ्चाप्यमुञ्चम् ।
स्पेने फ्रैंकोजनरलकृतस्यास्य विद्रोहकस्य
पृष्ठे साह्यं विशदमिटलीजर्मनौ स्वं दधाते ॥ २९ ॥

यूरोपीयो भवति समये विश्वगो विप्लवोऽयं
नूनं तस्मिन् पतितर्मिह् मे भारतं भावि भावि ।
ईदृक्षेऽस्मिन्विषमसमयेऽपेक्ष्यते सर्वसङ्गो
यावत्संस्थामबलयति मे साम्प्रतं त्यागपत्रम् ॥ ३० ॥

नैच्छं देशे जनयितुमहं सङ्कटं किञ्चिदन्त-
र्व्यंश्लिष्यं च स्थितिमहमिमां तन्न चाभूदसत्यम् ।
आसीदेषानुमितिरधुना यान्यवश्यं फलानि
हेतुस्तेषां सकलघटनाऽभूत्क्रियद्भिश्च वर्षैः ॥ ३१ ॥

स्पेनस्येदं मयि विहितवद् यं प्रभावं नियुद्धं
तेन स्पष्टं यदखिलजगत्प्रश्नबद्धोऽस्ति देशः ।
चीने स्पेने भरतभुवि यूरोप्यबीसीनियायां-
देशेऽन्यस्मिन् श्रयति विविधं रूपमेका समस्या ॥ ३२ ॥

विश्वं विश्वं कलितमनया राजनीत्यार्थमय्या
मूलेऽशुद्धे भवति न कथञ्चित्समाधानमस्याः ।
आसीत्सम्भावितमिदमिह प्रागदोमूलशुद्धेः
काचित्क्रान्तिः क्वचिदनुपतेच्चापतेत्काचिदापत् ॥ ३३ ॥

यद् भाषन्ते जगति न विभाज्यास्ति शान्तिः किलेति
स्वाधीनत्वं तदिदमपि तद्वद् विभाज्यं न विद्युः ।
दीर्घं कालं किमपि जगतोऽङ्गं स्वतन्त्रञ्च किञ्चिद्
अन्याधीनं सदिह निवसेदित्यसम्भाव्यमेव ॥ ३४ ॥

नाजीवादोऽघुषदिह तु यद्यच्च फासिस्टवादः
साम्राज्यस्याभवदियमहो मूलतो घोषणा सा।
आस्तामेतौ सपदि यमलावन्तरं त्वेतदासीत्
एतौ देशे झटिति नटतः किन्तु सोऽन्यो विदेशे ॥ ३५ ॥

स्वातन्त्र्यञ्चेज्जगति जनितं स्थापितं वा बुभूषे-
न्नाजीवादं सपदि निरसेत्तच्च फासिस्टवादम्।
ताभ्यां पूर्वं त्वविकलतया नामतोऽप्येष घोरो
दूरेऽपास्यः स्ववशिममनोभिः स साम्राज्यवादः ॥ ३६ ॥

सेयं वैदेशिकघटनया कापि शङ्कात्र देशे-
ऽन्येषां केषाञ्चिदपि हृदयं व्यापयामास सद्यः।
भारत्या काचन जनतयाऽदर्शि तस्यां रुचिर्या
काङ्ग्रेसेन प्रतिपदमदर्शीह तुल्यानुभूतिः ॥ ३७ ॥

चीनं स्पेनं प्रति पुनरबीसीनियां वा फिलस्ती
नादीन् देशान् प्रति जनतया ताञ्च तुल्यानुभूतिम्।
प्रत्यक्षीकारयितुमनुक्लृप्तं सहस्रं सभानां
काङ्ग्रेसेनाखिलजनरुचिर्वर्धिता प्रेक्षणैश्च ॥ ३८ ॥

चीने स्पेने प्रहितमभवद्भेषजान्नादि तेना-
न्ताराष्ट्रोत्थेष्वपि रुचिरभून्नस्तदान्दोलनेषु।
सङ्कीर्णायाः स्फुटमपगमाद् भावनायाः क्रमेण
प्रावर्धिष्ट स्तर इह महान् राष्ट्रियान्दोलनस्य ॥ ३९ ॥

वैदेशिक्या बहुघटनया भारतीयप्रजानां
सामान्येनाभवदिह न वै जीवनेषु प्रभावः।
एते ह्यासन्निजनिजविपन्मग्नचित्ता नितान्तं,
कष्टान्यासन् प्रतिदिनमपीद्धानि तत्कर्षकाणाम् ॥ ४० ॥

तद्दारिद्र्यं विकटमथ चान्येऽपि भारा अनेके
तान् मृद्नन्तो बहु ववृधिरे, तत्समस्याऽसमाऽऽसीत्।
काङ्ग्रेसेन क्रमगततया तत्र कार्यक्रमोऽपि
स्वीकृत्यैवाद्यतनरचनाव्यापकः कल्पितोऽभूत् ॥ ४१ ॥

यन्त्रागारश्रमिकनिवहोऽपि प्रशस्तामवस्थां
नैवाध्यास्त प्रतिदिनमतः कार्यरोधा इहासन् ।
पाल्यामन्ताध्यसितमिह तच्छासनं राजनीते-
र्विज्ञा बिज्ञापितगुणदुषश्चर्चयन्ति स्म भूयः ॥ ४२ ॥

प्रान्तेभ्योऽभूदिह वितरितः कोऽपि सामर्थ्यलेशः
कात्स्न्र्येनासीत्तदधिकरणे सर्वकाराधिपानाम् ।
प्रान्तैर्यत्रार्धजनगणतन्त्रैः सुयोक्तव्यमासी-
त्सामन्तीयैरतिशयितमर्यादकैः क्वापि राज्यैः ॥ ४३ ॥

केन्द्रीयाय प्रकृतरचनः शासनायैष सङ्घः
साम्राज्यं तद्ब्रिटिशकरगं चालयत्पूर्वकल्पम् ।
अङ्ग्रेजानां प्रतिविधिकृतस्वार्थरक्षार्थमासीत्
प्रस्तावोऽयं विकटघटनो नैव चार्यः कथञ्चित् ॥ ४४ ॥

काङ्ग्रेसं तन्न्यगकृत घृणापूर्वकं तद्विधानं
हिन्दुस्थाने न खलु कतमोऽप्यैच्छदेतन्मनस्वी ।
प्राक्प्रान्तीयं प्रचलितमभूदस्य तावत्स्वरूपं
नामञ्जूरीकृतमपि पुराकार्ष्मं निर्वाचनं तत् ॥ ४५ ॥

एतेन स्यान्मतदमनुजैर्लक्षकोट्या मितैस्तैः
सम्पर्कोऽन्यैरपि बहुजनैरित्यशंसाम चैनम् ।
एतन्निर्वाचनमिह मदर्थे प्रसङ्गो नवोऽभूद्
अर्थी नासं परमितरहेतोरटाट्यामकार्षम् ॥ ४६ ॥

मन्ये निर्वाचनपरिकरे किञ्चिदुल्लेखनीयं
कार्यं जातं यदहमचरं भूरि मासैश्चतुर्भिः ।
यत्पञ्चाशद्दशशतमितक्रोशभागानिहाध्वी
स्तैस्तैर्यानैः प्रतिदिशमगां दुर्गमान् ग्रामसङ्घान् ॥ ४७ ॥

पत्तिः क्वापि क्वचन च गजारोहणः क्वापि चाश्वा-
रोही क्वापि ह्यडुपवहनश्चोष्ट्रपृष्ठस्थितः सन् ।
मोटर्कारं क्वचन रयलं वायुयानं क्वचिच्चा-
रोहं लारीं क्वचन श्रितवान् स्टीमरं च द्विचकम् ॥ ४८ ॥

उच्चैरुच्चारकमथ नयन् यन्त्रराजं स्वसार्थं
व्याख्यानानि प्रतिदिशमकार्षं ह्यु पद्वादशानि।
सम्मर्दा ये पथि समभवन् या सभा वा सदस्यै-
रायोज्यन्त, प्रतिपदमहं तत्र वक्तुं प्रवृत्तः ॥ ४६ ॥

सम्मर्दास्ते क्वचन मिलिता लक्षलोकाः सभायां
सामान्येनाभवदिह पुनर्विंशतिः सत्सहस्रा।
कोटया लक्षैर्मितजनतया तत्र यात्राप्रसङ्गे
स्थाने स्थाने प्रवचनमिषात्प्राप्तसम्पर्क आसम् ॥ ५० ॥

हिन्दुस्थानोत्तरपरिधिमा दक्षिणाम्भोधिकूलं
धावं धावं प्रतिपदमहं पर्यटं तत्र तत्र।
मध्ये मध्ये त्वसुलभतया काचिदारामवेला
प्राप्ता वा स्यान्मयि बलमधाल्लोकनिर्वाचनौजः ॥ ५१ ॥

मद्देहस्तं श्रममसहतेत्यासमाश्चर्यमग्नो-
ऽस्माकं पक्षे बहुतरसहाया अभूवञ्जनौघाः।
कृत्स्ने देशे हलनचलनं चाभवत्सर्वतश्चा-
वेक्ष्यन्तोद्यन्नवगतिलसज्जीवनाः सर्वलोकाः ॥ ५२ ॥

नासीदान्दोलनमिदमहो केवलं नः कृते त-
न्नूनं निर्वाचनकरणतः किञ्चिदासीद्विशिष्टम्।
आसंस्तिस्रो न खलु मतदाः कोटयो लोकनीयाः
कोटिः कोटिः परिचयपथं प्रापणीयाऽपराऽपि ॥ ५३ ॥

एषा यात्राऽभवदतितरामायता संयता चा-
प्यंशस्त्वस्या अभवदितरोऽलोभयद्यो मनो मे।
आसीदेषा ननु मम कृते भारतं भारतीयां-
श्चाशेषेण ज्ञपयितुमिवाऽऽकल्पितः कोऽपि योगः ॥ ५४ ॥

अस्यां देश्यान्यहमकलयं रूपसाहस्रकाणि
प्रोद्भिन्नासीत्तदपि सकलेष्वस्य देशस्य मुद्रा।
मां पश्यन्तीः शतशतदृशः स्नेहपूर्णा अपश्यं
ज्ञातुं चैवायतिषि किममूरन्तरा बिभ्रतीति ॥ ५५ ॥

यावद्यावत्त्वधिकमधिकं देशमद्राक्षमेनं
तावत्तावन्मम मतिरभूद्यत्कियद्वेदनीयम् ।
निःसीमाकर्षणपरिभृतान्यस्य रूपाणि नाना-
रूपाण्यासन् ध्रुवमविदितान्येव मे भारतस्य ॥ ५६ ॥

मां दृष्ट्वेयं क्वचन कुरुते सुस्मितं, चोपहासं
भूयोऽबोधा क्वचन भवति प्रायशो भारताम्बा ।
इत्येवाभान्मम समयतः क्वापि सम्प्राप्य कालं
स्थानान्येष प्रविदिततराणीक्षणीयान्यपश्यम् ॥ ५७ ॥

दृष्ट्वाऽजन्ताचलगतगुहां सिन्धुकूलस्थितां वा
मोहेन्जोद्डोनगरमथ किञ्चित्प्रविष्टोऽस्म्यतीतम् ।
अभ्यास्तेऽसौ सपदि हृदये बोधिसत्त्वः समाधिं
नृत्यन्तीवालिखितवनिता रूपवत्यो हृदन्तः ॥ ५८ ॥

पश्चात्क्वापि श्रमिकवनिताः क्षेत्रकार्येषु लग्नाः
कूपाद्वारिग्रहणनिरताश्चावलोक्य क्षणार्धम् ।
विस्मित्याहं स्थिर इव भवामि स्मरामीह यत्ता
अप्येताभिः सदृशरचनास्तुल्यवेषाः किलासन् ॥ ५९ ॥

आस्तां निर्वाचनरणविधौ प्राप्य साफल्यमासन्
काङ्ग्रेसीयाः प्रथममिह वादे रताः, निश्चितन्तु- ।
स्वीकार्यं स्यादुपनतमिदं प्रान्तमन्त्रित्वमारा-
च्चेन्नः कार्ये पतति न करो राज्यपालादिकानाम् ॥ ६० ॥

ग्रीष्मे ब्रह्मेत्यभिजनपदं वा मलायाप्रदेशं
यातः कांश्चिद् व्यरममिह नाप्तावकाशोऽपि धस्रान् ।
यत्र क्वाप्यन्वगमदधिको मां जनानां समूहः
कार्यैश्चाहं सततमनिवार्यैरिहाक्रान्त आसम् ॥ ६१ ॥

किन्त्वासीन्मेऽधिकसुखकरी नूत्नवातोपभुक्ति-
र्ब्रह्मावासैर्युवभिरतिसंस्कारभाग्भिश्च मैत्री ।
हिन्दुस्थानाऽऽवसतिजनतो भिन्नतां धारयद्भि-
रप्यालब्धा बहुलयुगगा कापि मुद्रा किलासीत् ॥ ६२ ॥

हिन्दुस्थाने भृशमभिनवास्ताः समस्याः समायन्
काङ्ग्रेसस्याभवदिह तदा शासनं सर्वतोऽपि।
कारागारेष्वनयत जनो यः पुरानेकवर्षान्
मन्त्रीभूतः स इह समये साधु शास्ति स्म देशम् ॥ ६३ ॥

युक्तप्रान्ते मम विजयलक्ष्मीः स्वसा पण्डिताग्र्या
मन्त्री, देशे सकलमहिलामण्डले साऽद्वितीया।
काङ्ग्रेसीये सपदि समभून्मन्त्रिवर्गे च लाभो
यद् ग्रामीणाः किमपि सुविधासौख्यमाप्ता लघुत्वात् ॥ ६४ ॥

कृत्स्ने देशे नवमिव किमप्यागतं जीवनं यत्
कुर्वन्त्याशां श्रमिककृषकाः शीघ्रसाफल्यसिद्धेः।
बन्धान्मुक्ता अभुरिह चिराद्बन्दिनो राजनीते-
र्नैकाः प्राप्ता यदधिकृतयश्चापि पौरैर्नवीनाः ॥ ६५ ॥

काङ्ग्रेसीयैर्बहुबहुकृतं मन्त्रिभिस्तत्र कार्यं
कर्तुं चान्येऽप्यधिकविवशीभावमालम्भिताश्च।
किन्त्वेतैस्तत्सकलमपि यत्पूर्वशिष्ट्या सहैवा-
ऽऽसीत्कर्तव्यं किल विषमया चापि वैदेश्यया च ॥ ६६ ॥

सेवादानं न तदधिकृतं यावदासीत्ततोऽभू-
द्यद्वैमत्यं किमपि महतां राज्यपालैः सहैषाम्।
अन्ते त्वासीत्परमिह मतं मन्त्रिणां स्वीकृतं यत्
तेनोत्पत्त्या सह लयमगादेष तेषां विरोधः ॥ ६७ ॥

किन्तु प्राभूत्सिविलपुलिसाद्या पुराणीह सेवा
तस्याः पृष्ठे स्वयमिदमभूद् राज्यपालैर्विधानम्।
तच्छक्त्यानः प्रतिबलमिहानेकधा चानुभूतं
रुद्धा तेन प्रगतिरथ चाभूदसन्तोषभूमा ॥ ६८ ॥

काङ्ग्रेसेऽसौ प्रकटतरतां प्राप येनाधिकं ते
सर्वेऽभूवन् प्रगतिपथिका व्याकुलाः सर्वतोऽपि।
न प्रासीदं त्वहमिह तदा वृत्तचक्रस्य गत्या
संस्थाऽस्माकं गुरुरपि तदा भाति निर्वाचनोत्का ॥ ६९ ॥

अस्या वैदेशिकविकलने यौद्धिकं पाटवं त-
न्नूनं निर्वाचनसफलतासाधने लग्नमासीत् ।
स्वातन्त्र्यार्थं समरमवशाः कुर्युरेवान्ततोऽमी
प्रान्तीयं तत्खलु कतिपयैर्वासरैरेति चान्तम् ॥ ७० ॥

श्रीमान् गान्धिर्विदितविषयोऽकारि काङ्ग्रेसमन्त्रि-
व्राताचारैर्विलिखितदलेनामुना मामकेन ।
'श्रीमन्नेते निजमनुगमं साधयन्ते पुराण्या
शैल्या चैनामिह समुचितां वर्णयन्ते नितान्तम् ॥ ७१ ॥

नैतत्तावद् व्यथयति मनो हन्त दुर्वृत्तमेत-
द्यावत्खेदं जनयति यथास्थानतो भ्रंशनं नः ।
यल्लोकानां मनसि महताऽऽसादितं तूद्यमेन
तस्माद् भ्रष्टा वयमिह गता राजनीतिज्ञनैच्यम् ॥ ७२ ॥

उग्रत्वं न ध्रुवमिदमभून्मन्त्रिषु प्राप्तकालं
ते निर्दोषा अपि मलिनिता यत्परिस्थित्यवद्यैः ।
कार्यं त्वासीद् बलवदधिकं मन्त्रिणां राष्ट्रियेषु
स्तुत्यं नानागतिविधिषु चानेकदिक्षु प्रदिक्षु ॥ ७३ ॥

तैः सीमानो निजसुकृतिभिः पालनीया अभूवन्
येऽस्मल्लक्ष्याधिगमनविधौ लङ्घनीयाः किलासन् ।
तेषां स्तुत्येष्विदमतितरां शोभनं कार्यमासीत्
यत्तैः किञ्चित्कृषककृतिभिः कल्पितं सद्विधानम् ॥ ७४ ॥

अन्यच्चासीदिदमपि कृतं मौलिकं शिक्षणं स्याद्
आसप्ताब्दं प्रतिभरतभूजातबालेऽनिवार्यम् ।
सप्ताब्देभ्यः प्रभृति विहितं यच्च निःशुल्कमेतत्
किञ्चिच्छिल्पं भवति निपुणं यत्र वै शिक्षणीयम् ॥ ७५ ॥

शिक्षा क्लृप्ता किल परिमितो यत्र वित्तव्ययः स्यात्
किन्त्वच्छत्वे कथमपि मनागल्पता नैति तस्याम् ।
हिन्दुस्थानोपमजनपदे निर्धने यत्र कोटिः
शिष्याः शास्या इह खलु महत्त्वं श्रितः प्रश्न एषः ॥ ७६ ॥

शिक्षाक्रान्तिः सपदि जनिता हन्त शैल्यानया यत्
तस्मादाशा इह बहुविधाश्चाध्रियन्ते महिष्ठाः ।
उच्चैः शिक्षाप्यधिकबलतो योजनायाममुष्यां
स्वास्थ्येनासीत्सहमतिमतां मौलिभिः सम्प्रणीता ॥ ७७ ॥

किन्त्वेतेषां प्रयतनशतान्याददुर्नो फलं तद्
दत्तान्येतैर्निजनिजपदात्त्यागपत्राणि सर्वैः ।
यत्प्रौढानां प्रगमितमभूत्साक्षरत्वं तु वेगात्
तस्याभूवन् सुपरिणतयो ग्रामशुद्धेश्च काश्चित् ॥ ७८ ॥

काङ्ग्रेसीयं यदपि कृतवच्छासनं तत्प्रभावो
भव्यः प्राभून्न परमियताऽभूत्समस्यासमाधिः ।
तस्मै नूनं गहनगहनं तत्तलं गम्यमासी-
दामूलञ्च स्तरमुपगतः कार्य आसीद् विवर्तः ॥ ७६ ॥

साम्राज्येच्छा नियतमिह सा चापसार्या किलासीद्
यस्यां स्वार्थाः शलु बहुविधाः स्थापिता रक्षिताश्च ।
तस्मात्काङ्ग्रेसिकदलयुगं प्राप्तवैमत्यमस्ती-
त्याविर्भूतं प्रथम इह काङ्ग्रेससंसन्निवेशे ॥ ८० ॥

यस्माद् गान्धिर्व्यथितहृदयः स्वं मतं प्राचकाशत्
खेदं लेखे मम कृतिषु वा राष्ट्रपत्ये कृतासु ।
कार्यं कर्तुं स्वमनलमहं मन्यमानस्तदानी-
मेच्छं किञ्चित्परिपततु वै सङ्कटं सम्प्रतीति ॥ ८१ ॥

काङ्ग्रेसस्याधिपतिपदतो मेऽवधिः पूर्णकल्पो-
ऽभूदित्यस्मादहमिह सुखं मुक्तये कल्प आसम् ।
त्रिर्द्वैवर्ष्यं पदमधिगतं तन्मयाऽथो तृतीये
वर्षेऽप्यासीत्सुलभमिव मे किन्तु नैच्छं तदग्रे ॥ ८२ ॥

नोत्थातव्यं तदधिगतयेऽद्येति सङ्कल्प्य चित्ते
युक्ति त्वेकामहमकरवं, चानया भूयहृष्यम् ।
मल्लेखोऽगात्प्रकटपदतां कालिकाताप्रकाश्ये
नामोल्लेखाद्रहित इह माडर्नरिव्यूप्रपत्रे ॥ ८३ ॥

तत्रारुन्धं पुनरँवसरं स्वस्य निर्वाचनस्य
नैतत्सम्पादक इव जनः कोप्यवेदीद्रहस्यम् ।
यत्केनेदं लिखितमिति तत्रास्मि रुच्या व्यपश्यं
यन्मत्सार्था दधति हृदयेऽनेन कीदृक्षभावम् ।। ८४ ।।

नानोत्प्रेक्षा दुरनुमितयश्चाक्रियन्तात्र लोकै-
र्नान्तिज्ञातं यदवधि न जालगुन्थरस्तद् व्यलेखीत् ।
जातस्त्वासीत्किल हरिपुरे सोऽधिवेशः सभाया
यस्मिन्निर्वाचितमधिपतिं श्रीसुभाषं विदन्ति ।। ८५ ।।

यूरोपेऽहं सुनिरचिनवं गन्तुमत्र स्वपुत्री-
मिन्दुं द्रष्टुं स्फुटमभिलषन्नस्फुटं चोपरामम् ।
यो मे श्रान्तं मुहुरथ परिक्लान्तमन्तः समन्ता-
न्नूत्नं कृत्वा शमयति पुरेत्यन्तराकल्प्य कल्पम् ।। ८६ ।।

तत्रारामात्स्थिरमतिरहं चिन्तयेयं स्वकृत्यं
मस्तिष्कं वा मम सतिमिरं प्राप्नुयात्सुप्रकाशम् ।
यूरोपो मे न खलु समभूच्छान्तिदः क्लान्तिहारी
तस्मिन्नासीद् गहनतिमिरं सन्ततं सर्वतोऽपि ।। ८७ ।।

प्रत्यक्षं तूत्प्लवसमुदयात्प्राग्भवा कापि शान्ति-
स्तत्राप्यासीत्सकलजगदाराधनातोऽनुमेया ।
सैषा देशान्प्रति समभवद् बञ्चितांल्लुण्ठितांस्तान्,
नेवाइल्चैम्बरलयनधीकल्पिता कूटनीतिः ।। ८८ ।।

अस्याश्चान्त्योऽभवदभिनयो म्यूनिखे लेखनीयो
बर्लीलोनामगममथ तां वायुयानेन नोनाम् ।
यूरोपे प्राविशमिति धृतान्तयंसङ्घर्षरोपे,
पञ्चाहे चाम्बरपरिसरे बम्बवर्षामपश्यम् ।। ८९ ।।

तत्रापश्यं किमपि च परं भाविताात्माथ मध्ये
दारिद्र्यस्याखिलविनशनस्यापतन्त्या विपत्तेः ।
तत्रात्मानं त्वपरवसतेर्भूरिशान्तेऽन्वभूवं
तस्मिन्नासीद् व्रतदृढतया साहसस्य प्रकाशः ।। ९० ।।

आङ्ग्लानागां दिवसमिह वा मासमेकं समस्तै-
र्वर्गै: साकं समगममनेकैर्विचारैरुपेतैः ।
लोके काञ्चित्परिणतिमहं नूतनामन्वभूवं,
साध्वीं काष्ठामियमनुगताप्यास्थिता नो शिखान्तम् ।। ६१ ।।

गर्वोत्फुल्लः किल विजयतोऽध्यास्त यां लेनवाद-
श्चेकोस्लोवाकियमथ गतः सन्निधेस्तामपश्यम् ।
दुस्तर्क्येयं कठिनकठिना कूटनीतिः किलासीत्,
यस्यां ध्येये सुहृदि च कुतो हानिपातो न दोषः ।। ६२ ।।

जेनेवायामियमथ मया लन्दने म्यूनिखस्य
क्लिष्टाह्नःसु प्रकटविकटा वीक्षिता कूटनीतिः ।
प्राप्तोऽपूर्वां परिणतिमहो निम्नतो निम्नगर्ते-
ष्वापत्काले प्रगतिमहिता निष्पतन्तीतिरूपाम् ।। ६३ ।।

जेनेवाया नयनविषयीभावतो मे पुराणाः
खण्डा हार्म्याः स्मृतिपथमवातार्षुरारात्तदानीम् ।
यत्रान्ताराष्ट्रियपरिषदां ते शतेभ्योऽतिरिक्ता
आसन् हा हा प्रकृतिसुभगानां शवा विप्रकीर्णाः ।। ६४ ।।

सन्तोषोऽभूत्समरविगमाल्लन्दने नान्यचिन्ता
मूल्यञ्चार्घ्यैर्वितरितमभूदित्यभूत्तेन नार्थः ।
किन्त्वेतस्मिन् किमपि भवितुं वत्सरे प्राप्तमासी-
च्चेम्बर्लेनग्रहशुभदशाऽऽसीद्विरोधे स्थितेऽपि ।। ६५ ।।

कष्टं दत्तं मम बहुतरं पेरिसेनास्य मध्य-
वर्गेणाहो ! न खलु कलितस्तेन कश्चिद्विरोधः ।
आसीत्क्रान्तेः स्थलमलमिदं पेरिसं प्रेरयितृ
प्रत्यक्सर्वं जगदिदमधाद्यत्प्रतीकैकबुद्धिम् ।। ६६ ।।

यूरोपादागममथ बहुस्वप्नभङ्गेन खिन्नः
प्रत्यागच्छन् पथि समवसं क्रान्तिमिश्रेऽथ मिश्रे ।
यन्नेतारो वफददलमा मुस्तफानैशपांशा-
युक्ता भक्त्या हृदयभरतः स्वागतं व्याहरन्मे ।। ६७ ।।

भूयः साक्षात्कृतिमुपगतस्तां परीवर्तमानां
ध्यायं ध्यायं सकलजगतश्चाप्यवस्थां ममात्मा ।
सामान्यासु स्थितिषु च विचारान् विमर्शान् विधाय
सम्प्रासीदं 'भवति हि सतां सङ्गतिः सम्मदाय' ॥ ९८ ॥

कांश्चिन्मासाननुसमगमन् भारतेऽभ्येत्य भूयो-
ऽस्माभिः स्नेहाद् वफददलगाः प्रातिनिध्यं वहन्तः ।
काङ्ग्रेसस्य प्रमहति महे वार्षिके चापि सर्वे
सम्मिल्यास्मान् प्रणयमनयन् कञ्चिदुत्साहयन्तः ॥ ९९ ॥

प्राचीनास्ते सुचिरमचलन् भारते प्रश्नवादाः
स्वीयैः सार्थैः सह कठिनता सङ्गतेः साप्युपास्थात् ।
कायाकल्पे भवति जगतो हन्त काङ्ग्रेससभ्याः,
पक्षाऽऽबन्धे कलहमभजन्नित्यभून्मेऽतिखेदः ॥ १०० ॥

किन्त्वासीद्या सुमतिरिह या साधुदृष्टिश्च तस्या
उच्चेष्वङ्गेष्विति किमपि मे प्रेरकं किञ्चिदासीत् ।
काङ्ग्रेसाच्च स्फुटमिह बहिर्दुःस्थितिः काचिदस्थाज्
जिन्नालीगं मततनुतयोग्रं स्वरूपं ह्यनैषीत् ॥ १०१ ॥

लीगं वेगं नयति हि पुरा सम्प्रदायोत्थवैरं
राष्ट्राङ्गित्वं व्यपनयति चाश्चर्यमार्गं श्रयिष्यत् ।
न प्रस्तावं रचनविषयं न प्रयत्नं शमार्थं
नैव प्रश्नोत्तरमकलयत्सर्वथाऽतर्क्यशीलम् ॥ १०२ ॥

आसीद्धिंसागम इह घृणापूरितः खण्डनात्मा
कार्यारम्भः स्मृतिविषयतां योऽनयन्नाजिवादम् ।
संस्था वृद्धिं दधति सहसा साम्प्रदायिक्य ऐक्यं
निघ्नन्त्येताः समजनहितं जीवनं दूषयन्ति ॥ १०३ ॥

आसन्नन्या अपि बहुतया संसदो मुस्लिमानां
बह्व्यस्तासां दधति हृदये लीगचेष्टासु रोषम् ।
काङ्ग्रेसस्य प्रबलतरतां साधयन्त्यश्च तास्ता
नूनं भव्या इह समभवन्नित्यदः सत्यमस्ति ॥ १०४ ॥

एवं लीगं नियमिततया विस्मृताध्वाऽत्यधावत्
प्रत्यक्षञ्चान्तत इदमधाल्लोकतन्त्रे विरोधम् ।
तुच्छध्येयोपगमविधये देशभङ्गाय चोक्तं,
पृष्ठं चास्य ब्रिटिशविभुताऽपोषयद्दुष्टभावा ॥ १०५ ॥

लाभं संस्थान्तरवदयितुं लीगतो मुस्लिमानां
सा खल्वैच्छद् ध्रुवमबलयत्सा च काङ्ग्रेसशक्तिम् ।
किन्त्वाश्चर्यं जगति लघुना राष्ट्रजातेन सत्तां
लब्धुं राष्ट्रे महति विलयो यत्र कालेऽभिलष्यः ॥ १०६ ॥

तस्मिन्काले भरतवसुधाखण्डनं लीगमैच्छद्
गाम्भीर्येणाभिलषितमिदं तन्न नामाभ्यरक्षत् ।
जिन्नाभीष्टा ध्रुवमियमभूद् राष्ट्रयुग्मप्रक्लृप्ति
स्तस्याश्चाभूत्परिणतिरियं लीगतुच्छाभिलाषः ॥ १०७ ॥

धर्म्याद्भेदात्पृथगभिमता साम्प्रदायिक्यभीप्सा
दूरीकर्तुं नियतमुचिता सर्वकारैस्तदासीत् ।
स्वाधीनत्वं सुघटिततरं लोकतन्त्रं च रोद्धुं
सामन्तत्वं प्रतिगतियुतं बद्धमेतैर्न काङ्क्ष्यम् ॥ १०८ ॥

स्वार्थं लब्धुं प्रयतनमिदं सम्प्रदायच्छलेन,
यत्केषाञ्चित्स्वकपटभभवद्धन्त, धर्मस्य नाम्ना ।
तन्मे सर्वां प्रगतिमिह वैयक्तिकीं वा समाज्यां
रोद्धुं कश्चित्समुदित इव प्रत्यभात्सोऽभिशापः ॥ १०९ ॥

योऽयं धर्मः प्रथयति मिथो भ्रातृभावं, तथैवा-
ध्यात्मं बोधं स इह समभूद्धा जुगुप्सैकहेतुः ।
सङ्कीर्णत्वं पुनरिह निकृष्टत्वयुक्तं प्रकल्प्य
स्रोतो जातं कथमिह परं भौतिकत्वस्य भीमम् ॥ ११० ॥

चत्वारिंशात्प्रथमशरदि प्राभवत्कल्कनं यत्
काङ्ग्रेसेऽस्मिन्नधिककटुकं राष्ट्रपत्यावधारे ।
यन्मौलाना अबुलकलमस्तत्र नोत्थानमायाद्
यच्चैतस्मिन् विजयमगमद्वीरभाषः सुभाषः ॥ १११ ॥

तेनानेका इह समभवन् दुर्निरस्याः समस्या
मासान् यावत्किमपि विषमं प्राचलद्विघ्नजातम् ।
दृश्यान्यासंस्त्रिपुरसदसि प्रायशः सभ्यभावा-
द्दूरस्थानि, प्रशिथिलमभूत्तेन मे भावतन्त्रम् ॥ ११२ ॥

सार्थः सङ्गो यदवधि मया नीयते नात्र भङ्ग-
स्तावत्पादं चलितुमपि मे नोदिता स्यात्तु शक्तिः ।
अन्ताराष्ट्र्यः सपदि बहवश्चात्मराष्ट्र्यः समस्या
मौलिक्यो वा विकटघटनास्तास्तथाऽकारयन्माम् ॥ ११३ ॥

तात्कालिक्यः सकलजनतामन्विता हेतुमाला
ध्यायं ध्यायं भृशमहमगां कञ्चिदुद्वेगमन्तः ।
वार्तापत्रेऽलिखमहमहो ! तान्न सन्तोषयामी-
त्याश्चर्यं नो, स्वयमपि यतः स्वं न सन्तोषयामि ॥ ११४ ॥

नेतृत्वं वै श्रयति न गुणं नो बलं चेदृशं नो,
विद्युश्चैतन्मम सहचराः शीघ्रमेतच्छुभं स्यात् ।
चेतः कार्यं वहति च मतेः स स्वभावोऽस्ति जातः
किन्तु स्रोतः सकलबलदं शुष्कमित्यस्मि मन्ये ॥ ११५ ॥

तावद् बोसोऽत्येजदभिनवं राष्ट्रपत्याधिकारं
अग्रेगामी सपदि रचितस्तेन पक्षश्च कश्चित् ।
काङ्ग्रेसस्य प्रतिदलतयाऽभ्युत्थितोऽसौ समाप्तः
स्वल्पात्कालात्तदिह सुधियः पूर्वमेवाभ्यपश्यन् ॥ ११६ ॥

किन्त्वायाते प्रतिगतिमती, व्युत्थिताऽभूत्प्रवृत्ति-,
र्नानादोषा अपि समभवन् नेतृतायाः सरण्याम् ।
शब्दा अब्दा इव दिनकरं सत्यमावृत्य लोके
दुःसाहस्यं ध्रुवमवसरोत्थायिनां चानुदंस्ते ॥ ११७ ॥

एतद्द्रष्टुः स्मृतिविषयतां प्राप्नुवन्नाजिनो मे
कार्ये क्वापि प्रकलितजनालम्बना ये भवन्तः ।
तांस्त्यक्त्वाथो क्वचिदपि पृथग्रूपकार्यान्तरे तत्
प्रायुञ्जंस्तेच्छलितजनता हन्त शर्मण्यदेशे ॥ ११८ ॥

ज्ञात्वा वुद्ध्वा पृथगहमभूवं नवायाः समित्या-
स्तैः संयोगोऽसुलभ इति चाऽऽचिन्तयन्नन्वभूवम् ।।
यद्यज्जातं तदिह नहि मेऽरोचते यत्तदानीं
खिन्नोऽभूवं भृशमुपवसन्तञ्च गान्धिं विलोक्य ।। ११६ ।।

तत्रालेखि स्वयमथ मया—'राजकोटस्य वृत्तै-
र्निःसाहाय्योऽहमिति हि मतिर्वृद्धिमभ्यागमन्मे ।
नाहं जाने किमपि न पुनः कर्तुमर्हामि किञ्चित्
यद्यज्जातं, तदुपरि न मे भाति तर्कोऽपि कश्चित् ।। १२० ।।

अस्माकं वै स्वरुचिविषये भूयसां कष्टवृद्धि-
र्नात्र प्रश्नो नयबिनयने दक्षिणे नापि वामे ।
रुच्यै चालं यदिह सहसा निर्णयाः स्वीकृताः स्यु-
स्तद्व्याघाते भवतु न बुधां कापि तर्कव्यपेक्षा ।। १२१ ।।

एकः पन्था यदिह कुरु वा तद्विरोधं, भवेर्वा
निष्कर्मेति द्वयमपि पुनर्नैति साधुत्वमेतत् ।
योऽबुद्ध्वैवापरमतमिह स्वीकरोत्यप्रतर्क्य-
मस्वीकार्यं ध्रुवमिह मनस्तस्य दुःस्थं जडं स्यात् ।। १२२ ।।

अस्यां भूमौ न खलु महदान्दोलनं सम्प्रवर्त्यं
सामान्यं यत्कथमिब पुनर्लोकतन्त्रीयमेतत् ।
कार्श्यं कुर्वन्निह मतिमतां, द्वेषिणां चापि साह्यं
नूनं लोके भवति सुतरां दुष्करोऽयं विरोधः ।। १२३ ।।

अष्टौ काष्ठाः प्रखरवचनैः कर्म कर्मेति याच्ञां
कुर्वन्त्येताः कथमिव तदा कोऽपि नैष्कर्म्यमृच्छेत् ।
को नैराश्यं जगति जनयेत्कश्च भूयः समस्या
उत्पाद्येह स्वयमपि महासङ्कटे निष्पतेच्च ।। १२४ ।।

इत्येवं मे मनसि समभूद्धन्त, यूरोपदेशात्
प्रत्यावृत्तो हलनचलने लग्न आसं चिराय ।
लुध्यानायामखिलभरतावन्यवस्थायिदेशि-
राज्यानां सा प्रमुखपदवी लोकसंसद्यभून्मे ।। १२५ ।।

राज्येष्वासीद् बहुषु विभवन् कोऽप्यसन्तोष आरात्
सङ्घर्षोऽस्मादधिकृतजने च प्रजामण्डलेऽभूत् ।
तेषामेवां ब्रिटिशविभुना मध्यकालीनहर्म्य-
खण्डानां यः स्थितिनियमने संविभागो गृहीतः ॥ १२६ ॥

तस्यानुक्त्वानुभवमिह मे वाङ् न विश्रान्तिमेति
सत्यं केनाप्युदितमभवत्पञ्चमो वर्ग एषः ।
सन्त्येवैके सुजितमतयो ये प्रजापक्षरक्षा-
दक्षा भूपाः श्रमिकजनसंस्कारमिच्छन्ति येऽत्र ॥ १२७ ॥

सर्वोच्चा सा पथि किरति यत्कण्टकान्यत्र सत्ता
तेनैतेषामभिलषितमप्येति वैफल्यमेतत् ।
नूनं राज्यं किमपि कलयेल्लोकतन्त्रीयमस्मि-
न्नो वर्गाणामिह कथमपि प्राप्नुयात्पञ्चमत्वम् ॥ १२८ ॥

नासीत् पञ्चाशदतिशयया पञ्चशत्या मितानां
यद्राज्यानां नृपनयदृशाऽऽर्थिक्यदृष्ट्या च सत्ता ।
सामन्तानां वसतय इवैतानि वै लोकतन्त्रे,
दुर्गीभूय स्थितिमतिचिरं प्राप्तुमर्हाणि नासन् ॥ १२९ ॥

कान्यप्येषामधिकृतिमधू राज्यसङ्घैकभागी-
भावे त्वन्यान्यवशविवशान्यन्ततो नाशमाप्तुम् ।
अस्मादल्पात्प्रयतनविधेरस्ति नान्योऽत्र पन्था
राज्यान्यन्ते ब्रिटिशविभुतामन्वियासुर्विनाशे ॥ १३० ॥

आसीदन्यद्बलनचलनं राष्ट्रनिर्माणसंसद्
यत्राध्यक्षोऽभवमहमियं चास्त काङ्ग्रेसक्लृप्ता ।
प्रान्तीयाभिः सपदि विभुताभिश्च दत्तानुयोगा
साऽऽसीत्सर्वैर्गतिविधिभिरप्यन्विता राष्ट्रियैस्तैः ॥ १३१ ॥

तस्याः कार्यं त्वनुदिनमगादग्रतोऽग्रं प्रसृप्ति
नानार्थानामुपसमितयोऽस्माभिरस्यां प्रक्लृप्ताः ।
उद्योगार्था कृषिविषयिणी चार्थिकी चापि सामा-
जिक्याद्यास्ता विदधतु मिथो योगमित्यास्त यत्नः ॥ १३२ ॥

हिन्दुस्थाने भवतु नियता काचिदर्थव्यवस्था
युक्तिः सेयं प्रथममिह नः कल्पनाचित्रमास्ताम् ।
पश्चादस्यां विवरणगता योजनाः सङ्गताः स्यु-
रित्यर्थेयं समितिरधुनाप्यत्र कार्यं करोति ॥ १३३ ॥

सत्यञ्चैतन्नवविरचिता योजनाः कार्यरूपं
सम्प्राप्याः स्युः खलु जनिभुवो नः स्वतन्त्रत्वसिद्ध्यै ।
तथ्यञ्चैतत्क्वचिदपि भवेद्योजनायामिहोप-
योगिन्यामार्थिकविरचनायाः समाजोक्तिः स्यात् ॥ १३४ ॥

अस्याः कार्यं न खलु दिवसैर्नापि मासैः समाप्यं
मह्यं शिक्षाप्रदमिदमभूच्चाधिकं लोभनीयम् ।
चत्वारिंशात्प्रथमशरदि प्रस्थितोऽहञ्च लङ्कां
हिन्दुस्थानीयजनविभुतावैरभावस्य शान्त्यै ॥ १३५ ॥

तस्मिन् द्वीपे प्रकृतिसुभगेऽभूत्प्रसन्नो ममात्मा
मन्ये यात्रा मम समभवद्देशयोर्मित्रतायै ।
तत्रत्यानामिह हृदयतः स्वागतं प्राप्य हृष्टो
दृष्ट्वा चैषामनुगतिभृतस्तत्प्रशिष्टेः सदस्यान् ॥ १३६ ॥

निःसन्देहं क्वचिदपि हिताऽऽयोजनायां भविष्ये
देशावेतौ मिलितहृदयावेष्यतः पूर्णसिद्धिम् ।
सङ्घोऽपि स्यादिति च कलये चीनवर्माफगानि-
स्थानैर्लङ्काभरतधरणीमुख्यदेशाः स्युरस्मिन् ॥ १३७ ॥

हन्तैषा मद्धृदि समुदिता विश्वसङ्घस्य क्लृप्तिः
सा चेद् भूयादहह कतमा स्यान्मुदां तत्र काष्ठा ।
अस्मिन्वर्षे स्थितिरतिभया सङ्कटाकीर्णकाला
यूरोपस्याभवदिति ततो भारतं रोद्धुमैच्छम् ॥ १३८ ॥

चीनान् गन्तुं प्रबलतमयाऽऽकाङ्क्षया प्रेरितोऽहं
तस्मिन्कालेऽप्यगममलं चुङ्गकिङ्गं दिनाभ्याम् ।
भूयः प्रत्यागमनमवशो भारते लम्भितोऽहं
यूरोपे हि प्रचलितमभूत्तत्क्षणं युद्धकाण्डम् ॥ १३९ ॥

सप्ताहौ यौ सुखमतिगतौ मे स्वतन्त्रेऽत्र चीने
तौ स्मर्तव्यौ नहि निजदृशा किन्तु देशार्थदृष्ट्या ।
सा मे यात्रा निकटतरतां देशयोः साधयन्ती
जाता ताभ्यां स्फुटमतिहिता भाविसम्बन्धसिद्धिः ॥ १४० ॥

यन्नेतारो मदभिलषितं देशयोः सन्निधानं
चीनस्यापि ध्रुवमभिमतं तेऽवदंस्तन्मुदेऽभूत् ।
चीनस्यैक्यं स्ववशमहितं यत्प्रतीकं स चाङ्ग-
काईशेकोऽप्यनुवदति मे वाक्यमित्यस्मि मग्नः ॥ १४१ ॥

दृष्टौ भूयो यदिह मयका दम्पती तौ, विचारा-
श्चैवानेके स्वजनपदयोर्भूतभव्ये प्रवृत्ताः ।
तेनामन्दं कमपि दधताऽऽनन्दमत्रागतञ्च
भूयश्चीनार्चनपरतया स्वीयया विस्मितञ्च ॥ १४२ ॥

एषां प्राचामपि ननु मनो दुर्दिनं मर्दयिष्य-
त्येषा काचित्क्वचिदपि कृता कल्पना केन जातु ।
तस्मिञ्जातेऽपि न परिहृता यद्धृतिश्चीनलोकै-
स्तेनाद्यत्वे पुनरपि नवं यौवनं प्राप्तमेतैः ॥ १४३ ॥

हिन्दुस्थानं समरसमये किं करिष्यत्यथेति
प्रश्नो वर्षैरभवदिह नश्चिन्त्यमानो मितान्तम् ।
नीतिश्चात्र स्वमननकृता नेतृभिर्घोषिताऽभूत्
किन्तु स्वैरं ब्रिटिशविभुता निर्णयं प्राददाद्यत् ॥ १४४ ॥

'हिन्दुस्थानं समरसमयेऽस्माकमास्ते सहाय'
इत्यत्रासीन्नहि सहमतिः केन्द्रधारासभायाः ।
नापि प्रान्तप्रभुपरिषदो नापि चास्माकमेवे-
त्येषोपेक्षा कथमपि भवेन्नेतृभिः किं नु सह्या ॥ १४५ ॥

स्पष्टञ्चास्माद्यदनियमितं याति साम्राज्यवाद-
स्तस्मिन् काङ्ग्रेससमितिरदाद् दीर्घवक्तव्यमेकम् ।
यस्मिन् पूर्वा प्रकृतसमया नीतिरासीद्विविक्ता
युद्धोद्देश्यं ब्रिटिशविभुता स्पष्टयेदित्यथोक्तम् ॥ १४६ ॥

नाजीवादं वयमिह चिराद् गर्हयामः परं नः
सम्बन्धोऽभूच्छिरसि पतिते हन्त साम्राज्यवादे ।
किं नामायं झटिति विलयं यास्यतीत्यास्त तर्कः
किं स्वातन्त्र्ये विधिविरचने नाधिकारः प्रदत्तः ॥ १४७ ॥

केन्द्रीयं शासनमथ जनैर्निश्चिते सर्वकारे-
ऽभ्यानेतुं किं क्वचन चरणः कोऽपि विन्यस्यतेऽग्रे ।
अन्ते चैवाल्पमिति मतिभिः प्रस्तुताक्षेपजातं
सम्यग्रूपे निरसितुमयं पञ्चबन्धो विमृष्टः ॥ १४८ ॥

तत्राख्यातं यदिह नवले पञ्चबन्धेऽल्पसंख्या
ऽङ्गीकृत्यानिर्णयविधिरसौ धास्यते नाधिकानाम् ।
प्रश्ने कस्मिश्चिदपि न समाधीयमाने त्वपक्ष-
पञ्चायत्तेऽन्तिमनिमतये प्रस्तुतिं नेष्यते सः ॥ १४९ ॥

प्रस्तावोऽयं न भयरहितो लोकतन्त्रस्य दृष्ट्या
सन्देहं तु प्रतिगमयितुं स्वल्पसंख्येष्बलं सः ।
काङ्ग्रेसञ्चोद्यतमिह सदा दूरतो वा दवीयो
गन्तुं तेषां हृदयविमलीकारयत्नैः किलासीत् ॥ १५० ॥

आसीत्स्पष्टं ब्रिटिशविभुतायास्तदत्रोत्तरं तद्
यत्रेयं योद्धिकयतनलक्ष्याणि नालक्षयन्तः ।
नापि प्रत्यर्पयितुमभवच्छासनं स्वप्रजानां
सन्नद्धा तत्प्रतिनिधिकरे कुत्रचिद्वा कथञ्चित् ॥ १५१ ॥

प्राचीना प्राचलदिह किलैषैव चासीत्प्रचाल्या
हिन्दुस्थाने ब्रिटिशविभुताया हितं नह्यपेक्ष्यम् ।
एवं वृत्ते सचिवनिचयस्त्यागपत्राणि चादाद्
युद्धोद्योगेऽभिलषति स नो दातुमत्र स्म योगम् ॥ १५२ ॥

स्वेच्छाचारी पुनरयमगात् सर्वकारः प्रतिष्ठां
स्वातन्त्र्यार्थं स्थगितमभवत्तद्विधानं नवीनम् ।
सङ्घर्षोऽयं भरतधरणीमध्यधिष्ठाय वृत्तो
यः पाश्चात्येष्वचलदिह स प्राज्यराज्याधिकारे ॥ १५३ ॥

पाल्यार्मेण्टे ब्रिटिशनृपतौ च प्रवृत्तेन तेन
फ्रांसैङ्ग्लैण्डे किल निजनृपप्राणघातं प्रपन्नः।
अस्मिन्वैधानिकदृगतिरिक्तं किमप्यन्यदासीद्
येन ज्वालामुखविवरणात्प्राक्तनोऽश्रावि घोषः ॥ १५४ ॥

प्रत्यूहः प्राचलदथ नवानि प्रवृत्तानि तानि
मन्दं मन्दं भरतभुवि वै संविधानानि जोषम्।
काङ्ग्रेसीया अथ तदितरे बन्ध्यमाना अभूवन्,
किञ्चित्कर्तुं त्वभिलषितमित्यैधतास्मद्विरोधः ॥ १५५ ॥

युद्धासङ्गादथ च विकटात्सङ्कटादाङ्ग्लदेशे
सङ्कोचेऽप्यक्षपयदभितः सोपदेशश्च गान्धेः।
'आङ्ग्ला अस्मत्सुहृद इह वा स्युर्नवेत्यस्तु शङ्का
दुःखाक्रान्ता न खलु विवशीकर्तुमर्हास्तथापि ॥ १५६ ॥

युद्धं वृद्धं क्रमश उदिता नूत्ननूत्नाः समस्याः
प्राचीना अप्यभिनवमिवाकारमत्राङ्ग्यकार्षुः।
आभान्तिस्म ध्रुवपरिणता रूपरेखाः पुराण्यः
पूर्वं माना अपि मलिनतां काञ्चिदापुस्तदानीम् ॥ १५७ ॥

बह्वाघातेष्वविचलतया स्थातुमासीदशक्यं
दर्शं दर्शं विषमविषमं क्रीडितं राजनीतेः।
रूसैः शर्मण्यविषयकृतः सन्धिराक्रान्तिरेषां
फिन्लैण्डे वा जयजनपदे प्रह्वता चेति चित्रम् ॥ १५८ ॥

सिद्धान्तः किं क्वचन भवति प्रेप्सितः क्वापि नीता-
वादर्शः किं क्वचन चरितस्यास्ति कश्चिज्जगत्याम्।
सर्वं चेदं किमवसरवादित्वमात्राश्रितं बे-
त्याद्या नैके मम समभवन्नुत्थितास्तर्हि तर्काः ॥ १५९ ॥

एतोऽप्रैलः समभवदथो कापि नार्वेपरास्तिः
हालेण्डे वेलजियमपदे घोरकाण्डानि मय्याम्।
जूनेऽकस्मात्पतनमभवत्फ्रांसदेशस्य, रम्यं
गर्विष्ठं वा नगरमभवत्पेरिसं मर्दितं यत् ॥ १६० ॥

फ्रांसस्याभूद्वलपरिभवो नैतिकं चापि दास्यं
यच्चास्यासीत्पतनमिह तन्नूनमासीद् विगर्ह्यम् ।
आश्चर्येऽहं न्यपतमिति चेन्नात्र मूलेऽस्ति दोष-
स्तर्ह्येतस्मिन्कथमयमभूच्छोचनीयो मुहूर्ते ॥ १६१ ॥

फ्रांसेङ्ग्लेण्डौ प्रतिनिधितया प्राग्व्यवस्थास्विहास्तां
तासामन्तः सपदि नियतः किन्नु दोषोऽयमासीत् ।
शक्ति प्रादात्प्रकटमुभयोः किञ्च साम्राज्यवादो-
ऽप्रत्यक्षेणोभयमपि कृशीकर्तुमासीत्प्रवृत्तः ॥ १६२ ॥

स्वातन्त्र्यं तौ यदि दमयतस्तत्कथं योद्धुमर्हौ
तस्मिन्न्यायात्परिणतिमसौ नग्नफासिज्मरूपम् ।
चैम्बर्लेनस्तदुदितनमच्छाययैवाऽऽङ्ग्लदेशं
यश्चाद्यापि प्रचुरमलिनीभावमानेतुमुत्कः ॥ १६३ ॥

बर्माचीनौ जयजनपदप्रीतये वर्त्मरोधं
कुर्वातेस्म स्फुटमिह परीवर्तचिह्नं च नासीत् ।
आत्मन्यात्मा स्वयमिह यदा रोधमस्माकमैच्छ-
त्तन्नः कार्यक्षमतनुभृतां व्याञ्जयच्छक्तिशौन्यम् ॥ १६४ ॥

चित्रीयेऽहं ब्रिटिशविभुताऽदूरदर्शित्वदृष्ट्या
सा तद्बोद्धुं तदनुचलितुं चाप्यशक्ता नितान्तम् ।
किं कोऽप्यासीत्प्रकृतिनियमो राजनीतावपीह
स्याद्वै कार्यं ध्रुवमिह यदा विद्यते कारणौघः ॥ १६५ ॥

यस्याश्चास्ते किमपि न यदा पद्धतेः कार्यजातं
या चाद्यत्वे न सुमतितया रक्षितुं स्वं समर्था ।
तामेवाद्धा श्रयति कुमतिश्चानुभूतेश्च पाठं
नो गृह्णीते, ब्रिटिशविभुतां तां वयं किं वदामः ॥ १६६ ॥

अस्याः कार्येष्विह कतिपयेष्वेति हास्यञ्च खेदः,
कश्चित्तर्कः, किमपि च भयं, काचिदापच्च तस्याः ।
सर्वस्मिंस्तोषं बितरितवतीं तां शताब्दी-पुराणीं,
नीतिं नोज्झत्स्वपिति च पुरा वानविङ्क्लिवदेषा ॥ १६७ ॥

युद्धस्थित्यां प्रतिदिनमभूदन्तरं, प्रश्नजातं
नूत्नं नूत्नं समुदितमभूत्कार्यसंसत्समक्षम् ।
गान्धिश्चैच्छत्समितिरधुनाऽहिंसयोपेतमार्गं
स्वातन्त्र्याख्ये समरविषयेऽपीपलद्यं समन्तात् ।। १६८ ।।

तं स्वायत्तेऽनुसरतु दृढं राष्ट्रसञ्चालनेऽस्मिन्,
बाह्याक्रान्तावथ च कलहेऽभ्यन्तरे स्वावनार्थम् ।
तस्मिन् काले तमपि विकलीकर्तुमस्यानिवार्यं
प्रश्नः साक्षादुपनत इह प्रैरयद् घोषणार्थम् ।। १६९ ।।

विश्वासो नः सपदि समरेऽहिंसयाऽद्धैष सेव्यो
यूरोपीये पुनरयमभूदत्र युद्धे द्रढीयान् ।
किन्त्वेतेनासुकरमभवद् भावि राष्ट्रं निबन्द्धुं,
दुर्ज्ञेयं चाभवदिह नये वोऽनुयायात्कथं तम् ।। १७० ।।

गान्धिश्चापश्यदिदमुचितं यत्स विश्वस्य हेतोः
स्वं सिद्धान्तं नहि परिहरेन्नापि सङ्कोचयेत्तम् ।
सोऽथं स्वैरं व्रतमिदमलं साधिकारः प्रचार्यं
स्वाध्वन्यद्धा नृपनयकृता न व्यपेक्षाः प्रपश्येत् ।। १७१ ।।

पूर्वं गान्धिः सरणिमितरां कार्यसंसत्तथान्यां
श्रित्वागच्छत्परमिह तयोर्नाभवत्कोऽपि भेदः ।
वन्धास्त्वासन्नतिदृढतरास्तत्र भेदेऽपि, सोऽस्मान्
नेता भूत्वा समयसमये सम्मतिं साधु नोऽदात् ।। १७२ ।।

सत्यञ्चेयद्यदिह समयो राष्ट्रियान्दोलनस्य
कश्चित्क्रान्तस्तदपगमनादत्र काङ्ग्रेसतोऽद्य ।
वर्षेष्वेतेष्वहमकलयं तत्र काठिन्यमेतन्
न्यूना जाता स्थितिषु च समन्वेतुमप्यस्य शक्तिः ।। १७३ ।।

अस्ति प्रायश्चिरभवमिदं चेन्द्रजालं च तस्मिन्
पूर्वाकृष्टिः किमपि कुरुतेऽद्यापि कार्यातिरेकम् ।
तद्व्यक्तित्वं जगदुपरि वै वर्तते तन्महत्त्वं
मा भ्रामिष्ट प्रभुरिव न सम्प्रत्ययं स प्रभावः ।। १७४ ।।

विंशत्यब्दादधिकसमयाद् भाग्यनिर्माणकर्ता
देशस्यास्याभवदयमथो नास्य कार्यं समाप्तम् ।
सप्ताहेषु व्यतिगततरेष्वत्र काङ्ग्रेससंसत्
प्रस्तावं न्यास्यदिममपरं चक्रवर्तिप्रवृत्त्या ।। १७५ ।।

काङ्ग्रेसस्यात्मनि मृदुदले चक्रवर्ती मनीषी
सच्चारित्र्योऽद्‌भुतमतिरयं चास्ति विश्लेषणज्ञः ।
शक्तिस्तस्यास्त्यतिशयहिता, या तदा मद्रदेशे
मानायाभूत्सचिवनिचयेऽमात्यतां कल्पयन्ती ।। १७६ ।।

सङ्घर्षाच्चावितुमयमभूच्चिन्तितो देशमेनं
प्रस्तावस्तत्कृत इह समैः स्वीकृतस्तत्सहायैः ।
प्रस्तावोऽसौ व्यवहृतिदृशा शान्तिदृष्ट्याप्युपेतः
सद्यः कार्यान्वयनविधये चाभवद्योग्य एषः ।। १७७ ।।

स्वातन्त्र्यं नो ब्रिटिशविभुतोरीक्रियाद् भारतस्य
केन्द्रेऽस्थायि प्रसरतु नवं शासनं चोत्तरार्हम् ।
अस्मिञ्जाते निजजनपदं रक्षितुं साधिकारं
युद्धे युष्मत्सहकृतिविधौ शासनं तद्यतेत ।। १७८ ।।

एतेनास्मिन् महति विषये राष्ट्रियं शासनं स्यात्
स्वल्पाङ्कानां प्रतिनिधिपदं चात्र योग्यं कृतं स्यात् ।
प्रस्तावोऽयं सुमृदुरभवद् युद्धरक्षाप्रयत्न-
दृष्ट्या कार्ये दृढपरिकरेऽपेक्ष्यते लोकयोगः ।। १७९ ।।

निःसन्देहं यदिह जनतायोगविश्वासपात्रं
साम्राज्यं नो भवति च यथा राष्ट्रियं शासनं स्वम् ।
साम्राज्यार्थाः किल न वृणते चिन्तने साधु काष्ठां
ते मन्यन्ते यदिह सकलं कार्यमस्मद्धितं स्यात् ।। १८० ।।

त्रासे शीर्ष्णि स्थितवति न ते तत्परास्तत् किलाप्तुं
साहाय्यं, यत्समवति तदीयां समन्तात्प्रतिष्ठाम् ।
ते मन्यन्ते वयमिह भवामैव लुप्ताधिकारा
नो वीक्षन्ते जगति नयतो वर्तनेन प्रियत्वम् ।। १८१ ।।

अद्यागस्ताष्टमदिवसके यत्र चैतल्लिखामि
वायस्रायो ब्रिटिशविभुतात्तोत्तरं दत्तवान्नः ।
'एषा नूनं चिरपरिचिताऽस्माकमास्ते तु भाषा
शब्दा नूत्नाः परमिह पुराणोऽर्थ एवाऽऽनुभूतः ॥ १८२ ॥

यूरोपे वेतरजनपदे यद्वदास्ते समन्ताद्
हिन्दुस्थाने भ्रमति तदिदं कालचक्रं तथैव ।
अस्मत्सार्थाः पुनरपि गता हन्त कारामुदारा
यत्रैकान्ते भवति सुलभा जीवनाखण्डताधीः ॥ १८३ ॥

युद्धे नीतौ तदवशमिवास्तेऽथ साम्राज्यवादे
फासिज्मे वा जगदिदमहो तत्र शान्तिः कथं स्यात् ।
इत्येकेषां वनगमनमेवास्ति तत्प्राप्त्युपायः
किन्त्वन्येषां निजजनपदाऽऽसेविनां कापि कारा ॥ १८४ ॥

कारावासे परिहृतबहिर्जीवनार्थप्रयासे
कञ्चित्कालं मिलति जगतोऽस्मात्प्रपञ्चाद्विमुक्तिः ।
कश्चिद्गीतासदृशि निगमेऽत्रानुसन्धानमेति
कश्चिच्चात्र स्मरति लिखति प्रोज्ज्वलामात्मगाथाम् ॥ १८५ ॥

काश्मीरेऽहं न्यवसमिह यद् द्वादशाहानि तानि
यान्यत्यैषुः परममधुराणीन्द्रजालोपमानि ।
भुक्ता तत्र प्रकृतिसुषमा काप्यविस्मारणीया,
भ्रामं भ्रामं गिरिषु गमितं जीवनं सार्थकत्वम् ॥ १८६ ॥

प्रयागेऽगस्त्याष्टमदिनायेन श्री शास्त्रिगाथा प्रथममिह
कृतार्याभिदां सप्तशत्या श्रीराजेन्द्र प्रशस्तिस्तदनु
विरचिताऽध्यायपञ्चात्मिका च ।
तेमुद्र्येतां क्रमेणाभ्युचितसमये पूर्वमेतत्तु काव्यं
मुद्राधैन्यं गतं यद्गतनवषष्टिर्गतः सर्ग एषः ॥

स्वाधीनतादिवसप्रतिज्ञा

शार्दूलविक्रीडितम्

सप्ततः सर्गः (प्रथमं परिशिष्टं वा)

'षड्विंशो जनवर्यंह्योऽथ सकलस्वाधीनतावासरः
स्यादस्माक'मिति प्रतिज्ञपयता श्रीनेहरूब्रह्मणा ।
देशस्यास्य विशालभालपटले स्वातन्त्र्यमालेखितं
वर्षे व्योमगुणग्रहेन्दुगणिते शालातुरे संसदि ॥ १ ॥

नूनं भारतवासिनो वयमिथे मन्यामहे जन्मतः
सिद्धां स्वाधिकृतिं तथा, भुवि यथा राष्ट्रान्तरं मन्यते ।
स्वाधीना निवसेम वै, श्रमफलं भुञ्जीमहि स्वात्मनः
सौविध्यानि लभेमहि स्ववसरं विन्देम चात्मोन्नतेः ॥ २ ॥

एतच्चाप्यनुमन्महे यदपि नश्छिन्द्यादिमां शासनं
निर्भिद्याच्च निजां प्रजां तदमुया हेयं च जेयं भवेत् ।
नैकं भारतशासने ब्रिटिशकैः स्वातन्त्र्यमेवाहृतं,
येषां दुर्बलरक्तशोषणकलास्वेवाहितं जीवनम् ॥ ३ ॥

एतैरार्थिकराजनैतिकदृशाऽपि भ्रंशितं भारतं
छिन्ना सांस्कृतिकी गतिर्मतिरथो भिन्ना किलाध्यात्मिकी ।
तस्माद्विश्वसिमो वयं ब्रिटिशकैर्विच्छिद्य सम्बन्धकं
प्राप्यं पूर्णतमं स्वराज्यममुना स्वातन्त्र्यभावोज्ज्वलम् ॥ ४ ॥

नाशोऽजायत भारतस्य सुतरामेवार्थिको यत्करा
गृह्यन्ते जनताऽऽयतोऽनवधयोऽसङ्ख्यातमात्रांशकाः ।
अस्माकं त्वनुपाततः किल पणाः सप्तैव सन्त्यायके
यत्रैतैरिह विंशतिः प्रतिशतं कृष्याः करो गृह्यते ॥ ५ ॥

दातव्यो लवणे करः प्रतिशतं त्र्यंशो भवत्येषु वा
उद्योगाः करकृन्तनप्रभृतयः सर्वेऽपि चोद्वासिताः ।
चातुर्मास्यमिमे भवन्ति कृषकास्तेनैव यन्निष्क्रिया
नष्टेऽस्मिन् करकौशले मतिरपि त्वेषां सुमन्दायते ॥ ६ ॥

उद्योगान्न नवान् प्रवर्तितवती प्रत्नान् भृशं निघ्नती
नूनं शिष्टिरियं कुशिष्टिरिह या राष्ट्रान्तरं नान्वगात् ।
आरक्षा अपि योजिता: कपटत: कार्षापणान्यप्यहो,
भारो वृद्धिमुपैति दीनकृषकस्कन्धेषु घोरो यथा ॥ ७ ॥

अस्माकं पुनरेति योऽपि विषयेष्वङ्ग्रेजयन्त्रालया-
द्रातादभूरिपरिच्छदो भवति चास्मिन् पक्षपातो महान् ।
शुल्कार्थस्य विनिश्चये, व्ययविधौ दारिद्र्यविद्रावणे
वस्तूनां क्रयविक्रयप्रणयने चोपेक्षया वर्तनम् ॥ ८ ॥

किन्त्वेतस्य वृथाव्ययस्य ब्रिटिशं स्थैर्याय नित्योद्यतं,
स्वेच्छाचारितया स्तरं नियमयत्यादेयमूल्यस्य तम् ।
येनास्मात् प्रतिवासरं बहिरितो देशान् प्रयान्त्युज्ज्वला:
सौवर्णस्य च राजतस्य शतशो द्रव्यस्य ता: कोटय: ॥ ९ ॥

माहात्म्यं किल राजनैतिकदृशाऽङ्ग्रेजाधिराज्ये पुन:
क्षीणं भारतराष्ट्रकस्य, न यथा पूर्वं तदक्षीयत ।
सत्ता नाधिगता मनाग्जनतया सा राजनीतावपि
संस्कारे च सुयोजितास्वपि नवीनायोजनास्वप्यलम् ॥ १० ॥

अस्माकं गुरुभिर्जनैर्गुरुतरैरप्यात्मनो मस्तकं
हा वैदेशिकसत्तया परवशैस्तस्या: पुरो नामितम् ।
स्वातन्त्र्येण विचारणाप्रकटने चान्योन्यसम्मेलने-
ऽप्यास्माकीनमजीहरत्पुनरियं युक्त्याधिकारं ध्रुवम् ॥ ११ ॥

नैके भारतवासिनो जनपदान्निर्वासिता. निर्हृता-
ऽस्माकं शासनदक्षतापि सकला दूरीकृतोदात्तता ।
ग्राम्येष्वल्पपदेषु वा लिपिकतामात्रेषु सन्तुष्यता
लोकेनात्र मनुष्यमात्रसुलभाप्यत्याजि मानार्हता ॥ १२ ॥

छिन्नं संस्कृतिमूलमेव नवया शिक्षाप्रणाल्यानया,
दास्ये धास्यति चादधाच्च दधते प्रीतिं विनीतो यया ।
अप्याध्यात्मिकतादृशा वयममी क्लीवीकृता: स्मो बला-
दाच्छिद्यास्मदुपायभूतविविधास्त्राण्युग्रशस्त्राणि च ॥ १३ ॥

अस्मद्वक्षसि सर्वदा वसति सा सेना च वैदेशिकी,
साम्मुख्यस्य च भावना विदलिता वा मर्दिता नस्तया ।
अस्मच्चेतसि निष्ठितं नहि वयं शक्ता गृहं रक्षितुँ
नापि स्मः प्रभवः स्वदेशमवितुं वैदेशिकाऽऽक्रान्तितः ॥ १४ ॥
नैतावन्ननु चौरतस्करशठाऽऽक्रान्तेरपि स्वाङ्जनान्
बालान् स्वानि धनानि चापि न वयं स्मो रक्षितुं हा ! क्षमाः ।
येनैवं खलु शासनेन विहितो देशस्य नाशो महान्
तस्याधीनतयाऽत्र जीवनमिदं मर्त्यामृतागस्करम् ॥ १५ ॥
किन्त्वेते हृदि मन्महे यदिह नः स्वाधीनता हिंसया
सिद्धिं नैव गमिष्यतीति तदिहास्माभिः कृतो निश्चयः ।
स्वेच्छापूर्वकमत्र किञ्चन वयं वैदेशिके शासने,
यावच्छक्यमुपास्महै न मनसाप्येतस्य साहाय्यकम् ॥ १६ ॥
उद्युक्तास्तदवज्ञया सविनयं रोद्धुं करानप्यमी
गाढं विश्वसिमोऽत्र शासनमरं नङ्क्ष्यत्यदोऽमानुषम् ।
चेदेते मनसापि दध्म इह नो साहाय्यमुत्तेजिता
अप्यानाश्रितहिंसनाः करदतां चैतस्य नो दध्महे ॥ १७ ॥
तस्मादद्य वयं समे सशपथं सङ्कल्पयामो हृदा
यत्पूर्णाय नवस्वराज्यविधये तत्स्थापनायै तथा ।
काङ्ग्रेसं समयेऽत्र तत्र समये यद्यन्निदेक्ष्यत्यदो-
ऽस्माभिस्तत्तदशेषमेव महताऽनुष्ठास्यते चेतसा ॥ १८ ॥

षड्विंशे दिवसे जनवर्याः इति गीतं च ।
कोकिलः कूजतु इत्यपरं योऽगायत्पूर्वम् ।
गीतिकादम्बर्यन्तर्गत निज पूर्तिकादम्बरी हृदयमुदितम् ।
तद्रचिते काव्येऽत्र सप्ततः सर्गः स्वाधीनतावासरप्रति-
श्रुतिप्रथितोऽयं यातः ॥

सन्धिपणबन्धपत्रम्

हरिगीतिका

एकसप्ततः सर्गः (द्वितीयं परिशिष्टम्)

यरवदाकेन्द्रीयकारागारतः पूनास्थितै-
र्लिखितमेतत्सन्धिपत्रं पण्यबन्धनमास्थितैः।
व्रतपरैः काङ्ग्रेसनेतृभिरत्र सप्रूजयकरौ
प्रति तु नेहरूगान्धिनायडुभिः पटेलसमन्वितैः ॥ १ ॥

इह भवद्भ्यां ब्रिटिश-काङ्ग्रेसानुगतयोः शान्तिदं
कमपि सन्धिं कर्तुमादृतमस्ति यतनं यत्परम्।
एतदर्थं वयमिमे किल भूरि भूरि कृतज्ञतां
ज्ञापयामः श्रीमतोः प्रतिवेदयामो भ्रान्तिदम् ॥ २ ॥

पत्रसंल्लापस्तु भवतोर्योऽभवत्सह शासकै-
र्योऽपि भूयानत्र संवादोऽभवच्चाश्वासकैः।
तत्समस्तं ध्यायतामिह निश्चयोऽयं नोऽभवन्-
न्मानपूर्वं सन्धिमाप्तुं नागतोऽवसरोऽस्त्ययम् ॥ ३ ॥

विगतमासैः पञ्चभिर्याऽजनि तु देशे विस्मया-
धायिका जागर्तिरेकानेकविधजनसञ्चया।
विविधराद्धान्तैरनन्तमतैर्जनैर्लघुगुरुसमै-
र्भिन्नवर्गैरपि महीयः कष्टमिह सोढं समैः ॥ ४ ॥

तद्विलोकयतां मतं नस्तावदेतदुपागतं
तन्न पर्याप्तं किलाप्तुं लक्ष्यमुज्ज्वलमाततम्।
स्यान्न वाच्यं यद्वयं विमताः स्म एव भवन्मते
देशहानिरभूदिहान्दोलनकरे सत्याग्रहे ॥ ५ ॥

कुसमयेऽपि न चारभेमहि नाप्यवैधमकार्ष्म तन्-
नापि तादृशमभवदेतद्यादृशं त्रिदिशे श्रुतम् ।
रक्तपूर्णाः क्रान्तयः किल यास्तदैतिह्ये स्थिता-
स्ताः सदा स्तावं मुदा स्तावं न शाम्यति तत्प्रजा ॥ ६ ॥

यद्यदाचरतीह शासकजातिरुत्तममानिनी
तत्तदाचरति प्रजापि च तत्कृतेष्वभिमानिनी ।
इति वयं किल शिक्षिताः स्मस्तैरमूषु क्रान्तिषु
श्रद्दधेमहि किन्तु वयमेतासु परिणतिशान्तिषु ॥ ७ ॥

अस्मदीयानाममूषां निन्दनं सुविवेकिनो-
रस्ति शोभावहमिदं नाङ्ग्रेजवायसराययोः ।
किञ्च केचन राजकीया वेतरेऽप्यान्दोलनं
निन्दयन्तीदं न तैः सह कलहमिच्छामो वयम् ॥ ८ ॥

वयमिमे मन्यामहे मिलिता महत्यान्दोलने
विस्मयावहरूपतः किल भारतीया यत्समे ।
तत्प्रमाणयति प्रकामं न्याय्यमुचितं चास्ति तत्
तदपि नैवाभीष्टमिदमान्दोलनं नोऽनारतम् ॥ ९ ॥

इह सहर्षं कामयेमहि यद्भवद्भिः सह वयं
सम्भवद्यत्नेन कुर्मः स्थगितमिदमथवासितम् ।
देशजाः पुरुषाः स्त्रियो बाला अनावश्यकतया
यान्तु कारागारमिति नो नास्ति नूनं वाञ्छितम् ॥ १० ॥

केवलां कारां न चैषां यष्टिकाभिस्ताडनं
पीडनं निर्दयबिधानैर्जातु तैर्न सहामहे ।
तेन वयमाश्वासयामो वाञ्च वायसरायकं
सर्वयत्नैः शान्तिसम्भवदध्वशोधमुपास्महे ॥ ११ ॥

सर्वथापि च मानपूर्णां शान्तिमाप्तुं चास्थिते
नात्र यत्ने किमपि हीनं स्यादितीहाशास्महे ।
इह भवन्तो विश्वसिष्यन्त्यस्मदीयनिवेदने
तत्क्षणं तु न शान्तिलक्षणमीषदपि वीक्षामहे ॥ १२ ॥

नाधुनावधि चेक्ष्यते यद्ब्रिटिशशासनिकं जगन्-
मनसि धत्ते कमपि सङ्कल्पं विकल्पं वा शुभम् ।
भारतीयैः स्वयमपि स्वहिताय मार्गोऽन्विष्यताम्,
इत्यपीदं चिन्तितं नहि शासनेन सितांशुभम् ॥ १३ ॥

कर्मचारिभिरत्र कैश्चन शुभविचारा व्यञ्जिताः
सन्ति ये खलु निष्ठया सल्लक्ष्यदृष्ट्या रञ्जिताः ।
किन्तु विश्वसिमो न वयमेतासु विवशाभ्युक्तिषु
प्रेक्षमाणा ब्रिटिशचेष्टा देशलुण्ठनयुक्तिषु ॥ १४ ॥

दीर्घकालाद् भारतीयाः सम्पदोऽपहरन्त्यमी
न क्षमास्ते नापि योग्या द्रष्टुमेतत्परिणतिम् ।
अस्य देशस्याद्य जातो हन्त कीदृक् संक्षयो
नैतिकः पुनरार्थिकः किल राजनीतिसमाश्रयः ॥ १५ ॥

तेन जातुचिदुद्यताः स्युः सत्यमेतदवेक्षितुं
सर्वतः प्रथमं स्वकीयं कार्यमिह चोत्प्रेक्षितुम् ।
ते चिरादिह पृष्ठमारूढा यदस्माकं हठा-
दवतरेयुस्ते ततो बहिरेयुरस्माच्चानयात् ॥ १६ ॥

वर्षशतकं शासनेऽस्मिन्या प्रणाली तैः श्रिता
सर्वथाऽस्मद्शासनाशा नूनमनया कल्पिताः ।
तत्प्रपञ्चान्निर्गता वयमुद्यतेमहि निर्भयाः
स्वं विकासं साधयामस्तत्र तैः सह युज्यताम् ॥ १७ ॥

अद्य यावत्तैः किलास्मासु प्रणीता येऽनया-
स्तदनुतापैः पापमार्जनमाशु तैश्च विधीयताम् ।
वयमिदं विद्मो यदस्मद्देशजाः कतिचिद् बुधा
भिन्नमतयः सन्ति तेऽपि न विश्वसन्ति भवादृशाः ॥ १८ ॥

यदिह भावाः शासकानां साम्प्रतं परिवर्तिता
नाधिकं चेत्कथमहो परिषदि वयं न निवेशिताः ।
हन्त सम्प्रति बन्धने पतितास्तथापि यथाबलं
तत्र सहयोगे सहर्षं श्रीमतां स्मः प्रोद्यताः ॥ १९ ॥

अत्र यस्यामपि दशायां स्मो विलोक्य च तां वयं
युञ्ज्महे सौहार्दपूर्णे सत्प्रयत्ने श्रीमताम् ।
वयमिमे मन्यामहे-भवदीयपत्रोत्तरणया
प्रस्तुतायाः परिषदो विषये लिखितया भाषया ॥ २० ॥

कश्चिदर्थो निश्चितो नास्माभिरनया बुध्यते
लवपुरे या राष्ट्रियाऽभूद्याचना न तयान्वितः ।
तेन वायसरायवचनस्यात्र मूल्यमहत्त्वयो-
र्निर्णये नालं भवामः स्थितिवशात्तु विशेषतः ॥ २१ ॥

कार्यसमितेरथ महासमितेर्नियतमधिवेशनं
यावता न विधीयते किमु तावता निश्चीयते ।
साधिकारं किमपि वक्तुँ लेखितुं न हि शक्यते
व्यक्तिशस्तु निवेद्यतेऽवधिरेष वस्तुविनिर्णये ॥ २२ ॥

यावता स्फुटपूर्णशब्दैः स्वीक्रियेत न शासकैः
भारतस्याधिकृतिरेषा ब्रिटिशपाशविमुक्तये ।
यावता न स्थाप्यते पूर्णं च राष्ट्रियशासनं
भारतीयान्प्रति सदोत्तरदायितां यदुपाश्रयेत् ॥ २३ ॥

तस्य रक्षकशक्तिषु स्यादार्थिकेषु च साधने-
ष्वपि समस्ताधिकृतिरथ च स्यान्नियन्त्रणमुत्तमम् ।
यावता नहि गान्धिलिखितैकादशप्रणिबन्धना-
न्याद्रियन्ते नाधिकारो भारतस्य च दीयते ॥ २४ ॥

यदि च तेनैतादृशं पञ्चायतं परिकल्प्यतां,
येन सुविधाश्चाधिकारो ब्रिटिशविषयश्चिन्त्यताम् ।
तत्र तत्र भवेत्तु राष्ट्रियशासनस्य मतं यथा,
न्यायपूर्णं नेदमथ भारतहितावहमिति तथा ॥ २५ ॥

तेऽधिकारास्ताश्च सुविधास्तानि चैव ऋणान्यपि
प्रेक्षतां पञ्चायतं यन्न्याय्यमुचितं वा न वा ।
तदधिकारादानकाले भारतस्य हितेक्षया-
ऽऽदानदानविनिर्णयो निर्धार्यतां जनताजनैः ॥ २६ ॥

इत्थमुपरिष्टाद्विनिर्दिष्टं समञ्चेन्मन्यताम्,
ब्रिटिशशासनतोऽत्र विषये घोषणा च वितन्यताम् ।
तर्हि वयमपि कार्यसमितौ रोद्धुमिदमान्दोलनं,
प्रेषयिष्यामोऽनुशंसां सविनयावज्ञामुखम् ॥ २७ ॥

केवलाज्ञाभङ्गहेतुकमेव कतिपयविधिमुखा-
भञ्जनं मा भूदिदं चेत्यपि तदा प्रस्तोष्यते ।
किन्तु वैदेशिकवसनमदिरादिविपणिषु तावता
शान्तिपूर्णविरोधदर्शनमविरतं परिपोष्यते ॥ २८ ॥

यावता शासनमिदं स्वयमेव विधिमवकल्पये-
न्नैव वैदेशिकवसनमदिरादिविक्रयरोधने ।
सर्व एव गृहे गृहे लवणं स्वयं निर्मास्यति,
प्रति लवणविधिदण्डधारं न प्रयोगः स्थास्यति ॥ २९ ॥

लवणभाण्डागारमथ वै शासनिकमथवा निजं
नैव केनचिदाक्रमणविषयीकृतं स्यात्कुत्रचित् ।
किञ्च सत्याग्रहमयं रुध्येत यर्ह्यान्दोलनं
तर्हि सत्याग्रहिजनोऽहिंसाव्रती परिमोक्ष्यते ॥ ३० ॥

राजनैतिकवन्दिनोऽप्युपभुक्तकारादण्डका-
श्चेन्न हिंसादूषिताः स्युर्मोचनीयास्तत्क्षणम् ।
लवणमुद्रणकरसमन्वितविधिषु वा विध्यन्तरे
या गृहीतास्ताः पुनः प्रत्यर्पिताः स्युः सम्पदः ॥ ३१ ॥

दण्डिताः सत्याग्रहग्रहिला, गृहीतं यद्धनं,
दण्डतः प्रतिभूत्वतो वा तत्समं प्रतिदास्यते ।
ये पुनस्ते राजपुरुषा ग्रामगा वा नागरा-
स्त्यागपत्रेणासिता वा मुक्तिपत्रेणोज्झिताः ॥ ३२ ॥

ते पुनः सेवां चिकीर्षेयुस्तदाऽऽयोज्याः पदै-
रुपरिदत्ताश्चोपधारा असहयोगान्दोलने ।
अद्य यावद् दण्डितेष्वपरेषु तेष्वपि योजिताः
स्युश्च वायसरायदत्ताः स्युर्मृषा विनिदेशनाः ॥ ३३ ॥

प्रस्तुतायां परिषदि च कस्को मिमेलिषितो जन-
स्तत्र कांङ्ग्रेसस्य भविता प्रातिनिध्यं कीदृशम् ।
अस्य भूयान् निर्णयः किल निश्चिते तस्मिन् क्षणे
यत्र पूर्वोक्ता उपक्रमलापिकाः स्युः स्वीकृताः ॥ ३४ ॥

स्मो वयं भवदीयसुहृदो नामतो विदिता जनै-
रत्र मोतीलालनेहरू-गान्धिमोहनदासकौ ।
नायडूश्च सरोजिनी, वल्लभपटेलः सैयदो
महमूद एष जवाहरो जयरामदासश्चाप्ययम् ॥ ३५ ॥

श्रीकृष्णलालमुखैर्महामतिभिर्बुधैर्योऽध्यापितो
वेदवेदाङ्गानिसाहित्यं तथा षट्दर्शनीम् ।
अध्यापिपद्यस्तानि पञ्चाशत्समाश्च सहस्रकं
तत्कृते काव्येऽयमगमत्सर्ग एककसप्ततः ॥

पुण्यस्मरणप्रस्तावः

औपच्छन्दसिकम्

द्विसप्ततः सर्गः (तृतीयं परिशिष्टम्)

षड्विंशे जानवर्यघस्रे यत्पुण्यस्मरणान्वितं प्रपत्रम् ।
प्रस्तावाकारमभ्यपाठि स्वौपच्छन्दसिकं तदेतदासीत् ॥ १ ॥

एते तत्तत्पुरे वसन्तः कार्तज्ञ्यं गुरुतां हृदा वहन्तः ।
सन्तानानां स्वमातृभूमेर्वन्द्यानामभिवादनं विदध्मः ॥ २ ॥

श्लाघां कुर्मोऽथ हार्दिकीं तां तेषां चाप्यभिनन्दनं पठामः ।
यैः स्वातन्त्र्यार्थके सुदीर्घे युद्धेऽस्मिन् कलितोऽस्ति संविभागः ॥ ३ ॥

देशस्वातन्त्र्यहेतवे यैः सोढं कष्टसहस्रमत्र धीरैः ।
यैः प्राणानां बलिः प्रदत्तः स्वैश्वर्यञ्च समर्पितं हसद्भिः ॥ ४ ॥

धीरोदात्तस्य नायकस्य श्रीगान्धेश्च महात्मनः प्रियस्य ।
योऽस्माकं स्फूर्तिदः सदाऽभूद्यादर्शानददर्शदुत्तमांश्च ॥ ५ ॥

वीराणां नित्यनूतनानां यूनां वै शतशः सहस्रशश्च ।
यैः स्वातन्त्र्यार्चनार्थवेद्यां प्राणानां बलिरर्पितोऽनुरागात् ॥ ६ ॥

सीमाप्रान्तस्य मोहमय्याः शोलापारशवाख्ययोः पुरोश्च ।
आत्मोत्सर्गार्थमुद्यतानां धीराणां मिदनापुरादिकस्य ॥ ७ ॥

बन्धूनां चाप्यसङ्ख्यकाणां यैः सोढाः खरयष्टिकाप्रहाराः ।
अत्याचारसहस्य गौर्जरस्य पृष्ठादर्शिकृषीबलोच्चयस्य ॥ ८ ॥

तेषां प्रान्तान्तरोद्भवानां वीराणामपि पीडने स्थिराणाम् ।
सोढ्वा सर्वविधं विनिग्रहं ये स्वातन्त्र्याख्यरणात्पदं न चेलुः ॥ ९ ॥

आरक्षाणामहो समेषां सैन्यानां गढसैन्यसैनिकानाम् ।
आत्मानं ये निपात्य भीतौ देशभ्रातृषु चिक्षिपुर्न गोलीः ॥ १० ॥

व्यापारे तत्परात्मनां वा वर्गाणां व्यवसायिनां परेषाम् ।
हानीः सोढ्वापि राष्ट्रियेऽस्मिन् सङ्ग्रामे ब्रिटिशप्रतीपगानाम् ॥ ११ ॥

स्त्रीपुंसानाञ्च यष्टिकाभिः काराभिश्च भृशं रुजं गताताम् ।
सामान्यानां स्वदेशसेवां स्वीकृत्यानिशमेव तत्पराणाम् ॥ १२ ॥

ख्यातिं वा पारितोषिकं वा किञ्चिन्नाभ्यलषन् कदाप्यहो ये ।
स्वातन्त्र्यध्येयसिद्धिहेतोः कष्टानामसहन्त शृङ्खला ये ॥ १३ ॥
काठिन्यानां मध्यतः प्रस्थिता ये शान्त्या कार्यमशेषमन्वतिष्ठन् ।
आर्या नार्यश्च भारतीया या गेहानपहाय चान्वगच्छन् ॥ १४ ॥
बद्ध्वा पङ्क्तिञ्च राष्ट्रसेना-सेनान्यो नवलेन साहसेन ।
स्कन्धं स्कन्धेन योजयित्वा प्रत्यूहान् स्वतितिक्षयाऽत्यगच्छन् ॥ १५ ॥
आत्मोत्सर्गे च भागभाजः साफल्येन बभूवुरुल्लसन्त्यः ।
ताभ्यः स्वभ्रातृभिः समाभ्यो भक्ताभ्यः खलु वस्तुतः स्वभूमेः ॥ १६ ॥
विन्दामो वै गर्वमाभ्योऽप्यखर्वं देश्याया युवशक्तितोऽपि सर्वम् ।
युद्धेऽत्रासौकुमार्यरुद्धात्तस्माद् वानरसैन्यतश्च कञ्चित् ॥ १७ ॥
कार्तज्ञ्येन प्रशंसयामो जातीस्ता लघुकास्तथा च गुर्वीः ।
तांस्तान् वर्णांश्च यैर्नियुद्धे ध्येयाप्त्यै यतितं भृशं स्वशक्त्या ॥ १८ ॥
वैशिष्ट्यान्मुस्लिमानिहत्यान् शिष्यान् पारसिकांस्तथेशवीयान् ।
सङ्ख्यास्वल्पान् प्रति प्रतीत्या व्यञ्ज्मो हन्त कृतज्ञतां स्वकीयाम् ॥ १९॥
यैः स्वीयैः साहसैश्च भक्त्या राष्ट्रैक्याय सहायता प्रदत्ता ।
स्वातन्त्र्यावाप्तिरक्षणार्थं यैर्दूरीकृत्य विभेदमर्चिता भूः ॥ २० ॥
आत्मोत्सर्गास्तितिक्षयाप्तानेतान् स्फूर्तिकरानुदाहरन्तः ।
स्वातन्त्र्यस्य प्रतिज्ञयाऽऽढ्यं वाक्यं तत्पुनरेव वाचयामः ॥ २१ ॥
'हिन्दुस्थानं स्वतन्त्रता नो यावद् यात्यखिलप्रकर्षहेतुम् ।
तावद्युद्धं प्रवर्त्स्यतीदम्' इत्येषोऽस्ति विनिश्चयोऽस्मदीयः ॥ २२ ॥

श्री नेहरूमहाकाव्ये सर्गो द्वासप्ततो गतः ॥

इति बालकवि-कविरत्नाशुकवि-कविशिरोमणि-विद्यारत्न-विद्याकलानिधि-विद्याभास्कर-विद्यावाचस्पति-श्रीमद्-अमीरचन्द्रशास्त्रिणासाहित्याचार्येण दिल्लीस्थ—श्रीलालबहादुर शास्त्री केन्द्रीयसंस्कृत विद्यापीठस्य भूतपूर्वेण साहित्य पुराणेतिहासधर्मशास्त्र समस्ताधुनिक विषयअनूक्तोऽमीरचन्द्रेण हितानन्दपदार्चिना ॥ विभागाध्यक्षेण प्रवाचकेनोपप्राचार्येण च भारतराष्ट्रपतिसम्मानपुरस्कृताचार्येण प्रणीतं श्रीमज्जवाहरलालनेहरूचरितं (तदुल्लिखित 'मेरी कहानी' त्यस्य पद्यानुवादात्मकं) द्विसप्ततिसर्गात्मकं महाकाव्यं समाप्तम् ।

परिशिष्टम्

पण्डितजवाहरलालनेहरूलिखिते मेरी कहानीति ग्रन्थे काश्चित्पादटिप्पण्यः प्रदत्ता अभूवन्। यासामत्र तच्चरितमहाकाव्ये प्रायः समावेशो न जातः। तदर्थमिदानोमुपायान्तराभावात्तद्ग्रन्थस्य पृठाष्नामेतत्काव्यस्य च श्लोकानां संख्या निर्दिश्यते। काश्चिल्लघ्व्यष्टिप्पण्यानूद्यन्ते—

मूलग्रन्थ पृष्ठे—महाकाव्यश्लोके—

१७ सर्ग १ श्लोक ४४-'रवीन्द्राविर्भवे दिने।' इति विचित्रः संयोगः

२१ सर्गः १, श्लोकः ४४-वैक्रमे रससिन्धवब्दे सोनविंशशताब्दके। मार्गशीर्षे कृष्णपक्षे सप्तम्यां तु प्रयागके। साष्टादशशते चोननवति ख्रीष्टवत्सरे। नवम्बरचतुर्दश्यां गुरुवाये भवज्जनिः।

३१ सर्गः ३ श्लोकः २४-तनूजेन्दुश्चापि व्यवहृत न काश्मीरिकवरम्।

३२ सर्गः ३, श्लोकः ३४-पूर्वस्तु कल्पनोद्दीपि बालसाहित्यलेखकः।
परश्च कल्पनासूतहिन्दुस्थानकथाकरः॥

३३ सर्गः ३ श्लोकः ३४ पञ्चत्रिंशे-स्पेनिशोपन्यास आद्यः, परक्लृप्तन्तु पुस्तकम्।

३४ सर्गः ३, श्लोकः ४१-पैथागोरसः ख्रीष्टषष्ठशतीभवो यवनानीतत्त्ववेत्ता सांख्यवादी २. अपोलोनियसः-यवनानी तत्त्ववेत्ता वेदान्ती, ३. फ्रायडः-शर्मण्यो मानस शास्त्र वेत्ता।

३६ सर्ग ३, श्लोका ५६ लाप्स्केडीयोहृरणः-जयपत्तनोद्भवो जयपत्तनीजीवनानुपम स्वरूपलेखकः।

४१ सर्गः ४ श्लोकः ५६-१ नितशे-आधुनिकः शर्मण्यस्तत्त्ववेत्ता, २. वरनार्डशा-प्रसिद्ध आङ्ग्लो नाट्यकारः ३. लार्डडिकिन्जनः-केम्ब्रिज विश्वविद्यालयस्याध्यापकः।

४२ सर्गः ४ श्लोकः ६८-१ आस्कर वाइल्डः, २. वाल्टर पेपरः-नीतिमुक्त कलापक्षपातिनावाङ्ग्ललेखकौ।

४६ सर्गः ४ श्लोकः १६३-१ फेवियन् २ समाजवादः-लेख प्रचाराभ्या मौद्योगिकीं स्थितिं संस्कुर्वन्ति फैवियनः समाजवादिनो भूमि सम्पत्तौ समाजाधिकारेण क्रान्तिमिच्छन्ति।

५६ सर्गः ५ श्लोकः ८६-सस्ता साहित्य मण्डल नव देहली प्रकाशिते 'कांग्रेसका इतिहास' पुस्तके चतुर्थं प्रकरणं दृश्यताम्।

६२ सर्गः ५ श्लोकः १२३-रोजरकेसमेण्टः-ब्रिटिश शिष्टेरुपनिवेशेषूच्चपदस्थ पश्चात्तच्छत्रुत्वेन प्राणदण्डं प्राप्तः।

६३ सर्गः ५ श्लोकः १२७ वर्टरण्डरसलः-लार्ड पदं त्यक्त्वा समाजवाद प्रचारे लग्नः आङ्ग्लोऽध्यापकः समर्थलेखकश्च

६७ सर्गः ६ श्लोकः २४-'वाल्तरदिला मेयर' इत्यस्यैकस्य पत्रस्यानुवादः।

६८ सर्गः ७ श्लोकः ५-कोमागाटामारूनामको जलपोतो बावगुरुदत्तसिंहेन कनाडा प्रवेशाय १९१५ खीष्टादे क्रीतः, शिष्याणां षट्साहस्त्रीं तत्रारोप्य कनाडायांप्रवेशमप्राप्य प्रत्यावृत्तः। पश्चाच्चासौ निगृहीतः।

६९ सर्गः ७ श्लोकः १०-एकं विलं (शासनेप्सितं) प्रत्यावर्त्यं द्वितीयं विल विधितां नीतम्।

७२ सर्गः ७ श्लोकः ३७-शिष्टिनियुक्तया हण्टरसमित्या सहासहयोगकारणं पूर्वोक्तात् 'कांग्रेसका इतिहास' पुस्तकाद् विज्ञेयम्। कांग्रेसनियुक्त समितिसदस्या गान्धि-मोतीलालनेहरू-देशबन्धुदास अब्बासतैयब मोतीलालनेहरौ सभापतिपदमास्थिते जयकरोऽपि तत्रसमावेशितफजलुलहकार श्री सन्तानञ्चासन्

७९ सर्गः ७ श्लोकः ६६-अत्र स्मृति दोषः प्रतिभाति, श्रीगान्धिस्तु श्री तिलकमहाराजेन सहैव मुम्बापुर्यासासीत्।

१३७ सर्गः १३, श्लोकः ३५-वृत्तपत्रेषु निराधारोऽयं समाचार प्रकाश्यते यदुत्तर प्रदेश राज्यपालो हाइकोर्ट वटलरः कारायां मत्पितु रन्तिकेशम्पेन मदिरां प्रैषयत्। मम पित्रा कांग्रेसाङ्गीकारात्परं मदिरापानं परित्यक्तमासीत्।

१३९ सर्गः **१३** श्लोकः ५१-श्लोकोऽयमाङ्ग्लकविताया अनुवादः।

१४३ सर्गः १३ श्लोकः ९९-उत्तरप्रदेशीय कारावासधारासु ९८७ धारायामिदमत्यावश्यकं विहितमासीद् वन्दिनां कष्टप्रदश्रमविधानम

रूसदेशस्य एस० एफ० एस आर० विधाने ततो विपरीतं वन्दिभ्यः कष्टं न देयमिति विधानम्।

१४४ सर्गः १३ श्लोकः ६६-दण्डविधानं हि सुरक्षोपायमात्रम्, इदं कष्ट प्रदानान्मुक्तं स्यात्, वन्दिनो वृथा न क्लेशनीया इति च।

१४६ सर्गः १४ श्लोकः ५१-अस्या घटनायाः प्रचारको 'डेरी हेरेल्ड' पत्र प्रतिनिधिः स्लोकोवः श्रीगान्धेः पुरस्तादस्या घटनायाः स्वकल्पितत्वं स्वीकृत्य तदर्थं क्षमामयाचतेति मूल पुस्तके ४०७ पृष्ठे पादटिप्पण्यां लिखितमस्ति।

१५२ सर्गः १४ श्लोकः ८४ अयं 'रिचर्ड सार्नेट' इत्यस्यैकस्य पद्यस्य भावानुवादः।

१८३ सर्गः १८ श्लोक ५७-अत्रापि कश्चित्स्मृति दोष एव प्रकाशितोऽभूत् पदटिप्पणेऽस्मिन्। कांग्रस सभ्या अपि जात्वहिंसां गृह्णन्ति गम्भीरतया न केचित् ध्यात्वेत्यरोदीदिह गान्धिरत्र व्याख्यानतो हन्त सभा सदां तु सूत्र कृन्तन मस्त्वत्रानिवार्यं नः सभासदामं

१८४ सर्गः १८ श्लोकः ७१-इत्यंश स्वीकृतौ दण्डः सम्यत्व मुक्तिदानस्वीकृत इति श्री गान्धेः प्रस्ताव शोधनम्॥ २॥

१८५ सर्गः १८ श्लोकः ५७-श्लोकात् ८० श्लोकान्ते पाठेऽत्रत्या टिप्पण्यपि समनूदितास्ति।

१८८ सर्गः १८ श्लोकः १०६-कस्याश्चिदाङ्ग्ल कवितायाभाषानुवादोऽयम्।

२१६ सर्गः २१ श्लोकः ६३-स्वल्पायां शक्तावपि वायु दुर्ग बन्ध व्यसनः स्वनामाङ्कितोपन्यासस्य पात्रविशेषः।

२२४ सर्गः २१ श्लोकः १३६-श्री मानवेन्द्रनाथ रायः प्रथम क्रान्तिकारी बङ्गीय आसीत्। भारतात्पलाय्यैव रूसदेशमध्युषित्तः। अत्रत्या टिप्पणी मूलग्रन्थे समावेशिता।

२२५ सर्गः २१ श्लोकः १४६-रोमा रोला सुप्रसिद्धः साम्राज्यविरोधी फ्रांसदेश्यो विद्वान् १६४४ ख्रीष्टाब्दे मृतः श्लोकः।

१४६ धनगोपालः स्व पुस्तकेषु भारतीय सभ्यता चित्रोपस्थापकः आङ्ग्लभाषाकोविदोऽमेरिकायां मृतः।

२३६ सर्गः २३ श्लोकः २१-लैटिन्योक्तामरीका मैक्सिकोप्रानीमलिविया प्रभृतयोऽमरीकाप्रदेशाः।

२३७ सर्गः २३ श्लोकः २०-सुप्रसिद्धः शर्मण्य वैज्ञानिकः आईंस्टीनः, स्वतन्त्र चीन प्रथम प्रमुखस्य सनयात सेनस्य विधवा पत्नी ।

२३८ सर्गः २३ श्लोकः २४-यूरोपीय श्रमिक संघानां त्रयाणांनामानि प्रथमो द्वितीय स्तृतीयश्चान्तरराष्ट्रियः श्रमिकसङ्घः ।

२४० सर्गः २३ श्लोकः ३७-'सेवको-वेन्जेटि' इत्युभौ तावदिल्लीभवौ श्रमिक संघ कार्य कर्त्तारौ, यावमरीका सर्वकारेण मिथ्याभियोगेन निगृह्य प्राणदण्डं प्रापितौ, एष घटना चाखिलविश्व श्रमिकवर्गं महान्तमुद्वेगमजनयत् ।

२६५ सर्गः २६ श्लोकः २१-अत्रत्या टिप्पणी प्रायः काव्यगत पद्येष्वनूदिता समावेशिता चास्ति ।

२६६ सर्गः २६ श्लोकः २१ पूर्वे समाजसुधारकां आदर्शवादिन आसन्, मार्क्सस्तदतुयायिनश्च वैज्ञानिकसमाजवादिन इति भेदः ।

२७१ सर्गः २६ श्लोकः ७५ निजेन परिहासेनाप्यानन्दानुभूतौ पण्डित जवाहरलाल नेहरू महाभागस्येयं क्षमता प्रकाश्यते ।

२८४ सर्गः २७ श्लोकः १३१-घोषणापणाश्चत्वार आसन्-१ प्रस्ताविते सम्मेलने हिन्दुस्थानस्य पूर्णौरनिवेशिकपदाधारेण वार्तास्यात् । २. कांग्रेस प्रतिनिधित्वं सर्वतोऽधिकं स्यात् । ३. राजनैतिका वन्दिनो विमुक्ताः स्यु इतः परं

२८५ सर्गः २७ श्लोकः १३१ हिन्दुस्थानस्य शासनं यथासम्भवमुपनिवेश शासन पद्धतिकं स्यात् ।

२८९ सर्गः २७ श्लोकः १७८-इतः परं श्रमिकसंघानामेकतायाः प्रयासा अधिकं साफल्यां गताः । ते सर्वे सहयोगेन कार्यं कुर्वन्ति ।

३०० सर्गः २९ श्लोकः २-स्वाधीनताप्ति प्रतिज्ञार्थमस्यमहाकाव्यस्य सप्ततितमं सर्गप्रथमं परिशिष्टं पठतः ।

३०२ सर्गः २९ श्लोकः २२-१. सर्वथा मद्यनिषेधः २. रूप्यकमूल्यनिर्धारणम् ३. पञ्चाशत्प्रतिशत करमुक्तिः, ८. स्वदेशिपोतप्रस्थान ४. सैनिकव्ययाल्पनम् ५. लवणकरस्थगमन् ६. अधिकारिवेतनाधीकरण ७. वैदेशिकवस्त्रबहिष्कारः, ८. नियमः, ९. अहिंसक राजनैतिक वन्दि विसर्जनम् १० गुप्तचरविभागस्थगनम् ११. आत्मरक्षार्थं शस्त्रधारणादेशः । इत्येकादश वार्ताः ।

३१२ सर्गे ३० श्लोकः ३६, इदं पद्यम् आस्कर वाइल्डकवेगङ्ग्ल पद्यस्य भावानुवादः।

३१६ सर्गः ३० श्लोकः ६३-एष वन्दि संख्या ११ दिसम्बर १६३४ दिनाङ्के प्रकाशिते स्टेट्समैन पत्रेऽङ्किताऽऽसीत्।

३२४ सर्गः ३१ श्लोकः १६-इदं वक्तव्यं २५ जून १६३० दिनाङ्के पं० मोतीलाल नेहरू सम्मत्याऽदीयत। अत्राश्वासनं प्रार्थितमासीत् तस्मिन्नाश्वासने प्राप्ते सन्धिद्वारमुद्घाटितं स्यात्। सविनयाज्ञाभङ्गान्दोलन स्थगितं स्यात्। शिष्टेदंमननीतिश्चास्तमियात् ततश्च सन्धिपणेषु नियतेषु कांग्रेसं गोलपीठ परिषदि सम्मिलितं स्यात्।

३२७ सर्गः ३१ श्लोकः ६२-तद्विज्ञानायैक सप्ततः सर्गो) द्वितीयं परिशिष्टं वा) विलोक्यताम्।

३६३ सर्गः ३४ श्लोकः ३४ श्लोकः ११६ अत्र धारायां रक्षा (सेना) वैदेशिकाः प्रश्नाः, अल्प संख्यकानां जातीनां स्थितिः, भारतस्यार्थिकी मान्यता, उत्तरदायित्व निर्वाह इत्येवमादीनां विषयाणां प्रतिबन्ध संरक्षणे अप्यावश्यकावंशा वास्ताम्।

३४६ सर्गः ३२ श्लोकः १७१-अयं प्रस्तावोद्विसप्तते सर्गे तृतीये वा परिशिष्टे विलोकनीयः।

३६५ सर्गः ३४ श्लोकः १३४, इदं पद्यमाङ्ग्लकविताभावानुवादात्मकम्-
सकल जगतिरोतिः सा यथार्थाद्य दृष्टा
कृपणवदिह गर्जन्तो न वर्षन्ति मेघाः॥ इति।

३६७ सर्गः ३५ श्लोकः १४-अत्र मूलग्रन्थे अनातोले फ्रांसलेखकेन लिखितस्य पेनन्विग आइलैण्ड ग्रन्थस्य मुख्यकर्मचारिवर्गप्रमुखस्येव फ्रांसिक सैनिकाधिकारिणोड्रेफि सस्येव वा मिथ्या दोषारोपोऽपि प्रमाणाभाव एव प्रमाणमितिमत्वायथार्थीकृतोऽभूत्।

३६८ ,, ,, पण्डित जवाहरलाल नेहरू महाभागस्य तस्यामेव दिश्ययं संकेतः प्रतिभाति।

३६६ सर्गः ३५ श्लोकः २६-फासिस्ट सरणिरियमद्यत्वे मुसोलिनी पद्धतिरिति मन्यते। परं फासिस्टमनोवृत्तेरयमर्थः-यथा रक्षितहितवतां वर्गस्य लाभाय बलादाहिता एकतन्त्रता-कर्तुमकर्तुमन्यथाकर्तुं प्रवृत्तिरिति।

३७० सर्गः ३५ श्लोकः २६ ईदृश्येकतन्त्रताद्यत्वे इटलीदेशे प्रचलति। पण्डित जवाहरलाल नेहरूर्मन्यते यथा हिंसावादिनोऽप्यद्यत्वे एकतन्त्रत्व साधने लग्नाः सन्ति।

३७८ सर्गः ३५ श्लोकः १०३-एम्० एन्० रायो मानवेन्द्रनाथ रायो वा १९५४ ख्रिष्टाब्दे दिवङ्गतः।

३७९ सर्गः ३५ श्लोकः ११३-परिषदमगुर्मानवहताम् इत्यनेन 'मजलिसे-अहरार' इति ग्राह्यम्।

३९८ सर्गः ३७ श्लोकः ९५-अयमर्थो बाइबिल नाम्नो धर्मग्रन्थस्य प्राचीनायाः प्रतिलिपि (१ किंग्ज् १२-१०) तः परिगृहीतः।

३९९ सर्गः ३७ श्लोकः १०३-१०५-सन्धेरनन्तरं सन्धिभङ्गप्रसङ्गे श्रीगान्धिस्त्रिवारं शिमलां गतः। तृतीयेऽवसरे कांग्रेसस्यायमधिकारो दत्तः, यदीदृशीषु घटनासु कांग्रेसं प्रतिकुर्यात्। किन्तु ततः पूर्वं बारडोली—

४०० „ „ „ „-विहितात्याचाराणां शोधार्थं काचित्समिति र्न्ययुज्यत सर्वकारेण।

४०१ सर्गः ३८ श्लोकः ७-८-इदमुद्धरणं पण्डितजवाहरलालनेहरूमहाभागेन ग्लोर्नीब्रोल्टनस्य 'The Tragedy of Gandhi' नामकात्पुस्तकाद् गृहीतम्। पूर्वं तेन तस्य पुस्तकस्यालोचनैव दृष्टाभूत, पश्चात्तु

४०२ „ „ „ „तत्पुस्तकमपि दृष्टम्। अस्मिन् पुस्तके बोल्टनेन भूयांसि वर्णनानि तत्परिणामाश्च निराधारतयैव निरचीयन्त इत्यस्याः स्वोक्तेरत्र निदर्शनान्यपि दत्तानि। यथा तया समित्या दिल्ली-

४०३ „ „ „ „-सन्धिपणवन्धप्रसङ्गे तदनन्तरं वा किं कृतं किं न कृतमिति तल्लिखितं निराधारम्। १९३१ ख्रीष्टाब्दे सरदार वल्लभभाई-

४०४ „ „ „ „-पटेलेन कांग्रेससभापतित्वं प्राप्तम्। अत्र निरस्त साम्यातिशयस्य श्रीगान्धेः प्रतिस्पर्धायाश्चर्चा नितान्तं हास्यास्पदा।

४०७-४१९ सर्गः ३८ श्लोकः ४१-७३अतः परं मूलपुस्तकस्य ४०६-४०७ पृष्ठयोः कथायाः पद्यानुवादो मुद्रणाद्वञ्चितोऽभूत्। सोऽत्र मुद्र्यते। ४०७ पृष्ठस्थितायाः पादटिप्पण्याश्च तत्र पद्यानुवादे समावेशः कृतः।

किन्तु स्वकर्मवीरत्वं तेनास्ति भुविदर्शितम् ।
अपूर्वं साहसं चास्ति कृत्स्ना चोत्तरदायिता ।। ४१ ।। क
निरूढातेन भवति तथापि यदि भाष्यते ।
मस्तिष्केऽस्वच्छता तस्य निष्कृष्यन्ते यतस्त्विमे ।। ४२ ।। क
व्यवहारपरीणामा तर्ह्येषैव प्रशस्यते ।
तस्या वै व्यावहारिक्या राजनीतेरपेक्षया ।। ४३ ।। क
याऽत्र प्रारभ्यतेऽधीतिकक्षेष्वेवावसीयते ।
उच्चस्तरेषु मस्तिष्क स्वच्छताकीर्तिधामसु ।। ४४ ।। क
तस्यानुगामिकोटीनां मस्तिष्कं नास्त निर्मलम् ।
इति सत्यं, न ते राजनीतिं नो शासनं विदुः ।। ४५ ।। क
ते मानवापेक्षितानां भोजनावासवाससाम् ।
भूमेश्चैव विचारेषु ते कल्पन्तेनाधिका ततः ।। ४६ ।। क
मम विस्मय कृद्भाति मनोविज्ञान पण्डिताः ।
पाश्चात्याः पत्रकारास्ते कथमत्रैव भारते ।। ४७ ।। क
लिखन्तः कुर्वते भूयः प्रमादं भुवि विश्रुताः ।
इदं किमस्ति बाल्यस्यापरिवर्त्यैक भावना ।। ४८ ।। क
पूर्वदेशोऽतिमात्रं तद्विचित्रं वस्तु वै परम् ।
न तन्मेयं हि सामान्यै र्मानदण्डैः कदाचन ।। ४९ ।। क
इत्येषा, पाण्डुरोगो वा सोऽयमाङ्ग्ल जनाक्षिणी ।
दूषयति येनैतेऽद्भुततादद्भुतक्पयहो ।। ५० ।। क
विश्वासेनोपगृह्णन्ति बिना कञ्चन विस्मयम् ।
मन्यन्ते ते हि पूर्वस्मिन्देशे सर्वार्थसम्भवम् ।। ५१ ।। क
इहस्यैः परिपूर्णोऽस्मिन् विचित्रैश्चित्रतरै र्भृशम् ।
लिखन्ति कर्हिचिद् ग्रन्थान् बहुज्ञत्व निरीक्षणान् ।। ५२ ।। क
तीव्रावलोकनादर्शान् कदाचिन्त्रुटि पूरितान् ।
स्मरामि गान्धौ यूरोपान् प्रस्थिते सैकत्रिंशके ।। ५३ ।। क
तदनन्तरकाले तं पेरिसस्थस्य लेखितुः ।
संवाददातुर्लेखं यं हिन्दुस्थानानुबन्धितम् ।। ५४ ।। क
तत्रैका घटनाऽलेखि तेनासहयुजः क्षणे ।
एकविंशे जार्जपुत्रे भारते किल भ्राम्यति ।। ५५ ।। क

क्वचिद्गान्धिरकस्मात्तं चरणग्रहपूर्वकम् ।
बद्ध्वा च जानुनी कुर्वन्नाक्रोशं तं न्यवेदयत् ॥ ५६ ॥ क
शमं देह्यस्य देशस्य भाग्यहीनस्य सत्वरम् ।
नास्माभीरञ्जनीगाथा श्रुतसीन्नापि गान्धिना ॥ ५७ ॥ क
इत्यस्मैपत्रकाराय पत्रमेकमलेखिषम् ।
अयं च पत्रकारोऽभूत्स्लोकोम्बः प्रातिनिध्यभाक् ॥ ५८ ॥ क
डेलीहैरल्डै पत्रस्य यूरोपांस्तु गतं स वै ।
गान्धि द्रष्टुं गतस्तत्रस्व्यकार्षीत्तां प्रकल्पिताम् ॥ ५९ ॥ क
गाथां लेखितुमेताञ्च क्षमामप्ययमयाचत ।
सोऽनुतापं प्रकाश्यापि विश्वस्ताच्छ्रुतवानहम् ।
इमां गाथामित्यलेखीद्यत्राश्चर्यं ममाभवत् ॥ ६० ॥ क
विचारं वा विमर्शं वा विना कथमनेन सा
कथा विश्वासमानीता वासम्भाव्या तु जातुचित् ॥ ६१ ॥ क
गान्धि विदंश्च कांग्रेसं हिन्दुस्थानं च कश्चन ।
कदापि कल्पितां गाथामेतां न स्वीकरिष्यति ॥ ६२ ॥ क
दुर्दैवादत्र वर्तन्ते वहवस्ते किलाङ्ग्लाः ।
ये चिरान्निवसन्तोऽपि गान्धि नैव विदन्त्यहो ॥ ६३ ॥ क
हिन्दुस्थानस्य विषयेऽप्येते सान्त्यविवेकिनः ।
तथापि सर्वथाऽसभ्याऽसत्याचासीदियं कथा ॥ ६४ ॥ क
यथा केण्टरवरी चर्चाध्यक्षस्यात्रमुसोलिनीम् ।
प्रति प्रणमनं शीर्षासनेन पदचालनैः ॥ ६५ ॥ क
सम्प्रत्येव समाचारपत्रे विवृतिरुद्गता ।
तत्रान्याकृतिरस्त्येका गाथा यत्रोदितं स्फुटम् ॥ ६६ ॥ क
गान्धेरस्ति महासम्पत्कोटिभिर्गणिताऽमितैः ।
या तस्य सुहृदां पार्श्वे गोप्यरूपेण रक्षिता ॥ ६७ ॥ क
कांग्रेसं तां जिघृक्षन्ती विभेति यदि हास्यति ।
गान्धिः काङ्ग्रेसमेतत्सा सम्पद्वास्तान्निरेष्यति ॥ ६८ ॥ क
इतीयं कल्पनाप्यास्ते पादशीर्ष विवर्जिता ।
गान्धिर्हि कञ्चित्कोषं नो स्वाधिकारेऽत्र रक्षति ॥ ६९ ॥ क

न च गोपायति तं संचिनोति स यद्धनम् ।
तत्सार्वजनिकीं संस्थां प्रत्यर्पयति तस्य च ।। ७० ।। क
आयव्यय विवेकेऽसौ वणिग्बुद्धिः स्वभावतः ।
स परीक्षयते साक्षादनुदानानि सर्वशः ।। ७१ ।। क
एकविंशे त्वेक कोटिः कांग्रेसेनानुदानतः ।
संचिताऽऽसीदियं गाथा मन्ये तामाधृता भवेत् ।। ७२ ।। क
एष राशिर्महान् भाति भारते सर्वतस्तु सः ।
विप्रकीर्णो न वै भायादधिको, न्यून एव तु ।। ७३ ।। क

४२० सर्गः ३९ श्लोकः ३२-अत्र पादटिप्पण्यां २७ अगस्त १९३१ दिनाङ्के शिमलासन्धौ प्रकाशितानां पत्राणां चर्चापि विहिता। भारत शिष्टेर्गृहमन्त्रिणमिमरसनं प्रति श्री गान्धेः पत्रं तु कृत्स्नं प्रकाशितम् ।

४२१ ,, ,, ,, ,, अत्रेमरसन पत्रस्य चतुर्थस्य वाक्यकदम्ब कस्य स्वीकारे काङ्ग्रेसपक्षतोऽसम्भावना प्रकाशिता तस्य कारणमपितत्रोल्लिखितमासीत् । स्थानाभावात्तत्पत्रमत्र न दीयते ।

४२२ ,, ,, ,, ,, अत्र पृष्ठे पादटिप्पण्यां श्री गान्धि प्रति इमरसनस्य पत्रमप्यविकलं प्रकाशितमस्ति । यदत्र स्थानाभावान्नदीयते ।

४२४ सर्गः ३९ श्लोकः ५६-अत्र पादटिप्पण्यां कृषीसम्बन्धिनो ऋणस्य षष्ट्युत्तराष्टशताकोटितादयः समुल्लिखिताः । अन्ते च समग्र भारतस्य कृषीसम्बन्धिनो ऋणस्य द्विशताधिकैकसहस्रकोटिता निरूपितास्ति ।

४४४ सर्गः ४० श्लोकः ५३-अत्र किञ्चिद् व्यङ्ग्यमस्ति बाइबिले एकत्रेश्वर सन्देश वाहको मूसादशेश्वरादेशान् गणयति यत्रैकत्ररऽपुटे पृ.९) पितृकृतापराधस्य तृतीयचतुर्थपुरुषेण दण्डो भाग्यो भवतीत्युक्तश्, तेदच विपर्यस्यतेसन्तान कृतापराधस्य फलं पितृभ्यांभोग्यमिति ।

४४७ सर्गः ४० श्लोकः ८०-अत्र शेक्सपियरकृतस्यैकस्याङ्ग्लपद्यस्य भावानुवादो निहितः ।

४५० सर्गः ४१ श्लोकः १९-भारतमन्त्रिणा सरसैम्युअलहोरेण २४ मार्च १९३२ दिनाङ्के कामनसभायांप्रोक्तम्-यथाहं स्वीकरोमि य ये

अध्यादेशा अस्माभिः समर्थितास्ते व्यापकाः कठोराःप्रतिजीवनं प्रभावयन्तिस्म।

४५३ सर्गः ४१ श्लोकः ४२-४३-एतौ श्लोकौ ४५३ पृष्ठस्थायाः पाद टिप्पण्याः पद्यानुवादात्मकौ।

४५५ सर्गः ४२ श्लोकः १९ अयं श्लोकोऽप्याङ्ग्ल पद्यस्य संस्कृतरूपान्तरम्

४६१ सर्गः ४२ श्लोकः ६६-इदं पद्यं कविक्लेवरक्लृप्तक्ष्यैकस्य प्रहसनस्य कवितायाः पद्यानुवादात्मकम्।

४६७ सर्गः ४२ श्लोकाः १८५-१८६ एतेपद्ये इटैनिकपोतस्यामरीकायां प्रथमयात्राया हिमशिखाखण्डेन सङ्घट्य मग्नस्य प्रसङ्गमुपवर्ण-यतः। तस्य द्विसहस्रमितेषु यात्रिकेषु षडधिक सप्तशतमेम रक्षितु मपार्यत।

४९१ सर्गः ४३ श्लोकः १०२-इदं निजपत्रं ३० जून १९३३ दिनाङ्के लिखितम् तत्र सत्याग्रहिभिर्वन्दिभिः सहातिकठौरं वर्तितु सादिष्टः।

४९७ सगः ४५ श्लोकः १६-१७ उत्तरार्धपूर्वार्धावाङ्ग्लकवितायाः संस्कृत पद्यानुवादात्मकौस्तः।

५२४ सर्गः ४७ श्लोकः ६८-इदं पद्यमप्याङ्ग्लपद्यानुवादरूपम्।

५२५ सर्गः ४७ श्लोकः ७६-अयं जी. के. चेस्टरटनः कैथलिक सम्प्रदायानु-गामी समभूत्।

५२६ सर्गः ४७ श्लोकः ७९-अत्र पादटिप्पण्याम् आङ्ग्लदेशीयचर्चस्य चर्चया कश्चित्परिचयः प्रदत्तोऽस्ति।

५२७ ,, ,, ,, ,, १२ दिसम्बर १९३४ दिनाङ्के लार्डसभायां वेण्टरवर्या धर्माध्यक्षेण १९१९ खीष्टाब्देः माण्डेगुद्योसफोडीथिसुधारणां प्रस्तावनायाश्चर्चा कृताभूत्। उक्तञ्चासीत्-कदाचिन्मम प्रति-भाति यथेयंमहतीघोषणा किञ्चित्सत्वरतया विहितास्ति। मन्येमहायुद्धादनन्तरमिदमाशुकारितायाः उदारतायाश्च प्रदर्शनं कृतमिति।

५३९ सर्गः ४७ श्लोकः १०७ - विशषलिखितमिदं पत्रं रेनाण्डनाईवरेण लिखितेमॉरलमैन एण्ड इम्मारलसोसायटी इति नाम्नि पुस्तके ७८ तमे पृष्ठे समुद्धतमस्ति। इदं पुस्तकमतिरोचकं विचारप्रेरकं चास्ति।

५५० सर्गः ४८ श्लोकः २२२-अस्यपद्यस्य पूर्वार्धः शेक्सपियरस्य हेमलेट-नाटकस्याङ्ग्लपंक्तीनां पाठमाधृतोऽस्ति ।

५७४ सर्गः ५० श्लोकः ७२ इदं पद्यम् अलेक्जेण्डर (अलक्ष्येन्द्र) कृतस्याङ्ग्लपद्यस्याभावानुवादात्मकम् ।

५७४ सर्गः ५१ श्लोकः ६०-अत्र प्रोटियस-ट्रायटनो स्मरणीयौ । प्रथमा कामरूपा जल देवता दुर्दर्शा । अपरानरमत्स्या जलदेवता दुःश्रवा ।

५७७ सर्गः ५१ श्लोकः ६०-इदं पद्यमर्धपूर्वार्धेनत्तरार्धेन ६१ तमंपद्यं च पूर्वार्धेनैकस्याङ्ग्लपद्यस्य भावानुवादात्मकमस्ति ।

५७८ सर्गः ५१ श्लोकः १०५-जूडस ईशुख्रीष्टस्य द्वादशसुशिष्येष्वेकः, येन विश्वासघातिना ईशुख्रीष्टोयहूदिद्यं हस्तं प्रापितः ।

५७६ सर्गः ५१ श्लोकः १११ इदं पद्यमप्याङ्ग्लपद्यस्य भावानुवादात्मकम्

५८० सर्गः ५१ श्लोकः ११५ इदं बाइबिले प्रसिद्धस्य वाक्यस्य संस्कृत-पद्यरूपान्तरणम् ।

५६० सर्गः ५२ श्लोकः १३३- अतएव सी.वी.आई. चिन्तामणिना प्रसिद्धो दारनेत्रा लीडरपत्र सम्पादकेन युक्तप्रान्तीयविधान सभायां लोकसभासयुक्तनिर्वाचनसमितेर्विवरणमालोचयता हिन्दुस्थाने वैद्यशासनस्यात्यन्ताभावः प्रतिपादितः ।

५६६ सर्गः ५३ श्लोकः ७१-असतोमासद्गमय, तमसो माज्योतिर्गमय, मृत्योर्माअमृतं गमय-बृहदारण्यकोपनिषद्-१-३-२७ ।

६०० सर्गः ५३ श्लोकः ७३-हिन्दुस्थानेऽयं महान् परस्परविरोधः, यत्र विविधतायामप्येकता समाविष्टा । साधारण्येनेदं न दृश्यते । कस्मिंश्चिदेकस्मिन्राजनैतिक सूत्रे निबद्धेन तेनेतिहासेन प्रकाशितः । किन्त्वियमस्तैका वास्तविकतास्ति ।

६०१ सर्गः ५३ श्लोकः ८६-मेटर्निखः १८०७ खीष्टाब्दात् १८४८ खीष्टाब्दंयावदास्ट्रियायां: प्रधानमन्त्री आसीत् । अयं प्रगतिविरोधी अराष्ट्रियतायाश्च मूर्तं रूप मासीत् । स कूटनीत्याशर्मण्येटली-देशौ चिरमारिट्रयामुष्टौ निबध्यारक्षत् ।

६०४ सर्गः ५४ श्लोकः ४, ६-एते उद्धरणे भारतीयशासनसुधारसम्बन्धिन्या ज्वाइंट फार्लमेण्टरी समितेः कार्यविवृते गृहीते ।

६१२ सर्गः ५४ श्लोकः २९- अमेरिका कवेः ई. मारखमस्य The man with the Hoeनाम्न्याः कविताया भावानुवादः ।

६३२ सर्गः ५५ श्लोकः ७३-अत्र पादटिप्पण्यां १९२१-१९२३ खीष्टाब्दयोः कृतायामनुष्यगणनाया आधारेण तत्तद्भाषाभाषिणां संख्या लिखिताः सन्ति ।

६३५ सर्गः ५५ श्लोकः १०३-इत्यत्र पादटिप्पण्यां बेसिक अंग्रेजी-अमेरिकन-वैज्ञानिक-अन्तरराष्ट्रीय व्यापारिक नाम्ना पञ्च भाषा अन्या अप्युल्लिखिताः ।

६४० सर्गः ५६ श्लोकः ३१-सरमुहम्मद इकबालः २१ अप्रैल १९३८ दिनाङ्के दिवङ्गतः ।

६४३ सर्गः ५६ श्लोकः ६८-६९-उत्तरार्धपूर्वार्धयोरिदमुद्धरणं हिस्ट्री आफ नेशनलिज्म इन ईस्ट । तो गृहीतम् ।

६४५ सर्गः ५६ श्लोकः १०४-इदमपि हिस्ट्री आफ नेशनलिज्म इन ईस्टतो PlseeMS गृहीतम् ।

६५३ सर्गः ५६ श्लोकः २००-साम्प्रतमेवाङ्ग न लार्टानां भारतीय मुस्लिमानां चैकं सम्मेलनं विहिनं मिथः सम्बन्ध वृद्धये ।

६५४ सर्गः ५६ श्लोकः २१४-स्वस्ययस्यकस्यापि वादेशस्य भौगोलिक सीमा बहिर्वसतिष्वपि तज्जातिधर्मकारणतोऽधिकारास्तित्वं राजनैतिकम् ।

६५६ सर्गः ५६ श्लोकः २२०-मुस्लिममणात्स्वस्यातानि प्रत्याकर्षितुंभीसवीयाभिः शक्तिभिर्यान्याक्रमणानि कृतानि तानि क्रुरोऽइति नाम्ना धर्मयुद्धमितिनाम्ना वाऽभिधीयन्ते ।

६६५ सर्गः ५७ श्लोकः ७७-८१- इमानि पद्यान्याङ्ग्लकविताया:भावानुवादात्मकानि ।

६६६ सर्गः ५७ श्लोकः ९६-अखिलबङ्गभूमिधरसम्मेलने स्वागताध्यक्षेण श्री. बी. एन. टैगोरेणोक्तम्-स्वपक्षतोऽहं तस्मिन्दिने नानुतपिष्यांमि यदा भूमिघरेभ्यः किञ्चिदुचितं धनं दत्वा भूमयोराष्ट्रीय कृताः स्युः ।

६८३ सर्गः ५८ श्लोकः १७१-इदं पद्यमाङ्ग्लकविताया भावानुवादात्मकम् ।

६८५ सर्गः ५६ श्लोकः १-इदँ पद्यँ राबर्टं ब्राउलिङ्गस्य कविताया भावानु-वादात्मकम् ।

६८८ सर्गः ५६ श्लोकः ३८-गैसमास्कमन योजनीयमिति। विषाक्तवायु युक्तेभ्यो गैसगोलकेभ्य आत्मानं रक्षितुं प्रयोज्यं मुखावगुण्ठनं गैसमास्कं इत्युच्यते ।

६९६ सर्गः ६० श्लोकः ५१-तत्रत्यवातावरणानुकूलम् ।

६९७ सर्गः ६० श्लोकः ६३ लार्डानां भवने १५ दिसम्बर १९३५ दिनाङ्के

६९८ सर्गः ६० श्लोकः ७५-मैसूरे २१ जून १९६०दिनाङ्के ३८ पृष्ठस्था। पादटिप्पणी विलोक नीया

६९९ सर्गः ६० श्लोकः ९२ नवम्बरे १९५५ तमे वर्षे मिश्रदेशे आङ्ग्लाधिकारस्य विरोधे देशव्यापिन उपद्रवा अभवन्

७०० सर्गः ६१ श्लोकः १-आङ्ग्लपद्यस्य भावानु वादात्भवम्

७११ सर्गः ६१ श्लोकः १०६-१०७-उत्तरार्धं पूर्वार्धवाङ्ग्लकविताया भावा नुवादात्मकौ ।

७१२ „ „ ११९-इदमुद्धरणं यस्मात्पत्राद् गृहीतं तत्पूर्वं ५२९ पृष्ठे न्यस्तमस्ति ।

„ „ १२५-ईसवीयानां विवाहमधिकृत्य पाँपेनैकादशपाय सेन ३१ दिसम्बर १९३१ दिनाङ्के धर्माज्ञायामुक्तम्-तदनुसृत्येद-मुच्यते ।

७१३ „ „ १३०-आडीपसकांप्लेक्स इति मनोविकार विशेषः यत्र पुत्रस्य मातरि, पुत्र्याश्च पितरि कामाकर्षणं भवति । इति फ्रायड मतम् । "तदाधारस्तु आडीपसं थे ब्रीजराजस्य लेइसस्य पुत्र आसीत् । तज्जन्म समये भविष्यवाण्यभूत् अयं पुत्रः पितृघ्नो भविष्यति ।

७१४ इति लेइसेनासौ पशुचारिणे दत्तः, तेन कारिन्थ राजाय पालि-बसाय दत्तकपुत्रतया समर्पितः । युवराजेन आडीपसेन स्वजन्म कालिकीं भविष्य वाणीं श्रुत्वा गृहंत्यक्त्वा प्रवास आदृतः। मध्येमार्गमजानतातेनोत्तेजितेन जनको लेइसोहतः । जनन्या जोकेरन्या सह च परिणयः कृतः । इतीदमाख्यानम् ।"

७१७ सर्ग ६१ श्लोक: २२-रैमजेमेकडानल्डेन पञ्चत्रिंशस्य जनवर्यामेडिन-वरायामनुदारन्यूनियनिस्ट एसोसिएशन सङ्घ: समक्ष मुक्तमासीत्-अद्य सामाजिक्योऽसुविधा: प्रेरयन्ति यत्सर्वे सम्भूय कार्यं कुर्वन्तु। अयमेव सत्य समाजवाद: सत्या च राष्ट्रीयता वस्तुतो व्यक्तिवादोऽप्ययमेव।

७१९ सर्ग ६२ श्लोक: ६१-इदं पत्रं श्रीगान्धे: 'अनीतिकी राह पर' इत्याख्ये पुस्तके उद्धृतमस्ति।

७२७ सर्ग ६२ श्लोक: २२३-निकावरविल्किन्स:श्चार्ल्सडिकिन्वस्य डेविड कापरफील्ड नामकस्योपन्यासस्य प्रसिद्धं पात्रमस्ति। य: क्षणे रुष्ट: क्षणे तुष्टो यद् भविष्योऽदूरदर्शी सर्वदापद्ग्रस्त: स्वयं किञ्चिद्भविष्यतीत्याशास्ते।

७३४ सर्ग ६२ श्लोक: ३७१-अहमदाबादे ३ जनवरी १९३५ दिनाङ्के सरदार वल्लभ भाई पटेलेन प्रोक्तम्-सत्य समाजवादो ग्रामोद्योगानामुन्नतौ निहिता:। एतेषु लघुद्योगेषु पाश्चात्यदेशानामिव भारतस्य अर्थं नास्ति।

७३५ सर्ग ६२ श्लोक: ३९८-३९९-एकत्रिंशे लन्दनस्य द्वितीय गोलपीठ परिषदि श्री गान्धिना व्याख्यातमासीन्-विशेषत: कांग्रेसं तेषां कोटि संख्यानांमूकानमिर्धनाग्नां बुभुक्षितानां च

७३६ प्राणिनां प्रतिनिधिरस्तिये भारतस्य समलक्षग्रामेषु वसन्तीति।

७३८ सर्ग ६२ श्लोक: ४५२-पञ्चत्रिंशे २२ जनवरी दिनाङ्के नरेन्द्रमण्डल कुलपति: पटियाला सह शब्दो भारतीय राजनयिकानां चर्चायां पक्ष प्रतिपक्षौ प्रास्तौत्। प्रतिपक्षे सोऽवादीत्-ब्रिटिशसादृश्यस्थ राजकीय शरीरेऽपयशोदूषितं

७३९ ,, ,, राजनैतिक सिद्धान्त मलिनं कञ्चुकंधापयिष्यतीतितेन न जात्याशासनीयमिति।

७४१ सर्ग ६२ श्लोक: ४८८-हैदराबादे ३ अक्तूबर १९३४ दिनाङ्के हरिजन सेवक संघेनायोजिता श्रीगान्धिजन्मदिवस सभा चतुर्विंशतिहोरात: प्राक्प्रदत्तेनादेशेन बाब्लापसमयश्चावान्वि

७४३ सर्ग: ६२ श्लोक: ५१७-पञ्चत्रिंशाब्दे ६ जनवरी दिनाङ्के वटोदरायां

सरदार वल्लभ भाई पटेलेन स्वभाषणे अहस्ताक्षेपनीतिरति पोषिता: ।

७४६ सर्ग: ६२ श्लोक: ५८०-एच्० एन्० ब्रेल्सफोर्डस्य' प्रोपर्टी आफ पीस' इत्याख्य पुस्तकादयं भाव: समुद्धृत: ।

७४९ सर्ग: ६३ श्लोक: १९-श्री गान्धि: ४ दिसम्बर १९३२ दिनाङ्केऽनशनावसरे वक्तव्याद् गृहीतोऽय मंश: ।

७५० सर्ग: ६३ श्लोक २०-दि पावर आफ नान वायलैंस नामके पुस्तके रिचर्ड डी० ग्रेगेनाल विषये वैज्ञानिक्या दृशा विचारितम् । तदिदं पुस्तकं मनोरञ्जकं विचारोत्तेजकञ्चास्ति ।

७५६ सर्ग: ६३ श्लोक: ७२-राइनहोल्ड नाइवरस्या मटेरल मैन एण्ड इम्मौरल सोसायटी नाम्नि पुस्तके विचारोऽयं प्रवर्तित इति । स इति पदेन राइन होल नाइवरोऽत्र विवक्षित: ।

७५८ सर्ग: ६३ श्लोक: ६४-तत्रैव मारलमैन एण्ड इम्मारल सोसाइटी इति पुस्तके ।

७६७ सर्ग: ६३ श्लोक: १६६--१६७-उत्तरार्ध पूर्वार्धौ दि फ्यूचर आव एन्० इल्यूशन नाम्नि पुस्तके ।

७८१ सर्ग। ६५ श्लोक: १-वायरनस्य मौलिकाङ्ग्ल पद्यस्य भावानुपादात्मकमिदं पद्यम् ।

७८८ सर्ग: ६६ श्लोक:-प्रथमात्पूवम्-छायानिरङ्कुश मति स्वयमातपस्तु छायान्वित: शतश: एव निज प्रसङ्गम् ।
दु:खं सुखेन पृथगेव दु:ख पीडानुवेधविधुरा तु सुखस्य वृत्ति: ।
राजतरङ्गिणी ८-१२-१३

७९९ सर्ग: ६६ श्लोक ८५-मेक डूगैल्ड शाह आङ्ग्ल देशस्य प्रसिद्ध: आधुनिक मानस शास्त्री ।

८०४ सर्ग: ६७ श्लोक: ८५-सरविलियम करीमहाशयेन चतुस्त्रिंशाब्दस्य दिसम्बरमासे प्रो. एण्ड ओ. पोतकम्पन्या लन्दनायोजितायां समितौ सभापति पदासभासमाप्येवेदमिव सत्यं प्रकाशितं सम्भूत् ।

८०५ ,, ,, ,, ,, ८७-चाङ्कमिद्दंशास्त्रक सभूसमासं इक्नोमिस्ट पत्रेण सूचितम्—ओटावाणीपरिषत्समर्थनं कासु परिस्थितिषु सम्भवति स्म । ओटावापरिषत्तथा कर्तुं स्वल्पमे वापारयत् ।

८०६ ,, ,, ,, ८८ मेलबोर्नस्य एजानाम्नि पत्रेऽपि ओटा वा सन्धेररुचि-करत्वं प्रकाशितम् । प्रत्युत तस्य निरन्तरं बाधाकरत्व-मुल्लिखितम् ।

८०७ ,, ,, ,, ९२-दक्षिण अफ्रीका संघस्य रक्षा सचिवेनोक्तम-संघः साम्राज्यरक्षायाः कस्याश्चिदपिघोषणायां भागं न ग्रहीष्यतीति नापि बाह्य युद्धेसाहाय्यं करिष्यति ।

८०८ ,, ,, ,, ९८ लन्दनस्य इकनोमिस्ट पत्रं (अक्टूबर १९३४) कथयति भविष्यस्य कृते ब्रिटिशसाम्राज्यस्यायं लाभः प्रतिभाति यथा पृथिव्या अनेक भागेश महार्धता सोढयास्यात् ।

८०९ ,, ,, ,, ११२ २९ जनवरी १९३५ दिन समोजितायामेकस्यां सभायां दलस्य भाषणस्यांश लक्ष्मणपुरे ?

८१० सर्गः ६७ श्लोकः १२१ Try aga इतिनोक्त्वाTry aganr इति रटेयु-रित्यर्थः ।

८१२ सर्गः ६७ श्लोक १४३-होममेम्बरसरहेरीहेनेन २३ जुलाई १९३४ दिनाङ्के महाधारासभायां कारासु विशिष्टशिविरेषु च रुद्धानां वद्धदृष्टीनां संख्योक्तासीत्-वङ्गेषु-१५००-१६०० देवल्यां ५००, सम्पिण्डनेन २००० । येऽद्यापि नाभियोजिताः ।

८१३ सर्गः ६७ श्लोकः १९५-१२ नवम्बर १९३४ दिनाङ्के ।

८१४ सर्गः ६७ श्लोकः १०७-४ सितम्बर १९३५ दिनाङ्के हिन्दुस्थान संसदि मुद्रणालयविधानस्य प्रयोगबिषये शासकीयं वक्तव्यं पटले निहितमभूत् ।

८१९ सर्गः ६७ श्लो० ११५-उत्पादकानां श्रमिकाणाञ्च सहयोगात्सो-द्योगव्यवस्था, यस्यामुत्पत्तिविक्रययोरनुपातः स्थिरो भवति ।

८२२ सर्गः ६१ श्लोकः १२०-मानववादो नाम सा विचारधारा कार्यपद्धतिर्वास्ति, यत्र दैव्या धार्मिक्या वा दृशा तावन्न दृश्यते यावन्मानवहित दृशा विचार्यते । मानवहिताहितयोरेव वस्तुना-मुपयोगानुपयोगौ नियतौ स्तः ।

सर्गः ६१ श्लोकः-रूसदेशे यत्किञ्चिज्जातं तत्र साधारणेऽपि समये हिंसाया व्यवहारो मे नरो चतेस्म । तथापि समाजवादायाहं स्पृहयाम्येव ।

प्रकाशन-सूची

१.	गीतिकादम्बरी	२०.००
२.	अध्वरमीमांसाकुतूहलवृत्ति (चार भाग)	१०६.००
३.	पाणिनि कात्यायन एण्ड पतञ्जलि	१५.००
४.	पञ्चामृतम्	१५.००
५.	रस-सिद्धान्तः	१५.००
६.	संस्कृत साहित्य में शब्दालंकार	४०.००
७.	शास्त्र-दीपिका—प्रथम भागः	५०.००
८.	शास्त्र-दीपिका (प्रभा सहित द्वितीय भागः)	८०.००
९.	नित्यकर्मप्रकाशः	४.००
१०.	कृष्णयजुर्वेदीय-तैत्तिरीय संहिता (दो भाग)	११२.००
११.	चतुर्वेदचरित-चम्पू	८.७५
१२.	कात्यायन-श्रौत-सूत्रम् (दो भाग)	१५५.००
१३.	मीमांसान्यायप्रकाश	३७.००
१४.	मीमांसादर्शनम्	२४.००
१५.	आश्वलायनश्रौतसूत्रम्	९५.००
१६.	राजेन्द्र-चन्द्रोदय-चम्पू	२२.००
१७.	इन्दिरा-कीर्ति-कौमुदी	५५.००
१८.	शावरभाष्यम्	११०.००
१९.	संस्कारप्रकाश	३५.००
२०.	अथर्वसंहिता विधान	३०.००
२१.	गायत्री-वरिवस्या	२२.००
२२.	विश्व-संस्कृत-सम्मेलन-विशेषाङ्क	२४.०० व ५०.००
२३.	डा० राजेन्द्रप्रसाद जन्म-शताब्द-स्मृत्यङ्क	२४.००
२४.	श्रीमती इन्दिरा-गान्धी-श्रद्धाञ्जलि-विशेषाङ्क	१३५.००
२५.	डा० राधाकृष्णन् जन्म-शताब्द-स्मृत्यङ्क	२४.००

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठ
शहीद जीतसिंह मार्ग, कटवारिया सराय, नई दिल्ली-११००१६